'पूर्णा दर्वि' इति पूर्णपात्रं निधाय तत्र वरुणं संपूज्य जीर्णायां नूतनायां वा प्रतिमायां दुर्गामावाह्य पूजयेत् । तद्यथा—*पूर्वोक्तं मन्त्रमुक्त्वा—

"आगच्छ वरदे देवि दैत्यदर्पनिषूदनि ।
पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ॥
सर्वतीर्थमयं वारि सर्वदेवसमन्वितम् ।
इमं घटं समागच्छ तिष्ठ देवगणैः सह ॥
दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय ।
बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह ॥"

इत्यावाह्य पूर्वोक्तमन्त्रेण षोडशोपचारैः पूजयित्वा माषभक्तबलिं कूष्माण्डादिबलिं वा निवेदयेत् ।

"सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकम् ।
पञ्चरत्नं समाख्यातं पावनं पावनेषु तत् ॥"

कालिकापुराणे—

"कनकं हीरकं नीलं पद्मरागं च मौक्तिकम् ।
एतानि पञ्चरत्नानि रत्नशास्त्रविदो विदुः ॥"

जीर्णां प्रतिमाञ्च कुम्भे ततः पश्चाद्वा स्थाप्य नूतनायां तु धातुपट्टयामग्न्युत्तारणं कार्यम् । ततः प्राणप्रतिष्ठा कार्या । मृदादिमय्यां च केवलप्राणप्रतिष्ठैव नाग्न्युत्तारणमिति विशेषः । *पूर्वोक्तं 'जयन्ती मङ्गला काली' इति, नवाक्षरं वा । 'आगच्छ' इत्यादि अयं घटे दुर्गावाहनप्रकारः । प्रतिमायां तु—

"एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा ।
आवाहयाम्यहं देवि सर्वकामार्थसिद्धये ॥
अस्यां मूर्तौ समागच्छ स्थितिं मत्कृपया कुरु ।
रक्षां कुरु सदा भद्रे विश्वेश्वरि नमोऽस्तु ते ॥"

'भगवति दुर्गे इहागच्छ इह तिष्ठ इह सन्निधेहि स्थिरा भव सु-

S. V. D. College Library, Acc. No. Date

प्रसन्ना भव' इत्यावाह्य पूर्वोक्तमन्त्रेण वैदिकेन वा प्रणवादिनमोन्तनाम्ना वा षोडशोपचारैश्छत्रचामरादिराजोपचारैश्च संपूज्य प्रणम्य महिषघ्नीत्यादिवक्ष्यमाणमन्त्रैः प्रार्थयेत् । यदि षष्ठ्यादिपक्षस्तदा प्रतिमास्थापनं प्रतिपदि न कार्यं किन्तु षष्ठ्यामेवेति । स्कान्दे—

"दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥
अनेनैव तु मन्त्रेण जपहोमादि कारयेत् ॥"

इत्युक्तम् । गौडास्तु प्रतिमापुरः अष्टपत्रे कमले अष्टशक्तिस्थापनादिकं कुर्वन्ति । ताश्च—

"उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चण्डरूपाऽतिचण्डिका ॥" इति ।

तत्र पूर्वपत्रे उग्रचण्डा अष्टादशभुजा । तद्ध्यानं यथा—

"उग्रचण्डां धूम्रवर्णामष्टादशभुजैर्युताम् ।
खेटकं कार्मुकं घण्टां दर्पणं तर्जनीं ध्वजम् ॥
कपालमङ्कुशं चर्म बिभ्रती वामबाहुषु ।
दक्षेषु धारिणीं खड्गं बाणं शूलं गदां तथा ॥
शङ्खं डमरुकं चक्रं मुसलं पट्टिशं तथा ।"

इति ध्यात्वा 'ॐउग्रचण्डे इहागच्छ'इत्यावाह्य 'ॐह्रीं श्रीं उग्रचण्डायै नमः' इति यथाशक्त्युपचारैः संपूज्य प्रणमेत्—

ॐ"उग्रचण्डे नमस्तुभ्यं चण्डवैरिविनाशिनि ।
सर्वपापहरे देवि वरदा भव सर्वदा ॥" इति ।

ततोऽग्निपत्रे प्रचण्डा षोडशभुजा । तद्ध्यानं यथा—

"रुद्रचण्डां नीलवर्णां बाहुषोडशशालिनीम् ।
खेटकं कार्मुकं घण्टां दर्पणं तर्जनीं ध्वजम् ॥
कपालमङ्कुशं वामे दक्षिणे धारिणीमसिम् ।

S.V.O. Library
TIRUPATI.
Acc. No.....

बाणं शूलं गदां शङ्खं डमरुं चक्रमूसलम् ॥"

इति ध्यात्वा प्रचण्डां पूर्ववदावाह्य 'ॐह्रीं श्रीं प्रचण्डायै नमः' इति मन्त्रेण पूर्ववत् पूजयेत् प्रणमेच्च—

"प्रचण्डे पुत्रदे नित्यं प्रचण्डगणसंस्थिते ।
सर्वानन्दकरे देवि तुभ्यं नित्यं नमो नमः ॥" इति ।

प्रणवः ह्रीं श्रीं सर्वत्र तत्तच्छक्तिनाम चतुर्थ्यन्तं तत्र तत्र बोध्यम् । ततो याम्यपत्रे चतुर्दशभुजा चण्डोग्रा । तद्ध्यानम् ।

"चामुण्डां घोरमेघाभां चतुर्दशभुजान्विताम् ।
खेटकं कार्मुकं घण्टां कपालं फलकं ध्वजेम् ॥
दर्पणं वामतो दक्षे धारिणीं खड्गशूलके ।
बाणं शङ्खं डमरुकं चक्रं मुसलमेव च ॥"

इति ध्यात्वा चण्डोग्रामावाह्य संपूज्य प्रणमेत्—

धात्री त्वं सर्वभूतानां सर्वभूतभयंकरी ।
देवि त्वं सर्वकार्येषु वरदा भव सर्वदा ॥" इति ।

निर्ऋतिपत्रे द्वादशभुजा चण्डनायिकाध्यानम्—

"ॐचण्डनायिकां कृष्णां भुजैर्द्वादशभिर्युताम् ।
खेटकं कार्मुकं घण्टां कपालं फलकं ध्वजम् ॥
वामेषु धारिणीं दक्षे खड्गं बाणं त्रिशूलकम् ।
शङ्खं च मुसलं चक्रं सर्वशत्रुविनाशिनीम् ॥

चण्डनायिकाऽऽवाहनादि कृत्वा प्रणमेत्—

"या सिद्धिरिति नाम्ना च देवेशवरदायिनी ।
कालिकल्मषनाशाय नमामि चण्डनायिकाम् ॥" इति ।

वारुणपत्रे दशभुजाचण्डाध्यानम्—

"तमालाभां चण्डरूपां दशहस्तां च खेटकम् ।
कार्मुकं फलकं घण्टां कपालं वामबाहुषु ॥
दक्षिणे खड्गशूले वै चक्रं डमरुमूसले ॥"

इत्यावाहनादि प्रणमेत्-

"देवि चण्डाम्बिके चण्डे चण्डारिविजयप्रदे ।
धर्मार्थमोक्षदे देवि नित्यं मे वरदा भव ॥" इति ।

वायव्यपत्रे अष्टभुजां चण्डवतीं ध्यायेत्-

चण्डवतीं घनश्यामामष्टबाहुं च खेटकम् ।
कार्मुकं च कपालं च ध्वजं वामेषु धारिणीम् ॥
दक्षे खड्गं च त्रिशूलं च बाणं चक्रं च मुद्गरम् ।

ततश्चण्डवती मावाह्य प्रणमेत्-

"या सृष्टिस्थितिसंहारगुणत्रयसमन्विता ।
या पराः शक्तयस्तस्यै चण्डवत्यै नमो नमः ॥" इति ।

सौम्यपत्रे षड्भुजाचण्डरूपाध्यानम्—

"षड्भुजां चण्डमथिनीं कपालं खेटकं धनुः ।
वामेन बिभ्रती दक्षे खड्गं बाणं त्रिशूलकम् ॥"

आवाहनं पूजनं च कृत्वा प्रणमेत्—

"चण्डरूपात्मिके चण्डे चण्डनायकनायिके ।
सर्वसिद्धिप्रदे देवि नित्यं तुभ्यं नमो नमः ॥" इति ।

ईशानपत्रे चतुर्भुजाऽतिचण्डाध्यानम्—

"चण्डाऽसुरस्य मथिनीं कृष्णवर्णां चतुर्भुजाम् ।
चापं कपालं वामे वै दक्षिणे शूलसायके ॥"

अतिचण्डिकामावाह्य संपूज्य प्रणमेत्—

"बालार्करुणनेत्रा या सर्वदा भक्तवत्सला ।
चण्डाऽसुरस्य मथिनी वरदा त्वतिचण्डिका ॥" इति ।

येषां कुले कुम्भस्थापनं बलिदानादि नास्ति तैस्तन्न कार्यम् । दुर्गा प्रतिमा महिषघ्नीत्यादि प्रार्थना प्रतिमाया अभावे प्रकारश्चाग्रे बोध्यः ।

ततः कुमारीपूजा । तदुक्तं हेमाद्रौ स्कान्दे—

*"एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव च ।
द्विगुणं त्रिगुणं वाऽपि प्रत्येकं नवकं तु वा ॥"

तथा—

"नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु ।
एकवृद्ध्या लभेत्क्षेममेकैकेन श्रियं लभेत् ॥
एकवर्षा तु या कन्या पूजार्थं तां विवर्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥"

तेन*द्विवर्षामारभ्य दशवर्षापर्यन्ता एव पूज्या न त्वन्याः । तासां च क्रमेण—कुमारिका, त्रिमूर्तिः, कल्याणी, रोहिणी, काली, चण्डिका, शाम्भवी, दुर्गा, सुभद्रा इति नामभिः पूजा कार्या । आसां च प्रत्येकं पूजामन्त्राः फलविशेषाश्च तत्रैव ज्ञेयाः ।

---

*एकैकामिति पञ्च पक्षाः । देव्युपासकस्तु शुक्लाष्टम्यादावपि कुमारीं भोजयेत् ।

"शुक्लाष्टमीचतुर्दश्योर्नवम्यां च विशेषतः ।
कृष्णपक्षे विशेषेण भोजयेत्तु कुमारिकाम् ॥"

इति देवीपुराणात् । *द्विवर्षामिति ।

"द्विवर्षकन्यामारभ्य दशवर्षावधिक्रमात् ।
कुमारिका द्विवर्षा च त्रिवर्षा च त्रिमूर्तिनी ॥
चतुर्वर्षा तु कल्याणी पंचवर्षा तु रोहिणी ।
षड्वर्षा तु भवेत्काली सप्तवर्षा तु चण्डिका ॥
अष्टवर्षा शाम्भवी तु (१)कन्या तु नवभिः स्मृता ।
दशवर्षा सुभद्रेति नामभिः परिकीर्तिता ॥"

---

(१)यद्यप्यत्र सर्वेष्वादर्शपुस्तकेषु 'कन्या' इत्येव पाठो दृश्यते तथाऽपि मूले, पूजामन्त्रेषु चात्र दुर्गाया एव दर्शनात् 'दुर्गा तु नवभिः स्मृता' इत्येव पाठोऽपेक्ष्यते इति बोध्यम् ।

"जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥"
इति कुमार्याः पूजामन्त्रः ।

"त्रिपुरां त्रिपुराधारां ज्ञानमार्गस्वरूपिणीम् ।
त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥"
इति (१)त्रिमूर्त्याः ।

"कालातीतां कालमूर्तिं करुणाहृदयां शिवाम् ।
कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहम् ॥"
इति कल्याण्याः ।

"अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् ।
अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥"
इति रोहिण्याः ।

"कामचारीं कालरात्रिं कालचक्रस्वरूपिणीम् ।
कामदां करुणाधारां कालीं संपूजयाम्यहम् ॥"
इति काल्याः ।

"चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जनीम् ।
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ॥"
इति चण्डिकायाः ।

"सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ।
सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम् ॥"
इति शाम्भव्याः ।

"दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ।
पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥"
इति दुर्गायाः ।

"सुन्दरीं स्वर्णवर्णाभां सर्वसौभाग्यदायिनीम् ।
सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम् ॥"

---

(१)अत्र सर्वत्र पूजामन्त्र इत्यनुषज्यते ।

इति सुभद्रायाः। अथ पूजाफलानि।

"आयुष्यबलवृद्ध्यर्थं कुमारीं पूजयेन्नरः।
आयुष्कामस्त्रिमूर्तिन्तु त्रिवर्गस्य फलाप्तये॥
अपमृत्युव्याधिपीडादुःखानामपनुत्तये।
सौख्यधान्यधनारोग्यपुत्रपौत्रादिवृद्धये॥
कल्याणीं पूजयेद्धीमान्नित्यं कल्याणसिद्धये।
आरोग्यसुखकामी च जयकामी तथैव च॥
यशःकामी नरो नित्यं रोहिणीं परिपूजयेत्।
विद्यार्थी विजयार्थी च राज्यार्थी च विशेषतः॥
शत्रूणां च विनाशार्थी कालिकां पूजयेन्नरः।
ऐश्वर्यशुभकामी च स्वर्गकामी च यो नरः॥
संग्रामे जयकामी च चण्डिकां परिपूजयेत्।
दुःखदारिद्र्यनाशाय नृपसंमोहनाय च॥
महापापविनाशाय शाम्भवीं च प्रपूजयेत्।
सर्वोत्कटानां शत्रूणामुग्रसाधनकर्मणि॥
दुर्गां दुर्गार्तिनाशाय पूजयेद्व्रततो बुधः।
सौभाग्यधनधान्यादिवाञ्छितार्थफलाप्तये॥
सुभद्रां पूजयेन्मर्त्यो दासादीनां विवृद्धये॥" इति।

अलाभे तु देवीपुराणे—

"तावत्संपूजयेत्कन्यां यावत्पुष्पं न दृश्यते।"

पूजाप्रकारो देवीपुराणे—ब्रह्मोवाच—

"न तथा तुष्यते शक्र होमदानजपेन तु।
कुमारीभोजनेनात्र यथा देवी प्रसीदति॥
(अत्र नवरात्रे)
प्रक्षाल्य पादौ सर्वासां कुमारीणां च वासव।

*सामान्यतस्तु—

"मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥"
"एवमभ्यर्चनं कुर्यात्कुमारीणां प्रयत्नतः ।
कञ्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ॥
नानाविधैर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः ॥"

तथा—

"*ग्रन्थिस्फुटितशीर्ष्णाङ्गीं रक्तपूयव्रणाङ्किताम् ।

क्षालिते भूतले रम्ये तत्र चासनसंस्थिताः ॥
पूजयेद्गन्धपुष्पैश्च स्वाग्भिश्चापि मनोरमैः ।
पूजयित्वा विधानेन भोजनं तासु दापयेत् ॥
खण्डलड्डुगुडं सर्पिर्दधि क्षीरं समाक्षिकम् ।
तासां देयं कुमारीणां शनैर्भुञ्जापयेत्तु ताः ॥
पानीयं याचितं देयमन्नं वा याचितं शुभम् ।
तास्तृप्तास्तु यदा सर्वास्ततस्त्वाचमनं ददेत् ॥
आचम्य चाक्षतान् दत्त्वा त्वया क्षन्तव्यमित्युत ।
दातुः शिरसि दातव्याः कन्यकाभिरथाक्षताः ॥
तेनापि प्रणिपातस्तु कर्तव्यो भक्तिपूर्वकः ।
अनेन विधिना शक्र देवी क्षिप्रं प्रसीदति ॥" इति ।

*सामान्यतः सर्वासामेक एव मन्त्र इत्यर्थः ।

"प्रातःकाले विशेषेण कृताभ्यङ्गो विशेषतः ।
आवाहयेत्ततः कन्यां मन्त्रेणानेन भार्गव ॥"

इति वचनात् । अयं च विशेषमन्त्रैर्व्यवस्थितः । *ग्रन्थयः कूर्पराद्याः ।

"हीनाधिकाङ्गीं कुष्ठीं च विनाशिकुलसम्भवाम् ।'

इति पूर्वार्द्धे । विनाशि सन्ततिशून्यम् । 'कुष्ठादिविकारा वृ

जात्यन्धां केकरां काणीं कुरूपां*तनुरोमशाम् ॥
संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवाम् ॥"

तथा—

'ब्राह्मणीं सर्वकार्येषु जयार्थं नृपवंशजाम् ।
लाभार्थे वैश्यवंशोत्थां सुखार्थे शूद्रवंशजाम् ॥
दारुणे चान्त्यजातानां पूजयेद्विधिना नरः ॥' इति ॥

अत्र वेदपारायणमप्युक्तं रुद्रयामले—

"एवं चतुर्वेदविदो विप्रान्सर्वान् प्रसादयेत् ।
तेषां च वरणं कार्यं वेदपारायणाय वै॥" इति ।

तथा—

*एकोत्तराभिवृद्ध्या तु नवमी यावदेव हि ।

कुलां तथा' इति पाठान्तरम् । *तनुरोमशामिति कर्मधारयः ।

*एकोत्तरेति । प्रदोषे विशेषतः पूजानन्तरं रात्रौ चण्डीपाठः, तदसम्भवे प्रातर्गीतवादित्रनिर्घोषैः पूजाऽनन्तरं कार्यः । जपो जापश्च नारायणादीन्नमस्कृत्य कार्यः ।

"नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥"

इति भविष्यात् । जयश्च—

"अष्टादशपुराणानि रामस्य चरितं तथा ।
विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत ॥
कार्ष्णश्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ।
शैवधर्माश्च राजेन्द्र मानवोक्ता महीपते ॥
जयेति नाम चैतेषां प्रवदन्ति मनीषिणः ॥"

इति भविष्ये विहितः । देवीगृहेऽहोरात्रं दीपाश्च ज्वालनीयाः । पाठकोऽपि ब्राह्मण एव कार्यः ।

"ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात् ।

चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ॥'

तिथितत्त्वे वाराहीतन्त्रे—

'प्रणवं चादितो जप्त्वा स्तोत्रं वा संहितां पठेत् ।
अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः ॥
आधारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः ।
हस्तसंस्थापनादेव यस्माद्वै विफलं भवेत् ॥

श्रुत्वाऽन्यवर्णजाद्राजन् वाचकान्नरकं व्रजेत् ॥'"

इति भविष्यात् । एवम्—

"अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ।
कृते मध्ये विरामे तु अध्यायादि पठेत् पुनः ॥"

इति द्रष्टव्यम् । कामपाठफलं च देवीपुराणे—

"चण्डीपाठफलं देवि शृणुष्व गदतो मम ।
एकावृत्तादिपाठानां यथावत्कथयामि ते ॥
संकल्पपूर्वं संपूज्य न्यस्याङ्गेषु मनून् सकृत् ।
पाठात्बलिप्रदानाच्च सिद्धिमाप्नोति मानवः ॥
उपसर्गोपशान्त्यर्थं त्रिरावृत्तं पठेन्नरः ।
ग्रहोपशान्तौ कर्तव्यं पञ्चावृत्तं वरानने ॥
महाभये समुत्पन्ने सप्तावृत्तं समुन्नयेत् ।
नवावृत्ताद्भवेच्छान्तिर्वाजपेयफलं लभेत् ॥
राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् ।
अर्कावृत्ते कामसिद्धिर्वैरहानिश्च जायते ॥
मन्वावृत्तादिपुर्वैश्यस्तथा स्त्री वश्यतामियात् ।
सौख्यं पञ्चदशावृत्ताच्छ्रियमाप्नोति मानवः ॥
कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः ।
राज्ञां भीतिविमोक्षाय वैरस्योच्चाटनाय च ॥
कुर्यात्सप्तदशावृत्तं तथाऽष्टादशकं प्रिये ।

एवं च लिखितं यच्च*शूद्रेण लिखितं भवेत् ।
*अब्राह्मणेन लिखितं तच्चापि विफलं भवेत् ॥
ऋषिच्छन्दादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः ।
स्तोत्रे न दृश्यते यत्र प्रणवं तत्र विन्यसेत् ॥
सर्वत्र पाठो विज्ञेयस्त्वन्यथा विफलं भवेत् ॥'

एवं नवमीपर्यन्तं प्रत्यहं कुर्यात् । अत्र विशेषो हेमाद्रौ-देवीपुराणे—

'यदाद्ये दिवसे कुर्याच्चण्डिकापूजनादिकम् ।

महारणविमोक्षाय त्रिंशावर्तं पठेत्सुधीः ॥
पञ्चविंशावर्तनात्तु भवेद्बन्धविमोक्षणम् ॥
संकटे समनुप्राप्ते दुश्चिकित्स्यामये तथा ॥
जातिध्वंसे कुलोच्छेद आयुषो नाश आगते ।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ॥
तथैव त्रिविधोत्पाते तथा चैवातिपातके ।
कुर्याद् यत्नाच्छतावृत्तं ततः संपद्यते शुभम् ॥
श्रियो वृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथा परा ।
मनसा चिन्तितं देवि सिद्ध्येदृष्टोचराच्छतात् ॥
शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ।
सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥
भुक्त्वा मनोरथान्कामान् नरो मोक्षमवाप्नुयात् ।
यथाऽश्वमेधः क्रतूनां देवानां च यथा हरिः ॥
स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः ।
अथवा बहुनोक्तेन किमेतेन वरानने ॥
चण्ड्याः शतावृत्तिपाठात्सर्वाः सिद्ध्यन्ति सिद्धयः ॥" इति ।

*शूद्रेणेति । 'क्षतिना' इति वा पाठः । क्षारणा लेखोपजीविनेति यावत् । *अब्राह्मणेनेति । तदनुपजीव्यर्थकं भवेदिति ।

द्विगुणं तद् द्वितीयेऽह्नि त्रिगुणं तत् परेऽहनि ॥
नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ॥' इति ।
एतेन नवरात्रे पूजैव प्रधानमुपवासादि स्वङ्गमिति गम्यते । तिथिह्रासे तु तिथिद्वयनिमित्तं पूजादि *महालयश्राद्धवदेकदिने *आवृत्त्या कार्यम् । वृद्धौ *तद्वदेवावृत्तिः । ततो नवरात्रोपवासादिसंकल्पं कुर्यात् । स्वयमशक्तावन्येन वा पूजादि कारयेत् ।
'स्वयं वाऽप्यन्यतो वाऽपि पूजयेत्पूजयीत वा ।'
इति तरङ्गिण्यां देवीपुराणात् । इदं च देवीपूजनं शुक्रास्तादावपि कार्यम् । तदुक्तं धर्मप्रदीपे—
'नष्टे शुक्रे तथा जीवे सिंहस्थे च बृहस्पतौ ।
कार्या चैव स्वदेव्यर्चा*प्रत्यब्दं कुलधर्मतः ॥' इति ।
मलमासे तु वचनाभावान्न भवति ॥
अत्र साश्वस्याश्वपूजनमुक्तं मदनरत्ने देवीपुराणे—
'आश्वयुक्शुक्लप्रतिपत्स्वातीयोगे शुभे दिने ।
पूर्वमुच्चैःश्रवा नाम प्रथमं श्रियमावहत् ॥
तस्मात्साइवैर्नरैस्तत्र पूज्योऽसौ अश्वया सह ।
पूजनीयाश्च तुरगा नवमी यावदेव हि ॥

"शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः ।
न कार्यासक्तमनसा कार्यं स्तोत्रस्य वाचनम् ॥" इति ।
*महालयेति । एकस्मिन्दिने*आवृत्त्या एकेन अनुष्ठानेन, तन्त्रेणेति यावत् । तथा च महालये यथा तन्त्रं तथा देवीपूजायामपीत्यर्थः । *तद्वत् महालयवत् । *प्रत्यब्दमिति आरम्भनिषेधार्थम् ।
"अस्तंगते गुरौ शुक्रे सिंहस्थे वसुधाधिपे ।
देवीपूजनमुद्दिष्टं स्थविरे बालके तथा ॥

*शान्तिः स्वस्त्ययनं कार्यं तदा तेषां दिने दिने ।
धान्यं भल्लातकं कुष्ठं वचा सिद्धार्थकास्तथा ॥
पञ्चवर्णेन सूत्रेण ग्रन्थिं तेषां तु बन्धयेत् ।
*वायव्यैर्वारुणैः सौरैः शाक्तैर्मन्त्रैः सवैष्णवैः ॥
वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिने दिने ॥'

कल्पतरौ त्वेतदग्रेऽन्यदपि—

'ज्येष्ठायोगे पुरा तत्र गजाश्चाष्टौ महाबलाः ।
पृथिवीमावहन्पूर्वं सशैलवनकाननाम् ॥
कुमुदैरावतौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलस्तस्मात्तांस्तत्र पूजयेत् ॥
शाक्रादृक्षात्समारभ्य नवम्यन्तं च पूर्ववत् ॥'

अश्ववद्धोमादीत्यर्थः ॥

अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरङ्गिण्यां भविष्ये—

'केशसंस्कारद्रव्याणि प्रदद्यात् प्रतिपद्दिने ।
*पक्वतैलं द्वितीयायां केशसंयमहेतवे ॥
(पट्टदोरमिति गौडपाठः ।)
दर्पणं च तृतीयायां सिन्दूरालक्तकं तथा ।

आद्यारम्भे विरामः स्याद् द्वितीयादौ न चिन्तयेत् ।
मलमासे न कर्तव्यं नवदुर्गोत्सवव्रतम् ॥"
इति देवीपुराणात् ।

*शान्तिः=अश्वशान्तिर्गजशान्तिश्च शान्तिमयूखादौ प्रसिद्धा । *वायव्यैरिति । वैदिकैर्नामभिर्मन्त्रैर्वाऽष्टोत्तरशतं होमः ।

*पक्वतैलमिति । 'पट्टदोरम्' इति वा पाठः । सिन्दूरं भाले, अलक्तकं पादयोः । दिवेति बोधने नवमीपूर्वाह्णःकालः दिनद्वययोगे तु आर्द्रायोगः । उपवासोऽप्यस्यामुक्तः ।

"तस्मादियं महापुण्या नवमी पापनाशिनी ।

मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमण्डनम् ॥
पञ्चम्यामङ्गरागं च शक्त्यालंकरणानि च ।
षष्ठ्यां बिल्वतरौ बोधं सायंसंध्यासु कारयेत् ॥
सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् ।
उपोषणमथाष्टम्यामात्मशक्त्या च पूजनम् ॥
नवम्यामुग्रचण्डायाः पूजां कुर्याद्बलिं तथा ।
संपूज्य प्रेषणं कुर्यादशम्यां शाबरोत्सवैः ॥
अनेन विधिना यस्तु देवीं प्रीणयते नरः ।
स्कन्दवत्पालयेद्देवी तं पुत्रधनकीर्तिभिः ॥'

कृत्यतत्त्वार्णवे लैङ्गे—

'कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभेऽपि वा ।
नवम्यां बोधयेद्देवीं महाविभवविस्तरैः ॥
शुक्लपक्षे चतुर्थ्यां तु देवीकेशविमोचणम् ।
प्रातरेव तु पञ्चम्यां स्नापयेत्सुशुभैर्जलैः ॥
षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेऽधिवासनम् ।
सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणम् ॥
पूजा च जागरश्चैव नवम्यां विधिवद्बलिः ।
विसर्जनं दशम्यां तु क्रीडाकौतुकमङ्गलैः ॥'

*'अत्र नवम्यां बोधनासामर्थ्ये षष्ठ्यां बोधनमिति स्मार्ताः । फलभूमार्थिनः समुच्चय इत्यन्ये । नवम्यां मन्त्रः कालिकापुराणे—

*'इषे मास्यसिते पक्षे नवम्यामार्द्रभे दिवा ।
श्रीवृक्षे बोधयामि त्वां यावत्पूजां करोम्यहम् ॥'

उपोष्या तु प्रयत्नेन सततं सर्वपार्थिवैः ॥"

इति भविष्यात् । बोधने षष्ठीनवमीविरोधादाह—*अत्रेति । *इषे इति । पूर्णिमान्तमानेन । दानं पूजासमकल्पं बलिदाना-

अत्र स्त्रीव्रते विशेषः परिभाषायां ज्ञेयः ॥
अत्राशौचे विशेषो निर्णयामृते विश्वरूपनिबन्धे—

'आश्विने शुक्लपक्षे तु प्रारब्धे नवरात्रके ।
शावाशौचं समुत्पन्ने क्रिया कार्या कथं बुधैः ॥
सूतके वर्तमाने च तत्रोत्पन्ने सदा बुधैः ।
देवीपूजा प्रकर्तव्या पशुयज्ञविधानतः ॥
सूतके पूजनं प्रोक्तं दानं चैव विशेषतः ।
देवीमुद्दिश्य कर्तव्यं तत्र दोषो न विद्यते ॥' इति ।

कालादर्शे विष्णुरहस्येऽपि—

'पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः ।
तत्कर्तव्यं नरैः शुद्धं *दानार्चनविवर्जितम् ॥' इति ।

*गौडनिबन्धे तिथितत्त्वेऽप्युक्तम्—'आश्विनकृष्ण-नवम्यादि शुक्लप्रतिपदादि षष्ठ्यादि सप्तम्यादि चैकं कर्म । अतश्च मध्ये आशौचपातेऽपि न दोषः, *'संकल्पो व्रतसत्रयोः' इति विष्णूक्तेः इति । *आरब्धं स्वयमेव कार्यम्, अनारब्धं त्वन्येन कारयेदिति दिवोदासः । रजस्वला त्वन्येन कारयेत् । सूतकादिवद्विशेषवचनाभा-

---

ङ्गमधिकृत्याह—*दानार्चनेति । नन्वस्तु प्रधानयोरप्यर्चनदानयोर्निषेध इत्यत्राह—*गौडेति । *संकल्प इति । एतच्चाशौचेन संकल्पत्यागो मा प्रसाङ्क्षीत् इत्येवमर्थम् । आशौचं निमित्तीकृत्यापूर्वसंकल्पविधौ गौरवात् । ततश्च कर्तव्यत्वेन साङ्गप्रधानं प्राप्नुयात् । तत्र दानार्चनविवर्जितमित्यङ्गयोरेव दानार्चनयोर्निषेधो न तु प्रधानयोस्तयोः । अन्यथा व्रतान्तरेऽङ्गयोरेव तु प्रधानयोरिति वैरूप्यादू अत्र प्रधानयोस्तयोर्निषेद्धुमशक्यत्वाच्च । एवञ्च व्रतशब्देन प्रधानभूतपूजाबलिदानादिव्रतस्यापि ग्रह इति भावः । वर्तमाने तत्रोत्पन्ने इत्यनयोः फलमाह—*आरब्धमिति । पूर्वसंकल्पितत्वाविशेषणाच्च ।

त्। स्त्रीणां च नवरात्रे ताम्बूलादिचर्वणं भवति। तदुक्तं व्रतहेमाद्रौ गारुडे—

'गन्धालंकारताम्बूलपुष्पमालानुलेपनम्।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम्॥' इति।

एतत्सभर्तृकोपवासविषयम्। अन्यश्चात्र विशेषः परिभाषायामुक्तः।

आश्विनशुक्लपञ्चम्यामुपाङ्गललिताव्रतं महाराष्ट्रेषु प्रसिद्धम्। तत्र यद्यपि कथायां कालविशेषो नोक्तस्तथापि—

'रात्रौ जागरणं कुर्याद्गीतवादित्रनिःस्वनैः।'

इति रात्रौ जागरोक्तेः शक्तिपूजाया रात्रौ *प्राशस्त्याच्च रात्रिव्यापिनी ग्राह्येति केचित्। वस्तुतस्तु वचनं विना रात्रिपूजायां मानाभावाज्जागरस्य चा*ङ्गत्वाद्युग्मवाक्यात्

'भुक्त्वाजागरणे नक्ते चन्द्रार्घ्यव्रत एव तथा।
तारात्रतेषु सर्वेषु रात्रियोगो विशिष्यते॥'

इति कालहेमाद्रौ वचनाच्च पूर्वविद्धा ग्राह्या। रात्रिशब्दः पूर्वविद्धावचन इति हेमाद्रिः। अस्य च भुक्त्वाजागरणरूपत्वादिति साधु प्रतीमः। भुक्त्वा जागरणं यत्रेत्येकं पदम्, तस्मिन्व्रते इत्यर्थः। अन्यथा भुक्त्वेत्यसंगतेः। दिवोदासीयेप्येवम्।

आश्विनशुक्लपक्षे मूलनक्षत्रे पुस्तकेषु सरस्वतीस्थापनम्। यथोक्तं निर्णयामृते देवीपुराणे—

'मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनम्।
उत्तरासु बलिं दद्याच्छ्रवणेन विसर्जयेत्॥' इति।

---

*प्राशस्त्यादिति। निशि भ्रमन्तीत्युक्तेः। *अङ्गत्वादिति। न च—

रुद्रयामलेऽपि—

'मूलऋक्षे सुराधीश पूजनीया सरस्वती ।
पूजयेत्प्रत्यहं देव यावद्वैष्णवमृक्षकम् ॥
नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन ।
पुस्तके स्थापिते देव विद्याकामो द्विजोत्तमः ॥'

(१)(संग्रहे—

'आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीम् ।
मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् ॥')

मूलस्याद्यपादे आवाहनमिति शिष्टाः । श्रवणाद्यपादे च विसर्जयेत् ।

'आदिभागो निशायां तु श्रवणस्य यदा भवेत् ।
संप्रेषणं तदा देव्या दशम्यां च महोत्सवः ॥'

इति चिन्तामणौ ब्रह्माण्डपुराणात् ॥

अथ षष्ठी । गौडनिबन्धे देवीपुराणे—

'व्रतस्यास्य फलं प्रोक्तं जागरे मुनिसत्तम' ।

इति जागरस्य फलसम्बन्धात् प्रधानमिति वाच्यम् । करण्डपिधानं प्रकृत्य—

'तत्पूजयन्निजगृहे परां वृद्धिमवाप्स्यति ।'

इति फलसम्बन्धात् पूजैव प्रधानं "धातुसम्बन्धे प्रत्ययाः" (पा० सू० ३-४-१) इति पाणिनिस्मरणात्, जागरस्तु वायनदानादिवदङ्गम् । फलवत्सन्निधावफलं तदङ्गमिति न्यायात् व्रतस्यास्येति तु जागरभिन्नत्वेन प्रतीतेस्तस्यैव जागरे सति फलसम्बन्धबोधकं न तु जागरप्राधान्यबोधकमिति भावः । वस्तुतस्तु भुक्त्वा-जागरणवाक्यं तत्प्रधानकव्रतपरम् । अङ्गानुरोधेन निर्णयस्यासिद्धत्वात् । तस्मादिह मध्याह्नव्याप्त्यैव निर्णयः । पूजाव्रतेष्वित्युक्तेः ।

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

दिनद्वये सत्त्वेऽसत्त्वे च युग्मवाक्यादिति । स्कान्दे—

"शुक्लपक्षस्य पञ्चम्यामिषे मासि चरेद्व्रतम् ।
गर्जितं सन्ध्ययोस्त्याज्यं दिनवृद्धौ क्षये तथा ॥
निर्वर्त्यावश्यकं कर्म शुची रागविवर्जितः ।
चत्वारिंशत्तथा चाष्टौ कल्पितानि विधानतः ॥
दन्तकाष्ठान्युपादाय तडागं वा नदीं व्रजेत् ।
दन्तधावनपूर्वाणि मज्जनानि समाचरेत् ॥
"आयुर्बलं यशो वर्चः प्रजापशुवसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते ॥
मुखदुर्गन्धिनाशाय दन्तानां च विशुद्धये ।
पीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥"
[इति]मन्त्रः ।
ततो यथाविधि स्नात्वा शुक्लवासा गृहं व्रजेत् ।
शुचौ देशे मण्डपिकां कृत्वा चातिमनोहराम् ॥
सौवर्णीं प्रतिमां कृत्वा स्थापितां तत्र पूजयेत् ।
(प्रतिमा च पिधानकं, सौवर्णीत्युपलक्षणम् ।)
अथ दूर्वाङ्कुरान्साग्रांश्चत्वारिंशत्तथाष्टभिः ।
अधिकान्हस्त आदाय मन्त्रमेतं जपेद्बुधः ॥
'बहुप्ररोहा सततमप्रता हरितालिका ।
यथेऽयं ललिते मातस्तथा मे स्युर्मनोरथाः ॥'
(दूर्वापूजामन्त्रः ।)
इत्युक्त्वा पूजयेद्देवीमेवमेवंविधां सुधीः ।
चत्वारिंशतिकृत्वस्तु अष्टकृत्वः समाचरेत् ॥"

एवं विधां पूजामष्टाचत्वारिंशद्वारं समाचरेदित्यर्थः । एकैकाष्टचत्वारिंशद्दूर्वा विज्ञायन्ते ।

"ततो वाणकमादाय विंशत्या वटकादिकम्" ।
वटकोदुम्बरादिकमिति वा । पठ्यमानेन मन्त्रेण आचार्याय नि-

*'ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणम् ।
सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ॥
पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणम् ।
उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवाम् ॥
श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेत् ।'

कालिकापुराणे—

*बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च ।

वेदयेत् । तत्र मन्त्रः—

"पक्वान्नं फलसंयुक्तं सघृतं दक्षिणान्वितम् ।
द्विजवर्याय दास्यामि व्रतसंपूर्तिहेतवे ॥"

अथवा—

"उपाङ्गललिते देवि व्रतसंपूर्तिहेतवे ।
बाणकं द्विजवर्याय सहिरण्यं ददाम्यहम् ॥"
"ततः कथां समाकर्ण्य बाणकान्नस्य संख्यया ।
स्वयमद्यात्तदन्नं वाग्यतस्सह बान्धवैः ॥"

तदेवान्नमित्यत्रान्तरपरिसंख्या न च त्रैदोष्यमेवकारेणाऽन्यनिवृत्तेरुक्तत्वात् । "अत्र ह्येवावपन्ति" इतिवत् । सप्तम्यां बिल्वशाखापूजा कार्या ।

"आश्विनस्य सिते पक्षे सुमुहूर्त्तेन सप्तमी ।
तस्यां च पत्रिकापूजा कर्त्तव्या नरनायकैः ॥
प्रशस्तां सफलां बिल्वशाखामारुह्य पूजयेत् ॥"

इति वचनात् । तत्र बोधनकालः कृष्णनवमी तदुत्तरषष्ठी वा, तत्र षष्ठीप्रभृति पत्रिकापूजाविधानं दर्शयति—*ज्येष्ठेति । तिथिनक्षत्रयोगलाभार्थमाश्विनकृष्णनवम्यादिशुक्लप्रतिपदादिपक्षौ निरूपितौ, तत्राशक्तस्य षष्ठ्यादिपक्षविधिमाह—*बोधयेदिति । पूर्वकल्पयोरपि षष्ठ्यां बोधनं पूर्वमेवोक्तम् । एतत्कल्पे त्वत्र कर्मार-

सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत् ॥
पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥
प्रभूतबलिदानं तु नवम्यां विधिवच्चरेत् ।
विसर्जनं दशम्यां तु कुर्याद्वै शाबरोत्सवैः ॥
धूलिकर्दमनिक्षेपः क्रीडाकौतुकमङ्गलैः ॥'

अत्र सर्वत्र तिथिनक्षत्रयोगादरो मुख्यः कल्पः । तदभावे तु तिथिरेव ग्राह्या ।

'तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितम् ।
तस्मात्तिथिं प्रशंसन्ति नक्षत्रं न तिथिं विना ॥'

इति विद्यातिलिखितवचनात् ।

'तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम् ।
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि ॥'

इति तत्रैव देवलोक्तेश्च ।

अत्र च*पत्रीप्रवेशात्पूर्वेद्युः सायंकाले षष्ठ्यभावे पूर्वदिनेऽधिवासनं कार्यम् । *सायंकालेऽत्यन्तासत्त्वे त्वधिवासनलोपः ।

म्भ इति भेदः ।

*पत्रीप्रवेशात् औदयिकसप्तमीप्रातःकालरूपतत्कालत्वात् । अत्राशयं दर्शयन्नेवाह—*सायमिति । अयमर्थः—यद्यपि

'षष्ठ्यां बिल्वतरोर्बोधं सायंसन्ध्यासु कारयेत् ।'

इति वाक्यात् षष्ठी सायंसन्ध्याव्यापिनी पूर्वा परा वा प्राप्नोति तथाप्यामन्त्रणं पत्रीप्रवेशाऽव्यवहिते पूर्वदिने कार्यम् ।

"पत्रीप्रवेशात्पूर्वेद्युः सायाह्ने बिल्ववासिनीम् ।
चण्डीमामन्त्रयेद्विद्वान्नात्र षष्ठी पुरस्क्रिया ॥"

इति वाक्यात् ।

'षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेऽधिवासनम्।' इति पूर्ववचनादिति कल्पतरुः। सायंश्रुतिः फलातिशयमात्रार्था न तु कर्मलोप इत्याचार्यचूडामणिः। अत्र क्रमः—बिल्वसमीपं गत्वा*देवीं बिल्वं च संपूज्य प्रार्थयेत्। तत्र मन्त्रः—

'रावणस्य वधार्थाय रामस्यानुग्रहाय च।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा॥
*अहमप्याश्रितः षष्ठ्यां सायाह्ने बोधयाम्यतः।
*श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः॥
नेतव्योऽसि समागच्छ पूज्यो दुर्गास्वरूपतः॥' इति।

"ज्येष्ठा वाप्यथवा षष्ठी सायंकाले न चेद्भवेत्।
सायमेव तथापि स्याद्बिल्वशाखाभिमन्त्रणम्॥
पूर्वां षष्ठीं सनक्षत्रां सायं प्राप्तामपि त्यजेत्।
यदा तु पत्रिकापूजा परेद्युर्न भविष्यति॥
सन्निकृष्टं तु यत्पूर्वं पत्रिकादिवसस्य तु।
तद्दिने वरणं कृत्वा परशाखांमपूजयेत्॥"

इति मत्स्यसूक्तादिति। *देवीं बिल्वं चेति। आर्थक्रमानुरोधाच्छाब्दक्रमत्यागः। तथा च—'बिल्ववृक्षाय नमः' इति बिल्वतरुं संपूज्य बिल्ववृक्षं 'जयन्ती' इत्यादि 'दुर्गे इहागच्छ' इत्यादि च दुर्गागावाह्य पूजयित्वा गीतवाद्यपुरःसरं देवीं बोधयेदित्यर्थः। *अहमपीति। नवमीबोधनपक्षे—

"इषे मास्यसिते पक्षे नवम्यामार्द्रयोगतः।
श्रीवृक्षे बोधयामि त्वां यावत्पूजां करोम्यहम्॥"

इति मन्त्रः स्मर्तव्यः। *श्रीशैलेति।

"मेरुमन्दरकैलासहिमवच्छिखरे गिरौ।
जातः श्रीफलवृक्ष त्वमम्बिकायाः सदाप्रिय॥"

एवं देवीमधिवास्य परदिने निमान्त्रिताबिल्वशाखापत्त्री-प्रवेश*पूजां कुर्यात् । तदुक्तं हेमाद्रौ लैङ्गे-

*'मूलाभावे तु सप्तम्यां केवलायां प्रवेशयेत् ।
युग्माभ्यां नवबिल्वस्य फलाभ्यां शाखिकां तथा॥'
*तथैव प्रतिमां देव्याः*स्नात्वाभ्युक्ष्य प्रवेशयेत् ।'

अत्र चोपवासपूजादावौदयिकी सप्तमी ग्राह्या, न तु युग्मवाक्यात्पूर्वा ।

'युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥'

इति कृत्यतत्त्वार्णवोदाहृतवचनात्

*'भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः ।
तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुधः ॥'

इति तिथितत्त्वे नन्दिकेश्वरपुराणाच्च । दुर्गाभक्तितरङ्गिण्यामप्येवम् । तत्रापि घटिकातो न्यूनत्वे परा कार्या ।

'व्रतोपवासनियमे घटिकैकापि या भवेत् ।'

इत्यादि । *पूजां कुर्यादिति । तदुत्तरकृत्यं चाग्रे पूर्वनिमान्त्रिताबिल्वसमीपं गत्वेत्यादि वक्ष्यति ।

'सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ।'

इत्युक्तम् । मूलासत्त्वेऽप्याह-*मूलाभावे त्विति । *तथैवेति । केशसंस्कारद्रव्यादिदानप्रभृति षष्ठीपूजान्तं बहिः कार्यमिति लब्धं, तच्च षष्ठ्यारम्भपक्षे तस्यामेव समुच्चयेन भवति । *स्नात्वेति प्रवेशकानां स्नानादिनित्यकृत्यलाभार्थम् । पत्रिकाप्रवेशे देवीप्रवेशो युज्यते । *भगवत्या इति । आद्यन्तपदाभ्यां पत्रिकापूजायां सप्तम्यादितिथित्रयमुत्तरोत्तरातिथिवदौदयिकं ग्राह्यमिति लभ्यते । प्रातःकालीनमिति विवेचने गौरीतृतीयावदौदयिकीति

इतिदेवलोक्तेरिति गौडाः । *दाक्षिणात्यास्तु पूर्ववचनमदृष्ट्वा युग्मवाक्यात्पूर्वा कुर्वन्ति । पत्रिकापूजा च *पूर्वाह्ण एव कार्या न तु मूलानुरोधान्मध्याह्नादाविति कृत्यतत्त्वार्णवे उक्तम् । पत्रिकास्तु—

'रम्भा कची हरिद्रा च जयन्ती बिल्वदाडिमौ ।
अशोको मानवृक्षश्च धान्यादिनवपत्रिकाः ॥'

इति तत्रैवोक्ताः ।

अस्यामेव सप्तम्यां देवीत्रिरात्रमुक्तं हेमाद्रौ । प्रतिपदादिनवतिथिषु उपवासकरणासामर्थ्ये सप्तम्यादिदिनत्रये वा कुर्यात् । तदाह धौम्यः—

आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥
त्रिरात्रं वाऽपि कर्तव्यं सप्तम्यादि यथाक्रमम् ॥'

अत एव हेमाद्रौ देवीपुराणे मङ्गलाव्रते—

'आश्विने वाथवा माघे चैत्रे वा श्रावणेऽपि वा ।
कृष्णाष्टम्यादि कर्तव्यं व्रतं शुक्लावधिं हरेः ॥
यावच्छुक्लाष्टमी शक्र उपोष्या तु विधानतः ।
दानं होमो जपः पूजा कन्या भोज्यास्तथान्वहम् ॥

केचित् । *दाक्षिणात्यास्त्विति । अरुचिः स्पष्टैव । 'पूर्वाह्णे पूजयेच्छिवाम्' इत्युक्तेः । *पूर्वाह्ण एवेति । तदुक्तम्—

"पूर्वाह्णे नवपत्रिका शुभकरी सर्वार्थसिद्धिप्रदा
आरोग्यं धनदाकरोति विजयं चण्डीप्रवेशे शुभा ।
मध्याह्ने जनपीड़नक्षयकरी संग्रामघोरावहा
सायाह्ने वधबन्धनादिकलहं सर्वकृतं सर्वदा ॥
सप्तम्यामस्तगायां यदि विशति गृहं पत्रिका श्रीफलाढ्या
राज्ञः सप्ताङ्गराज्यं जनसुखमखिलं हन्ति मूलानुरोधात् ।

महाभैरवरूपेण अस्थिमालाधराश्च ये ।
पूजनीया विशेषेण वस्त्रैर्ग्रामपुरादिषु ॥'

इति मासचतुष्टयेऽभिधाय । अन्यत्रापि-

'अथवा नवरात्रं च सप्त पञ्च त्रिकं दिवा ।
एकभक्तेन नक्तेनायाचितोपोषितैः क्रमात् ॥' इति
'पूजयेताश्विने शक्र यावच्छुक्लाष्टमी भवेत् ।
सर्वकार्याणि सिध्यन्ति शक्र नास्त्यत्र संशयः ॥'

इत्युक्तम् । दिवेत्ये*करात्रमुक्तम् । गोविन्दार्णवे देवीपुराणे-

'नवरात्रव्रतेऽशक्तास्त्रिरात्रं चैकरात्रकम् ।
व्रतं चरति यो भक्तस्तस्मै दास्यामि वाञ्छितम् ॥"

इति ।

*तत्रापि सप्तम्याः पूजने पूर्वोक्तो निर्णयः । *अत्र तिथियोगपद्ये तन्त्रेणोपवासः । तिथिद्वयनिमित्तं पूजादिकं तु भेदेन ।

तस्मात्सूर्योदयस्थां नरपतिशुभदां सप्तमीं प्राप्य देवीं
भूपालो वेशयेत्तां सकलजनहितां राक्षसघ्नीं विहाय ॥"
"प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् ।
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत् ॥"

इति वाक्यस्य पत्रीपूजापरत्वात् । प्रातः प्रपूजयेत् इति पाठान्तरम् । प्रातःशब्दश्चेह पूर्वाह्णपर इत्युक्तम् ।

*एकरात्रामिति । अष्टम्यामेव नवम्यामेव वेत्यर्थः । *तत्राश्वीति । त्रिरात्रेऽपीत्यर्थः । 'शरत्काले महापूजा क्रियते या च वार्षिकी । सा कार्योदयगामिन्याम्'इति वचनात् । औदयिकत्वं द्विमुहूर्तमिति ग्रन्थकृतः । पूर्वाह्णव्यापित्वमिति वस्तुगतिः । माधवमते तु नक्तव्रतत्वात्प्रदोषव्यापित्वं निर्णायकम् । *अत्र पत्रीप्रवेशे ।

अत्र विशेषो निर्णयामृते भविष्ये-

"सप्तम्यां नव गेहानि दारुजानि नवानि च।
एकं वा *वित्तभावेन कारयेत्सुसमाहितः॥
दुर्गागृहं प्रकर्तव्यं चतुरस्रं सुशोभनम्।
तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तां समां शुभाम्॥
तस्यां सिंहासनं क्षौमं कम्बलाजिनसंयुतम्।
तत्र *दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुताम्॥
भुजैश्चतुर्भी रुचिरैर्दशाभिर्वा विभूषिताम्।
तप्तहाटकवर्णाभां त्रिनेत्रां शशिशेखराम्॥

"व्रती संपूजयेद्देवीं सप्तम्यादिदिनत्रये।
द्वाभ्यां चतुरहोभिर्वा ह्रासवृद्धिवशात्तिथेः॥"

इति भविष्यात्। त्रिरात्रव्रते तु मुख्यकल्पवदेव निर्णयस्वाभाकाङ्क्षा। *वित्तभावेनेति। वित्तासत्त्वे तु पूर्वगृहमेव वस्त्रादिभिः, कदलीस्तम्भादिभिश्च भूषणीयमिति सूचितम्। *दुर्गामिति। सर्वलक्षणानि सामुद्रशास्त्रोक्तानि भावत्त्वे—

"जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम्।

('तप्तकाञ्चनवर्णाभाम्' इति प्रमाणान्तरादतसीपुष्पं शणपुष्पं ग्राह्यं, तच्च पीतम्।)

नवयौवनसंपन्नां सर्वाभरणभूषिताम्॥
सुचारुदशनां तद्वत्पीनश्रोणिपयोधराम्।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम्॥
त्रिशूलं दक्षिणे दद्यात्खड्गं चक्रं क्रमादधः।
तीक्ष्णं बाणं तथा शक्तिं वामतोऽपि निबोधत॥
खेटकं पूर्णचापं च पाशमङ्कुशमूर्द्धजम्।

अनेककुसुमाकीर्णां कपर्देन सुशोभिताम् ।
नितम्बबिम्बसंनद्धकिङ्किणीक्वाणनादिनीम् ॥
*शूलचक्र*दण्डशक्तिवज्रचापासिधारिणीम् ।
घण्टाक्षमालाकरकपानपात्रलसत्कराम् ॥
तदग्रे छिन्नशिरसं माहिषं रुधिराप्लुतम् ।
निःसृतार्धतनुं कण्ठनाले चर्मासिधारिणम् ॥

घण्टां वा परशुं वाऽपि वामतः सन्निवेशयेत् ॥
(दशभुजेऽयं देवी ।)
अथस्तान्माहिषं तद्वद्विशिरस्कं प्रदर्शयेत् ।
शिरच्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥
हृदि शूलेन निर्भिन्नं तिर्यग्दन्तविभूषितम् ।
रक्तरक्तीकृताङ्गं च रक्तविस्फारितेक्षणम् ॥
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ।
सपाशवामहस्तेन धृतकेशं च दुर्गया ॥
वमद्रुधिरवक्त्रं च, देव्याः सिंहं प्रदर्शयेत् ।
देव्यास्तु दक्षिणं पादं समं सिंहोपरि स्थितम् ॥
किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ।
स्तूयमानं च तद्रूपमसुरैः सन्निवेशयेत् ॥" इति
ध्यानमप्येवमेव कर्त्तव्यम्—
"प्रसन्नवदनां देवीं दैत्यदानवदर्पहाम् ।
शत्रुक्षयकरीं चैव सर्वकामप्रदां शुभाम् ॥
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चण्डरूपाऽतिचण्डिका ॥
अष्टाभिः शक्तिभिस्ताभिः सततं परिवेष्टिताम् ।
विजयेज्जगतां धात्रीं धर्मकामार्थमोक्षदाम् ॥"
इत्युक्तेः । *शूलेति । *दण्डः बाणः । इयमपि एकभुजे

देवीधृतकरग्रीवं शूलेनोरसि ताडितम्।
नागपाशेन विक्षिप्तं हर्यक्षेणापि विद्रुतम्॥
चमद्रुधिरवक्त्रेण धुन्वतोर्ध्वं सटान् रुषा।
सर्वतो मातृचक्रेण सेव्यमानां सुरैस्तथा॥"इति।
"तत्र देवी प्रकर्तव्या हैमी वा राजती तथा।
मृद्दारुक्षी लक्षणोपेता खड्गशूले च*पूजयेत्॥"
दारुक्षी=दारुमयी।

देवीमूर्तिस्थापने विशेषो दुर्गाभक्तितरङ्गिण्यां देवीपुराणे—

'याम्यास्था शुभदा दुर्गा पूर्वास्या जयवर्धिनी।
पश्चिमाभिमुखी नित्यं, न स्थाप्या सौम्यदिङ्मुखी॥'

प्रतिमाऽभावे विशेषस्तत्रैव—

"हैमराजतमृद्धातुशैलचित्रार्पितापि वा।
खड्गे शूलेऽर्चिता देवी सर्वकामफलप्रदा॥
यद्यदस्यायुधं प्रोक्तं तस्मिंस्तां प्रतिपूजयेत्।
देवी भक्त्यार्चिता पुंसां राज्यायुःसुतसौख्यदा॥"

कृत्यतत्त्वार्णवे कालिकापुराणे—

"लिङ्गस्थां पूजयेद्देवीं मण्डलस्थां तथैव च।
पुस्तकस्थां महादेवीं पावके प्रतिमासु च॥
चित्रे च त्रिशिखे खड्गे जलस्थां वापि पूजयेत्।
बिल्वपत्रैर्यजेद्देवीं तथा जातीप्रसूनकैः॥
नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः॥

आयुधद्वयधारणेन दशभुजा। *पूजयेदिति।
"मृन्मयीं प्रतिमां कृत्वा बिल्वे वा यस्तु पूजयेत्।
आत्मवित्तानुसारेण स लभेन्मौक्तिकं फलम्॥"

*भगलिङ्गाभिधानैश्च भगलिङ्गप्रगीतकैः ॥
भगलिङ्गक्रियाभिश्च प्रीणयेद्वरचण्डिकाम् ।
परैर्नाक्षिप्यते यस्तु यः परानाक्षिपत्यपि ॥
यस्य क्रुद्धा भगवती शापं दद्यात्सुदारुणम् ॥"

चित्रमृन्मयादौ स्नानाद्यसंभवे तत्रैवोक्तम्—

'अन्तिके स्थापिते खड्गे स्नापयेद्दर्पणेऽथवा ।'इति ॥

अथ सप्तमीपूजाविधिः । *प्रतिपद्युक्तविधिना फलसंकीर्तनान्ते नवपत्रिकापूजनमृन्मयदुर्गापूजाबलिदानानि करिष्य इति संकल्प्य पूर्वनिमन्त्रितबिल्वसमीपं गत्वा*संपूज्य-'आगच्छ सर्वकल्याणि'इति पूर्वोक्तमन्त्रं पठित्वा—

"बिल्ववृक्ष महाभाग सदा त्वं शङ्करप्रिय ।
गृहीत्वा तव शाखां च देवीपूजां करोम्यहम् ॥
शाखाछेदोद्भवं दुःखं न च कार्यं त्वया प्रभो ।
गृहीत्वा तव शाखां च पूज्या दुर्गेति च स्मृतिः ॥
*उत्तिष्ठ पत्रिके देवि सर्वकल्याणहेतवे ।
पूजां गृहाण सकलामस्माकं वरदा भव ॥
मेरुमन्दारकैलासहिमवच्छिखरे गिरौ ।
(१) जातः श्रीफलवृक्ष त्वमम्बिकायाः सदा प्रियः॥"

इति *संप्रार्थ्य-'ॐ ह्लिन्धि फट् फट् ॐहुं फट् स्वाहा'इति

इति च बोध्यम् । शाबरोत्सवैरित्युक्तं, तानुत्सवानाह—*भगेति । शबराणामिमे शाबराः ।

*प्रतिपदिति । प्रतिपदि दुर्गाप्रतिष्ठापने तत्समीप एव पत्रीस्थापने सहैव इति संप्रदायः । *संपूज्येति । 'बिल्वं दुर्गा च'इति शेषः । *उत्तिष्ठेति पत्रिकायाः प्रार्थना पूजां कृत्वा कार्या । *संप्रार्थ्येति । 'कृताञ्जलिः' इत्यादिः । ॐइति छेदनम-

(१) 'जातः श्रीवृक्षबिल्व त्वम्' इति पाठान्तरम् ।

छित्त्वा*संपूज्य—'ॐचामुण्डे चल चल'इति*वाद्यघोषेण देवीं तां च*गृहं प्रवेश्य—

न्त्रः । उपदेशादिहीनानान्तु वानस्पत्यमन्त्रः । स च 'वानस्पत्योसि वार्हस्पत्योसि' इत्यादिः । फलद्वययुतामपराजितां दिगन्तां शाखां च्छेदयेत् । *संपूज्येति । नाममन्त्रेण बिल्वशाखां तत्र प्रतिमां देवीं चावाहनपूर्वकं संपूज्य माषभक्तादिबलिं दत्त्वा दोलनादिना शाखां देवीं च गृहमानयेत् । तत्राह—*वाद्येति ।

"गीतवाद्यनिर्घोषं देव्या अग्रे च कारयेत् ।
घण्टा भवेदशक्तस्य सर्ववाद्यमयी यतः" ॥

इति मात्स्यात् । गृहाङ्गणे पीठावस्थितां शुद्धोदकेन स्नापयित्वा माषभक्तादिबलिं च दत्त्वा पूजागृहस्थानि भूतानि नाममन्त्रेण गन्धादिभिः संपूज्य बलिं दद्यात् । तत्र मन्त्रः—

भूताः प्रेतपिशाचाश्च ये वसन्त्यत्र भूतले ।
ते गृह्णन्तु मया दत्तो बलिरेष प्रसाधितः ॥
पूजिता गन्धपुष्पाद्यैर्बलिभिस्तर्पितास्तथा ।
देशादस्माद्विनिष्कृत्य पूजां पश्यन्तु मत्कृताम् ॥"

भूतेभ्य एष माषभक्तबलिर्न मम इति । ततः सर्षपान्विकिरेत्—

"अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन देवीपूजां करोम्यहम् ॥"

'फट्' इति तान्यपसारयेत् । एतच्चावश्यकम् ।

"स्थितेषु तत्र भूतेषु नैवेद्यं मण्डलं तथा ।
विलुम्पन्ति महालुब्धा न च गृह्णन्ति देवताः ॥
तस्माद्यत्नेन कर्तव्यं भूतानामपसारणम् ॥"

इति कालिकापुराणात् ।

"लाजचन्दनसिद्धार्थं फलपुष्पकुशाक्षताः ।
विकिरा इति संप्रोक्ताः सर्वविघ्नविनाशकाः ॥

"आरोपिताऽसि दुर्गे त्वं मृन्मय्यां श्रीफलेऽपि च ।
स्थिरा निताऽन्तं भूत्वा च गृहे त्वं कामदा भव ॥"

इति स्थिरीकृत्य रम्भादिपत्रिकाः पञ्चगव्येन पञ्चामृतेन च स्नापयित्वा वस्त्रेणावेष्ट्य स्थापयेत् । ततः पूर्ववत्संकल्पं कृत्वाऽक्षतानादाय देवीमावाहयेत् । तत्र मन्त्रः—

"आवाहयाम्यहं देवीं मृन्मय्यां श्रीफले तथा ।
कैलासशिखराद्देवि विन्ध्याद्रेर्हिमपर्वतात् ॥
आगत्य बिल्वशाखायां चण्डिके कुरु*सन्निधिम् ।
स्थापिताऽसि मया दुर्गे पूजये त्वां प्रसीद मे ॥
आयुरारोग्यमैश्वर्यं देहि देवि*नमोऽस्तु ते ।
दुर्गे दुर्गस्वरूपाऽसि सुरतेजोमयेऽर्चिते ॥
सदानन्दकरे देवि प्रसीद मम सिद्धये ।
एह्येहि भगवत्यम्ब शत्रुक्षयजयप्रदे ॥
भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते ।
पल्लवैश्च फलोपेतैः पुष्पैश्च सुमनोहरैः ॥
पल्लवे संस्थिते देवि पूजये त्वां प्रसीद मे ।
दुर्गे देवि इहागच्छ सान्निध्यमिह कल्पय ॥

विकिरान्विकिरत्तत्र सप्त जम्भान् शराणुना ॥"

इति रुद्रयामलात् । पुनः शाखायां प्रतिमायां च देवीं संपूज्य पूजागृहं प्रवेशयेत् । *गृहं पूजागृहम् । आवाहनं च प्राणप्रतिष्ठानन्तरं कार्यम् । *सान्निधिमिति । 'भगवति दुर्गे इहागच्छ' इत्युभयोरावाह्येति शेषः ।

'स्थापिताऽसि मया देवि मृन्मये श्रीफलेऽपि वा ।'

इति पाठान्तरम् । *नमोस्तुते इति । 'भगवति दुर्गे इह तिष्ठ इति स्थापयित्वा' इति शेषः । 'एह्येहि' इति कु-

यज्ञभागान् गृहाण त्वं योगिनीकोटिभिः सह॥"इति।
ततो मूलमन्त्रेण पाद्यादिगन्धान्तोपचारैः—
"अमृतोद्भवं च श्रीवृक्षं शंकरस्य सदा प्रियम्।
बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि॥"
इति बिल्वपत्रम्।
"ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम्।
तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये॥"
इति द्रोणपुष्पं निवेद्य*धूपादिदक्षिणान्तां पूजां मूलेन कृत्वा प्रार्थयेत्—
"ॐमहिषघ्नि महामाये चामुण्डे मुण्डमालिनि।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते॥
कुङ्कुमेन समालब्धे चन्दनेन विलेपिते।
बिल्वपत्रकृतापीडे दुर्गेऽहं शरणं गतः॥
रूपं देहि यशो देहि भगं भवति देहि मे।
पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥"
*'सर्वमङ्गलमाङ्गल्ये' इति च संप्रार्थ्य पत्रिकाः पूज-

ताञ्जलिः पठेत्। मूलमन्त्रेण जयन्तीमन्त्रेण 'दुर्गायै नमः' इत्यनेन वा पुष्पगन्धाक्षतकुङ्कुमदधिदूर्वाकुशतिलबिल्वपत्रयुतजलेनार्घ्यमाचमनं पञ्चामृतं स्नानादि पुनराचमनीयम्। वस्त्रयुगमाचमनं गन्धपुष्पाञ्जलित्रयं मयूखे। *धूपादीति। पुष्पधूपदीपनैवेद्याचमनताम्बूलदक्षिणाः मूलेन जयन्तीमन्त्रेण 'दुर्गायै नमः' इत्यनेन वा समर्प्य स्तुतिभिः स्तुत्वा प्रणम्य बद्धाञ्जलिः प्रार्थयेदित्यर्थः। *सर्वमङ्गलेति।
"सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥"
इति श्लोकेन।

येत् । कदल्यां ब्रह्माणीं, दाडिमे रक्तदन्तिकाम्, धान्ये लक्ष्मीं, हरिद्रायां दुर्गाम्,(१)माने चामुण्डाम्, कवौ कालिकाम्,बिल्वे शिवाम्,अशोके शोकरहिताम्, (२)जयन्त्यां कार्तिकीं चा*वाह्य संपूज्य दुर्गायै बलिं दद्यात् ।

"भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि ।
देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा ॥"

इति श्लोकानन्तरं संप्रार्थ्येत्यर्थः । *आवाह्येति । पूजा चेत्थं कार्या—अञ्जलिं बध्वा

"एहि दुर्गे महाभागे पत्रिकारोहणं कुरु ।
तव स्थानमिदं मन्ये शरणं त्वां व्रजाम्यहम् ॥"

इत्यावाह्य तत्र पाद्यादिदशोपचारैर्गन्धादिधिः पञ्चोपचारैर्गन्धपुष्पाभ्यां वा संपूज्य 'कदलीस्थे ब्रह्माणि इहागच्छ' इत्यावाह्य एष गन्धः 'ह्रीं कदलीस्थब्रह्माण्यै नमः' इत्यादि संपूज्य प्रणमेत्—

"दुर्गे देवि समागच्छ सान्निध्यमिह कल्पय ।
रम्भारूपेण सर्वत्र शान्तिं कुरु नमोऽस्तु ते ॥" इति ।

एवमग्रेऽपि 'कविस्थकालिके इहागच्छ' इत्यावाह्य 'ह्रींकविस्थकालिकायै नमः' इति संपूज्य प्रणमेत्—

"महिषासुरयुद्धेषु कविभूतासि सुव्रते ।
मनुष्याऽनुग्रहार्थाय आगतासि हरप्रिये ॥" इति ।

हरिद्रास्थदुर्गे इत्याद्यावाह्य—'ह्रीं हरिद्रास्थदुर्गायै नमः' इति संपूज्य प्रणमेत्—

"ॐहरिद्रे वरदे देवि उमारूपासि सुव्रते ।
मम विघ्नविनाशाय पूजां गृह्ण प्रसीद मे ॥"

'जयन्तीस्थकार्तिकि' इत्याद्यावाह्य—'ह्रीं जयन्तीस्थकार्तिक्यै

(१)'मान'इति वङ्गदेशे माननाम्ना प्रसिद्धः कन्दः । 'कवि'इति तु भृग्यम् ।
(२) जयन्ती टाहाकळा अमरीसिहटीकायाम् ।

नमः' इत्यादि संपूज्य प्रणमेत्—

निशुम्भशुम्भमथने सेन्द्रैर्देवगणैः सह ।
पूजिताऽसि जयन्ती त्वमस्माकं वरदा भव ॥"

'बिल्वस्थशिवे' इत्याद्यावाह्य—'ह्रीं बिल्वस्थशिवायै नमः' इति संपूज्य प्रणमेत्—

"महादेवप्रियकरो वासुदेवः प्रियस्सदा ।
उमाप्रीतिकरो वृक्षो बिल्ववृक्ष नमोऽस्तु ते ॥"

'दाडिमस्थरक्तदन्तिके' इत्याद्यावाह्य—'ह्रीं दाडिमस्थरक्तदन्तिकायै नमः' इति संपूज्य प्रणमेत्—

"दाडिम त्वं पुरा युद्धे रक्तबीजस्य सम्मुखे ।
उमाकार्यं कृतं तस्मादस्माकं वरदा भव ॥"

'अशोकस्थशोकरहिते' इत्याद्यावाह्य—'ह्रीं अशोकस्थशोकरहितायै नमः' इत्यादि संपूज्य प्रणमेत्—

"हरप्रीतिकरो वृक्षो अशोकः शोकनाशनः ।
दुर्गाप्रीतिकरो यस्मान्मामशोकं सदा कुरु ॥"

'मानस्थचामुण्डे(१)'इत्याद्यावाह्य—'ह्रीं मानस्थचामुण्डायै नमः' इत्यादि संपूज्य प्रणमेत्—

"यस्य पत्रे वसेद्देवी मानवृक्ष शचीप्रिय ।
मम चाऽनुग्रहार्थाय पूजां गृण्ह प्रसीद मे ॥"

'धान्यस्थलक्ष्मि इहागच्छ' इत्याद्यावाह्य 'ह्रीं धान्यस्थलक्ष्म्यै नमः' इत्यादि संपूज्य प्रणमेत्—

"जगतः प्राणरक्षार्थं ब्रह्मणा निर्मितं पुरा ।
उमाप्रीतिकरं धान्यं तस्मात्त्वं रक्ष मां सदा ॥" इति ।

एवं संपूज्यापराजिताख्यलतया ता आवेष्ट्य 'अपराजितान-

(१) चण्डिके इति पाठान्तरम् ।

*अत्र शस्त्रादिपूजा वक्ष्यते। ततः स्तुतिं पठेत्। तदुक्तं शिवरहस्ये—

"दुर्गां शिवां शान्तिकरीं ब्रह्माणीं ब्राह्मणप्रियाम्।
सर्वलोकप्रणेत्रीं च प्रणमामि सदाशिवाम्॥
मङ्गलां शोभनां शुद्धां निष्कलां परमां कलाम्।
विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहम्॥
सर्वदेवमयीं देवीं सर्वरोगभयापहाम्।
ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमाम्॥

वपत्रिकास्थदुर्गे इहागच्छ' इत्याद्यावाह्य एष गन्धः 'ह्रीं अपराजितानवपत्रिकास्थदुर्गायै नमः' इत्यादि संपूज्य [प्रणमेत्]

"पत्रिके नवदुर्गे त्वं महादेवमनोरमे।
पूजां समस्तां संगृह्य रक्ष मां त्रिदशेश्वरि॥"

ततः कृताञ्जलिः पठेत्—

"धन्योऽहं कृतकृत्योऽहं सफलं जीवितं मम।
आगताऽसि यतो दुर्गे माहेश्वरि मदाश्रयम्॥"

ॐनवपत्रिकाभ्यो नमः इति दुर्गया सहेति। ततो वैदिक(१) मागमकं वा दुर्गामन्त्रं जपेत्।

'दुर्गाग्रतो जपेन्मन्त्रमेकचित्तःसमाहितः।'

इति देवीपुराणात्। अथवा पूर्वमनारम्भे मार्कण्डेयपुराणोक्तं चण्डीपाठं कुर्यात्।

"माहात्म्यं भगवत्यास्तु पुराणादिषु कीर्तितम्।
पठेच्च शृणुयाद्वापि सर्वकामसमृद्धये॥"

इति वचनात्। *अत्र शस्त्रादीति। यदिने देवीपूजारम्भस्तदिने लौहाभिसारिकारम्भः। तत्र प्रतिपत्प्रभृतीत्युपादानं नवरात्रपक्षाभिप्रायम्। त्रिरात्रपक्षे तु सप्तम्यामारम्भ इत्याशयः।

---

(१) आगमकं तन्त्रोक्तमित्यर्थः।

विन्ध्यस्थां विन्ध्यनिलयां दिव्यस्थाननिवासिनीम् ।
योगिनीं योगमातां च चण्डिकां प्रणमाम्यहम् ॥
ईशानमातरं देवीमीश्वरामीश्वरप्रियाम् ।
प्रणतोस्मि सदा दुर्गां संसारार्णवतारिणीम् ॥
य इदं पठते स्तोत्रं शृणुयाद्वापि यो नरः ।
स मुक्तः सर्वपापैस्तु मोदते दुर्गया सह ॥"

अथ महाष्टमी । सा च*परयुता ।

"शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ॥"

इति ब्रह्मवैवर्तात् । मदनरत्ने स्मृतिसंग्रहे—

"शरन्महाष्टमी पूज्या नवमीसंयुता सदा ।
सप्तमीसंयुता नित्यं शोकसंतापकारिणी ॥
जम्भेन सप्तमीयुक्ता पूजिता तु महाष्टमी ।
इन्द्रेण निहतो जम्भस्तस्माद्दानवपुङ्गवः ॥
तस्मात्सर्वप्रयत्नेन सप्तमीमिश्रिताष्टमी ।
वर्जनीया प्रयत्नेन मनुजैः शुभकाङ्क्षिभिः ॥
सप्तमीं शल्यसंयुक्तां मोहादज्ञानतोऽपि वा ।
महाष्टमीं प्रकुर्वाणो नरकं प्रतिपद्यते ॥
सप्तमी कलया यत्र परतश्चाष्टमी भवेत् ।
तेन शल्यामिदं प्रोक्तं पुत्रपौत्रक्षयप्रदम् ॥"

तथा—

"पुत्रान्हन्ति पशून्हन्ति हन्ति राष्ट्रं सराजकम् ।
हन्ति जातानजातांश्च सप्तमीसहिताष्टमी ॥"

*तेन नात्र त्रिमुहूर्तवेधः । तदा घटिकामात्राप्यौद-

---

*परयुतेति । पत्रीपूजाऽतिरिक्ते देवीपूजायामित्यादिः । शुद्धाधिका तु पूर्वैव संपूर्णत्वात् । *तेन 'सप्तमी कलया' इति

धिकी ग्राह्या ।

'व्रतोपवासनियमे घटिकैकापि या भवेत् ।'

इति देवलोक्तेः । *गौडा अप्येवमाहुः । अत एवोक्तं भोजराजेन—'नच सप्तमी शल्यसमोपहता' इति । इयं भौमेऽतिप्रशस्ता ।

"अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ।
कुजवारो भवेत्तत्र पूजनीया प्रयत्नतः ॥"

इति मदनरत्ने वचनात् ।

"सप्तमीशल्यसंविद्धा वर्जनीया सदाष्टमी ।
स्तोकापि सा महापुण्या यस्यां सूर्योदयो भवेत् ॥"

इति मदनरत्ने स्मृतिसमुच्चयवचनात् ।

*'अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।'

इति पाद्मवचनाच्च । इयमेव मूलयुक्ता चेन्महानवमी-संज्ञा ।

"आश्वयुक्शुक्लपक्षे याऽष्टमी मूलेन संयुता ।
सा महानवमी प्रोक्ता त्रैलोक्येऽपि सुदुर्लभा ॥"

इति हेमाद्रौ स्कान्दात् । मूलयुक्तापि सप्तमीयुता चेत्पराऽप्येवेत्युक्तं निर्णयामृते दुर्गोत्सवे-

"मूलेनापि हि संयुक्ता सदा त्याज्याऽष्टमी बुधैः ।

कलापदोपादानेन । *गौडाइति । नव्यगौडास्तु सूर्योदये कलाकाष्ठादियुतामपीच्छन्ति । 'यस्यां सूर्योदयो भवेत्' इति क्षयेणाष्टम्याः सूर्योदयाभावे तु सप्तमीविद्धा ग्राह्येति सूचयति । *अष्टमीति । एवञ्च नवम्याः पूर्वविद्धात्वाद्रात्रिपूजायामष्टम्यभावेऽपि वा तन्त्रमेव सन्धिपूजाभ्यामष्टमीनवमीपूजाभ्यां तन्त्रम् । यत्तु—

'उपोषिता द्वितीयेऽह्नि पूजयेत्पुनरेव ताम् ।'

इति उपवासपरदिने विहितपूजा, सा प्रातरनुवृत्तनवम्यामेव,

लेशमात्रेण सप्तम्या अपि स्याद्यदि दूषिता ॥" इति।

महाष्टमी पूर्वेद्युः पूर्वाह्णव्याप्तत्वे पूर्वाऽन्यथा परैवेति निर्णयदीपमतम्। एतच्च*तुच्छत्वादुपेक्ष्यम्। रूपनारायणधृते देवीपुराणे—

"सप्तमीवेधसंयुक्ता यैः कृता तु महाष्टमी।
पुत्रदारधनैर्हीना भ्रमन्तीह पिशाचवत् ॥"

यत्तु—

"सप्तम्यामुदिते सूर्ये*परतो याऽष्टमी भवेत्।
तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि ॥"

इति विश्वरूपनिबन्धवचनं तदाश्विनकृष्णाष्टमीविषयम्।

"कन्यायां कृष्णपक्षे तु पूजयित्वाष्टमीदिने।
नवम्यां बोधयेद्देवीं गीतवाद्यैर्निःस्वनैः ॥"

इति देवीपुराणे तत्रापि*पूजोक्तेरिति हेमाद्रौ निर्णयामृते चोक्तम्। यानि तु—

*"भद्रायां भद्रकाल्याश्च मध्ये स्यादर्चनक्रिया।
तस्माद्वै सप्तमीविद्धा कार्या दुर्गाष्टमी बुधैः ॥" इति,

यच्च मोहचूलोत्तरे ब्राह्मे च—

*"आश्विनस्य सिताष्टम्यामर्धरात्रे तु पार्वती।
भद्रकाली समुत्पन्ना पूर्वाषाढासमायुता ॥" इति,

सम्भवात्।

*तुच्छत्वादिति। ऋक्षयोगेऽप्यनादरवचनात्। *परत इति। 'वृद्धौ' इति शेषः। अत एव 'न कुर्यात्' इत्यादि। एतेनेदं परादिने वृद्ध्यभावे सप्तमीविद्धाग्राह्यत्वार्थकमिति शङ्काऽपास्ता। *पूजोक्तेरिति। नवमीप्रबोधनाङ्गपूजायां कृष्णपक्षाष्टम्याः पूर्वविद्धात्वस्य युक्तत्वात्। *भद्रायां सप्तम्याम्। *आश्विनस्येति। निशीथो जन्मकालः। स एव कर्मकाल इति सप्तमीयोगो

तथा-

"तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥" इति,

यच्च मदनरत्ने-

"महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी ।
सप्तम्यापि युता कार्या मूलेन तु विशेषतः ॥" इति,

तानि परेद्युरष्टम्यभावविषयाणीति मदनरत्ने उक्तम् । यत्तु तत्रैव परेद्युरष्टमीसत्त्वेऽपि पूर्वाविद्धाविधायकं वचनम्—

"यदाष्टमी तु संप्राप्य ह्यस्तं याति दिवाकरः ।
तत्र दुर्गोत्सवं कुर्या*न्न कुर्यादपरेऽहनि ॥
दुर्भिक्षं तत्र जानीयान्नवम्यां यत्र पूज्यते ॥" इति,

तत् परादिने दशम्यां नवम्यभावविषयम् ।

'यदा सूर्योदये न स्यान्नवमी चापरेऽहनि ।
तदाष्टमीं प्रकुर्वीत सप्तम्या सहितां नृप ॥"

इति तत्रैव स्मृतिसंग्रहोक्तेः

"उत्तरास्तिथयो यत्र क्षयं यान्ति नराधिप ।
पूर्वाष्टमीं तदा कुर्यादन्यथा त्वशुभं भवेत् ॥"

इति दुर्गोत्सवोक्तेश्चेति मदनरत्ने । *वस्तुतस्तु इदं वचनद्वय*मष्टमीनवम्योः सूर्योदयद्वयासंबन्धपरम् । अत एव 'नवमी च' इति चकाराद*ष्टमी च । तिथय इति

युक्त इति भावः । *न कुर्यादिति । एतेन परादिने द्वाद्धिर्लभ्यते । नन्वत्राद्यवाक्ये नवमीक्षयो न प्रवर्तते, द्वितीयवाक्ये च दशमीक्षये च पूर्वाष्टम्यापत्तिरित्यत आह-*वस्तुतस्त्विति । *अष्टमीति । नवमी चेति चकारादष्टमी ग्राह्या । उत्तरास्तिथय इति

बहुवचनादष्टमी नवमी दशम्युक्ता । अन्यथा*पूर्वोक्तविरोधादिति दिक् ।

यत्तु-

"अहं भद्रा च भद्राहं नावयोरन्तरं क्वचित् ।
सर्वसिद्धिं प्रदास्यामि भद्रायामर्चिता ह्यहम् ॥"

इति देवीपुराणे, तद्धि*ष्टिकरणमध्ये पूजाविधानार्थम् ।

"विष्टिं त्यक्त्वा महाष्टम्यां मम पूजां करोति यः ।
तस्य पूजाफलं न स्यात्तेनाहमवमानिता ॥"

इति तत्रैवोक्तरिति निर्णयामृते । तथा कालिकापुराणे-

*"सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणम् ।
पूजा च जागरश्चैव नवम्यां विधिवद्बलिः ॥" इति ।

बहुत्वं तन्त्रम् । अष्टमीक्षये तात्पर्यात् । *पूर्वोक्तेति । 'सप्तमीशल्यसंविद्धा' इति प्रकृत्य—'यस्यां सूर्योदयो भवेत्' इत्युक्तेरित्यर्थः । तेनाष्टमीक्षये सप्तमीग्राह्यत्वव्यञ्जनात् । दिगर्थस्तु—

"महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी ।
सप्तम्याऽपि युता कार्या मूलेन तु विशेषतः" ॥

इत्यपि अष्टमीक्षय एव सप्तमीविद्धाग्रहार्थम् । किन्तु मूलवैशिष्ट्यविधौ सप्तमीयुतत्वमपिशब्दश्रवणादर्थवादः 'वैश्वेदेवे तु नक्षत्रे' इति निषेधे विश्वयुक्तापीत्यपिशब्दवदिति ।

*विष्टीति । निर्णीताष्टम्यां विष्टिभागे पूजेत्यर्थः । *सप्तम्यामिति दिवापूजाभिप्रायम् । अयं च नवरात्रपक्षः । वस्तुतस्त्वयं षष्ठ्यादिपक्षः पत्रिकापूजापदात् । सप्तम्यादित्रिदिनदेवीपूजापक्षोऽपि—

'व्रती संपूजयेद्देवीं सप्तम्यादिदिनत्रयम् ।'

इति भविष्योत्तरे चोक्तः । अष्टमीनवम्योरेव वा देवी पूज्या ।

*अष्टम्युपवासश्च पुत्रवता न कार्यः ।

"उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ।
यथा तथा वा पूतात्मा व्रती देवीं प्रपूजयेत् ॥"

इति तत्रैवोक्तेः । रूपनारायणीये ब्राह्मे—

*"अत्यर्थं पूजनीया सा तस्मिन्नहनि मानवैः ।

"अष्टम्यां च नवम्यां च जन्ममोक्षप्रदां शिवाम् ।
पूजयित्वाऽऽश्विने मासि विशोको जायते नरः ॥"

इति वचनात् । केवलाष्टमीपूजोक्ता ब्राह्मे—

"तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी ।
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह ॥
अतोऽर्थं यजनीया सा तस्मिन्नहनि मानवैः ।
उपोषितैर्धूपदीपैर्वस्त्रैर्माल्यानुलेपनैः ॥" इति ।

*अष्टम्युपवास इति । केवलाष्टम्युपवास इत्यर्थः । अन्यथा नवरात्रोपवास इत्यनेन विरोधात् सप्तम्यादिपक्षेष्वपि पूर्वोत्तरदिनसमानव्रतानुरोधेनाष्टम्युपवासप्राप्तेश्च । केवलनवमीपूजा च भविष्ये—

"लब्धाभिषेका वरदा शुक्ले चाश्वयुजस्य च ।
तस्मात्सा तत्र संपूज्या नवम्यां चण्डिका बुधैः ॥" इति ।

*अत्यर्थमिति । अष्टम्यां विद्धिसत्त्वे तद्वत्यां तद्भागे, तदसत्त्वे शुद्धायाम् । दिवसे विशेषपूजाविधायकम् । अर्द्धरात्रेऽपि विशेषेण देवीपूजनं कार्यम् ।

"पुनः पूजां तथाऽष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥"

इति कालिकापुराणाच्च । राजा तु विजयकामोऽर्द्धरात्रे विशेषपूजापूर्वकं बलिं दद्यात्—

"तदर्धयामिनीशेषे विजयार्थं नृपोत्तमः ।

उपोषितैर्वस्त्रधूपमाल्यरत्नानुलेपनैः ॥
पशुभिः पानकैर्हृद्यै रात्रौ जागरणेन च ।
*दुर्गागृहे च शस्त्राणि पूजितव्यानि पण्डितैः ॥
वाद्यभाण्डानि चिह्नानि कवचान्यायुधानि च ॥"

अत्र *विशेषो हेमाद्रौ निर्णयामृते च भविष्ये—

"आश्वयुक्शुक्लपक्षस्य अष्टमी मूलसंयुता ।
सा महानवमी नाम त्रैलोक्येऽपि सुदुर्लभा ॥
कन्यागते सवितरि शुक्लपक्षेऽष्टमीयुता ।
मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता ॥
नवम्यां पूजिता देवी ददात्यभिमतं फलम् ।
सा पुण्या सा पवित्रा च सा धन्या सुखदायिनी ॥
तस्यां सदा पूजनीया चामुण्डा मुण्डमालिनी ॥
(सदेत्युक्तेर्नित्यतापि ।)
तस्यां ये ह्युपयुञ्जन्ते प्राणिनो महिषादयः ।
सर्वे ते स्वर्गतिं यान्ति हतां पापं न विद्यते ॥
यावन्न चालयेद्राजा पशुस्तावन्न हन्यते ।
न तथा बलिदानेन पुष्पधूपविलेपनैः ॥
यथा संतुष्यते मेषैर्महिषैर्विन्ध्यवासिनी ।
एवं च विन्ध्यवासिन्या नवरात्रोपवासतः ॥
एकभुक्तेन नक्तेन स्वशक्त्याराधितेन च ।
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ॥

पञ्चाब्दं लक्षणोपेतं गन्धधूपसगर्चितम् ॥
विधिवत्कालिकालीति जप्त्वा खड्गेन घातयेत् ॥"

इति देवीपुराणात् । पञ्चाब्दं महिषमजं वा । अष्टम्यां होमो वक्ष्यते । *दुर्गागृहे इति । अष्टम्यामस्त्रादिपूजा । लोहाभिसारिकापूजा त्वन्यैव तस्याः प्रतिपद्येवारम्भात् । *विशेषो दिवापू-

गृहे गृहे भक्तिपरैर्ग्रामे ग्रामे वने वने ।
स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ॥
वैश्यैः शूद्रैर्भक्तियुतैर्म्लेच्छैरन्यैश्च मानवैः ।
स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु ॥
*जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात् ।
(१)लौहाभिसारिकं कर्म कारयेच्चावदष्टमी ॥" इति

लौहाभिसारिककर्मविधानं तत्रैवोक्तम् ।

"प्रागुदक्प्रवणे देशे पताकाभिरलंकृतम् ।
मण्डपं कारयेद्दिव्यं नवसप्तकरं परम् ॥

(षोडशहस्तमित्यर्थः ।)

आग्नेय्यां कारयेत्कुण्डं हस्तमात्रं सुशोभनम् ।
मेखलात्रयसंयुक्तं योन्याऽश्वत्थदलाभया ॥
राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ।
आनीय मण्डपे तानि सर्वाण्यग्राधिवासयेत् ॥
ततस्तु ब्राह्मणः स्नातः शुक्लाम्बरधरः शुचिः ।
ॐकारपूर्वकैर्मन्त्रैस्तालिङ्गैर्जुहुयाद्घृतम् ॥
शस्त्रास्त्रमन्त्रैर्होतव्यं पायसं घृतसंयुतम् ।

जानन्तरबलिदानरूपः । ब्राह्मणस्यात्रैवाधिकार इति वक्ष्यते । तेन ब्राह्मणेन माषभक्तादिबलिः कूष्माण्डादिबलिर्वा कार्य इति स्मर्तव्यम् । अष्टमीकृत्यं दर्शयित्वा नवरात्रोपवासादीन्देवीपूजां च 'एवञ्च' इत्यादि 'शृणु' इत्यन्तेन स्मारयित्वा तत्र प्रतिपदाद्यष्टमीपर्यन्तं जयार्थिना राज्ञा लोहाभिसारिकाख्यं कर्म कार्यमित्याह—*जयाभिलाषीति । प्रतिपच्चामावास्यायुता निषिद्धा ।

"कुहूकाष्ठोपसंयुक्तां वर्जयेत्प्रतिपत्तिथिम् ।
राज्यनाशाय सा प्रोक्ता निन्दिता चाश्वपूजने" ॥

---

(१)लोहाभिसारोऽस्त्रभृतां राज्ञां नीराजनाविधिः ।' इत्यमरः ।

हुतशेषं*तुरङ्गाणां राजानमुपहारयेत् ॥
लोहाभिसारिकं कर्म तेनैव ऋषिभिः स्मृतम् ।
धृतपल्ययनानश्वान् गजांश्च समलंकृतान् ॥
भ्रामयेन्नगरे नित्यं बन्दिघोषपुरःसरम् ।
प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः ॥
पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः ।
तस्याभिसरणाद्राज्ञो विजयः समुदाहृतः ॥
पूजामन्त्रान्प्रवक्ष्यामि पुराणोक्तानहं तव ।
यैः पूजिताः प्रयच्छन्ति कीर्तिमायुर्यशो बलम् ॥"

अथ मन्त्रा विष्णुधर्मोत्तरोक्ताः । छत्रस्य—

"यथा ऽम्बुदश्छादयति शिवायेमां वसुन्धराम् ।
तथाऽऽच्छादय राजानं विजयारोग्यवृद्धये ॥"

चामरस्य—

"शशाङ्ककरसंकाशक्षीरडिण्डीरपाण्डुर ।
प्रोत्सारयाशु दुरितं चामरामरदुर्लभ ॥"

अश्वानां वृद्ध्यर्थं रेवन्तपूजनमहं करिष्ये ।

इति वचनात् ।

*तुरङ्गाणामिति । हुतशेषदानं च श्रेष्ठे गजेऽपि—

'हुतशेषं प्रदातव्यमौपनायनिके गजे ।'

इति वाक्यात् । तत्र प्रथमतः पूजको ब्राह्मणः प्रार्थयेत्—

यथा चन्द्रश्छादयति शिवामेतां वसुन्धराम् ।
तथाऽऽच्छादय राजानं विजयारोग्यवृद्धये ॥" इति ।

पूजा च षोडशोपचारा पदार्थाऽनुसमयेन काण्डाऽनुसमयेन वा सहैव कार्या । तत्र छत्रादिमन्त्रैः छत्रादिदेवता आवाह्य गन्धादिपञ्चोपचारानन्तरं फलताम्बूलदक्षिणान्ता, विसर्जनस्थाने च पुष्पाञ्जलिः कार्या । ततश्चामरमन्त्रेण चामरानन्यादिक्रमेणेति ।

"सूर्यपुत्र महाबाहो छायाहृदयनन्दन ।
शान्तिं कुरु तुरङ्गाणां रेवन्ताय नमो नमः ॥"

अनेन मन्त्रेण पूजा । अथाश्वस्य—

"गन्धर्वकुलजातस्त्वं मा भूयाः कुलदूषकः ।
ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥
प्रभावाच्च हुताशस्य वर्धय त्वं तुरङ्गमान् ।
तेजसा चैव सूर्यस्य मुनीनां तपसा तथा ॥
रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च ।
स्मर त्वं राजपुत्रं त्वं कौस्तुभं च मणिं स्मर ॥
यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा तथा ।
भ्रूणहाऽनृतवादी च क्षत्रियश्च पराङ्मुखः ॥
सूर्याचन्द्रमसौ वायुर्यावत्पश्यन्ति दुष्कृतम् ।
व्रजाश्व तां गतिं क्षिप्रं तच्च पापं भवेत्तव ॥
निष्कृतो यदि गच्छेथा युद्धाध्वनि तुरङ्गम ।
रिपून्विजित्य समरे सह भ्रात्रा सुखी भव ॥" इति ।

अथ ध्वजस्य—

"शक्रकेतो महावीर्य श्यामवर्णार्चयाम्यहम् ।
पक्षिराज नमस्तेऽस्तु तथा नारायणध्वज ॥
काश्यपेयारुणभ्रातर्नागारे विष्णुवाहन ।
अप्रमेय दुराधर्ष रणे देवारिसूदन ॥
गरुत्मान्मारुतगतिस्त्वयि सन्निहितो यतः ।
(१)साश्ववर्मायुधान्योधान् रक्ष त्वं च रिपून्दह ॥"

अथ पताकायाः—

"हुतभुग्वसवो रुद्रा वायुः सोमो महर्षयः ।
नागकिन्नरगन्धर्वयक्षभूतगणग्रहाः ॥
प्रमथास्तु सहादित्यैर्भूतेशो मातृभिः सह ।

(१) सारवन्त्यायुधान्यत्र इति मुम्बापुरीमुद्रितपुस्तके पाठः ।

शक्रः सेनापतिः स्कन्दो वरुणश्चाश्रितास्त्वयि ॥
प्रदहन्तु रिपून्सर्वान्राजा विजयमृच्छतु ।
यानि प्रयुक्तान्यरिभिरायुधानि समन्ततः ॥
पतन्तूपरि शत्रूणां हतानि तव तेजसा ।
हिरण्यकशिपोर्युद्धे युद्धे दैवासुरे तथा ॥
कालनेमिवधे यद्वद्यद्वत्त्रिपुरघातने ।
शोभितासि तथैवाद्य शोभयास्मांश्च संस्मर ॥
नीलान्श्वेतानिमान्दृष्ट्वा नश्यन्त्वाशु नृपारयः ।
व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः ॥
पूतना रेवती नाम्ना कालरात्रिश्च या स्मृता ।
दहत्याशु रिपून्सर्वान्पताके त्वं मयार्चिता ॥"

अथ गजस्य—

"कुमुदैरावणौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नील एतेऽष्टौ देवयोनयः ।
तेषां पुत्राश्च पौत्राश्च वनान्यष्टौ समाश्रिताः ।
मन्दोभद्रो मृगश्चैव गजः संकीर्ण एव च ।
वने वने प्रसूतास्ते *यूथानि सुमहान्ति च ।
पान्तु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः ।
भर्तारं रक्ष नागेन्द्र स्वामिवत्प्रतिपाल्यताम् ॥
अवाप्नुहि जयं युद्धे गमने स्वस्ति नो व्रज ।
श्रीस्ते सोमाद्बले विष्णोस्तेजः सूर्याज्जवोऽनिलात् ॥
स्थैर्यं मेरोर्जयं रुद्राद्यशो देवात्पुरंदरात् ।
युद्धे रक्षन्तु नागास्त्वां दिशश्च सह दैवतैः ॥
अश्विनौ सह गन्धर्वैः पान्तु त्वां सर्वतः सदा॥"इति।

---

*यूथानि सुमहान्तिचेति । 'स्मरयोनि महागज' इति वा

अथ खड्गमन्त्रः—

"असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च ॥
एतानि तव नामानि स्वयमुक्तानि वेधसा ।
नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः ॥
रोहिण्यश्च शरीरं ते दैवतं च जनार्दनः ।
पिता पितामहो देवस्त्वं मां पालय सर्वदा ॥
नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः ।
भावशुद्धो मर्षणश्च अतितेजास्तथैव च ॥
इयं येन धृता क्षोणी हतश्च महिषासुरः ।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ॥"

अथ छुरिकायाः—

"सर्वायुधानां प्रथमं निर्मिताऽसि पिनाकिना ।
शूलायुधाद्विनिष्कृत्य कृत्वा मुष्टिग्रहं शुभम् ॥
चण्डिकायाः प्रदत्ताऽसि सर्वदुष्टनिबर्हिणी ।
तया विस्तारिता चासि देवानां प्रतिपादिता ॥
सर्वसत्त्वाङ्गभूतासि सर्वाशुभनिबर्हिणी ।
छुरिके रक्ष मां नित्यं शान्तिं यच्छ नमोऽस्तु ते ॥"

अथ कट्टारकपूजा—

'रक्षाङ्गानि गजान् रक्ष रक्ष वाजिधनानि च ।
मम देहं सदा रक्ष कट्टारक नमोऽस्तु ते ॥'

कट्टारको मध्यदेशे 'कटारी' इति प्रसिद्धा ।

अथ धनुः पूजा —

"सर्वायुधमहामात्र सर्वदेवारिसूदन ।
चाप मां समरे रक्ष साकं शरवरैरिह ॥
धृतं कृष्णेन रक्षार्थं संहाराय हरेण च ।

त्रयीमूर्तिगतं देवं धनुरस्त्रं नमाम्यहम् ॥"

अथ कुन्तपूजा—

"प्रास पातय शत्रूंस्त्वमनया नाकमायया ।
गृहाण जीवितं तेषां मम सैन्यं च रक्षताम् ॥"

अथ चर्मपूजा—

"शमप्रदस्त्वं समरे चर्म सैन्ये यशोऽद्य मे ।
रक्ष मां रक्षणीयोऽहं तापनेय नमोऽस्तु ते ॥"

अथ कनकदण्डमन्त्रः—

"प्रोत्सारणाय दुष्टानां साधुसंरक्षणाय च ।
ब्रह्मणा निर्मितश्चासि व्यवहारप्रसिद्धये ॥
यशो देहि सुखं देहि जयदो भव भूपतेः ।
ताडयस्व रिपून्सर्वान्हेमदण्ड नमोऽस्तु ते ॥"

अथ दुन्दुभिमन्त्रः—

"दुन्दुभे त्वं सपत्नानां घोरो हृदयकम्पनः ।
भव भूमिपसैन्यानां तथा विजयवर्धनः ॥
यथा जीमूतघोषेण प्रहृष्यन्ति च बर्हिणः ।
तथास्तु तव शब्देन हर्षोऽस्माकं मुदावहः ॥
यथा जीमूतशब्देन स्त्रीणां त्रासोऽभिजायते ।
तथात्र तव शब्देन त्रस्यन्त्वस्माद्विषो रणे ॥"

अथ शङ्खमन्त्रः—

"पुण्यस्त्वं शङ्ख पुण्यानां मङ्गलानां च मङ्गलम् ।
विष्णुना विधृतो नित्यमतःशान्तिप्रदो भव ॥"

अथ सिंहासनमन्त्रः—

"विजयो जयदो जेता रिपुघाती शुभङ्करः ।

पाठः । हृदयवर्धनः हृदयच्छेदनः, हृदयकम्पनइति वा पाठः । विजयवर्धनः विना ? । पुण्यशङ्खानां शङ्खपुण्यानामिति वा पाठः ।

दुःखहा धर्मदः शान्तः सर्वारिष्टविनाशनः ॥
एते वै संनिधौ यस्मात्तव सिंहा महाबलाः ।
तेन सिंहासनेति त्वं देवैर्मन्त्रैश्च गीयसे ॥
त्वयि स्थितः शिवः शान्तस्त्वयि शक्रः सुरेश्वरः ।
नमस्ते सर्वतोभद्र भद्रदो भव भूपतेः ॥
त्रैलोक्यजयसर्वस्व सिंहासन नमोऽस्तु ते ।
तथैव कर्मचिह्नानि स्वानि पूज्यानि शिल्पिभिः ॥
लौहाभिसारिकं कर्म कृत्वैवं *मन्त्रपूर्वकम् ।
*नित्यं कृत्वा तथाष्टम्यां पूर्वाह्णे स्नानमाचरेत् ॥
कुङ्कुमचन्दनचम्पकचतुःसमैः *शैलपिष्टैश्च ।
चर्चितगात्रीं देवीं कुसुमैरभ्यर्चयेद्बुधिः ॥

"महेन्द्रनिर्मिते दिव्ये देवराजादिसेविते ।
शिविके पाहि मां नित्यं सदा त्वं सन्निधौ भव ॥"

इति शिविकाम् । दोलयोर्मन्त्रः क्वचिन्न दृश्यते ।

*मन्त्रपूर्वकमिति ।

'जयं प्राप्नोति नृपतिस्सर्वान्कामान्समश्नुते ।' इति ।

उत्तरार्धेन तदन्वयः । 'अत्यर्थं यजनीया सा' इत्युक्तम् । तत्राष्टमीकृत्यं विशेषतस्त्रिकालदिवापूजाहोमबलिदानानि, रात्रिपूजा निशीथपूजा बलिदानानि सन्धिपूजाश्चेति । तत्र विशेषेण त्रिकालपूजा प्रोक्तमायैव । तत्र पूर्वाह्णपूजायां स्नानविशेषादिकमाह—*नित्यं कृत्वेति । स्नानं देव्याः । चतुःसमं गारुडे—

"कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य च ।
कुङ्कुमस्य त्रयश्चैकः शशिनः स्याच्चतुःसमम् ॥

शशी कर्पूरः ।

कर्पूरं चन्दनं दर्पं कुङ्कुमे च समांशकम् ।
सर्वगन्धमिति प्रोक्तं समस्तसुरवल्लभम् ॥"

कुमुदैः सपद्मपुष्पैः सधूपदीपैः सनैवेद्यैः ।
मांसैर्बल्युपहारैर्मङ्गलशब्दैः समुच्छलितैः ॥
विहितच्छत्रैर्यानैः स्यन्दनसितशस्त्रधारिजनलोकैः ।
तुष्टैः पश्वस्त्रादि तु निवेद्यते सर्वमेव भगवत्यै ॥
दुर्गा सा पूजनीया च तदिने द्रोणपुष्पकैः ।
ततः खड्गं नमस्कृत्य शत्रूणां वधसिद्धये ॥
इच्छेत विजयं राज्यं सुभिक्षं चात्मने नृपः ।
पुनः पुनः प्रणम्यार्यां संस्मरन्हृदये शिवाम् ॥
सर्वं कृत्वेति कौरव्य*अष्टम्यां जागरं निशि ।
नटनर्तकगीतैश्च कारयेच्च महोत्सवम् ॥
एवं हृष्टैर्निशां नीत्वा प्रभाते अरुणोदये ।
घातयेन्महिषान्मेषानग्रतो नतकन्धरान् ॥
शतमर्धशतं वापि तदर्धं वा यथेच्छया ।
सुरासवभृतैः कुम्भैस्तर्पयेत्परमेश्वरीम् ॥
कापालिकेभ्यस्तद्देयं दासीदासजने तथा ।
ततोऽपराह्णसमये नवम्यां वै रथे स्थिताम् ॥
अवानीं आमयेद्राष्ट्रे स्वयं राजा सशब्दवान् ।

दर्पः=कस्तूरी । *शैलं शैलेयम् । साऽवमान्येति कुत इत्यत्राह-*सुरेशान्या इति ।

यतस्तस्याः सुरेशान्या अग्रेऽयं साधको रुद्र इत्यन्यायः । अवमाने तु तमेव नाशयेत् इति भावः । प्रसिद्धश्च श्रीमद्भागवते जडभरतबलिदानार्थं प्रवृत्तानां शूद्राणामेव नाशो देवीकृतः । सर्वदिवाकृत्यं सायंपूजान्तम् । निशीथकृत्यमाह-*अष्टम्यामिति ।

"पुनः पूजा तथाऽष्टम्यां विशेषेण समाचरेत् ।
जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥"

इति कालिकापुराणसम्वादात् । पुनः सायंपूजानन्तरं

काश्चिद्वोपोषितो वीरो*विधूतोऽन्येन खड्गवान् ॥
भूतेभ्यस्तु बलिं दद्यान्मन्त्रेणानेन सामिषम् ।
सरक्तं सजलं चान्नं गन्धपुष्पाक्षतैर्युतम् ॥
त्रींस्त्रीन्वारान्समूलेन दिग्विदिक्षु किरेद्बलिम् ॥'

मन्त्रश्च—'बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा ।
मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥
असुरा यातुधानाश्च पिशाचोरगराक्षसाः ।
डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥
जृम्भकाः सिद्धगन्धर्वा (१)माला विद्याधरा नगाः ।
दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥
जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः ।
मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः ॥
सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः ॥' इति ।

इति महाष्टमी ।

महानवमी तु पूर्वयुता ग्राह्या । पूर्वोक्तवचनात् । 'नवमी दुर्गाव्रते श्रावणी' इति दीपिकोक्तेः ।

'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम् ॥'

इति हेमाद्रौ पाद्मोक्तेश्च । भविष्येऽपि—

*आश्वयुक्शुक्लपक्षे तु अष्टमीमूलसंयुता ।

स्वयमपि वक्ष्यति—अष्टमीमात्रे भवत्येवेत्यादिना । राज्ञश्च विजयार्थं निशीथबलिरुक्तः । सुरासवो ब्राह्मणस्य निषिद्ध इति वक्ष्यामः । *विधूतोऽन्येनेति ।

उपवासैः पतनभयवारणाय महानवम्यां पूजाबलिदानं होमश्चेति त्रयं कृत्यम्, तत्र पूजामुपक्रमते—*आश्वयुजीति । अष्टमीमूलाभ्यां

१—'नागा विद्याधरा' इतिपाठः ।

सा महानवमी प्रोक्ता त्रैलोक्येऽपि सुदुर्लभा ॥' इति।

मूलमुपलक्षणम् ।

'दुर्गापूजासु नवमी *मूलाभृक्षत्रयान्विता ।
महती कीर्तिता तस्यां दुर्गा महिषमर्दिनी ॥'

इति मदनरत्ने वैद्यनाथ । अत्र पूजयेदित्यग्रे शेषः । यानि तु—'सा (१)कार्योदयगामिन्याम्' इत्यादि प्राक्तानि तानि नवमीभिन्नतिथिपराणि । नवम्यां विशेषोक्तेः । वेधश्च मुहूर्तत्रयेणैव ज्ञेयः । यद्यपि हेमाद्रिमते मुहूर्तद्वयात्माऽपि वेधोऽस्ति, तथापि सूर्योदय एव सः । सायं तु त्रिमुहूर्त एव । तदुक्तं दीपिकायाम्—'त्रिमुहूर्तगा तु सकला सायम्' इति । माधवोऽपि—

'सायं तूत्तरया तद्वन्न्यूनया न तु विध्यते ।' इति ।

तेन त्रिमुहूर्तयोगे पूर्वा नवमी, पूर्वोक्तवचनात्

'न कुर्यान्नवमी तात दशम्यां तु कदाचन ।'

इति स्कान्दे परानिषेधाच्च । त्रिमुहूर्तयोगाभावे तु निषिद्धाऽपि परैव कार्येति *निष्कर्षः ।

संयुता नवमीत्यर्थः । *मूलादीति । आदिना पूर्वाषाढापरिग्रहः ।

"पूर्वयाऽषाढया वाऽपि ऋक्षद्वययुताऽथ वा" ।

इति वचनात् ।

"मूलाभावे तु कर्तव्या अष्टमी नोपसंयुता ।
विश्वयुक्ताऽपि कर्तव्या अष्टमी नवमीयुता ॥"

इत्युत्तराषाढावाक्यं त्वनर्थकम् ।

"मूलेन पूजयेद्देवीं तथा सलिलदैवते ।
वैश्वदेवे तु नक्षत्रे पूजिता दुःखदा भवेत् ॥"

इति वचनात् । *निष्कर्ष इति । पूर्वविद्धायां नवम्यां

१—एतदग्रे—'तिथावुत्तरगामिन्याम्' इत्यधिकः क्वचित्पाठः ।

*यत्तु—

'नवम्यां च जपं होमं समाप्य श्रवणेऽपि वा ।'

इति संग्रहोक्तेः,

'व्रतं च जागरश्चैव नवम्यां विधिवद्बलिः ।'

इति देवीपुराणाच्च नवम्यां होमबल्यादि विहितं,

तत्र—

'आश्वयुक्शुक्लनवमी मुहूर्तं वा कला यदि ।
सा तिथिः सकला ज्ञेया लक्ष्मीविद्याजयार्थिभिः ॥'

इति सौरपुराणात्,

'सूर्योदये परं रिक्ता पूर्णा स्यादपरा यदि ।
बलिदानं प्रकर्तव्यं तत्र देशे शुभावहम् ॥
बलिदाने कृतेऽष्टम्यां पुत्रभङ्गो भवेन्नृप ॥'

इति मदनरत्ने देवीपुराणाच्च *बल्यादौ परा कार्या । उपवासादौ तु पूर्वेति मदनरत्ने उक्तम् । प्रतापमार्तण्डेऽ-

---

पूजाहोमादि कृत्वा नवम्यां प्रभूतबलिदानं कार्यम् ।

'प्रभूतबलिदानं च नवम्यां विधिवच्चरेत् ।'

इति कालिकापुराणात् । यदा तु नवमी अष्टमीविद्धा भूत्वा द्वितीयादिने कियती वर्धते तदा नवमीप्रयुक्तस्य पूजादेः पूर्वदिनेऽनुष्ठानेऽपि महाबलिदानमात्रं द्वितीयदिने कार्यमित्याह—*यच्चैवेत्यादिना । आद्ये समाप्येत्युक्त्या द्वितीये व्रतजागरोत्तरं बल्युक्त्या च सन्देहः ।

*बल्यादाविति । यद्यप्यादिपदं चिन्त्यं होमस्यापि पूर्वेद्युरेवोक्तेः, तथाऽपि बल्यङ्गपुष्पन्यासादिर्बल्यर्थपूजादिर्वा तेन ग्राह्यः ।

"अष्टम्यामुदिते सूर्ये दिनान्ते नवमी भवेत् ।
प्रभाते बलिदाने तु कियन्मात्रापि लभ्यते ॥

प्येवम् । *यत्तु—

'अष्टम्यां बलिदानेन पुत्रनाशो भवेद् ध्रुवम् ।'

इति कालिकापुराणं, तत्संधिपूजापरम् ।

'अष्टमीनवमीसन्धौ*तृतीया खलु कथ्यते ।'

इति तत्रैव तदुक्तेः । कामरूपनिबन्धे—

*'अष्टम्याः शेषदण्डश्च नवम्याः पूर्व एव च ।
तत्र या क्रियते पूजा विज्ञेया सा महाफला ॥'

अष्टमीमात्रे*भवत्येव ।

'आश्विने पूजयित्वा तु अर्धरात्रेऽष्टमीषु च ।
घातयन्ति*पशून्भक्त्या ते भवन्ति महाबलाः ॥'

तथा—

'कन्यासंस्थे रवौ शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्धे तु महाविभवविस्तरैः ॥'

तथा—

'पशुघातश्च कर्तव्यो गवयाजवधस्तथा ।'

नवम्यां तत्र सम्पूज्या दुर्गा दुर्गातिनाशिनी ।"

(इति) प्रातर्नवम्यां बल्यर्थपूजाविधानात् परेद्युर्नवमी, तदभ्यभावे तु पूर्वेद्युर्नवमीमध्य एव बल्यादि कार्यम् ।

"दशम्यां बलिदानन्तु दीयते यत्र मानवैः ।
तद्राष्ट्रं नाशमायाति मारकोपद्रवैः समम् ॥"

इति शुद्धदशम्यां नवमीप्रयुक्तबलिदानकरणे दोषोक्तेः । *यत्तिवाति । अष्टमीप्रयुक्तबलिदानस्य तत्रैव कर्तव्यत्वात्कथमेतत् ? *तृतीयेति । सायंपूजा प्रथमा निशीथपूजा द्वितीया सन्धिपूजा तृतीयेत्यर्थः । सन्धिपूजाविधिमाह—*अष्टम्या इति । *भवत्येवेति । बलिदानमित्यादि । *पशूनिति । बहुकुलाचाराभिप्रायं काम्यं वा । राजा तु महानवम्यामुपवास-

इति रूपनारायणीये देवीपुराणात्। तत्रैव भाविष्ये—

*'तस्मादियं महापुण्या नवमी पापनाशिनी।
उपोष्या *सुप्रयत्नेन सततं सर्वपार्थिवैः॥'

निर्णयदीपे तु महानवमी परदिनेऽपराह्णव्याप्तित्वे परा, अन्यथा पूर्वा।

'आवर्तनात्पूर्वकाले नवमी स्यात्परेऽहनि।
दुर्गार्चा तत्र पूर्वेद्युः पूर्वाह्णे त्वष्टमी यदि॥'

इति धौम्यवचनादित्युक्तम्। अस्य तु शारदानवमीविषयत्वं समूलत्वं च विमृश्यम्। यानि तु—

'नन्दायां ज्वलते *वह्निः पूर्णायां *पशुघातनम्।
*भद्रायां गोकुलक्रीडा तत्र राज्यं विनश्यति॥'इति,

'नवम्यामपराह्णे तु बलिदानं प्रशस्यते।
दशमीं वर्जयेत्तत्र नात्र कार्या विचारणा॥' इति,

'नन्दाया दर्शने *रक्षा बलिदानं दशासु च।
भद्रायां गोकुलक्रीडा देशनाशाय जायते॥'

इति ब्रह्मवैवर्तनारदादिवचनानि, तानि*शुद्धाधिकनिषेधपराणि इति मदनरत्ने। तथा कालिकापुराणे—

'नवम्यां बलिदानं तु कर्तव्यं वै यथाविधि।
जपं होमं च विधिवत्कुर्यात्तत्र विभूतये॥'

केचित्तु—

'पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणम्।'

इति पूर्वोक्तदेवीपुराणादष्टम्यां होममाहुः। अन्ये तु त्रिविधवाक्यवशादष्टम्यामारभ्य नवम्यां समापयमेव कुर्यादित्याह—*तस्मादिति। *सुप्रयत्नेनेति। एकभक्तादिनिवृत्तिः। *वह्निः होला। *पशुघातनं बलिदानम्। *भद्रायाम् कार्तिकशुक्लद्वितीयायाम्। *रक्षा रक्षाबन्धनम्।

न्ति। *समुच्चयस्तु युक्तः। रुद्रयामले तु विकल्प उक्तः, स्यात्तु निर्मूलम्। दुर्गाभक्तितरङ्गिण्यादिगौडग्रन्थेष्वपि नवम्यां होम उक्तः।

*होमे च विशेष उक्तो डामरतन्त्रे—

'पायसं सर्पिषा युक्तं तिलैः शुक्लैर्विमिश्रितम्।
होमयेद्विधिवद्वह्न्या दशांशेन नृपोत्तम॥
*रुद्राध्याये यथा होमं मन्त्रेणैकेन साधयेत्।
तथा*स्तोत्रजपे होमं श्लोकेनैकेन साधयेत्॥

---

*शुद्धाधिकेति। नन्दापूर्णाभद्रात्रयेति शेषः। *समुच्चयस्त्विति। वस्तुतस्तु यद्यपि

'जपहोमसमायुक्तः कन्यकां भोजयेन्मुदा।'

इति वचनात् प्रत्यहं होमः प्रतीयते तथापि अष्टम्यामेव नवम्यामेव वा कार्यः। 'तत्राष्टम्यां भद्रकालि' इत्युपक्रम्य 'होमैर्ब्राह्मणतर्पणैः' इति ब्राह्मे अष्टमीकृत्यमध्ये पाठात् नवमीकृत्यमध्ये—'नवम्यां बलिदानं च'इति कालिकापुराणाच्च। अथ वा—

'पूर्वाषाढायुताऽष्टम्यां पूजाहोमाद्युपोषणम्'।

इत्यष्टम्याम्

'नवम्यां बलिदानं च कर्तव्यं वै यथाविधि।

जपं होमं च विधिवत्'इति नवम्यां च विधानात्तथा शिष्टाचाराच्चाष्टम्यामारभ्य नवम्यां समापनीयः। होमद्रव्यं च तिलाज्यादि।

'पूजयेत्तिलहोमैश्च दधिक्षीरघृतादिभिः।'

इति देवीपुराणात्। होमश्च गुरूपदिष्टमन्त्रेण सप्तशतीमन्त्रेण जयन्तीमन्त्रेण इति मन्त्रत्रयम्। तत्राद्यमभिप्रेत्याह—*होमे चेति। कात्यायनीतन्त्रोक्तमार्गेणायं होम इति मान्त्रिकाः। द्वितीयमभिप्रेत्याह—*रुद्राध्याये इति। रुद्राध्याये मन्त्रविभागो बौधायनाद्युक्तः, अत्र तु कात्यायनीतन्त्रोक्तः। *स्तोत्रज-

यद्वा सप्तशतीं जप्त्वा होममन्त्रो नवाक्षरः।"

*'ऐं ह्रीं क्लीं चामुण्डायै विच्चे' इति नवाक्षर इति कोचित्। *पूजोक्तो ग्राह्य इति तु युक्तम्। रुद्रयामलेऽपि

*'प्रधानद्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा।
किंशुकैः सर्षपैः पूगैर्लाजादूर्वाङ्कुरैरपि॥
यवैर्वा अपि फलैर्दिव्यैर्नानाविधफलैस्तथा।
रक्तचन्दनखण्डैश्च गुग्गुलैश्च मनोहरैः॥
*प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि च क्रमात्।
*नवाक्षरेण वा हुत्वा नमो देव्या इतीति च॥' इति

पे इति। सप्तशतीस्तोत्रजपे इत्यर्थः। तृतीयं वक्ष्यति। सप्तशतीपक्षान्तरं सप्तशतीपाठे आद्यन्तजप्यो यो नवाक्षरस्तावन्मात्रएव होममन्त्र इत्यर्थः। स च—

"ऐं बीजमादीन्दुसमानदीप्तिं ह्रीं सूर्यतेजोद्युतिमाद्वितीयम्।
क्लीं मूर्तवैश्वानरतुल्यरूपं तृतीयमानन्त्यसुखाय चिन्त्यम्॥
चा शुद्धजाम्बूनदकान्तितुर्यं मुं पञ्चमं रक्ततरं प्रकल्प्यम्।
ण्डा षष्ठमुग्रातिहरं सुनीलं यै सप्तमं कृष्णतरं रिपुघ्नम्॥
वि पाण्डुरं त्वष्टममादिसिद्धं च्चे धूम्रवर्णं नवमं विशालम्॥"

इति डामरतन्त्रोक्त एवेति मतमाह-*ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे इति। *पूजोक्त इति।

'कथितं पूजनाध्याये तद्वद्धोमो भवेदसौ'।

इति वचनात्। *प्रधानेत्यादि सप्तशतीस्तोत्रहोमपरम्। *प्रतिश्लोकं प्रतिमन्त्रं च कात्यायनीतन्त्रे तन्मन्त्रविभागो नागोजीभट्टप्रकाशितो ग्राह्यः। तेन दशांशहोमः प्रत्यहमेकपाठे अन्ते एकावृत्तिर्होमः प्रत्यहमेकैकपाठावृत्तिवृद्धौ चोह्यम्। *नवाक्षरेण सप्तशतीस्तोत्रपूर्वोत्तरस्थानजप्तनवाक्षरेण।

"नमोदेव्यै महादेव्यै शिवायै सततं नमः।

*रहस्ये तु—

'प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा ।'

इत्युक्तम् । *दुर्गाभक्तितरङ्गिण्यां तु *तिलैर्जयन्ती-मन्त्रेण च होम उक्तः ।

'पुरश्चरणकार्ये तु बिल्वपत्रयुतैस्तिलैः ।'

इति कालिकापुराणाद्बिल्वपत्रैश्चेति स्मार्ताः, तन्न । अन्यत्र मानाभावात् ॥

अथ बलिदानम् । तत्राश्वमेषच्छागमाहिषखड्गांसानामुत्तरोत्तरप्राशस्त्यं फलविशेषश्चान्यत्रोऽवसेय इति दिक् । बलिप्रकारस्तु देवीपुराणे—

'कन्यासंस्थे रवौ शक्तः शुक्लाष्टम्यां प्रपूज्य तु ।
द्रोणपुष्पैश्च बिल्वाम्रजातीपुन्नागचम्पकैः ॥

नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मृताम् ॥''

*रहस्ये त्विति । तिलसर्पिर्मात्रोपादानं वचनान्तरोक्त-दध्यादेरुपलक्षणं तदावश्यकत्वार्थं वा । तृतीयमाह—*दुर्गाभक्ती-ति । *तिलैरिति । तिलाज्यादिभिरित्यर्थः ।

'पूजयेत्तिलहोमैश्च दधिक्षीरघृतादिभिः ।'

इति देवीपुराणात् । मन्त्रश्च जयन्तीत्यादिः ।

'अनेनैव तु मन्त्रेण जपहोमादि कारयेत् ।'

इति देवीपुराणात् । होमद्रव्यप्रमाणन्तु सिद्धान्तशेखरे—

'होमद्रव्यप्रमाणानि वक्ष्यन्तेऽथ यथाक्रमम् ।
कर्षप्रमाणमाज्यं स्यान्मधुक्षीरं च तत्समम् ॥
तण्डुलानां शुक्तिमात्रं पायसं प्रसृतेः समम् ।
कर्षमात्राणि भक्ष्याणि लाजा मुष्टिमिता मताः ॥
अन्नं ग्राससमं ग्राह्यं शाकं ग्रासार्धमात्रकम् ।
मूलानान्तु त्रिभागः स्यात्कन्दानामष्टमोंऽशकः ॥

इक्षुः पर्वप्रमाणं स्यादङ्गुलद्वितयं लता ।
प्रादेशमात्राः समिधो व्रीहीणां मञ्जरीसमाः ॥
तिलसक्तुकणादीनां मृगमुद्राप्रमाणतः ।
पत्रपुष्पफलानान्तु समानाहुतिरिष्यते ॥
चन्द्रश्रीखण्डकस्तूरीकुङ्कुमागरुकर्दमाः ।
हरिमन्थसमाः प्रोक्ता गुग्गुलुर्बदरीसमः ॥
आहूतीनामिदं मानं कथितं वेदवेदिभिः ॥" इति ।

हरिमन्थः चणकः । मृगीमुद्रालक्षणमनुपदं वक्ष्यामः । गारुडे-

"कर्पूरमगुरुश्चैव कस्तूरी चन्दनं तथा ।
कङ्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः ॥" इति ।

पदार्थादर्शे—

"घृतस्य कार्षिको होमः क्षीरस्य मधुनस्तथा ।
शुक्तिमात्राहुतिर्दध्नः प्रसृतिः पायसस्य तु ॥
खण्डत्रयन्तु मूलानां फलानां स्वप्रमाणतः ।
ग्रासमात्रन्तु होतव्या इतरेषां च तण्डुलाः ॥
अक्षतास्तु यवाः प्रोक्ता अभावे व्रीहयः स्मृताः ।
तदभावे तु गोधूमा न तु खण्डिततण्डुलाः ॥
सर्वप्रमाणमाहुत्या पञ्चाङ्गुलगृहीतया ।
कर्षमात्राणि भक्ष्याणि खाद्यानां खण्डपञ्चकम् ॥
चन्दचन्दनकाश्मीरकस्तूरीयक्षकर्दमान् ।
कलापसंमितानेतान् गुग्गुलं बदरास्थिवत् ॥
द्रवं हविः स्रुवेणैव पाणिना कठिनं हविः ।
स्रुवपूर्णा द्रवा प्रोक्ताः कठिना ग्रासमात्रकाः ।
व्रीहयो यवगोधूमप्रियङ्गुतिलशालयः ।
स्वरूपेणैव होतव्या इतरेषां च तण्डुलाः ।
होमे मुद्रात्रयं प्रोक्तं मृगी हंसी च सूकरी ।
मुद्राहीनस्तु यद्धोमस्तत्सर्वं निष्फलं लभेत् ॥

सूकरी सर्वाङ्गुलयो हंसी मुक्तकनिष्ठिका ।
मृगी कनिष्ठतर्जन्यौ मुद्रात्रयमुदाहृतम् ॥
आभिचारिकहोमे च सूकरी कथ्यते बुधैः ।
यज्ञे शान्तिककल्याणे मृगी हंसी प्रकीर्तिते ॥
स्यात् त्रिमुद्रा मृगी मुद्रा होमे सर्वफलप्रदा ।" इति ।

शारदायाम्—

"अथात्र होमद्रव्याणां प्रमाणमभिधीयते ।
कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतम् ॥
उक्तानि पञ्चगव्यानि तत्समानि मनीषिभिः ।
तत्समं मधु दुग्धाज्ञमक्षमात्रमुदाहृतम् ।
दधि प्रसृतिमात्रं स्यात् लाजाः स्युर्मुष्टिसम्मिताः ।
पृथुकास्तत्प्रमाणाः स्युः सक्तवोऽपि तथोदिताः ।
गुडं पलार्धमानं स्याच्छर्कराऽपि तथा स्मृता ।
ग्रासार्धं चारुमानं स्यादिक्षुः पर्वावधिः स्मृतः ॥
एकैकं पत्रपुष्पादि तथा धूपादि कल्पयेत् ।
कदलीफलनारङ्गफलान्येकैकशो विदुः ।
मातुलुङ्गं चतुःखण्डं पनसं दशधा स्मृतम् ॥
अष्टधा नारिकेलानि खण्डितानि विदुर्बुधाः ।
त्रिधा कृतं फलं बैल्वं कपित्थं खण्डितं द्विधा ।
उर्वारुकफलं होमे चोदितं खण्डितं त्रिधा ॥
फलान्यन्यान्यखण्डानि समिधः स्युर्दशाङ्गुलाः ।
दूर्वात्रयं समुद्दिष्टं गुडूची चतुरङ्गुला ॥
व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाषयवा अपि ।
तण्डुलास्तु तदर्धोक्ताः कोद्रवा मुष्टिसम्मिताः ।
गोधूमा रक्तकलमा विहिता मुष्टिमानतः ॥
तिलाश्चुलुकमात्राः स्युर्सर्षपास्तत्प्रमाणतः ।
शुक्तिप्रमाणं लवणं मरीचान्येकविंशतिः ।

*पञ्चाब्दं लक्षणोपेतं गन्धपुष्पसमन्वितम् ।
विधिवत्कालि कालीति जप्त्वा खड्गेन घातयेत् ॥
('ॐ कालि कालि यज्ञेश्वरि लोहदण्डायै नमः' इति मन्त्रः ।)
तदुत्थरुधिरं मांसं गृहीत्वा पूतनादिषु ।
(आदिशब्दाच्चरकीविदारीपापराक्षस्यः ।)
नैर्ऋतेभ्यः प्रदातव्यं महाकौशिकमन्त्रितम् ॥'
मन्त्रस्तु वक्ष्यते । तथा—
*'तस्याग्रतो नृपः स्नायात्कृत्वा शत्रुं तु पैष्टिकम् ।
खड्गेन घातयित्वा तु दद्यात्स्कन्दविशाखयोः ॥'
अशक्तौ *ब्राह्मणेन च कूष्माण्डादिभिर्बलिदानं कार्यम् । तदुक्तं कालिकापुराणे—

पुरं बदरमानं स्याद्द्रामठं तत्समं स्मृतम् ॥
(पुरम् गुग्गुलुः ।)
चन्दनागरुकर्पूरकस्तूरीकुङ्कुमानि च ।
तिन्तिणीबीजमानानि समुद्दिष्टानि दैशिकैः ॥
वैश्वानरं स्थितं ध्यायेत्समिद्धोमेषु देशिकः ।
शयानमाज्यहोमेषु नियम्यं शेषवस्तुषु ॥' इति ।
"उत्तमोऽरणिजो वह्निर्मध्यमः सूर्यकान्तजः ।
उत्तमः श्रोत्रियागारान्मध्यमः स्वगृहाद् द्विजः ॥"
इति च प्रयोगरत्ने ।

*पञ्चाब्दं महिषमजं मेषं वा । *तस्याग्रतो नृप इति । अत्र पशुबलिदानानन्तरं तद्रक्तं सर्वाङ्गे लेपयित्वा अशक्तौ तिलकादिकं वा कृत्वा स्नानं कार्यमित्येके । अन्ये तु शत्रुर्मृत इति भावनया स्नानमिच्छन्ति । *ब्राह्मणेन चेति । यद्यपि अग्नीषोमीयपशुहिंसावत् पशुबलिदानं धर्म्यं तथापि तत् क्षत्रियादिविषयम् ।

'कूष्माण्डमिक्षुदण्डं च*मांसं सारद्यमेव च।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा॥'

रुद्रयामलेऽपि—

'छागाभावे तु कूष्माण्डं श्रीफलं वा मनोहरम्।
वस्त्रसंवेष्टितं कृत्वा छेदयेच्छुरिकादिना॥'

तथा—

'ब्राह्मणेन सदा देयं कूष्माण्डं बलिकर्मणि।
श्रीफलं वा सुराधीश छेदं नैव तु कारयेत्।'
(छेदे विकल्पः।)
*माषान्नेन बलिर्देयो ब्राह्मणेन विजानता।'

कालिकापुराणे—

ब्राह्मणस्य तु—

'सात्त्विकी जपहोमाद्यैर्नैवेद्यैश्च निरामिषैः।'

इति वचनात् सात्त्विक्यामेवैतत्पूजायामधिकारात् श्रीमद्भगवद्गीतादिषु ब्राह्मणस्य सात्त्विक्यामेवाधिकारात्। एवं सुरया स्वगात्ररुधिरेण च पूजाऽपि न ब्राह्मणस्य।

'मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते।
स्वगात्ररुधिरं दत्त्वा ब्रह्महत्यामवाप्नुयात्।"

इति कालिकापुराणे एव तन्निषेधात्। मयूखे तु—

पशुबली राज्ञैव देयः "विजयार्थं नृपोत्तम" इति वचनादित्युक्तम्। *मांसं सारद्यमेव चेति। 'मद्यमांसवदेव च' इति पाठः। तत्र सारद्यं मद्यम्। मद्यं मांसं च ब्राह्मणस्य वर्ज्यम्।

'राजसी बलिदानाद्यैर्नैवेद्यैः सामिषैस्तथा।'

इति मांसबलिदानादे राजसत्वोक्तेर्मद्यनिषेधाच्च। *माषान्नेनेति।

'भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः।'

*'उत्तराभिमुखो भूत्वा बलिं पूर्वमुखं तथा ॥
निरीक्ष्य साधकः पश्चादिमं मन्त्रमुदीरयेत् ॥
'पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥
चण्डिकाप्रीतिदानेन दातुरापद्विनाशनम् ।
चामुण्डाबलिरूपाय बले तुभ्यं नमोऽस्तु ते ॥
*यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयंभुवा ।
अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ॥'
ऐंह्रींश्रीमिति मन्त्रेण तं बलिं मत्स्वरूपिणम् ।
चिन्तयित्वा न्यसेत्पुष्पं मूर्ध्नि तस्य तु*भैरव ॥
रसना त्वं चण्डिकायाः सुरलोकप्रसाधकः ।
ऐंह्रींह्रींखड्गेतिमन्त्रेण ध्यात्वा खड्गं च पूजयेत्
पूजयित्वा ततः खड्गं ॐ हुंफडिति मन्त्रकैः ।
गृहीत्वा विमलं खड्गं छेदयेद्बलिमुत्तमम् ॥
*ॐह्रींऐंह्रींकौशिकीति रुधिरेणाप्यायतामिति

इति कोषान्मापभक्तेनेत्यर्थः । कुल्मापभक्तोपलक्षणम् ।

'माषं कुल्मापमांसाद्यैर्देयो दिक्षु बलिर्निशि ।'

इति कालिकापुराणात् । बलिदानप्रकारमाह-*उत्तरे *यज्ञार्थं पशव इति । *घातयामि घातयिष्यामि क्वचि पाठः । *भैरवेति ।

'अभिषिच्य बलिं पश्चात्करवालं तु पूजयेत् ।'

इति बोध्यम् । ॐ क्रीं फडिति वा पाठः । छेदनमन्त्रमाह- *ॐमित्यादि आप्यायतामित्यन्तम् । रुधिरं च स्थाने पात्र

'स्थाने नियोजयेद्रक्तं शिरसश्च प्रदीपकम् ।'

इति वचनात् । राजा स्वश्वपीडाशान्तये नवम्यां रेवन्तपू कुर्यात् । रेवन्तश्च वडवारूपायां छायायां सूर्यादुत्पन्नोऽश्वगणा

बलिदाने तु दुर्गायाः सर्वत्रायं विधिः स्मृतः ॥'

मत्स्यसूक्ते—

*'नवम्यां *पूर्ववत्पूजा कर्तव्या भूतिमिच्छता ।
दक्षिणां वस्त्रयुगं च आचार्याय निवेदयेत् ॥'

अथात्र प्रसङ्गाच्छतचण्डीविधानमुच्यते । रुद्रयामले—

'शतचण्डीविधानं च प्रोच्यमानं शृणुष्व तत् ।
सर्वोपद्रवनाशार्थं शतचण्डीं समारभेत् ॥

पतिः । पूजामन्त्रः शालिहोत्रे—

"नमो देवाधिदेवाय तुरङ्गबलधारिणे ।
सूर्यपुत्राय देवाय तुरङ्गसहिताय च ॥
तुरङ्गपरिषद्यस्य नृगजोपरि धावति ।
साऽश्वमश्वाधिपं त्वद्य स तूर्णं त्वां व्रजाम्यहम् ॥
मन्त्रेणानेन रेवन्तं पाद्याद्यैरर्चयत्सुधीः ॥" इति ।

ततः—

'सूर्यपुत्र महाबाहो च्छायाहृदयनन्दन ।
शान्तिं कुरु तुरङ्गाणां रेवन्ताय नमो नमः ॥"

इति मन्त्रेण प्रार्थयेत् । एवं नवम्यां होमादि कृत्वाऽनन्तरं स्तु-(कृ)त्यमाह—*नवम्यामिति । *पूर्ववत्पूजेति । कुमारीपूजा इत्यर्थः । अत्र ब्राह्मणपूर्वकं ब्राह्मणभोजनादि द्रष्टव्यम् ।

"अभोजयित्वा विप्राग्र्यानसम्पूज्य च तानपि ।
अदत्त्वा दक्षिणां तेभ्यो भूयसीं चापि पापकृत् ॥
यो मां पूजयते हृष्टः स मां द्वेष्टि नराधमः ।"

इति वचनात्

'गजाश्वशय्यावस्त्रादि दद्याद्धर्मादि वा पुनः ।'

इति वचनात् 'व्रतान्ते विप्रभोजनम्' इति वचनात्

'तदन्ते भोजयेद्विप्रान्दानं दद्याच्च शक्तितः ।'

*षोडशस्तम्भसंयुक्तं मण्डपं पल्लवोज्ज्वलम् ।
वसुकोणयुतां वेदीं मध्ये कुर्यात्त्रिभागतः ॥
पकेष्टकचितां रम्यामुच्छ्राये हस्तसंमिताम् ।
पञ्चवर्णरजोभिश्च कुर्यान्मण्डलकं शुभम् ॥
पञ्चवर्णवितानं च किङ्किणीजालमण्डितम् ।
आचार्येण समं विप्रान्वरयेद्दश सुव्रतान् ॥
ईशान्यां स्थापयेत्कुम्भं पूर्वोक्तविधिना चरेत् ।
वारुण्यां च प्रकर्तव्यं कुण्डं लक्षणलक्षितम् ॥
मूर्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै ।
तदर्धेन तदर्धेन तदर्धेन महामते ॥
*अष्टादशभुजां देवीं कुर्याद्वाऽष्टकरामपि ।

इत्यग्रिमवचनाद्विप्रभोजनदानादेरावश्यकत्वाच्च तत आचार्याय दक्षिणादि दद्यादित्यर्थः ।

*षोडशेति । सर्वग्रन्थमतेन षोडशमहादानेषु रुद्रे तथा

"वापीकूपतडागपूजनविधौ स्यान्मण्डपोक्तो विधि-
र्वेदास्त्रादिसमस्तकुण्डसहितो देवप्रतिष्ठाविधौ ।
आरामोत्सवलक्षहोमविधिषु प्रोक्तश्च चण्डीद्वये "

इत्यभियुक्तसिद्धान्तात्कुण्डमण्डपौ ह्यावश्यकः । तत्र च—

"पूर्वमेव विभक्तव्याः स्वस्वकुण्डेऽग्नयो बुधैः ।
तथा स्विष्टकृदाद्यन्ते समारोप्य समित्सु च ।
मुख्याग्नौ मेलनं कार्यमिति वह्निविनिर्णयः ॥ इति च ।

*अष्टादशभुजा यथा—

'आयुधान्यत्र वक्ष्यन्ते दक्षिणाधः करक्रमात् ।
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ।
शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः ।

पट्टकूलयुगच्छन्नां देवीं मध्ये निधापयेत् ॥
देवीं संपूज्य विधिवज्जपं कुर्युर्दश द्विजाः ।
शतमादौ शतं चान्ते जपेन्मन्त्रं नवार्णकम् ॥
चण्डीं सप्तशतीं मध्ये संपुटोऽयमुदाहृतः ।
एकं द्वे त्रीणि चत्वारि जपेदिनचतुष्टयम् ॥
रूपाणि क्रमशस्तद्वत्पूजनादिक्रमाचरेत् ।
पञ्चमे दिवसे प्रातर्होमं कुर्याद्विधानतः ॥
गुडूचीं पायसं दूर्वां तिलान्शुक्लान्यवानपि ।
चण्डीपाठस्य होमं तु *प्रतिश्लोकं दशांशतः ॥
होमं कुर्याद्ग्रहादिभ्यः समिदाज्यचरून्क्रमात् ।
हुत्वा पूर्णाहुतिं दद्याद्विप्रेभ्यो *दक्षिणां क्रमात् ॥
कपिलां गां नीलमणिं श्वेताश्वं छत्रचामरे ।
अभिषेकं ततः कुर्युर्यजमानस्य ऋत्विजः ॥

अलङ्कृतभुजामेभिरायुधैः कमलासनाम् ।
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥
पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् ॥" इति ।

*अष्टभुजा यथा—

"ददौ चाष्टभुजा बाणमुसले शूलचक्रभृत् ।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ॥
एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥" इति ।

अत्र—

"खड्गबाणगदाशूलशङ्खचक्रभुशुण्डिभृत् ।
परिघं कार्मुकं शीर्षं निश्चोतद्रुधिरं दधत् ॥"

इति दशभुजा च नोक्ता । स्फुरद्दशनदंष्ट्राया भीमरूपत्वाद्युक्त्या तस्या अत्युग्रत्वात् । *प्रतिश्लोकमिति । श्लोको मन्त्रस्तद्विभागो नागोजीभट्टोक्तः । *दक्षिणामिति ।

एवंकृतेऽमरेशान सर्वसिद्धिः प्रजायते ॥'

अथ सहस्रचण्डी । सा च तत्रैवोक्ता-

'सहस्रचण्डीं विधिवच्छृणु विष्णो महामते ।
राज्यभ्रंशे महोत्पाते जनमारे महाभये ॥
गजमारेऽश्वमारे च परचक्रभये तथा ।
इत्यादिविविधे दुःखे क्षयरोगादिजे भये ॥
सहस्रचण्डिकापाठं कुर्याद्वा कारयेत्तथा ।
जापकास्तु शतं प्रोक्ता विंशद्धस्तश्च मण्डपः ॥
भोज्याः सहस्रं विप्रेन्द्रा गोशतं दक्षिणां दिशेत् ।
गुरवे द्विगुणं देयं शय्यादानं तथैव च ॥
सप्तधान्यं च भूदानं श्वेताश्वं च मनोहरम् ।
पञ्चनिष्कमिता मूर्तिः कर्तव्या वार्धमानतः ।
अष्टादशभुजा देवी सर्वायुधविभूषिता ॥
अवारितान्नं दातव्यं सहस्रं प्रत्यहं प्रभो ।
शतं वा नियताहारः पयःपानेन वर्तयेत् ॥
एवं यश्चण्डिकापाठं सहस्रं तु समाचरेत् ।
तस्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणा॥'

इति, एतद्ग्रंथं यद्यपि महानिबन्धेषु नास्ति तथापि प्रचरद्रूपत्वादुक्तमिति दिक् ।

वाराहीतन्त्रे—

'संकटे समनुप्राप्ते दुश्चिकित्स्यामये तथा ।

"दद्याद्गोमिथुनान्यष्टौ आचार्याय सुभक्तितः ।
चतुर्विंशतिसंख्याकैर्हेमगद्याणकैः सह ॥
एकैकां दश विप्रेभ्यो दद्याद्गोमिथुनं समाम् ।
निष्कत्रयसमायुक्तां वस्त्रालङ्कारभूषिताम् ॥"

इति अभियुक्ताः । शतचण्डीसहस्रचण्डीप्रयोगोऽन्यत्र द्रष्टव्यः ।

जातिभ्रंशे कुलोच्छेदेऽप्यायुषो नाश आगते ॥
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ।
तथैव त्रिविधोत्पाते तथा चैवोपपातके ॥
कुर्याच्चण्डीशतावृत्तं ततः संपद्यते शुभम् ।
श्रेयोवृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथापरा ॥
मनसा चिन्तितं देवि सिद्ध्येद्वृत्तशतात्तु ।
सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥
भुक्त्वा मनोरथान्कामाञ्शरीरे मोक्षमवाप्नुयात् ।
चण्ड्याः शतावृत्तिपाठात्सर्वाः सिद्ध्यन्ति सिद्धयः ॥'

इति शतचण्डीसहस्रचण्डीविधिः ॥

अथ नवरात्रपारणानिर्णयः । *सा च दशम्यां कार्या ।

*'आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥
त्रिरात्रं वापि कर्तव्यं सप्तम्यादि यथाक्रमम् ॥'

इति हेमाद्रौ धौम्यवचनात् ।

*'नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ।'

इति प्रागुक्तवचनैर्नवमीपर्यन्तं प्रधानभूतपूजाद्युक्तोपवासादेरङ्गत्वेन तत्पर्यन्तत्वादादिशब्देनोपवासोक्तेः *पूर्वोक्तत्रिरात्रव्रते नवम्या अप्युपोष्यत्वाच्च ।

---

*सा चेति । विसर्जने दशम्यां संपूज्य प्रेषणं कुर्यात । 'दशम्यां शारदोत्सवैः' इत्युक्तभविष्यात् पारणस्य नियमत्यागरूपस्य विसर्जनोत्तरकालत्वात्तदपि विसर्जनोत्तरं दशम्यामेव कार्यमित्यर्थः । तत्र नियमं नवमीपर्यन्तं दर्शयति—*आश्विने इति । यावच्छब्दो न मर्यादार्थः किन्त्वभिविध्यर्थः । अत एवाह—*नवमीति । परिशब्दोऽनर्थकः, नवमीतिथ्यन्तमित्यर्थः । नन्वङ्गभूत उपवासो नवम्यां न कार्य इत्यत्राह—*पूर्वोक्तेति । त्रिरा-

*न च पारणान्तत्वेन त्रिरात्रत्वम् । विष्णुत्रिरात्रादौ तथा प्रसक्तेः । *न चात्रोपवासे मानाभाव इति वाच्यम् ।

'एवं च विन्ध्यवासिन्या नवरात्रोपवासतः ।
एकभक्तेन नक्तेन तथैवायाचितेन च ॥
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ॥'

इति हेमाद्रौ भविष्योक्तेः, *नवरात्रसमाख्यातो नवभिरप्युपोष्यत्वाच्च । ननु तिथिह्रासेऽष्टावप्युपवासा भवन्तीति कथं समाख्या । तेन कर्मविशेषे नवरात्रशब्दो रूढः । अत एवोक्तं देवीपुराणे—

'तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम् ।'

इति चेन्न । तिथिह्रासेऽपि नवतिथीनामुपोष्यत्वान्नवरात्रत्वाक्षतेः । एतेन रात्रीणां प्राधान्यात् ह्रासे अमामादाय नवत्वमिति मूर्खोक्तिः परास्ता । *यत्तु देवीपुराणे—

'कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकाम् ।
अयाचौ ह्यथवैकाशी नक्ताशी अथवाऽम्बुदः ॥'

इति व्रतचतुष्टयमुक्तं, त*च्छौहाभिसारिकविषयम् । तस्य—

त्रेऽपि नवम्यां नोपवास इत्यत्राह—*न चेति । अस्तु त्रिरात्रे नवम्यामुपवासः न तु नवरात्रे इत्याशङ्कते-*न चेति । उपपत्तिमप्याह-*नवरात्रेति । *यत्त्विति । उपवासादेरङ्गत्वं कथमित्यभिमानः । अङ्गानां हि प्रधानकालतयोपवासो नवम्यां भवेत् तस्याः पूजनरूपप्रधानकालत्वात् उपवासस्य पृथक् प्रधानत्वे च नवम्यां न तत्प्राप्तिरित्याशयः । अत्र 'नवरात्रोपवासतः'इतिदर्शनात्तत्राष्टरात्रोपवासप्रवेशे विकल्पापत्तिरतस्तद्विषयमाह-*लौ-

'जयाभिलाषी नृपतिः प्रतिपत्प्रभृतिक्रमात्।
लौहाभिसारिकं कर्म कारयेद्यावदष्टमी॥'

इति भविष्येऽष्टमीपर्यन्तमेवोक्तेः। रूपनारायणेन तु नन्दादिव्रतप्रयोगं पृथगेवोक्त्वा तस्य नवम्यां पारणमुक्तम्। यदपि निर्णयदीपे—

'आश्विने शुक्लपक्षे तु नवरात्रमुपोषितः।
नवम्यां पारणं कुर्यादशमीमिश्रिता न चेत्॥
दशमीमिश्रिता यत्र पारणं नवमी भवेत्।
दुःखदारिद्र्यदा ज्ञेया तथा व्रतविनाशिनी॥'

इति ब्राह्मनाम्ना लिखितं वचनम्, यच्च रुद्रयामले इति वदन्ति—

'अष्टम्या सह कार्या स्यान्नवमी पारणादिने।
यो मोहाद्दशमीवेधे नवम्यां चण्डिकां यजेत्॥
पारणं च प्रकुर्याद्वै तस्य पुण्यं निरर्थकम्।
नवम्यां पारिता देवी कुलवृद्धिं प्रयच्छति॥
दशम्यां पारिता देवी कुलनाशं करोति वै।
तस्माच्च पारणं कुर्यान्नवम्यां विबुधाधिप॥'

इत्यादीनि, तानि यदि समूलानि तदा लौहाभिसारिकनन्दादिव्रतचतुष्टयविषयाणि। तस्याऽष्टमीपर्यन्तमेवोक्तेरित्युक्तं प्राक्। अन्यथा महाष्टम्यां परविद्धायां पारणाविधाने पूर्वानिबन्धै*र्विरोधो दुर्वारः स्यात्। यानि तु कैश्चिल्लिखितानि नवम्यां पारणाविधायकानि वचनानि तानि हेमाद्र्यादिविरुद्धत्वान्निर्मूलानि। समूलत्वेऽपि यदा*दिनद्वये नवमी, तदा*द्वितीयदिन उपोष्य

हाभीति। *विरोध इति। अष्टमीविद्धायां नवम्यामष्टम्युपवासविधानादिति भावः। *दिनद्वये नवमीति। अष्टमीविद्धा नवमी

तिथ्यन्ते पारणा न, किन्तु*नवमीमध्ये कार्येत्येवं नेय
नि शिवरात्रिपारणावत् ।

अत्र केचित्पारणाहे सूतकादिप्राप्तौ तदतिक्रम्य प
रणां कुर्यादित्याहुः । तन्मन्दम् ।

'काम्योपवासे प्रक्रान्ते त्वन्तरा सूतसूतके ।
तत्र काम्यव्रतं कुर्यादानार्चनविवर्जितम् ॥
इति माधवीये कौर्मोक्तेः ।

त्रिमुहूर्ता परेद्युश्च नवमीत्यर्थः । *द्वितीयेति । दशमीमिश्रिता
वेदित्यनेन उत्तरनवम्यां नवम्यन्ते प्राप्तायाः पारणाया बाध
बोक्तेरिति भावः । *नवमीति । 'नवम्यां पारणं कुर्यात्' इ
बोक्तेः । वस्तुतस्तु अष्टरात्रादिपक्षा अपि वर्तन्ते ।

"अथवा नवरात्रं च सप्तमं च त्रिकादि वा ।
एकभक्तेन नक्तेनायाचितोपोषितैः क्रमात् ॥"
इति धौम्यवचने आदिपदेनाष्टरात्रद्विरात्रैकरात्रपक्षोपग्रहात्
तत्राष्टरात्रं भविष्ये—

"प्रथमा द्वितीया तृतीया च चतुर्थी च नराधिप ।
एतास्तु एकभक्तेन प्रवदन्ति मनीषिणः ॥
(नेया इति शेषः ।)
पञ्चमी च तथा षष्ठी सप्तमी चाष्टमीषु च ।
उपवासपरो भूत्वा पूजयेत् चण्डिकां बुधः ॥"
प्रथमादिचतुष्टये ऽप्युपवासादिर्विकल्पितो धौम्यवचनात् । स
रात्रपक्षो रुद्रयामले-

"दुर्गोत्सवे स्मृतं देव उपवासस्य सप्तकम् ।
अष्टमे दिवसे होमस्ततः किंचित्तु भक्षयेत् ॥" इति ।
पञ्चरात्रपक्षो भविष्ये—

"एकभक्तस्तु पञ्चम्या षष्ठ्यां नक्तं प्रवर्तयेत् ।

'व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥'

इति विष्णुवचनाच्चाशौचमध्येऽपि तत्कर्तव्यतावगतेः । पारणान्तत्वाद्*व्रतस्य । प्रारम्भस्तु तेनैवोक्तः—

'प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ॥' इति ।

रुद्रयामलेऽपि—

'सूतके पारणं कुर्यान्नवम्यां होमपूर्वकम् ।
तदन्ते भोजयेद्विप्रान्दानं दद्याच्च शक्तितः ॥' इति ।

तदन्ते*सूतकान्ते । एनं स्त्रीभिरपि*रजोदर्शनमध्ये क-

अयाचितं तु सप्तम्यामष्टम्यां समुपोषितः ॥
नवम्यां पारणं कुर्यादित्येवं पञ्चरात्रकम् ॥"

इति द्वैतनिर्णये विस्तरः । तथा चाष्टराजादिपक्षाभिप्रायेण नवमीपारणविधिः सार्थकः । किं च येषां द्वितीयायुक्तप्रतिपदि घटस्थापनं तदिनमारभ्यैव जपपूजाद्युपवासश्च नवमीपूर्वदिनपर्यन्तमिति कुलाचारस्तेषां नवम्यां पूजाहोमब्राह्मणभोजनादि कृत्वा पारणं भवत्येव कुलाचारादिति ।

*व्रतस्येति । व्रतशब्देन पारणाया अपि ग्रहणमिति भावः । *सूतकान्त इति । ब्राह्मणभोजनं भूयस्यादिदानं च सूतकान्ते इत्यर्थः । रामचन्द्रभट्टास्तु—'नवरात्रे होमस्य पूजारूपत्वेन प्रधानत्वात् तस्य चानन्यसाध्यत्वेनाशौचे ऽसम्भवात् 'न तु दानार्चनजपम्'इति निषेधात्तत्समाप्तिं विना च नियमरूपोपवाससमाप्त्यसम्भवादाशौचान्ते होमादि कृत्वा पारणं कुर्यात् । यैस्तु होमो न क्रियते तेषां सूतकादिमध्ये पारणं भवत्येवेत्याहुः । *रज इति । पूजा त्वन्येन कार्या ।

र्तव्यमेव पारणम् ।

'संप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम् ।'

इति माधवीये ऋष्यशृङ्गवचनात् । द्वादशीव्रतमित्युच्चणम् ।

*'प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ।

न तत्रापि व्रतस्य स्यादुपरोधः कदाचन ॥'

इति तत्रैव सत्यव्रतवचनात् । किंच एकादश(१)पञ्चषाशौचपाते मासान्ते पारणापत्तिः, मासोपवासान्ते पञ्चषाशौचपाते जीवनासंभवश्च । यत्तु-

'नियमस्था यदा नारी प्रपश्येदन्तरा रजः ।

उपोष्यैव तु ता रात्रीः स्नात्वा शेषं चरेद् व्रतम्

इत्यङ्गिरोवचनम्, यच्च हारीतवचनम्-

'नियमस्थव्रतस्था स्त्री रजः पश्येत्कथंचन ।

त्रिरात्रं तु क्षिपेदूर्ध्वं व्रतशेषं समापयेत् ॥'

तद्विधवोपवासविषयम् । तासां तत्र भोजनाधादिति केचित् । वयं तु प्रागुक्तसत्यव्रतवचने दीर्घसामिति विशेषणोपादानात् द्वादशीव्यतिरिक्तस्वल्पोपवासविषयोऽयं निषेधः । त्रिरात्रनवरात्रादिदीर्घव्रतेषु तु रजोमध्ये पारणेति ब्रूमः । आशौचमध्ये तु सत्यपि पारणा भवति प्रागुक्तकौर्मवचनादिति सिद्धम् । एवोपवासपारणानिर्णयः सर्वव्रतेषु बोद्धव्य इत्यलं भूयसा ।

दशम्यां देवीं विसर्जयेत् । तदुक्तं दुर्गाभक्तितरङ्गिण्यां देवीपुराणे-

---

'अन्तरा तु रजोयोगे पूजामन्येन कारयेत् ।'

इत्युक्तमात्स्यात् । *प्रारब्धेति । यद्यपीदं दीर्घक

---

(१) पञ्चवारं षड्वारं वाऽशौचप्राप्तौ इत्यर्थः ।

'ततः प्रातः पूजयित्वा दशम्यां विधिपूर्वकम् ।
संप्रेषणं तु कर्तव्यं गीतवाद्यैर्निःस्वनैः ॥
रूपं देहि यशो देहि भगं भगवति देहि मे ।
पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॥
इति *संप्रार्थ्य देवीं तु ततं उत्थापयेद्बुधः ।
उत्तिष्ठ देवि चण्डेशि शुभां पूजां गृहाण च ॥
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ।
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके ॥
व्रज स्रोतोजलं वृक्षैः स्थीयतां च जले त्विह ॥'

इति उत्थाप्य जलं नीत्वा—

'दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते ।
संवत्सरे व्यतीते तु पुनरागमनाय वै ॥
इमां पूजां मया देवि यथाशक्त्योपपादिताम् ।
रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् ॥'

व्यापिमासोपवासाद्येकप्रयोगविषयं तथाऽपि वर्षादिपर्यन्तमभ्यासेन फलसाधनेष्वपि प्रारब्धेषु योजयितुं शक्यमिति भावः । रजःपदमाशौचोपलक्षणम् । केचिदित्यरुचिः । निषेधस्य रागप्राप्तगोचरत्वेन वैधपारणगोचरत्वायोगात् । विधवाया भोजननिषेधादर्शनाच्चेति । तत इत्युपलक्षणम् ।

'ततः संप्रेषणं कुर्यादशम्यां शाबरोत्सवैः ।'

इत्यपि द्रष्टव्यम् । शाबरोत्सवाः प्रागुक्ताः । एवं पूजां विधाय प्रणम्य 'दुर्गां शिवां शान्तिकरीम्' इति पूर्वोक्तं स्तोत्रं पठेत् ।

*संप्रार्थ्येति ।

'विधिहीनं क्रियाहीनं भक्तिहीनं यदार्चितम् ।

इति जले*प्रवाहयेत् ।

इयमेव विजयादशमी । सा च द्वितीयदिने श्रवणयोगाभावे पूर्वा ग्राह्या । तदुक्तं हेमाद्रौ स्कान्दे—

'दशम्यां तु नरैः सम्यक् पूजनीयाऽपराजिता ।
ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः ॥
या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता ।
क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः ॥
नवमीशेषयुक्तायां दशम्यामपराजिता ।
ददाति विजयं देवी पूजिता जयवर्धिनी ॥'

तथा—

'आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः ।
एकादश्यां न कुर्वीत पूजनं चाऽऽपराजितम् ॥' इति ।

यदा तु पूर्वदिने श्रवणयोगाभावः, परदिने चाल्पाऽपि तद्योगिनी, तदा परैव । तथा च हेमाद्रौ व्रतकाण्डे कश्यपः—

'उदये दशमी किंचि*त्सम्पूर्णैकादशी यदि ।
श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा ॥
श्रवणर्क्षं तु पूर्णायां काकुत्स्थः प्रस्थितो यतः ।
उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो नराः ॥' इति ।

काले अपराह्णे । परदिनेऽपराह्णे श्रवणाभावे तु सर्वप-

पूर्णं भवतु तत्सर्वं त्वत्प्रसादान्महेश्वरि ॥"

इति निगमय्य क्षमस्वेत्युक्त्वा एकं पुष्पमीशान्याम् 'ॐ दुर्गायै नमः' इति निक्षिपेत् । *प्रवाहयेदिति । ततो गृहमागत्य ब्राह्मणैः शान्तिकलशोदकेनाभिषिक्तो यजमानो दुर्गापूजाप्रतिष्ठासिद्ध्यर्थं ब्राह्मणेभ्यो दक्षिणां दत्त्वा ब्राह्मणान् भोजयित्वा बन्धुभिः सह भुञ्जीतेति प्रयोगशेषो बोध्यः ।

*सम्पूर्णैकादशी यदीति कर्मकाले दशम्यनादरार्थम् ।

क्षेषु पूर्वैव । मदनरत्नेऽप्येवम् । ज्योतिर्निबन्धे रत्नकोशे च नारदः—

*'ईषत्संध्यामतिक्रान्तः किंचिदुद्भिन्नतारकः ।
विजयो नाम कालोऽयं सर्वकार्यार्थसिद्धिदः ॥
इषस्य दशमीं शुक्लां पूर्वविद्धां न कारयेत् ।
श्रवणेनापि संयुक्तां राज्ञां पट्टाभिषेचने ॥
सूर्योदये यदा राजन्दृश्यते दशमी तिथिः ।
आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः ॥'

*अत्रायं निर्गलितोऽर्थः-अपराह्णो मुख्यः कर्मकालः, तत्रैव पूजाश्रुतेः । प्रदोषो गौणः । तत्र दिनद्वयेऽपराह्णव्याप्तित्वे पूर्वा । प्रदोषव्याप्तेराधिक्यात् । दिनद्वये प्रदोषव्याप्तित्वे परा । अपराह्णव्याप्तेराधिक्यात् । श्रवणस्तु (१)रोहिणीवदप्रयोजकः । दिनद्वयेऽपराह्णास्पर्शे तु पूर्वा । तत्रापि परादिनेऽपराह्णे श्रवणसत्त्वे परैवेति दिक् ।

इदानीं मतान्तरमवतारयितुं प्रदोषरूपं कालान्तरमाह—*ईषदिति । *अत्रायमिति । इदं पुनरिह विधातव्यम्-दशमी शमीपूजायां रात्रौ नक्षत्रोदयव्यापिनी, 'ईषत्संध्यामतिक्रान्तः' इति वचनात्

"आश्विनस्य सिते पक्षे दशम्यां तारकोदये ।
स कालो विजयो ज्ञेयः सर्वकामार्थसिद्धये ॥"

इति चिन्तामणावुक्तेश्च । दिनद्वये तद्व्याप्तौ पूर्वैव । 'या पूर्णा नवमीयुक्ता' इति वचनात्

"दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नरः ।
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत् ॥"

---

(१) रोहिणीवदिति यथा जन्माष्टमीनिर्णये रोहिणी अप्रयोजिका तद्वदित्यर्थः ।

अत्र विशेषो भार्गवार्चनदीपिकायां भविष्ये

'शमीयुक्तं जगन्नाथं भक्तानामभयंकरम् ।
अर्चयित्वा शमीवृक्ष*मर्चयेच्च ततः पुनः ॥'

शमीमन्त्रस्तु हेमाद्रौ गोपथब्राह्मणे—

'अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च ।
दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ॥'

तथा भविष्ये—

'शमी शमयते पापं शमी लोहितकण्टका ।
धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ॥
करिष्यमाणयात्रायां यथाकालं सुखं मया ।
तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते ॥
गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदम् ।
गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति ॥
ततो भूषणवस्त्रादि धारयेत्स्वजनैः सह ॥' इति ।

इति एकादश्यां यात्रानिषेधाच्च । दिनद्वये तारकोदयकालालाभे एकादशे मुहूर्ते परदिने यात्रा कार्या ।

"आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु ।
सायंकाले शुभा यात्रा दिवा विजयलक्षणः ॥
एकादशो यो मुहूर्तो विजयः परिकीर्तितः ।
तस्मिन्सर्वैर्विधातव्या यात्रा विजयकाङ्क्षिभिः ॥"

इति भृगूक्तेः । परदिने एकादशमुहूर्तव्याप्त्यभावेऽपि श्रवणयोग-श्चेत्तदैव यात्रा कार्या । 'श्रवणर्क्षे तु पूर्णायाम्' इति वाक्यादिति । तस्माद्भिन्नो मतान्तरपर इति दिक् ।

*अर्चयेदिति । शमी चैशानीगता ।

"शमीं सल्लक्षणोपेतामीशानाशाप्रतिष्ठिताम् ।
संपार्श्व्य तां च संपूज्य त्वीशानीं सुमुखो भवेत् ॥"

इति भविष्यात् । शमीरहितदेशे तु अश्मन्तकं पूजयेत् समाचारात् ।

"अश्मन्तक महावृक्ष महादोषनिवारण ।
इष्टानां दर्शनं देहि शत्रूणां च विनाशन ॥"

इति प्रार्थयेत् । राजा तु विजयकामो विजयमुहूर्ते प्रस्थानं कृत्वा अपराजितापूजां कुर्यात् । प्रस्थानं तु प्रास्थानिकविधिं कृत्वा कार्यम् । प्रास्थानिकविधिश्च गोपथब्राह्मणे विवाहमुद्दिश्योक्तः । स यथा—जन्येषु गमिष्यत्सु पार्थिवा वानस्पत्यदुन्दुभयःस्युः, वीणाश्चोपवादयेरन्, हृष्टाश्चालंकृताश्चारुवदनाः केशश्मश्रुलोमनखानि वापयित्वा सम्भारानुपकल्प्य मैत्रं मुहूर्तमुपसमाधाय शान्तिमतिसरं कारयित्वा वासो गन्धान् स्रजश्चावध्य पुरःस्थातारं स्थापयित्वा कर्ताऽन्वालभ्य जुहोति—अभयैः, अपराजितैः, आयुष्यैः, स्वस्त्ययनैः, शर्मवर्मभिः, जनवेदनैश्च हुत्वा 'पार्थिवस्य' इति 'माद्रगाम' इति च हुत्वा 'आगच्छता-गम्य' इतीन्द्रं स्थालीपाकेनेष्ट्वा 'अतिष्ठज्जिष्णुः' 'अनृक्षरा ऋजवः सन्तु पन्था' इति पन्थानमास्थाय जपेत् । इमौ पादौ "यत इन्द्र" "त्रातरमिन्द्र" "माविदन्नभयं" "सोमो बृहस्पतिर्नः परिपातु पश्चात्" इति त्रीन् विष्णुक्रमान् क्रान्त्वेति प्रस्थानम् । यथा—

"अलंकृतो भूषितभृत्यवर्गः परिष्कृतो तुङ्गतुरङ्गनागः ।
वादित्रनादप्रतिनादिताशः सुमङ्गलाचारपरम्पराशीः ॥
राजा निर्गत्य भवनात्पुरोहितपुरोगमः ।
प्रास्थानिकविधिं कृत्वा प्रतिष्ठेत्पूर्वतो दिशि ॥
गत्वा नगरसीमान्तं वास्तुपूजां समारभेत् ।
संपूज्य चाऽथ दिक्पालान् पूजयेत्पथि देवताः ॥
मन्त्रैर्वैदिकपौराणैः पूजयेच्च शमीतरुम् ।
अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च ॥
दुःखप्रशमनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ।
ततः कृताशीः पूर्वस्यां दिशि विष्णुक्रमान् क्रमेत् ॥

रिपोः प्रतिकृतिं कृत्वा ध्यात्वा च मनसा च तम् ।
शरेण स्वर्णपुङ्खेन विध्येद् हृदयमर्मणि ॥
दशाविजयमन्त्राश्च पाठितव्याः पुरोधसा ।
एवमेव विधिं कुर्यादक्षिणादिदिशास्वपि ॥
पूज्यान् द्विजांश्च सम्पूज्य सांवत्सरपुरोहितौ ।
गजवाजिपदातीनां प्रेक्षाकौतुकमाचरेत् ॥
जयमङ्गलशब्देन ततः स्वभवनं विशेत् ।
नीराज्यमानः पुण्याभिर्गणिकाभिः सुमङ्गलम् ॥
य एवं कुरुते राजा वर्षे वर्षे सुमङ्गलम् ।
आयुरारोग्यमैश्वर्यं विजयं च स गच्छति ॥
नाधयो व्याधयस्तस्य भवन्ति न पराजयः ।
श्रियं पुण्यमवाप्नोति विजयं च सदा भुवि ॥" इति ।

ततोऽपराजितां पूजयेत् । सा यथा-आश्विनशुक्लदशम्यां क्षेमसिद्ध्यर्थं यात्रायां विजयसिद्ध्यर्थं चाऽपराजितापूजामहं करिष्ये । इति सङ्कल्प्य चन्दनादिना लिखिताऽष्टदलमध्ये 'अपराजितायै नमः' इत्यपराजितां तदक्षिणतः 'ॐक्रियाशक्त्यै नमः'इति जयां तद्वामतः 'ॐउमायै नमः' इति विजयां प्रतिष्ठाप्य ॐअपराजितायै ॐजयायै ॐविजयायै इत्यावाहनाद्युपचारैः सम्पूज्य प्रणम्य—

"चारुणा मुखपद्मेन विचित्रकनकोज्ज्वला ।
जयादेवी शिवे भक्त्या सर्वान्कामान्ददातु मे ॥
काञ्चनेन विचित्रेण केयूरेण विभूषिता ।
जयप्रदा महाभागा शिवभावितचेतसा ॥
विजया च महाभागा ददातु विजयं मम ।
हारेण सुविचित्रेण भास्वत्कनकमेखला ॥
अपराजिता रुद्ररता करोतु विजयं मम ॥"

इति प्रार्थ्य हरिद्रारक्तवस्त्रे दूर्वायुक्तसिद्धार्थान् प्रदक्षिणं वलयाकारेणाऽऽबध्य—

अत्रैव बालिनीराजनमुक्तं कृत्यरत्ने। तत्र मन्त्रः—

'चतुरङ्गबलं मह्यं निरारित्वं व्रजात्विह।
सर्वत्र विजयो मेऽस्तु त्वत्प्रसादात्सुरेश्वरि॥' इति।

गौडनिबन्धे ज्योतिषे—

'कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमम्।
शोभनं *खञ्जनं पश्येज्जलगोगोष्ठसंनिधौ॥'

"सदाऽपराजिते यस्मात्त्वं लतामूषमा स्मृता।
सर्वकामार्थसिद्ध्यर्थं तस्मात्त्वां धारयाम्यहम्॥
भवापराजिता देवी मम सर्वसमृद्धये।
पूजितायां त्वयि श्रेयो ममास्तु दुरितं हतम्॥"

इति तद्बलयमभिमन्त्र्य—

"जयदे वरदे देवि दशम्यामपराजिते।
धारयामि भुजे दक्षे जयलाभाभिवृद्धये॥
बलमाधेहि मयि च मम शत्रौ पराजयम्।
त्वद्धारणाद्भवेयुर्मे धनधान्यसमृद्धयः॥"

इति मन्त्रेण दक्षिणबाहौ धृत्वा—

"इमां पूजां मया देवि यथाशक्त्या निवेदिताम्।
रक्षार्थन्तु समादाय व्रज स्वस्थानमुत्तमम्॥"

इति विसर्जयेत्। सर्वे च जनास्तस्यामपराण्हे ग्रामसीमामुल्लङ्घ्य अपराजितां पूजयेयुः। तदुक्तं ग्रन्थ एव 'दशम्यां च जनैः सम्यक्' इत्यादि। *खञ्जनमिति। तत्र मन्त्रस्थितित्वे—

"नीलग्रीव शुभग्रीव सर्वकामफलप्रद।
पृथिव्यामवतीर्णोऽसि खञ्जरीट नमोऽस्तु ते॥"

वसन्तराजे—

त्वं योगयुक्तो मुनिपुत्रकस्त्वं संदृश्यतामेषि शिखोद्गमेन।
संदृश्यसे प्रावृषि निर्गतायां त्वं खञ्जनाश्चर्य नमो नमस्ते॥"

*अस्य फलानि शुभाशुभदेशाश्च तत्रैव ज्ञेयाः ।
आश्विनपौर्णमासी*परा ग्राह्या ।
'सावित्रीव्रतमन्तरेण भवतोऽमापौर्णमास्यौ परे' ।
इति दीपिकोक्तेः । अत्र विशेषस्तिथितत्त्वे लैङ्गे—
'आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्या लोकैर्विभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम् ।
सुगन्धिर्निशि सम्प्रेष्य*अक्षैर्जागरणं चरेत् ॥'

*अस्येति । तद्दर्शनफलं तिथितत्त्वे—

"अब्जेषु गोषु गजवाजिमहोरगेषु
राज्यप्रदः, कुशलदः शुचिशाद्वलेषु ।
भस्मास्थिकेशनखलोमतुषेषु दृष्टो
दुःखं ददाति बहुशः खलु खञ्जरीटः ॥"

किं च—

"वित्तं ब्रह्मणि, कार्यसिद्धिरतुला शक्रे, हुताशे भयं,
याम्यामग्निभयं सुरद्विषि कलेर्लाभः समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं, दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने ॥"

*परेति । कोजागरव्रते पूर्णिमा प्रदोषनिशीथोभयव्यापिनी । यदा पूर्वेद्युर्निशीथव्याप्तिः परेद्युः प्रदोषव्याप्तिस्तदा परेद्युः कार्या पूजारूपप्रधानकालव्याप्तिसत्त्वात् । यदा पूर्वेद्युर्निशीथव्याप्तिः परेद्युश्च न प्रदोषव्याप्तिस्तदा पूर्वा ।

'नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते' ।

इति वचनात् । अन्ये तु 'निशीथे' इत्युक्तेः पूर्वदिन एव निशीथव्याप्तौ पूर्वा, उत्तरेद्युरेव दिनद्वये वा निशीथव्याप्तौ निशीथाऽस्पर्शे चोत्तरेत्याहुः । *अक्षैरिति ।

तथा-

'निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः ॥'इति॥

अत्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन-'आश्वयुज्यामाश्वयुजीकर्म' इति, तच्छेषपर्वणि कार्यम् । विकृतित्वात् । तत्र*पूर्वाह्णव्यापिनी ग्राह्या । दैवकर्मत्वात् । आग्रयणं तु पर्वणि कार्यम् ।

"नारिकेलोदकं पीत्वा अक्षैः क्रीडां समारभेत् ।
नारिकेलैश्च पिटकैः पितॄन्देवान्समर्चयेत् ॥
बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत् ॥"

इति च द्रष्टव्यम् । अत्र नारिकेलोदकपानमप्युक्तं, तच्च निन्द्यम् ।

"पात्रान्तरगतं यत्तु नारिकेलाम्बुसेवनम् ।
तालहिंतालमधुकफलानां रसमेव च ॥
खरोष्ट्रमानुषं क्षीरं सुरापानसमानि वै ॥"

इति हारीतस्मृतौ षष्ठाध्याये आकरे तत्पाने प्रायश्चित्तोक्तेः । यद्यपि निषेधो रागप्राप्तनारिकेरोदकपानपरस्तथापि निशि अक्षद्यूतजागरणं लक्ष्म्यादिपूजनं च प्रधानम् । नारिकेलपिटकभोजनादिनारिकेलोदकपानं चाङ्गम् । तथा च येषां तत्पानेऽधिकारस्तैरेवेदृशं व्रतं कार्यं नान्यैः । अत एव 'उद्यानिका शिवपत्रिका'इति श्लोके जागरव्रते विहितप्रतिषिद्धत्वाद्विकल्प इत्युक्तम् । स च विकल्पो व्यवस्थित एवेत्यभिप्रेत्य ग्रन्थे नारिकेलोदकपानस्मरणं नोल्लिखितम् । अत्यां च पौर्णमास्यां दीपदानारम्भः ।

"लक्षं तदर्धमयुतं सहस्रं शतमेव वा ।
घृतेन दीपयेद्दीपांस्तिलतैलेन वा पुनः ॥"

इति वाक्यात् । *पूर्वाह्णेति । 'शेषपर्वणि कार्यं विकृतित्वात्' इति पाठो नारायणवृत्तिसम्मतः । आश्वयुजीकर्मणाऽऽग्रयणस्य

*'शरद्याग्रयणं नाम पर्वणि स्यात्तदुच्यते ।'

इति शौनकोक्तेः । तत्रापि *शेषपर्वणि कार्यमिति प्रागुक्तम् । *तच्च-'व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्यो यवैरिष्ट्वा यवैरेव यजेत व्रीहिभ्यः' इति श्रुत्या दर्शपूर्णमासयोरेककर्मत्वेनैकद्रव्यनियमाद्दर्शेष्ट्याः परं पौर्णमासेष्ट्याश्च प्राग्भवतीति हेमाद्र्यादयः ।

'दर्शेष्ट्याः परमुक्तमाग्रयणकं प्राक्पौर्णमासाच्च तत् ।'

इति दीपिकोक्तिश्च । तच्चाग्रयणं त्रेधा । व्रीह्याग्रयणं यवाग्रयणं श्यामाकाग्रयणं चेति । एषां कालः श्रुतौ—

समानाङ्गतन्त्रतायास्तत्संमतत्वात् । अन्ये तु एवं सत्यङ्गभूतक्रमलोपेनोभयोरपि वैगुण्यापत्तेराग्रयणस्य कालान्तरसम्भवेन तदङ्गीकारस्यानुचितत्वात् पर्वान्तरे शुक्लपक्षे देवनक्षत्रे वा तत्कार्यमित्याहुः । तत्तु वृत्तिकारानुयायिभिर्हेयमेव । *शरदीति । केवलस्यातोऽग्निमतां बहृचानामाश्वयुजपौर्णमास्यामेवाग्रयणं नान्यदेत्यर्थः । शरदीति आश्वयुजकार्तिकयोः पौर्णमास्यामावास्यायां वा शुक्लपक्षेरेवत्यां वेति सागरे । *शेषपर्वणीति । अपराह्णसन्धौ तादृग एव पूर्वाह्णसन्धौ तु तादृग एव शेषपर्व परन्तु कर्मपर्याप्तपर्वलाभे तत्त्याग इति स्फुटमग्रे । इदानीं श्रौताग्निमदाश्वलायनानामाश्वलायनभिन्नानां च कालमाह—*तच्चेति । ननु विकृत्यन्तरवदाग्रयणस्य आवर्त्तनात्पाक् सन्धौ प्रकृत्युत्तरत्वं तदुत्तरसन्धौ च प्रकृतिपूर्वत्वं कुतो न स्यात् । "यस्मिन्काले अमावास्या सम्पद्यते तयेष्ट्वा एतया यजेत यदि पौर्णमासी स्यादेतया इष्ट्वा अथ पौर्णमासेन" इति श्रुतिविरोधात् । यदि च पौर्णमास्यामेवाग्रयणं क्रियते तदा एतच्छ्रुतिबलात्पूर्वमाग्रयणं ततः सद्यस्काला प्रकृतिरिति केचित् । यदि तु एतदर्शपौर्णमासाभ्यां सहानतन्त्रं कुरुते "अपि वा पौर्णमासे अमावास्ये वा हविषि अनु-

'गृहमेधी व्रीहियवाभ्यां*शरद*सन्तयोर्यजेत श्यामाकैर्नीवारैर्व*र्षास्वापत्कालेनान्येन पुराणैर्वा' इति । आपस्तम्बोऽपि—'वर्षासु श्यामाकैर्यजेत शरदि व्रीहिभिर्वसन्ते यवै*र्यथर्तु वेणुयवैः' इति । तत्रापि श्यामाका-

---

वर्त्तयेत् देवतानां स्वस्वनामपरिहाणाय" इति श्रुतेः, तदाग्रयणहविःषु प्राकृतहविरुत्तरकालत्वमेव पशुपुरोडाशकर[वद?]प्रसाङ्गेत्वात् । प्राकृतस्यैव तन्त्रस्य भावादिति देवयाज्ञिकादयः । वस्तुतस्तु यदि 'वपया प्रचर्य पुरोडाशमनु निवर्तयेत्' 'जपमनु प्रावर्षत्' इतिवत् 'पौर्णमासेन प्रचर्याग्रयणहविषि निर्वपेत् पौर्णमासमनुनिर्वपेत्" इति कृत्वाकर्षप्रवचनीयानुपोनानिमित्तादितीयान्यस्मादपि तदा तत्र पूर्वश्रुतिबाधेनोत्तरकालत्वप्रत्ययः । तदेव तु न 'अनुवर्तयेत्' इत्यत्र श्रुतेः । अयं ह्यनुरुपसर्ग एव सङ्कल्पप्रभृत्यासमाप्ति सम्बन्धे तात्पर्यग्राहक एव 'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयम्' इत्यादिवत् । नन्वत्रापि 'अनु अन्ते वर्तनीयम्'इति एव कुतो नार्थः ? आदौमध्ये चानुवृत्तिदर्शनात् । अत एव श्रुतिहृदयज्ञेन सूत्रे तत्तत्समानतन्त्रा वा दर्शपूर्णमासाभ्यामिति तन्त्रपदमेवोक्तम् । यानि प्रकृतिसाधारणान्यनानि विहरणादीनि तान्येवात्रापीत्येतावदेव । तस्मादुक्तविरोधादाग्रयणोत्तरत्वं प्रकृतेर्यथायथं भवति इति कौस्तुभकारादयः । *शरत्आश्विनकार्तिकौ, *वसन्तः चैत्रवैशाखौ, *वर्षा श्रावणभाद्रपदौ । नन्वत्र 'मीनमेषयोः' इति न्यायेन मासान्तरमपि ग्रहीतुं शक्यम् । शास्त्रान्तरे विशेषरूपेण तत्तन्मासग्रहणात् । *यथर्तु वेणुयवैरिति । कात्यायनेन तु वैणवो ग्रीष्म इति वेणुयवाग्रयणे ग्रीष्म एवोक्तः । एषां चाग्रयणानां प्रकृतावुपयोगः । 'व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेत यवेभ्यो यवैरिष्ट्वा यवैरेव यजेत व्रीहिभ्यः' इति श्रुतेः । दर्शपूर्णमासयोरेककर्मत्वेन द्रव्यवैयनियमात् । परिशिष्टेऽपि—

ग्रयणम*नित्यम् । इतरे तु अनाहिताग्नेर्नित्ये । यवाग्रयणं च कार्यमिति स्मार्तवृत्तावुक्तत्वात् सूत्रे व्रीहियवदेवतासंबद्धानामेव मन्त्राणामाम्नानाच्च । आहिताग्नेस्तु यवाग्रयणस्याप्यनित्यत्वम् । 'अपि वा क्रिया यवेषु' इति सूत्रात् । यद्वा व्रीह्याग्रयणेन*समानतन्त्रता । 'श्यामाकैस्तु (१)प्रस्तरं कुर्यान्नाग्रयणम् । यदि वा तदपि समानतन्त्रम्' इत्यादिनारायणवृत्तौ परिश्रमवतां सुलभमित्यलम् ।

इदं च पर्वाभावे शुक्लपक्षे देवनक्षत्रे कृत्तिकादिविशाखान्ते कार्यमिति स्मृत्यर्थसारे उक्तम् । बौधायनीये केशवस्वामिनाऽप्येवमुक्तम् । परिशिष्टे—

'श्यामाकैर्व्रीहिभिश्चैव यवैश्चान्योन्यकालतः ।

"श्यामाकैर्व्रीहिभिश्चैव यवैश्चान्योन्यकालतः ।
आग्यष्टुं युज्यतेऽवश्यं न ह्यत्राग्रयणात्ययः ॥" इति ।
श्यामाकानामाव्रीहिभ्यो गौणकालः व्रीहिणामायवेभ्यो यवानामाश्यामाकेभ्य इत्यर्थः । अनापत्तौ प्रायश्चित्तं कृत्वा गौणकालेऽनुष्ठानमापत्तौ तु तमकृत्वेति विशेषः । *अनित्यमिति । अनुपदमेतत् स्पष्टं—'श्यामाकैस्तु प्रस्तरम्'इत्यादिना । प्रस्तरः श्यामाकतृणमुष्टेः अयन्त्रमसिनिधानच्छेदनादिसंस्कारं कृत्वा दर्वीस्थापनार्थं बर्हिष्येव मेलनम् । *समानतन्त्रतेति । यवव्रीह्याग्रयणयोः समानदेवताकत्वात्कर्तृकालैक्याच्च । एवं चार्धाधानिनः शालाग्नौ सर्वाधानिनो लौकिकाग्नौ वा गृह्यकर्मत्वेन स्मार्ताग्रयणश्रौताग्रयणेनैव नवान्नप्राशनाधिकारात् ।

---

(१)श्यामाकचर्वसंभवे श्यामाकतृणैः प्रस्तरं कृत्वा स्रुवादुत्तरत आस्तीर्य तत्र स्रुचो निधानं तावतैव श्यामाकाग्रयणसिद्धिरिति वृत्तिकृन्नारायणः ।

प्राग्यष्टुं युज्यतेऽवश्यं न ह्यत्राग्रयणात्ययः ॥'

त्रिकाण्डमण्डनोऽप्येवम् । यदा त्वेतदाश्विनपौर्णमास्यां क्रियते तदैककालत्वादा*श्वयुजीकर्मणोऽस्य च समानतन्त्रता भवति । तदेतद्वृत्तिकृता—'एकबर्हिरिध्मा-

---

*आश्वयुजीकर्मणोऽस्येति । जीर्णतण्डुलचरुणाऽऽश्वयुजीकर्मप्रधानहोमं कृत्वा नूतनतण्डुलचरुणाऽऽग्रयणप्रधानहोमः, द्वयोश्चवोरेकस्विष्टकृदादिराश्वयुजीव्रीह्याग्रयणयोस्तन्त्रेण प्रयोगः । आश्वयुजीव्रीह्याग्रयणश्यामाकाग्रयणानां च तन्त्रेण प्रयोगो गृह्याग्निसागरादेरवगन्तव्यः । इदं चात्र बोध्यम्—आवर्तनात्प्राक् सन्धौ प्रकृतिविकृतिप्रयोगप्राप्तौ पर्वणि आश्वयुजीकर्माग्रयणपार्वणस्थालीपाकाः समानतन्त्रा एव ।

"पाकयज्ञान्समासाद्य एकाज्यानेकबर्हिषः ।
एकस्विष्टकृतः कुर्यान्नानापि सति दैवते ॥"

इति तत्सूत्रात् । तदपवादेन तु पर्वणि पूर्वेद्युरेव सतन्त्रमाग्रयणाश्वयुजीकर्म परेद्युः सन्धिमति प्रकृतिः तस्याः प्रतिपद्यपि सुकरत्वादिति । आग्रयणं च नवान्नं क्रीत्वाऽपि भवति । अन्यथा—

"स चेदकृत्वाऽऽग्रयणं नवमश्नाति मोहितः ।
देवेभ्यः कल्पितं भागं भक्षयित्वाऽऽर्तिमाप्नुयात् ॥"

इति दोषस्मरणात् । आग्रयणादिने षड्दैवत्यं श्राद्धमपि हेमाद्रौ—

"श्यामाकैरिक्षुभिश्चैव पितॄणां सर्वकामिकम् ।
कुर्यादाग्रयणं यस्तु स शीघ्रं सिद्धिमाप्नुयात् ॥
नवधान्ये समायाते गृही श्राद्धं समाचरेत् ।
नवान्नलाभे देवा द्वौ कामकालौ सदैव हि ॥"

इत्युक्तेः । ग्रन्थेऽपि—

'व्रीहिपाके च कर्तव्यं यवपाके च पार्थिव ।'

ज्य—' इति सूत्रे स्पष्टमुक्तम् । तस्या*करणे प्रायश्चित्त मुक्तं स्मृतिचन्द्रिकायां कात्यायनेन—

'नित्ययज्ञात्यये चैव वैश्वदेवव्ययस्य च ।
अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा ॥
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ॥'

कारिकाऽपि—

'अकृताग्रयणोऽश्नीयान्नवान्नं यदि वै नरः ।
वैश्वानराय कर्तव्यश्चरुः पूर्णाहुतिस्तु वा ॥' इति ।

ऋग्विधाने तु—

(१)समिन्द्रायामन्त्रं च वर्षे वर्षे जपेच्छतम् ।
आग्रयणं यदा न्यूनं तदा संपूर्णमेति तत् ॥'

इत्युक्तम् । एतच्चापादे मलमासे कार्यमन्यथा नेति प्र गुक्तम् । अन्योऽप्याहिताग्न्यादि*विशेषः शौनकादेर्ज्ञे इत्यलं बहुना ।

इति कमलाकरभट्टकृते निर्णयसिन्धौ आश्विनमासः

इत्यादि । *अकरणे इति । गौणकालेऽपीत्यादिः ।
*विशेषः आहिताग्निविशेषः । आहिताग्न्यादेराग्रयणस्थालीपा इत्याश्विनः ।

(१)अयं मन्त्रो यथा—"समिन्द्र राया समिषा रभेमहि सं व भिः पुरुश्चन्द्रैरभिद्युभिः । सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाऽश्व वत्या रभेमहि ॥" इति । ऋ० अ० २ अ० १ । अस्यार्थः—'हे इन्द्र, र धनेन वयं संरभेमहि संगच्छेमहि । तथा इषा अन्नेन संरभेमहि । त वाजेभिर्बलैः संरभेमहि । कीदृशैर्वाजैः ? पुरुश्चन्द्रैः पुरूणां बहूनामाह कैः अभिद्युभिः अभितो दीप्यमानैः । किंच देव्या द्योतमानया प्रम त्वदीयया प्रकृष्टबुद्ध्या संरभेमहि । कीदृश्या ? वीरशुष्मया वीरं विशे शत्रूणां क्षेपणसमर्थं शुष्मं बलं यस्याः सा तथोक्ता (तया) गोअग्र स्तोतृभ्यो दानार्थमग्रे प्रमुखत एव गावो यस्याः सा तथोक्ता (त अश्ववत्या अश्वैरुपेतया ।' इति ।

अथ कार्तिकमासः

तुलासंक्रमे प्रागपरा दश घाटिकाः पुण्याः । रात्रौ तु प्रागुक्तम् ।

अथ कार्तिकस्नानम् । तत्र पृथ्वीचन्द्रोदये विष्णुस्मृतिपाद्मयोः—

'तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ॥'

इति सौरमास उक्तः । प्राच्याश्चैतदेवाद्रियन्ते । दाक्षिणात्यास्तु—

'आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्तिकस्य व्रतानीह तस्यां वै प्रारभेत्सुधीः ॥'

इति पाद्मोक्तेः । भार्गवार्चने च—

'प्रारभ्यैकादशीं शुक्लामाश्विनस्य तु मानवः ।
प्रातःस्नानं प्रकुर्वीत यावत्कार्तिकभास्करः ॥'

इति विष्णुरहस्योक्तेः । हेमाद्रावादित्यपुराणे—

'पूर्ण आश्वयुजे मासि पौर्णमास्यां समाहितः ।'

इत्युक्त्वा—

'मासं समग्रं परया च भक्त्या
समाप्यते कार्तिकपौर्णमास्याम् ।'

इत्यन्तेऽभिधानाच्चाश्विनशुक्लैकादश्यां पौर्णमास्यां वाऽऽरभ्य कार्तिकशुक्लद्वादश्यां पौर्णमास्यां वा समापयेदित्याहुः । मदनपारिजाते विष्णुः—

*'कार्तिकं सकलं मासं नित्यस्नायी जितेन्द्रियः ।

कार्तिकव्रतानामाश्विनशुक्लैकादश्यामारम्भोक्तेः । तानि दर्शयति—*कार्तिकमित्यादिना ।

*जपन्हविष्यभुक् शान्तः सर्वपापैः प्रमुच्यते ॥

अत्र देशविशेषः पाद्मे कार्तिकीं प्रक्रम्य—

'कुरुक्षेत्रे कोटिगुणो गङ्गायामपि तत्समः ।
ततोऽधिकः पुष्करे स्याद्द्वारवत्यां च भार्गव ॥
पुण्याः पुर्यश्च सप्तैवं मुनयो मथुराऽधिका ।
दुर्लभः कार्तिको विप्रा मथुरायां नृणामिह ॥
यत्रार्चितः स्वकं रूपं भक्तेभ्यः संप्रयच्छति ॥' इ।

इदं च स्नानं काशीस्थपञ्चनदेऽप्यतिप्रशस्तम् ।

'शतं समास्तपस्तप्त्वा कृते यत्प्राप्यते फलम् ।
तत्कार्तिके पञ्चनदे सकृत्स्नानेन लभ्यते ॥
कार्तिके*बिन्दुतीर्थे यो ब्रह्मचर्यपरायणः ।
स्नास्यत्यनुदिते भानौ भानुजात्तस्य भीः कुतः

इत्यादिकाशीखण्डोक्तेः । भानुजो यमः ।

इदं च प्रातःस्नानं संध्यां च कृत्वा कार्यम् । तेन वि
तरकर्मानधिकारादिति वर्धमानः । यद्यपि प्रातःसंध्
या मूर्योदये समाप्तिः, तथापि वचनबला (१)दनुदि
होमवद्भविष्यति । स्नानमन्त्रश्च तत्रैव—

'कार्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ।
प्रीत्यर्थं तव देवेश दामोदर मया सह ॥'

*जपन्निति । जपश्चेष्टदेवतामन्त्रस्य गायत्र्या वा । सम
स्नानाशक्तौ ब्राह्मे कार्तिकाधिकारे—

"एकादश्यादिषु तथा तत्र पञ्चसु रात्रिषु ।
दिने दिने च स्नातव्यं शीतलासु नदीषु च ॥
वर्जयित्वा तथा हिंसां मांसभक्षणमेव च ॥" इति ।

*बिन्दुतीर्थे बिन्दुमाधवतीर्थे ।

(१) यथा 'अनुदिते जुहोति' इति उदयात्पूर्वं होमः प्राप्नोति त

इमं मन्त्रं समुच्चार्य मौनी स्नायाद्व्रती नरः॥' इति।
अर्घ्यमन्त्रोऽपि तत्रैव-

व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम ।
गृहाणार्घ्यं मया दत्तं दनुजेन्द्रनिषूदन ॥
*नित्यनैमित्तिके कृष्ण कार्तिके पापनाशने ।
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥
इमौ मन्त्रौ समुच्चार्य योऽर्घ्यं मह्यं प्रयच्छति ।
सुवर्णरत्नपुष्पाम्बुपूर्णशङ्खेन पुण्यवान् ॥
सुवर्णपूर्णा पृथिवी तेन दत्ता न संशयः ॥' इति ।

एवं संपूर्णस्नानाशक्तौ त्र्यहं स्नायात् ।

'वाराणस्यां पञ्चनदे त्र्यहं स्नातास्तु कार्तिके ।
अमी ते पुण्यवपुषः पुण्यभाजोऽतिनिर्मलाः ॥'

इति काशीखण्डोक्तेः ।

अथ मालाधारणम् । तत्र स्कान्दे द्वारकामाहात्म्ये-

'निवेद्य केशवे मालां तुलसीकाष्ठसंभवाम् ।
वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् ॥
न जह्यात्तुलसीमालां धात्रीमालां विशेषतः ।
महापातकसंहर्त्रीं धर्मकामार्थदायिनीम् ॥'

विष्णुधर्मे-

'स्पृशेत्तु यानि लोमानि धात्रीमाला कलौ नृणाम् ।
तावद्वर्षसहस्राणि वैकुण्ठे वसतिर्भवेत् ॥
मालायुग्मं तु यो नित्यं धात्रीतुलसिसंभवम् ।
वहते कण्ठदेशे तु कल्पकोटिर्दिवं वसेत् ॥

---

*नित्यनैमित्तिके इति स्नाने नैमित्तिके इति वा पाठः । कार्तिकस्नानं च प्रातःस्नानसन्ध्यावन्दनादि कृत्वा कार्यं तेन विनेतरकर्मानधिकारात् । न च प्रातःसन्ध्यायाः सूर्योदयानन्तरं

तुलसीकाष्ठसंभूते माले कृष्णजनप्रिये ।
बिभर्मि त्वामहं कण्ठे कुरु मां कृष्णवल्लभम् ॥
एवं संप्रार्थ्य विधिवन्मालां कृष्णगलेऽर्पिताम् ।
धारयेत्कार्तिके यो वै स गच्छेद्वैष्णवं पदम् ॥' इति ।

*अत्र मूलं चिन्त्यम् । तथा काशीखण्डे—

'कार्तिके मासि मे यात्रा यैः कृता भक्तितत्परैः ।
बिन्दुतीर्थकृतस्नानैस्तेषां मुक्तिर्न दूरतः ॥'

भार्गवार्चनदीपिकायां नृसिंहपुराणे—

'अगस्तिकुसुमैर्देवं योऽर्चयेच्च जनार्दनम् ।
दर्शनात्तस्य देवर्षेर्नरकं नाश्नुते नरः ॥
विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवम् ।
कार्तिके योऽर्चयेद्भक्त्या वाजपेयफलं लभेत् ॥'

स्कान्दे कार्तिकमाहात्म्ये—

'मालतीमालया विष्णुः केतक्या चैव पूजितः ।

समाप्त्या 'स्नास्यत्यनुदिते भानौ' इत्यनेन विरोध इति वाच्यम् । वचनबलादनुदितहोमवदुदयात्प्रागेव सन्ध्यासमाप्तेरुपगमात् । वस्तुतस्तु प्रातःस्नानं कृत्वा प्रातःसन्ध्यातः पूर्वमेव कार्तिकस्नानं कार्यम् । अनुदिते भानौ विहितस्य तस्य प्रातःसंध्योत्तरमनुष्ठानानुपपत्तेः । तस्या उदयोत्तरं समाप्यमानत्वात् । होमस्य तु श्रौतत्वेन युक्तं स्मार्तसन्ध्यासंकोचकत्वं न तु कार्तिकस्नानस्य, स्मार्तत्वाविशेषात् । न च तन्मध्ये कार्यं 'न कर्मणि कर्मारम्भः'इति निषेधात् सन्ध्यामध्ये करणाभावेऽप्युपपत्तेश्चेति। तुलामकरेष्यिति प्रातःस्नानं त्वनुकल्पः । प्रत्यहं स्नानाशक्तौ सकृत्स्नानं कार्यम् । 'पञ्चनदे सकृत्स्नानेन लभ्यते' इत्युक्तेः । *अत्र मूलं चिन्त्यमिति संप्रदायानुसारेण वैष्णवैरेव तुलसीकाष्ठमाला धात्रीकाष्ठमाला च धार्या न सर्वैरित्यत्र तात्पर्यम् ।

समाः सहस्रं सुप्रीतो भवेत्तु मधुसूदनः ॥'

पृथ्वीचन्द्रोदये पाद्मे—

'कार्तिके नार्चितो यैस्तु कमलैः कमलेक्षणः ।
जन्मकोटिषु विप्रेन्द्र न तेषां कमला गृहे ॥'

तथा—

'कार्तिके केशवे पूजा येषां नाम्ना सुतैः कृता ।
ते निर्भर्त्स्य रवेः पुत्रं वसन्ति त्रिदिवे सदा ॥
तुलसीदललक्षेण कार्तिके योऽर्चयेद्धरिम् ।
पत्रे पत्रे मुनिश्रेष्ठ मौक्तिकं लभते फलम् ॥'

तथा स्कान्दे कार्तिकमाहात्म्ये—

'धात्रीच्छाये तु यः कुर्यात्पिण्डदानं महामुने ।
मुक्तिं प्रयान्ति पितरः प्रसादान्माधवस्य तु ॥
धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषितः ।
*धात्रीफलकृताहारो नरो नारायणो भवेत् ॥
धात्रीच्छायां समाश्रित्य योऽर्चयेच्चक्रधारिणम् ।
पुष्पे पुष्पेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥'

तथा स्कान्दे—

'कार्तिके मासि विप्रेन्द्र धात्रीवृक्षोपशोभिते ।
वने दामोदरं विष्णुं चित्रान्नैस्तोषयेद्धरिम् ॥

"श्रुतयो विभिन्नाः स्मृतयो विभिन्ना
नानाऋषीणां च मतं विभिन्नम् ।
धर्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"

इति माधवोक्तेः । समूलत्वेत्यादिग्रन्थस्तु केनचिदुत्तानेन प्रक्षिप्तो न तु प्राचीनपुस्तके दृश्यते । *धात्रीफलकृताहारः जीर्णधात्रीफलविषयः, चातुर्मास्ये नूतनस्य वर्जितत्वात् ।

मूलेन पायसेनाथ होमं कुर्याद्विचक्षणः ।
ब्राह्मणान्भोजयेच्छक्त्या स्वयं भुञ्जीत बन्धुभिः॥'इति।

तथा कार्तिके द्विदलव्रतं प्रागुक्तम्-कार्तिके द्विदलं त्यजेत्' इति । पाद्मेऽपि कार्तिकमाहात्म्ये—

'राजिकामाढकं चैव नैवाद्यात्कार्तिकव्रती ।
द्विदलं तिलतैलं च तथान्यन्मतिदूषितम् ॥'

स्कान्देऽपि-

कार्तिके वर्जयेत्तद्वद् द्विदलं बहुबीजकम् ।
माषमुद्गमसूराश्च चणकाश्च कुलित्थकाः ॥
निष्पावा राजमाषाश्च आढक्यो द्विदलं स्मृतम् ।
नूतनान्यपि जीर्णानि सर्वाण्येतानि वर्जयेत् ॥'

अत्र केचिदुत्पत्तिसमये दलद्वयं यस्य भवति तद् भूतपूर्वगत्या द्विदलमित्युच्यत इत्याहुः । उदाहरन्ति च-

'बीजमेव समुद्भूतं द्विदलं चाङ्कुरं विना ।
दृश्यते यत्र सस्येषु द्विदलं तन्निगद्यते ॥' इति ।

अन्ये तु लक्षणाया मानाभावाद्वचनस्य निर्मूलत्वाद् द्विदलात्मकं यस्य स्वरूपं तदेव वर्जयेदित्याहुः । तथा नारदीये-

'कार्तिके वर्जयेत्तैलं कार्तिके वर्जयेन्मधु ।
कार्तिके वर्जयेत्कांस्यं कार्तिके शुक्तसंधितम् ॥'

कांस्यं तत्पात्रभोजनम्, शुक्तं (१)पर्युषितं, सान्धितं लवणशाकः । तत्रैव रामः—

---

(१) एतद्व्याख्यानमयुक्तमिति भाति । 'अरण्यानां च सर्वेषां मृगाणां माहिषं विना । स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि ॥' इति मनुवचनव्याख्यानावसरे 'स्वभावतो मधुरादिरसानि यानि कालवशेनोदकादिना चाम्लीभवन्ति तानि शुक्तशब्दवाच्यानि' इति मन्वर्थमुक्तावव्यामुक्तत्वात् 'शुक्तं पर्युषितं चैव' इत्यत्र मनुस्मृतिवचने च पर्युषितशब्दस्य पृथग्ग्रहणाच्च ।

'कार्तिके विष्णुमूर्त्यग्रे दीपदानाद्दिवं व्रजेत् ॥'

तथा—

'कार्तिके तु कृता दीक्षा नृणां जन्मविमोचनी ॥'

तथा—

'कार्तिके*कृच्छ्रसेवी यः प्राजापत्यपरोऽथवा ।
एकान्तरोपवासी वा त्रिरात्रोपोषितोऽपि वा ॥

---

*कृच्छ्रसेवीति । तप्तकृच्छ्रातिकृच्छ्रकृच्छ्रातिकृच्छ्रान्यतमसेवीत्यर्थः । पञ्चेति षट् चेति वा पाठः । उपोषित इत्यस्य सम्बन्धः । यथा च द्वादश्यां पारणा संपद्यते तथा त्रिरात्रादि कार्यम् । पञ्चेत्यादावेकभक्ताद्यभावेऽपि तत्पारणा द्वादश्यामेव मासोपवासव्रतपारणाया द्वादश्यामेव सत्त्वेन तत्समभिव्याहारात् । तद्वदेव कृच्छ्राद्यारम्भोऽप्याश्विनशुक्लैकादश्यामेव, तस्यामेव सर्वकार्तिकव्रतारम्भाच्च । काशीखण्डेऽपि—

"कृच्छ्रं वाऽप्यतिकृच्छ्रं वा प्राजापत्यमथाऽपि वा ।
संप्राप्ते कार्तिके मासि कुर्याच्छक्त्याऽतिपुण्यवान् ॥
एकान्तरं व्रतं कुर्यात्त्रिरात्रव्रतमेव वा ।
पञ्चरात्रं सप्तरात्रं सम्प्राप्ते कार्तिके व्रती ॥
पक्षव्रतं वा कुर्वीत मासोपोषणमेव वा ।
शाकाहारं पयोहारं फलाहारमथापि वा ॥
ब्रह्मचर्यं चरेद्दूर्जे महाव्रतफलाप्तये ।
पत्रभोजी भवेद्दूर्जे कांस्यं त्याज्यं प्रयत्नतः ॥
कांसस्य नियमे दद्यात्कांस्यं सर्पिःप्रपूरितम् ॥"

अत्र कृच्छ्रादीनि शक्त्या व्रतान्यनाव्रतानि वा बोध्यानि । मासोपवासव्रतं यथा विष्णुरहस्ये । "नारद उवाच—

भगवन् श्रोतुमिच्छामि व्रतानामुत्तमस्य च ।
मासोपवासस्य फलं विधिं चास्य यथोदितम् ॥

षड् वा द्वादश पञ्च वा मासं वा वरवर्णिनि ।
एकभक्तेन नक्तेन तथैवायाचितेन च ॥
उपवासेन भैक्षेण व्रजते परमं पदम् ॥'

यथाविधा नरैः कार्या व्रतचर्या यथा भवेत् ।
आरभ्यते यथा पूर्वं समाप्यं हि यथाविधि ॥
यावत्संख्यं हि कर्तव्यं तावद् ब्रूहि पितामह ।

ब्रह्मोवाच—

साधु नारद यच्चैतत्पृष्टं वर तपोधन ॥
यादृङ् मतिमतां श्रेष्ठ तच्छृणुष्व ब्रवीमि ते ।
सुराणां च यथा विष्णुस्तपतां च यथा रविः ॥
मेरुः शिखरिणां यद्वद्वैनतेयश्च पक्षिणाम् ।
तीर्थानां च यथा गङ्गा प्रजानान्तु यथा वणिक् ॥
श्रेष्ठं सर्वव्रतानान्तु तद्वन्मासोपवासकम् ।
सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु तेन तु॥
सर्वदानोद्भवं चापि लभेन्मासोपवासकृत् ।
अग्निष्टोमादिभिर्यज्ञैर्विविधैर्भूरिदक्षिणैः ॥
न तत्पुण्यमवाप्नोति यन्मासपरिलङ्घनात् ।
तेन जप्तं हुतं दत्तं तपस्तप्तं कृतं स्वधा ॥
यः करोति विधानेन नरो मासमुपोषणम् ।
प्रविश्य वैष्णवं यज्ञं तेनाभ्यर्च्य जनार्दनम् ॥
गुरोराज्ञां ततो लब्ध्वा कुर्यान्मासोपवासनम् ।
वैष्णवानि यथोक्तानि कृत्वा सर्वव्रतानि तु ॥
द्वादश्यादीनि पुण्यानि ततो मासमुपावसेत् ।
अतिकृच्छ्रं पराकं च कृत्वा चान्द्रायणं ततः ॥
मासोपवासं कुर्वीत ज्ञात्वा देहबलाबलम् ।
वानप्रस्थो यतिर्वाऽपि नारी वा विधवा मुने ॥

अन्येऽपि नियमाः प्रागुक्ताः ।

आह्यमुक्तं स्कान्दे—

'व्रीहयो यवगोधूमाः प्रियङ्गुतिलशालयः ।
एते हि सात्त्विकाः प्रोक्ताः स्वर्गमोक्षफलप्रदाः ॥'

मासोपवासं कुर्वीत गुरुविप्राज्ञया ततः ।
आश्विनस्यामले पक्षे एकादश्यामुपोषितः ॥
व्रतमेतत्तु गृह्णीयाद्यावत्त्रिंशदिनानि तु ।
वासुदेवं समभ्यर्च्य कार्तिकं लङ्घयेन्नरः ॥
मासं चोपवसेद्यस्तु स मुक्तिफलभाग्भवेत् ।
अच्युतस्यालये भक्त्या त्रिकालं कुसुमैः शुभैः ।
मालामिन्दीवरैः पद्मैः कुसुमैस्तु सुगन्धिभिः ॥
कुङ्कुमोशीरकर्पूरैर्विलिप्य वरचन्दनैः ।
नैवेद्यं धूपदीपाद्यैरर्चयेत जनार्दनम् ॥
मनसा कर्मणा वाचा पूजयेद्गरुडध्वजम् ।
कुर्यान्नरास्रिषवणं बृहद्भक्तिर्जितेन्द्रियः ॥
नाम्नामेव तथाऽऽलापं विष्णोःकुर्यादहर्निशम् ।
भक्त्या विष्णोः स्तुतिं वाऽपि मृषा वादं विवर्जयेत् ॥
सर्वसत्त्वदयायुक्तः शान्तवृत्तिरहिंसकः ।
सुप्तो वाऽऽसनसंस्थो वा वासुदेवं प्रकीर्तयेत् ॥
स्मृत्यालोकनगन्धादिस्वादनं परिकीर्तितम् ।
अन्नस्य वर्जयेत्सर्वं ग्रासानां चाधिकाङ्क्षणम् ॥
गात्राभ्यङ्गं शिरोऽभ्यङ्गं ताम्बूलं सविलेपनम् ।
व्रतस्थो वर्जयेत्सर्वं यच्चान्यत्र निराकृतम् ॥
न व्रतस्थः स्पृशेत्किंचिद्विकर्मस्थान्न चालयेत् ।
देवतायतने तिष्ठेन्न गृहस्थश्चरेद् व्रतम् ॥

कृत्वा मासोपवासन्तु संयतात्मा जितेन्द्रियः ।
ततोऽर्चयीत वै पुण्यं द्वादश्यां गरुडध्वजम् ॥
पूजयेत्पुष्पमालाभिर्गन्धधूपविलेपनैः ।
वस्त्रालङ्कारवाद्यैश्च तोषयेदच्युतं नरः ॥
स्नापयीत हरिं भक्त्या तीर्थचन्दनवारिणा ।
चन्दनेनानुलिप्ताङ्गं पुष्पधूपैरलंकृतम् ॥
वस्त्रदानादिभिश्चैव भोजयीत द्विजोत्तमान् ॥
दद्याच्च दक्षिणां तेभ्यः प्रणिपत्य क्षमापयेत् ।
विप्रान्क्षमापयित्वा तु विसृज्याभ्यर्च्य पूज्य च ।
एवं वित्तानुसारेण भक्तियुक्तेन शक्तितः ।
एवं मासोपवासं तु कृत्वा ऽभ्यर्च्य जनार्दनम् ।
भोजयित्वा द्विजांश्चैव विष्णुलोके महीयते ॥
एवं मासोपवासान् हि सम्यक्कृत्वा त्रयोदश ।
निर्वापयेत्ततस्तान्वै विधिना येन तच्छृणु ॥
कारयेद्वैष्णवं यज्ञमेकादश्यामुपोषितः ।
पूजयित्वा तु देवेशमाचार्यानुज्ञया हरिम् ॥
अर्चयित्वा हरिं भक्त्या अभिवाद्य गुरुं तथा ।
तथा ऽनुभोजयेद्विप्रान्भोजयित्वा यथाविधि ॥
विशुद्धकुलचारित्रान् विष्णुपूजनतत्परान् ।
पूजयित्वा द्विजान्सम्यक्भोजयित्वा त्रयोदश ॥
तावन्ति वस्त्रयुग्मानि भोजनाच्छादनानि च ।
योगपट्टानि शुभ्राणि ब्रह्मसूत्राणि चैव हि ॥
दद्याच्चैव द्विजाग्रेभ्यः पूजयित्वा प्रणम्य च ।
ततोऽनुकल्पयेच्छय्यां श्रेष्ठास्तरणसंस्कृताम् ॥
साच्छादनां शुभां श्रेष्ठां सोपधानामलङ्कृताम् ।
कारयित्वात्मनो मूर्तिं काञ्चनीं तु स्वशक्तितः ॥

न्यसेत्तस्यान्तु शय्यायामर्चयित्वा स्रगादिभिः ।
आसनं पादुके छत्रं वस्त्रयुग्ममुपानहौ ॥
पवित्राणि च पुष्पाणि शय्यायामुपकल्पयेत् ।
एवं शय्यां तु संकल्प्य प्रणिपत्य च तान् द्विजान् ॥
प्रार्थयेच्चानुमोदार्थं विष्णुलोकं व्रजाम्यहम् ।
एवमभ्यर्चिता विप्रा वदेयुर्व्रतिनं तदा ॥
व्रज व्रज नरश्रेष्ठ विष्णोः स्थानमनामयम् ।
विमानं वैष्णवं दिव्यं शय्यया परिकल्पितम् ।
तेन विष्णुपदं याहि सदानन्दमनामयम् ।
ततो विसर्जयेद्विप्रान् प्रणिपत्यानुगम्य च ॥
ततस्तु पूजयेद्भक्त्या गुरुं ज्ञानप्रदायकम् ।
तां शय्यां कल्पितां सम्यक् गुरुं ज्ञानप्रदायकम् ॥
प्रणम्य शिरसा शान्तो गुरवे प्रतिपादयेत् ।
कृत्वा मासोपवासन्तु नरो विष्णुतनुं विशेत् ॥
कृतमासोपवासस्तु विष्णुपूजनतत्परः ।
नयेच्छान्तमनाः कालं धर्मस्य प्रयतेन्द्रियः ॥
कृत्वा मासोपवासांश्च निर्वाप्य विधिवन्मुने ।
कुलानां शतमुद्धृत्य विष्णुलोकं व्रजेन्नरः ॥
यस्मिञ्जातो महापुण्ये कुले मासेऽथवा सकृत् ।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥
नरो मासोपवासानां कर्त्ता पुण्यवतां वरः ।
पितृमातृकुलाभ्यां च समं विष्णुपुरीं व्रजेत् ॥
नारी तासु महाभागा यथोक्तव्रतमास्थिता ।
कृत्वा मासोपवासांश्च व्रजेद्विष्णुं सनातनम् ।

नारद उवाच—

सुदुष्करमिदं देव मूर्छाग्लानिकरं नृणाम् ।
व्रतं मासोपवासाख्यं भक्तिं जनयदच्युते ।

पीडितस्य भृशं देव मुमूर्षोर्व्रतिनस्तथा ।
त्यागो वाऽनुग्रहो वा ऽथ किन्नु कार्यं पितामह ॥
ब्रह्मोवाच—
व्रतस्थं कर्षितं दृष्ट्वा मुमूर्षुं वा तपोधन ॥
दृष्ट्वा तु ब्राह्मणस्तस्य कुर्यात्सम्यगनुग्रहम् ।
अमृतं पाययेत्क्षीरमिच्छमाने सकृन्निशि ॥
यथेह न वियुज्येत प्राणैः क्षुत्पीडितो व्रती ।
अतिमूर्छान्वितं क्षीणं मुमूर्षुं क्षुत्प्रपीडितम् ॥
पाययित्वा शतं क्षीरं रक्षेदत्त्वा फलानि च ।
अहोरात्रं च यो नित्यं व्रतस्थं परिपालयेत् ।
पयोमूलफलं दत्त्वा विष्णुलोकं व्रजेत सः ॥
एवं मासोपवासस्थमारूढं प्राणसंशये ।
अव्रतघ्नगुणैर्दिव्यैः परीप्सेद् ब्राह्मणाज्ञया ।
नैते व्रतं विनिघ्नन्ति हविर्विप्रानुमोदितम् ।
क्षीरौषधे गुरोराज्ञा आपो मूलं फलानि च ।
एवं कृत्वाऽभिरक्षेत सगुडं पायसं तथा ।
पाययेद्रक्षितो यस्मात्समाप्नोति पुनर्व्रतम् ।
अथ विष्णुव्रतं विष्णुर्दाता विष्णुव्रती तथा ।
सर्वं विष्णुमयं ज्ञात्वा व्रतस्थं क्षीणमुद्धरेत् ।
यदा मुमूर्षुर्निश्चेष्टः परिम्लानोऽतिमूर्छितः ।
तदा समुद्धरेत्क्षीणमिच्छन्तं विमुखे स्थितम् ।
परिपाल्य व्रती देहं व्रतशेषं समापयेत् ।
यथोक्तद्विगुणं तस्य फलं विप्रमुखोदितम् ॥
इन्द्रियार्थेष्वसंसक्ता सदैव विमला मतिः ।
परितोषयते विष्णुं नोपवासो जितात्मनाम् ॥
किं तस्य बहुभिस्तीक्ष्णैः स्नानहोमजपव्रतैः ।
यतेन्द्रियगणो घोरो निर्जितो दुष्टचेतसा ॥

काशीखण्डे—

*'ऊर्जे यवान्नमश्नीयाद्देवान्नमथवा पुनः ।
वृन्ताकं सूरणं चैव शुकशिम्बीश्च वर्जयेत् ॥'

जितेन्द्रियः सदा शान्तः सर्वभूतहिते रतः ।
वासुदेवपरो नित्यमक्लेशं कर्तुमर्हति ।
कृत्वा व्रतं यथोक्तं तु वैष्णवं पुरुषो व्रतम् ।
विष्णुलोकमवाप्नोति पुनरावृत्तिदुर्लभम् ।
ये स्मरन्ति सदा विष्णुं विशुद्धेनान्तरात्मना ॥
ते प्रयान्ति भयं त्यक्त्वा विष्णुलोकमनामयम् ।
प्रभाते चार्धरात्रे च मध्याह्ने दिनसंक्षये ।
अच्युतं येऽनुकीर्तन्ति ते तरन्ति भवार्णवम् ।
आनन्दितोऽथ दुःखार्त्तः क्रुद्धः शान्तोऽथवा हरिम् ।
यो ऽनुकीर्तयते भक्त्या स गच्छेद्वैष्णवीं पुरीम् ।
गर्भजन्मजरारोगदुःखसंसारबन्धनैः ।
निवार्यते नरो नित्यं वासुदेवमनुस्मरन् ॥
स्थावरे जङ्गमे चैव स्थूले सूक्ष्मे शुभाशुभे ।
विष्णुं पश्यति सर्वत्र यः स विष्णुः स्वयं नरः ॥
सर्वविष्णुमयं ज्ञात्वा त्रैलोक्यं सचराचरम् ।
यस्य शान्ता मतिस्तेन पूजितो गरुडध्वजः ।
इति कल्पाऽनुकल्पानां व्रतानामुत्तमस्य च ।
स विष्णुलोकमाप्नोति प्रसादाच्चक्रपाणिनः ॥
विधिर्मासोपवासस्य यथा तत्परिकीर्तितः ॥
मुत स्नेहान्मुनिश्रेष्ठ सर्वलोकहिताय च ।
श्रुत्वा श्रुत्वा च यो भक्त्या नरो विष्णुपुरीं व्रजेत् ।
नाभक्ताय प्रदातव्यं न देयं दुष्टचेतसे ॥' इति ।

*शूकशिम्बीः कपिकच्छूः । नन्दिपुराणे—

"यो नरः कार्तिके मासि मांसन्तु परिवर्जयेत् ।

संवत्सरस्य लभते पुण्यं मांसविवर्जनात् ।"

भारते—

'कार्तिके वर्जयेन्मांसं वर्जयेत्कार्तिके मधु ।'

काशीखण्डे—

"मधुत्यागे घृतं दद्यात्पायसं च सशर्करम् ।
कार्तिके मांसनियमे प्रदद्यात्कार्तिकव्रती ॥
कूष्माण्डानि समाषाणि दशस्वर्णयुतान्यपि" ।

आग्नेये—

"विष्णुवेश्मनि यो दद्यात्कार्तिके मासि दीपकम् ।
अग्निष्टोमसहस्रस्य फलं प्राप्नोति मानवः ॥"

विष्णुरिति उपलक्षणम् । शिवादेर्विप्रादेश्च वेश्मनोऽपि ग्रहणात् ।

"चतुष्पथेषु रथ्यासु ब्राह्मणावसथेषु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ।
दीपदानाद्धि सर्वत्र महाफलमवाप्नुयात् ।"

स्कान्दे—

प्रदीपमालां यः कुर्यात्कार्तिके मासि वै नर ।
अवसानेषु दीपानां ब्राह्मणान् भोजयेच्छुचिः ॥"

वाराहे—

"न गृहे कार्तिकं कुर्याद्विशेषेण तु कार्तिकीम् ।
तीर्थे तु कार्तिकं कुर्यात्सर्वयत्नेन भामिनि ।"

काशीखण्डे—

"कार्तिके मौनभोजी यः सोऽश्नात्यमृतमेव हि ।
स घण्टां सतिलां मौनी सहिरण्यां प्रदापयेत् ॥
कार्तिके लवणं त्यक्तं येन व्रतवता सता ।
त्यक्ताः सर्वे रसास्तेन तत्त्यागी गां प्रदापयेत् ॥
भूशय्यां कार्तिके कुर्वन् न भवं संस्पृशेद्व्रती ।
पर्यङ्कं भूषणैर्दद्यात्सतूलं सोपधानकम् ॥"

पृथ्वीचन्द्रोदये पाद्मे—

'नोर्जो बन्ध्यो विधातव्यो व्रतिना केनचित्क्वचित् ।'

तथा नारदीये—

'अव्रतेन क्षिपेद्यस्तु मासं दामोदरप्रियम् ।
तिर्यग्योनिमवाप्नोति नात्र कार्या विचारणा ॥'

अन्यान्यपि ताम्बूलतैलकेशकर्तनादिवर्जनसंकल्परूपाणि*प्रागुक्तानि ।

तथा कार्तिके आकाशदीप उक्तो निर्णयामृते पुष्करपुराणे—

'तुलायां तिलतैलेन सायंकाले समागते ।
आकाशदीपं यो दद्यान्मासमेकं हरिं प्रति ॥
महतीं श्रियमाप्नोति रूपसौभाग्यसंपदम् ॥' इति ।

तद्विधिश्च हेमाद्रावादित्यपुराणे—

'दिवाकरेऽस्ताचलमौलिभूते गृहाददूरे पुरुषप्रमाणम् ।
यूपाकृतिं यज्ञियवृक्षदारुमारोप्य भूमावथ तस्य मूर्ध्नि ॥
यवाङ्गुलच्छिद्रयुतास्तु मध्ये द्विहस्तदीर्घा अथ पट्टिकास्तु ।
कृत्वा चतस्रोऽष्टदलाकृतीस्तु याभिर्भवेदष्टदिशानुसारी ।
तत्कर्णिकायां तु महाप्रकाशो दीपः प्रदेयो दलगास्तथाष्टौ ।
निवेद्य धर्माय हराय भूम्यै दामोदरायाप्यथ धर्मराज ॥
प्रजापतिभ्यस्त्वथ सत्पितृभ्यः
प्रेतेभ्य एवाथ तमःस्थितेभ्यः ॥' इति ।

अपरार्के त्वन्यो मन्त्र उक्तः । यथा—

'दामोदराय नभसि तुलायां लोलया *सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥' इति ।

कार्तिककृष्णचतुर्थी करकचतुर्थी । सा चन्द्रोदयव्या-

---

*प्रागुक्तानीति । सर्वचातुर्मास्यव्रतान्यपि चतुर्थ्यसम्भवे

पिनी ग्राह्या। *दिनद्वये तत्त्वे पूर्वा, तत्रैव पूजाद्यानात्।

कार्तिककृष्णद्वादशी गोवत्ससंज्ञा। सा *प्रदोषव्यापिनी ग्राह्या। दिनद्वये तत्त्वे पूर्वा। युग्मवाक्यात्

'*वत्सपूजा वटश्चैव कर्तव्या प्रथमेऽहनि॥"

इति निर्णयामृतेऽभिधानाच्च। अत्र विशेषो मदनरत्ने भविष्ये—

'सवत्सां तुल्यवर्णां च शीलिनीं गां पयस्विनीम्।
चन्दनादिभिरालिप्य पुष्पमालाभिरर्चयेत्॥
अर्घ्यं ताम्रमये पात्रे कृत्वा पुष्पाक्षतै*स्तिलैः।

कार्तिके एव कार्याणि।

चतुर्ष्वपि च मासेषु न सामर्थ्यं व्रते यदि।
तदोर्जे व्रतिना भाव्यमप्यब्दफलमिच्छता॥"

इति काशीखण्डात्। *—लोलयेति। 'ते मया' इति वा पाठः। *दिनद्वये तत्त्वे पूर्वेति।

'नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते।'

इत्युक्तेः। 'सङ्कल्पकालमारभ्य संकल्पात्परा' इति केचित्। कार्तिककृष्णाष्टमी महाराष्ट्रादिप्रसिद्धा कराष्टमी। सा चन्द्रोदयव्यापिनी ग्राह्या, दिनद्वये तत्त्वे परा।

*प्रदोषेति।

'नरो वा यदि वा नारी नक्तं सङ्कल्प्य चेतसि।'

इत्युपक्रमे—

'माषान्नं कामतोऽश्नीयाद्रात्रौ विगतमत्सरः।'

इत्यन्ते च नक्तभोजनोक्तेः॥

'प्रतीक्षेतागमं भक्त्या गवां गोध्यानतत्परः।'

इति गोष्ठागतासु सन्ध्यायां गोपूजाविधानाच्च। *वत्सपूजेति। 'वत्सस्यपूजाशिवरात्रिरेताः परान्विता घ्नन्ति सराष्ट्रपुं' इति निषेधोऽपि बोध्यः। *तिलैरिति।

पादमूले तु दद्याद्वै*मन्त्रेणानेन पाण्डव ॥
'क्षीरोदार्णवसंभूते सुरासुरनमस्कृते ।
सर्वदेवमये मातर्गृहाणार्घ्यं *नमो नमः ॥'
ततो गन्धादिसंसिद्धान् वटकान्विनिवेदयेत् ।
सुरभि त्वं जगन्मातर्देवि विष्णुपदे स्थिता ॥
सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस ।
ततः सर्वमये देवि सर्वदेवैरलंकृते ॥
मातर्ममाखिलपितं सफलं कुरु नन्दिनि ॥'

इति प्रार्थयेत्। तथा—

'तस्मिन् *तैलपक्वं च स्थालीपक्वं युधिष्ठिर ।
गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत् ॥'

ज्योतिर्निबन्धे नारदः—

'आश्विने कृष्णपक्षे तु द्वादश्यादिषु पञ्चसु ।
तिथिपृक्तः पूर्वरात्रे नृणां नीराजनो विधिः ॥
नीराजयेयुर्देवांस्तु विप्रान् गाश्च तुरङ्गमान् ।
ज्येष्ठाञ्छ्रेष्ठान्नघन्यांश्च मातृमुख्याश्च योषितः'॥इति निर्णयामृते स्कान्दे—

'कार्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे ।
यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति ॥'

'चन्दनैः कुङ्कुमैर्गन्धैः पुष्पैः कालोद्भवैस्तथा ।'

इति पाठः। *मन्त्रेणेति।

"माता रुद्राणामित्येष मन्त्रः प्रोक्तो द्विजन्मनाम् ।
स्त्रीशूद्राणां महाबाहो मन्त्रोऽयं परिकीर्तितः ॥"

इति व्यवस्था तु सम्भवाभिप्रायेत्यभिप्रेत्य सर्वेषां पौराणमन्त्र एवाङ्गीकृतः। *नमोनमइति। नमोऽस्तु [ते] इति वा पाठः।

'दत्तार्घ्यं तज्जलं पुण्यं साक्षतं मूर्ध्नि विक्षिपेत्।' इति।

मन्त्रस्तु—

'मृत्युना पाशदण्डाभ्यां*कालेन श्यामया सह ।
त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतां मम ॥' इति

कार्तिककृष्णचतुर्दश्यां प्रभाते चन्द्रोदये*ऽभ्यङ्गं
र्यात् । तदुक्तं हेमाद्रौ निर्णयामृते च भविष्योत्तरे—

'कार्तिके कृष्णपक्षे तु चतुर्दश्यामिनोदये ।
अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः ॥'

इनः चन्द्रः । मदनरत्ने कालादर्शे च 'विधूदये' ।
पाठः । 'दिनोदये' इति पाठात्सूर्योदयोत्तरं त्रिमुहूर्त
नं वदतां गौडानां तदनुसारिणां चाज्ञतैव ।

'पूर्वविद्धचतुर्दश्यां कार्तिकस्य सितेतरे ।
पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः ॥'इति ।

स्मृतिदर्पणेऽपि—

'चतुर्दशी चाश्वयुजस्य कृष्णा
स्वात्यर्क्षयुक्ता च भवेत्प्रभाते ।
स्नानं समभ्यर्च्य नरैस्तु कार्यं
सुगन्धतैलेन विभूतिकामैः ॥' इति ।

पृथ्वीचन्द्रोदये पाद्मे—

---

*तैलपक्वञ्चेति । 'तापिकापक्वम्' इति वा पाठः । *क
न श्यामया सहेति । 'कालेनामलया सह' इति वा पाठः ।
माद्रावाग्नेये—

'कार्तिकः खलु मासो वै सर्वदेवमयो महान् ।
कृष्णपक्षे विशेषेण तत्र पञ्चदिनानि तु ॥
पुण्यानि तेषु तद्दत्तमक्षयं सर्वकामिकम् ॥"

*अभ्यङ्गं कुर्यादिति । अभ्यङ्गं कृत्वा स्नानं कुर्यादि
र्थः । अभ्यङ्गस्नाने चन्द्रोदयकालिकी चतुर्दशी ग्राह्येति भा

'आश्वयुक्कृष्णपक्षस्य चतुर्दश्यां विधूदये ।
तिलतैलेन कर्तव्यं स्नानं नरकभीरुणा ॥'इति ।
'कर्तव्यं मङ्गलस्नानं नरैर्निरयभीरुभिः।'
इति कालादर्शे पाठः । उभयत्राश्वयुगित्यमावास्यान्तं मासमभिप्रेत्योक्तम् । तथा—
'तैले लक्ष्मीर्जले गङ्गा दीपावल्याश्चतुर्दशीम् ।'
(प्राप्येति शेषः ।)
प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यति ॥'इति ।
दिनद्वयेऽपि चन्द्रोदये चतुर्दशीसत्त्वे तदभावेऽप्यरुणोदये संपूर्णे खण्डे वा दिनद्वये चतुर्दशीसत्त्वे च पूर्वदिनेऽभ्यङ्गं कुर्यात् । 'पूर्वविद्धचतुर्दश्याम्' इति वचनात् । पूर्वदिने *परादिन एव वा सत्त्वे सैव ग्राह्या । दिनद्वयेऽप्यसत्त्वे अरुणोदयव्यापिनी ग्राह्या । 'पक्षे प्रत्यूषसमये' इत्युक्तेः, वक्ष्यमाणवचनाच्च । तदभावे तु चतुर्दशीह्रासं पूर्वेद्युः प्रवेश्य पूर्वेऽह्नि *त्रयोदशी-

---

चतुर्दशीसत्त्वे पूर्वदिने इति, अग्रे चासत्त्वे चतुर्दशीह्रासमिति च पाठः। अयं मयूखविवेचनाद्यनुसारी। चन्द्रोदये इत्यस्याभ्यङ्गेऽप्यन्वयः। ततः प्रदोषे दीपदानादि तत्रैव। एवं पूर्वदिन एव चन्द्रोदये तत्सत्त्वेऽपि । *परादिन एवेति । अत्र दीपदानादि पूर्वेद्युरिति वक्ष्यति । *त्रयोदशीमध्ये एवेति । चन्द्रोदये इत्यनुवर्तते । "तिथ्यादौ तु"इति अग्रिमवचनेन शास्त्रतश्चतुर्दशीसत्त्वात् । एवमेव 'इनश्च' इति व्याख्यानं व्यर्थम् । इनः सूर्य इत्यस्यैव सम्यक्त्वादिति । सूर्योदयो गौणकालः ।
'स्वकालादुत्तरः कालो गौणः सर्वस्य कर्मणः ।'
इति वचनादिति, तच्चापिलाभाद्येति । अत्र 'चतुर्दशीसत्त्वे तदभावेऽप्यरुणोदये सम्पूर्णे खण्डे वा दिनद्वये चतुर्दश्याः साम्ये'इति

मध्य एवाभ्यङ्गं कुर्यादिति दिवोदासः । *केचिदत्र व
नमपि साधकत्वेन वदन्ति—

*'तिथ्यादौ तु भवेद्यावान्ह्रासो वृद्धिः परेऽहनि
तावान् ग्राह्यः स पूर्वेद्युरदृष्टोऽपि स्वकर्मणि ॥'इ

कचित्पाठः । तदभावेऽपि चन्द्रोदये चतुर्दश्यभावेऽपि।
स्मृतिष्वेव प्रत्यूषप्रभातादिशब्दानां चन्द्रोदये तात्पर्यं कैव
ग्रन्थस्थारुणोदये इत्यस्य । चन्द्रोदये सम्पूर्णे चतुर्दशीसत्त्वेन,
खण्डे वा तत्सत्त्वेनेति पूर्वोक्तदिनद्वयसत्त्वं विहतमिति नातीवो
ज्यते । वस्तुतः स पाठोऽशुद्ध एव । असत्त्वे चतुर्दशीह्रासमिति
ठस्थाने 'असत्त्वेऽरुणोदयव्यापिनी ग्राह्या । 'पक्षे प्रत्यूषसमये'इत
वक्ष्यमाणवचनाच्च । तदभावे तु चतुर्दशीह्रासम्' इति पाठ
स्वशुद्धः । अथवा पाठविशेष इत्थं व्याख्येयः—ननु दि
चन्द्रोदयव्याप्त्यभावे का ग्राह्या इत्यत्राह—तदभावेऽपी
अरुणोदये इति । पूर्वदिने अभ्यङ्गमित्यनेनान्वयः । चन्द्रोद
मुख्यकालाभावे प्रत्यूषो ग्राह्यः । व्यापककालेनापि कर्मणो
नसम्भवादित्यर्थः । एतच्च परदिने प्रत्यूषेऽसत्त्वे । तत्र तत्स
चन्द्रोदयविरहे पूर्वैव असन्देहात् । चन्द्रोदयसत्त्वे तु अन्यत
व्यनिर्णायकत्वादाह—संपूर्णे खण्डे वेति । अरुणोदये इ
र्तते । एतेन चन्द्रोदयस्यैव दिनद्वयसत्त्वमुक्तं, साम्प्रन्तु दृष्ट
इदानीं प्रत्यूषस्य कर्मकालत्वं साधयति—दिनद्वयेऽपीति ।
भावे त्विति । पूर्वार्द्धेऽपि प्रत्यूषव्यापित्वे विध्यर्थ इति ।
चनानुयायिनस्तु या पूर्वेद्युरेव परेद्युरेव वा प्रातश्चन्द्रोदये व
सा पूर्वेद्युरेव परेद्युरेवेति गौणकालमतमादाय सर्वं निर्णयमाहु
क्षिणात्यशिष्टाचारसंवादिदिवोदासमतं खण्डयतां मतमाह
चिदिति । *तिथ्यादाविति । पूर्वेद्युः पूर्वतिथ्यादिषु स
उत्तरतिथ्यादिमयुक्तकर्मानुष्ठाने ह्रासवृद्धिसाम्यानि च प

तन्मन्दम् । न हीदं वचनं पूर्वदिनस्यापूर्वं ग्राह्यत्व विधत्ते । नक्तैकभक्तजन्माष्टम्यादौ दिनद्वये कर्मकाल व्याप्त्यभावे सर्वत्र पूर्वदिनस्य ग्राह्यत्वप्रसङ्गात् । किं यत्रैकभक्तादौ दिनद्वये कर्मकालव्याप्त्यभावे वाक्यान्त रेण न्यायेन वा पूर्वदिनस्य ग्राह्यत्वमुक्तं, तत्र मुख्यक ले तत्तिथेरभावेऽपि तत्रैवानुष्ठानबोधकमिदम् । न चा तदस्तीति*यत्किञ्चिदेतत् । *तेन चतुर्थयामगामिनी ग्रा ह्या । अत एव सर्वज्ञनारायणः—

'तथा कृष्णचतुर्दश्यामाश्विनेऽर्कोदयात्पुरा ।
यामिन्याः पश्चिमे यामे तैलाभ्यङ्गो विशिष्यते ॥'
मृगाङ्कोदयवेलायां त्रयोदश्यां यदा भवेत् ।
दर्शे वा मङ्गलस्नानं दुःखशोकभयप्रदम् ॥'

इति कालादर्शे त्रयोदशीनिषेधाच्च । *तेनायमर्थः—'यथाऽग्निहोत्रे यावज्जीवं सायंप्रातःकालेषु व्याप्य

कापेक्षया त्रिंशच्चतुर्विंशत्यष्टादशद्वादशघटिकादिक्रमेण मू दयतिथीनां चतुःपञ्चाशद्घटिकासत्त्वेऽपि ह्रासाव्यवहारात्स व्यवहाराच्च । *यत्किञ्चिदेतादिति । इदमापाततः । पूर्व चतुर्दश्यामिति पूर्वदिनग्राह्यताबोधकवचनसत्त्वात् सूर्योद गौणकालव्याप्तिलाभाच्च । एवञ्च चन्द्रोदयरूपे मुख्यकाले व्यभावेऽपि तत्रैवानुष्ठानबोधकतया तिथ्यादाविति वाक्यप्र व्याघाताच्च । स्वमते चन्द्रोदयव्यापिनी ग्राह्येति निष्टङ्कि इदानीं मतान्तरमादर्शयति—*तेनेति । एतच्च स्वेण णामनुकूलम् । नन्वेवं चन्द्रोदयादेः स्नानकालत्वोक्तिविरोध आह—*तेनेति । अत्र तेनायमर्थः—यथाऽग्निहोत्रे या सायंप्रातःकालेषु व्याप्यकालस्य गुरुत्वं, तथाऽत्र च चतुर्थयामारुणोदयचन्द्रोदयानामुत्तरोत्तरस्य व्याप्यत्वाद्

लक्ष्य गुरुत्वं तथाऽत्र चतुर्दशीचतुर्थयामारुणोदयचन्द्रो
दयानामुत्तरोत्तरस्य व्याप्यत्वाद् गुरुत्वमिति । *यदाह
दिवोदासीये—

*'त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी ।
रात्रिशेषे त्वमावास्या तदाऽभ्यङ्गे त्रयोदशी ॥'

इति वचनं, तद्धेमाद्रिनिर्णयामृताद्यालिखितत्वेन निर्मू
लम् । समूलत्वेऽपि न चतुर्दश्याः सूर्योदयासंबन्धित्व
रूपः क्षयोऽत्र विवक्षितः । सूर्योदयात्प्राक् समाप्तौ चन्द्रो
दयकालसत्त्वे च त्वयैवाङ्गीकारात् । किं तु अभ्यङ्गकाला
त्प्राक् समाप्तिरूपोऽत्र ह्रासः क्षयशब्देन विवक्षितः । स
चारुणोदयाच्चतुर्थयामाद्वा प्राक् यदा ह्रासस्तत्परमिदम्
अत एव सर्वज्ञनारायणेन चतुर्थयाममात्रे स्नानमुक्तम्
तथा चोदाहृतम्—'तथा कृष्णचतुर्दश्याम्'इति । ज्योति
र्निबन्धे नारदोऽपि—

*'इषासितचतुर्दश्यामिन्दुक्षयतिथावपि ।

यिति पाठो यदि नास्ति तदा सम्यगेव । यद्यस्ति तदा प्रतिकूलः ।
यथा यावज्जीवकालः सायंप्रातःकालेतरकाले परिसंख्यायते इति
तत्राग्निहोत्रं नानुष्ठीयते तथैव चन्द्रोदयेतरभागपरिसंख्यानात्तत्र
स्नानाननुष्ठानं स्यात् । अत एव चन्द्रोदयस्यैव कालत्वं वदतां त्व-
नुकूल इति । *यदपीत्यादिरभ्युपगमवादः । *त्रयोदशी यदा
प्रातरिति । अत्र हि चतुर्दशीक्षयो दिनद्वये चन्द्रोदयास्पर्शरूपः ।
*इषासितेति । अत्रापिः समुच्चायकः । दिनत्रये संलग्नं दीपो-
त्सवमित्यभिधानात्तत्र चाभ्यङ्गस्नानचर्चापि नास्ति । 'अरुणोदय-
स्तोऽन्यत्र'इति वाक्येऽपि अरुणोदयपदं चन्द्रोदयपरामिति सर्व-
वचनाविरोधः । गौडास्तु—

"कार्तिके कृष्णपक्षे तु चतुर्दश्यां दिनोदये ।

ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली भवेत् ॥
कुर्यात्संलग्नमेतच्च दीपोत्सवदिनत्रयम् ॥'

ये तु त्रयोदशीमध्ये स्नानमाहुस्तेषामाशयं न विद्म-इत्यलं भूयसा । यदपि—

'अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः ।
तस्याब्दिकभवो धर्मो नश्यत्येव न संशयः ॥'

इति दिवोदासीये भविष्यवचनं, तन्मुख्यकालेऽरुणोदये चतुर्दश्यभावेऽपि तत्रैव स्नातव्यमित्येवंपरमिति सर्वं सिद्धम् । चतुर्घटिकात्मकोऽरुणोदय इति तत्रैवोक्तम् । नदनरत्ने पाद्मे—

*'अपामार्गमथा तुम्बीं प्रपुन्नाटमथापरम् ।
भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै ॥'

प्रपुन्नाटः चक्रमर्दः । मन्त्रस्तु—

'सीतालोष्टसमायुक्त सकण्टकदलान्वित ।
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः ॥' इति ।

अस्यामेव प्रदोषे दीपान्दद्यादित्युक्तं हेमाद्रौ स्कान्दे—

अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः ॥"

इति वचनात्प्रातःकालव्यापिनी ग्राह्या । सूर्योदयादिनोदयप्रातःशब्दानां पर्यायत्वादित्याहुः । दीपावलीत्वात्प्रातरभ्यङ्गस्नानपक्षो युक्तः । दीपावलीं प्रकृत्य भविष्ये—

'अलक्ष्मीपरिहारार्थमभ्यङ्गस्नानमाचरेत् ।'

इति वचनात् । दिनद्वयेऽप्यभ्यङ्गे न दोषः । 'इन्दुक्षयेऽपि संक्रान्तौ' इत्याग्निमवचनात् ।

*अपामार्गमिति अपामार्गशाखां सकण्टकपत्रतुम्बीचक्रमर्दसीतालोष्टयुतां स्नानमध्ये शिरस उपरि पुनः पुनर्भ्रामयेदित्यर्थः । सीतालोष्टयोगादि च भ्रामणमन्त्रालिङ्गात् । सीता

'ततः प्रदोषसमये दीपान्दद्यान्मनोरमान् ।
ब्रह्मविष्णुशिवादीनां भवनेषु *मठेषु च ॥' इति ।
दिवोदासीये ब्राह्मे—
'अमावास्याचतुर्दश्योः प्रदोषे दीपदानतः ।
यममार्गाधिकारेभ्यो मुच्यते कार्तिके नरः ॥'
*खण्डतिथौ तु पूर्वेऽह्नि प्रदोषे दीपान्दत्त्वा परेह्नि स्नायादिति दिवोदासीये उक्तम् । अत्र नरकोद्देशेन चतुर्वर्तियुक्तं दीपदानं कार्यम् । तत्र मन्त्रः—
'दत्तो दीपश्चतुर्दश्यां नरकप्रीतये मया ।
चतुर्वर्तिसमायुक्तः सर्वपापापनुत्तये ॥'
तत्रैव लैङ्गे—
*'माषपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः ।
प्रेताख्यायां चतुर्दश्यां सर्वपापैः प्रमुच्यते ॥'
अत्र यमतर्पणमुक्तं मदनपारिजाते वृद्धमनुना—
'दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्पणम् ।'

लाङ्गलपद्धतिः, तल्लोष्टः मृत्पिण्डः । कण्टकयुक्तदलं कण्टकदलं बृहतीपत्रादि । चक्रमर्दः पवार इति, तरोडा इति प्रसिद्धः । *मठेषु चेति ।
"प्राकारोद्यानवापीषु प्रतोलीनिष्कटेषु च ।
मन्दुरासु विविक्तासु हस्तिशालासु चैव हि ॥"
इत्युत्तरः श्लोकः । *खण्डतिथौ परदिन एव चन्द्रोदये चतुर्दशीसत्त्वे । यद्यपि—
'इति स्नात्वा प्रदातव्या दीपाः संपूज्य देवताः ।'
इति स्नानानन्तरमेव दीपदानं विहितं तथापि 'ततः प्रदोषसमये' इत्यादिना स्वतन्त्रकर्मविधानात् क्रमानुरोधेन कालबाधस्यासम्भवात् पूर्वशुरेव प्रदोषे दीपदानमात्रं कार्यमित्यर्थः । *माषे-

मदनरत्ने ब्राह्मे—

'अपामार्गस्य पत्राणि भ्रामयेच्छिरसोपरि ।
*ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥' इति ।

तर्पणप्रकारस्तु हेमाद्रौ—

'एकैकेन तिलैर्मिश्रान्दद्यात्तींस्त्रीञ्जलाञ्जलीन् ।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥'

तथा मदनरत्ने स्कान्दे—

'दक्षिणाभिमुखो भूत्वा तिलैः सव्यं समाहितः ।
देवतीर्थेन देवत्वात्तिलैः प्रेताधिपो यतः ॥'

तथा—

*यज्ञोपवीतिना कार्यं प्राचीनावीतिनाथवा ।' इति

ति । अन्यदप्युक्तम्—

"ततः प्रेतचतुर्दश्यां भोजयित्वा तपोधनान् ।
शैवान्विप्रान्धर्मपरान् शिवलोके महीयते ॥
दानं प्रदाय तेभ्यस्तु यमलोकं न पश्यति ।
नक्तं प्रेतचतुर्दश्यां यः कुर्याच्छिवतुष्टये ॥
न तत्क्रतुशतेनापि प्राप्यते पुण्यमुत्तमम् ॥"

इति लैङ्गात् । *ततश्चेति । स्नानानन्तरं यमतर्पणं कार्यम् । स्नानानन्तरमेव यमतर्पणविधानात्तस्य कालविशेषानुक्तेश्च । *यज्ञेति ।

'देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता ।'

इति हेतूक्तिबलात् ।

"दक्षिणाभिमुखो भूत्वा शुक्लैः सव्यं समाहितः ।

इदं जीवत्पितृकेणापि कार्यम् ।

'जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः ।'

इति पाद्मोक्तेः । *अत्र भीष्मतर्पणमप्युक्तं दिवोदासीये । तत्प्रकारस्तु *माघे वक्ष्यते । इति नरकचतुर्दशी ।

कार्तिकामावास्यायां प्रातरभ्यङ्गं कुर्यात् । तदुक्तं कालादर्शे-

*प्रत्यूष आश्वयुग्दर्शे कृताभ्यङ्गादिमङ्गलः ।

देवतीर्थेन देवत्वात्तिलैः प्रेताधिपो यतः ॥"

इति स्कान्दात् ।

'पृथक्पृथक् तिलैर्मिश्रान्दद्यात्त्रींस्त्रीन् जलाञ्जलीन् ।

पितृत्वात्पितृतीर्थेन कृष्णैः प्रेताधिपो यतः ॥"

इति वचनात् । शुक्लकृष्णतिलसकृत्करावृत्त्यादिदैवपित्र्यधर्मविकल्पो द्रष्टव्यः । अत्र जीवत्पितृकस्य सव्यादि, मृतपितृकस्यापसव्यादीत्यप्युचितम्भाति । भविष्ये—

"यां काञ्चित्सरितं प्राप्य कृष्णपक्षचतुर्दशीम् ।

यमुनायां विशेषेण नियतस्तर्पयेद्यमम् ॥"

अत्र सरित इत्युपलक्षणम् । अस्यां चित्रानक्षत्रभौमवारयोगः प्रशस्तः ।

"कार्तिके भौमवारे तु चित्रा कृष्णचतुर्दशी ।

तस्यामाराधितः स्थाणुं नयेच्छिवपुरं ध्रुवम् ॥"

इति भविष्यात् । *अत्रेति । पाद्मवाक्य इत्यर्थः । *माघ इति । कार्तिककृत्यत्वाभावादिति भावः ।

*प्रत्यूष इति । चतुर्दशीस्नानमुक्त्वा—

"एवं प्रभातसमये त्वमावास्यां नराधिप ।

स्नात्वा देवान्पितॄन्भक्त्या संपूज्याथ प्रणम्य च ॥"

इति भविष्योत्तरात् । नारदेनापि तिथित्रयं दीपावलीत्वेन

भक्त्या प्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये ॥'

अस्य व्याख्याने आदिशब्दात् *पञ्चत्वगुदकस्नानादेरुपसंग्रहः । तदुक्तं पुष्करपुराणे—

'स्वातिस्थिते रवाविन्दुर्यदि स्वातिगतो भवेत् ।
पञ्चत्वगुदकस्नायी कृताभ्यङ्गविधिर्नरः ॥
नीराजितो महालक्ष्मीमर्चयन् श्रियमश्नुते ॥'

आश्वयुग्दर्श इति दर्शशब्दः प्रत्यूषे स्वातियुक्ततिथिपरः । तदुक्तं ब्राह्मे—

'ऊर्जे शुक्लाद्वितीयायां तिथिषु स्वातिऋक्षगे ।
मानवो मङ्गलस्नायी नैव लक्ष्म्या वियुज्यते ॥'

तत्रैव—

*'इषे भूते च दर्शे च कार्तिकप्रथमे दिने ।
यदा स्वातिस्तदाभ्यङ्गस्नानं कुर्याद्विनोदये ॥'

कश्यपसंहितायां तु दीपावलिदर्शे प्रकम्य—

'इन्दुक्षयेऽपि संक्रान्तौ रवौ पाते दिनक्षये ।
तत्राभ्यङ्गो न दोषाय प्रातः पापापनुत्तये ॥'

इति स्वातियोगं विनाऽप्यभ्यङ्ग उक्तः । मात्स्ये—

'दीपैर्नीराजनादत्र सैषा दीपावली स्मृता ॥'

अत्र विशेषो हेमाद्रौ भविष्ये—

'दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात् ।
*प्रदोषसमये लक्ष्मीं पूजयित्वा ततः क्रमात् ॥

अभिधाय 'तैले लक्ष्मीः' इत्यादिना प्रातरभ्यङ्गस्नानोक्तेश्च । *पञ्चत्वचः—अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधत्वचः । सा च तिथिः चतुर्दशीअमावास्याप्रतिपदन्यतमेत्याह—*इषे इति अमान्तमानेन । 'रवौ आरे' इति पाठे भौमः । *प्रदोषेति । प्रदोषे 'लक्ष्म्यै नमः' इति नाममन्त्रेण लक्ष्मीं संपूज्य दीपदानं कार्यमित्यर्थः । ततः क्रमा-

*दीपवृक्षाश्च दातव्याः शक्त्या देवगृहेषु च ॥'

*तत्रैवाभ्यङ्गमभिधाय-

'एवं प्रभातसमये त्वमावास्यां*नराधिप ।
कृत्वा तु पार्वणश्राद्धं दधिक्षीरघृतादिभिः ॥
दीपान्दत्त्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि ।

दिङ्निपदात् लक्ष्मीपूजानन्तरं प्रार्थना कार्या—

"नमस्ते सर्वदेवानां वरदाऽसि हरिप्रिया ।
या गतिस्त्वत्प्रसन्नानां सा मे भूयात्त्वदर्चनात् ॥" इति ।

कुबेरपूजापि कार्या—

'सुखरात्र्याः प्रदोषे तु कुबेरं पूजयन्ति वै ।'

इति वाक्यात् । तत्र मन्त्रः-

"धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान्मे धनधान्यार्थसम्पदः ॥" इति ।

केचित्तु धनदपूजां त्रयोदशीप्रदोषे कुर्वन्ति, तन्निर्मूलम् । *दीपवृक्षाश्चेति । चकारेण दीपदानसमुच्चयः । ननु पार्वणश्राद्धं कदा कर्तव्यमित्यत्राह—*तत्रैवेति । *नराधिपेति । यद्यपि 'स्नात्वा देवान्' इत्यादिप्रागुक्त्या प्रातःसमये स्नानमेव लभ्यते । प्रभातप्रातःशब्दयोरेकार्थत्वात् तथापि पार्वणश्राद्धे अमावास्या-मात्रान्वयः तस्यापराह्णिकत्वात् न तु प्रभातान्वयः, बाधात् एतद्वाक्यस्य क्रममात्रविधायकत्वाच्च ।

'दीपान्दत्त्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि ।'

इत्यत्र दीपदानलक्ष्मीपूजनयोः क्रमो न विवक्षितः । 'लक्ष्मीं पूजयित्वा ततः क्रमात्' इत्येनन विरोधात् विकल्पस्याष्टदोषत्वाच्च । किन्तु दीपदानलक्ष्मीपूजनयोः स्वभोजनपूर्वत्वमिति न विरोधः । दीपदानमन्त्रः—

"अग्निर्ज्योती रविर्ज्योतिश्चन्द्रो ज्योतिस्तथैव च ।

*स्वलंकृतेन भोक्तव्यं सितवस्त्रोपशोभिना ॥'

*अयं प्रदोषव्यापी ग्राह्यः ।

'तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः ।

उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम् ॥'

इति ज्योतिषोक्तेः । दिनद्वये सत्त्वे परः ।

*'दण्डैकरजनीयोगे दर्शः स्यात्तु परेऽहनि ।

तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिके ॥'

इति तिथितत्त्वे ज्योतिर्वचनात् । दिवोदासीये तु प्रदोषस्य कर्मकालत्वात्

उत्तमः सर्वज्योतीनां दीपोऽयं प्रतिगृह्यताम् ॥" इति ।

*स्वलङ्कृतेनेति । एवं दीपदानादि कृत्वा ब्राह्मणानन्यांश्च बुभुक्षितान्भोजयित्वा स्वयमलङ्कृतो बन्धुभिः सह भुञ्जीतेत्यर्थः ।

'ब्राह्मणान् भोजयित्वाऽऽदौ सम्भोज्य च बुभुक्षितान् ।

स्वलङ्कृतेन भोक्तव्यं नववस्त्रोपभोगिना ॥

स्निग्धैर्मधुरैश्च निर्व्वृत्तैः [सुवेषै] र्बन्धुवैः सह ॥'

इत्यादित्यपुराणात् । नन्वत्र 'श्राद्धानन्तरकर्तव्यं दीपदानं प्रतीयते, सम्भवति च श्राद्धदिनेऽमावास्यायाः प्रदोषे सत्त्वे, तत्र तदसत्त्वे तु कथमित्यत्राह–*अयमिति । दर्श इत्यर्थः । तथा च यदा पूर्वेद्युरेव प्रदोषे दर्शः श्राद्धार्हस्तु परेद्युस्तत्र पूर्वेद्युरेव प्रदोषे लक्ष्मीपूजादीपदाने कार्ये, श्राद्धे तु परेद्युः कालविरोधे क्रमस्यानादरात्, स्वकालप्राप्तश्राद्धानुवादेनाप्युपपत्तेः, क्रमस्यात्राविधानाच्च, औत्सर्गिकोऽखण्डतिथिमालम्ब्य 'कृत्वा तु पार्वणश्राद्धम्'इतिकृत्वाव्यवहाराच्च । यत्र दिनद्वये प्रदोषव्यापिनी अमावास्या तत्रोत्तरामाह–*दण्डैकेति । एतदेव निष्कृष्टं द्रढयति–दिवोदासीये त्वित्यादिना इत्युक्तमित्यन्तेन । अत्र प्रदोषस्य कर्मकालत्वेऽपि अर्द्धरात्रस्य न कर्मकालत्वमित्यरुचिः । अत्र राजकृत्यं भविष्योत्तरे–

'अर्धरात्रे भ्रमत्येव लक्ष्मीराश्रयितुं गृहान् ।
अतः स्वलङ्कृता लिप्सा दीपैर्जाग्रज्जनोत्सवाः ॥
सुधाधवलिताः कार्याः पुष्पमालोपशोभिताः ॥'

इति ब्राह्मोक्तेश्च प्रदोषार्धरात्रव्यापिनी मुख्या । एकैकव्याप्तौ परैव । प्रदोषस्य मुख्यत्वादर्धरात्रेऽनुष्ठेयाभावाच्च । यत्तु—

'अपराह्णे प्रकर्तव्यं श्राद्धं पितृपरायणैः ।
प्रदोषसमये राजन्कर्तव्या दीपमालिका ॥'

इति क्रमः स संपूर्णतिथावेव प्रासैरनुवादो न विधिः । तत्तत्कर्मैकालव्याप्तेर्बलवत्त्वात्संपूर्णतिथौ प्राप्त्या खण्डतिथावप्राप्त्या विध्यनुवादविरोधाच्चेत्युक्तम् । अत्रैव दर्शे परारात्रेऽलक्ष्मीनिःसारणमुक्तं मदनरत्ने भविष्ये—

'एवं गते निशीथे तु जने निद्रार्धलोचने ।
तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः ॥
निष्काश्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गणात् ॥'

"ततोऽपराह्णसमये घोषयेन्नगरे नृपः ।
अर्द्धराज्यं बलेर्लोका यथेष्टं चेष्टतामिति ॥
लोकैश्चापि पुरे हृद्ये सुधाधवलिताजिरे ।
दृक्चन्दनमालाद्यैरर्चिते च गृहे गृहे ॥
गीतवादित्रसंघुष्टे प्रज्वालितसुदीपके ।
दुकूलपटने मध्ये रङ्गमाणिक्यभूषणे ॥
युवतीजनसंकीर्णे वस्त्रोज्ज्वलविहारिणि ।
दीपमालाकुले रम्ये विध्वस्तध्वान्तसञ्चये ॥
प्रदोषे दोषरहिते शस्ते दोषागमे शुभे ।
यात्राविहारसम्भार जय जीवेतिवादिभिः ॥
मित्रस्वजनसम्बन्धिस्वजातिगोत्रपूजिते ।

ततोऽर्द्धरात्रसमये स्वयं राजा व्रजेत्पुरम् ॥
अवलोकयितुं रम्यं पद्भ्यामेव शनैः शनैः ।
महता तूर्यघोषेण ज्वलद्भिर्हस्तदीपकैः ॥
हर्म्यशोभां तु सम्पश्यन् कृतरक्षः स्वकैर्नरैः ।
तद्दृष्ट्वा महदाश्चर्यं ऋद्धिं चैवात्मनः शुभाम् ॥
बलिराज्यप्रमोदं च ततः स्वगृहमाचरेत् ॥" इति ।

एवं गते निशीथे त्विति कृत्यानन्तरं भविष्ये—

"सुखरात्रेरुषःकाले प्रदीपो ज्वलनालये ।
सर्वान्बन्धूनबन्धूंश्च वाचा कुशलयाऽर्चयेत् ॥
प्रदीपमङ्गलं कार्यं लक्ष्मीमङ्गलहेतवे ।
गोरोचनाक्षतं चैव दद्यादङ्गेषु सर्वतः ॥
विश्वरूपस्य भार्याऽसि पद्मे पद्मालये शुभे ।
महालक्ष्मि नमस्तुभ्यं सुखरात्रिं कुरुष्व मे ॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम् ।
सुखरात्रि प्रभातेऽद्य तन्मेऽलक्ष्मीर्व्यपोहतु ॥
या रात्रिः सर्वभूतानां या च देवेष्ववस्थिता ।
संवत्सरं प्रिया या च सा ममास्तु सुमङ्गला ॥
माता त्वं सर्वभूतानां देवानां सृष्टिसम्भवा ।
आख्याता भूतले देवि सुखरात्रि नमोऽस्तु ते ॥" इति ।

उल्कादानमपि प्रदोषे कार्यम् ।

"तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः ।
उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम् ॥"

इति ज्योतिषोक्तेः । तत्रोल्काग्रहणे मन्त्रः—

"शस्त्राशस्त्रहतानां च भूतानां भूतदर्शयोः ।
उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निना ॥" इति ।

*कार्तिकशुक्लप्रतिपदि गोक्रीडनमुक्तं निर्णया
अस्यामेव रात्रौ बलेः पूजोक्ता हेमाद्रौ भविष्ये—

'कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः ।
पूजां कुर्या*न्नृपः साक्षाद्भूमौ मण्डलके शुभे
बलिमालिख्य दैत्येन्द्रं वर्णकैः *पञ्चरङ्गकैः ।

तद्दानमन्त्रः—

"अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम ।
उज्ज्वलज्योतिषा दग्धास्ते यान्तु परमां गतिम् ॥" इ

तद्विसर्जने मन्त्रः—

"यमलोकं परित्यज्य आगता ये महालये ।
उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते ॥" इति ।

अत्र प्रदोषस्य कर्मकालत्वादेकैकदिने प्रदोषे चतुर्दश्य
श्ययोः सत्त्वे एते एव, दिनद्वये प्रदोषे तत्सत्त्वे परेद्युरेव,
तु पूर्वेति । गौणकालसत्त्वात् स्वकालादुत्तरस्यैव गौणत्वा
लक्ष्मीपूजादिः ।

*कार्तिकेति । एतत्प्रतिपद्यपि प्रातरभ्यङ्गं कुर्यात् त
लीत्वात् ।

"वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते ॥"

इत्युक्तेश्च । परन्तु बलिराज्यं पूर्वेद्युरेव बल्युत्सर्ग
वा । प्रातरभ्यङ्गस्नानं कृत्वा गोवर्धनं संपूज्य द्यूतादि क
*नृप इति । राजकर्तृकपूजायां रात्रेरभिधानेन अन्यकर्तृ
यामपि सैव ग्राह्या । रात्रेः कर्मकालत्वाभिधानात् । *प
कैरिति । ततः—

"सर्वाभरणसम्पूर्णं विन्ध्यावल्या सहासितम् ।

गृहस्य मध्ये शालायां विशालायां ततोऽ*र्चयेत् ॥
*लोकश्चापि गृहस्यान्तः *शय्यायां शुक्लतण्डुलैः ।

कृष्णाण्डबाणजम्भोरुमुरुदानवसंकृतम् ॥
संपूर्णहृष्टवदनं किरीटोत्कटकुण्डलम् ।
द्विभुजं दैत्यराजानं कारयित्वा नृपः स्वयम् ॥"

इति बोध्यम् । *अर्चयेदिति । राजकर्तृकपूजायां मद्यमांससुरादिकं भवति ।

"गन्धपुष्पान्ननैवेद्यैरक्षतैर्गुडधूपकैः ।
मद्यमांससुरालेह्यदीपबल्युपहारकैः ॥
मन्त्रेणानेन राजेन्द्र समन्त्री सपुरोहितः ।
एवं पूजां ततः कृत्वा रात्रौ जागरणं ततः ॥
कारयेत्प्रेक्षणीयादि नरनर्तकनाटकैः ॥"

इति भविष्यात् । *लोकश्चार्षाति । अत्रेदं बोध्यम्—भविष्योत्तरे—

"यो यादृशेन भावेन तिष्ठत्यस्यां युधिष्ठिर ।
हर्षदैन्यादिरूपेण तस्य वर्षं प्रयाति हि ॥" इति ।
"रुदिते रोदनं वर्षं हृष्टे वर्षं प्रहृष्यति ।
भुक्तौ भोक्ता भवेद्वर्षं स्वस्थे स्वस्थो भविष्यति ॥
तस्मात्प्रहृष्टैस्तुष्टैस्तु कर्तव्या कौमुदी नरैः ।
वैष्णवी दानवी चेयं तिथिः पात्री युधिष्ठिर" ॥ इति ।

*शय्यायामिति । शुक्लतण्डुलनिर्मिता प्रतिमापि तादृशलक्षणवती शय्यायां निधातव्येत्यर्थः । बल्युद्देशेन दीपादिदानमपि आवश्यकम् ।

"वीर प्रतिपदं प्राप्य नव भावी महोत्सवः ।
तत्र त्वां नरशार्दूल हृष्टाः पुष्टाः स्वलङ्कृताः ॥
अर्घ्यदीपप्रदानैश्च अर्चयिष्यन्ति मानवाः ॥"

संस्थाप्य बलिराजानं फलैः पुष्पैस्तु पूजयेत् ॥'

मन्त्रस्तु पाद्मे—

'बलिराज नमस्तुभ्यं दैत्यदानववन्दित ।
इन्द्रशत्रोऽमरारातेऽविष्णुसान्निध्यदो भव ॥' इ

तथा—

'बलिमुद्दिश्य दीयन्ते दानानि कुरुनन्दन ।
यानि तान्यक्षयाण्याहुर्मयैवं संप्रदर्शितम् ॥' इ

तदेतत्पूर्वविद्धप्रतिपदि कर्तव्यम् ।

'पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम् ।'

इति हेमाद्रौ पाद्मोक्तेः । माधवोपि—

'बल्युत्सवं च पूर्वेद्युरुपवासवदाचरेत् ।' इति

निर्णयामृतेपि—

*'या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप ।
पूजनात् त्रीणि वर्धन्ते प्रजा गावो महीपतिः ॥'

तथा—

'भद्रायां गोकुलक्रीडा स देशो वै विनश्यति ।

भद्रायां द्वितीयायाम् ।

तथा—

'प्रतिपद्यग्निकरणं द्वितीयायां तु गोर्चनम् ।
क्षेत्रच्छेदं करिष्येते वित्तनाशं कुलक्षयम् ॥' इ

तथा—

'प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम् ।
परविद्धेषु यः कुर्यात्पुत्रदारधनक्षयः ॥'

इति वामनपुराणे वामनेन वरदानात् । गोपूजनादि तत्र
द्धां प्रतिपदमाह—*या कुहूरिति । #अग्निकरणम्—होलादी
ननु 'पूर्वाह्णे क्रीडनं गवाम्' इति वचनाद्गोक्रीडादौ प्रातः

इति देवलवचनाच्च । *एते च विधिप्रतिषेधाः पूर्वदिने प्रतिपदः सायाह्नव्यापित्वे द्वितीयदिने चन्द्रदर्शनलंभवे च ज्ञेयाः ।

'गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः ।
सोमो राजा पशून्हन्ति सुरभिः पूजकांस्तथा ॥'

इति पुराणसमुच्चयात् । दिनद्वये सायाह्नव्यापित्वे तु *परैव ग्राह्या ।

'वर्धमानतिथौ नन्दा यदा सार्धत्रियामिका ।
द्वितीयावृद्धिगामित्वादुत्तरा तत्र चोच्यते ॥' इति ।

तथा—

'त्रियामगा दर्शतिथिर्भवेच्चेत्सार्धत्रियामा प्रतिपद्विवृद्धौ ।
दीपोत्सवे ते मुनिभिः प्रदिष्टे अतोऽन्यथा पूर्वयुते विधेये ॥'

इति पुराणसमुच्चयादिति निर्णयामृतकारः । सार्धत्रियामिकेत्यनेन चन्द्रदर्शनाभाव उक्तः । द्वितीयायाः पञ्चधाविभक्तदिनचतुर्थांशरूपापराह्णव्याप्तावेव चन्द्रदर्शनसंभवात् । *वयं त्वेतद्वचनद्वयं पूर्वविद्धासंभवे बोदित-

---

व्यापिनी परैव युक्तेत्यत्राह—*एते चेति । *परैवेति । तत्र चन्दर्शनाभावात् । तत्र गोक्रीडनादौ दीपोत्सवः गोपूजादिः कालानुग्रहात् , न तु बलिपूजादिः कालबाधापत्तेः चन्द्रदर्शनाभावप्रयोजकसार्धत्रियामोक्तिवशाच्च पूजायां दीपदानसत्त्वे तदीयोत्सवशब्दस्य तत्र सम्भवाच्च । ननु 'दीपोत्सवे ते मुनिभिः प्रदिष्टे' इति द्विवचनानुपपत्तिः । यदा त्रियामगो दर्शस्तदा पूर्वेद्युरेव दीपदानविधानादिति चेच्छृणु । अस्ति हि

'स्त्रियः क्रीडन्त्यमावास्यां गावो नन्दासु कार्तिके ।'

इति वचनम् । तेन च स्त्रीक्रीडनं स्त्रीनीराजनं विधीयते । तत्र दीपसम्बन्धात् दीपोत्सवपदेन तदुपादानाच्चत्रायं दर्शो ग्राह्य इति । *वयं त्विति । तथा च दिनद्वये सायाह्नव्यापित्वे पूर्वग्राह्येत्यभि-

व्यमिति ब्रूमः । दिनद्वये प्रतिपदः सायाहव्याप्त्यभा
तु *पूर्वैव । रात्रौ बलिपूजाविधानेन कर्मकालव्याप्तित्वा
तु परदिने चन्द्रोदये तन्निषेधादिति दिक् ।

*मदनरत्ने तु पूर्वविद्धायां गोक्रीडा । नीराजनमङ्ग
लमालिके *तूत्तरत्र कार्ये ।

'कार्तिके शुक्लपक्षे तु विधानद्वितयं भवेत् ।
नारीनीराजनं प्रातः सायं मङ्गलमालिका ॥
यदा च प्रतिप*त्स्वल्पा नारीनीराजनं भवेत् ।
द्वितीयायां तदा कुर्यात्सायं मङ्गलमालिकाम् ॥'

इति ब्राह्मोक्तः—

'लभ्यते यदि वा प्रातः प्रतिपद्घटिकाद्वयम् ।
तस्यां नीराजनं कार्यं सायं मङ्गलमालिका ॥'

इति भविष्योक्तेः ।

'प्रातर्वा यदि लभ्येत प्रतिपद्घटिका शुभा ।
द्वितीयायां तदा कुर्यात्सायं मङ्गलमालिकाम् ॥
*कार्तिके शुक्लपक्षादौ त्वमावास्या घटीद्वयम् ।
देशभङ्गभयान्नैव कुर्यान्मङ्गलमालिकाम् ॥'

इति देवीपुराणाच्चेत्युक्तम् । अत्र विशेषो हेमाद्रौ ब्राह्म
बलिप्रतिपदं प्रक्रम्य—

मानः । नन्दायाः सार्द्धत्रियामकत्वोक्तिवैयर्थ्यात् । *पूर्वैवेत्ति
'बलिपूजायां गोक्रीडायां च इति शेषः । रात्राविति क्रमेण हेतु प
रदिने चन्द्रोदयासत्त्वे परेति दिगर्थः । अत्र अन्यदपि कृत्यद्व
स्थलतो दर्शयति—

*मदनरत्ने त्विति । *उत्तरत्रेति । द्वितीयाविद्धायां प्रति
पदीत्यर्थः । *स्वल्पेति । तत्र प्रतिपदस्त्रिमुहूर्तव्यापित्वबोधार्थं
मू । *कार्तिके इति । नारीनीराजने अमायुक्तानिषेधः

*'तस्मादद्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः ।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरं जयः ॥
पराजयो विरूद्धश्च लाभनाशकरो भवेत् ।
*दयिताभिश्च सहितैर्नेया सा च भवेन्निशा ॥'इति।

अत्र गोवर्धनपूजादि मार्गपालीपूजनादि चोक्तं हेमाद्रौ निर्णयामृते च स्कान्दे—

'प्रातर्गोवर्धनं पूज्य द्यूतं चापि समाचरेत् ।
भूषणीयास्तथा गावः पूज्याश्चा*चाहदोहनाः ॥'

गोवर्धनश्च गोमयेन कार्यश्चित्रेण वा । मन्त्रस्तु—

'गोवर्धन धराधार गोकुलत्राणकारक ।
बहु*चाहकृतच्छाय गवां कोटिप्रदो भव ॥'

---

*तस्मादिति । शिवाभ्यां द्यूताऽऽचरणादित्यर्थः ।

"शङ्करस्तु पुरा द्यूतं ससर्ज सुमनोहरम् ।
कार्तिके शुक्लपक्षे तु प्रथमेऽहनि सत्यवान् ॥
जितश्च शङ्करस्तत्र जयं लेभे च पार्वती ।
अतोऽर्थं शङ्करो दुःखी उमा नित्यं सुखोचिता ॥"

इति आदित्यपुराणात् । *दयिताभिरिति । कृत्यान्तरम् ।

"श्रोतव्यं गीतवाद्यादि स्वनुलिप्तैः स्वलङ्कृतैः ।
विशेषवच्च भोक्तव्यं प्रशस्तैर्बान्धवैः सह ॥
तस्यां रात्रौ प्रकर्तव्यं शय्यास्थानं सुशोभनम् ।
गन्धैर्वस्त्रैस्तथा पुष्पैः स्त्रग्भिर्माल्यैरलङ्कृतम् ॥
दीपमालापरिक्षिप्तं तथा धूपेन धूपितम् ।
दयिताभिश्च सहितैर्नेया सा च भवेन्निशा ।
ते वै वस्त्रैश्च संपूज्या द्विजसम्बन्धिबान्धवाः ॥"

इति आदित्यपुराणात् ।

*आचाहदोहना इति । 'स्याज्ये वाहनदोहने' इति

*गोमन्त्रस्तु—

'लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता ।
घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥'

तत्रैव स्कान्दे—

*'ततोऽपराह्णसमये पूर्वस्यां दिशि भारत ।
मार्गपालीं प्रबध्नीयात्तुङ्गे स्तम्भेथ पादपे ॥
कुशकाशमयीं दिव्यां लम्बकैर्बहुभिर्मुने ।
दर्शयित्वा गजानश्वान्सायमस्यास्तले नयेत् ॥

ब्राह्मात् । *बाहवः वृक्षाः *गोमन्त्रस्त्विति ।

"अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥"

इत्यभिलषितं प्रार्थ्य गोपूजां कुर्यात् । *तत इति ।

"प्रभातसमये राज्ञा तोषणीयास्तु ते जनाः ।
सुवासिनीभ्यो देयानि वस्त्राण्याभरणानि च ॥
सद्भावेन च सन्तोष्या दानेन च तथा द्विजाः ।
वस्त्रैस्ताम्बूलदानैश्च पुष्पकर्पूरकुङ्कुमैः ॥
भोजयेत्पूजयेद्यत्नादन्तःपुरनिवासिनीः ॥

(यद्यपि सुवासिनीशब्द ऊढासु कन्यासु भगिनीषु रूढः । तथापि विप्रादयोऽपीह ग्राह्याः आचारात् ।)

पदातिजनसंघातान् ग्रैवेयैः कञ्चुकैः शुभैः ।
स्वनामाङ्कैः स्वयं राजा तोषयेत्स्वजनान्पृथक् ॥
तथा गणाधिपत्यांश्च तथा मल्लान् नटान् भटान् ।
वृषभान्महिषांश्चैव युद्ध्यमानान्परस्परान् ॥
गजानश्वांश्च योधांश्च पदातीन्समलंकृतान् ।
मञ्चारूढः स्वयं पश्येन्नटनर्तकचारणान् ॥
क्रुद्धापयेत्त्रासयेच्च गोमहिष्यादिकं ततः ।

कृतहोमे द्विजेन्द्रैस्तु बध्नीयान्मार्गपालिकाम्।
नमस्कारं ततः कुर्यान्मन्त्रेणानेन सुव्रत॥
'मार्गपालि नमस्तेऽस्तु सर्वलोकसुखप्रदे।
विधेयैः पुत्रदाराद्यैः पुनरेहि व्रतस्य मे॥'
नीराजनं च तत्रैव कार्यं राष्ट्रजयप्रदम्।
राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः।
मार्गपालीं समुल्लङ्घ्य नीरुजः स्युः सुखान्विताः॥'

तत्रैवादित्यपुराणे—

'कुशकाशमयीं कुर्या (१) द्वष्टिकां सुदृढां नवाम्।
तामेकतो राजपुत्रा हीनवर्णास्तथान्यतः॥
गृहीत्वा कर्षयेयुस्तां यथासारं मुहुर्मुहुः।
जयेऽत्र हीनजातीनां जयो राज्ञस्तु वत्सरम्॥'इति॥

यमद्वितीया तु प्रतिपद्युता ग्राह्येत्युक्तं निर्णयामृतादौ। यमद्वितीया मध्याह्नव्यापिनी पूर्वविद्धा चेति हेमाद्रिः। अत्र विशेषो हेमाद्रौ स्कान्दे—

'ऊर्जे शुक्लद्वितीयायाम*पराह्णेऽर्चयेद्यमम्।
स्नानं कृत्वा भानुजायां, यमलोकं न पश्यति॥'इति।
'ऊर्जे शुक्ले द्वितीयायां पूजितस्तर्पितो यमः।
वेष्टितः किन्नरैर्हृष्टैस्तस्मै यच्छति वाञ्छितम्॥'

दृषान्कर्षापयेद्गोभिरुक्तिप्रत्युक्तिवादिभिः॥"
इत्युक्तं प्रातःकृत्यानन्तरमित्यर्थः।

*अपराह्णे इति। अपराह्णव्यापिनी ग्राह्या, अपराह्णस्य कर्मकालत्वात्। दिनद्वये तद्व्याप्तावव्याप्तौ परा युग्मवाक्यात्। अपराह्णः पञ्चधाविभागपक्षेणेति सम्प्रदायः। द्विधापक्षेणेति न

---

(१)वष्टिका सूक्ष्मा रज्जुः।

*तथा भविष्ये—

'प्रथमा श्रावणे मासि तथा भाद्रपदेऽपरा ।
तृतीयाश्वयुजे मासि चतुर्थी कार्तिके भवेत् ॥
श्रावणे कलुषा नाम तथा भाद्रे च गोमिला ।
आश्विने प्रेतसंचारा कार्तिके याम्यका मता ॥'

इत्युक्त्वा प्रथमायां*व्रतं(२)द्वितीयायां सरस्वतीपूजा तृतीयायां श्राद्धमुक्त्वा चतुर्थ्यामुक्तम्—

'कार्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर ।
यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः ॥
अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता ।
अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः ॥
स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्धनम् ।
दानानि च प्रदेयानि भगिनीभ्यो विधानतः ॥
स्वर्णालङ्कारवस्त्रान्नपूजासत्कारभोजनैः ।
सर्वा भगिन्यः संपूज्या अभावे (१)प्रतिपन्नकाः ॥'

प्रतिपन्नाः मातृभगिन्य इति हेमाद्रिः ।

'पितृव्यभगिनीहस्तात्प्रथमायां युधिष्ठिर ।
मातुलस्य सुताहस्ताद्वितीयायां तथा नृप ॥
पितुर्मातुः स्वसुः कन्ये तृतीयायां तयोः करात् ।

व्याः । *तथेति । यमद्वितीयाव्रतं द्वितीयाचतुष्टयसापेक्षं तत्र प्रथमादिक्रमेण कर्तव्यं प्रायश्चित्तादिकमित्यर्थः । *व्रतं किञ्चित्प्रायश्चित्तम् । पितृव्यसम्बन्धेन भगिनी पितृव्यपुत्री । मातुलस्य सुतेति दर्शनात् । प्रथमायां कलुषायां, द्वितीयायां निर्मिलायां, तृतीयायां प्रेतसंचारायां, सर्वत्रापि भोक्तव्यमित्यस्यानुष-

(१)भगिनित्वेन प्रतिपन्ना अन्याः प्रतिपन्नकाः ।

(२)द्वितीयायां श्राद्धं तृतीयायां सरस्वतीपूजेति पाठान्तरम् ॥

भोक्तव्यं*सहजायाश्च भगिन्या हस्ततः परम् ॥
*सर्वासु भगिनीहस्ताद्भोक्तव्यं बलवर्धनम् ।
यस्यां तिथौ यमुनया यमराजदेवः
संभोजितः प्रतिजगत्स्वसृसौहृदेन ।
तस्यां स्वसाकरतलादिह यो भुनक्ति
प्राप्नोति रत्नसुखधान्यमनुत्तमं सः ॥'

*गौडास्तु—

'यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत् ।
अर्घ्यश्चात्र प्रदातव्यो यमाय*सहजद्वयैः ॥'

मन्त्रः—

'एह्येहि मार्तण्डज पाशहस्त यमान्तकालोकधरामरेश ।
भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते ॥'
*'भ्रातस्तवानुजातोहं भुङ्क्ष्व भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनायां विशेषतः ॥'

ज्येष्ठाग्रजातेति वदेदिति स्मार्ताः इत्यन्नदानमित्थ

ङ्गः । याम्यायामाह-*सहजाया इति । भोक्तव्यमिति वर्तते । *सर्वासु द्वितीयासु । स्वसायाः करतलादिति विग्रहः । आदन्तः स्वसाशब्दो द्रष्टव्यः । यमद्वितीया विधिमुक्त्वा भातृद्वितीयाविधिमाह-*गौडास्तु इति । आहुरिति सम्बन्धेनान्येषामप्यस्य कृत्यस्यावश्यकत्वं लभ्यते । *सहजद्वयैरिति । भातृभगिनीभिरित्यर्थः । पूजानन्तरं प्रणाममन्त्रः—

"धर्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज ।
पाहि मां किङ्करैः सार्द्धं सूर्यपुत्र नमोऽस्तु ते ॥
यमस्वसर्नमस्ते ऽस्तु यमुने लोकपूजिते ।
वरदा भव मे नित्यं सूर्यपुत्रि नमोऽस्तु ते ॥" इति ।

भ्रातुर्भोजनदाने मन्त्रमाह-*भ्रातरिति । 'ज्येष्ठा तु तवा-

प्याहुः । ब्रह्माण्डपुराणेपि—

'*या तु भोजयते नारी भ्रातरं युग्मके तिथौ ।
अर्चयेच्चापि ताम्बूलैर्न सा वैधव्यमाप्नुयात् ॥
भ्रातुरायुःक्षयो राजन्न भवेत्तत्र कर्हिचित् ॥' इति ॥

कार्तिकशुक्लनवमी युगादिः । सा पौर्वाह्णिकी ग्राह्या । शुक्लपक्षस्थत्वात् । अत्रापि पिण्डरहितं श्राद्धं कर्तव्यम् । अन्यत्प्रागुक्तम् । अत्रैव विष्णुत्रिरात्रमुक्तं हेमाद्रौ पाद्मे—

'कार्तिके शुक्लनवमीमवाप्य विजितेन्द्रियः ।
हरिं विधाय सौवर्णं तुलस्या सहितं विभुम् ॥
पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयम् ।
एवं यथोक्तविधिना कुर्याद्वैवाहिकं विधिम् ॥' इति ॥

कार्तिकशुक्लैकादश्यां भीष्मपञ्चकव्रतमुक्तं नारदीये—

ग्रजाता' इति पाठः । 'ज्येष्ठाग्रजाता' इति तु कालपनिकः पाठः ॥

*या त्विति ।

'कार्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम् ।
या न कुर्याद्विनश्यन्ति भ्रातरः सप्तजन्मसु' ॥

इति शेषः । भगिनीं प्रति भ्रातुर्वाक्यम्—

'भद्रे भगिनि भो मात स्त्वदङ्घ्रसरसीरुहे ।
श्रेयसे ऽद्य नमस्तुभ्यं मामतो ऽस्मि तवान्तिके ॥
भ्रातुर्वाक्यं ततः श्रुत्वा सत्वरं क्रियते तदा ।
अद्य भ्रातृमती भ्रातस्त्वया धन्या ऽसि मानद ॥
भोक्तव्यं ते ऽद्य मद्गेहे स्वायुषे मम मानदा ॥' इति ।
सर्वा भगिन्यः संपूज्या ज्येष्ठा अपि कनिष्ठिकाः ।
वस्त्रादिना नमस्कार्या निजवित्ताऽनुसारतः ॥
भ्रातुरायुष्यवृद्ध्यर्थं भगिनीभिर्यमस्य वै ।

'अतो*नरैः प्रयत्नेन कर्तव्यं भीष्मपञ्चकम् ।

प्रतिमा पूजनीया च प्रयत्नेन विधानतः ॥
मार्कण्डेयो बलिर्व्यासो हनुमांश्च विभीषणः ।
कृपो द्रौणिः परशुराम अष्टैते चिरजीविनः ॥
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
चिरञ्जीवी यथा त्वं भो तथा मे भ्रातरं कुरु ॥" इति ।

कार्तिकशुक्लचतुर्थ्यां नागव्रतं 'युगं मध्यं दिनं यत्र' इत्यादि प्रागुक्तकार्तिकशुक्लषष्ठ्यष्टमीनवमीकृत्यं कृत्यरत्नावल्यादौ द्रष्टव्यम् । कार्तिके कूष्माण्डदानं कुर्यात् ।

"कार्तिके मासि कूष्माण्डं सहिरण्यं सरत्नकम् ।
गुडदानेन सहितं दीयते मुनिपुङ्गव ॥
ते धन्या कृतकृत्यास्ते तैरात्मा तारितो मुने ॥"

इति पाद्मात् । नवम्यां तदानं ह्याचारात् । तत्र मन्त्रः—

"ब्रह्महत्यादिपापानां ब्रह्मणा निर्मितं पुरा ।
कूष्माण्डं बहुबीजाढ्यमतः शान्तिं प्रयच्छ मे ॥" इति ।

क्षयार्थमिति शेषः । न चेदं पठनीयम् । अनाज्ञातेष्वमन्त्रत्वमिति वाक्यात् । कूष्माण्डस्तु स्त्रिया न च्छेद्यः ।

"दीपप्रशमनं पुंसः कूष्माण्डच्छेदनं स्त्रियः ।
अचिरेणैव कालेन तस्य वंशक्षयो भवेत् ॥"

इति दोषश्रवणात् । विष्णुत्रिरात्रमिति पाठः । तुलस्यपि सौवर्ण इति केचित् ।

*नरैरिति । सर्वेषामधिकारः ।

"ब्रह्मचारी गृहस्थो वा वानप्रस्थो ऽथवा यतिः ।
प्राप्नोति वैष्णवं स्थानं तत्कृत्वा भीष्मपञ्चकम् ॥
ब्रह्महा मद्यपःस्तेयी गुरुगामी सदाऽनृती ।
मुच्यते पातकान्मर्त्यः कृत्वेदं भीष्मपञ्चकम् ॥"

कार्तिकस्यामले पक्षे*स्नात्वा सम्यग् यतव्रतः ॥
एकादश्यां तु गृह्णीयाद्व्रतं पञ्चदिनात्मकम् ॥' इति ।
तद्विधिस्तु गोमयेन स्नात्वा मौनी पञ्चामृतैः पञ्चगव्यैर्विष्णुं संस्नाप्य*संपूज्य पायसं निवेद्य द्वादशाक्षरमष्टोत्तरशतं जप्त्वा-'ॐ नमो विष्णवे' इति षडक्षरेण घृताक्तान्यवान्व्रीहींश्चाष्टोत्तरशतं हुत्वा भूमौ स्वपेत् । ए-

---

इत्युक्तेश्च । *स्नात्वेति प्रातःस्नानादिनित्यकृत्योपलक्षणम् । अत्र-

'व्रती स्नात्वा विधानेन मध्याह्ने च तथा पुनः ।'

इति वचनाद्व्रताङ्गं प्रातर्मध्याह्ने च मृद्गोमयाभ्यां स्नानमावश्यकम् । नद्यां गोमयेन स्नात्वेति ग्रन्थोप्येतत्परः । गोमयपदं मृदोप्युपलक्षणम् । ततो देवर्षिपितृतर्पणं कार्यम् ।

'यवव्रीहितिलैः सम्यक् पितॄंस्तर्पयेत्क्रमात् ।'

इति वाक्याद् यवाद्युक्त्या देवर्षिलाभः । *संपूज्येति । पूजा चोक्ता नारदीये—

"स्नापयेत्परया भक्त्या गन्धचन्दनवारिणा ।
चन्दनेन सुगन्धेन कुङ्कुमेनाथ केशवम् ॥
कर्पूरोशीरमिश्रेण लेपयेद्गरुडध्वजम् ।
अर्चयेदुचितैः पुष्पैर्गन्धधूपसमन्वितैः ॥
गुग्गुलुं घृतसंयुक्तं ददेदक्षयमिच्छमान् ।
दीपकन्तु दिवा रात्रौ दद्यात्पञ्चदिनानि तु ॥
नैवेद्यं देवदेवस्य परमान्नं निवेदयेत् ।
(परमान्नं हविष्यान्नं पायसं वा ।)
एवमभ्यर्च्य देवेशं स्तुत्वा चैव प्रणम्य च ॥
द्वादशाक्षरमन्त्रं च जपेदष्टोत्तरं शतम् ।
('ॐनमो भगवते वासुदेवाय इति द्वादशाक्षरमन्त्रः ।)
जुहुयात्तु घृताभ्यक्तं तिलव्रीहियवं व्रती ॥

वं पञ्चदिनेषु कुर्यात्। विशेषस्त्वा*द्येह्नि हरेः पादौ कमलैः संपूज्य त्रिर्गोमयं प्राश्यम्, द्वितीयेह्नि बिल्वपत्रैर्जानुनी संपूज्य गोमूत्रम्, त्रयोदश्यां भृङ्गराजेन नाभिं संपूज्य क्षीरम्, चतुर्दश्यां करवीरैः स्कन्धं संपूज्य दधि, पौर्णमास्यां होमान्ते लौहीं पापप्रतिमां खड्गचक्रहस्तां कृष्णवस्त्रेण वेष्टितां प्रस्थतिलोपरिस्थां कृत्वा धर्मराजनामभिः करवीरैः संपूज्य—

'यदन्यजन्मनि कृतमिह जन्मनि वा पुनः।
तत्सर्वं प्रशमं यातु मत्पापं तव पूजनात्॥'

इति पुष्पाञ्जलिं क्षिप्त्वा कृष्णप्रतिमां च संपूज्य विप्राय दत्त्वा विप्रान्संभोज्य दक्षिणां दत्त्वा पञ्चगव्यं प्राश्य पौर्णमास्यां नक्तं भुञ्जीतेति लघुनारदीये। पञ्चग-

---

षडक्षरेण होमस्तु स्वाहाकारान्वितेन च।"

'ॐनमो विष्णवे'इति षडक्षरः। ग्रन्थे च तिलहोमोऽपि बोध्यः।

*आद्येऽह्नीति।

"प्रथमेऽह्नि हरेः पादौ पूजयेत्कमलैर्द्विजः।
द्वितीये बिल्वपत्रेण जानुदेशं समर्चयेत्॥
पूजयेच्च तृतीयेऽह्नि नाभिभृङ्गारकेण तु।
(भङ्गारकं भृङ्गराजः इति मयूखः।)
बाणबिल्वजपाभिस्तु ततः स्कन्धौ समर्चयेत्॥
अर्चयित्वा हृषीकेशमेकादश्यां विशेषतः।
त्रिः प्राश्य गोमयं सम्यक् गोमूत्रमपरेऽहनि॥
क्षीरं चैव त्रयोदश्यां चतुर्दश्यां तथा दधि।
संप्राश्य कायशुद्ध्यर्थं लङ्घनीयं च तद्दिनम्॥
पञ्चमे तु दिने स्नात्वा विधिवत्पूज्य केशवम्।
पापस्य प्रतिमा कार्या रौद्रवक्त्रातिभीषणा॥

व्यप्राप्तानं षडक्षरेणेति हेमाद्रिः। हेमाद्रौ भविष्ये तु*शा कैर्मुन्यन्नैर्वा*पञ्चाहं वर्तनमुक्तम् । अन्तेऽप्युक्तम्-

'यद्भीष्मपञ्चकामिति प्रथितं पृथिव्या-
मेकादशीप्रभृतिपञ्चदशीनिरुद्धम् ।
मुन्यन्नभोजनपरस्य नरस्य तस्मि-
न्निष्टं फलं दिशति पाण्डव शार्ङ्गधन्वा ॥' इति ।

तथा पाद्मे-

'पञ्चाहं पञ्चगव्याशी भीष्मायार्घं च पञ्चसु ।
अहःस्वपि तथा दद्यान्मन्त्रेणानेन सुव्रत ॥'

इत्यादि । कृष्णप्रतिमादानानन्तरम् ।

दद्याद्धिरण्यं गां चैव कृष्णो मे प्रीयतामिति ।
भोजयेद्ब्राह्मणान्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥
व्रतोपदेष्टारमपि पूजयेद्वस्त्रभूषणैः ।
ततो नक्तं समश्नीयात्पञ्चगव्यपुरःसरम् ॥
एवं सम्यक् समाप्तं स्याद्यदुक्तं व्रतमुत्तमम् ॥"

इति लघुनारदीयोक्तं पाञ्चाह्निकम् । *शाकैरिति । इ चाशक्तस्य ।

"एकादशीं समारभ्य विज्ञेयं भीष्मपञ्चकम् ।
दुष्करं सत्त्वहीनानामशक्यं बालचेतसाम् ॥
शाकाहारेण मुन्यन्नैः कृष्णार्चनपरैर्नरैः ।
पत्न्याज्ञया सधवया विधवाभिः पराज्ञया ॥
नित्यं स्नानेन दानेन कार्तिकी यावदेव तु ।
वैश्वदेवस्तु कर्तव्यो विष्णुध्यानपरायणैः ॥"

वैश्वदेवः सर्वदेवस्य व्याहृतिहोमः।अत्रापि पापपतिमा श्रीकृष्ण प्रतिमा चावश्यं पूज्या देया च। अनयोः पक्षयोः भीष्माघ्र्यदानानि च्छन्ति । *पञ्चाहामिति । एतच्च पङ्हसाध्यम्। आद्ये पक्षे पादं

'सत्यव्रताय शुचये गाङ्गेयाय महात्मने ।
भीष्मायैतद्ददाम्यर्घ्यमाजन्मब्रह्मचारिणे ॥'
('वैयाघ्रपद्यगोत्राय' इति च ।)
सत्येनानेन मन्त्रेण तर्पणं सार्ववर्णिकम् ।' इति ॥

*कार्तिकशुक्लद्वादश्यां रेवतीनक्षत्रयोगरहितायां पारणं कार्यम् । तदुक्तम्—

आभाकासितपक्षेषु मैत्रश्रवणरेवती ।
संगमे नहि भोक्तव्यं द्वादश द्वादशीर्हरेत् ॥' इति ।

यदा तु रेवतीयोगरहिता द्वादशी सर्वथा न लभ्यते तदा रेवत्याश्चतुर्थपादं वर्जयेत् । वचनं तु प्रागुक्तम् । ल-

---

द्वितीये बिल्वैर्जानुनी, तृतीये जानुजघनानि तुलसीपत्रैः, चतुर्थे जात्यादिपुष्पैः स्कन्धौ, पञ्चमे मालतीपुष्पैः शिरः संपूज्य भीष्मार्घ्यं दत्त्वा गोमयगोमूत्रयपोदधिघृतानि क्रमेण पञ्चसु दिनेषु पिबेत् । रात्रौ च सन्ध्यामुपास्य मूलमन्त्रजपः । एवं पञ्चदिनानि उपोष्य षष्ठदिने विधिवत्स्नात्वा पक्वान्नेन पञ्च ब्राह्मणान्संभोज्य बन्धुभिः सह रात्रौ भुञ्जीत । अत्र एकादश्यां सुवर्णं, द्वादश्यां वस्त्रं, त्रयोदश्यां गौः, चतुर्दश्यां घृतपायसं, पूर्णिमायां श्वेतकृष्णतिला वस्त्रं च देयम् । मैथुनानृतमधुमांसताम्बूलाभ्यङ्गादि वर्जयेत् । पाद्मे पापादिप्रतिमा नोक्ता ।

"वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च ।
गङ्गापुत्राय भीष्माय प्रदास्येऽहं तिलोदकम् ॥
अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे ।
वसूनामवताराय शन्तनोरात्मजाय च ॥
अर्घ्यं ददामि भीष्माय सोमवंशोद्भवाय च ॥" इति ।

*कार्तिकशुक्लद्वादश्यामिति । द्वादशीकृत्यमेकादशीकृत्यानन्तरं द्रष्टव्यम् । अग्रे च न लिखति 'आचार्यः 'कृत्वा

वृद्धनारदीये—

'कार्तिके शुक्लपक्षस्य कृत्वा चैकादशीं नरः ।
प्रातर्दत्त्वा शुभान्कुम्भान्प्रयाति हरिमन्दिरम् ॥'

पद्मनरत्ने वाराहे—

'एकादशी सोमयुक्ता कार्तिके मासि भामिनि ।
उत्त(१)राभाद्रसंयोगे अनन्ता सा प्रकीर्तिता ॥
तस्यां यत्क्रियते भद्रे सर्वमानन्त्यमश्नुते ॥'

अस्यामेव*रात्रौ देवोत्थापनमुक्तं हेमाद्रौ ब्राह्मे—

'एकादश्यां च शुक्लायां कार्तिके मासि केशवम् ।
प्रसुप्तं*बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥' इति ॥

पद्मनरत्ने भविष्ये—

'कार्तिके शुक्लपक्षे तु एकादश्यां पृथासुत ।
मन्त्रेणनेन राजेन्द्र देवमुत्थापयेद्द्विजः ॥'

रामार्चनचन्द्रिकादौ तु द्वादश्यामुक्तम् ।

न निवर्तन्ते' इति न्यायात् । *रात्राविति प्रमादात् रात्रौ प्रसुप्तमित्यन्वयात् । अन्यथा

'निशिस्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम् ।'

इत्यनेन विरोधात् । अन्ये तु यथाश्रुतानुरोधेन रात्रावेव बोधनमाहुः । *बोधयेदिति । बोधनप्रकारश्च ब्राह्मे—

"नृत्यैर्गीतैस्तथा वाद्यैर्ऋग्यजुःसाममङ्गलैः ।
वीणापणवशब्दैश्च पुराणश्रवणेन च ॥
वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च वैष्णवैः ॥"

इति तत्रैव । इत्युत्थापनविधिः । द्वादश्यां प्रबोधे रेवत्यन्तपादो ग्राह्यः ।

"आभाकासितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवा ॥"

---

(१) उत्तराषाढ इति क्वचित्पुस्तके पाठः ।

'पारणाह्ने पूर्वरात्रे घण्टादीन्वादयेन्मुहुः ।' इति।
अत्र देशाचारतो व्यवस्था ।
'तत्रैव देवदेवस्य स्नानं पूर्वं महद्भवेत् ।

इति वचनात् । मात्स्ये—
'निशिस्वापो दिवोत्थानं सन्ध्यादौ परिवर्तनम् ।'
निशादौ नक्षत्रपादयोगाभावे नक्षत्रमात्रयोगो ग्राह्यः ।
"पादयोगो यदा न स्याद्दृक्षेणापि तदा भवेत् ॥"
इति वाराहात् ।
"विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ।
द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ॥"
इति विष्णुधर्माच्च । द्वादश्यामेकदेशेनापि ऋक्षयोगाभावे एकादश्यां त्रयोदश्यां वा तत्तदृक्षयोग एव निशादिवेलानादरेण प्रस्वापादि कार्यम् ।
"अप्राप्ते द्वादशीक्षे उत्थानशयने हरेः ।
पादयोगेन कर्तव्ये नाहोरात्रे विचिन्तयेत् ॥"
इति जीमूतवाहनोक्तवचनात् । एवञ्च द्वादश्यां निशादिवेलादरेऽन्यतिथौ च नक्षत्रपादयोगादरे नियते सति यदा द्वादशीषु निशादेरन्यत्र तत्तदृक्षमात्रयोगः अन्यतिथौ च तदितरनक्षत्रस्य योगः तदा द्वादशीषु सन्ध्यायां प्रस्वापादिः ।
"द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे ।
आभाकासितपक्षेषु शयनावर्तनादिकम् ॥"
इति वाराहात् । सन्धिसमयः सायंसन्ध्यैव शयनादौ तदन्वयः । प्रबोधोऽपि तत्रैव कार्यः ।
"रेवत्यन्तो यदा रात्रौ द्वादश्यां च समागतः ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥"
इति जीमूतधृतवाक्यात् । अत्र 'मैत्राद्यपादे' इत्यादिवहुषु च-

महापूजां ततः कृत्वा देवमुत्थापयेत्सुधीः ॥'

मन्त्रास्तु वाराहपुराणे उक्ताः—

'ॐ ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वन्दित वन्दनीय ।
बुध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव ॥
इयं तु द्वादशी देवप्रबोधार्थं विनिर्मिता ।
त्वयैव सर्वलोकानां हितार्थं शेषशायिना ॥
उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते ।
त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदम् ॥
उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव ।
*गता मेघा वियच्चैव निर्मलं निर्मला दिशः ॥
शारदानि च पुष्पाणि गृहाण मम केशव ॥
इदं विष्णुरिति प्रोक्तो मन्त्र उत्थापने हरेः ॥' इति ।

एवं देवमुत्थाप्य तदग्रे चातुर्मास्यव्रतसमाप्तिं कुर्यात् ।

तदुक्तं भारते—

'चतुर्धा गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः ।
कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत् ॥'

लघुनारदीये—

'चातुर्मास्यव्रतानां च समाप्तिः कार्तिके स्मृता ॥'

मन्त्रश्च निर्णयामृते सनत्कुमारेणोक्तः—

'इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो ।

तुर्थभागवाचिपादपदोपादानाच्चतुर्धा अनुराधारेवत्यौ विभज्य आद्यन्तपादयोरेव स्वापबोधौ कार्यौ । न चादिमध्यावसानेष्विति वाक्ये 'समं स्यादश्रुतत्वात्' इति न्यायेन त्रेधा विभागः प्रतीयते इति वाच्यम् । वचनान्तरेषु पादपदरूपविशेषश्रवणेनाऽश्रुतत्वादिति हेतोरसिद्धेः । श्रवणस्य तु त्रेधाविभक्तस्य मध्यभाग एव ग्राह्यः 'श्रुतेश्च मध्ये परिवर्तमिति' इति मध्यपदोपादानादिति । *गता मेघा

न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन ॥' इति ।

अथ वाराहोक्तो बोधनीविधिः । एकादश्यां रात्रौ कुम्भे घृतपात्रोपरि हैमं माषमितं मत्स्यं पञ्चामृतेन संस्नाप्य कुङ्कुमपीतवस्त्रयुगपद्माद्यैः संपूज्य मत्स्यादिदशावतारान्संपूज्य जागरं कृत्वा प्रातर्देवमाचार्यं च वस्त्राद्यैः संपूज्य—

'जगदादिर्जगद्रूपो जगदादिरनादिमान् ।
जगदाद्यो जगद्योनिः प्रीयतां मे जनार्दनः ॥'

इति नत्वा दक्षिणां दत्त्वा ब्राह्मणान्भोजयेदिति । तथा ब्राह्मे—

'महानूर्यरवे रात्रौ भ्रामयेत्स्यन्दने स्थितम् ।
उत्थितं देवदेवेशं नगरे पार्थिवः स्वयम् ॥
चतुरो वार्षिकान्मासान्नियमं यस्य यत्कृतम् ।
कथयित्वा द्विजेभ्यस्तद्व्याद्भक्त्या*सदक्षिणम् ॥'

इति मन्त्रेण प्रबोधानन्तरं पुष्पाञ्जलिर्देयो मन्त्रलिङ्गात् । अत्र पूर्वदिने रात्रौ दशावतारान्सम्पूज्य जागरणं कृत्वा प्रातर्देवमाचार्यञ्च वस्त्राद्यैः सम्पूज्य—

"जगदादिर्जगद्रूपो जगदादिरनादिमान् ।
जगदाद्यो जगद्योनिः प्रीयतां मे जनार्दनः ॥"

इति तान् नत्वा दक्षिणां दत्त्वा ब्राह्मणान्सम्भोज्य स्वयं भुञ्जीतेति विधिमप्याहुः । चतुर्द्दा एकादशीद्वादशीपौर्णमासीसङ्क्रान्त्यन्यतमपक्षेण । एवं "चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि"इत्यनियमपक्षेऽपि उत्थापनावधीत्यभिधानात् ।

*सदक्षिणमिति ।

'दत्त्वा विसर्जयेद्विप्रं ततो भुञ्जीत च स्वयम् ।'

इत्युत्तरार्द्धम् । 'निद्रां त्यजति कार्तिक्याम्' इति पूर्णिमा-

यस्य भक्ष्यस्य नियमः कृतस्तद्द्रव्यं दद्यादित्यर्थः। *इदं शुक्लास्तादावपि कार्यम्। आशौचे तु पूजामन्येन कारयेत्। कार्तिकशुक्लद्वादशी पौर्णमासी च मन्वादिः। सा पौर्वाह्णिकी ग्राह्या। अन्यत्प्रागुक्तम्॥

कार्तिकशुक्लचतुर्दशी वैकुण्ठसंज्ञा। सा विष्णुपूजायां रात्रिव्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तौ निशीथप्रदोषोभयव्यापिनी ग्राह्या। तदुक्तं हेमाद्रौ भविष्ये-

'कार्तिकस्यासिते पक्षे चतुर्दश्यां नराधिप।
सोपवासस्तु संपूज्य हरिं रात्रौ जितेन्द्रियः॥' इति।

अस्या एव *विश्वेश्वरप्रतिष्ठादिनत्वात्तत्प्रीत्यर्थं यदोपवासादि क्रियते तदाऽरुणोदयव्यापिनी ग्राह्या। तदुक्तं त्रिस्थलीसेतौ सनत्कुमारसंहितायाम्—

'वर्षे च हेमलम्बाख्ये मासे श्रीमति कार्तिके।
शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति॥
महादेवतिथौ ब्राह्मे मुहूर्ते मणिकर्णिके।
*स्नात्वा विश्वेश्वरो देव्या विश्वेश्वरमपूजयत्॥'

इति।

प्रबोधपक्षेऽपि व्रतसमाप्तिर्द्वादश्यामेवेति बोध्यम्। *इदं चातुर्मास्यव्रतसमापनम्, नियतकालत्वादिति शेषः।

*विश्वेश्वरेति।

"संक्षेपं ज्योतिषस्तस्य प्रतिष्ठाख्यं तदाऽकरोत्।
स्वयमेव स्वमात्मानं चरन्पाशुपतव्रतम्॥
जपन्वै शतरुद्रीयं पूजयंस्तमहर्निशम्।
स्वयमेव स्वमात्मानं तत्रैवोवास शंकरः॥"

इति वचनात्। *स्नात्वेति।

'निवासस्थानतोऽभ्येत्य सार्द्धं विश्वगणेश्वरैः।'

*तत्पूर्वदिने चोपवासः कार्यः ।

'ततः प्रभाते विमले कृत्वा पूजां महाद्भुताम् ।
दण्डपाणेर्महाधाम्नि वनेऽस्मिन्कृतपारणः ॥'

इति तत्रैवोक्तेः । शिवरहस्येऽपि पूजाजागराद्युक्त्वोक्तम्—

'ततोऽरुणोदये जाते स्नात्वा स्नात्वा च भस्मना ।
संध्यां समाप्य विश्वेशं मामभ्यर्च्य यथाविधि ॥
मद्भक्तान्भोजयामासुर्ऋषयो वुभुजुस्ततः ॥' इति ।

अत्र कार्तिकव्रतोद्यापनं पाद्मे कार्तिकमाहात्म्ये उक्तम्—

'अथोर्जव्रतिनः सम्यगुद्यापनविधिं शृणु ।
ऊर्जशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती ॥
तुलस्या उपरिष्टात्तु कुर्यान्मण्डपिकां*शुभाम् ।

इति पूर्वार्द्धम् । देव्या सह अत्र प्रकृतिस्वरूपेणार्थवादेन कृतोपवासोऽरुणोदये मणिकर्ण्यां स्नात्वा विश्वेश्वरं पूजयेत् । तस्य विश्वेश्वरप्रतिष्ठादिनत्वादित्यर्थः । *तत्पूर्वदिने चेति । प्राभातिकपारणाविधेश्च पूर्वदिने उपवासः चतुर्दशीयुक्तोऽरुणोदयव्यत्यहोरात्रे कार्य इत्यर्थः । पूजादावरुणोदयव्यापिनी ग्राह्या, 'कर्मणो यस्य यः कालः' इति वचनात् । अत्र चतुर्दश्यामरुणोदये मणिकर्णिकायां स्नात्वा विश्वेश्वरपूजां कृत्वोपवासं सङ्कल्पयेत् । ततो रात्रिपूजाजागरणानन्तरं द्वितीयेऽह्नि अरुणोदयस्नानं महापूजां कृत्वा पारणं कुर्यादित्यर्थं जनेष्वात्मानं विशेषयन्काश्चिज्जानाति न तु हेमाद्रिमारभ्यान्यः कश्चनेति उज्झितः । तत्फलं तु काशीखण्डे—

"कार्तिकस्य चतुर्दश्यां विश्वेशं यो विलोकयेत् ।
स्नात्वा चोत्तरवाहिन्यां न तस्य पुनरावृत्तिः ॥" इति ।

उद्यापनं च व्रतसम्पूर्णत्वाद्यर्थम् ।

'व्रतसम्पूर्णतार्थाय विष्णुप्रीत्यर्थमेव च ।'

इति वचनात् ।

तुलसीमूलदेशे च *सर्वतोभद्रमेव च ॥
तस्योपरिष्टात्कलशं पञ्चरत्नसमन्वितम् ।
पूजयेत्तत्र देवेशं सौवर्णं गुर्वनुज्ञया ॥
रात्रौ जागरणं कुर्याद्गीतवाद्यादिमङ्गलैः ।
ततस्तु पौर्णमास्यां वै सपत्नीकान्द्विजोत्तमान् ॥
त्रिंशन्मितानथैकं वा स्वशक्त्या वा *निमन्त्रयेत्
अतोदेवा इति द्वाभ्यां जुहुयात्ति*लपायसम् ॥

---

*द्युभामिति ।

'सुतोरणां चतुर्द्वारां पुष्पचामरशोभिताम् ।
द्वारेषु द्वारपालाँश्च पूजयेन्मृन्मयान्पृथक् ॥
पुण्यशीलं सुशीलं च जयं विजयमेव च ॥'

*सर्वतोभद्रमिति ।

'चतुर्भिर्वर्णकैः सम्यक् शोभाढ्यं समलङ्कृतम् ।' इति ।

एतेन सर्वतोभद्रमण्डलदेवताऽऽवाहनादि सूचितम् । तच्च नवरात्रे दर्शितम् । कलशश्च सपिधानः कार्यः । पिधानं च महापलादि । तत्र पिधानोपरि सौवर्णं विष्णुं षोडशोपचारैः पूजयेदित्यर्थः । विष्णुश्च केशवादीनां चतुर्विंशतीनां मध्येऽन्यतमः ।

"पूजयेत्तत्र देवेशं शङ्खचक्रगदाधरम् ।
पीतकौशेयवसनं युक्तं जलधिकन्यया ॥"

इति वाक्यात् । शङ्खादेः क्रमविवक्षायां तु केशव एव ।

'इन्द्रादिलोकपालांश्च मण्डपे पूजयेद्व्रती ।'

वाद्यादीत्यादिना नृत्यादिग्रहः । *निमन्त्रयेदिति ।

'ततस्तान्भोजयेद्विप्रान्पायसाज्यादिना व्रती ।'

*तिलपायसमिति ।

"प्रीत्यर्थं देवदेवस्य देवानां च पृथक्पृथक् ।
दक्षिणां च यथाशक्ति प्रदद्यात्प्रणमेच्च तान् ॥

तत्तो गां कपिलां दद्यात्पूजयेद्विधिवद् *गुरुम् ॥' इति

देवदेवं समभ्यर्च्य देवीं च तुलसीं तथा ॥"

*गुरुमिति । वस्त्रालङ्कारादिभिरिति शेषः ।

"सपत्नीकं समभ्यर्च्य तांश्च विप्रान्समर्चयेत् ।
युष्मत्प्रसादादेवेश प्रसन्नो भव सर्वदा ॥
व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ।
तत्सर्वं नाशमायातु स्थिरा मे चास्तु सन्ततिः ॥
इति क्षमाप्य तान् विप्रान्प्रसाद्य च विसर्जयेत् ।
तामर्चां गुरवे दद्याद्वस्त्रयुक्तां तदा व्रती ॥
ततः सुहृद्गुरुयुतः स्वयं भुञ्जीत भक्तिमान् ॥" इति ।

कृत्यरत्नार्णवे—

"पौर्णमास्यां तु सम्पूज्यो भक्त्या दामोदरः सदा ।
तस्मिन्नहनि यत्नेन कर्तव्यं नक्तभोजनम् ॥"

अत्र तुलसीविवाहविधिर्विष्णुयामले—

"आदावेवाथ तुलसी वने वा स्वगृहेऽपि वा ।
मासत्रयेण संवर्द्ध्या ततो यजनमारभेत् ॥
सौम्यादाने प्रकर्तव्यं गुरुशुक्रोदये तथा ।
अथवा कार्तिके मासि भीष्मपञ्चादिनेऽथवा ॥
वैवाहिकेषु ऋक्षेषु पूर्णिमायां विशेषतः ।
मण्डपं कारयेत्तत्र कुण्डं वेदी विवाहवत् ॥
ब्राह्मणान्दैशिकं चैव चतुरश्च तथा द्विजः ।
गृह्यग्निं पुरः कृत्वा मातॄणां यजनन्ततः ॥
कृत्वा नान्दीमुखश्राद्धं सौवर्णं स्थापयेद्धरिम् ।
कृत्वा च रौप्यतुलसीं लग्ने त्वस्तमिते रवौ ॥
(गोधूलिलग्ने इत्यर्थः ।)
सम्पूज्यालङ्कृतां तां च प्रदद्याद्विधिना हरेः ।

वासश्चतेन मन्त्रेण कङ्कणं पाणिपल्लवे ॥
विवाहकर्मवत्सर्वं कर्तव्यं दैशिकोत्तमैः ।
को अदादिति मन्त्रेण करग्राहो विधीयते ॥
कर्तव्यश्च ततो होमो विशेषाद्विधिपूर्वकम् ।
आचार्यो वेदिका कुण्डे जुहुयाच्च नवाहुतीः ॥"

स्विष्टकृतोऽनन्तराः । ॐनमो भगवते केशवाय स्वाहा, ॐनारायणाय, माधवाय, गोविन्दाय, विष्णवे, मधुसूदनाय, त्रिविक्रमाय, वामनाय, श्रीधराय, हृषीकेशाय, पद्मनाभाय, दामोदराय, उपेन्द्राय, वासुदेवाय, अनिरुद्धाय, अच्युताय, अनन्ताय, गदिने, चक्रिणे, विश्वक्सेनाय, वैकुण्ठाय, जनार्दनाय, मुकुन्दाय, अधोक्षजाय ।

"यजमानः सपत्नीकः सहामात्यैश्च गोत्रजैः ।
प्रदक्षिणाः प्रकुर्वीत चतस्रो विष्णुना सह ॥"

तुलस्या इति शेषः ।

"तुलसीपाणिग्रहणे वेदिकायां विधानतः ।
शतकुम्भं जपेत्सूक्तं पावमानीर्विशेषतः ॥
जीवसूक्तं पुनर्जप्त्वा नवसूक्तं तथैव च ।
पठेयुः शान्तिकाध्यायान् तथा वैष्णवसंहितान् ॥
गायन्ति मङ्गलं नार्यो भेरितूर्यादिनिःस्वनैः ।
शङ्खझल्लरिनिर्घोषैर्मङ्गल्यं विधिमाचरेत् ॥
दद्यात्पूर्णाहुतिं पश्चादभिषेकविधिं ततः ।
ब्रह्मणे वृषभं दद्यादाचार्यं परिधाप्य च ॥
गोपदं च तथा शय्यामाचार्याय प्रदापयेत् ।
आजन्मोपार्जितं पापं दर्शनेन प्रणश्यति ॥
वापयेत्तुलसीं यस्तु सेवयेच्च प्रयत्नतः ।
प्रतिष्ठाप्य यथोक्तेन विष्णुना सह माधवः ॥

कार्तिकी पौर्णमासी परा ग्राह्या । 'अमापौर्णमास्यौ परे' इति दीपिकोक्तेः । अत्र विशेषो हेमाद्रौ ब्राह्मे—

'पुण्या महाकार्तिकी स्याज्जीवेन्दोः कृत्तिकासु च ।'

तथा—

'आग्नेयं तु यदा ऋक्षं कार्तिक्यां भवति क्वचित् ।
महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा ॥
यदा तु याम्यं भवति ऋक्षं तस्यां तिथौ क्वचित् ।
तिथिः सापि महापुण्या मुनिभिः परिकीर्तिता ॥
प्राजापत्ये यदा ऋक्षं तिथौ तस्यां नराधिप ।
सा महाकार्तिकी प्रोक्ता देवानामपि दुर्लभा ॥' इति ।

पाद्मे—

'विशाखायां यदा भानुः कृत्तिकासु च चन्द्रमाः ।
स योगः पुष्कलो नाम पुष्करैरपि दुर्लभः ॥
पुष्कलं पुष्करे प्राप्य कपिलां यः प्रयच्छति ।
स हित्वा सर्वपापानि वैष्णवं लभते पदम् ॥'

यमः—

'कार्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते ।
माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः ॥'

अस्यामेव सायंकाले मत्स्यावतारो जात इत्युक्तं पाद्मे कार्तिकमाहात्म्ये—

'चराचरगुरुं विष्णुमत्स्यरूपमवस्थितः ।
तस्यां दत्तं हुतं जप्तं तदक्षय्यफलं स्मृतम् ॥' इति ।

स मोक्षं लभते जन्तुर्विष्णुलोकं तथाक्षयम् ।
प्राप्नोति विपुलान्भोगान् विष्णुना सह मोदते ॥
अनिष्टा श्रोतृभक्ष्यास्तु हन्युका विष्णुयाजके ॥"

इति कार्तिकमासः ।

अत्र त्रिपुरोत्सव उक्तो मार्गवार्चनदीपिकायाम् —

'पौर्णमास्यां तु संध्यायां कर्तव्यस्त्रिपुरोत्सवः ।
दद्यादनेन मन्त्रेण प्रदीपांश्च सुरालये ॥
कीटाः पतङ्गा मशकाश्च वृक्षा
जले स्थले ये विचरन्ति जीवाः ।
दृष्ट्वा प्रदीपं न च जन्मभागिनो
भवन्ति नित्यं श्वपचा हि विप्राः ॥'

अत्र वृषोत्सर्गोऽतिप्रशस्तः । तदुक्तं मात्स्ये—

'कार्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत्
शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतम् ॥' इति

अत्र कार्तिकेयदर्शनमुक्तं काशीखण्डे—

'कार्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वामिदर्शनम्
सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥'

इति श्रीकमलाकरभट्टकृते निर्णयसिन्ध्वौ द्वितीयपरिच्छेदे कार्तिकमासः ॥

वृश्चिके पूर्वाः षोडश घटिकाः पुण्याः (१)(शेषं ज्ञेयम्) । मार्गशीर्षकृष्णाष्टमी कालाष्टमी । सा च रात्रिव्यापिनी ग्राह्या ।

'मार्गशीर्षासिताष्टम्यां कालभैरवसन्निधौ ।
उपोष्य जागरं कुर्वन्सर्वपापैः प्रमुच्यते ॥'

इति काशीखण्डाद्रात्रिव्रतत्वावगतेः ।

'रुद्रव्रतेषु सर्वेषु कर्तव्या संमुखी तिथिः ।'

इति ब्रह्मवैवर्ताच्च । *दिनद्वयेऽशतो रात्रिव्याप्त्यैव । भैरवोत्पत्तेः प्रदोषकालीनत्वादिति केचित् ।

अथ कालाष्टमीनिर्णयः । केषाञ्चिन्मतमाह—*दिनद्वयं

---

(१) कंसान्तर्गतं क पुस्तके नास्ति ।

शिवरहस्ये*मध्याह्ने भैरवोत्पत्तेः श्रवणात् । तथा च तत्रैव —

'नित्ययात्रादिकं कृत्वा मध्याह्ने संस्थिते रवौ ।'

इत्युपक्रम्य ब्रह्मणा रुद्रेऽवज्ञाते उक्तम्—

'तदोग्ररूपादनघान्मत्तः श्रीकालभैरवः ।
आविरासीत्तदा लोकान्भीषयन्नखिलानपि ॥' इति ।

अत्रो*पवास एव प्रधानमित्युक्तं तत्रैव—

'उपोषणस्याङ्गभूतमर्घ्यदानमिह स्मृतम् ।
तथा जागरणं रात्रौ पूजा यामचतुष्टये ॥'

संध्यायामपि पूजैवोक्ता । (तेन(१)मध्याह्नव्यापिनी युक्ता ।) दिनद्वयेऽशतः संपूर्णायां वा*तद्व्याप्तौ पूर्वैव । पूर्वोक्तवचनात् । पारणा तु प्रातरेव ।

ति । *मध्याह्ने इति । नत्वेतावता जन्मकालव्यापित्वान्मध्याह्नव्यापिनीति भ्रमः कार्यः । शिवरहस्ये मध्याह्नानन्तरम्—

'कृतिवासेश्वरं प्रापुर्देवा बिल्वादिसाधनाः ।'

इति बहुकृत्यकलापमुक्त्वा भैरवाविर्भावमुक्त्वा 'सूर्योऽस्तमुपागमत्'इत्यभिधानेन मध्याह्ने तदाऽऽविर्भावानिश्चयात् । अस्तु वा मध्याह्ने तदाविर्भावः । तथापि तत्कालीनतिथिर्ग्राह्येत्यत्र न किञ्चिन्मानमस्ति । जन्माष्टम्यादौ तु पूजारूपकर्मकालत्वेनैव निशीथव्याप्तिर्गृह्यते न तु जन्मकालत्वेनेति । अत एव यामचतुष्टयपूजासन्ध्यापूजेत्यादिकर्मकालत्वेन रात्रिव्यापिनीमङ्गीकृत्य मध्याह्नव्यापिनीं पारित्यक्ष्यति न चेत्यादिना । *उपवास एवेति । उपवासजागरणे प्रधानमिति अपरं मतम् । पूजोपवासजागरणानि प्रधानानीत्येकम् । *तद्व्याप्तौ रात्रिव्याप्तौ । अत्रोपवासादेः प्राधान्यादिवारात्रिव्रतमिदम् । ततश्चाहोरात्रव्याप्तिरेव ग्राह्या ।

---

(१) कंसान्तर्गतं क पुस्तके नास्ति ।

'यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा ।'
इति वचनात् । अत्र च कालभैरवपूजोक्ता त्रिस्थली-सेतौ—

'कृत्वा च विविधां पूजां महासंभाराविस्तरैः ।
नरो मार्गासिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत् ॥'

तथा—

'तीर्थे कालोदके स्नात्वा कृत्वा तर्पणमत्वरः ।
विलोक्य कालराजानं निरयादुद्धरेत्पितॄन् ॥' इति ॥

इयं च कार्तिक्यनन्तरा गौणचान्द्राभिप्रायेण ।
मार्गशीर्षशुक्लपञ्चम्यां नागपूजोक्ता हेमाद्रौ स्कान्दे—

'शुक्ला मार्गशिरे पुण्या श्रावणे या च पञ्चमी ।
स्नानदानैर्बहुफला नागलोकप्रदायिनी ॥' इति ।

इयं नागपूजायां षष्ठीयुतैव ग्राह्या ।

"दिवारात्रिव्रतं यच्च एकमेव तिथौ गतम् ।
तस्यामुभययोगिन्यामारभेत्तद्व्रतं व्रती ॥"

इति वाक्यात् । यदा पूर्वदिने सायाह्ने उत्तरेह्युश्च प्रदोषे तदा पूर्वैव 'रुद्रव्रतेषु'इति वचनात् । पूजा तु काशीवासनिर्विघ्नतासिद्ध्यर्थतया काम्यैव इति मयूखः । मार्गशीर्षशुक्लतृतीया रम्भातृतीया, तस्यामुपवासः कार्यः ।

"मार्गशुक्लतृतीयायां दन्तधावनपूर्वकम् ।
उपवासस्य नियमं गृह्णीयात्पतिदैवतम् ॥
सौभाग्यार्थं पुरा चीर्णं रम्भया राजसत्तम ।
तेन रम्भा तृतीयेऽयं परसौभाग्यदायिनी ॥"

इति वचनात् । दन्तधावनं च काष्ठं विना कार्यम् । इयं पूर्वविद्धा ग्राह्या । 'बृहत्तपा तथा रम्भा' इति वचनात् । श्रावणकृष्णतृतीया बृहत्तपा ।

'पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता ।
तस्यां तु तुषिता नागा (१)इतरा सचतुर्थिका ॥'
इति मदनरत्ने वचनात् ॥

मार्गशीर्षशुक्लषष्ठी चम्पाषष्ठीति महाराष्ट्रेषु प्रसिद्धा । सा *उत्तरयुता ग्राह्या । 'षण्मुन्योः' इति युग्मवाक्यात् । 'पूर्वाह्णे दैविकं कुर्यात्' इति वचनादस्य च दैवकर्मत्वात् । इयमेव योगविशेषेण चम्पेत्युच्यते । तदुक्तं ब्रह्माण्डपुराणे मल्लारिमाहात्म्ये—

'मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता ।
रविवारेण संयुक्ता सा चम्पेतीह कीर्तिता ॥' इति ।
'विशाखाभौमयोगेन सा चम्पेतीह (२)कीर्तिता'
इति मदनरत्ने पाठः ।

'मार्गशीर्षेऽमले पक्षे षष्ठ्यां वारेंऽशुमालिनः ।
शततारागते चन्द्रे लिङ्गं स्याद् दृष्टिगोचरम् ॥' इति ।
इयं च योगवशेन पूर्वा परा वा कार्या । 'चम्पाषष्ठी सप्तमीयुता' इति दिवोदासः । इयमेव *स्कन्दषष्ठी । सा पूर्वयुता ।

'कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ॥'
इति भृगूक्तेः । परेऽह्नि रात्र्याद्य*यामसमधे पारणासं-

*उत्तरयुतेति । वक्ष्यमाणयोगविशेषेण मल्लारिपूजायां पूर्वा परा वा ग्राह्या, तदभावे तूत्तरविद्धेत्यर्थः ।

*स्कन्दषष्ठीति ।
"येयं मार्गशिरे मासि षष्ठी भवति सत्तम ।
पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया ॥"

(१) क पुस्तके 'इतरे' इति पाठः ।
(२) 'विश्रुता' इति क पुस्तके पाठः ।

भवे इदम्, अन्यथोत्तरैवेति दिवोदासः। *अब्दपर्यन्तं षष्ठीषु—

'सेनाविदारक स्कन्द महासेन महाबल ।
रुद्रोमाग्निज षड्वक्त्र गङ्गागर्भ नमोऽस्तु ते ॥'

इति राजतं स्कन्दं संपूज्य विप्राय दद्यादिति दिवोदासः

मार्गशीर्षशुक्लचतुर्दश्यां पिशाचविमोचनीतीर्थे श्राद्धं त्रिस्थलीसेतौ भट्टचरणैरुक्तम्। तस्य प्राप्तपैशाच्यस्वपित्राद्युद्देश्यकत्वे पार्वणत्वाद्*पराह्णव्यापिनी ग्राह्या, अज्ञातनामपिशाचाद्युद्देश्यकत्वे त्वेकोद्दिष्टत्वान्मध्याह्नव्यापिनीति। कुलधर्मव्रतादौ तू*त्तरैव। 'चैत्रनभोगतेतरासिता स्यादूर्ध्वम्' इति दीपिकोक्तेः॥

मार्गशीर्षपौर्णमास्यां दत्तात्रेयोत्पत्तिः। तदुक्तं स्कान्दे सह्याद्रिखण्डे—

'मार्गशीर्षे तथा मासि दशमेऽह्नि सुनिर्मले।
मृगशीर्षयुते पौर्णमास्यां ज्ञस्य च वासरे॥
जनयामास देदीप्यमानं पुत्रं सती शुभम्।
तं विष्णुमागतं ज्ञात्वा अत्रिर्नामाऽकरोत्स्वयम्॥
दत्तवान्स्वस्य पुत्रत्वादत्तात्रेय इतीश्वरः॥' इति।

*इयं प्रदोषव्यापिनी ग्राह्येति वृद्धाः॥

इति भविष्यात्। *आद्येति पारणानुरोधेन तिथिग्राह्यत्वापरपक्षरुचिः। प्रतिमासपक्षद्वयषष्ठीषु व्रतान्तरमाह—*अब्दपर्यन्तमिति।

*अपराह्णेति। मध्याह्नव्यापिनीमप्यत्र केचिदाहुः।

*उत्तरैवेति। 'शुक्लपक्षे चतुर्दशी' इत्युक्तेः।

"मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी।
सा रात्रिव्यापिनी ग्राह्या नान्या कृष्णा कदाचन॥"

"परा पूर्वाह्णगामिनी" इति वचनाच्च।

मार्गशीर्षपौर्णिमानन्तराष्टमी अष्टका । एवं पौषादिमासत्रयेऽपि । 'हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वा' इत्याश्वलायनोक्तेः । 'एकस्यामष्टम्यां वैका कार्या' इति हरदत्तः । क्वचित्पञ्चम्यप्युक्ता ।

'प्रौष्ठपद्यष्टका भूयः पितृलोके भविष्यति ।'

इति पाद्मवचनात् । तत्पूर्वसप्तमीषु पूर्वेद्युः तत्परनवमीष्वन्वष्टकाश्राद्धमुक्तं कालादर्शे—

*'मार्गशीर्षे च पौषे च माघे प्रौष्ठे च फाल्गुने ।
कृष्णपक्षे च पूर्वेद्युरन्वष्टक्यं तथाष्टका॥'इति ।

---

*इयमिति । पूर्वविद्धेत्यन्ये । मार्गशीर्षचतुर्दश्यां पौर्णमास्यां वा प्रत्यवरोहणं कार्यम् ।

*मार्गेति अमान्तमानेन । मार्गशीर्षादिचतुष्टयं भाद्रकृष्णाष्टमी च कालः । एतेन माघ्या वर्षमिति सूत्रात् अष्टकाशब्दः परं तत्र ? नास्ति । माघ्यावर्षशब्देन व्यवहारात् भाद्रपदकृष्णाष्टमीनाम्ना । अष्टकात्वमिति पदं च तादृशकर्मलाभार्थम् । गौणमुख्याभिप्रायेण पञ्चाष्टका इति व्यवहारः । न त्वेतावता माघ्यावर्षं षष्ठम् इति भ्रमः कार्यः, नापि संकल्पादावष्टकापदप्रयोगः । अथवा पुराणमते पञ्चम्यष्टकैव ।

"प्रौष्ठपद्यष्टका भूयः पितृलोके भविष्यति ।
आयुरारोग्यमैश्वर्यं सर्वकामफलप्रदा ॥"

इति पाद्मे वसुनाम्नः पितुः शापोत्तराऽनुग्रहोक्तेः । हेमन्तशिशिरौ चामान्तमानेन मार्गशीर्षादिमासद्वयात्मकतया मासचतुष्टयरूपौ, चतुर्णामित्यभिधानात् । अष्टकापदं यद्यपि कर्मपरम् 'अष्टका पितृदैवत्ये'इति पाणिनिस्मृतेः । तथापि लक्षणया कालपरमपीति स्वसुचितकालानुरोधेन कर्मण आदृत्तावप्यैक्यम् आग्नेयवत् । तच्चाश्वलायनानां होमश्राद्धोभयरूपं कात्यायनादीनां तु होममात्रम् ।

*यत्तु विष्णुः—

'अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टकाः' इति,

यच्च कौर्मे—

'अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिषु।' इति,

तच्चतु*र्थ्या अनावश्यकत्वार्थम्।

*'या चाप्यन्या चतुर्थी स्यात्तां च कुर्यात्प्रयत्नतः।'

इति वायुब्रह्माण्डपुराणात्।

'श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते।'

इति विष्णूक्तेरिति शूलपाणिः। *शाखाभेदाद्व्यवस्थेति तत्त्वम्। वायुब्रह्माण्डयोः—

*'आद्याऽपूपैः सदा कार्या मांसैरन्या सदा भवेत्
शाकैः कार्या तृतीया स्यादेष द्रव्यगतो विधिः॥'

'एकस्यां वा' इति पक्षेऽपि माघ्यावर्षमावश्यकं पृथक्कदुक्तेः। *यत्त्विति। चतुरष्टकत्वविरोध इत्यभिमानः। *चतुर्थ्या इति। अतः पौर्णमास्यन्तमानेन पौषमाघफाल्गुनेषु मासेषु तिस्रोऽष्टकाः कार्याः 'आग्रहायण्या ऊर्ध्वं तिस्रोऽष्टकाः' इति विष्णुधर्मात्। चतुर्थ्याश्चैव्यास्त्वनावश्यकत्वमित्यर्थः। एतत्पक्षे प्रौष्ठपदी आवश्यकीत्याह-*या चाप्यन्येति। न च चतुर्थी चैत्र्येवेति वाच्यम्। तिस्र इत्यनेन तद्व्यावृत्तेः। अन्याचतुर्थीति अन्यपदाच्च प्रौष्ठपद्यष्टकाय एव प्राप्तेः। *शाखाभेदादिति। एवं चाश्वालायनाभिन्नानां केषांचित्फाल्गुनाष्टम्यां सर्वासु सप्तमीषु श्राद्धाकरणेऽपि न दोषः

"स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं तु यः।
कर्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम्॥"

इत्युक्तेः। *आद्येति। अष्टकापक्षे द्रव्यविधिः। ननु—

"कृष्णपक्षे वरिष्ठादि पूर्वा चैन्द्री विभाव्यते।
प्राजापत्या द्वितीया स्यात्तृतीया वैश्वदेविकी॥"

*पौषादिक्रमः । अन्वष्टका तु प्रागेव निर्णीता । तत्राष्टम्यपराह्णव्यापिनी ग्राह्या।

'अथाच्छादनपर्यन्तं श्राद्धं पार्वणवद्भवेत् ।'

इत्याश्वलायनकारिकोक्तेरपराह्णकालत्वाच्च पार्वणस्य ।पूर्वेद्युरन्वष्टकाश्राद्धयोस्तु अष्टम्यनुरोधेन निर्णयः । अत एव सूत्रम्—'पूर्वेद्युः पितृभ्यो दद्यात अपरेद्युरन्वष्टक्यम्' इति च । अत्र कामकालौ विश्वेदेवौ 'इष्टिश्राद्धं क्रतूदक्षावष्टम्यां कामकालौ' इति सायणीये शङ्खोक्तेः । अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तमृग्विधाने—

'एभिर्ऋग्भिर्जपेन्मन्त्रं शतवारं तु तद्दिने ।

इतिश्लोकानन्तरं 'आद्यापूपैः' इति श्लोकः । तदनन्तरं च 'या चाप्यन्या'इत्यर्द्धम् । एवं ब्राह्मे—

"पैत्र्यान्तु प्रथमायान्तु शाकैः सन्तर्पयेत्पितॄन् ।
प्राजापत्यां द्वितीयायां मांसैः शुद्धैश्च तर्पयेत् ॥
(शुद्धैः अदिग्धायुधहतैः । दिग्धः विषाद्यक्तः ।)
वैश्वदेव्यां तृतीयायां मयूखैश्च यथाक्रमम् ।
वर्षासु मेध्यशाकैश्च चतुर्थ्यामेव सर्वदा ॥"

अत्रोभयत्रापि मासो नोपात्त इत्यत्राह—*पौषेति ।

'पौषे कृष्णाष्टकायान्तु शाकैः सन्तर्पयेत्पितॄन् ।'

इति ब्राह्म एव शाकाष्टकात्वेन पौषमासीयत्वोक्तेः ।

'शाकं तु फाल्गुनाष्ट्यां स्वयं पत्न्यपि वा पचेत् ।
वास्तुशाकादि होमश्च कार्यः पूषाष्टकातिथौ ॥'

इति छन्दोगपरिशिष्टे । वायुपुराणे—शाकाष्टकात्वेनोक्तायास्तृतीयाया एव फाल्गुनमासीयत्वेनोक्तेश्च ।

"अमावास्याष्टकास्तिस्रः पौषमासादिषु त्रिषु ।
तिस्रश्चान्वष्टकाः पुण्या माघी पञ्चदशी तथा ॥"

*आन्वष्टक्यं यदा न्यूनं संपूर्णं याति सर्वथा ॥' इति

अशक्तौ त्वाश्वलायनः—'अथ खलीभूतेष्टकाः पशुना स्थालीपाकेन चाप्यनड्वाहो *यवसमाहरेदग्निना वा *कक्षं शु*पोषेदेषा मेऽष्टकेति नत्वेवानष्टकः स्यात्' इति । मार्गशीर्षादिषु मलमासे सति तत्राष्टका न कार्या । चतुर्णामिति ग्रहणादित्युक्तं नारायणवृत्तौ । तथा काठकगृह्येऽपि

'महालयाष्टकाश्राद्धोपाकर्माद्यापि कर्म यत् ।
स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ॥' इति ।

मार्गादिविचारेषु काम्यं व्रतमुक्तं हेमाद्रौ । तत्र नक्षत्राण्युक्तानि संग्रहे (सौरधर्मे)(१)—

'पत्रत्रित्वं तुलस्यास्त्रिपलमथ घृतं
मार्गशीर्षादिभक्ष्यं

इति कौर्माच्च । एतेन मोक्तपुराणेषु छन्दोगपरिशिष्टे च 'षादित्रयममान्तमानेन' इति मार्गशीर्षाष्टका हेया । अथवा—

'आग्रहायण्यामतीतायां कृष्णास्तिस्रोऽष्टकास्तथा ।'

इति विष्णुधर्मात्फाल्गुनाऽष्टकात्यागपक्षः । स च 'पौषमासाभ्रिषु' इति मार्गशीर्षाष्टकात्यागपक्षेण विकल्पते इति परास्तः उक्तसकलवचनानां कृष्णादिमासपरत्वेनैकपक्षप्रतिपादकत्वसंभवे नानापक्षपरत्वे मूलश्रुतिनानाकल्पनागौरवात् । शाकादिद्रव्यव्यवस्थाच प्राधान्याभिप्रायात्तीर्थश्राद्धे घृतवत् । 'मुन्यन्नं ब्राह्मणस्योप' इत्यादिवत् च । शाकादीनां केवलानां भोज्यत्वाप्रसिद्धेः शाकादिद्रव्यभेद इन्द्रादिदेवतानां भेदश्चाश्वलायनान्यविषयः । आश्वलायनानान्तु पञ्चस्वपि द्रव्यदेवतयोरभेद एव । *आन्वष्टक्यमिति । अष्टकोपलक्षणम् । *यवसम्—आर्द्रतृणम् । *कक्षं शुष्कतृणम् । *उपोषेत् दहेत् । इति मार्गशीर्षः ।

(१) धनुश्चिन्हान्तर्गतं क पुस्तके नास्ति ।

मुष्टीनां त्रिंस्तिलानां त्रिपलदधि तथा
दुग्धकं गोमयं च ।
त्रित्वं तोयाञ्जलीनां त्रिमरिचकणथो
त्रिःपलाः सक्तवः स्युः
गोमूत्रं शर्करा सद्घृतिरिति विधिना
भानुवारे क्रमेण ॥' इति ॥

इति श्रीकमलाकरभट्टकृते निर्णयसिन्धौ द्वितीयपरिच्छेदे मार्गशीर्षमासः समाप्तः ॥

धनुःसंक्रमे पराः षोडश घटिकाः पुण्याः । अन्यत्प्राग्वत् । अत्रोत्सर्जननिर्णयो वक्तव्योऽप्युपाकर्मप्रसङ्गात्प्रागेवोक्तः । कल्पतरौ भविष्ये—

'पौषे मासे यदा देवि शुक्लाष्टम्यां बुधो भवेत् ।
तस्यां स्नानं जपो होमस्तर्पणं विप्रभोजनम् ॥
मत्प्रीतये कृतं देवि शतसाहस्रिकं भवेत् ॥'

अत्रैव रोहिण्यार्द्रयोगे पुण्यतमत्वं तत्रैव ज्ञेयम् । पौषशुक्लैकादशी मन्वादिः । सा चोक्ता प्राक् । पौषपौर्णिमानन्तराः सप्तम्यष्टमीनवम्योऽष्टकाद्याः प्रागुक्ताः ।

पौषामावास्यायामर्धोदयो योगविशेषः । तदुक्तं मदनरत्ने महाभारते—

'अमार्कपातश्रवणैर्युक्ता चेत्पौषमाघयोः ।
अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः ॥'

इति पौषमाघयोर्मध्यवर्तिनी *पौषीपौर्णमास्युत्तरामावास्येत्यर्थ इति भट्टाः । मदनरत्ने पौषस्य च माघस्य चेत्यर्थ उक्तः । तन्न । हेमाद्रिविरोधात् । तत्र हि माघ एवोक्तः । तथा—

---

*पौषी पौर्णमास्युत्तरेति । 'माघामायां व्यतीपाते' इत्य-

'दिवैव योगः शस्तोऽयं न तु रात्रौ कदाचन ।' इति

इदमर्धमन्यनिबन्धेष्वभावाद्विपरीतमूलमाद्योक्तेर्निर्मूलमेव । तेन*हेमाद्र्यादिमते रात्रावर्धोदयो भवत्येव । कश्चित्—'किंचिदूनो महोदयः' इत्याह तत्र*क्षिप्तम् । हेमाद्रौ भदनरत्ने च स्कान्दे—

'माघमासं व्यतीपाते आदित्ये विष्णुदैवते ।
अर्धोदयं तदित्याहुः सहस्रार्कग्रहैः समम् ॥'

तत्रैव—

'माघमासे कृष्णपक्षे पञ्चदश्यां रवेर्दिने ।
वैष्णवेन तु ऋक्षेण व्यतीपाते सुदुर्लभे ॥'

व्रतं कुर्यादित्यग्रेऽन्वयः । तत्रैव—

'अर्घविष्णुमहेशानां सौवर्णीः पलमात्रया ।
प्रतिमास्तु प्रकर्तव्यास्तदर्धेन द्विजोत्तम ॥
(१)*साग्रं शतत्रयं शम्भोर्द्रोणानां तिलपर्वतः ।

ग्रिमवाक्यात् । अत एव हेमाद्र्यादिविरोधादित्यपि । *हेमाद्र्यादिमते इति । वस्तुतस्तु—

"दिवैव योगः शस्तोयमुपःकालेऽपि वा यदि ।
न तु रात्रौ स विज्ञेयो नरैर्द्धर्मपरायणैः ॥"

इति नागरखण्डाद्रात्रौ योगो निर्मूल एवेति नव्याः । *तत्र मूलमिति ।

"पातस्यान्ते पूर्वभागे त्वमायाः श्रोणामध्ये भास्करस्योदये
भानोर्वारे श्रद्धेमित्याहुरार्याश्चन्द्रोवारे तन्महत्पूर्वमाहुः ॥"

इति धर्मप्रवृत्तिवाक्यविरोधात् । अत्र पूर्णिमान्तमानेन माघा ग्राह्या । 'माघे भानौ पुण्य अर्द्धोदयः स्यात्' इति तृतीयपादपाठे तु पूर्णिमान्ताः । *साग्रं शतत्रयमिति । अत्र द्रोणानामिति

---

(१)'साधम्' इति ग पुस्तके ।

कर्तव्यौ पर्वतौ विष्णुरुद्रयोः पूर्वसंख्यया ॥'

शम्भुरत्र ब्रह्मा ।

'शय्यात्रयं ततः कुर्यादुपस्करसमन्वितम् ।'

तिलैर्होमं कृत्वा प्रतिमां दद्यादित्युक्तं स्कान्दे—

'अर्धोदये तु सम्प्राप्ते सर्वं गङ्गासमं जलम् ।

*शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसम्मिताः ॥

यत्किञ्चिद्दीयते दानं तद्दानं मेरुसन्निभम् ।' इति ।

अत्र दानविशेषो निर्णयामृते स्कान्दे—

'चतुःषष्टिपलं मुख्यममत्रं तत्र कारयेत् ।

चत्वारिंशत्पलं वाथ पञ्चविंशतिरेव वा ॥'

अमत्रं पात्रम् । तच्च *कांस्यमयमित्युक्तं तत्रैव ।

णो भविष्ये—

"पलद्वयं तु प्रसृतं द्विगुणं कुडवं मतम् ।

चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः ॥

आढकैश्च चतुर्भिश्च द्रोणस्तु कथितो बुधैः ॥

कुम्भो द्रोणद्वयं शूर्पः खारी द्रोणैस्तु षोडश ॥"

कुम्भः शूर्पश्चेत्यर्थः । पक्षान्तरे—

"पलं च कुडवं प्रस्थ आढको द्रोण एव च ।

धान्यमाने तु विज्ञेयाः क्रमशो ऽमी चतुर्गुणाः ॥

द्रोणैः षोडशभिः खारी विंशत्या कुम्भ उच्यते ।

कुम्भैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्तिता ॥"

कुम्भैर्विंशत्येत्यन्वयः । द्रोणाढकयोः परिमाणान्तरमाह पराशरः—

'प्रस्थद्वाविंशतिर्द्रोणः स्मृतो द्विक्प्रस्थ आढकः ।' इति ।

एतेषां च पक्षाणां माक्ष्यादिना व्यवस्था । ब्राह्म इति पाठः ।

*शुद्धात्मान इति । पात्रापात्रपरीक्षानियमः । *कांस्य-

'एवं सुघटितं कार्यं कांस्यभाजनमुत्तमम् ।' इति ।

तथा—

'निधाय पायसं तत्र पद्ममष्टदलं लिखेत् ।
पद्मस्य कर्णिकायां तु कर्षमात्रं सुवर्णकम् ॥
तदभावे तदर्धं वा तदर्धं वापि कारयेत् ।
भूमौ तु तण्डुलैः शुद्धैः कृत्वाष्टदलमुत्तमम् ॥
अमत्रं स्थापयेत्तत्र ब्रह्मविष्णुशिवात्मकम् ।
तेषां पूजा ततः कार्या श्वेतमाल्यैस्तु शोभनैः ।
वस्त्रादिभिरलंकृत्य ब्राह्मणाय निवेदयेत् ॥'

मन्त्रस्तु—

'सुवर्णपायसामत्र यस्मादेतत्त्रयीमयम् ।
आ(१)पत्तेस्तारकं यस्मात्तद् गृहाण द्विजोत्तम ॥
समुद्रमेखलां पृथ्वीं सम्यग्दातुश्च यत्फलम् ।
तत्फलं लभते मर्त्यः कृत्वेदं दानमुत्तमम् ॥' इति ।

इति श्रीकमलाकरभट्टकृते निर्णयसिन्धौ द्वितीयपरिच्छेदे पौषमासः ।

अथ माघस्नानम् । तत्र विष्णुः-

'तुलामकरमेषेषु प्रातः स्नायी सदा भवेत् ।
हविष्यं ब्रह्मचर्यं च माघस्नाने महाफलम् ॥'

इति सौरमास उक्तः । ब्राह्मे तु सावन उक्तः-

*'एकादश्यां शुक्लपक्षे पौषमासे समारभेत् ।
*द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समापनम् ॥'इ

मयमिति । अशक्तस्य, शक्तस्य सुवर्णादिमयमपीति ।

इति पौषमासः ।

स्नानारम्भकालमाह—*एकादश्यामिति । *द्वादश्यादि

(१)'आवयोस्ता' इति कपुस्तके ।

पाद्मेऽपि—

'पौषस्यैकादशीं शुक्लामारभ्य स्थण्डिलेशयः ।
मासमात्रं निराहारस्त्रिकालं स्नानमाचरेत् ॥
त्रिकालमर्चयेद्विष्णुं त्यक्तभोगो जितेन्द्रियः ।
माघस्यैकादशीं शुक्लां यावद्विद्याधरोत्तम ॥' इति ।

त्रिकालस्नानं मासोपवासविषयम् । निराहार इत्युक्तेः । पृथ्वीचन्द्रोदये त्वन्यथोक्तम् । विष्णुः—

*'दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत् ।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे ॥' इति ।

अत्र दर्शमिति शुक्लादिमुख्यचान्द्राभिप्रायेण । अयं तु पक्षो नेदानीं प्रचरति । अत्राधिकारिणो भविष्ये—

'ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः ।
बालवृद्धयुवानश्च नरनारीनपुंसकाः ॥
स्नात्वा माघे शुभे तीर्थे प्राप्नुवन्तीप्सितं फलम् ॥'

पाद्मे—

'सर्वेधिकारिणो(१)ह्यत्र विष्णुभक्तौ यथा नृप ।'

आग्नेये—

'उष्णोदकेन वा स्नानमशक्ये सति कुर्वते ।
दृढेषु सर्वगात्रेषु उष्णोदं न विशिष्यते ॥'

वैष्णवामृते गौडनिबन्धे च स्कान्दे—

'पौष्यां तु समतीतायां यावद्भवति पूर्णिमा ।
माघमासस्य तावद्धि पूजा विष्णोर्विधीयते ॥
पितॄणां देवतानां च मूलकं नैव दापयेत् ।
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणं व्रतम् ॥
अन्यथा याति नरकं क्षत्रविद् शूद्र एव च ।

(१)'ब्रह्मन्' इति कपुस्तके ।

वर्जनीयं प्रयत्नेन मूलकं मदिरोपमम् ॥'

यदा तु माघो मलमासो भवति तदा काम्यानां त समाप्तिनिषेधान्मासद्वये स्नानं तन्नियमाश्च कार्याः । क सोपवासचान्द्रायणादि तु मलमास एव समापयेत् । दुक्तं दीपिकायाम्—'नियतत्रिंशदिनत्वाच्छुभे मास्या भ्य समापयेत मलिने *मासोपवासव्रतम्' इति । मास पवासपदं चान्द्रायणादेरुपलक्षणम् । स्नानारम्भे मन्त्रो विष्णुनोक्तः—

'तत्र चोत्थाय नियमं गृह्णीयाद्विधिपूर्वकम् ।
माघमासमिमं पूर्णं स्नास्येहं देव माधव ॥
तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि॥' इति

प्रत्यहं मन्त्रश्च पाद्मे—

'दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च ।
प्रातःस्नानं करोम्यद्य माघे पापविनाशनम् ॥
मकरस्थे रवौ माघे गोविन्दाच्युत माधव ।
स्नानेनानेन मे देव यथोक्तफलदो भव ॥
इमं मन्त्रं समुच्चार्य स्नायान्मौनसमन्वितः॥' इति

प्रत्यहं सूर्यायार्घ्यम् । मन्त्रस्तु पृथ्वीचन्द्रोदये पाद्मे—

'सवित्र प्रसवित्रे च परं धाम जले मम ।
त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा ॥' इति ।

स्नानकालश्च *सूर्योदयः । त्रिस्थलीसेतौ—

ति । 'माघे' इति शेषः । *दर्शे वेत्यादि पक्षान्तरम् ।

"तुलामकरमेषेषु प्रातः स्नायी सदा भवेत् ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम् ।"

इति च पक्ष उक्तः । *मासोपवासेति । चान्द्रायणादेः पलक्षणम् ।

'संप्राप्ते माघमासे तु तपस्विजनवल्लभे ।
क्रोशन्ति सर्ववारीणि समुद्रञ्छाति भास्करे ॥
पुनीमः सर्वपापानि त्रिविधानि न संशयः ॥'

इति नारदीयोक्तेः ।

'यो माघमास्युषसि सूर्यकराभितप्ते
स्नानं समाचरति चारुनदीप्रवाहे ।
उद्धृत्य सप्तपुरुषान्पितृमातृबंधून्
स्वर्गं प्रयात्यमरदेहधरो नरोऽसौ ॥'

इति भविष्योत्तरवचनाच्च । ब्राह्मे त्व*रुणोदय उक्तः॥

'अरुणोदये तु संप्राप्ते स्नानकाले विचक्षणः ।
माधवाङ्घ्रियुगं ध्यायन्यः स्नाति सुरपूजितः ॥' इति तथा—

'अरुणोदयमारभ्य प्रातःकालावधि प्रभो ।
माघस्नानवतां पुण्यं क्रमात्तत्रावधारणा ॥
*उत्तमं तु सनक्षत्रं मध्यमं लुप्ततारकम् ।
सवितर्युदिते भूप ततो हीनं प्रकीर्तितम् ॥' इति ।

तेनात्र शक्त्यपेक्षया व्यवस्था । इदं च स्नानं प्रयागेऽतिप्रशस्तम् ।

'काश्याः शतगुणं प्रोक्तं गङ्गायमुनसङ्गमे ।
सहस्रगुणिता सापि भवेत्पश्चिमवाहिनी ॥

---

*सूर्योदय इति । अयमशक्तपरः । शक्तस्य त्वाह—*अरुणोदय इति । शक्ताशक्तभेदेन व्यवस्थापकमप्याह—*उत्तमं त्विति ।

"संप्राप्ते माघमासे तु तपस्विजनवल्लभे ।
क्रोशन्ति सर्ववारीणि समुद्रञ्छति भास्करे ॥
पुनीमस्तस्य पापानि त्रिविधानि न संशयः ॥"

पश्चिमाभिमुखी गङ्गा कालिन्द्या सह संग
हन्ति कल्पकृतं पापं सा माघे नृप दुर्लभा
इत्यादि*पाद्मादिवचोभ्यः। विस्तरस्तु मा
कृतप्रयागसेतौ ज्ञेयः। ब्राह्मे—

'यत्र कुत्रापि यो माघे प्रयागस्मरणान्वित
करोति मज्जनं तीर्थे स लभेद्गङ्गमज्जनम्
तथा समुद्रेप्यतिप्रशस्तम्। तदुक्तं पृथ्वीचन्द्र
भासखण्डे—

'माघे मासि च यः स्नायान्नैरन्तर्येण भावत
पौण्डरीकफलं तस्य दिवसे दिवसे भवेत्
माघस्नानं काम्यमेवेति भट्टाः। विष्णव
सदावश्यशब्दान्नित्यत्वावगतेर्नित्यकाम्यमिति
म्। मासपर्यन्तं स्नानासंभवे तु त्र्यहमेकाहं वा
'महामाघीं पुरस्कृत्य सस्नौ तत्र दिनत्रयम
इति लिङ्गात्।

'अस्मिन्योगे त्वशक्तोऽपि स्नायादपि दि
प्रयागे माघमासे तु त्र्यहं स्नातस्य यत्फलम
नाश्वमेधसहस्रेण तत्फलं लभते भुवि॥'

इति पाद्मादिवचनात्। अत्र मकरसंक्रमो
माघीति त्र्यहमित्येके। माघशुक्लदशम्यादीत्यन्
राद्यत्र्यह इत्यपरे। माघमासाद्यत्र्यह इति के
योदश्यादीति बहवः।

'महामाघीं पुरस्कृत्य सस्नौ तत्र दिनत्रयम
इति पाद्मोक्तेः। एतस्यार्थवादत्वाद्यार्किंचि

इति तु नारदीयं स्नानाभिप्रायगर्भम्। *पाद्मादीति
'महामाघीं पुरस्कृत्यत्येद्वहः। तथोक्त्या अनुकल्पतया मा

मिति भट्टाः । तस्मात् तु 'संदिग्धेषु वाक्यशेषात्' इति न्यायात्रयोदश्यादयेवेति । *प्रयागं विनापि पाद्मे—

'अस्मिन्योगे त्वशक्तोपि स्नायादपि दिनत्रयम् ।' इति ।

माघस्नाने नियमास्तु नारदीये—

'न वह्निं सेवयेत्स्नातो ह्यस्नातोऽपि वरानने ।
होमार्थं सेवयेद्वह्निं शीतार्थं न कदाचन ॥
अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः ।
त्रिभागस्तु तिलानां हि चतुर्थः शर्करान्वितः ॥
अनभ्यङ्गी वरारोहे सर्वमासं नयेद् व्रती ॥'

तथा—

'अप्रावृतशरीरस्तु यः कष्टं स्नानमाचरेत् ।
पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥'

तथा—

*'शङ्खचक्रधरं देवं माधवं नाम पूजयेत् ।
वह्निं हुत्वा विधानेन ततस्त्वेकाशनो भवेत् ॥
भूशय्याब्रह्मचर्येण शक्तः स्नानं समाचरेत् ।

---

*प्रयागं विनापीति ।

"तडागेषु तु वा स्नायात्कूपे भाण्डादिके तथा ।
माघमासे वरारोहे शस्तं वै निम्नगाजलम् ॥
(भाण्डाश्रिते त्वयं विशेषः) ।
सरित्तोयं महावेगं नवकुम्भस्थितं तथा ।
वायुना ताडितं रात्रौ गङ्गातोयसमं स्मृतम् ॥"

विष्णुः—

"ततः स्नात्वा शुभे तीर्थे दत्त्वा शिरसि वै मृदम् ।
वेदोक्तविधिना राजन् सूर्यायार्घं निवेदयेत् ॥
पितॄणां तर्पणं कृत्वा ह्यवतीर्य ततो जलात् ॥"

*अशक्तो ब्रह्मचर्यादौ स्वेच्छा सर्वत्र कथ्यते ॥

तथा—

(१)'तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी ।
तिलभुक् *तिलदाता च षट्तिलाः पापनाशनाः
इति ।

तथा प्रयागासंभवे काश्यां दशाश्वमेधोत्तरस्थप्रयागतीर्थे स्नानमुक्तं काशीखण्डे—

'काश्युद्भवे प्रयागे ये तपसि स्नान्ति मानवाः ।
दशाश्वमेधजनितं फलं तेषां भवेद्ध्रुवम् ॥' इति ।

स्नानोत्तरं मदनपारिजाते विष्णुः—

'काष्ठमौनान्नमस्कृत्य पूजयेत्पुरुषोत्तमम् ।
अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतिः ॥'

भविष्ये—

'तैलमामलकाश्चैव तीर्थे देयास्तु नित्यशः ।
ततः प्रज्वालयेद्वह्निं सेवनार्थं द्विजन्मनाम् ॥
एवं स्नानावसाने तु भोज्यं देयमवारितम् ।
भोजयेद् द्विजदाम्पत्यं भूषयेद्वस्त्रभूषणैः ॥
कम्बलाजिनरत्नानि वासांसि विविधानि च ।
चोलकानि च देयानि प्रच्छादनपटास्तथा ॥
उपानहौ तथा शुल्फमोचकौ पापमोचकौ ।
अनेन विधिना दद्यान्माधवः प्रीयतामिति ॥'

पाद्मे—

एतदनन्तरं माधवपूजामाह —*शङ्खेत्यादि । *अशक्तो ब्रह्मचर्यादाविति । 'अशक्तस्य धनाढ्यस्य' इति पठित्वा धनाढ्यस्य बहुदानं कुर्वत इत्यर्थ इति रामचन्द्रः । *तिलदातेति ।

(१) तिलस्नायीत्यनेन तिलयुक्तोदकेन स्नानं विहितम् ।

'भूमौ शयीत होतव्यमाज्यं तिलसमन्वितम्।'

तथा—

'अन्नं चैव यथाशक्त्या देयं माघे नराधिप।
सुवर्णरक्तिकामात्रं दद्याद्वेदविदे तथा॥'

माघान्ते तु विशेषो नारदीये—

'माघावसाने सुभगे पद्मसं भोजनं *स्मृतम्।
सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरञ्जनः।'

दम्पत्योर्वासरौ सूक्ष्मं सप्तधान्यसमन्विते।
त्रिंशत्तु मोदका देयाः शर्करातिलसंयुताः॥ इति।

अत्र—

'एकादश्यादिविधानेन व्रतस्योत्थापनं तथा।'

इति पाद्मवचनात् पूर्वेऽह्नि उपवासपूजनादि कृत्वा 'परेऽह्नि तिलबीजैरष्टोत्तरशतं होमं कृत्वा-सवित्र प्रसवित्रे'-इति पूर्वोक्तं मन्त्रमुक्त्वा—

'दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते।
परिपूर्णं कुरुष्वेह माघस्नानमुपःपते॥'

इति समापयेदिति संक्षेपः।

मकरसंक्रान्तौ हेमाद्रिमते परतश्चत्वारिंशद्घटिकाः पुण्याः।

'त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकाः।'

इति ब्रह्मवैवर्तात्। माधवमते तु विंशतिः।

'त्रिंशत्कर्कटके पूर्वा मकरे विंशतिः पराः।'

"अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः।
त्रिभागस्तु तिलानां हि चतुर्थः शर्कराकृतः॥"

*स्मृतमिति।

'सूर्यो मे प्रीयतां देवो विष्णुमूर्तिर्निरञ्जनः'।

इति वृद्धवसिष्ठोक्तेः । यदा तु सूर्यास्तात्पूर्वं संक्रान्तिर्भवति तदोभयमते पूर्वमेव पुण्यकालः । रात्रौ प्रदोषे निशीथे वा मकरसंक्रमे माधवमते द्वितीयदिने एव पुण्यम् ।

'यद्यस्तमयवेलायां मकरं याति भास्करः ।
प्रदोषे वार्धरात्रे वा स्नानं दानं *परेऽहनि ।'

इति वृद्धगार्ग्यवचनात् । अस्तमयं प्रदोषः । प्रदोषः पूर्वरात्रे ।

'कार्मुकं तु परित्यज्य झषं संक्रमते रविः ।
प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनि ।'

इति भविष्योक्तेश्च । 'तदा भोगः परेऽहनि' इति माद्रौ पाठः । कालादर्शनिर्णयामृतमदनपारिजातादयप्येवमूचुः । दाक्षिणात्यास्त्वेतदेवाद्रियन्ते । यत्तु हेमाद्रिणाऽऽद्यो वाशब्दो यथार्थे द्वितीयस्तथार्थे । यथा प्रदोषे पूर्वेद्युस्तथार्धरात्रे परेऽह्नीत्युक्तं तस्मै नमोऽस्तु । तेन परेऽह्नि पुण्यं वक्तुं प्रदोषे इति । दिनद्वये पुण्यनिरासार्थमर्धरात्रग्रहणम् । हेमाद्रिस्मृत्यर्थसारानन्तभट्टादिमते निशीथात्पूर्वं पश्चाच्च संक्रान्तौ पूर्वदिने परदिने च पुण्यम् ।

'धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा ।
*पूर्वापरविभागेन रात्रौ संक्रमणं यदा ॥
दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः ।
उदयेऽपि तथा पञ्च दैवे पित्र्ये च कर्मणि ॥'

इत्युत्तरार्द्धम् । *परेऽहनीति ।

'आसन्नसंक्रमं पुण्यं दिवार्द्धं स्नानदानयोः ।'

इति बोध्यम् । *पूर्वापरविभागेनेति । पुण्यत्वमभिप्रायः

इति स्कान्दवचनात् । पूर्वापरविभागेनेति *मकरकर्कभिन्नविषयम्, पूर्वोक्तवचोविरोधादिति मदनरत्ने उक्तम्।

'षडशीतिमुखेऽतीते अतीते चोत्तरायणे।'

इत्यादिविरोधाच्च । तेन पूर्वैकवाक्यतयाऽयमर्थः—रात्रौ पूर्वभागे मकरसंक्रमे परेऽह्नि उदये पञ्च नाड्यः पुण्याः, रात्रावपरभागे कर्कसंक्रमे पूर्वदिनान्ते पञ्च नाड्य इति। एवं सर्वेषामविरोधः। मकरे सामान्येन परदिने पुण्यत्वेपि पुण्यातिशयार्थमिदम्। यत्तु देवलयज्ञपार्श्वौ—

'आसन्नसंक्रमं पुण्यं दिनार्धं स्नानदानयोः।
रात्रौ संक्रमणे भानोर्विषुवत्ययने दिवा॥' इति।

अत्र माधवः। अयने दिवा जाते तदर्धं पुण्यम्। कर्के पूर्वं मकरेऽन्त्यम्। एतन्मध्यंदिनायनपरामिति। हेमाद्रिस्तु रात्रौ विषुवत्त्वासन्नादिनार्धं पुण्यम्। अयने त्वासन्नादिनं पुण्यम्। दिने इति पाठे उभयत्र दिनार्धं पुण्यमित्याह। एतदेवोक्तं दीपिकायाम्—'अथायनमधः पञ्चान्निशीथाद्भवेद्यद्यासन्नमहस्तदर्धमथवा पुण्यम्' इति। तत्त्वं तु आसन्नसंक्रममित्यस्य विषुवत्येवान्वयः। अयने रात्रौ सति दिने पुण्यम्। कस्मिन्नित्यपेक्षायां कर्के पूर्वेऽह्नि मकरे परेऽह्नि इति वाक्यान्तरवशादर्धे उच्यमाने न कोपि विरोधः। यत्त्वनन्तभट्टः—

'अथ संक्रमणं भानोर्निशीथात्प्राग्यदा भवेत्।
अयनं विषुवं तत्र प्राग्दिनान्तिमनाडिकाः॥
पञ्च पुण्यतमाः पञ्चान्निशीथाच्चेद्भवेत्तथा।
आद्याः परादिनस्यापि तद्वदित्येष निर्णयः॥' इति।

अपरार्केप्येवम्—

'अस्तं गते यदा सूर्ये ऋषं याति दिवाकरः।

प्रदोषे वार्धरात्रे वा तदा पुण्यं दिनद्वयम् ॥'

इति बौधायनवचनादिनद्वयं वा पुण्यकालः । 'तदा पुण्यं दिनान्तरम्' इति मदनरत्ने पाठः । गुर्जरप्राच्योदीच्यास्त्विदमेवाद्रियन्ते । अत्रापि पूर्ववद्व्याख्येयम् । तिथितत्त्वादयो गौडग्रन्थास्तु प्रदोषार्धरात्राभिन्ने रात्रेः पूर्वभागे पूर्वदिने परभागे च परदिने पुण्यमन्यसंक्रान्तिवत्, विशिष्य (१)तयोर्निर्देशात् । प्रदोषश्च—

'प्रदोषोस्तमयादूर्ध्वं घटिकाद्वयमिष्यते ।'

इति वत्सोक्त इत्याहुः । तन्न । 'अस्तं गते' इति त्रित्वयवैयर्थ्यापत्तेः ।अतः प्रदोषपदेन तद्विन्नैव रात्रिरुच्यते । अत एव–'यावन्नोदयते रविः' इति वृद्धगार्ग्यादिभिर्दक्षिणायने पूर्वरात्रौ संक्रमे पूर्वदिनमुक्तम् । वत्सोक्तिरप्यध्ययनादिपरा । इह तु त्रिमुहूर्त एव प्रदोषः ।

मकरे दानविशेषो हेमाद्रौ स्कान्दे—

'धेनुं तिलमयीं राजन्दद्याद्यश्चोत्तरायणे ।
सर्वान्कामानवाप्नोति विन्दते परमं सुखम्॥'

विष्णुधर्मे—

'उत्तरे त्वयने विप्रा वस्त्रदानं महाफलम् ।
तिलपूर्णमनड्वाहं दत्त्वा रोगैः प्रमुच्यते ॥' इति ।

शिवरहस्येऽपि—

'तस्यां कृष्णतिलैः स्नानं कार्यं चोद्वर्तनं शुभैः ।
तिला देयाश्च विप्रेभ्यः सर्वदैवोत्तरायणे ॥
तिलतैलेन दीपाश्च देयाः शिवगृहे शुभाः ॥'

कल्पतरौ कालिकापुराणे—

'होमं तिलैः प्रकुर्वीत सर्वदैवोत्तरायणे ।

(१) तयोः प्रदोषार्धरात्रयोः ।

*तान्यो*देवाय विप्रेभ्यो हाटकेन समं ददेत् ॥
उत्तरायणमासाद्य नरः कस्मात्स शोचति ॥'

तथा मकरे रात्रावपि श्राद्धादि भवतीत्युक्तं प्राक्।

माघामायां योगविशेषोऽर्धोदयः प्रागेवोक्तः। माघकृष्णचतुर्दश्यां यमतर्पणमुक्तं हेमाद्रौ यमेन—

'अनर्कोभ्युदिते काले माघकृष्णचतुर्दशीम्।
स्नातः संतर्प्य तु यमं सर्वपापैः प्रमुच्यते॥' इति।

*माघशुक्लचतुर्थी तिलचतुर्थी। सा*प्रदोषव्यापिनी।

माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः।
ये त्वां तुण्डेऽर्चयिष्यन्ति तेऽर्च्याः स्युरसुरद्रुहाम् ॥'

इति काशीखण्डात्।

'माघमासे चतुर्थ्यां तु *तस्मिन्काल उपोषितः।
अर्चयित्वा तु यो देवि जागरं तत्र कारयेत् ॥'

इति त्रिस्थलीसेतौ लैङ्गाच्च। इयमेव कुन्दचतुर्थी।

---

*मकरकर्कभिन्नेति। तथा मकरे परेद्युरेव पुण्यं कर्के तु पूर्वेद्युरेव तुलामेषयोश्च पूर्वेद्युः परेद्युश्चेत्यर्थः।

*तान्य इति। तान् तिलान् दद्यात् तिलहोमं कुर्यादित्यर्थः। *देवायेति। देवं विप्रं चोद्दिश्य स्वर्णदानं च कुर्यादित्यर्थः। वैष्णवामृते—

"पौष्यां तु समतीतायां यावद्भवति पूर्णिमा।
माघमासस्य तावद्धि पूजा विष्णोर्विधीयते ॥
पितॄणां देवतानां च मूलकं नैव दापयेत्।
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणव्रतम् ॥
अन्यथा याति नरकं क्षत्रविट्शूद्र एव च।
वर्जनीयं प्रयत्नेन मूलकं मदिरोपमम् ॥" इति।

*प्रदोषेति। नक्तव्रतत्वात्। *तस्मिन्काले प्रदोषकाले।

सा*प्रदोषव्यापिनी ग्राह्या ।

'माघशुक्लचतुर्थ्यां तु कुन्दपुष्पैः सदाशिवम् ।
संपूज्य यो हि नक्ताशी स प्राप्नोति श्रियं नरः ॥'

इति कालादर्शे कौर्मोक्तेः ।

माघशुक्लपञ्चमी*श्रीपञ्चमी । तदुक्तं हेमाद्रौ वाराहे-

'माघशुक्लचतुर्थ्यां तु*वरमाराध्य च श्रियः ।
पञ्चम्यां कुन्दकुसुमैः पूजां कुर्यात्समृद्धये ॥'

इयं माधवमते पूर्वा, हेमाद्रिमते परा । चैत्रशुक्ले श्रीपञ्चमीति दिवोदासः ॥

माघशुक्लसप्तमी रथसप्तमी । सा अरुणोदयव्यापिनी ग्राह्या ।

'सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥'

इति चान्द्रिकायां विष्णुवचनात् ।

अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।

विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तामसीम् ।
शुक्लान्शुक्लतिलान् वध्वा प्राग्नीयाल्लड्डुकान्व्रती ॥
तां यात्रां नात्र यः कुर्यान्नैवेद्यं तिललड्डुकैः ।
उपसर्गसहस्रैस्तु स हन्तव्यो ममाज्ञया ॥"

इत्यादि काशीखण्डे विस्तरः । *प्रदोषव्यापिनीति । नक्ताशीत्युक्तेः । वस्तुतस्तु मध्याह्नव्यापिनीति बहुपुस्तकपाठो युक्तः पूजाव्रतत्वात्, नक्तन्त्वनिर्णायकम् । अङ्गत्वात् । *श्रीपञ्चमीति । तत्र श्रीपूजा कार्या ।

"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यं मङ्गलं कुर्यात्पञ्चम्यां श्रीरपि श्रियम् ॥"

इति भविष्ये ऽभिधानात् । *वरमाराध्येति ।

प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समा ॥'
इति वचनाच्च । यत्तु दिवोदासीये–

*'अचलासप्तमी दुर्गा शिवरात्रिर्*हामरः ।
द्वादशी वत्सपूजायां सुखदा प्राग्युता सदा ॥'
इति षष्ठीयुतत्वमुक्तम् , तद्यदा पूर्वेद्युर्घटिकाद्वयं षष्ठी,

---

श्रियो वरं सलक्ष्मीकं विष्णुम् । व्रतसाध्यमिदं व्रतम् । एवं-माघशुक्लपञ्चम्यां रतिकामपूजादिवसन्तोत्सवः कार्यः ।

"माघमासे सुरश्रेष्ठ शुक्लायां पञ्चमीतिथौ ।
रतिकामौ तु सम्पूज्य कर्तव्यः सुमहोत्सवः ॥
दानानि च प्रदेयानि तेन तुष्यति माधवः ॥"

इति पुराणसमुच्चयात् । मध्याह्नः कर्मकालः पूजाव्रतत्वात् । श्रीकृष्णभक्तैस्तत्र सलक्ष्मीको भगवान् श्रीकृष्णः पूज्यः । 'वर-माराध्य च श्रियः' इत्युक्तेः । तत्र त्रेधाविभागेन पूर्वाह्णो ग्राह्यः ।

"त्रेधाविभक्तदिवसे प्रातःकाले सुरार्चनम् ।
मध्याह्ने तीर्थकार्यं च सायं रक्षाकरी क्रिया ॥"

इति दिनकरोद्योतवचनात् । दिनद्वये तदेकदेशव्याप्तौ सम्पू-र्णद्वौ च परा ।

'शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।'

इति वाक्यात् । युग्मभूतानामिति युग्मवाक्यं तु नेह प्रवर्त-ते तस्योपवासे सावकाशत्वात् । दिनक्षये तु पूर्वा ।

"तिथ्यादौ च भवेद्यावान् ह्रासो वृद्धिः परेऽहनि ।
तावान् ग्राह्यः स पूर्वेद्युरदृष्टोऽपि स्वकर्मणि ॥"

इति वचनात् । तत्र रतिकामपूजा अङ्गम् । महोत्सवादिकं तु श्रीकृष्णप्रीतये एव । 'तेन तुष्यति माधवः' इत्युपसंहारादिति ।

*अचलासप्तमी रथसप्तमी । अचलाव्रतस्य तत्र सत्त्वात् ।

सप्तमी च परेद्युः क्षयवशादरुणोदयात्पूर्वं समाप्यते तत्परं ज्ञेयम् । तत्र षष्ठ्यां*सप्तमीक्षयं प्रवेऽध्यारुणोदये स्नानं कार्यम् । मदनरत्ने भविष्योत्तरे-

'माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदः ॥'

अत्र विधिर्भविष्ये-

(१)'स्नात्वा षष्ट्यामेकभक्तं सप्तम्यां निश्चलं जलम् ।
रात्र्यन्ते चालयेथास्त्वं* दत्त्वा शिरसि दीपकम् ॥'

तथा जलं प्रक्रम्य-

'न केन चाल्यते यावत्तावत्स्नानं समाचरेत् ।
सौवर्णे राजते पात्रे भक्त्यालाबुमयेऽथ वा ॥
तैलेन वर्तिर्दातव्या महारजनरञ्जिता ।
(महारजनं कुसुम्भम् ।)
समाहितमना भूत्वा दत्त्वा शिरसि दीपकम् ॥
भास्करं हृदये ध्यात्वा इमं मन्त्रमुदीरयेत् ।
'नमस्ते रुद्ररूपाय रसानां पतये नमः ॥
वरुणाय नमस्तेऽस्तु हरिवास नमोऽस्तु ते ।'
जले परिहरेद्दीपं ध्यात्वा संतर्प्य देवताः ॥' इति ।
'चन्दनेन लिखेत्पद्ममष्टपत्रं सकर्णिकम् ।
मध्ये शिवं सपत्नीकं प्रणवेन च संयुतम् ॥'

*पूर्वादिदलेषु रविभानुविवस्वद्भास्करसवित्रर्कसहस्र-

*महाभरः दुर्भरः । *सप्तमी क्षयं प्रवेऽध्येति । 'तिथ्यादौ तु भवेद्यावान्' इत्युक्तेः । दिनद्वये अरुणोदयेऽपि पूर्वैव युग्मवाक्यात् । *त्वमिति । अरुन्धतीं प्रति वसिष्ठवाक्यतया अरुन्धत्यर्थकम् । *पूर्वादिदलेष्विति ।

(१) 'कृत्वा' इत्यादर्शपुस्तके पाठः ।

किरणसर्वात्मकान् संपूज्य गृहं गच्छेदिति । स्नानमन्त्रश्च काशीखण्डे—

'यद्यज्जन्मकृतं पापं मया जन्मसु सप्तसु ।
तन्मे रोगं च शोकं च माकरी हन्तु सप्तमी ॥
एतज्जन्मकृतं पापं यच्च जन्मान्तरार्जितम् ।
मनोवाक्कायजं यच्च ज्ञाताज्ञाते च ये पुनः ॥
इति सप्तविधं पापं स्नानान्मे सप्तसप्तिके ।
सप्तव्याधिसमायुक्तं हर माकरि सप्तमि ॥
एतन्मन्त्रत्रयं जप्त्वा स्नात्वा पादोदके नरः ।
केशवादित्यमालोक्य क्षणान्निष्कल्मषो भवेत् ॥'

दिवोदासीये मदनरत्ने च इक्षुदण्डेन जलं चालयित्वा*सप्तार्कपत्राणि बदरीपत्राणि च शिरसि निधाय पूर्वोक्तैर्मन्त्रैः*स्नात्वा तिलापिष्टमयापूपैर्हेमं सूर्यं संपूज्य विप्राय दद्यात् । *अर्घ्यमन्त्रो मदनरत्ने—

'सप्तसप्तिवह प्रीत सप्तलोकप्रदीपन ।
सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर ॥'

"शाक्रे दले रविः पूज्यो भानुश्चैवानले तथा ।
याम्ये विवस्वान्नैर्ऋत्ये भास्करं पूजयेद्बुधः ॥
पश्चिमे सविता पूज्यः पूज्योऽर्कश्चानिले दले ।
सौम्ये सहस्रकिरणः शैवे सर्वात्मकस्तथा ॥
पूज्याः प्रणवपूर्वास्तु नमस्कारान्तयोजिताः ।
पुष्पैश्च गन्धधूपाद्यैः पृथक्त्वेन युधिष्ठिर ॥
विसर्ज्य वस्त्रसंवीतः स्वस्थानं गम्यतामिति ॥"

इति वचनात् ।

*सप्तार्केति । अत्र प्रमाणं मदनरत्न एव बोध्यम् । इदानीन्तनाश्चरन्ति । *स्नात्वेति । स्नानानन्तरमर्घ्यं दद्यात् ।

तत्रः—

'जननी सर्वलोकानां सप्तमी सप्तसप्तिके ।
सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर ॥'

इति प्रार्थयेत् । सौरागमे—

'अर्कपत्रैः सबदरैर्दूर्वाक्षतसचन्दनैः ।
*अष्टाङ्गविधिना चार्घ्यं दद्यादादित्यतुष्टये ॥'

अत्र दानविशेषो मदनरत्ने भविष्ये—

'ताम्रपात्रे यथाशक्त्या मृन्मये वाथ भक्तिमान् ।
स्थापयेत्तिलपिष्टं च सघृतं सगुडं तथा ॥
काञ्चनं तालकं कृत्वा अशक्तस्तिलपिष्टजम् ।
संछाद्य रक्तवस्त्रेण पुष्पैर्धूपैरथार्चयेत् ॥'

दानमन्त्रस्तु—

'आदित्यस्य प्रसादेन प्रातःस्नानफलेन च ।
दुष्टदौर्भाग्यदुःखघ्नं मया दत्तं तु तालकम् ॥'

तालकं कर्णाभरणमिति तत्रैवोक्तम् । दीपपात्रमिति हेमाद्रौ । तत्रैव भविष्योत्तरे—

एवंविधं रथवरं रथवाजियुक्तं
हैमं च हैमशतदीधितिना समेतम् ।
दद्याच्च माघसितसप्तमिवासरे यः

तत्र मन्त्रमाह—*अर्घ्यमन्त्र इत्यादिना । *अष्टाङ्गविधिनेति ।

"आपः क्षीरं कुशाग्राणि दध्यक्षततिलास्तथा ।
यवाः सिद्धार्थकाश्चेति अर्घ्योऽष्टाङ्गः प्रकीर्तितः ॥"

अर्कपत्रपदमर्कपुष्पोपलक्षणम् । अक्षताः—यवाः । मूलवा—दिरादित्याय नम इति मन्त्रः । केचित्तु ऋग्विधानोक्तप्रकारेण अर्घ्यदानप्रारम्भमपि कुर्वन्ति । ऋग्विधाने—

"उद्यन्नद्येति मन्त्रोऽयं सौरः पापप्रणाशनः ।

सोऽमङ्गलचक्रगतिरेव महीं भुनक्ति ॥'

इयं मन्वादिरपि । इयं च शुक्लपक्षस्थत्वात्पौर्वाह्णिकी ग्राह्या । यदा माघो मलमासो भवति तदा मासद्वये मन्वादिश्राद्धं कुर्यात्

'मन्वादिकं तैथिकं च कुर्यान्मासद्वयेऽपि च ।'

इति स्मृतिचन्द्रिकोक्तेः ॥

माघशुक्लाष्टमी भीष्माष्टमी । तदुक्तं हेमाद्रौ पाद्मे—

'माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणम् ।

आद्धं च ये नराः कुर्युस्ते स्युः संततिभागिनः॥'इति ।

भारतेऽपि—

'शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो जलम् ।

संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥'

इति धवलनिबन्धे स्मृतिः ।

'अष्टम्यां तु सिते पक्षे भीष्माय तु तिलोदकम् ।

मन्त्रो दिवाकराद् इष्टः कण्वेन मुनिना पुरा ॥

पुत्रस्य रोगनाशार्थं ख्यातो लोकहिताय च ।"

इत्यादिः । तत्र पादशो द्वादशमन्त्राः, अर्द्धर्चशः षट्, ऋक्शः त्रय ऋक्शस्त्रय इति चतुर्विंशतिमन्त्राः प्रणवादयः । मित्रः रविः सूर्यः भानुः खगः पूषा हिरण्यगर्भः मरीचिः आदित्यः सविता अर्कः भास्कर एतानि द्वादशनामानि पादान्ते योजयेत्। 'ॐउद्वयन्नधमित्र-महः ॐमित्राय नमः इत्यादि १२, ततः अर्द्धर्चान्ते ॐमित्रर-विभ्यान्नमः इत्यादि षट्, तत ऋगन्ते ॐमित्ररविसूर्यभानुभ्यो नम इत्यादि त्रयः । ततः ऋक्त्रयान्ते ॐमित्ररविसूर्यभानुख-गपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करेभ्यो नम इति त्रय इति चतुर्विंशतिरावर्तनं भवति । एवमघिण्यादि । तदुक्तम्—

"चतुर्विंशत्यर्घदानैरेकमावर्तनं स्मृतम् ।

अन्नं च विधिवद्दद्युः सर्वे वर्णा द्विजातयः ॥'
सर्ववर्णोक्तेर्द्विजातय इति संबोधनम् । तर्पणमन्त्रस्तत्रैव ।

'भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ॥
आभिरद्भिरवाप्नोति पुत्रपौत्रोचितां क्रियाम् ॥
वैयाघ्रपदगोत्राय सांकृत्यप्रवराय च ।
अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे ॥
वसूनामवताराय शन्तनोरात्मजाय च ।
अर्घ्यं ददामि भीष्माय आबालब्रह्मचारिणे ॥' इति ।
एतज्जीवत्पितृकस्यापि भवति ।

आवर्तनं चतुर्विंशत्यर्घिणीति प्रकीर्तिता ॥
चतुर्विंशत्यर्घिणीभिर्लघ्वर्घश्च प्रजायते ।
लघ्वर्घैश्च चतुर्विंशैरर्घश्चैकः प्रजायते ॥
चतुर्विंशतिरर्घैश्च महार्घः सम्प्रकीर्तितः ।
महदर्घैश्चतुर्विंशैरत्यर्घः परिकीर्तितः ॥"

अथवा—

"आवृत्तिरेका प्रेक्षपाश्चतुर्विंशतिरीरिताः ।
तावतीभिरिहैकांशस्तावद्भिस्तैर्लघुर्भवेत् ॥
तावद्भिरेव लघुभिरेकोऽर्घः स्यादसंशयम् ॥
तावद्भिरर्घैरेकोऽत्र महार्घः परिकीर्तितः ॥
षट्सप्ताधिकैः पञ्चशतैरंशः प्रकीर्तितः ।
एकोनाशीतिलक्षैर्द्वैःषष्टिभिश्च सहस्रकैः ॥
महार्घश्च चतुर्विंशत्यधिकैः षट्शतैर्भवेत् ।"

अथवा—

रसर्तुसम्मितक्षेपैरावृत्तिः परिकीर्तिता ।
युगाष्टबाणचन्द्रैस्तैरंशोऽप्यत्र प्रकीर्तितः ॥

'जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः ।'

इति पाद्मोक्तेरिति जीवत्पि(१)तृकनिर्णये पितृचरणैरुक्तम् । एतच्चापसव्येन कार्यमिति दिवोदासीये । अत्र आद्यं काम्यं, तर्पणं च नित्यम् ।

*ब्राह्मणाद्याश्च ये वर्णा ददुर्भीष्माय नो जलम् ।
संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम ॥'

इति मदनरत्ने वचनात् ।

आवृत्तिरेका षट्षष्टिप्रक्षेपैः परिकीर्तिता ।
चतुर्विंशतिसंख्याभिस्ताभिरंशः प्रकीर्तितः ॥
ऋत्विन्दुशून्यचन्द्रवह्निमितैर्लघुस्तै-
र्वेदाष्टवह्निनयनेन्दुलवान्वितैस्तैः ।
अर्घो भवेदपि महान् रसचन्द्रनेत्र-
पातालनाथरसदिःकरिचन्द्रनेत्रैः ॥"इति ।

एवं साष्टाङ्गनमस्कारा अपि कार्याः । साष्टाङ्गलक्षणं च-

"उरसा मनसा दृष्ट्या शिरसा वचसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः ॥" इति ।

अत्र केचित् आगमानुसारेण हाँ हीं हूँ हैं हौं हः इति बीजान्यपि विभागादिना लापयन्ति । तद्विस्तारः पद्धतौ बोद्ध्यः । आवृत्तिः २४ । अंश ५७६ । लघु १३८२४ । अर्घ ३३१७७६ । महार्घ ७९६२६२४ । अथवा आवृत्ति ६६ । अंश १५८४ । लघु ३८०१६ । अर्घ ९१२३८४ । महार्घ । २१८९७२१६ ।

*ब्राह्मणाद्या इति । केचित्तु 'वर्मत्वं क्षत्रिये प्रोक्तम्' इति वचनात्तर्पणादिके वर्मशब्दसत्त्वाद्भीष्मस्य क्षत्रियत्वेन तद्देशक-श्राद्धतर्पणे ब्राह्मणेन न कार्यं ।

"ब्राह्मणो हीनवर्णस्य यः करोत्यौर्ध्वदेहिकम् ।

---

(१) 'अत्र जीवत्पितृकस्य नाधिकारः'इति कौस्तुभे ।

*माघशुक्लद्वादशी भीष्मद्वादशी ।
'त्वया कृतामिदं वीर तव नाम्ना भविष्यति ।
वा भीष्मद्वादशीत्येषा सर्वपापहरा शुभा ॥'

इति हेमाद्रौ पाद्मवचनात् । इयं पूर्वयुता युग्मवाक्यात् । माघी पूर्णिमा परेत्युक्तं प्राक् । तथा हेमाद्रौ ब्राह्मे—

'मघास्थयोश्च जीवेन्द्वोर्महामाघीति कथ्यते ॥'

तत्रैव ज्योतिषे—

स तां गतिमवाप्नोति इहलोके परत्र च ॥"

इति मरीचिवचनात् । एवञ्च ब्राह्मणाद्या इत्यतद्गुणसंविज्ञानबहुव्रीहिणा तत्र क्षत्रियादेरेवाधिकार इत्याहुः । नव्यास्तु मरीचिवाक्यानुरोधेन वर्मशब्दयुक्तमन्त्रं विहाय 'वसूनामवताराय' इत्येकेनैव मन्त्रेण तर्पणं कार्यम् । अत एव ब्राह्मणाद्या इति तद्गुणसंविज्ञानबहुव्रीहिरित्याहुः । तदुभयमप्यसत् । भीष्मस्य वसुत्वेन देवत्वात् मरीचिवाक्यस्य मनुष्यपरत्वाद् हीन[वर्ण]स्येत्यत्र वर्णत्वस्य मनुष्यत्वगर्भत्वात् ।

"अष्टम्यां च सिते पक्षे भीष्माय तु तिलोदकम् ।
अन्नं च विधिवद्दद्युः सर्वे वर्णा द्विजातयः ॥"

इति वाक्यान्तरे सर्वशब्दोपादानात् । द्विजातय इति सम्बोधनम् । तस्मात्सर्वैर्मन्त्रैः सर्वैर्ब्राह्मणादिभिश्च भीष्मतर्पणादिकं कार्यम् । परन्तु ब्राह्मणैः सव्येनेतरैस्तु अपसव्येनेति । ब्राह्मणानामौर्ध्वदेहिकधर्मत्यागोऽपीत्यपि वदन्ति ।

*माघशुक्लद्वादशीति । माघशुक्लैकादशीत्यर्थः । वाक्ये द्वादशीपदस्यैकादश्यर्थत्वात् ।

"एकादश्यां निराहारः समभ्यर्च्य च केशवम् ।
भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत ॥"

इति संकल्पमन्त्रदर्शनात् । इयं परविद्धा ग्राह्या । 'रुद्रेण द्वा-

*'मेषपृष्ठे तथा *सौरिः सिंहे च गुरुचन्द्रमाः।
भास्करः श्रवणर्क्षे च *महामाघीति सा स्मृता॥'

तथा भविष्ये—

'वैशाखी कार्तिकी माघी तिथयोऽतीव पूजिताः।
स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन॥'

तथा—

*'तिलपात्राणि देयानि कञ्चुकाः कम्बलास्तथा॥'इति॥

माघपूर्णिमानन्तराऽष्टमी माघी अष्टका, तन्निर्णयः पूर्वेद्युरन्वष्टकानिर्णयश्च पूर्वमुक्तः। मलमासे चैता न भवन्तीत्येतत्सर्वं मार्गशीर्षप्रकरणेऽभिहितम्। तथा चतसृष्वष्टकास्वशक्तावेषा आवश्यकी। 'हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वा' इत्याश्वलायनोक्तेः। तथा माघाष्टकां प्रक्रम्य—'तामेकाष्टकेत्या-

---

दशी युक्ता' इति वाक्यात् इति नव्याः। *मेषपृष्ठे मेषराशौ। *सौरिः शनिः। *महामाघीति। इयं च प्रयागेऽतिप्रशस्ता।

"महामाघी प्रयागे तु नैमिषे फाल्गुनी तथा।
शालग्रामे महाचैत्री कृताः पुंसां महाफलाः॥"

इति गार्ग्योक्तेः। *तिलपात्राणीति। तिलपात्रदानमन्त्रः—

"देवदेव जगन्नाथ वाञ्छितार्थफलप्रद।
तिलपात्रं प्रदास्यामि तवाग्रे संस्थितेरहम्॥
तिलाः काश्यपसम्भूतास्तिलाः पापहराः स्मृताः।
तिलपात्रप्रदानेन मम पापं व्यपोहतु॥"

तिलदानमन्त्रः—

"तिलाः स्वर्णसमायुक्ता दुरितक्षयकारकाः।
विष्णुप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे॥"

चक्षते' इत्यापस्तम्बवचनाच्चेत्यादि प्रयोगपारिज
म् । इति श्रीकमलाकरभट्टकृते निर्णयसिन्धौ
रिच्छेदे माघमासः समाप्तः ।

कुम्भे षोडश घटिकाः पुण्याः । शेषं प्राग्व
ल्गुनकृष्णाष्टम्यां विशेषः कल्पतरौ—

'फाल्गुनस्य च मासस्य कृष्णाष्टम्यां महीप

इत्युपक्रम्य—

'जाता दाशरथेः पत्नी तस्मिन्नहनि जानकी
उपोषितो रघुपतिः समुद्रस्य तटे तदा ॥
रामपत्नी च संपूज्या सीता जनकनन्दिनी
फाल्गुनकृष्णचतुर्दशी*शिवरात्रिः । सा

गोदानमन्त्रः—

"गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥"

अथ कम्बलमन्त्रः—

"और्णं पदमनुध्येयं स्वर्णबीजं तव प्रभो ।
दत्तं गृहाण देवेश पापं संहर सत्वरम् ॥"

इति माघः ।

*शिवरात्रिरिति । शिवरात्रिशब्दो योगरूढः ।
स्तिथिरिति योगः । तद्विशेषे च रूढिः । 'निर्मन्थ्येनेष्टक
इत्यादौ निर्मन्थ्यशब्दस्य अचिरनिर्मथिताख्याग्निवत्
था योगमात्रेण चिरनिर्मथिताग्नेरपि प्रतीत्यापत्तेः । एते
तयोग्या काचन तिथिरेव शिवरात्रिः योगात् । 'प्रोक्षणीर
इत्यादौ प्रकर्षेणोक्ष्यतेऽनेनेति योगेन सेचनसाधनमात्रवा
परास्तम् । किं च—

चिद्व्यनेषु प्रदोषव्यापिनी ग्राह्येत्युक्तं, केषुचिन्निशीथव्यापिनी । तत्राद्या माधवीये—

'त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु ।
भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत् ॥'

स्मृत्यन्तरेऽपि—

'प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी ।
रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत् ॥'

अत्र प्रदोषो रात्रिः । उत्तरार्धे तस्या हेतुत्वोक्तेः । कामिकेऽपि—

"माघस्य कृष्णपक्षे या तिथिः सैव चतुर्दशी ।
शिवरात्रिस्तु सा ख्याता सर्वपापनिषूदनी ॥"

इति वाक्यं रूढिव्युत्पादकम् । अन्यथा माघादिपदानामुपलक्षणत्वापत्तेः ।

'तस्माच्छिवस्य या रात्रिः समाख्याता शिवप्रिया ।
तस्यां सर्वेषु लिङ्गेषु सदा संक्रमते हरः ॥'

इति तु योगस्येति । अत एव रूढैव शिवरात्रिः । 'रूढिर्योगमपहरति' इति न्यायात् । अत एव 'तिस्र एव साङ्गस्योपसदो द्वादशाहीनस्य' इत्यादौ 'न हीनोऽङ्गप्रधानाभ्याम्' इति योगेनाहीनशब्दात्प्रकृतेरेव लाभात् तत्र विकल्पेन द्वादशोपसदन्वय इत्याशङ्कायामहीनशब्दस्य "अहः खः क्रतौ" इति व्याकरणस्मृत्या व्युत्पादनेन रात्र्यादिक्रतुषु रूढतया द्विरात्रादावेव द्वादशोपसद उत्कृष्यन्ते, प्रोक्षणीशब्दादौ तु गोशब्दादिवद् वृद्धव्यवहारस्याहीनशब्दवत्स्वतन्त्रसूत्रादेश्चाऽसत्त्वान्न रूढिः, किन्तु योगमात्रमिति देश्यान्तरं चापाकृतम् । योगव्युत्पादनवैयर्थ्यापातात् । व्रते तु शिवरात्रिशब्दो लाक्षणिक एव, नवरात्रादिशब्दवत् । अत्र निशीथव्याप्तिरेव निर्णायिका । पूर्वेद्युरेव

'आदित्यास्तमये काले आस्ति चेद्या चतुर्दशी ।
तद्रात्रिः शिवरात्रिः स्यात्सा भवेदुत्तमोत्तमा ॥' इति ।

द्वितीयापि तत्रैव नारदसंहितायाम्—

'अर्धरात्रियुता यत्र माघकृष्णचतुर्दशी ।
शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत् ॥'

स्मृत्यन्तरेऽपि—

'भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा ।
शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथा ॥' इति ।

ईशानसंहितायाम्—

'माघकृष्णचतुर्दश्यामादिदेवो महानिशी ।
शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः ॥
तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः ॥' इति ।
'अर्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी ।
तस्यिथावेव कुर्वीत शिवरात्रिव्रतं व्रती ॥
नार्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी ।
नैव तत्र व्रतं कुर्यादायुरैश्वर्यहानितः ॥'

अर्धरात्रश्च द्वितीययामान्त्यतृतीययामाद्यघटीद्वयरूप इति माधवः । वचनं तूक्तं प्राक् । एवं सति पूर्वेद्युरेवोभयव्याप्तौ पूर्वैव ।

'त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः ।
जातरे शिवरात्रिः स्यान्निशी पूर्णा चतुर्दशी ॥'

इति स्कान्दोक्तेः । दिनभुक्तिरस्तमयः ।

निशीथव्याप्तिः परेद्युरेवोभयेद्युरेवानुभयेद्युरिति चत्वारः पक्षाः । ग्रन्थस्तु निशीथप्रदोषोभयव्याप्तिनिर्णायक इत्याशयेन भाति । परन्तु

'जयन्ती शिवरात्रिश्च कार्ये भद्राजयान्विते ।'

इति स्कान्दाच्च । दिनद्वये(१)निशीथव्याप्तौ हेमाद्रिमते पूर्वा ।

'अर्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् ।
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैः ॥'

इति पाद्मवचनात् । मदनरत्नेऽप्येवम् । गौडा अप्येवमाहुः ।

निर्णयामृते तु सर्वापि शिवरात्रिः प्रदोषव्यापिन्येव । अर्धरात्रवाक्यानि(२)कैमुतिकन्यायेन प्रदोषस्तावकानीत्युक्तम् । तन्न, अर्धरात्रस्य पूर्वं कर्मकालत्वोक्तेः । *परदिने प्रदोषनिशीथोभयव्याप्तिसत्त्वात्परेवैति तु माधवः । इदमेव च युक्तं प्रतीमः । परेद्युः प्राग्युक्तार्धरात्रस्यैकदेशव्याप्तौ पूर्वेद्युः संपूर्णतद्व्याप्तौ च सत्यपि परेद्युः प्रदोषनिशीथोभययोगे पूर्वेद्युः संपूर्णव्याप्तेः पूर्वैव ।

'व्याप्यार्धरात्रं यस्यां तु लभ्यते या चतुर्दशी ।
तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः ॥

पूर्वमतान्न विशेषः । हेमाद्रिमते इत्यरुचिः । सा च 'अर्द्धरात्रात्पुरस्ताच्चेत्' इति वाक्यस्य परेद्युर्निशीथव्याप्त्यभावेऽप्युपपत्तेः । तस्माद्यत्र पूर्वेद्युर्निशीथे परेद्युश्च प्रदोषे तत्र पूर्वेद्युरेव । 'अर्द्धरात्रात्पुरस्ताच्चेत्' इत्युक्तवाक्यात् ।

दिनद्वये निशीथव्याप्तौ त्वाह—*परादिने इति । परेद्युरित्यादिपाठोऽपि समञ्जसः । स्फुटश्च पूर्वेद्युरेव । निशीथव्याप्तौ त्वाह—

---

(१) रात्रेरष्टमो मुहूर्तो निशीथः ।

(२) कैमुतिकन्यायस्तु—यदि अर्धरात्रव्यापिन्या अपि ग्रहणं तदा किमु प्रदोषव्यापिन्याः शङ्का इति ।

तदूर्ध्वाधोन्विता भूता सा कार्या व्रतिभिः स
इति माधवधृतेशानसंहितोक्तेः *पूर्वेद्युर्निशी
परेद्युः प्रदोषस्येत्येकैकव्याप्तौ तु पूर्वैव । जयायो
प्राशस्त्यात् । तच्चोक्तं नागरखण्डे—

'माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी ।
अनङ्गेन समायुक्ता कर्तव्या सा सदा तिथिः ॥' इ

पाद्मे—

'अर्धरात्रात्पुरस्ताच्चेज्जयायोगो यदा भवेत् ।
पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैः ॥' इ

स्कान्देऽपि—

'भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा ।
शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथा ॥' इति
'महतामपि पापानां दृष्टा वै निष्कृतिः परा ।
न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवाम्

इति स्कान्दे दर्शयोगस्य निन्दितत्वाच्च । *
चतुर्दशी पूर्वेद्युर्निशीथादूर्ध्वं प्रवृत्ता परेद्युश्च नि
थादर्वागेव तदा परेद्युरेकव्याप्तिसत्त्वात् परैव ।

'माघासिते भूतदिनं हि राज-
न्नुपैति योगं यदि पञ्चदश्याः ।
जयाप्रयुक्तां न तु जातु कुर्या-
च्छिवस्य रात्रिं प्रियकृच्छिवस्य ॥'

इति वचनात् । एवं दिनद्वये प्रदोषव्याप्त्यभावे
शीथव्याप्तिसत्त्वात्पूर्वैव । *तेन दिनद्वये *निशीथः

---

*पूर्वेद्युरित्यादि । दिनद्वये निशीथव्याप्त्यभावे त्वाह—*यद

सौ*प्रदोषव्याप्त्या निर्णयः । दिनद्वये प्रदोषव्यासौ*निशीथेन निर्णयः । एकैकव्यासौ तु निशीथेन निर्णय इति । इयं च*रविभौमसोमवारेषु शिवयोगे चातिप्रशस्ता । हेमाद्रौ तीर्थखण्डे लैङ्गे—

'फाल्गुनस्य चतुर्दश्यां कृष्णपक्षे समाहिताः ।
कृत्तिवासेश्वरं लिङ्गमर्चयन्ति शिवं शुभे ॥
ते यान्ति परमं स्थानं सदाशिवमनामयम् ॥'

[अथ]शिवरात्रिपारणानिर्णयः । शिवरात्रिपारणे तु विरुद्धवाक्यानि दृश्यन्ते । स्कान्दे—

'कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी ।

तदेतदुपसंहरति–*तनेति । *निशीथव्यासाविति । निशीथास्पर्शे चेति शेषः । *प्रदोषव्याप्त्येति । परेद्युरेवेत्यर्थः । *निशीथेनेति । पूर्वेद्युरेवेत्यर्थः । ईदृशोपसंहारफलं च प्रतिमासशिवरात्रौ एतन्निर्णयसंचारार्थमित्यग्रे स्पष्टीकरिष्यति । नव्यास्तु शिवरात्रिव्रते रात्रिः प्रधानम् ।

"उदये अन्विता ग्राह्याः क्वचिदस्तमयेऽन्विताः ।
व्रतिभिस्तिथयो यस्माद्व्रजयित्वा त्विदं व्रतम् ॥"

इति वचनाद्रात्रियोग एव प्रधानमित्याहुः । *रवीति ।

"माघकृष्णचतुर्दश्यां रविवारो यदा भवेत् ।
भौमो वाऽथ भवेद्देवि कर्तव्यं व्रतमुत्तमम् ॥
शिवयोगस्य योगे तु तद्भवेदुत्तमोत्तमम् ॥"

इति स्कान्दात् । त्रिस्पृश्याऽपि प्रशस्ता ।

"त्रयोदशी कलाप्येका मध्ये चैव चतुर्दशी ।
अन्ते चैव सिनीवाली त्रिस्पृश्यामर्चयेद्धरम् ॥"

इति वचनात् । प्रारम्भे एतदुपयोगः ।

एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ॥
जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च ।
पूर्वविद्धैव कर्तव्या तिथिभान्ते च पारणम् ॥' इति ।

तिथिमध्येऽपि पारणं स्कान्दे उक्तम्—

'उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम् ।
कृतैः सुकृतलक्षैश्च लभ्यते वाथवा न वा ॥
ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
संस्नातानि भवन्तीह भूतायां पारणे कृते ।
तिथीनामेव सर्वासामुपवासव्रतादिषु ॥
तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम् ॥' इति ।

अत्र यामत्रयादर्वाक् चतुर्दशीसमाप्तौ तदन्ते तदूर्ध्वगामिन्यां तु प्रातस्तिथिमध्य एवेति हेमाद्रिमाधवादयो व्यवस्थामाहुः । तन्न ।

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा ॥'

इत्यादिसामान्यवचनैरेव व्यवस्थासिद्धेरुभयविधवाक्यवैयर्थ्यापत्तेः । वयं तु 'तिथ्यन्ते पारणं भवेत्'इति कृष्णाष्टम्यादिविषयमेव, न तु शिवरात्रिविषयम् । तदुपादानं तु पूर्वयुतत्वमात्रकथनार्थम् । कथमन्यथा स्कान्दे एव शून्यहृदयवाक्यवत्तिथिमध्ये पारणाविधानं घटते । तस्मात् 'विना शिवचतुर्दशीम्' इति पर्युदस्तत्वाच्छिव-

---

*तिथिमध्ये एवेति । ननु तिथिमध्ये यदि कदाचित्पारणा न जाता तदा व्रतहानिप्रसङ्ग इति चेच्छृणु ।

"कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी ।
एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेत् ॥"

ाभ्याः सर्वप्रकारेषु तिथिमध्य एव पारणेति ब्रूमः । शि-
ाचारोप्येवमेव । *दीपिकायां तु रात्रावपि तिथ्यन्त
ोक्तम्—'व्रततिथेरन्ते निशीथेपि भाक्षीयात्' इति ।
दिनरत्नकालादर्शयोस्तु—

'सा ह्यस्तमयपर्यन्तं व्यापिनी चेत्परेऽहनि ।
दिवैव पारणं कुर्यात्पारणे नैव दोषभाक् ॥'

इत्युक्तम् । *तन्न । तिथिमध्ये पारणविधानान्निषेधे
फलायोगाच्च तिथ्यन्तानपेक्षणा*दोषाप्रसक्त्या चतुर्थ-
ादासंगतेः । तेनेदं शिवरात्रिभिन्नव्रतपरं ज्ञेयम् ।

इदं च व्रतं(१)संयोगपृथक्त्वन्यायेन नित्यं काम्यं च ।
था च माधवीये स्कान्दे—

इत्यादिवचनैर्गौणकालो विधीयते न तु शिवरात्रिविषयं
ादुपादानं तु पूर्वयुतत्वमात्रकथनार्थमिति । फक्किकाद्वये तु ग्रन्थ-
कृतो निर्भरः । केचित्तु यदिनित्यकृत्यपूर्वकपारणसमाप्ता चतुर्दशी
ास्ति यदि वा पारणदिने श्राद्धादिप्रसक्तिः तदा तिथ्यन्ते
ारणविधिः सार्थकः । अन्यथा 'संकटे विषमे प्राप्ते' इत्यादि वा-
स्याज्जलपारणापत्तेरित्याहुः । *दीपिकायां त्विति । तुना-
ुरुचिः स्पष्टा । मदनरत्नं दूषयति–*तन्नेति । अत्र 'तन्न । तिथि-
मध्ये पारणाविधानान्निषिद्धे फलायोगाच्च । तिथ्यन्तानपेक्षणात्
दोषाप्रसक्तौ चतुर्थपादासङ्गतेः । तेनेदं शिवरात्रिभिन्नव्रतपरं ज्ञेयम्'
इति पाठः, तस्यायमर्थः–तिथिमध्ये इति । 'चतुर्दश्यां तु पारणम्'
'भूतायां पारणे कृते'इति वचनात् । निषिद्धे इति । 'विना शिवच-
तुर्दशीम्'इति पर्युदासस्य निषेधे पर्यवसानात् । दूषणान्तरमाह—
*दोषाप्रसक्ताविति ।

---

(१)—एकस्योभयार्थत्वे संयोगपृथक्त्वन्यायः ।

'परात्परतरं नास्ति शिवरात्रिव्रतात्परम् ।
न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम् ॥
जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः ॥'

इत्यकरणे प्रत्यवायश्रवणात्

'वर्षे वर्षे महादेवि नरो नारी पतिव्रता ।
शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूजयेत् ॥'

इति वीप्साश्रुतेः

'अर्णवो यदि वा शुष्येत्क्षीयते हिमवानपि ।
चलन्त्येते कदाचिद्वै निश्चलं हि शिवव्रतम् ॥'

इति वचनाच्च नित्यता ।

'मम भक्तस्तु यो देवि शिवरात्रिमुपोषकः ।
गणत्वमक्षयं दिव्यमक्षयं शिवशासनम् ॥
सर्वान्भुक्त्वा महाभोगांस्ततो मोक्षमवाप्नुयात् ॥'

इति स्कान्दात् ।

'द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकं तु वा ।'

इति तत्रैवेशानसंहितावचनात् [च] काम्यता । तत्रैव—

'शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम् ।
*आचण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम् ॥'

अत्र जागरोपवासपूजाः समुदिताः व्रतं, न तु प्रत्येकम् । समुदितानां*फलसम्बन्धात् । यत्तु—

---

*आचण्डालेति । शिवरात्रिव्रते चण्डालपर्यन्तमधिकार इति भावः । *फलसम्बन्धादिति ।

"उपवासप्रभावेन बलादपि च जागरात् ।

'अथ वा शिवरात्रिं च पूजाजागरणैर्नयेत् ।'

तथा—

'अखण्डितव्रतो यो हि शिवरात्रिमुपोषयेत् ।
सर्वान्कामानवाप्नोति शिवेन सह मोदते ॥
काश्चित्पुण्यविशेषेण व्रतहीनोऽपि यः पुमान् ।
जागरं कुरुते तत्र स रुद्रसमतां व्रजेत् ॥'

इत्यादि स्कान्दं, तद् अनुकल्पत्वादशक्तपरम् ।

*माघेतरप्रतिमासशिवरात्रिस्तु—शिवरात्रिशब्दस्य माघकृष्णचतुर्दश्यामेव रूढत्वात्,

---

शिवरात्रेस्तथा तस्य लिङ्गस्यापि प्रपूजया ॥
अक्षयान्लभते लोकान् शिवसायुज्यमाप्नुयात् ।"

इति नागरखण्डात्

"स्वयं च लिङ्गमभ्यर्च्य सोपवासः सजागरः ।
अजानन्नपि निष्पापो निषादो गणतां गतः ॥ "

इति परकृतिस्वरूपार्थवादाच्च । अत्र परस्परमङ्गाङ्गीभावे मानाभावेन आग्नेयादिषड्यागवत्समप्राधान्यम् । क्वचित्केवलोपवासादिश्रवणं त्ववयुत्यानुवादः । वैश्वानरविद्युन्न्यायात् । तत्र विद्युल्लोकादिवाय्वाकाशोदकपृथिवीरूपाऽवयवषट्कयुक्तो विराट् वैश्वानरः । तत्र प्रत्येकं प्राचीनादिषड्ऋतुभिर्विद्युदाद्युपासनमभिधाय शेषे 'वैश्वानरमुपासीत'इति समुदायोपासनाम्नानाद्विकल्पो मा प्रसाङ्क्षीदिति विद्युदुपासनादिवाक्यानां अवयुत्यानुवादकत्वाङ्गीकारात् ।

प्रतिमासशिवरात्रिमधिकृत्याऽऽह—*माघेतरेति । नैमित्तकं नित्यभवं, द्वादशमासान् । एतच्च व्रतं चतुर्दशाब्दं कार्यमित्यनुपदम-

'माघमासस्य शेषे या प्रथमा फाल्गुनस्य च ।
कृष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्तिता ॥'

इति हेमाद्रौ वचनाच्च नायं निर्णयस्तत्रेति रात्रौ यामचतुष्टये पूजाविधानाच्चास्मिन्दिने अधिका रात्रिव्याप्तिः-सा ग्राह्या, साम्ये तु पूर्वेति हेमाद्रिरूचिवान् । वस्तुतस्तु प्रतिमासकृष्णचतुर्दश्यामपि—

'सर्वकामप्रदं कृष्णचतुर्दश्यां शिवव्रतम् ।'

इत्युपक्रम्य—

'चतुर्दशाब्दं कर्तव्यं शिवरात्रिव्रतं शुभम् ।'

इति हेमाद्रौ कालोत्तरे शिवरात्रिशब्दप्रयोगात् कौण्डपायिनामयनाग्निहोत्रे नैत्यकाग्निहोत्रधर्मा इव तद्धर्मप्राप्तिः स्यादेव । अतः प्रदोषनिशीथोभयव्याप्त्यैव निर्णय इति वयं प्रतीमः । अस्यारम्भो हेमाद्रौ स्कान्दे—

'आदौ मार्गशिरे मासि दीपोत्सवदिनेऽपि वा ।
गृह्णीयान्माघमासे वा द्वादशैवमुपोषयेत् ॥'

तथा—

'दीपोत्सवे तथा माघे कृष्णा या तु चतुर्दशी ।
द्वादशस्वपि मासेषु प्रकुर्यादिह जागरम् ॥'
"*एवं द्वादशवर्षेषु द्वादशैव तपोधनान् ॥

वरयेदिति शेषः । चतुर्दश वा विप्रान् आचार्यं च वृत्वा—

शे स्पष्टम् । द्वादशवर्षमित्यनुकल्पः । पूजामाह-*एवमिति । एतच्च प्रतिमासशिवरात्रिपूजनमुक्तम् । अथ वर्षशिवरात्रिव्रतप्रयोगः—

'कुम्भोपरि न्यसेद्देवमुमया सहितं शिवम्।
सौवर्णेप्यथ वा रौप्ये वृषभे संस्थितं शुभे॥"

इत्युक्तम्। हैमीं मूर्तिं संपूज्य स्थिरं चरं वा लिङ्गं पञ्चामृतसहस्रशतपञ्चाशत्तदर्धान्यतमकुम्भैः संस्नाप्य संपूज्य जागरं कृत्वा परेद्युस्तिलान्सहस्रं शतं वा हुत्वा विप्रेभ्यो वस्त्राणि द्वादश गाश्च दत्त्वा आचार्याय धेनुं शय्यां च दत्त्वा विप्रान्भोजयेदिति मदनरत्ने उक्तम्।

'विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः॥
तस्मान्मृदापि कर्तव्यं ललाटे वै त्रिपुण्ड्रकम्।'

इति लैङ्गात् त्रिपुण्ड्रं रुद्राक्षमालां च धृत्वा 'सूर्यसोमौ समः कालः सन्ध्ये भूतान्यहः क्षपा।' इति सूर्यादिभ्यो व्रतं निवेद्योदङ्मुखो वारिपूर्णं ताम्रपात्रं गृहीत्वा तिथ्याद्युल्लिख्य शिवप्रीत्यर्थं—

'शिवरात्रिव्रतं ह्येतत्करिष्येऽहं महाफलम्।
निर्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते॥
चतुर्दश्यां निराहारो भूत्वा शम्भो परेऽहनि।
भोक्ष्येऽहं मुक्तिमुक्त्यर्थं शरणं भव चेश्वर॥'

इति जलमुत्सृजेत्। ततो नित्यकृत्यं विधाय रात्रौ प्रथमप्रहरे 'शिवपूजां करिष्ये' इति संकल्प्य, प्रतिष्ठिते लिङ्गे अप्रतिष्ठिते तु तदैव कृतप्राणप्रतिष्ठे, शिवपञ्चाक्षरेण मन्त्रेण वैदिकैर्वा पौराणिकैर्वा मन्त्रैर्नाममन्त्रेण वा प्रणवादिनमोन्तेन आवाहनादिषोडशोपचारैः पूजयेत्। 'ॐह्रौं ईशानाय नमः' इति प्रथमप्रहरे क्षीरेण स्नपनम्।

'शिवरात्रिव्रतं देव पूजाजपपरायणः।
करोमि विधिवत्तत्र गृहाणार्घ्यं महेश्वर॥'

इत्यर्घ्यञ्च कार्यम्। ततस्तन्मन्त्रजपेन तत्कथाश्रवणादिवता वा जागरणं कुर्यात्।

'तज्जप्यजपनध्यानतत्कथाश्रवणादिकम् ।
उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः ॥'

इति वचनात् । एवं द्वितीयप्रहरे 'ॐह्रौं अघोराय नमः' इति दध्ना स्नपनम् ।

'नमः शिवाय शान्ताय सर्वपापहराय च ।
शिवरात्रौ ददाम्यर्घ्यं प्रसीद उमया सह ॥'

इत्यर्घ्यदानं कार्यं, पूर्वोत्तरपूजादि पूर्ववत् । एवं तृतीयप्रहरे 'ॐह्रौं वामदेवाय नमः' इति घृतेन स्नपनम् ।

'दुःखदारिद्र्यशोकेन दग्धोऽहं पार्वतीपते ।
शिवरात्रौ ददाम्यर्घ्यमुमाकान्त गृहाण मे ॥'

इत्यर्घ्यं च दद्यात् । शेषं प्राग्वत् । एवं चतुर्थप्रहरे 'ॐह्रौं सद्योजाताय नमः' इति मधुस्नपनम् ।

'मया कृतान्येनकानि पापानि हर शङ्कर ।
शिवरात्रौ ददाम्यर्घ्यमुमाकान्त गृहाण मे ॥'

इत्यर्घ्यं च दद्यात् शेषं प्राग्वत् । ततः प्रभाते—

'अविघ्नेन व्रतं देव त्वत्प्रसादात्समापितम् ।
क्षमस्व जगतां नाथ त्रैलोक्याधिपते हर ॥
यन्मयाऽद्य कृतं पुण्यं तद् रुद्रस्य निवेदितम् ।
त्वत्प्रसादान्महादेव व्रतमद्य समापितम् ॥
प्रसन्नो भव मे श्रीमन्सद्गतिः प्रतिपाद्यताम् ।
त्वदालोकनमात्रेण पवित्रोऽस्मि न संशयः ॥'

इति व्रतं समर्पयेत् । परदिने यथाशक्ति ब्राह्मणान्भोजयित्वा

'संसारक्लेशदग्धस्य व्रतेनानेन शङ्कर ।
प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ॥'

इति संप्रार्थ्य बन्धुभिः सह पारणं कुर्यादिति ।

*माघामावास्या युगादिः। तदुक्तम्–'माघमासे त्वमावास्या' इति। अन्यत्प्राग्वत्। तथान्योऽपि विशेषो विष्णुपुराणे–

'माघासिते पञ्चदशी कदाचित्
उपैति योगं यदि वारुणेन।
ऋक्षेण, कालः स परः पितॄणां
न ह्यल्पपुण्यैर्नृप लभ्यतेऽसौ॥' इति।

*वारुणं शतभिषक्। इदं च कुम्भादित्ये ज्ञेयमिति हेमाद्रिः। भारते–

'काले धनिष्ठा यदि नाम तस्मिन्
भवेत्तु भूपाल तदा पितृभ्यः।
दत्तं तिलान्नं प्रददाति तृप्तिं
वर्षायुतं तत्कुलजैर्मनुष्यैः॥' इति।

---

*माघेति। अमान्तमानेन।

*वारुणमिति। पूर्वाभाद्रपदोपलक्षणम्।

'तत्रैव चेद्भाद्रपदास्तु पूर्वाः कालस्तदा यत्क्रियते पितृभ्यः।
श्राद्धं परां तृप्तिमवाप्नुवन्ति युगान्सहस्रं पितरश्च तेन॥'

इति तत्रैवोक्तेः। अत्रैव वारुण्यादिपर्व प्राग्ग्रन्थे प्रदर्शितम्। ब्राह्मे–

'फाल्गुनस्यापरे पक्षे कुम्भस्थे दिवसाऽधिपे।
जीवे धनुषि योगे च शोभने रविवासरे॥
पुष्यर्क्षे यदि सम्पूर्णा गोविन्ददद्वादशी मता।'

तिथितत्त्वे—

'फाल्गुने शुक्लपक्षस्य पुष्यर्क्षे द्वादशी यदि।
गोविन्ददद्वादशी नाम महापातकनाशिनी॥

फाल्गुनपौर्णमासी होलिका । सा च सायाह्नव्यापिनी ग्राह्या ।

'सायाह्ने होलिकां कुर्यात्पूर्वाह्णे क्रीडनं गवाम् ।'

इति वचनादिति निर्णयामृते उक्तम् । ज्योतिर्निबन्धे तु—

'प्रतिपद्भूतभद्रासु यार्चिता होलिका*दिवा ।
संवत्सरं च तद्राष्ट्रं पुरं दहति सादभुतम् ॥

गोविन्दद्वादशीं प्राप्य गच्छेच्छ्रीपुरुषोत्तमम् ।
विनायासेन राजेन्द्र मुक्तः सायुज्यमाप्नुयात् ॥'

'कुम्भेर्के देवपूज्ये यदि धनुषि गते शीतगौ कर्कटस्थे
पुष्यर्क्षे फाल्गुने मास्य[पि] शुभफलदे शोभने शुक्लपक्षे
चेत्स्यात्भाग्यातिरेकादिह जलधितले द्वादशी विष्णुतीर्थे
गोविन्दद्वादशीयं कलिकलुषहरा कृष्णसायुज्यदात्री ॥'

पाद्मोत्तरखण्डे तु—

'जीवे चापगते रवौ कलशगे चन्द्रे कुलीरस्थिते
मासे फाल्गुनसंज्ञके सिततरे पक्षे यदा द्वादशी ।
पुष्यर्क्षेण च शोभनेन च तथा युक्ता कथंचिद्भवेत्
क्षेत्रे श्रीपुरुषोत्तमे सुविमले गोविन्दनामा हि सा ॥''

अत्र श्रीगोविन्दं संपूज्योपवासं कुर्यात् ।

''गोविन्दद्वादशीं प्राप्य महत्या पूजयार्चयेत् ।
उपोष्य च जगन्नाथं नमेच्छ्रीपुरुषोत्तमम् ।''

इत्युक्तेः । गङ्गास्नाने च मन्त्रः पाद्मे—

'महापातकसंज्ञानि यानि पापानि सन्ति मे ।
गोविन्दद्वादशीं प्राप्य तानि मे हर जान्हवि ॥' इति ।

प्रदोषव्यापिनी ग्राह्या पौर्णिमा फाल्गुनी सदा ।
तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे ॥'

इति नारदवचनात्प्रदोषव्यापिनीत्युक्तम् । हेमाद्रौ मदनरत्ने च भविष्ये—

'अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे ।
गोमयेनोपलिप्ते च सचतुष्के गृहाङ्गणे ॥'

इत्यादिना तत्रैव तद्विधानाच्च । तेनेयं*पूर्वविद्धा—

'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम् ॥'

इति बृहद्यमब्रह्मवैवर्तोक्तेश्च । दिनद्वये प्रदोषव्यासौ परैव । पूर्वदिने भद्रासत्त्वात्तत्र च होलिकानिषेधात् । तदुक्तं निर्णयामृते मदनरत्ने च पुराणसमुच्चये—

'भद्रायां दीपिता होली राष्ट्रभङ्गं करोति वै ।
नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेत् ॥'

तथा—

'भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा ।
श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी ॥'

तथा—

*'दिनार्धात्परतोपि स्यात्फाल्गुनी पूर्णिमा यदि ।

---

*दिवेति । 'सायान्हे होलिकां कुर्यात्' इत्यत्र सायान्हे अतीते इत्यर्थात्तद्विरोधः । इयमेव निर्णयामृतोपर्यरुचिः । *पूर्वविद्धेति । पूर्वेद्युरेव प्रदोषव्यासौ इति शेषः । दिनद्वये इत्याद्यग्रे उक्तेः । *प्रदोषव्यासौ । साकल्येनैकदेशेन वेत्यादि । अव्यासौ त्वाह—*दिनार्द्धादिति । अत्र—

रात्रौ भद्रावसाने तु होलिका दीप्यते तदा ॥' इति। यदा तु पूर्वदिने*चतुर्दशी प्रदोषव्यापिनी परदिने च स्वल्पत्वात्सायाह्नात्प्रागेव पूर्णिमा समाप्यते, तदा पूर्वदिने संपूर्णरात्रौ भद्रासत्त्वात्तत्र च तन्निषेधात्परेऽहनि प्रतिपद्येव कुर्यात्।

*'सार्धयामत्रयं वा स्याद्द्वितीयदिवसे यदा।
प्रतिपद्वर्धमाना तु तदा सा होलिका स्मृता ॥'

इति भविष्यवचनादिति निर्णयामृतकारः। मदनरत्नेप्येवम्। यत्तु—'वह्नौ वह्निं परित्यजेत्' इति भविष्यम्। वह्नौ होलिकायां वह्निं प्रतिपदं वर्जयेदित्यर्थः। तदुक्ताभिन्नविषयमिति तत्रैवोक्तम्। *अन्ये तु तस्यां भद्रा-

---

"पञ्च पञ्च उषःकालः, सप्त पञ्चारुणोदयः।
अष्ट पञ्च भवेत्प्रातः, शेषः सूर्योदयः स्मृतः ॥"

इति लक्षितः सूर्योदयो वर्ज्य इति सम्प्रदायात्तत्पूर्वं भद्रान्तं प्रतीक्ष्य होलादीपनं कार्यमित्यर्थः। अत्र प्रदोषातिक्रमो भवत्येव। *चतुर्दशीति। भद्राराहितकालालाभे तात्पर्यम्। *सार्धेति। वाकारस्तत आधिक्यार्थः। तथा च यदोत्तरदिने सार्धयामत्रयं ततोऽधिकं वा पूर्णिमा न तु प्रदोषे, परेद्युश्च प्रतिपद्वृद्धिस्तदा पूर्णिमोत्तरं प्रतिपदि प्रदोषे होलिका कार्या न तु पूर्वेद्युर्विष्टिपुच्छे इत्यर्थः। एवं सति योत्तरदिने प्रदोषैकदेशेऽस्ति पूर्वरात्रौ च न भद्रारहिता, तदा सुतरामुत्तरेति। अत्र यदा पूर्वदिने सार्धयामत्रयं ततोऽधिका वा पूर्णा न तु प्रदोषे, परदिने च प्रतिपदो न वृद्धिः किन्तु साम्यं क्षयो वा, तत्र पूर्वेद्युरेव होलिका कार्येत्यर्थसिद्धम्। तत्र पूर्वदिने संपूर्णरात्रौ भद्रासत्त्वात्क कार्येत्यत्राह—*अ-

मुखं त्यक्तवेत्यर्थः ।

'प्रदोषव्यापिनी चेत्स्याद्यदा पूर्वदिने तदा ।
भद्रामुखं वर्जयित्वा होलिकायाः प्रदीपनम् ॥'

इति नारदवचनात्

'निशागमे प्रपूज्येत होलिका सर्वदा बुधैः ।
न दिवा पूजयेत् दुष्टां पूजिता दुःखदा भवेत् ॥'

इति दिवोदासीये वचनात्

'यामत्रयोर्ध्वयुक्ता चेत्प्रतिपत्तु भवेत्तिथिः ।
भद्रामुखं परित्यज्य कार्या होला मनीषिभिः ॥'

इति विद्याविनोदेऽभिधानाच्च भद्रामुखं विहाय पूर्वदिन एव कार्येत्याहुः । (१) भद्रामुखं तु—'नाड्यस्तु पञ्च

न्ये त्विति । *आहुरिति अरुचिः । सा च भद्रामुखमात्रपरित्यागो न प्रामाणिक इति । अत्र पूर्वेद्युर्विष्टिपुच्छे कार्या ।

'पृथिव्यां यानि कार्याणि शुभानि त्वशुभानि तु ।
तानि सर्वाणि सिध्यन्ति विष्टिपुच्छे न संशयः ॥'

इति लल्लवचनात् । विष्टिपुच्छं तु ज्यौतिषे—

'मेषार्कनखनाडीभ्यो भद्रापुच्छं घटीद्वयम् ।
क्रमेण धवले पक्षे व्युत्क्रमेण सितेतरे ॥'

भ २७,इष ५,अर्क १२,नख २० । पूर्वमते स्वरसं सूचयन्नेवा-

---

(१) भद्रामुखपुच्छलक्षणं धर्मसिन्धौ–पूर्णिमायां भद्रायास्तृतीयपादान्ते घटीत्रयं पुच्छं, चतुर्थपादाद्यघटीपञ्चकं मुखम् । तथा च मध्यममानेन षष्टिघटीमितायां पूर्णिमायां पूर्णिमाप्रवृत्युत्तरं सार्धैकोनविंशतिघटिकोत्तरं घटीत्रयं पुच्छं, सार्धद्वाविंशतिघटिकोत्तरं घटीपञ्चकं मुखम् । तिथेश्चतुःषष्टिघटिकामितत्वे पूर्णिमाया एकविंशतिघटिकोत्तरं पुच्छं, चतुर्विंशतिघटिकोत्तरं मुखम् । एवं तिथेर्मानान्तरेऽप्यूह्यम् ।

दनं गलकस्तथैका' इति रत्नमालोक्तं ज्ञेयम् । शिष्टाचारोप्येवमेव ।

अत्र चेन्द्रग्रहणं तदा ततोर्वाङ्निशि भद्रावर्जपौर्णमास्यां होलिकादीपनम् । अथ परेऽह्नि प्रस्तोदयस्तदा पूर्वदिने भद्रावर्जे रात्रौ चतुर्थयामे विष्टिपुच्छे वा होलिका कार्या । ग्रहोत्तरं प्रतिपत्सत्त्वात्तत्पूर्वे च दिवा होलानिषेधादिति दिवोदासचन्द्रप्रकाशौ । *वस्तुतस्तु परदिने प्रदोषे पौर्णमासीसत्त्वे कर्मकालस्पर्शे चतुर्थयामादिगौणकालग्रहणे मानाभावाद्भद्राभावाच्च ग्रहणकाल एव होला कार्या । न च—

'सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत शुतमन्नं विवर्जयेत् ॥'

इति निषेधात् कथं सूतके होलेति वाच्यम् । तस्यो*त्तरार्धशेषत्वात । पूजामन्त्रस्तु—

'अस्मोभिर्भयसंत्रस्तैः कृता त्वं होलि बालिशैः ।
अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा(१)भव॥'इति ।

६-*वस्तुतस्त्विति । *उत्तरार्द्धशेषत्वादिति । स्नानपर्यन्तमशुचित्वम् । स्नानोत्तरं तु नित्यनैमित्तिकयोरधिकार इति भावः॥

---

(१) अत्र धर्मसिन्धौ तु पूर्वं संकल्पादि उक्त्वा शुष्काणां काष्ठानां गोमयपिण्डानां च राशिं कृत्वा वह्निना प्रदीप्य तत्र मन्त्रस्तु—

'अस्मोभिर्भयसंत्रस्तैः कृता त्वं होलिके यतः ।
अतस्त्वां पूजयिष्यामि भूते भूतिप्रदा भव ॥'

इत्युक्तः । तत्र पूर्वार्धे भेददर्शनान्मन्त्रस्य सत्यता संदिग्धा भवति । परं तत्र सत्यासत्यनिर्णये सर्वथा सुधिय एव प्रभवन्ति । अन्योपि पूजोत्तरं विशेषस्तत्रोक्तः । यथा—

(यत्तु(१)वार्तिककारैर्होलिका आचारप्राप्तेत्युक्तम्। तत्र हेमाद्र्याद्युदाहृतभविष्यवचनानि असिद्धानि कृत्वा चिन्ता ज्ञेया। आर्त्यधिकरणवत्।) हुताशनी मलमासे न भवति। इयं मन्वादिरपि। सा तु पौर्वाह्णिकी ग्राह्या। मलमासे सति मन्वादिश्राद्धं मासद्वये कार्यमित्युक्तं प्राक्। कृत्यचिन्तामणौ ब्राह्मे—

'नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम्।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत्॥'

'तमग्निं त्रिः परिक्रम्य गायन्तु च हसन्तु च।
जल्पन्तु स्वेच्छया लोका निःशङ्का यस्य यन्मतम्॥'

ज्योतिर्निबन्धे—

'पञ्चमीप्रमुखास्तासु तिथयोऽनन्तपुण्यदाः।
दश स्युः शोभनास्तासु काष्ठस्तेयं विधीयते॥
चाण्डालसूतिकागेहाच्छिशुहारितवह्निना।
प्राप्तायां पूर्णिमायां तु कुर्यात्तत्काष्ठदीपनम्॥
ग्रामाद्बहिश्च मध्ये वा तूर्यनादसमन्वितः।
स्नात्वा राजा शुचिर्भूत्वा स्वस्तिवाचनतत्परः॥
दत्त्वा दानानि भूरीणि दीपयेद्धोलिकाचितिम्।
ततोऽभ्युक्ष्य चितिं सर्वां साज्येन पयसा बुधाः॥
नारिकेलानि देयानि बीजपूरफलानि च।
गीतवाद्यैस्तथा नृत्यै रात्रिः सा नीयते जनैः॥
तमग्निं त्रिः परिक्रम्य शब्दैर्लिङ्गभगाङ्कितैः।
तेन शब्देन सा पापा राक्षसी तृप्तिमाप्नुयात्॥' इति।

होलिकादिनं, करिसंज्ञकं तदुत्तरदिनं च शुभे वर्ज्यम्।

'होलिकाग्रहणभावुकायनं प्रेतदाहदिवसोऽत्र पञ्चमः।
तत्परं च करिसंज्ञकं दिनं वर्जितं सकलकर्मसूभयम्॥'

इति वचनादित्यपि विशेषस्तत्रैव।

(१) अत्रायं धनुश्चिह्नान्तर्वर्ती भागः प्राचीनपुस्तकेष्वनुपलम्भात्प्रक्षिप्त इति गम्यते।

चैत्रकृष्णप्रतिपदि वसन्तोत्सवः । स्त्रा
प्राह्या ।

'प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ ।'

इति भविष्योक्तेः । दिनद्वये तथात्वे पूर्वा ।

'वत्सरादौ वसन्तादौ बलिराज्ये तथैव च
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ॥'

इति वृद्धवासिष्ठवचनात् । अत्र विशेषो हे
विष्ये—

'चैत्रे मासि महाबाहो पुण्ये तु प्रतिपद्दिने ।
यस्तत्र श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः
न तस्य दुरितं किंचिन्नाधयो व्याधयो नृप ।

तथा—

'प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ ।
कृत्वा चावश्यकार्याणि संतर्प्य पितृदेवताः
वन्दयेद्धोलिकाभूमिं सर्वदुःखोपशान्तये ॥

मन्त्रश्च—

'वन्दितासि सुरेन्द्रेण ब्रह्मणा शंकरेण च ।
अतस्त्वं पाहि नो देवि भूते भूतिप्रदा भव ।

अत्र चूतकुसुमप्राशनमुक्तं तत्रैव पुराणसमुच्च

'वृत्ते तुषारसमये सितपञ्चदश्यां
प्रातर्वसन्तसमये समुपस्थिते च ।

चैत्रकृष्णप्रतिपदि वसन्तोत्सवः । अत्र तैलाभ्यङ्ग
तत्र सचन्दनं चूतपुष्पं प्राश्नीयात् ।

'ये पिबन्ति वसन्ताद्ये चूतपुष्पं सचन्दनम् ।
सुसंहृतस्थस्य कामस्य पूजनं क्रियते नरैः ॥'

इति भविष्यात् ।

संप्राश्य चूतकुसुमं सह चन्दनेन
सत्यं हि पार्थ पुरुषोऽथ समाः सुखी स्यात् ॥'

मन्त्रस्तु—

'चूतमद्य्यं वसन्तस्य माकन्दं कुसमं तव ।
सचन्दनं पिबाम्यद्य सर्वकामार्थसिद्धये ॥' इति ।

चैत्रामावास्या मन्वादिः । सा चापराह्णव्यापिनी ग्राह्या कृष्णपक्षस्थत्वात् ॥ इति फाल्गुनमासः समाप्तः ॥

एवं निरूपितामिदं गहनं तु काल-
तत्त्वं विचार्य वचनैश्च नयैश्च सम्यक् ।
तद्दोषदृष्टिमपहाय विवेचनीयं
विद्वद्भिरित्यविरतं प्रणतोऽस्मि तेषु ॥ १ ॥

मया सद्वाऽसद्वा यदिह गदितं मन्दमतिना
किमेतच्छक्यं वाऽध्यवसितुमपि स्वल्पमतिना ।
तदेवं यत्किञ्चिद्गदितामिह विख्यातमहिमा
प्रतापोऽयं सर्वो विकसति तु पित्रोश्चरणयोः ॥ २ ॥

यो भाट्टतन्त्रगहनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्मभेत्ता ।
योऽत्र श्रमः किल कृतः कमलाकरेण
प्रीतोऽमुनाऽस्तु सुकृती बुधरामकृष्णः ॥ ३ ॥

इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टसुतदिनकरभट्टानुजभट्टकमलाकरकृते निर्णयसिन्धौ संवत्सरकृत्यनिरूपणं नाम द्वितीयः परिच्छेदः समाप्तः ॥

एवं चैत्रकृष्णद्वितीयायां राजकृत्यमन्यतोऽवगन्तव्यम् ।
इति द्वितीयः परिच्छेदः समाप्तः ॥

—:०:—



सटीके

निर्णयसिन्धौ

तृतीयः परिच्छेदः ।

अथ प्रकीर्णकनिर्णयः ।

श्रीरामकृष्णतनयः कमलाकरसंज्ञितः ।
निरूप्य तिथिकृत्यं तु प्रकीर्णं वक्तुमुद्यतः ॥ १ ॥

तत्रादौ संस्कारेषु गर्भाधानम् । तत्र प्रथमरजोदर्शने दुष्टमासग्रहणं, *संक्रमादिफलं, तत्र शान्त्यादि च पितृकृतप्रयोगदीपिकायां भट्टकृतप्रयोगरत्ने [च] ज्ञेयम् । किंचित्तूच्यते । मदनरत्ने नारदः—

'अमारिक्ताऽष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि ।
परिघस्य तु पूर्वार्धे व्यतीपाते च वैधृतौ ॥
संध्यासू*पप्लवे विष्ट्यामशुभं प्रथमार्तवम् ।'
'*रोगी पतिव्रता दुःखी पुत्रिणी भोग(१)भागिनी ॥

*संक्रमादीति । आदिना देवराजः—

"संमार्जनीकाष्ठतृणादिशूर्पान्
हस्ते दधाना कुलटा तदा स्यात् ।
तल्पोपभोगे तपसि स्थिता चेद्
दृष्टं रजो भाग्यवती तदा स्यात् ॥"

स्मृतिरत्ने—

"शुभं चैव तु पूर्वाह्णे, मध्याह्ने मध्यमं फलम् ।
अपराह्णे तु वैधव्यं, पूर्वरात्रे शुभं भवेत् ॥"

इत्यादिग्रहः । *उपप्लवे ग्रहणे । *रोगीत्यादि क्रमेण वार-

(१) 'भोगगामिनी' इति कपुस्तके ।

पतिव्रता क्लेशभागी सूर्यवारादिषु क्रमात् ।'
'वैधव्यं सुतलाभश्च मैत्रं शत्रुविवर्धनम् ॥
मित्रलाभः शत्रुवृद्धिः कुलार्द्धिर्बन्धुनाशनम् ।
मरणं वंशवृद्धिश्च निराहारः कुलक्षयः ॥
तेजश्च सुतनाशश्च कुलहानिस्तिथिक्रमात् ॥'

गर्गः-

'सुभगा चैव दुःशीला वन्ध्या पुत्रसमन्विता ।
धर्मयुक्ता व्रतघ्नी च परसन्तानमोदिनी ॥
सुपुत्रा चैव दुःपुत्रा पितृवेश्मरता सदा ।
दीना प्रजावती चैव पुत्राढ्या चित्रकारिणी ॥
साध्वी पतिप्रिया नित्यं सुपुत्रा कष्टचारिणी ।
स्वकर्मनिरता हिंस्रा पुण्यपुत्रादिसंयुता ॥
नित्यं धनचयासक्ता पुत्रधान्यसमन्विता ।
मूर्खा चाऽज्ञा पुण्यवती दस्रर्क्षादेः क्रमात्फलम् ॥'

नारदः—

'कुलीरवृषचापा*न्त्य*नृयुक्कन्यातुलाघटाः ।
राशयः शुभदा ज्ञेया नारीणां प्रथमार्त्तवे ॥'

गर्गः—

'सुभगा श्वेतवस्त्रा स्याद्, दृढवस्त्रा पतिव्रता ।
क्षौमवस्त्रा क्षितीशा स्यात्, नववस्त्रा सुखान्विता ।
दुर्भगा जीर्णवस्त्रा स्याद्, रोगिणी रक्तचासवा ।
नीलाम्बरधरा नारी पुंश्चली विधवा ततः ॥
वस्त्रे स्युर्विषमा रक्तबिन्दवः पुत्रमाप्नुयात् ।
समाश्चेत्कन्यकाश्चेति फलं स्यात्प्रथमार्त्तवे ॥'

तिथिनक्षत्रराशिवस्त्रफलोक्तिः । *अन्त्यो मीनः । *नृयुक्

अथ स्त्रीसंसर्गवर्जनमाह वसिष्ठः—

'प्रभूतदोषं यदि दृश्यते तत्
पुष्पं तदा शान्तिककर्म कार्यम् ।
विवर्जयेदेव तदैकशय्यां
यावद्रजोदर्शनमुत्तमेऽहि ॥'

ज्योतिर्निबन्धे वसिष्ठः—

'*आद्यतौ पौषशुक्रोर्जमधुशुचिनभस्याश्वयुक्पापवारा रिक्तामा(१)र्काष्टषष्ठ्यः पितृपरसदने रात्रिसंध्यापराह्णे । मिश्रोग्रा मूलनीक्ष्णं विवरमनरुणाल्पाधिकास्रं गराष्टोत्पातः पापस्य लग्नं न सदरुणजरन्नीलरक्ताम्बरं च ॥'

मिथुनम् । *आद्यतौविति । मासादिफलोक्तिः । शुक्रो ज्येष्ठः । ऊर्जः कार्तिकः । मधुश्चैत्रः । शुचिराषाढः । नभस्यो भाद्रपदः । आश्वयुगाश्विनः । पापवाराः रविभौमशनयः । पितृपरसदने इति दोषाधिक्यार्थम् । मिश्रेत्याद्यग्रे स्पष्टम् । विवरं गण्डान्तम् । अनरुणादित्रयद्वन्द्वानन्तरं कर्मधारयः । अस्रं रजः । गराष्टं गरमारभ्याष्टकरणानि । पापस्य लग्नं ज्योतिर्विद्भ्यो ज्ञेयम् । *आद्यतौविति । योगफलोक्तिः ।

"ग्रामाद्बहिः परग्रामे नारी स्याद्व्यभिचारिणी ।
पतिव्रता पतिस्थाने, शुभगा गृहमध्यतः ॥
ग्राममध्ये तु विद्वद्भिश्च, विधवा च दिगम्बरा ।
उपरागे च दुःशीला, आयुष्यं जलसंनिधौ ॥
धनमध्ये तु कन्या या धनधान्यसमृद्धिदा ॥"

वसिष्ठः—

"वैधव्यमष्टमस्थेऽर्के, चन्द्रे क्षीणरुचिर्भवेत् ।
अङ्गारके भर्तृहीना, बुधे चेदनपत्यता ॥

(१) 'रिक्तापवार्ष्ट क०

*'आद्यतौ दुर्भगा नारी विष्कम्भे चेद्रजस्वला ।
वन्ध्या चैवातिगण्डे च, शूले शूलवती भवेत् ॥
गण्डे तु पुंश्चली नारी, व्याघाते चात्मघातिनी ।
वज्रे च स्वैरिणी प्रोक्ता, पाते च पतिघातिनी ॥
परिघे मृतवन्ध्या च, वैधृतौ पतिमारिणी ।
शेषाः शुभावहा योगा यथानामफलप्रदाः ॥'

शान्तिमाह प्रयोगपारिजाते शौनकः—

'सार्तवानां तु नारीणां शान्तिं वक्ष्यामि शौनकः ।
(१) पञ्चमेऽह्नि चतुर्थे वा (२)ग्रहयज्ञपुरःसरम् ॥
(३) (तस्मिन्नहनि कर्तव्य ऋतुहोमो विधानतः ।

दौर्भाग्यमिन्द्रसचिवे, सापत्यं भार्गवे भवेत् ।
प्रव्रज्या सूर्यपुत्रे तु, राहौ तु कलहः सदा ॥
अशुभं चैव केतौ स्याज्जामित्रे शुभदाः शुभाः ॥"

जामित्रे सप्तमस्थाने । नरसिंहः—

"लग्नस्य प्रथमस्थाने सूर्यो वैधव्यकारकः ।
पुत्रहानिकरस्त्वारो, बुधः सत्पुत्रदो भवेत् ॥
बृहस्पतिर्धनायुष्ये, शुक्रः साफल्यमेव च ।
शनैश्चरे तु वन्ध्या स्याद् राहौ तु मरणं ध्रुवम् ॥
चन्द्रे सद्गुणसंयुक्ते देवरातमताच्छुभम् ॥"

अन्यदपि शुभाशुभं प्रयोगरत्नोक्तं बोध्यम् ।

---

(१) प्रथमदिननिर्णयस्तु पारिजाते चतुर्विंशतिमते—'पूर्वाशयोस्तु रात्रौ चेज्जननं मरणं रजः । दृष्टं पूर्वदिनादित्वं, तृतीये तूत्तरेऽहनि ॥ केचिद्विवोदिते सूर्ये जननं मरणं तथा । रजो वा दृश्यते स्त्रीणां यस्याहस्तस्य शर्वरी ॥ अपरे त्वर्धरात्रात्प्राङ्मृतौ रजसि सूतके । पूर्वमेव दिनं प्राहुरूर्ध्वं चेदुत्तरेऽहनि ॥' इति । अत्र देशाचारतो व्यवस्था ॥

(२) 'ग्रहातिथ्यपुरःसरम्' इति कपुस्तके ।

(३) धनुश्चिन्हान्तर्गतो ग्रन्थः कखपुस्तकयोर्नास्ति ।

आचार्यं वरयेत्प्राज्ञो भुवनेश्वरितुष्टये ॥
होमार्थं च जपार्थं च वरयेद्दात्विजो बहून् ।
यजमानो द्विजैः सार्धं शान्तिहोमं समाचरेत् ॥
गृहादीशानदिग्भागे देवतापूजनाय च ।)
द्रोणप्रमाणधान्येन व्रीहिराशित्रयं भवेत् ॥
कुम्भत्रयं न्यसेद्राशौ तन्तुवस्त्रादिवेष्टितम् ।
(१) (पूरयेत्तीर्थसलिलैः प्रतिकुम्भं पृथक्पृथक् ॥)
सूक्तेनाथ नवर्चेन प्रसुव आप इत्यथ ।
ऋचा याः प्रवतस्तद्वद्गायत्र्या च ततः क्रमात् ॥
मध्यकुम्भे क्षिपेद्धान्यमौषधानि च हेम च ।
(२) (ततश्च पञ्चरत्नानि गन्धपुष्पाक्षतादिकान् ॥
औषधानि च वक्ष्यन्ते मुनिभिः शान्तिकारणात् ।)
उदुम्बरः कुशो दूर्वा राजीववटबिल्वकाः ॥
विष्णुक्रान्ताऽथ तुलसी बर्हिषं शङ्खपुष्पिका ।
शतावर्यश्वगन्धा च निर्गुण्डी सर्षपद्वयम् ॥
अपामार्गः पलाशश्च पनसो जीवकस्तथा ।
प्रियङ्गवश्च गोधूमा व्रीहयोऽश्वत्थ एव च ॥
क्षीरं दधि च सर्पिश्च पद्मपत्रं तथोत्पलम् ।
कुरण्टकत्रयं गुञ्जा वचाभद्रकमुस्तकाः ॥
द्वात्रिंशदौषधानीह यथासंभवमाहरेत् ।
मृत्तिकाश्चौषधादीनि तन्मन्त्रेण क्षिपेत्क्रमात् ॥
कुम्भोपरि न्यसेत्पात्रं कांस्यं मृद्वेणुताम्रजम् ।
भुवनेश्वरीं न्यसेत्तत्र इन्द्राणीं च पुरन्दरम् ॥
जपेद्गायत्रिमाहोमाच्छ्रीसूक्तं च जपेत्ततः ।

---

(१) अयं कंसान्तर्गतो ग्रन्थः खपुस्तके नास्ति ।
(२) धनुश्चिन्हान्तर्गतो ग्रन्थः कखयोर्नास्ति ।

स्पृशन्वै दक्षिणं कुम्भं ऋत्विगेको जपेदथ ॥
चत्वारि रुद्रसूक्तानि चतुर्मन्त्रोत्तराणि च ।
संस्पृशन्नुत्तरं कुम्भं श्रीरुद्रं रुद्रसंख्यया ॥
शन्न इन्द्राग्निसूक्तं च तत्रैव संस्पृशञ्जपेत् ।
कुम्भस्य पश्चिमे देशे शान्तिहोमं समाचरेत् ॥
दूर्वाभिस्तिलगोधूमैः पायसेन घृतेन च ।
तिसृभिश्चैव दूर्वाभिरेकैका चाहुतिर्भवेत् ॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
गायत्र्यैव तु होतव्यं हविरत्र चतुष्टयम् ॥
ततः स्विष्टकृतं हुत्वा समुद्रादूर्मिसूक्ततः ।
संततामाज्यधारां तां पूर्णाहुतिमथाचरेत् ॥
अथाऽभिषेकं कुर्वीत प्रतिकुम्भस्थितोदकैः ।
आपोहिष्ठेति नवभिः सूक्तेन च ततः परम् ॥
इन्द्रो अङ्ग तृचेनैव पावमानैः क्रमेण तु ।
उभयं शृणवच्चनः स्वस्तिदाविश एकया ॥
त्र्यम्बकेन मन्त्रेण जातवेदस एकया ।
समुद्रज्येष्ठा इत्यादि त्रायन्तां च त्रिभिः क्रमात् ॥
इमा आपस्तृचेनैव देवस्यत्वेति मन्त्रतः ।
मन्त्रेणाथ तमीशानं त्वमग्ने रुद्र इत्यथ ॥
तमुष्टुहीति मन्त्रेण भुवनस्य पितरं तथा ।
यातं रुद्रेति मन्त्रेण शिवसंकल्पमन्ततः ॥
इन्द्र त्वा वृषभं पञ्चमन्त्रैश्चैवाभिषेचयेत् ।
धेनुं पयस्विनीं दद्यादाचार्याय च भूषणैः ॥
सदक्षिणमनड्वाहं प्रदद्याद्रुद्रजापिने ।
महाशान्तिं प्रजप्याथ ब्राह्मणान्भोजयेत्ततः ॥' इति।

शौनकोक्तशान्तिमूलपाठोऽन्यतोऽपि बोध्यः । इदं तु बोध्य-

नारदः—

*'तत्र शान्तिं प्रकुर्वीत घृतदूर्वातिलाक्षतैः ।
प्रत्येकाष्टशतं चैव गायत्र्या जुहुयात्ततः ॥
स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये ॥'

*प्रकारान्तरं मदनरत्ने ज्ञेयम् । विस्तरभयान्नोच्यते । ग्रहणे रजोदर्शने तु जातकर्मप्रस्तावे शान्तिं वक्ष्यामः ।

म्–अनेककर्तृके होमे त्यागस्य भिन्नकालत्वेन तत्कालज्ञानासंभवात् प्रत्याहुति त्यागो न संभवतीति होमोपक्रमकाल एव यष्टव्या देवताः यजनीयद्रव्यं च हृदि कृत्वा इदं यथादैवतमस्तु न ममेति त्यजेदिति संप्रदायः । "होमे त्यागोऽङ्गं जुहोतिरासेचनाधिकः स्यात्" इति जैमिनिसूत्रात् ।स च सर्वत्रापि होमे एकद्व्याद्याहुतिरूपे शतसहस्रादिके च आदौ सकृत्त्यन्त्रेणैव न प्रत्याहुति । अत एव सर्वतोमुखे विहारचतुष्के अनेककर्तृकप्रयाजेषु अग्नये अग्निभ्यो वा एतानि त्यजामि इत्येव कपर्दिप्रभृतिभिस्त्याग उक्तः । स्वकर्तृकहोमे तु

'मन्त्रेण देवतां स्मृत्वा द्रव्येऽवतानवर्तके (?) ।
निर्दिश्य क्षेपकाले वा तत्पूर्वं वा समाचरेत् ॥

क्षेपकाले प्रेक्षपकाले ।

त्यागं न तु तदूर्ध्वं तमित्याहुर्याज्ञिकं मतम् ।'

त्यागश्च'इन्द्रायेदं न मम'इति शब्द इति केचित् । 'इदमिन्द्राय न मम'इति कात्यायनः।नन्विदमयुक्तम्-इदमिति द्रव्यस्य न ममेति त्यागस्य च मध्ये बहिरङ्गदेवताव्यवधानायोगादिति चेत्।न,कात्यायननिर्देशेन व्यवधानस्यादोषत्वात् । वस्तुतस्तु उभयविधोऽपि त्यागो न युक्तः क्रियाया अभावात्। तस्माद्'इन्द्रायेदं त्यजामि'इति'इदमिन्द्राय त्यजामि'इति वा त्यागः कार्य इति । शौनकोक्तशान्तिर्बह्वृचानामेव। कुतश्चिद्धेतोस्तदसंभवे त्वाह–*तत्र शान्तिमिति ।*प्रकारान्तरं ऋषिपुत्रसंहितोक्ता बौधायनोक्ता च शान्तिः । एते च कौस्तुभे

अथ प्रथमतौ विशेषः स्मृतिचन्द्रिकायाम्—

'*प्रथमतौ तु पुष्पिण्याः पतिपुत्रवती स्त्रियः ।
अक्षतैरासनं कृत्वा तस्मिंस्तामुपवेशयेत् ॥
हरिद्रागन्धपुष्पादि दद्युस्ताम्बूलकं स्रजम् ।
दीपैर्नीराजनं कुर्यात्सदीपे वासयेद् गृहे ॥
लवणापूपमुद्गादि दद्यात्ताभ्यः स्वशक्तितः॥' इति ।

द्वितीयादृतुषु तन्नियममाह पारिजाते दक्षः-

'अञ्जनाभ्यञ्जने स्नानं प्रवासं दन्तधावनम् ।
न कुर्यात्सार्तवा नारी ग्रहाणामीक्षणं तथा ॥'

अत्रिरपि-

'वर्जयेन्मधु मांसं च पात्रे खर्वे च भोजनम् ।
गन्धमाल्ये दिवास्वापं ताम्बूलं चास्यशोधनम् ॥
दग्धे शरावे भुञ्जीत पेयं चाञ्जलिना पिबेत् ॥'

मदनरत्ने हारीतः—"रजःप्रावधः शयीत भूमौ, कार्ष्णायसे पाणौ मृन्मये वाऽश्नीयात्" इति । विष्णुधर्मे—

'आहारं गोरसानां च पुष्पालंकारधारणम् ।

स्पष्टे । कालनिर्णयप्रकाशे च ऋषिपुत्रसंहितोक्ता शान्तिर्लिखिता । वसिष्ठः-

प्रभूतदोषं यदि दृश्यते तत् पुष्पं तदा शान्तिककर्म कार्यम् ।
विवर्जयेदेव तदैकशय्यां यावद्रजोदर्शनमुत्तमेऽह्नि ॥

एकशय्यां मैथुनम् ।

'भर्त्ता तत्रापि गमनं वर्जयेत्तददर्शनात् ।'

इति शौनकोक्तेः । दर्शनं शास्त्रम् । अत्रैकस्मिन्नशुभे यथोक्ता शान्तिः कार्या । द्वित्राद्यशुभसन्निपाते तु आहुतिसंख्याद्वैगुण्यादि बोध्यम् ।

*प्रथमर्त्तावितिः। यदि प्रथमरजोदर्शनं दुष्टमासादौ तदाऽय-

अञ्जनं *कङ्कतं गन्धान्पीठशय्याधिरोहणम् ॥
आग्निसंस्पर्शनं चैव वर्जयेत्सा दिनत्रयम् ॥' इति ।
तथा प्रथमर्तौः पूर्वं स्त्रीगमनं न कार्यम् ।
'प्राग्रजोदर्शनात्पत्नीं नेयाद्गत्वा पतत्यधः ।
व्यर्थीकारेण शुक्रस्य ब्रह्महत्यामवाप्नुयात् ॥'
इति तत्रैवाश्वलायनोक्तेः । (१) (एतत्तु दशवर्षात्प्राग्ज्ञेयम् । प्रथमर्तौ गमने गौतमेन विशेषो दर्शितः—
'गौरीमपि च रत्यर्थं गच्छेत्पुरुष आकुलः ।
अन्यथा वीर्यपातो हि सहस्रकुलपातकः ॥'
अन्यथापि तदिच्छया भवतीति विज्ञानेश्वरः ।) तत्र ऋतौ गमनमाह याज्ञवल्क्यः—

माचारो द्वितीयरजोदर्शने कार्य इति केचित् । *कङ्कतमिति तालपत्रादेरुपलक्षणम् ।
'नखानां कृन्तनं रज्जुतालपत्रादिबन्धनम् ।'
इति वर्ज्यानुवृत्तौ दक्षोक्तेः । वसिष्ठः—"त्रिरात्रं रजस्वला स्नानात् शुचिर्भवति नाञ्ज्यात् नाभ्यञ्ज्यात् नाप्सु स्नायात् न दिवा स्वप्यात् न रज्जुं सृजेत् न मांसमश्नीयात्" इति । योगी—
"स्त्री धर्मिणी त्रिरात्रं तु स्वमुखं नैव दर्शयेत् ।
स्ववाक्यं श्रावयेन्नापि यावत्स्नानान्न शुध्यति"(२) ॥
स्मृत्यर्थसारे—"ब्राह्मणी रजस्वला चतुर्थेऽहनि षष्टिमृत्तिकाभिः शौचं कृत्वा क्षत्रियादिश्च पादपादन्यूनं मृत्तिकाभिर्विधवा द्विगुणाभिः शौचं कृत्वा मलं प्रक्षाल्य सचैलं सगव स्नायात्" इति । अतः सूर्योदयात्प्राक् स्नानं दुराचार एव । *निशा इति दिवस-

---

(१) धनुश्चिह्नान्तर्गतो ग्रन्थः कपुस्तके नास्ति ।
(२) सुस्नाता भर्तृवदनमीक्षेन्नान्यस्य कस्यचित् । अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥' इति श्लोकोऽस्य शेषः ।

'षोडशर्तुर्निशाः*स्त्रीणां तस्मिन्*युग्मासु*संविशेत् ।'
इति । अनृतावप्याह गौतमः-*'ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जम्' इति । मनुः—

निषेधार्थम् । "नार्तवेऽपि दिवा व्रजेत्" इति शङ्खोक्तेः । अत्र सचैलस्नानोत्तरं प्राणायामः प्रायश्चित्तम् ।

"प्राणायामी जले स्नात्वा खरयानोष्ट्रयानगः ।
नग्नः स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियम् ॥"

इति योगीश्वरोक्तेः ।

"दिवा तु मैथुनं कृत्वा नग्नः स्नात्वा तथाम्भसि ।
नग्नां परास्त्रियं दृष्ट्वा दिनमेकमभोजनम् ॥"

इति शङ्खोक्तं वा कार्यम् । *युग्मास्विति पुत्रार्थम् । बहुत्वचनफलमग्रे । *संविशेदिति । तत्प्रकारो हिरण्यकेशिसूत्रे-"चतुर्थ्यां प्रयतवस्त्रालंकारां कृतब्राह्मणसंभाषामाचम्योपह्वयते" इति । प्रशस्तब्राह्मणेन कृतसंभाषाम् । *ऋताविति । भार्यामिति वर्त्तते । भार्यामेव ऋतावुपेयादित्यर्थः । पारदार्ये प्रायश्चित्तोपदेशात् (१)('ऋतुस्नातां तु यो भार्याम्' इत्यग्निपराशरवचनात्) एवं ऋतौ भार्यामुपेयादेवेत्यर्थः ।

"ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति ।
तुल्यमाहुस्तयोः पापमयोनौ यश्च सिञ्चति ॥"

इतिवचनाच्च । एवं भार्यामृतावेवोपयात् ऋतुभिन्ने नोपेयादिति नार्थः "सर्वत्र वा प्रतिषिद्ध" इति गौतमाविरोधाद् ऐच्छिकविकल्पायोगाच्च । किं त्वकामां भार्यामृतावेवोपेयात् । अनृतौ स्त्रीकामनाविरहे नोपेयादित्यर्थः । एवं च सकामां भार्यामुपेयादिति विध्यन्तरं सिध्यति ।

'यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन् ।'

---

(१) धनुश्चिह्नान्तर्गतो ग्रन्थो घपुस्तके एव वर्तते ।

'ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ।
तासामाद्याश्चतस्रस्तु निन्दितैकादशी तथा ॥
त्रयोदशी च शेषाः स्युः प्रशस्ता दश रात्रयः ॥'

मदनरत्ने देवलः—

'तस्मात्त्रिरात्रं*चाण्डालीं पुष्पितां परिवर्जयेत् ।' इति ।

तत्र तिथ्यादीनाह श्रीधरः—

'षष्ठ्यष्टमीं पञ्चदशीं चतुर्थीं
चतुर्दशीमप्युभयत्र हित्वा ।
शेषाः शुभाः स्युस्तिथयो निषेके
वाराः शशाङ्कार्यसितेन्दुजानाम् ॥'

उभयत्र पक्षद्वये । आर्यो गुरुः, सितः शुक्रः, इन्दुजो बुधः ।

'विष्णुप्रजेशरविमित्रसमीरपौष्ण-
मूलोत्तरावरुणभानि निषेककार्ये ।
पूज्यानि पुष्पवसुशीतकराश्विवाचित्रा-
दित्याश्च मध्यमफला, विफलाः स्युरन्ये ॥'

विष्ण्वादिदैवत्यनक्षत्राण्युक्तानि रत्नमालायाम्—

'भेशा दस्रयमाग्निधातृशशिनः शर्वो दितिर्वाक्पतिः
कद्रूजाः पितरो भगोऽर्यमरवी त्वष्ट्राह्वयो मारुतः ।
शक्राग्नी त्वथ मित्र इन्द्रनिर्ऋती तोयं च विश्वे विधि-
र्गोविन्दो वसवोऽम्बुपाजचरणाहिर्बुध्न्यपूषाभिधाः॥'

इति वाशब्दयुक्तयोगीश्वरोक्तेः । तथा चानृतावपि स्त्रीकामनायां स्त्रियं रमयेदेवेत्यर्थः । *चाण्डालीमिति । माधवीये स्मृत्यन्तरे च

"प्रथमेऽहनि चाण्डाली, द्वितीये ब्रह्मघातिनी ।
तृतीये रजकी प्रोक्ता, चतुर्थेऽहनि शुध्यति ॥" इति ।

यद्यप्यत्र माधवाचार्यैश्चाण्डाल्यादिगमने यावान् प्रत्यवायः

उत्तराशब्देनोत्तराश्रयम् । अत्र मूलस्य पूज्यत्वमुक्तम् । याज्ञवल्क्येन तु—

'एवं गच्छन् स्त्रियं *क्षामां मघां मूलं च वर्जयेत् ।'

इत्युक्तम् । तेन *पूर्वत्र मूलं चिन्त्यम् । अत्र *समासु पुत्राः, विषमासु कन्याः इति ज्ञेयम् ।

तावानुदक्यागमने इत्युक्तं तथापि अग्रे कुण्डपायिनामयने "मासमग्निहोत्रं जुहोति" इति वाक्यस्याग्निहोत्रनामनिर्देशेन नित्याग्निहोत्रधर्मातिदेशस्तद्वदिति युक्त्याभिधानेन चाण्डालादेर्धान्यवस्त्रपात्रादिस्पर्शे दर्शनसंभाषणादौ पङ्क्तिभोजनादौ च यावान् दोषस्तावानुदक्याया अपि लभ्यते । श्राद्धादावुदक्यानिमन्त्रणे च सहनिमन्त्रितब्राह्मणानां चाण्डालादिपङ्क्तिभोजनप्रत्यवायः, यजमानस्य तु तन्निमन्त्रणप्रत्यवायोऽपीति तत्र सर्वत्र प्रायश्चित्तं महानिबन्धोक्तं विस्तरभयान्नोच्यते ।

(१)(अथ रजस्वलायाश्चतुर्थदिनकृत्यम् । योगी—

"सुस्नाता भर्तृवदनमीक्षेन्नान्यस्य कस्यचित् ।
अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥"

*क्षामामिति । क्षामता च रजस्वलाव्रतादिना स्निग्धभोजनादिना वा कार्या ।

'लघ्वाहारां स्त्रियं कुर्यादेवं संजनयेत्सुतम् ।'

इति बृहस्पत्युक्तेः ।) *पूर्वत्रेति । ज्यौतिषस्यार्थशास्त्रत्वादोषानवधानेनापि ग्रहणसंभवात्, न तु विकल्पः । शास्त्रयोरसाम्यात् । किञ्च मूलत्यागे शुभपुत्राप्तिरूपोऽभ्युदयः तदत्यागे तु पुत्राप्तिमात्रमिति ह्यर्थः, स च निषेधे पर्यवस्यति ।

* समास्विति । यदा युग्मासु रात्रिषु शोणिताधिक्यं तदा स्त्र्येव पुरुषाकृतिः, अयुग्मास्वपि शुक्राधिक्ये पुमानेव स्त्र्याकृ-

(१) धनुश्चिह्नान्तर्गतो ग्रन्थो घपुस्तके नास्ति ।

'युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु।'
इति हेमाद्रौ शङ्खोक्तेः। तत्राप्युत्तरोत्तराः प्रशस्ताः। तदाहापस्तम्बः—'तत्राप्युत्तरोत्तराः प्रशस्ताः' इति। तत्रैव व्यासः—

'रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जितः।
पञ्चम्यां पुत्रिणी नारी, षष्ठ्यां पुत्रस्तु मध्यमः॥
सप्तम्यामप्रजा योषिदष्टम्यामीश्वरः पुमान्।
नवम्यां सुभगा नारी, दशम्यां प्रवरः सुतः॥
एकादश्यामधर्मा स्त्री, द्वादश्यां पुरुषोत्तमः।
अयोदश्यां सुता पापा वर्णसंकरकारिणी॥
धर्मज्ञश्च कृतज्ञश्च आत्मवेदी दृढव्रतः।
प्रजायते चतुर्दश्यां, पञ्चदश्यां पतिव्रता॥
आश्रयः सर्वभूतानां षोडश्यां जायते पुमान्॥' इति।

अत्र चतुर्थदिननिषेधेऽपि—

'*स्नातां चतुर्थदिवसे रात्रौ गच्छेद्विचक्षणः।'

तिः, कालस्य निमित्तत्वात् शुक्रशोणितयोरुपादानत्वात्।

'पुमान् पुंसोऽधिके शुक्रे, स्त्री भवत्यधिके स्त्रियाः।'
इत्युक्तेः। एतदर्थं च क्षामताऽपि कर्त्तव्यतयोक्ता। *स्नातामिति। यद्यपि—

"शुद्धा भर्त्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला॥
दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति॥"

इति मरीचिना चतुर्थेऽहनि दैवकर्माहता नेति ध्वनितं, तथापि पञ्चमेऽहनीत्यस्य साध्वाचारेत्यग्रिमवाक्येन रजोनिवृत्तिकालार्थकतया

'रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला।'
इति मनुवचने साध्वी गर्भाधानादिदैवकर्मयोग्येति व्या-

इति महाभारतोक्तेः 'चतुर्थेऽहनि स्नातायां युग्मासु वा गर्भं संदधाति' इति हारीतोक्तेर्विकल्पो ज्ञेयः ।

तत्रापि—

'स्नानं रजस्वलायास्तु चतुर्थेऽहनि शस्यते ।
गम्या*निवृत्ते रजसि नानिवृत्ते कथंचन ॥'

इत्यापस्तम्बोक्तेर्व्यवस्था ज्ञेया ।

अत्र सर्वासु युग्मासु गमनमावश्यकम् । युग्मास्विति बहुवचननिर्देशादिति विज्ञानेश्वरः । तच्चैकस्यां रात्रौ सकृदेव कार्यम् ।

*'सुस्थे इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् ।'

इति याज्ञवल्क्योक्तेः।इदं चतौ गमनमन्यकाले प्रतिबन्धादिना गमनासंभवे श्राद्धैकादश्यादावपि कार्यम् ।'ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत्'(अ०१श्लो०७९)इति याज्ञ-

---

ख्यानात् न दोषः । एवं च तत्र चतुर्थेऽह्नि गर्भाधानवत्तदङ्गभूतशान्तिरपि तत्रैवानायत्या कार्या । एवं श्रौतकर्मण्यपि रजस्वलायाश्चतुर्थेऽह्नि अधिकारः । "अथ यदा त्रिरात्रिणी स्यादथैनामुपह्वयेत" इत्यापस्तम्बसूत्रात् 'चतुर्थेऽह्नि गोमूत्रमिश्राभिरद्भिः स्नाता वासोयोक्त्रजालानि मन्त्रैर्धारयेत्'इति सोमे आपस्तम्बोक्त्या तद्वत्सर्वत्रापि श्रौतकर्माणि अविशेषणाधिकारसिद्धेः । एवमुपनयनादौ श्रीसूक्तहोमादिना चतुर्थेऽह्नि अधिकारं वक्ष्यति । अत एव गर्भाधानादीत्यादिपदेन साध्वीपदव्याख्यानं संगच्छते।तथा च'गम्या निवृत्ते रजसि' इत्यस्य प्रथमऋतुपरत्वेऽपि न क्षतिः । *निवृत्ते रजसीति । निःसरणादनुपरते रजसि तु रजस्वला स्नानेन स्पर्शादौ योग्या न तु गर्भाधानोपनयनादिस्मार्ते श्रौते वेत्यर्थः ।

*सुस्थे एकादशस्थानस्थे । सकृदिति नियमविधिः । पर्व

वस्क्योक्तेः। व्याख्यातं चेदं मिताक्षरायाम्–'यत्र आद्धादौ ब्रह्मचर्यं विहितं तत्राप्यृतौ गच्छतो न ब्रह्मचर्यस्खलनदोषः'इति। *पर्वाणीति बहुत्वेनाष्टमीचतुर्दश्योर्ग्रहणमिति च। मदनरत्नेऽप्येवम्। यत्तु हेमाद्रौ शिवरहस्ये—

'दिवा जन्मदिने चैव न कुर्यान्मैथुनं व्रती।
श्राद्धं दत्त्वा च भुक्त्वा च श्रेयोऽर्थी न च पर्वसु॥'

इति, तदृतुविषयम्।

'*ब्रह्मचार्येव भवति (१)यत्र तत्राश्रमे वसन्।'

इति मनूक्तेः। दर्शादौ तु न भवत्येव, पर्वणां पर्युदस्तत्वात्। माधवीये तु

'ऋतुकालं नियुक्तो वा नैव गच्छेत्स्त्रियं क्वचित्।
तत्र गच्छन्समाप्नोति ह्यनिष्टफलमेव तु॥'

इति वृद्धमनूक्तेः*श्राद्धे ब्रह्मचर्यं नियतमित्युक्तम्। पृ-

अमावास्या, तस्यैकत्वात्पर्वाणीति कथं बहुत्वमित्यत्राह—*पर्वाणीति।

"अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम्।
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः॥"

इति मानवात्

"चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा।
पर्वाण्येतानि राजेन्द्र रविसंक्रमणं तथा॥"

इति विष्णुपुराणाच्च। *ब्रह्मचार्येवेति। एतच्च ब्रह्मचारित्वं विवृतं श्रुतौ "प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्रात्रौ संयुज्यन्ते" इति। *श्राद्धे इति। तथा

१—'यत्र तत्राश्रमे वसन्निति वानप्रस्थापेक्षया। तस्य हि भार्यया सह गमनपक्षे ऋतुगमनं प्रसक्तम्। न च वनस्थभार्याया ऋतुर्न भवतीति वाच्यम्। 'वनं पञ्चाशतो व्रजेत्' इति, 'वर्षैरेकगुणां भार्यामुद्वहेत्त्रिगुणः पुमान्'इत्यादिशास्त्रपर्यालोचनया तत्सम्भवादिति मन्वर्थमुक्तावली।

त्वीचन्द्रोदयेऽप्येवम् । *एतत्सति संभवे ज्ञेयम् । अनेक-भार्यस्यर्तुयौगपद्ये हेमाद्रौ कश्यपः—

'यौगपद्ये तु*तीर्थानां विवाहक्रमशो व्रजेत् ।
रक्षणार्थमपुत्रां वा ग्रहणक्रमशोऽपि वा ॥' इति ।

ग्रहणम् ऋतुग्रहणम् । ऋग्विधाने—

'विष्णुर्योनिं जपेत्सूक्तं योनिं स्पृष्ट्वा त्रिभिर्व्रती ।
गर्भाधानं ततः कुर्यात्सुपुत्रो जायते ध्रुवम् ॥'

अगमने दोषमाह पराशरः—

'ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां पच्यते नात्र संशयः ॥'

अस्यापवादमाह मदनरत्ने व्यासः—

'व्याधितो बन्धनस्थो वा प्रवासेष्वथ पर्वसु ।
ऋतुकालेऽपि नारीणां भ्रूणहत्या प्रमुच्यते ॥

च श्राद्धकर्तृभोक्त्रोर्ब्रह्मचर्यमृतावप्यावश्यकमित्यर्थः । ननु एतन्मते विज्ञानेश्वरेण श्राद्धकर्तृभोक्त्रोर्ऋतौ ब्रह्मचर्यमनावश्यकमित्युक्ते-र्विरोध इत्यत्राह—*एतदिति । विज्ञानेश्वरीयं तु अगतिकगति-रिति बोध्यम् । *तीर्थानाम् ऋतूनां, क्षेत्रवाचिनस्तीर्थशब्दस्य क्षेत्रपर्यायत्वेन योनिसमुद्भूतत्वेन च ऋतुरर्थः । तथा च सकृदेवेति नि-यमविधेर्निर्वाहः । स्त्रीणामप्यगमने दोषः ।

"ऋतुस्नाता च या नारी भर्त्तारं नोपगच्छति ।
तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं तु विवासयेत्" ॥

इति हेमाद्रावुक्तेः । अत्र प्रायश्चित्तमाह बौधायनः—

"ऋतौ न गच्छेद्यो भार्यां नियतां धर्मचारिणीम् ।
नियतातिक्रमे तस्य प्राणायामशतं स्मृतम् ॥" इति ।

कृच्छ्रार्द्धमित्यर्थः । प्राणायामशतद्वयस्य कृच्छ्रप्रत्याम्नायत्वात् ।

'ऋतौ न गच्छेद्यो भार्यां सोऽपि कृच्छ्रार्धमाचरेत् ।'

वृद्धां वन्ध्यामसद्वृत्तां मृतापत्यामपुष्पिणीम् ।
कन्यासूं बहुपुत्रां च वर्जयेन्मुच्यते भयात् ॥'

वृद्धां गतरजस्काम् । गर्भाधानाङ्गहोमाकरणे प्रायश्चित्तमाह-पारिजाते आश्वलायनः—

'गर्भाधानस्याकरणात्तस्यां जातस्तु दुष्यति ।
अकृत्वा गां द्विजे दत्त्वा कुर्यात्पुंसवनं पतिः ॥'

गर्भाधानं मलमासगुरुशुक्रास्तादावपि कार्यम् ।

'उत्सवेषु च सर्वेषु सीमन्ते ऋतुजन्मसु ।
सुरासुरेज्ययोश्चैव मौढ्यदोषो न विद्यते ॥'

इति ज्योतिर्निबन्धे भृगूक्तेः । ऋतुगमने पराशरः-

'ऋतौ तु गर्भशङ्कित्वात्स्नानं मैथुनिनः स्मृतम् ।

इति बृहस्पत्युक्तेश्च । तादृश्याः स्त्रिया अप्येतदेव, दोषसाम्यात् । भर्तुरवमाने तु कृच्छ्रं 'भर्तुर्व्यतिक्रमे कृच्छ्रम्' इत्यापस्तम्बोक्तेः । अवधिश्च मनुनोक्तः-

'ऋतुकालाभिगामी स्यादावत् पुत्रोऽभिजायते ।' इति ।

यत्तु एकपुत्रोत्पादनेन शास्त्रार्थस्य कृतत्वादानृण्याच्च पुत्रान्तरोत्पादनं न कार्यमिति, तत्तुच्छम् । एकपुत्रोत्पत्त्यनन्तरम् 'ऋतुस्नाताम्' इति वचनप्रवृत्तेर्निष्प्रत्यूहत्वात् ।

"चक्षुरेकं च पुत्रश्च अस्ति नास्ति च भारत! ।
चक्षुर्नाशे तनोर्नाशः पुत्रनाशे कुलक्षयः ॥"

इति भारतात् 'एतद्व्या बहवः पुत्राः' इत्यर्थवादाच्च । परमावधिमाहात्रिः—

"षण्मासान् कामयेन्मर्त्यो गर्भिणीं स्त्रियमेव हि ।
आदन्तजननादूर्ध्वमयं धर्मो न हीयते ॥" इति ।

आदन्तजननादिति मर्यादायामाङ् ।

अनृतौ तु यदा गच्छेच्छौचं *मूत्रपुरीषवत् ॥'

स्त्रीणां तु न स्नानम्,

'उभावप्यशुची स्यातां दम्पती शयनं गतौ ।
शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् ॥'

इति वृद्धशातातपोक्तेः ।

---

*मूत्रपुरीषवदिति । शौचद्वयं कार्यमित्यर्थः । तच्च वसिष्ठः—

"एका लिङ्गे, करे तिस्र, उभयोर्मृत्तिकाद्वयम् ।
एकैकया मृदा पादौ, प्रक्षाल्य तु शुचिर्भवेत् ॥
मूत्रशौचं समाख्यातं, शुक्रे तु द्विगुणं स्मृतम् ।

भृगुः—

द्वे लिङ्गे मृत्तिके देये, गुदे पञ्च, करे दश ।
उभयोः सप्त दातव्या विट्शौचे मृत्तिकाः स्मृताः ॥

शङ्खः—

तिस्रस्तु पादयोर्देयाः शौचकामस्य नित्यशः ।
शौचे तु वामपूर्वं स्यादन्यत्र स्यात्तु दक्षिणम् ।
शौचादृते वामपादपूर्वप्रक्षालनं न हि ॥ इति ।

इदं तु बोध्यम्—

चौलकर्मोपनयने विवाहः प्रथमस्तथा ।
व्रतानि स्नानमित्येषां लौकिकोऽग्निरिति स्थितिः ॥

इत्यभियुक्तवाक्यात्तद्भिन्नानां गर्भाधानादीनां होमो गृह्याग्नौ कार्यः । तन्नाशे तु तदर्थं द्वादशरात्रात्पूर्वं स्थण्डिलादावग्निं प्रतिष्ठाप्य 'अयाश्च' इत्याग्निरुत्पाद्यः । तदूर्ध्वं तु प्रमादादिनाऽग्निविच्छेदेन लुप्तानां सायंप्रातर्होमानां दर्शपूर्णमासस्थालीपाकारम्भे सति लुप्तानां दर्शपूर्णमासस्थालीपाकानां पिण्डपितृयज्ञादिनित्यक्रियाणां च पर्याप्तं साज्यं होमद्रव्यं तान्निष्क्रयं वा दत्त्वा प्रत्यब्दमेकैकं कृच्छ्रं कुर्यात्,

यावन्त्यब्दान्यतीतानि निरग्नेश्च द्विजन्मनः ।

अत्र कश्चिद्विशेष उच्यते । तत्र *रात्रौ रजसि जननादौ च रात्रिं त्रिभागां कृत्वा आद्यभागद्वये चेत्पूर्वदिनं ग्राह्यं, परतस्तूत्तरदिनमिति मिताक्षरायाम् । यत्तु—*'प्रागर्धरात्रात्प्राग्वा सूर्योदयात्पूर्वदिनं ग्राह्यम्' इत्युक्तं, तत्र देशाचाराद्व्यवस्था । तथा *सप्तदशदि-

तावन्ति कृच्छ्राणि चरेद्धौम्यं दद्याद् द्विजातये ॥

इति वचनात्,

यावत्कालमहोमी स्यात्तावद् द्रव्यमशेषतः ।
तदानं चव विप्रेभ्यो यथैवाग्निस्तथैव सः ॥

इति भरद्वाजगृह्याच्च । अर्थाधानिनश्च औपासनहोमाद्यकरणपक्षे प्रायश्चित्तमात्रं न तु द्रव्यदानं, सर्वाधानिनस्तु न प्रायश्चित्तं नापि द्रव्यदानम् । एतैरपि गर्भाधानादिहोमार्थं तदनन्तरं पुनःसंधानेन गृह्याग्निरुत्पाद्यः । तत्र सर्वाधानिनो गर्भाधानहोमान्ते गृह्याग्नित्यागः । द्विभार्येण तु अग्निद्वयसंसर्गात् प्राक् एकाग्न्यनुगमे प्रायश्चित्तमौपासनहोमीयद्रव्यमात्रदानं च कार्यं, न तु स्थालीपाकादिद्रव्यदानम् । परं तु यस्या अग्निरनुगतः तस्या गर्भाधाने इदं, न त्वन्यस्या गर्भाधाने । एवं गृह्याग्निसाध्यसंस्कारेषु बोध्यम् । *रात्रावित्यादि ।

"रात्रिं कुर्यात्त्रिभागां तु द्वौ भागौ पूर्व एव तु ।
उत्तमोऽशः प्रभातेन युज्यते ऋतुसूतके ॥

इति कश्यपोक्तेः । *प्रागर्धरात्रादित्यादि ।

उदिते तु यदा सूर्ये नारीणां दृश्यते रजः ।
जननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी ॥
अर्धरात्रावधिः कालः सूतकादौ विधीयते ।
पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविः ॥

इति वचनात् । *सप्तदशेति ।

रजस्वला यदि स्नाता पुनरेव रजस्वला ।

नपर्यन्तं पुना रजोदर्शने स्नानमात्रम्, अष्टादशे एकरात्रं, एकोनविंशे द्व्यहः, विंशतिप्रभृति त्रिरात्रमिति तत एव ज्ञेयम्। यत्तु--

'चतुर्दशदिनादर्वागशुचित्वं न विद्यते।' इति,

तत्र स्नानप्रभृतित्वमभिप्रेतम्। एतच्च यस्या विंशतिदिनोत्तरं प्रायशो रजस्तत्रैव। यस्यास्त्वर्वाक् प्रायशो रजस्तत्रोक्तं स्मृत्यर्थसारे-'त्रयोदशदिनादूर्ध्वं प्रायो रजोवतीनामेकादशदिनात्परागशुचित्वं नास्ति, एकादशदिन एकरात्रं, द्वादशे द्विरात्रम्, ऊर्ध्वं त्रिरात्रम्' इति। प्रयोगपारिजातेप्येवम्। रोगजे तु तत्रैव विशेषः संग्रहे—

*'रोगेण यद्रजः स्त्रीणामन्वहं हि प्रवर्तते।

अष्टादशदिनादर्वागशुचित्वं न विद्यते॥
एकोनविंशतेरर्वागेकाहः स्यात्ततो द्व्यहम्।
विंशत्यभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेत्॥

इत्यत्रिस्मरणात्। अत्र माधवः—रजः कालजं, द्रव्यजं, रागजं, रोगजं चेति चतुर्धा। तत्र कालजं स्फुटमेव, ऋतुकाले जायमानत्वात्। द्रव्यजं भक्ष्यविशेषभक्षणजम्। तत्राङ्गिराः—

आऽष्टादशाहान्नारीणां मूत्रवच्छौचमिष्यते।
अष्टादशाहात्स्नानं स्यात्त्रिरात्रं परतोऽशुचिः(१)॥ इति।

रागजम्—

अर्वाक् प्रसूतेरुत्पन्नं मेदोदृष्ट्याङ्गनासु यत्।
तद्रागजमिति प्रोक्तं मेदोच्छेदसमुद्भवम्॥

इति लक्षयित्वा तत्र त्रिदिनमुक्तम्। रोगजे त्वाह-*रोगेणेति। तस्यास्पृश्यत्वरूपाशुचित्वाभावेऽपि कर्माधिकारो रजोनिवृत्तावेव।

---

(१) परतोऽशुचीरिति धपुस्तके।

नाशुचिस्तु भवेत्तेन यस्माद्वैकारिकं मतम् ॥' इति ।
कर्माधिकारस्तु रजोनिवृत्तावेव ।

'साध्वाचारा न तावत्स्यात्स्नाताऽपि स्त्री रजस्वला ।
यावत्प्रवर्तमानं हि रजो नैव निवर्तते ॥'

इति आह्निकेमाद्रौ शङ्खोक्तेः । तत्रोपि स्वकालेऽशुचिरेवेत्याह ऋष्यशृङ्गः—

'रोगजे वर्तमानेऽपि काले निर्याति कालजम् ।
तस्मात्कालेऽप्रमत्ता स्यादन्यथा संकरो भवेत् ॥'

तथा*रजस्वलाया रजस्वलान्तरस्पर्शेऽकामतः स्ना-

साध्वाचारा न तावत्स्यात्स्नाताऽपि स्त्री रजस्वला ।
यावत् प्रवर्तमानं हि रजो नैव निवर्त्तते ॥

इति शङ्खोक्तेः ।

रजोनिवृत्तौ गम्या स्त्री गृहकर्मणि चैव हि । इति च ।

गृहकर्मणि पाकादावित्याह ।

*रजस्वलाया इति ।

उदक्या तु सवर्णाया स्पृष्टा चेत्स्यादुदक्यया ।
तस्मिन्नेवाहनि स्नाता शुद्धिमाप्नोत्यसंशयम् ॥

इति मार्कण्डेयात् । इदमकामतः स्पर्शे । कामतःस्पर्शे तु—

रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी यदि ।
एकरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥

इति काश्यपाच्च । इदं चैकरात्रं तावन्निराहारोत्तरमित्यनुपदं स्पष्टम् । कामतोऽभ्यासे सहशय्यादिचिरस्पर्शे च पराशरः—

स्पृष्ट्वा रजस्वलाऽन्योऽन्यं ब्राह्मण्या ब्राह्मणी यदि ।
(१)तावत्तिष्ठेन्निराहारा त्रिरात्रेणैव शुद्ध्यति ॥

स्पर्शमारभ्य पञ्चमदिनपर्यन्तमाहारत्यागः, ततस्त्रिरात्रोपवास

(१) 'एकरात्रं निराहारा' इति घ पुस्तके ।

नं, कामत उपवासः पञ्चगव्याशनं च। असवर्णानां तु ब्राह्मण्याः क्षत्रियादिस्पर्शे क्रमेण कृच्छ्रार्धपादोनकृच्छ्राः* क्षत्रियादीनां तु कृच्छ्रपाद एव।*क्षत्रियादीनां

इत्यर्थः। पञ्चमदिनं चात्र रजोनिवृत्तिकालः। तावत्तिष्ठेन्निराहारेति सद्यःस्नानातिरिक्तपूर्वोत्तरसकलप्रायश्चित्ते बोध्यम्। सवर्णसपत्नीविषये तु वृद्धवसिष्ठः—

स्पृष्टे रजस्वलेऽन्योन्यं सवर्णे त्वेकभर्तृके।
कामतोऽकामतो वाऽपि सद्यः स्नाने विशुध्यतः॥ इति।

सगोत्रे त्विति मयूखः। असवर्णानां त्विति पराशरः।

स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी क्षत्रिया तथा॥
अर्धकृच्छ्रं चरेत् पूर्वा पादमेकमनन्तरा।
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी वैश्यजाऽपि च।
पादहीनं चरेत पूर्वा पादमेकमनन्तरा॥
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी शूद्रजा तथा।
कृच्छ्रेण शुद्ध्यते पूर्वा शूद्री दानेन शुद्ध्यति॥

दानेनेत्यस्य कृच्छ्रमत्याम्नायचतुर्थांशदानेनेति मिताक्षरादर्शनात्सर्वत्रापि कृच्छ्रपाद एव पर्यवस्यति। वृद्धवसिष्ठोऽपि—

स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी क्षत्रिया तथा।
कृच्छ्रार्द्धाच्छुध्यते पूर्वा उत्तरा तु तदर्धतः॥

तदर्धतः पादकृच्छ्रात्।

स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी वैश्यजाऽपि च।
पादहीनं चरेत् पूर्वा कृच्छ्रपादं तथोत्तरा॥
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी शूद्रजाऽपि च।
कृच्छ्रेण शुद्ध्यते पूर्वा कृच्छ्रपादमथोत्तरा॥

*क्षत्रियादीनामिति। वृद्धवसिष्ठः-

स्पृष्ट्वा रजस्वलाऽन्योन्यं क्षत्रिया वैश्यजाऽपि च।

हीनवर्णास्पर्शे त्रिरात्रमुपवासः, वैश्याशूद्रयोः पूर्वया स्पर्शेऽहोरात्रं द्विरात्रं च । एतच्च कामतः । *अकाम-

त्रिरात्रात् शुध्यते पूर्वा अहोरात्रेण चोत्तरा ॥
स्पृष्ट्वा रजस्वलाऽन्योन्यं क्षत्रिया शूद्रजाऽपि च ।
उपवासैस्त्रिभिः पूर्वा अहोरात्रेण चोत्तरा ॥
स्पृष्ट्वा रजस्वलाऽन्योन्यं वैश्या शूद्री तथैव च ।
त्रिरात्राच्छुध्यते पूर्वा उत्तरा तु दिनद्वयात् ॥
वर्णानां कामतः स्पर्शे विधिरेष सनातनः ॥ इति ।

*अकामतश्चेति(१) । वृद्धविष्णुः-"रजस्वला हीनवर्णां रजस्वलाँ स्पृष्ट्वा न तावदश्नीयात्, यावन्न शुद्धिः स्यात्। सवर्णामधिकवर्णां वा स्पृष्ट्वा सद्यः स्नात्वा शुध्यति" इति । इदं तु बोध्यम् असवर्णास्पर्शे मार्कण्डेयः—

रजस्वला तु संस्पृष्टा राजन्या ब्राह्मणी च या ।
त्रिरात्रेण विशुद्धिः स्यात् व्याघ्रस्य वचनं यथा ॥
रजस्वला तु संस्पृष्टा वैश्यया ब्राह्मणी च या ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुद्ध्यति ॥
रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी तथा ।
षड्रात्रेण विशुद्धिः स्याद् ब्राह्मण्याः कामकारतः ॥
अज्ञानतश्चरेदर्धं ब्राह्मणी सर्वजातिषु ॥

पञ्चगव्यं तु सर्वत्रापि बोध्यम् । इदं चात्रावधातव्यम्—अत्र यथा ब्राह्मणीरजस्वलयोः स्पर्शे उपवासः पञ्चगव्यं च, कामतोऽभ्यासे सहशयनादिचिरस्पर्शे च त्रिरात्रम्; तथाऽन्यासामपि सवर्णरजस्वलास्पर्शे तादृशविषये तदेव, यथा च ब्राह्मण्याः क्षत्रियास्पर्शे त्रिरात्रं, तथा क्षत्रियाया वैश्यास्पर्शे, वैश्यायाः शूद्रास्पर्शेऽपि

(१) अत्र यद्यपि 'अकामतश्च' इति पाठः सर्वेषु पुस्तकेषूपलभ्यते तथापि मूलानुरोधेन 'अकामतस्तु' इत्यपेक्षितमिति बोध्यम् ।

तस्तु प्राक्शुद्धेरनशनम् । *अकामतश्चाण्डालादिस्पर्शे-ष्वनशनमेव प्राक् शुद्धेः । *कामतस्तु प्रथमेऽह्नि त्र्यहः

तदेव न्यायात्,

रजस्वला तु या नारी अन्योन्यमुपसंस्पृशेत् ।
सवर्णे पञ्चगव्येन त्रिरात्रमसवर्णके ॥

इति स्मृतेः । पञ्चगव्येनोपवाससहितेनेत्यर्थः ।

रजस्वले उभे नार्यावन्योन्यं स्पृशतो यदि ।
सवर्णे पञ्चगव्यं च ब्रह्मकूर्चमतः परम् ॥

इति शातातपाच्च । अत्रापि 'पञ्चगव्यं च' इति चकारादुपवासो द्रष्टव्यः । 'त्रिरात्रमसवर्णके' इत्यत्र 'अन्योन्यम्' इत्यस्य न संबन्धः । तथा चासवर्णास्पर्शे रजस्वलाया अनन्तरासवर्णास्पर्शे त्रिरात्रमित्यर्थः । 'ब्रह्मकूर्चमतः परम्' इत्यस्य ब्राह्मण्यां रजस्वलायां वैश्यास्पर्शे यत् क्षत्रियायां रजस्वलायां शूद्रास्पर्शे तदेवेति एकान्तरासवर्णास्पर्शे तत्र ब्रह्मकूर्चमित्यर्थः । *अकामत इति ।

रजस्वला तु संस्पृष्टा चण्डालान्त्यश्ववायसैः ।
तावत्तिष्ठेन्निराहारा यावत्कालेन शुध्यति ॥

इति बौधायनवचनात् । यावत्कालेन पितृकर्माधिकारयोग्यकालेन, पञ्चमदिनेनेति यावत् । एतदशक्तायाऽपि बोध्यम् । अशक्तायाः प्रायश्चित्तान्तरं वा ।

चाण्डालः श्वपचो वाऽपि यद्यात्रेयीं स्पृशेद्यदि ।
अफालकृष्टैर्वर्त्तेत पञ्चगव्येन शुध्यति ॥

पञ्चगव्याशनन्तु पञ्चमेऽन्ह्येव चतुर्थेऽनधिकारात् । *कामत इति ।

पतितान्त्यश्वपाकेन संस्पृष्टा चेद्रजस्वला ।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
प्रथमेऽह्नि त्रिरात्रं स्यात्, द्वितीये द्व्यहमेव तु ।
अहोरात्रं तृतीयोऽह्नि परतो नक्तमाचरेत् ॥

इति वृद्धवसिष्ठोक्तेः।'तान्यहानि'इत्यनेन शेषदिनानीत्यर्थात्पञ्च-ममहर्लभ्यते । अयं चानुवादः । उक्तं वक्ष्यमाणं तावत्प्रायश्चित्तं पञ्चमेऽह्नयेव कार्यं चतूरात्रं कर्मानधिकारात् । सद्यःस्नानं तु सद्यः-पदात्सद्य एव भवति । परतश्चतुर्थेऽह्नि पञ्चगव्याशनं च कार्यम् ।

चण्डालेन तु संस्पृष्टा कदाचित् स्त्री रजस्वला ।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
त्रिरात्रमुपवासः स्यात् पञ्चगव्येन शोधनम् ।

इति काश्यपात् । यद्यपीदं प्रथमदिनस्पर्शपरमेव त्रिरात्रोक्तेः, तथापि द्वितीयादिदिनस्पर्शेऽपि पञ्चगव्याशनमावश्यकं तुल्यत्वात् । चण्डालेति तत्तुल्यपतितादिग्राहकम् ।

बहूनामेकधर्माणामेकस्यापि यदुच्यते ।
सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृताः ॥

इत्युशनसो वचनात् । एवं वायसेत्यत्रापि तत्तुल्याः कङ्कादयो-ऽस्पृश्याः पक्षिणो ग्राह्याः । अन्त्यानाहाऽङ्गिराः—

चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ।
मागधायोगवौ चेति सप्तैतेऽन्त्यावसायिनः ॥

यमः—

रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्तमेदभिल्लाश्च सप्तैतेऽन्त्यावसायिनः ॥

शौनकः—

अयस्कारस्वर्णकारौ तथा पाषाणवर्धकी ।
कांस्यताम्रकरास्तन्तुवायाश्च ध्वजिनोऽन्त्यजाः ॥

स्मृत्यन्तरोक्तश्च चण्डालो बोध्यः ।

आरूढपतिताज्जातो ब्राह्मण्यां शूद्रजस्तु यः ।
चाण्डालौ तौ समाख्यातौ सगोत्रावथश्च जायते ।

समवराज्जातोऽपि चण्डाल एव, "असमानार्षगोत्रजाम्" इति

द्वितीये द्यहस्तृतीये एकाहः । *श्वस्पर्शे तु द्यह एकाहो वा । *भुञ्जानायाश्चण्डालादिस्पर्शे षड्रात्रम् ।

(१)एकयोगनिर्देशनिषेधात् । एवं च

उदक्या सूतिका वाऽपि शवान्त्यं संस्पृशेद्यदि ।
त्रिरात्रेणैव शुध्येत इति शातातपोऽब्रवीत् ॥

इति त्रिरात्रं प्रथमदिनपरम् । एवञ्च शवस्पर्शे प्रथमेऽन्हेव द्यहः, द्वितीये द्यहः, तृतीये एकाह, इति द्रष्टव्यम् । शवस्य चण्डालादितुल्यत्वात् । *श्वस्पर्शे त्विति ।

"रजस्वला तु संस्पृष्टा शुना जम्बुकवायसैः ।
निराहारा भवेत्तावद्यावत्कालेन शुध्यति ॥

इति यमोक्तेः । इदमकामतः । कामतस्तु बृहस्पतिः—

शुना चोच्छिष्टया शूद्रा संस्पृष्टा द्यहमाचरेत् ।
अहोरात्रं तृतीयेऽह्नि परतो नक्तमाचरेत् ॥

इति प्रथमद्वितीयदिनस्पर्शे द्यहं, परतश्चतुर्थे । "तान्यहानि व्यतिक्रम्य"इतीहापि योज्यम् ।

रजस्वला तु संस्पृष्टा ग्रामकुक्कुटसूकरैः ।
श्वभिः स्नात्वा क्षिपेत्तावद्यावच्चन्द्रस्य दर्शनम् ॥

इति बौधायनोक्तं नक्तं स्वशक्तापरं, चतुर्थदिनपरं वा । रजकादिस्पर्शे तु श्वस्पर्शसमं तेषां तत्समत्वादिति शूलपाणिः ।

रजस्वला तु संस्पृष्टा शुना चण्डालराक्षसैः ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति ॥

इति तु कामतोऽभ्यासे । *भुञ्जानाया इति ।

रजस्वला च भुञ्जाना श्वान्त्यजादीन् स्पृशेद्यदि ।
गोमूत्रयावकाहारा षड्रात्रेण विशुध्यति ॥
अशक्तौ काञ्चनं दद्याद् विप्रेभ्यो वाऽपि भोजनम् ॥

---

(१)'एकयोगनिषेधदर्शनात्' इति घ पुस्तके ।

*उच्छिष्टयोः स्पर्शे तु कृच्छ्र इत्यादि मिताक्षरायां ज्ञेयम्। स्मृत्यर्थसारे तु सर्वत्र बालापत्यायाः स्पर्शे स्नाने कृते

इति बौधायनोक्तं दानमपि पञ्चमेऽन्ह्येव, ततः प्रागनधिकारात्। *उच्छिष्टयोरिति।

उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित् स्त्री रजस्वला।
कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानैरुपोषिता॥

इत्यत्रिवचनात्। पूर्वेति ब्राह्मणक्षत्रियवैश्यास्तिस्रः स्त्रियो ग्राह्याः। तासां मध्ये समानजातीययो रजस्वलयोः परस्परं स्पर्शे प्राजापत्यः, स्वस्नानन्तरस्पर्शे त्वेकैकप्राजापत्यवृद्धिः, तादृशशूद्रयोः स्पर्शे तु परस्परमुपवाससहितप्राजापत्यप्रत्याम्नायेन दानेनेत्यर्थः। एतच्च कामतः, अकामतस्तदर्धम्। आदिनोच्छिष्टद्विजस्पर्शादिग्रहः। तत्रोच्छिष्टद्विजस्पर्शे मार्कण्डेयः—

द्विजान् कथञ्चिदुच्छिष्टान् रजस्था यदि संस्पृशेत्।
अधोच्छिष्टे त्वहोरात्रमूर्ध्वोच्छिष्टे त्र्यहं क्षिपेत्॥ इति

अत्र यद्यपि द्विजानिति सामान्यत एवोक्तं तथापि उच्छिष्टक्षत्रियादिस्पर्शे ब्राह्मण्या अधिकं कल्प्यं हीनाया उच्छिष्टोत्तमस्पर्शे तु न्यूनमिति। चण्डालेन सह एकवृक्षारोहणे पराशरः—

एकवृक्षसमारूढश्चाण्डालोऽथ रजस्वला।
अहोरात्रोषिता भूत्वा पञ्चगव्येन शुध्यति॥

वृक्षेत्युपलक्षणम्। यदि रजस्वला भोजनकालेऽन्यां रजस्वलां दृष्ट्वा भुङ्क्ते तदाहापस्तम्बः—

'उदक्या यदि वा भुङ्क्ते दृष्ट्वान्यां तु रजस्वलाम्।
आस्नानकालं नाश्नीयात् ब्रह्मकूर्चं ततः पिबेत्॥

एतच्च कामतः। चण्डालदर्शने त्वत्रिः—

रजस्वला तु भुञ्जाना चण्डालं यदि पश्यति।
उपवासत्रयं कुर्यात् प्राजापत्यं तु कामतः॥

अकामतस्त्वफालकृष्टान्नभक्षणम् । रजस्वलायाः श्वादिदर्शने व्यासः—

रजस्वला यदा दृष्टा शुना जम्बुकरासभैः ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति ॥

रजस्वलाया आशौचिस्पर्शे शातातपः—

आर्त्तवाभिप्लुता नारी स्पृशेच्चेच्छवसूतकम् ।
ऊर्ध्वं त्रिरात्रात् स्नातां तां त्रिरात्रमुपवासयेत् ॥

स्पृष्ट्वा भोजनादौ त्वत्रिः—

आर्त्तवाभिप्लुता नारी मृतसूतकयोः स्पृशेत् ।
भुक्त्वा पीत्वा चरेत् कृच्छ्रं, स्पृष्ट्वा तु त्र्यहमेव तु ॥

स्पृष्ट्वेति भोजनपानयोरकरणे । आशौचिस्पर्शे स्नानात्प्राग्रजोदर्शने तु मार्कण्डेयः—

मृतसूतकसंस्पर्शे ऋतुं दृष्ट्वा कथं भवेत् ।
नाऽऽस्नानकालमश्नीयात् भुक्त्वा चान्द्रायणं चरेत् ॥

आस्नानकालं चतुर्थदिनपर्यन्तम्। रजस्वलायाः शावाशौचप्रसक्तौ व्यासः—

मलवद्वसनायास्तु अप्रापत्य(?) भवेद्यदि ।
अभिषेकेण शुद्धिः स्यादिनत्रयमभोजनम् ॥

अप्रापत्यं बन्धुभृत्यादि । एतच्छक्तायाः, अन्यस्या वाऽप्रापत्यायाश्च मदनरत्ने स्मृत्यन्तरम्—

अप्रापत्ये समुत्पन्ने मलवद्वसना यदि ।
अभिषेकेण मुक्तिः स्यान्नाशनं वा दिनत्रयम् ॥

त्रिरात्रम् अवशिष्टकालपर्यन्तम्। अभिषेकेण मुक्तिः सद्यःस्नानेन भोजनमित्यशक्तादिपरमुक्त्वा शक्तायां नाशनं वेत्युक्तम् । पश्चात् पञ्चमेऽह्नि अशनस्य कृतभोजनस्य प्रत्यान्नायः उपवासत-

भुक्तिः पश्चादनशनप्रत्याम्नाय इति ॥ स्नानविधिं चाह पराशरः—

'स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला।
*पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत् ॥
सिक्तगात्रा भवेद्वस्त्रैः साङ्गोपाङ्गा कथंचन।
न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत् ॥'

अथ *रजस्वलास्नानम्। दैवज्ञवल्लभः—

'ब्रह्मानुराधाश्विनसौम्यभेषु
हस्तानिलाखण्डलवासवेषु।
विश्वार्यमर्क्षोत्तरभाद्रभेषु
वराङ्गनास्नानविधिः प्रदिष्टः ॥'

ज्वरे तूशनाः—

'ज्वराभिभूता या नारी रजसा च परिप्लुता।
कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा ? ॥
चतुर्थेऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियम्।
सा सचैलाऽवगाह्याप्सु स्नात्वा स्नात्वा पुनः स्पृशेत्॥
दश द्वादशकृत्वो वा आचामेच्च पुनः पुनः।
अन्ते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा ॥'इति।

त्स्थानिकविप्रभोजनादिः कृच्छ्रादिश्च दक्षिणादिरूपः। *पात्रान्तरितेति।

आर्तवाभिप्लुता नारी नावगाहेत् कदाचन।
उद्धृतेन जलेनैव स्नात्वा शेषं समापयेत् ॥

इति व्यासोक्तेः। व्रतं रजस्वलाधर्मम्। रजस्वला तु ग्रहनक्षत्रनिरीक्षणदिवास्वापमधुमांसताम्बूलनखनिकृन्तनदन्तधावनप्रवासस्नानाभ्यञ्जनानि वर्जयेदित्यादि स्मृत्युक्तम्।

*रजस्वलास्नानमिति। चतुर्थ्यां स्नातामिति विहितं स्नानं

इदं चातुरमात्रे ज्ञेयम् ।

'*आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः ॥'

इति पराशरोक्तेः । रजसोऽज्ञाने तु पराशरमाधवीये प्रजापतिः-

'अविज्ञाते मले सा च मलवद्वसना यदि ।

कृतं गृहेषु दुष्टं स्या*च्छुद्धिस्तस्यास्त्रिरात्रतः ॥'

शुद्ध्यर्थम् । एतच्च पुंजननादिनिमित्तभूतातिशयाधायकम् । एवं सूतिकास्नानमपि । एतच्च चतुर्थदिवसासम्भवे तदग्रे कार्यम् । एतेन चतुर्थदिने नक्षत्राभावे स्नानं न स्यादिति न शङ्क्यम् । *आतुरे इति ।

स्पृष्ट्वा स्पृष्ट्वाऽवगाहेत ततः शुद्ध्येत्स आतुरः ।

इत्युत्तरार्द्धम् । तत्र प्रतिस्नानं रजस्वलादेर्वासोविपरिवर्त्तनं कार्यम् ।

आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः ।

स्पृष्ट्वा स्पृष्ट्वाऽवगाहेत एवं शुध्येत्स आतुरः ॥

वासोभिर्दशभिश्चैव परिधाय यथाक्रमम् ।

दद्यात्तु शक्तितो दानं पुण्याहेन विशुध्यति ॥

इत्यात्रिवचनात् । *शुद्धिस्तस्यास्त्रिरात्रत इति । यदा ज्ञायते तदस्त्रिरात्रादित्यर्थः । शुद्धिर्न स्यादिति वा पाठः । तदा प्राजापत्यादिकमधिकं कल्प्यमित्यभिप्रायः । गर्भाधाने शतं ब्राह्मणा भोज्याः, दश वेति प्रयोगरत्ने । पूर्वोक्तानि व्रतादीनि गर्भाधानहोमादीनि कृच्छ्रादीनि च सर्वाणि कर्माणि विष्णोरर्पयेत् ।

विष्ण्वर्पितानि कर्माणि सकलानि भवन्ति हि ।

अनर्पितानि कर्माणि भस्मनि न्यस्तहव्यवत् ॥

नित्यं नैमित्तिकं काम्यं यच्चान्यन्मोक्षसाधनम् ।

विष्णोः समर्पितं सर्वं सात्त्विकं सफलं भवेत् ॥

इतिनारदीयात् ।

'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।

देवजानीये कारिकायाम्—

'उच्छिष्टा तु द्विजातीनां रजः स्त्री यदि पश्यति ।
उपवासम(१)धोच्छिष्टे ऊर्ध्वोच्छिष्टेऽहं क्षिपेत्॥'इति।

अथ पुंस(२)वनम् । प्रयोगपारिजाते जातूकर्ण्यः—

'*द्वितीये वा तृतीये वा मासि पुंसवनं भवेत् ।
व्यक्ते गर्भे भवेत्कार्यं सीमन्तेन सहाथवा ॥'

यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥
इति गीतोक्तेश्च । विहितमिति शेषः ।

*द्वितीये वेति । गर्भाभिव्यक्तौ, अन्यथा तृतीये इत्यर्थः । स्तुतस्तु गर्भधारणमासादिति शेषेण तृतीये, गर्भाधानाभिव्यक्तौ चतुर्थे इत्यर्थः । तथा च गर्भमासप्रभृति तृतीये चतुर्थे षष्ठेऽष्टमे वा मासि अरिक्तादितिथौ पुष्यादिपुन्नक्षत्रे सोमबुधगुरुशुक्रवारेषु विष्ट्यादिरहिते दैवज्ञोक्ते काले पुंसवनानवलोभने कार्ये । गुरुशुक्रास्तबाल्यवार्धक्यमलमासादिरहितकाललाभे गुरुशुक्रास्तादावपि न कार्ये । तदलाभे तु गुरुशुक्रास्तादावपि, नियतकालत्वात्; सीमन्तदिने वा कार्ये इति प्रयोगकारार्थः । अत्र शतं

---

(१) मूत्रपुरीषोत्सर्गोत्तरमकृतप्रक्षालनादिशौचात्पूर्वावस्था अधरोच्छिष्टं, भोजनोत्तरं मुखप्रक्षालनादितः प्राक्तन्यवस्था ऊर्ध्वोच्छिष्टमिति-प्रम् ।

(२) एतदादिसंस्काराणां वेदाविहितत्वमाह—आश्वलायनः—'उपनिषदि मैथुनम्भनपुंसवनमनवलोभनं च' इति । अस्य व्याख्यामाह वृत्तौ नारायणभट्टः—'गर्भो लभ्यते येन कर्मणा निषिक्तं वीर्यममोघं च भवति तद्भलम्भनम् । पुमाँल्लुब्धो जायते येन तत्पुंसवनम् । पुमांस्तु सन् येन नालुप्यते तदनवलोभनम् । वर्णविकारो द्रष्टव्यः पृषोदरादित्वात्। एतान्यस्यांचिदुपनिषद्याम्नातानि । न केवलमेतानि, किं तर्हि ? गर्भाधानाय आत्मज्ञानपर्यन्ता आम्नाताः । 'इति । विशेषविधिश्च तत एव ज्ञेयः ।

बृहस्पतिः—

'तृतीये मासि कर्तव्यं*गृष्टैरन्यत्र शोभनम् ।
गृष्टेश्चतुर्थे मासे तु षष्ठे मास्यथ वाष्टमे ॥'

सकृत्प्रसूता गृष्टिः । *एतेन प्रतिगर्भमपि भवतीति ज्ञायते । बहूचकारिकाऽपि—

'कर्ता स्याद्देवरस्तस्या यस्याः पत्युरसम्भवः ।
आवर्तत इदं कर्म प्रतिगर्भमिति स्थितिः ॥'

ब्राह्मे—

गर्भाधानादिसंस्कर्ता (१)पतिः श्रेष्ठतमः स्मृतः ।
अभावे स्वकुलीनः स्याद्बान्धवो*ऽन्यत्र *गोत्रजः ॥

ब्राह्मणा भोज्याः । *गृष्टैरिति । सामुद्रादिशास्त्रेणैव प्राग्गृष्टित्वनिर्णयः । *एतेन गृष्टितदन्ययोर्व्यवस्थोक्त्या गृष्टेरेकवारं तदन्यस्यां वारं वारमित्यर्थसूचनात् पुमान् सूयतेऽनेनेति व्युत्पत्त्या कर्मणः पुंसवसाधनत्वलाभादिति शेषः। एतेन नावलुप्यते गर्भोऽनेनेति व्युत्पत्त्या अनवलोभनकर्मणो गर्भाविनाशकत्वलाभात् प्रतिगर्भमावृत्तिर्लभ्यते ।

सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता ।

इतिदेवलवाक्यं तु सीमन्तविषयमिति तदाशयः । विज्ञानेश्वरादिभिरनयोः सकृत्करणस्य सिद्धान्तितत्वादेते सकृदेव कुर्वन्ति । तदग्रे चिन्तयामः । *अन्यत्र स्वकुलीनाभावे । *गोत्रज इति तदन्यव्यावृत्तये। अनयोः कर्त्ता पतिर्मुख्यः। तदभावे तु देवरादिः । तदभावश्च विहृतः प्रयोगपारिजाते—

पत्यौ मृते वा पतिते सन्न्यस्ते वा विदेशगे ।
तद्गोत्रजेन ज्येष्ठेन कार्याः पुंसवनादिकाः ॥ इति ।

गर्भाधानं देवरादिना न कार्यं, कलिवर्ज्यत्वादतः पुंसवना-

(१)'पिता श्रेष्ठतमः' इति स्वपुस्तके पाठः ।

मदनरत्ने सत्यव्रतः—

मृतो देशान्तरगतो भर्ता स्त्री यद्यसंस्कृता ।
देवरो वा गुरुर्वाऽपि वंश्यो वाऽपि समाचरेत् ॥

हेमाद्रौ यमः–'प्रथमे मासि द्वितीये वा यदा पुंनक्षत्रेण चन्द्रमा युक्तः स्यात्' इति । वराहः—

हस्तो मूलं श्रवणः पुनर्वसुर्मृगशिरस्तथा पुष्यः ।
पुंसंज्ञकेषु कार्येष्वेतानि शुभानि धिष्ण्यानि ॥

अनूराधाऽपि पुंनक्षत्रम् 'अनूराधान् हविषा वर्धयन्तः' इति श्रुतेः । गर्गोऽपि–

पुन्नामा श्रवणास्तिष्यो हस्तश्चैव पुनर्वसुः ।
अभिजित्प्रौष्ठपाच्चैव अनूराधास्तथाश्वयुक् ॥

नृसिंहः–

रिक्तां पर्व च *नवमीं त्यक्त्वा पुंसवने शुभाः ।

ज्योतिर्निबन्धे वसिष्ठः—

मृत्युश्च सौरेस्तनुहानिरिन्दो-
र्मृतप्रजा पुंसवने बुधस्य ।
काकी च वन्ध्या भवतीह शुक्रे
स्त्रीपुत्रलाभो रविभौमजीवैः ॥

अनवलोभनस्याप्ययमेव* कालः । दीपिकायां तु चतुर्थेऽनवलोभनम्' इत्युक्तम् ।

दिपदम् । *नवमीं त्यक्त्वेति । अन्यरिक्तायां अनुकल्पत्वार्थं नवम्यामधिकदोषत्वार्थं वा । अत्र च—

बलोपपन्ने दम्पत्योश्चन्द्रतारावलान्विते ।
कुलीरं मिथुनं कन्यां हित्वा शेषाः शुभावहाः॥

इत्यादिकमपि द्रष्टव्यम् । *अथमेवेति । अस्य पुंसवनसहकार्यत्वात् ।

*अथ सीमन्तः । हेमाद्रौ बैजवापः—'अथ सीमन्तोन्नयनं चतुर्थे पञ्चमे षष्ठे च' इति । वसिष्ठः—

चतुर्थे*सप्तमे मासि षष्ठे वाप्यथ वाऽष्टमे ।

हेमाद्रौ शङ्खः—'गर्भस्पन्दने सीमन्तोन्नयनं, यावद्वा न प्रसवः' । काष्णाजिनिः—

गर्भलम्भनमारभ्य यावन्न प्रसवस्तदा ।
सीमन्तोन्नयनं कुर्याच्छङ्खस्य वचनं यथा ॥

मासश्चात्र सौरः सावनो वा । कालविधाने—

चतुर्थषष्ठाष्टममासभाजि-
सौरेण गर्भे प्रथमे विधेयम् ।
सीमन्तकर्म द्विजभामिनीनां
मासेऽष्टमे*विष्णुबलिं च कुर्यात् ॥

वसिष्ठः—

चतुर्थे सावने मासि षष्ठे वाप्यथवाऽष्टमे ।

ज्योतिर्निबन्धे नारदः—

---

*अथेत्यादि । तथा च गर्भमासप्रभृतिचतुर्थे षष्ठेऽष्टमे वा केषांचिन्मते पञ्चमे सप्तमे नवमे वा मासे यावत्प्रसवं वा शुक्लपक्षे षष्ठ्यष्टमीद्वादशीचतुर्थीनवमीचतुर्दश्यमावास्याभिन्नतिथौ पुंनक्षत्राणां मध्यमपादद्वये भौमगुरुरविवारेषु चन्द्रानुकूल्ये शुभलग्नादौ विष्ट्यादिदोषरहिते कार्यमित्यर्थः । मलमासगुरुशुक्रास्तादीनां कालान्तरासम्भवे पूर्ववत् न दोषः नियतकालत्वात् । शतं ब्राह्मणा भोज्याः । *सप्तमे इति । नवमोऽपि द्रष्टव्यः ।

आधानादष्टमे मासि सीमन्तोन्नयनं भवेत् ।
नवमे मासि वा कुर्याद्यावद्गर्भविमोचनम् ॥

इत्यात्रेयात् । *विष्णुबलिमिति ॥ अयं सूत्रानुक्तेः कृता-

अरिक्तापर्वदिवसे *कुजजीवार्कवासरे ॥

कालविधाने—

सीमन्ते *तिष्यहस्तादितिहरिशशभृत्
पौष्णविध्युत्तराख्याः
पक्षच्छिद्रं च रिक्तां *पितृतिथिमपहा-
यापराः स्युः प्रशस्ताः ॥

आदितिः पुनर्वसुः । पक्षच्छिद्रं चाह वसिष्ठः—

चतुर्दशी चतुर्थी च अष्टमी नवमी तथा ।
षष्ठी च द्वादशी चैव पक्षच्छिद्रा(१)ह्वयाः स्मृताः ।
*क्रमादेतासु तिथिषु वर्जनीयाश्च नाडिकाः ॥

कृतः । *कुजेति सोमबुधगुरुशुक्रवाराः प्रयोगरत्ने उक्ताः । कालनिर्णयप्रकाशे व्यासः—

पुरुषग्रहवाराः स्युः शुभाः सीमन्तकर्मणि ।
मध्यौ स्त्रीग्रहवारौ तु वर्जयेत्तु नपुंसकौ ॥

बृहज्जातके—

बुधसूर्यसुतौ नपुंसकाख्यौ
शशिशुक्रौ युवती नराश्च शेषाः' ॥ इति ।

*तिष्येति । पुष्यहस्तपुनर्वसु श्रवणं मृगशिररेवतीरोहिण्युत्तरात्रयमित्यर्थः । पुनर्वसु पुष्याभिजिद्धस्तप्रोष्ठपदानुराधाश्विनीमूलश्रवणरेवतीरोहिणीमृगशिरःसंज्ञकानि पूर्वोक्तानिपुनक्षत्राणीति जयन्तः । कारिकाऽपि—

ऋक्षस्य मध्यमे पादद्वये कर्मेदमिष्यते ।

उक्तनक्षत्रं चतुर्धा विभज्याद्यान्त्यभागौ त्याज्यौ, मध्यमौ भागौ ग्राह्यावित्यर्थः । *पितृतिथिम् अमावास्यां पितृमरण-

---

(१) छिद्राः प्रकीर्तिताः इति खपुस्तके पाठः ।

भूताष्टमनुतत्त्वाङ्कदशशेषास्तु शोभनाः ॥

कालनिर्णये—

*शुभसंस्थे निशानाथे चतुर्थीं च चतुर्दशीम् ।
पौर्णमासीं प्रशंसन्ति केचित्सीमन्तकर्मणि ॥

बृहस्पतिः—

पूर्वपक्षः शुभः प्रोक्तः कृष्णश्चान्त्यत्रिकं विना ।
चतुर्दशी चतुर्थी च शुक्लपक्षे शुभप्रदे ॥

नारदः—

'विप्रक्षत्रियवोः कुर्यादिदं सीमन्तकर्म तत् ।
वैश्यशूद्रकयोरेतदिदं निश्यपि केचन ॥

वाराः पूर्वोक्ता एव । *एतच्च*सकृदेव कार्यमिति वितिथिं च । *क्रमादिति अत्यावश्यकार्थम् । एवं *शुभसंस्थ इत्याद्यपि । बृहस्पतिः—

सिंहाली वर्जयेत् लग्ने ग्रहैरष्टमवर्जितैः ।
(ग्रहाः क्रूरग्रहाः, चन्द्रोऽपि बोध्यः) ।
व्रतबन्धे च सीमन्ते जन्मन्यपि शुभा ग्रहाः ।
अष्टमे चन्द्ररहितास्तदायुर्वृद्धिरीरिता ॥

इति भारद्वाजात् । अलिः वृश्चिकः, शेषं दैवज्ञोक्तं ग्राह्यम् । *एतच्चेति । एतच्च पतिरेव कुर्यान्नान्यः । एतच्च वृत्तौ स्पष्टम् । *सकृदिति । अयमत्र सिद्धान्तः—सीमन्तोन्नयनस्य सीमन्त उन्नीयतेऽस्मिन्निति व्युत्पत्त्या स्त्रीसंस्कारत्वमेव । न चैवं पुंसवनस्य दधिप्राशनस्यानवलोभनस्य हृदयालम्भस्य च स्त्रीसंस्कारत्वं स्यात् : "पत्नीं प्राशयेत्" "दक्षिणस्यां नासिकायामजितामोषधीं नस्तःकृत्वा हृदयदेशमस्या आलभेत"इति तस्या एव कर्तृत्वावगमादिति वाच्यम् । वेदविस्सम्प्रदानकगोकर्मकदानस्य स्वर्गार्थत्वात् पत्नीकर्मकप्राशनादेर्गर्भसंस्कारकत्वसम्भवात् । प्राशनस्य गर्भगतपुंस्त्वोत्पत्त्यर्थकर-

ज्ञानेश्वरः ।

सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता ।

इति देवलोक्तेः । सकृत्प्रतिगर्भं वा कार्यमिति हेमाद्रिः ।

सकृच्च कृतसंस्काराः सीमन्तेन द्विजस्त्रियः ।
यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत् ॥

इति हारीतोक्तेः,

सीम(१)न्तोन्नयनं कर्म न स्त्रीसंस्कार इष्यते ।
केचिद्गर्भस्य संस्कारात्प्रतिगर्भं प्रयुञ्जते ॥

इति हेमाद्रौ विष्णुवचनाच्च । स एव—

स्त्री यद्यकृतसीमन्ता (२)प्रसूयेत कथञ्चन ।
गृहीतपुत्रा विधिवत् *पुनः संस्कारमर्हति ॥

सीमन्ते भोजने प्रायश्चित्तमुक्तं पराशरमाधवीये धौम्येन—

ब्रह्मौदने च सोमे च सीमन्तोन्नयने तथा ।
जातकर्मनवश्राद्धे भुक्त्वा चान्द्रायणं चरेत् ॥

ऋग्विधाने तु—

(३)अराइवे जपेन्मन्त्रं शतवारं न संशयः ।

त्वात् । अस्यानवलोभनस्य च तदुत्पन्नपुंस्त्वलोपकारणदुरितनाशार्थत्वात् । "माद्यं(?)पौत्रमघं नियाम्" इति मन्त्रलिङ्गात् । प्रतिगर्भकरणं तु सीमन्तोन्नयनस्य गर्भसंस्कारत्वं यस्यां शाखायामुक्तं तत्परमिति । *पुनरिति । यो यः संस्कारोऽतिक्रान्तः तं तं कुर्यादित्यर्थः ॥

---

(१) कात्यायनानां तु प्रतिगर्भमावर्तनीयमिति धर्मसिन्धुः ।

(२) 'प्रसवेत्तु' इति कश्यपः ।

(३) स तु मन्त्रो यथा—"अरा इवेदचरमा अहेव प्र प्र जायन्ते अ कवा महोभिः । पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या समिमि क्षुः ॥" इति (ऋ० सं० अ० ४ अ० ३.) । अस्यार्थः—'अरा इवेत् रथ शङ्कव इव अचरमा अनिकृष्टाः सर्वसमाः सहैवोत्पन्नाश्चेत्यर्थः । अह

सीमन्ते च यदा भुङ्क्ते मुच्यते किल्बिषात्तदा ॥ इति ।
अथ गर्भिणीतत्पतिधर्माः । वराहः—

सामिषमशनं यत्नात्प्रमदा परिवर्जयेदतः प्रभृति ।

गृह्यकारिका—

अङ्गारभस्मास्थिकपालचुल्ली-
शूर्पादिकेषूपविशेन्ननारी ॥
सोलूखलाद्ये दृषदादिके वा
यन्त्रे तुषाद्ये न तथोपविष्टा ।
नो मार्जनीगोमयपिण्डकादौ
कुर्यान्नवारिण्यवगाहनं सा
अङ्गारभृत्या न नखैर्लिखेत्क्ष्मां
कलिं वपुर्भङ्गमथो न कुर्यात् ।

गार्ग्यः—

यदि सीमन्ततः पूर्वं प्रसूता स्याच्च भामिनी ।
तदानीं पेटके बालं स्थाप्य संस्कारमाचरेत् ॥ इति ।

तथा च सीमन्तोन्नयनं कृत्वा द्वादशेऽन्हि जातकर्म कार्यम् । आशौचे सीमन्तस्य दुष्करत्वात् । यदि चाकृत एव सीमन्ते जातककर्म कृतं तदा व्यत्ययदोषपरिहारार्थं व्याहृतिहोमरूपं प्रायश्चित्तं कुर्यात् ।

अहाव दिवसा यथा षष्टिघटिकात्मकाः तद्वत्सप्तसंख्योपेतसप्तगणरूपेण समा इत्यर्थः । अनेन दृष्टान्तद्वयेन वै सादृश्याभावः प्रतिपादितः । एवमुक्तलक्षणा महोभिस्तेजोभिः प्रप्रजायन्ते प्रकर्षेण प्रादुर्भवन्ति । ते चाकवाः अनल्पाः । यद्वा महोभिरित्यस्य विशेषणम् । पृश्नेर्मध्यमिकाया वाचो गोरूपाया अन्तरिक्षस्य वा (पुत्राः) पुत्रस्थानीयाः उपमासः प्रत्येकं समानाः रभिष्ठाः प्रकृष्टवेगाः । एवं महानुभावा मरुतः स्वया मत्या स्वकीययैवानुग्रहबुद्ध्या संमिमिक्षुः वृष्ट्या सम्यक् सिञ्चन्ति' इति । अस्य मन्त्रस्य मरुद्देवतात्मकत्वात्तेषामेवास्मिन्प्रकरणे शुद्धिकरणसामर्थ्यमिति गम्यते ।

नो मुक्तकेशी विवशाथ वा स्याद्
*भुङ्क्ते न संध्यावसरे न शेते ॥
नामङ्गलं वाक्यमुदीरयेत्सा
शून्यालयं वृक्षतलं न यायात् ॥

विष्णुधर्मोत्तरे–

कटुतीक्ष्णकषायाणि अत्युष्णलवणानि च ।
आयासं च व्यवायं च गर्भिणी वर्जयेत्सदा ॥

हेमाद्रौ कौण्डिन्यः–

मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।

'आरभ्याधानमाचौलात्कालेऽतीते तु कर्मणाम् ।
व्याहृत्याऽऽज्यं सुसंस्कृत्य हुत्वा कर्म यथाक्रमम् ॥

इतिवाक्यप्रवृत्तेर्निष्पत्यूहत्वात् । ततः सीमन्तोन्नयनमेव कार्यं, न तु प्रायश्चित्तमात्रेण निर्वाहः । तस्य वैपरीत्यदोषपरिहारे उपक्षीणत्वात् । व्याहृतिहोमश्च गृह्याग्नेरभावे लौकिकाग्नौ कार्यः । न च सीमन्तोन्नयनं कुतः कार्यम् पादकृच्छ्राद्याचरणेन निर्वाहादिति वाच्यम् । तत्र स्त्रीसंस्कारानिर्वाहेण द्वितीयादिगर्भे गार्भिकदोषानुवृत्तिप्रसङ्गात्, प्रतिगर्भं पादकृच्छ्रादिप्रायश्चित्तापेक्षापत्तेश्च । एतदेवाभिप्रेत्य 'हुत्वा कर्म यथाक्रमम्' इति सङ्गच्छते।

कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चितः ।

इति तु व्यत्ययाभावस्थलपरम् । एवं च

अकृत्वा गां द्विजे दत्त्वा कुर्यात्पुंसवनं पतिः ।

इति वाक्यस्य क्रमपरत्वाद्यत्र गोदानमप्यकृत्वा पुंसवनं कृतं तत्र व्यत्ययप्रायश्चित्तं कृत्वा गर्भाधानं गोदानं वा कार्यम् । आरभ्याधानमित्यारभ्यपदोपादानस्वारस्याद् । एवं पुंसवनादेरप्यूह्यम् । ब्रह्मौदने आधानोपनयनयोः प्रसिद्धेः ।

न जीवत्पितृकः कुर्यादु[१]गुर्विणीपतिरेव च ॥

मिताक्षरायाम्-

उदन्वतोम्भसि स्नानं नखकेशादिकर्तनम् ।
अन्तर्वत्न्याः पतिः कुर्यान्न प्रजा जायते ध्रुवम् ॥

पृथ्वीचन्द्रोदये गारुडे-

गयायां पिण्डदानस्य*न कदाचिन्निराक्रिया ॥'

अत्र कालेदाप्रत्ययस्मृतेर्निषिद्धकालस्यैवापवादो न तु जीवत्पितृकगर्भिणीपत्याशौचादि[२]निमित्तस्य । निमित्तसंयोगस्य कालसंयोगाद्भेदेनापवादाभावात् । अग्निहोत्रवद्यावज्जीवित्वाभावात् । अन्यथाशौचेऽपि गयायात्रा श्राद्धं च स्यात् । यत्र निमित्तसंयोगस्यापवादो यथाशौचेऽग्निहोत्रादेः, यथा वा जीवत्पितृकस्यापवादो मातुर्गयान्वष्टकादौ तदेव भवति नान्यदिति संक्षेपः ।

प्रयोगपारिजाते कश्यपः-

'गर्भिणी कुञ्जराश्ववादिशैलहर्म्याधिरोहणम् ।
व्यायामंशीघ्रगमनं शकटारोहणं त्यजेत् ।

---

*भुङ्क्ते इति । संध्यावसरे न भुङ्क्ते संध्यावसरे न शेते इत्यन्वयः । न शेते इति शयालुत्वस्यापि निषेधः सामान्यतः शयननिषेधासम्भवात् । अथवा कश्यपः-

न शयालुः सदा तिष्ठेत् खट्वाछायां विवर्जयेत् ।
न शयीतोत्तरशिरा न चैवाधःशिराः क्वचित् ॥
न वस्त्रहीनानोद्विग्ना न चार्द्रावरणा सती ॥' इति ।

*न कदाचिन्निराक्रियेति । अत्र कालेदाप्रत्ययस्मृतेरित्यादिपाठः समञ्जसः । अधिकं तीर्थश्राद्धे वक्ष्यामः ।

---

(१) 'गर्भिणीपति' इति कपुस्तके ।

(२) 'निमित्तस्य । अग्निहोत्रे यावज्जीवत्कालपरत्वाभावात्' इति कं

शोकं रक्तविमोक्षं च साध्वसं कुक्कुटासनम्।
व्यवसायं दिवास्वापं रात्रौ जागरणं त्यजेत्॥

मदनरत्ने स्कान्दे—

हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा।
कूर्पासकं च ताम्बूलं माङ्गल्याभरणं शुभम्॥
केशसंस्कारकबरी करकर्णविभूषणम्।
भर्तुरायुष्यमिच्छन्ती वर्जयेद्गर्भिणी नहि॥

बृहस्पतिः—

चतुर्थे मासि *षष्ठे वाऽप्यष्टमे गर्भिणी यदा।
यात्रा नित्यं विवर्ज्या स्यादाषाढे तु विशेषतः॥

याज्ञवल्क्यः—

*दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात्।
वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः॥

दौर्हृदं गर्भिणीप्रियम्) तत्रैवाश्वलायनः—

वपनं मैथुनं तीर्थं वर्जयेद्गर्भिणीपतिः।
*श्राद्धं च सप्तमान्मासादूर्ध्वं(१)नान्यत्र वेदवित्॥

श्राद्धं तद्भोजनमिति प्रयोगपारिजातः। कालविधाने मुहूर्तदीपिकायां च—

क्षौरं शवानुगमनं नखकृन्तनं च
युद्धादि वास्तुकरणं त्वतिदूरयानम्।
उद्वाहमौपनयनं जलधेश्च गाह—

*षष्ठे वेति। शक्ताशक्तभेदेन विकल्पः। *दौहृदस्येति। गर्भस्यैकं हृत् गर्भिण्याश्चैकमिति द्विहृदा, तस्या इदं दौहृदम्। औच् आगमः, दौवारिकवत्। दर्शाब्दिकादिश्राद्धस्य निषेधायोगादाह-*श्राद्धमिति।

(१)'ऊर्ध्वं चान्यच्च वेदवित्' इति कपुस्तके।

मायुःक्षयार्थमिति गर्भिणीकापतीनाम् ॥
रत्नसङ्ग्रहे गालवः—
दहनं वपनं चैव चौलं वै गिरिरोहणम् ।
नाव आरोहणं चैव वर्जयेद्गर्भिणीपतिः ॥
अन्यत्रापि--
प्रव्यक्तगर्भापतिरब्धियानं
मृतस्य वाहं क्षुरकर्मसङ्गम् ।
तस्यां तु यत्नेन गयादितीर्थं
यागादिकं वास्तुविधिं न कुर्यात् ॥
प्रव्यक्तगर्भा वनिता भवेन्मासत्रयात्परम् ।
षण्मासात्परतः सूतिर्नवमेऽरिष्टवासिनी ॥
अथ सूतिकागृहप्रवेशः । गर्गः-
रोहिण्यैन्दवपौष्णेषु स्वातीवरुणयोरपि ।
पुनर्वसौ पुष्यहस्तधनिष्ठाद्युत्तरासु च ॥
मैत्रे त्वाष्ट्रे तथाश्विन्यां सूतिकागारवेशनम् ॥
एतच्च सम्भवे ।
प्रसूतिसमये काले सद्य एव प्रवेशयेत् ।
इति वसिष्ठोक्तेः । तच्च नैर्ऋत्यां कार्यम् ।
वारुण्यां भोजनगृहं नैर्ऋत्यां सूतिकागृहम् ।
इति वसिष्ठोक्तेः । विष्णुधर्मे-
दशाहं सूतिकागारमायुर्धैश्च विशेषतः ।

पाद्मे—
प्रविशेत् सूतिकागारं कृतरक्षं समन्ततः ।
प्राग्द्वारमुत्तरद्वारमथवा सुहृदं शुभम् ॥
देवानां ब्राह्मणानां च गवां कृत्वा च पूजनम् ।
एरण्डमूलचूर्णेन सघृतेन तथैव तु ॥

वह्निना तिन्दुकालातैः पूर्णकुम्भैः प्रदीपकैः ।
मुसलेन तथा वारिवर्णकैश्चित्रितेन च ॥ इति ।

अथ जातकर्म । पारिजाते वसिष्ठः—

*श्रुत्वा जातं पिता*पुत्रं सचैलं स्नानमाचरेत् ॥

सुखप्रसवनार्थाय पश्चात् कार्येऽनुलेपयेत् ॥ इति ।

ऋग्विधाने—

प्रभातदिने प्रसूयन्त्यां जपेद्गर्भविमोचनीम् ।
इन्द्रं च मनसा ध्यायेन्नारी गर्भं विमुञ्चति ॥

"विजिहीष्व वनस्पते" इति मन्त्रोदकं वा पाययेत् । अन्यत्रापि—महिषीदुग्धमिश्रमेरण्डतैलम् —

"हिमवत्युत्तरे पार्श्वे शबरी नाम पक्षिणी ।
तस्या नूपुरशब्देन विशल्या भवतु गर्भिणी ॥ स्वाहा"

इति मन्त्रेण पाययेदिति । रक्षा च विष्णुधर्मे—

दशाहं सूतिकागारमायुधैश्च विशेषतः ।
वह्निना तिन्दुकालातैः पूर्णकुम्भैः प्रदीपकैः ॥
मुसलेन तथा वारिवर्णकैश्चित्रितेन च ॥ इत्यादि ।

*पुत्रमिति । पुंस्त्वमविवक्षितम् । अनुवाद्यविशेषणत्वात् । श्रुत्वेति असन्निधौ श्रवणानन्तरं स्नानं, सन्निधौ तु तज्ज्ञानमात्रं विवक्षितम् ।

जातमात्रकुमारस्य मुखमस्यावलोकयेत् ।
पिता ऋणाद्विमुच्येत पुत्रस्य मुखदर्शनात् ॥

इति तु सम्भवाभिप्रायम् । कदाचित्पुत्रमुखादर्शने स्नाने विलम्बापत्तेः । इदञ्च स्नानं शीताद्भिः कार्यम् ।

कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च ।

इति जाबाल्युक्तेः । एवमिद रात्रावपि कार्यम्—

ग्रहणोद्वाहसंक्रान्तियात्रार्त्तिप्रस्रवेषु च ।

मनुः-

*प्राङ्नाभिवर्धनात्पुंसो जा(१)तकर्म विधीयते ।

स्नानं नैमित्तिकं कार्यं रात्रावपि न दुष्यति ॥

इति व्यासोक्तेः । ततः पिता स्पृश्यः,

माता शुध्येदशाहेन स्नानात्तु स्पर्शनं पितुः ॥

इति संवर्त्तोक्तेः । *प्रागिति । आशौचन्तु नाडीच्छेदानन्तरम् 'प्राक् नाडीच्छेदात्संस्कारपुण्यार्थान् कुर्वन्ति, नाड्यां छिन्नायाम् शौचम्' इति हारीतोक्तेः । पुण्यार्थो दानादिः । स्मृतिपुराणसदाचारप्राप्तः स नाडीच्छेदात् प्रागेव कार्य इत्यर्थः । प्रतिग्रहोऽ नाडीच्छेदात् । "प्रागेव कुमारप्रसवे नाड्यामच्छिन्नायां प्रतिग्रहे दोषः" इति शङ्खोक्तेः । तत्र विशेषः—

तत्र सर्वं प्रतिग्राह्यं कृतान्नं तु न भक्षयेत् ।

भक्षयित्वा तु तन्मोहाद् द्विजश्चान्द्रायणं चरेत् ॥

सूतके तु सकुल्यानामदोषं मनुरब्रवीत् ।

इति स्मृतेः । दानं च रात्रावपि कार्यम् ।

रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः ।

नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु ॥

इति व्यासोक्तेः । यद्यपि सूतकं जननोत्तरमेव प्रवर्त्तते हारीतोक्तौ अशौचपदोत्तरं पूर्णमित्यध्याहारात् , तथापि वृद्धिश्राद्धजातकर्मदानादावधिकारोऽस्ति, तत्र 'सूतके तु समुत्पन्ने' इति प्रजापतिना तात्कालिकशुद्धेरुक्तेः । एवं च स्नानोत्तरं संध्यादि भवति, दानार्थं दिनमनुज्ञातमादित्यपुराणे—

देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम् ।

---

(१)अत्र विशेषमाहाश्वलायनः । यथा-'कुमारं जातं पुराऽन्यैराल म्भात्सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राशयेत्-'प्र ते ददामि मधुनं घृतस्य वेदं सवित्रा प्रसूतं मघोनाम् ॥ आयुष्मान् गुप्तो देवताभिः शा जीव शरदो लोके अस्मिन्निति ।' इति ।

वर्धनं छेदनम्। हेमाद्रौ बैजवापः-

जन्मनोऽनन्तरं कार्यं जातकर्म यथाविधि।
दैवादतीतकालं चेदतीते सूतके भवेत्॥

पृथ्वीचन्द्रोदये विष्णुधर्मे-

अच्छिन्ननाभि कर्तव्यं*श्राद्धं वै पुत्रजन्मनि॥

पुत्रपदेन कन्यापि गृह्यते। तदाह तत्रैव काष्णाजिनिः-

प्रादुर्भावे पुत्रपुत्र्योर्ग्रहणे चन्द्रसूर्ययोः।
स्नात्वाऽनन्तरमात्मीयान् पितॄन् श्राद्धेन तर्पयेत्॥

एतच्च रात्रावपि कार्यम्।

पुत्रजन्मनि यात्रायां शर्वर्यां दत्तमक्षयम्।

इति तत्रैव व्यासोक्तेः। बैजवापः-

जातमात्र*कुमारस्य जातकर्म विधीयते।
स्तनप्राशनतः पूर्वं नाभिकर्तनतोऽपि वा॥

एतेन नैमित्तिकमपीदं जातेष्टिवदाशौचान्ते कार्यमिति शङ्का परास्ता। 'जाते कुमारे पितॄणामामोदात्पुण्यं तदहः' इति हारीतोक्तेश्च। अत्र श्राद्धमामेन हेम्ना वा

आयान्ति तस्मात्तदहः पुण्यं पूज्यं च सर्वतः॥
तत्र दद्यात्सुवर्णं तु भूमिं गां तुरगं रथम्।
छत्रं छागं च माल्यं च शयनं चासनं गृहम्॥
तिलपूर्णानि पात्राणि सहिरण्यानि पैत्रकम्। इति।

*श्राद्धमिति। एकपुत्रोत्पत्त्यनन्तरं स्नानादौ क्रियमाणे पुत्रान्तरोत्पत्तौ जातकर्मभेदेऽपि श्राद्धं तन्त्रेणैव विशेषाग्रहणात्। निमित्तपौर्वापर्ये तु निमित्तक्रमानुरोधेन श्राद्धभेदः,

द्विबहूनि निमित्तानि जायन्ते एकवासरे।
तत्र नैमित्तिकं कार्यं निमित्तानुक्रमोदयम्॥

इति वचनात्। *कुमारस्येति। पुंस्त्वाविवक्षया 'तूष्णीमेताः

कार्यमित्युक्तं पृथ्वीचन्द्रोदये आदित्यपुराणे—

(१)जातश्राद्धे तु पक्वान्नं*न दद्याद्ब्राह्मणेष्वपि। इ

हेमाद्रिस्तु—

पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान्।
न पक्वेन न चामेन कल्याणान्यभिकामयन्॥

इति संवर्तोक्तेर्हेम्नैवेत्याह। एतच्च जननाशौचे मर
शौचे च कार्यमित्याह मिताक्षरायां प्रजापतिः—

आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्।
कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुद्ध्यति।
मृताशौचस्य मध्ये तु पुत्रजन्म यदा भवेत्।

केचित्तु—

आशौचापगमे कार्यं जातकर्म यथाविधि॥

इति स्मृतिसंग्रहोक्तेराशौचान्ते कार्यमित्याहुः। स्मृ
र्थसारेऽपि विकल्प उक्तः।

क्रियाः स्त्रीणाम्' इति वाक्यान्तराद्वा कन्याया अपि जातकर्म
र्यम्, न तु नपुंसकस्येति मेधातिथिः। *न दद्यादिति। न
पक्वान्ननिषेधमात्रम्,

स्त्री शूद्रः स्वपचश्चैव जातकर्माणि वाऽथवा।
आमश्राद्धं सदा कुर्याद्विधिना पार्वणेन तु॥

इति प्राचेतसात्। स्वपचः स्वयंपचः। (२)अत्रामश्र
नैमित्तिकं, हेमश्राद्धं तु काम्यमित्येके। हेमश्राद्धमेव नैमित्ति
तदसंभवे आमश्राद्धमित्यन्ये। नैमित्तिकक्रममाहाचार्यः—

जातं कुमारं दृष्ट्वा तं स्नात्वाऽऽनीय गुरून् पिता।
नान्दीश्राद्धावसानं तु जातकर्म समाचरेत्॥ इति।

---

(१) 'जातश्राद्धे न दद्यात्तु पक्वान्नं ब्राह्मणेष्वपि' इतिकपुस्तके पाठः।
(२) 'अत्रामश्राद्धमित्यन्ये। नैमित्तिक' इत्येतावानेव पाठो 'घ'पुस्तके

*मृदुध्रुवचरक्षिप्रभेष्वेषामुदयेषु च ।
गुरौ शुक्रेऽथवा केन्द्रे जातकर्म च नाम च ॥

मृद्वादिलक्षणमाह श्रीधरः—

रोहिण्युत्तरभं स्थिरं गिरिशमूलेन्द्रोरगा दारुणं

---

*मृदित्यादि । जन्मकालातिक्रमे । तत्र जाबालिः—

जन्मनोऽनन्तरं कार्यं जातकर्म यथाविधि ।
दैवादतीतकालं चेदतीते सूतके भवेत् ॥ इति ।

पितरि ग्रामान्तरगते संन्यस्तादौ वा पितृव्यादिर्गोत्रजो ज्येष्ठक्रमेण जातकर्म कुर्यात् ।

पत्यौ मृते वा पतिते संन्यस्ते वा विदेशगे ।
तद्गोत्रजेन ज्येष्ठेन कार्याः पुंसवनादयः ॥
दीक्षान्ते दीक्षिता भर्त्रा जातकर्मादिकं चरेत् ।
पुंसवादीनि कर्माणि त्रीणि ज्येष्ठेन कारयेत् ॥
अकृतेऽन्यकृते कर्मण्यापत्सु स्वास्थ्यमागतः ।
दाने ब्राह्मणवाक्यैश्च पुत्रकर्म समाचरेत् ॥

इत्याश्वलायनोक्तेः । ज्येष्ठेनेति ज्येष्ठ एव प्रतिनिधिरित्येतदर्थम् । दीक्षितेन तु दीक्षाकाले स्वयमपि जातकर्म न कार्यं, नापि प्रतिनिधिद्वारा, किंत्ववभृथान्ते दीक्षाविमोके स्वयमेव कार्यम् । 'ज्येष्ठः कनिष्ठद्वारा पुंसवनादीनि त्रीणि न कारयेत्' इत्युक्त्या जातकर्म तु कारयेदिति सूच्यते । स्वयमकृतं निषिद्धप्रतिनिधिना कृतमप्यकृततामापन्नं कर्मातिक्रान्तं स्वयं कर्तुमसामर्थ्येऽपि नान्येन कारयेत्, किन्तु स्वास्थ्योत्तरं दानसहितब्राह्मणाशीर्भिः सोत्कर्षं पुत्रसंस्कारं कुर्यादित्यर्थः । एवं महारोगार्तः सत्यपि सामर्थ्ये स्वयं जातकर्म न कुर्यात् ।

रोगार्तेनस्तु तत्कालं स्पृशन्नन्येन कारयेत्,

क्षिप्रं चाश्विदिनेशपुष्यमनलेन्द्राग्नी तु साधारणम् ।
उग्रं पूर्वमघान्तकं मृदुगति त्वाष्ट्रान्त्यमैत्रं चरं
विष्णुस्वातिशतोडुवस्वदितयःकुर्युःस्वसंज्ञाफलम् ॥

अत्र सर्वत्र जातकर्मनामकर्मादावुक्तकालातिक्रमे नक्षत्रादिकं ज्ञेयम् ।

देशकालोपघाताद्यैः कालातिक्रमणं यदि ।
अनस्तगेऽज्येन्दुसिते तत्कार्यं चोत्तरायणे ॥

इति मदनरत्ने नारदोक्तेः । बृहस्पतिरपि—

मुख्यालाभे विधिज्ञेन विधिश्चिन्त्योऽप्रमादतः ।
नक्षत्रतिथिलग्नानां विचार्यैवं पुनः पुनः ॥

सूतके सन्ध्यादौ विशेषं वक्ष्यामः ।

*अथ जन्मनि दुष्टकालाः । तत्र गण्डान्तो ज्योतिर्निबन्धे नारदः—

*पूर्णानन्दाख्ययोस्तिथ्योः संधिर्नाडीद्वयं तथा ।
गण्डान्तं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु ॥
*कुलीरसिंहयोः *कीटचापयोर्मीनमेषयोः ।

यावत्स्वास्थ्यं भवेत्तावन्नाचरेज्जातकक्रियाम् ॥

इत्याश्वलायनोक्तेः । एतत्पूर्वोक्तं चाश्वलायनवचनं शिष्टपरिग्रहादिह दर्शितम् । जातकर्मानन्तरं कर्त्तव्यमाह वसिष्ठः—

दत्त्वा गोभूहिरण्यादि ततो लग्नं निरीक्षयेत् ।
अरिक्तपाणिर्दैवज्ञात् शृणुयात् पुत्रजन्मनि ॥ इति

'देशकालोपघाताद्यैः' इत्यत्र कालोपघातस्य दुष्टकालत्वोक्तेर्दुष्टकालमाह*—अथेति । *पूर्णेति । तिथिगण्डान्तलक्षणम् ॥ पूर्णाः पञ्चमी-दशमी-पूर्णिमाः, नन्दाः षष्ठी-एकादशी-प्रतिपदः । *कुलीरेति । लग्नगण्डान्तलक्षणम् । *कुलीरः कर्कटकः । *कीटः वृश्चिकः ।

गण्डान्तमन्तरालं स्याद्घटिकार्धं मृतिप्रदम् ॥
*सार्पेन्द्रपौष्णभेष्वन्त्यषोडशांशा भसंधयः ।
तदग्रभेष्वाद्यपादा भानां गण्डान्तसंज्ञकाः ॥

रत्नमालायाम्—

पौष्णाश्विन्योः सार्पपित्र्यर्क्षयोश्च
यच्च ज्येष्ठामूलयोरन्तरालम् ।

---

*सार्पेति । नक्षत्रगण्डान्तलक्षणम् । सार्पम् आश्लेषा, ऐन्द्रं ज्येष्ठा, पौष्णं रेवतिः । प्रयोगपारिजाते गर्गः—

अश्विनीमघमूलादौ त्रिपट्कनवनाडिकाः ।
रेवतीसार्पशक्रान्ते मासाश्वत्रर्तुसायकाः ॥
अश्विनीमघमूलादौ नाडिकाद्वितयं तथा ।
अश्विनीमघमूलानां पूर्वार्धे बाध्यते पिता ॥
पूषाहिशक्रे पश्चार्धे जननी बाध्यते शिशोः ।
पितृघ्नश्च दिवाजातो रात्रिजातस्तु मातृहा ॥
(दिवाजातः दिवसगण्डान्तजातः, एवं रात्रिजात इत्यादावपि)
आत्मघ्नः सन्ध्ययोर्जातो नास्ति गण्डे निरामयः ॥ इति ।

अश्विन्यादेरादिभागे ज्यादिसंख्याका रेवत्यादेरन्त्यभागे तु द्वादशादिसंख्याका घटिका दुष्टाः । तत्तदाद्यन्तभागस्थे द्वे द्वे घटिके दुष्टतरे । अश्विन्यादिभागो दिवा रेवत्याद्यन्तभागश्च रात्रौ दुष्टतमौ, तत्रापि द्वे द्वे घटिकेऽतिदुष्टतमे इत्यत्र तात्पर्यम् । अत एव नक्षत्रगण्डान्तशान्तौ निमित्ततारतम्येन नैमित्तिकतारतम्यम्-

कांस्यपात्रं प्रकुर्वीत पलैः षोडशभिर्नवम् ।
अष्टाभिश्च चतुर्भिर्वा द्वाभ्यां वा शोभनं तथा ॥

इति कांस्यपात्रपरिमाणचतुष्टयकथनादुपपद्यते । एवं चन्द्रनागीश्वरप्रतिमादावपि कर्षादिपरिमाणतारतम्यं बोध्यम् । ग्रन्थे तु 'अन्त्यषोडशांशा' 'आद्यपादा' इत्यभिधानादल्पदुष्टो गण्डान्तः प्रतीयते,

त(१)द्गण्डान्तं स्याच्चतुर्नाडिकं हि
यात्राजन्मोद्वाहकालेष्वनिष्टम् ॥

रत्नसंग्रहे नवनीतारिष्टे—

सर्वेषां गण्डजातानां परित्यागो विधीयते।
वर्जयेदर्शनं आद्यं तच्च षाण्मासिकं भवेत् ॥
तिथ्यर्क्षगण्डे पितृमातृनाशो
लग्ने तु संधौ तनयस्य नाशः।
सर्वेषु नो जीवति हन्ति बन्धून्
जीवन्पुनः स्याद्वहुवारणाश्वः ॥

अथैषां दानमुत्तरगार्ग्ये—

*तिथिगण्डे त्वनड्वाहं*नक्षत्रे धनुरुच्यते।

तत्रापि दुष्टगण्डान्तशान्तिः कार्या। अत्र गोमुखप्रसवो नित्यः।

पित्ररिष्टे सुतारिष्टे मात्रिरिष्टे तथैव च।
प्रायश्चित्तं ततः कुर्यात्तत्तद्दोषस्य शान्तये ॥

इति गर्गोक्तेः। यन्नक्षत्रादावुत्पन्ना पित्राद्यरिष्टं सूच्यते तद्दोषशान्तये गोमुखप्रसवसंज्ञं प्रायश्चित्तं कुर्यादित्यर्थः। एवं सति

पूषाश्विनोर्गुरौ सर्पमघाचित्रेन्द्रमूलभे।
एषु ऋक्षेषु जातस्य कुर्याद्वोजननं तथा ॥

इति गर्गवाक्येन 'पित्ररिष्टे' इत्यनेन प्राप्तस्य मूलादौ पुनर्विधानं यत्र मूलादेश्चतुर्थपादादौ न दोषस्तत्रापि तत्प्राप्त्यर्थम्। तथाशब्दश्च तत्तन्नक्षत्रादिशान्तिसमुच्चायकः। पुष्यनक्षत्रे तु गोप्रसवमात्रं 'गुरौ' इत्युक्तेः, न तु तदन्या काचन शान्तिरनुक्तत्वात्। "उत्तरातिष्यचित्रासु" इति वाक्ये तिष्यपदं गोमुखप्रसवमात्रार्थम्। *तिथिगण्डे त्विति।

अमुक्तेतरजातस्य सूतकान्त्यदिनेऽथवा।

---

(१) 'त्याद्गण्डान्तम्' इति खगपुस्तकयोः।

काञ्चनं लग्नगण्डे तु गण्डदोषो विनश्यति ॥
*उत्तरे तिलपात्रं स्यात्पुष्ये गोदानमुच्यते ।
अजाप्रदानं त्वाष्ट्रे स्यात्पूर्वाषाढे च काञ्चनम् ॥
उत्तरापुष्यचित्रासु पूर्वाषाढोद्भवस्य च ।
कुर्याच्छान्तिं प्रयत्नेन नक्षत्राकारजं बुधः ॥

अथाश्लेषाफलम् ।

मूर्धास्यनेत्रगलकांसयुगं च बाहु-
हृज्जानुगुह्यपदमित्यहिदेहभागः ।
बाणाद्रिनेत्रहुतभुक्श्रुतिनागरुद्र-
षण्नन्दपञ्चशिरसः क्रमशस्तु नाड्यः ॥

शान्तिं शुभेऽन्हि वा कुर्यात्तावत्पुत्रं न लोकयेत् ॥

इति श्लोकोऽस्ति । तथा चायमर्थः—यद्यप्युदाहृतोत्तरगार्ग्यस्मृतौ तिथिगण्डादावुत्तरादिचतुष्टये च दानशान्ती कर्तव्यत्वेन प्राप्ते, तथाऽपि सर्वेषामेतत्कालानामुत्तरार्धजन्मनि शान्तिरेव कार्या, न तु बहिःप्रयोगं दानमपि, 'अभुक्तेतरजातस्य' इति वचनात् , तिथिगण्डादिरुत्तरादिश्च यः कालस्तेषां योऽभुक्तः पूर्वार्धं इति यावत् , तदितर उत्तरार्धस्तज्जातस्य शान्तिमेव कुर्यादिति ह्यर्थः । पूर्वार्धजन्मनि दोषाधिक्यादानमप्याह—तिथिगण्डे त्विति । *नक्षत्रे नक्षत्रगण्डे ज्येष्ठामूलादिसन्धौ । एतच्चाग्रिमं च दानं निमित्तानन्तरं नालच्छेदात्पूर्वं गण्डोत्तरार्धाद्यधिकरणकं, सप्तमीनिर्देशात् । शान्तिरपि सूतकानन्तरं कार्या उत्तरार्द्धजन्मनि तु केवलशान्तिः । *उत्तरे इति । उत्तरादेः पूर्वार्द्धजन्मनि दानानि कार्याणि उत्तरार्द्धापेक्षया पूर्वार्द्धे गण्डवद्दोषाधिक्यात् । शान्तिश्च पूर्वोत्तरार्द्धयोर्जन्मनि 'प्रयत्नेन'इत्युक्तेः । नक्षत्राकारजं 'रूपं कृत्वा' इति शेषः । एवं सति या—

'चित्राद्यर्द्धे पुष्यमध्याद्विपादे पूर्वाषाढाधिष्ण्यपादे तृतीये ।

राज्यं पितृक्षयो मातृनाशः कामक्रियारतिः ।
पितृभक्तो बली स्वघ्नस्त्यागी भोगी धनी क्रमात् ॥

अथ ज्येष्ठाफलम् । ब्रह्मयामले—

ज्येष्ठादौ जननीमाता द्वितीये जननीपिता ।
तृतीये जननीभ्राता स्वयं माता चतुर्थके ॥
आत्मानं पञ्चमे हन्ति षष्ठे गोत्रक्षयो भवेत् ।
सप्तमे चोभयकुलं ज्येष्ठभ्रातरमष्टमे ॥
नवमे श्वशुरं हन्ति सर्वं हन्ति दशांशके ॥ इति ॥

अथ मूलफलम् । भल्लादः-

अभुक्तमूलसम्भवं परित्यजेत्तु बालकम् ।
समाष्टकं पिताऽथवा न तन्मुखं विलोकयेत् ॥
तदाद्यपादके पिता द्वितीयके जनन्यथ ।
धनक्षयस्तृतीयके चतुर्थकः शुभावहः ॥
प्रतीपमन्त्यपादतः फलं तदेव सार्पभे ।

अभुक्तमूलं त्वाह वृद्धवासिष्ठः—

ज्येष्ठान्ते घटिका चैका मूलादौ घटिकाद्वयम् ।
अभुक्तमूलमित्याहुस्तत्र जातं शिशुं त्यजेत् ॥

केचिज्ज्येष्ठान्त्यं मूलाद्यं च पादमभुक्तमूलमाहुः ।

कश्यपसंहितायां त्वन्यथोक्तम्—

मूलाद्यपादजो हन्ति पितरं तु द्वितीयजः ।
मातरं स्वां तृतीयोऽर्थान् सुहृदं तत्तुरीयजः ॥
फलं तदेव सार्पर्क्षे प्रतीपं त्वन्त्यपादतः ॥

अथ मूलवृक्षः । जयार्णवे-

मूलं स्तम्भं त्वचा शाखा पत्रं पुष्पं फलं शिखा ।

जातःपुत्रश्चोत्तराद्ये विधत्ते पित्रोर्भ्रातुः स्वस्य चापि प्रणाशम् ॥

इति नृसिंहप्रसादे उत्तरादीनां निषिद्धपादव्यवस्था, सापि मतिभापरिमाणवृद्धिहोमसंख्यावृद्ध्यर्था ।

वेदाश्च मुनयश्चैव दिशश्च वसवस्तथा ॥
नन्दा बाणा रसा रुद्रा मूलभेदः प्रकीर्तितः ।
मूले मूलविनाशाय स्तम्भे हानिर्धनक्षयः ॥
त्वचि भ्रातृविनाशाय शाखा मातृविनाशकृत् ।
पत्रे सपरिवारः स्यात्पुष्पेषु नृपवल्लभः ॥
फलेषु लभते राज्यं शिखायामल्पजीवितम् ॥

अन्यत्र त्वन्यथोक्तम्--

'मूले सप्तघटीषु मूलहननं, स्तम्भेऽष्टसु स्वक्षयम्
त्वग्दिग्बन्धुविनाशनं, च विटपे रुद्रैर्हतो मातुलः ।
पत्रेऽर्कैः सुकृती, तु बाणकुसुमे मन्त्री, फले सागरै
राजा, बहिशिखाल्पमायुरिति सन्मूलाङ्घ्रिपे स्यात्फलम्॥

भूपालवल्लभः-

वृषालिसिंहेषु घटे च मूले
दिवि स्थितं, युग्मतुलाङ्गनान्त्ये ।
पातालगं, मेषधनुःकुलीर-
नक्रेषु मर्त्येष्विति संस्मरन्ति ॥

स्वर्गे मूले भवेद्राज्यं पाताले चेद्धनागमः ।
मर्त्यलोके यदा मूलं तदा शून्यं समादिशेत् ॥

वसिष्ठः--

नैर्ऋत्यभोद्भूतसुतः सुता वा
क्षिप्रादवश्यं श्वशुरं निहन्ति ।
तदन्त्यपादे जनितो न हन्ति
तस्योत्क्रमेणाहिभवे कलत्रम् ॥
सुरेशताराजनिता धवाग्रजं
द्विदैवताराजनिता तु देवरम् ।

पुरन्दरर्क्षे जनितः सुतस्तथा
स्वस्याग्रजं हन्ति न पुत्रिका यदि ॥

प्रयोगपारिजाते—

मूलजा श्वशुरं हन्ति *व्यालजा च तदङ्गनाम् ।
*माहेन्द्रजाऽग्रजं हन्ति देवरं तु *द्विदैवजा ॥

नृसिंहप्रसादे—

धवाग्रजं हन्ति सुरेन्द्रजाता
तथैव पत्न्या भगिनीं पुमांश्च ।
द्विदैवजा देवरमाशु हन्या-
दर्थानुजामाशु निहन्ति सुनुः ॥

पत्न्यग्रजामग्रजं वा हन्ति ज्येष्ठर्क्षजः पुमान् ।
तथा भार्यास्वसारं वा शालकं वा द्विदैवजः ॥
कन्यका देवरं हन्ति विशाखान्त्यसमुद्भवा ।
आद्यपादत्रये नैव आद्यभे तु पुमान् भवेत् ॥
न हन्यादेवरं कन्या तुलामिश्रा द्विदैवजा ।
तद्वत्तान्तोद्भवा वर्ज्या दुष्टा वृश्चिकपुच्छवत् ॥
चित्राद्यर्धे पुष्यमध्ये द्विपादे
पूर्वाषाढाधिष्ण्यपादे तृतीये ।
जातः पुत्रश्चोत्तराद्ये विधत्ते
मा(१)तापित्रोर्भ्रातरं बालनाशम् ॥
द्विमासं चोत्तरादोषः पुष्ये चैव त्रिमासकः ।
पूर्वाषाढाष्टमे मासि चित्रा षाण्मासिकं फलम् ।
नवमासं तथाश्लेषा मूले चाष्टाकवर्षकम् ।

---

*व्याल आश्लेषा । *माहेन्द्रं ज्येष्ठा । *द्विदैवं विशाखा

---

(१) 'पित्रोर्भ्रातुः स्वस्य चापि प्रणाशम्' इति पाठान्तरम् ।

ज्येष्ठा पञ्चदशे मासि पुत्रदर्शनवर्जिता ॥

वसिष्ठः—

*व्यतीपातेऽङ्गहानिः स्यात्परिघे मृत्युमादिशेत् ।
वैधृतौ पितृहानिः स्यान्न*ष्टेन्दावन्धतां व्रजेत् ॥
मूले समूलनाशः स्यात्कुलनाशो धृतौ भवेत् ।
विकृताङ्गश्च हीनश्च संध्ययोरुभयोरपि ॥
पर्वण्यपि प्रसूतौ च सर्वारिष्टभयप्रदः ।
तद्वत्सदन्तजातश्च पादजातस्तथैव च ॥
विपरीतप्रसूतौ तु नाभिनालेन वेष्टितः ।
राष्ट्रस्य नृपतेश्चैव स्वस्यापि च विनाशकः ॥
तस्माच्छान्तिं प्रकुर्वीत ग्रहाणां क्रूरचेतसाम् ॥

गर्गः—

*कृष्णां चतुर्दशीं षोढां कुर्यादादौ शुभं स्मृतम् ।

*व्यतीपाते इति । व्यतीपातवैधृतिसंक्रमजन्मनि गोमुखप्रसवं कृत्वा शान्तिः कार्या,

अथातः संप्रवक्ष्यामि शौनकः शान्तिमुत्तमाम् ।
कुमारजन्मकाले तु व्यतीपातश्च वैधृतिः ॥
संक्रमश्च रवेस्तत्र जातो दारिद्र्यकारकः ।
गोमुखप्रसवं कृत्वा कुर्यात् शान्तिं प्रयत्नतः ॥

इति शौनकोक्तेः । *नष्टेन्दाविति । चतुर्दशीविद्धा अमा सिनीवाली, प्रतिपद्विद्धा कुहूः, वेधद्वयरहितो दर्शः, पृथक्शान्तिनिमित्तप्रविष्टानि । तदुक्तम्—'खण्डामायां सिनीवाली—कुहू—जननशान्तिः, अखण्डायां तु दर्शजननशान्तिः' इति । ज्यौतिषे तु—

दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूः स्मृता ।

इति वाक्ये नष्टचन्द्रेत्यस्यादृष्टचन्द्रेत्यर्थः । तथा च दर्शनयोग्यचन्द्रोपलक्षिता कुहूः । सूर्योदयोत्तरं प्रतिपदघटीषु(?) प्रवृत्त्या दर्श इति भेद उक्तः । *कृष्णामिति । कृष्णचतुर्दशीजनने ।

द्वितीये पितरं हन्ति तृतीये हन्ति मातरम् ॥
चतुर्थे मातुलं हन्ति पञ्चमे वंशनाशनम् ।
षष्ठे तु धननाशः स्यादात्मनो वंशनाशनम् ॥
तस्मात्सर्वप्रयत्नेन शान्तिं कुर्याद्विधानतः ॥

अथ पित्रोर्नक्षत्रे जन्मदोषः । तत्र देवकीर्तिः—

यद्येकस्मिन्धिष्ण्ये जायन्ते दुहितरोऽथ वा पुत्राः ।
पितुरन्तकरा ह्येते यद्यपरे प्रीतिरतुला स्यात् ॥

गर्गः—

एकस्मिन्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः ।
प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्य निश्चितम् ॥

शौनकः—

ग्रहणे चन्द्रसूर्यस्य प्रसूतिर्यदि जायते ।
व्याधिपीडा तदा स्त्रीणामादौ तु ऋतुदर्शनात् ॥
इत्थं संजायते यस्य तस्य मृत्युर्न संशयः ॥

शान्तिस्तु-

तदृक्षाधिपते रूपं सुवर्णेन प्रकल्पयेत् ।
सूर्यग्रहे सूर्यरूपं हैमं, चन्द्रं तु राजतम् ॥
राहुरूपं प्रकुर्वीत नागेनैव विचक्षणः ।
(नागः सीसम् ।)
त्रयाणां चैव रूपाणां स्थापनं तत्र कारयेत् ॥
'आकृष्णेन' 'आप्यायस्व' 'स्वर्भानोः' इति पूजामन्त्राः ।
नक्षत्रदेवतायास्तन्मन्त्रेण ।
संपूज्य तु यजेत्सूर्यं समिद्भिश्चार्कसंभवैः ।
चन्द्रग्रहे च पालाशैर्दूर्वाभी राहुमेव च ॥
समिद्भिर्विल्ववृक्षस्य भेशाय जुहुयाद्बुधः ।

आज्येन चरुणा चैव तिलैश्च जुहुयात्ततः ॥
पञ्चगव्यैः पञ्चरत्नैः पञ्चत्वक्पञ्चपल्लवैः ।
जलैरोषधिकल्कैश्च अभिषेकं समाचरेत् ।
मन्त्रैर्वारुणसंभूतैरापोहिष्ठादिभिस्त्रिभिः ॥
इमं मे गङ्गे पुरतस्तत्त्वायामीति मन्त्रकैः ।
यजमानस्ततो दद्याद्धेत्या प्रतिकृतित्रयम् ॥ इति ।

मात्स्ये—

*अकालप्रसवा नार्यः कालातीतप्रजास्तथा ।
विकृतप्रसवाश्चैव*युग्मप्रसवकास्तथा ॥
अमानुषा अमुण्डाश्च अजातव्यञ्जनास्तथा ।
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः ॥
पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत् ॥
निर्वासयेत्तान् नगरात्ततः शान्तिं समाचरेत् ॥

पाद्मे—

*उपरि प्रथमं यस्य जायन्ते च शिशोर्द्विजाः ।
दन्तैर्वा सहयस्य स्याज्जन्म भार्गवसत्तम ! ॥
द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा ।

---

*एकस्मिन्नेवेत्येकनक्षत्रजनने । *ग्रहणे इति । ग्रहणजनने ।

*अकालप्रसवा इति । अत्र देशनाशं कुलनाशं च वारयितुं शान्तिरित्यर्थः । प्रसववैकृतानां कौस्तुभादौ विस्तरः । *युग्मप्रसवका इति । यमलजनने । *उपरीति । प्रथममुपरिदन्तोत्पत्तौ । सदन्तजनने च पारिजाते वृद्धगार्ग्यः—

विषनाडीषु सञ्जातः पितृघातृधनात्मनाम् ।
नाशकृद्विषशस्त्राद्यैः क्रूरे लग्नेऽशगेऽपि वा ॥

विषघटीश्च—

यदा दन्ताश्च जायन्ते मासे चैव सहद्वयम् ॥
मातरं पितरं वाऽथ खादेदात्मानमेव च ।
गजपृष्ठगतं बालं नौस्थं वा स्थापयेद् द्विज ! ॥
तदभावे तु धर्मज्ञ काञ्चने वा वरासने ।
सर्वौषधैः सर्वगन्धैर्बीजैः पुष्पैः फलैस्तथा ॥
पञ्चगव्येन रत्नैश्च पताकाभिश्च भार्गव ! ।
स्थालीपाकेन धातारं पूजयेत्तदनन्तरम् ॥
सप्ताहं चात्र कर्तव्यं तथा ब्राह्मणभोजनम् ।
भद्रासने निवेश्यैनं मृद्भिर्मूलैः फलैस्तथा ॥
सर्वौषधैः सर्वगन्धैः सर्वबीजैस्तथैव च ।
स्नापयेत्पूजयेच्चात्र वह्निं सोमं समीरणम् ॥
पर्वतांश्च तथा ख्यातान् देवदेवं च केशवम् ।
एतेषामेव जुहुयाद् घृतमग्नौ यथाविधि ॥
ब्राह्मणानां तु दातव्या ततः संपूज्य दक्षिणा ॥

ब्रह्मयामले—

प्रथमं दन्तनिर्मुक्तिरूर्ध्वं बालस्य चेद्भवेत् ।
क्लेशाय मातुलस्येह तदा प्रोक्ता मनीषिभिः ॥
सौवर्णं राजतं वापि ताम्रं कांस्यमयं तु वा ।

तिथीषुनागाद्रिगिरीशवारिधि-
र्गजाद्रिदिक्पावकदिक् च भास्करः ।
मुनीभसङ्ख्या प्रथमादितिथेः क्रमात्
परं विषाख्यं घटिकाचतुष्टयम् ॥ इति ।

अस्यार्थः-तिथि १५, इषु५, नाग८, अद्रि७, गिरि७, ईश११, वारिं ४, गज८, अद्रि ७, दिक् १०, भास्कर १२, मुनि ७, इभ ८। एवञ्च प्रतिपत्तिथौ पञ्चदशघटिकोत्तरं घटिकाचतुष्टयं विषम् । द्वितीयायां पञ्चघटिकोत्तरमित्यादि ।

दध्योदनेन संपूर्णं पात्रं दद्याच्छिशोः करे ॥
समन्त्रं भाजनं दत्त्वा स पश्येन्मातुलः शिशुम् ॥
तत्र मन्त्रः—
रक्ष मां भगिनेय ! त्वं रक्ष मे सकलं कुलम् ।
गृहीत्वा भाजनं सान्नं प्रसन्नो भव सर्वदा ॥
निर्विघ्नं कुरु कल्याणं निर्विघ्नां च स्वमातरम् ।
मय्यात्मानमधिष्ठाप्य चिरं जीव मया सह ॥
एवं कृते विधाने तु विघ्नः कोऽपि न जायते । इति ॥

दिशश्चतुर्द्वादशादिक् (१)च शैला
बाणश्च तत्त्वानि यथाक्रमेण ।
सूर्यादिवारेषु भवन्त्यनन्तरं
नाड्यो विषाख्यं घटिकाचतुष्टयम् ॥
(२)खमार्गणा वेदपक्षाः खरामा व्योमसागराः ।
वार्धिचन्द्रा रूपदस्राः खरामा व्योमबाहवः ॥
द्विरामा खाग्नयः शून्यदस्राः कुञ्जरभूमयः ।
रूपपक्षा व्योमदस्रा वेदचन्द्राश्चतुर्दश ॥
शून्यचन्द्रा वेदचन्द्रा षडक्षा वेदबाहवः ।
शून्यदस्रा शून्यचन्द्रा पूर्णचन्द्रा गजेन्दवः ॥
तर्कचन्द्रा वेदपक्षाः खरामाश्चाश्विनीक्रमात् ।
एभ्यः पराः स्युर्घटिकाश्चतस्रो विषसंज्ञिताः ॥ इति ।
पारिजाते गार्ग्यः—

---

(१) दिक् १०, शैल ७, बाण ५, तत्त्व २५ ।

(२) खमार्गण ५०, वेदपक्ष २४, खराम ३०, व्योमसागर ४०, वार्धिचन्द्र १४, रूपदस्र २१, खराम३०, व्योमबाहु २०, द्विराम३२, खाग्नि ३०, शून्यदस्र २०, कुञ्जरभूमि १८, रूपपक्ष २१, व्योमदस्र २० वेदचन्द्र १४, शून्यचन्द्र१०, वेदचन्द्र १४, षडक्ष ५६, वेदबाहु२४, शून्यदस्र२०, शून्यचन्द्र१०, पूर्णचन्द्र१०, गजेन्दु१८, तर्कचन्द्र १६, वेदपक्ष २४, खराम३०।

अथ (१)त्रिकप्रसवशान्तिः । शान्तिसर्वस्वे—

सुतत्रये सुता चेत्स्यात् तत्त्रये वा सुतो यदि ।
मातापित्रोः कुलस्यापि तदाऽनिष्टं महद्भवेत् ॥
ज्येष्ठनाशो धने हानिर्दुःखं वा सुमहद्भवेत् ।
तत्र शान्तिं प्रकुर्वीत वित्तशाठ्यविवर्जितः
जातस्यैकादशाहे वा द्वादशाहे शुभे दिने ।
आचार्यमृत्विजो वृत्वा ग्रहयज्ञं सरः सरम् ॥
ब्रह्मविष्णुमहेशेन्द्रप्रतिमाः स्वर्णतः कृताः ।
पूजयेद्धान्यराशिस्थकलशोपरि शक्तितः ॥
पञ्चमे कलशे रुद्रं पूजयेदुद्रसंख्यया ।
रुद्रसूक्तानि चत्वारि शान्तिसूक्तानि सर्वशः ॥

अथातः संप्रवक्ष्यामि जन्मकाले विशेषतः ।
गण्डान्तानां च नामानि महादोषकराणि च ॥
दिनक्षये व्यतीपाते व्याघाते विष्टिवैधृतौ ।
शूले गण्डेऽतिगण्डे च परिघे यमघण्टके ॥
कामगण्डे मृत्युरोगे दग्धयोगे च दारुणे ।
तस्मिन् गण्डादिने प्राप्ते प्रसूतिर्यदि जायते ॥
अतिदोषकरी प्रोक्ता तस्मिन् पापयुते सति ।

'पापयुते सति' इत्युक्तेः विष्ट्यादौ निषिद्धांशयुक्ते जन्मनि दोषाधिक्यम्, भद्रापुच्छादौ च दोषोऽल्प इत्यर्थः। योगानां निषिद्धांशाः मलमासशेषे प्रथमे ग्रन्थ एवोक्ताः—"विरुद्धसंज्ञा इह योगा" इत्यादिः ।

अथ यमघण्टकः ।

अर्कारतमसौम्यार्यमन्दा यद्येकराशिगाः ।
कण्टकाख्यो महादोषः सर्वकर्मविनाशनः ॥

आरो भौमः, तमो राहुः, आर्यो गुरुः, मन्दः शनिः । कौस्तुभे विस्तारः ।

---

(१) त्रिकशान्तिरिति पाठो घ पुस्तके

द्विज एको जपेद्धोमकाले शुचिसमाहितः।
आचार्यो जुहुयात्तत्र समिदाज्यतिलांश्चरुम्॥
अष्टोत्तरसहस्रं वा शतं वा त्रिंशतं तु वा।
देवताभ्यश्चतुर्थ्यन्तादिभ्यो ग्रहपुरःसरम्।
ब्रह्मादिमन्त्रैरिन्द्रस्य यतइन्द्रभयामहे।
ततः स्विष्टकृतं हुत्वा बलिं पूर्णाहुतिं ततः॥
अभिषेकं कुटुम्बस्य कृत्वाचार्यं प्रपूजयेत्।
हिरण्यं धेनुरेका च ऋत्विजां दक्षिणा ततः॥
आज्यस्य वीक्षणं कृत्वा शान्तिपाठं तु कारयेत्।
प्रतिमा गुरवे दत्त्वा उपस्करसमन्विताः।
ब्राह्मणान् भोजयेच्छक्त्या दीनाऽनाथांश्च तर्पयेत्।
एवं शान्तिविधानेन सर्वारिष्टं प्रलीयते॥ इति।

अन्येषु मूलाद्यृक्षेषु शान्त्यादि प्रयोगपारिजाते मत्कृते शान्तिरत्ने च ज्ञेयम्॥

मिताक्षरायां मार्कण्डेयः—

रक्षणीया तथा षष्ठी निशा तत्र विशेषतः।
रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः॥
पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः।
रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतके॥

व्यासः—

सूतिकावासनिलया जन्मदा नाम देवता।
तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता॥
प्रथमे दिवसे षष्ठे*दशमे चैव सर्वदा।

*दशमे चैवेति। चकारेण पञ्चमाष्टमौ ग्राह्यौ।
दद्यात्तु प्रथमे हेम षष्ठे वा सप्तमेऽपि वा।
बलिदानं च दशमे ह्यन्नदानं प्रशस्यते॥

त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि ॥

अपरार्के ब्राह्मे—

कन्याश्चतस्रो राकाद्या वातघ्नी चैव पञ्चमी ।
क्रीडनार्था च बालानां षष्ठी च शिशुरक्षिणी ॥
खड्गे तु पूजनीया वै वैश्यैर्व्रात्यैर्द्विजातिभिः ॥

राका, अनुमतिः, सिनीवाली, कुहूरिति चतस्रः कन्या इत्यर्थः।

अथ दत्तपुत्रपरिग्रहविधिः । पारिजाते शौनकः—

*अपुत्रो मृतपुत्रो वा*पुत्रार्थं समुपोष्य च।

इति वाक्याच्च ।

*अपुत्रो मृतपुत्रो वेति उद्देश्यविशेषणतया उपादेयमपि राजत्ववदधिकारिसंकोचकम् ।

वन्ध्या वा मृतपुत्रा वा पुत्रार्थं समुपोष्य च ।

इति वाक्यान्तरे वन्ध्यात्वाद्यपि तथा । *पुत्रार्थमिति । अत्र चास्मदादीनाम् अस्य पुत्रस्य च विद्यमानपितृपुत्रभावादिसम्बन्धनिमित्तककार्यनिवृत्तये अस्मै अमुकशर्मणे अमुकगोत्राय इमं पुत्रं दास्यामीति दातुरुल्लेखः । प्रतिग्रहीतुस्तु पूर्वदिने उपवासं कृत्वा परदिने बन्धूनाहूय प्रतिग्रहं राज्ञे कथयित्वा ग्रहीष्यमाणपुत्रस्य तज्जनकादीनां च पितृपुत्रभावादितत्तत्संबन्धनिवृत्तिद्वारा तत्प्रयुक्तकार्यनिवृत्तिपूर्वकमस्मदादीनां तस्य च परस्परं पितृपुत्रभावादितत्तत्सम्बन्धप्रवृत्तिद्वारा तत्प्रयुक्तकार्यप्रवृत्तये पुत्रं प्रतिग्रहीष्ये इति । इदं केवलदत्तके । द्व्यामुष्यायणे त्वस्मदादीनामस्य पुत्रस्य च पितृपुत्रभावादिसम्बन्धसत्त्वेऽप्यस्य पितृपुत्रभावादिसम्बन्धसिद्धये इमं पुत्रं दास्यामि, इति दातुरुल्लेखः । एवम् अस्य पुत्रस्य तज्जनकादीनां च पितृपुत्रभावादिसम्बन्धसत्त्वेऽप्यस्मदादीनां पितृपुत्रभावादिसम्बन्धसिद्ध्यर्थं पुत्रं प्रतिग्रहीष्ये इत्युल्लेखः । दातृप्रतिग्रहीत्रोः स्वस्य प्रतिग्रहीतृदात्रोश्च नामगोत्राद्यु-

*वाससी कुण्डले दत्त्वा उष्णीषं चाङ्गुलीयकम् ॥
बन्धूनन्नेन संभोज्य *ब्राह्मणांश्च विशेषतः ।
*अन्वाधानादि यत्तन्त्रं कृत्वाज्योत्पवनान्तकम् ॥
*दातुः समक्षं गत्वा तु पुत्रं देहीति*याचयेत् ।
*दाने*समर्थो दाताऽस्मै ये यज्ञेनेति पञ्चभिः ॥

ल्लेख उभयत्रापि द्रष्टव्यः । 'पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि निवेद्य' इति वासिष्ठात् । 'राजा च ग्रामपालः' इत्याहुः । गणेशार्चनादि नान्दीश्राद्धान्तं तूभयोरपि । *वाससी कुण्डले दत्त्वेति । प्रयोगपारिजाते नन्दपण्डितीये चायमेव पाठः । इदं वरणविधिना वृताचार्याय दानम् । 'दत्त्वा' इत्यस्य 'आदाय' इत्यनेन समानकर्तृकत्वात्, न तु प्रतिग्रहीष्यमाणपुत्राय दातृसमक्षमेवेदानीमगमनात् । आचार्याय तदानं च धृतवासोद्वयोष्णीषकुण्डलस्याचार्यस्य दातुर्गृहे नयनार्थम् , तेन प्रतिग्रहीतुरापत्तिशून्यत्वं व्यज्यत इत्यप्याहुः । पुत्रार्थमपि वाससी कुण्डले उष्णीषमङ्गुलीयकं च सम्पाद्य मूर्द्धनीत्यन्तरम्—

वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम् ।
नृत्यगीतैश्च वाद्यैश्च स्वस्तिशब्दैश्च संयुतम् ॥

इति ग्रन्थावधृतशौनकवाक्यात् । छायावहं सदृशम् । तत्र 'वस्त्रादिभिः' इति आदिना कुण्डलादिग्रहः । दत्त्वेत्यस्याचार्याधीनं कृत्वेत्यर्थे तु आचार्याय तदानं लुप्यते,

वाससी कुण्डले छत्रमुष्णीषं चाङ्गुलीयकम् ।

इति पठतां मते इव । *ब्राह्मणान् त्रीन् , बहुवचनात् । *अन्वाधानादीति । आचार्यकृत्यम् । *दातुरिति । ग्रहीतृकृत्यम् । *याचयेदिति । णिजविवक्षितः । आचार्यादिरन्य एव कश्चन याचेत् । अयं तु याचयेदिति स विवक्षित इत्यन्ये । *दाने इति दातृकृत्यम् । दत्त्वेति क्त्वाप्रत्ययः, दातेति तृच्पाठे दद्यादिति

*देवस्य त्वेति मन्त्रेण हस्ताभ्यां परिगृह्य च ।
अङ्गादङ्गेत्यृचं जप्त्वा आघ्राय शिशुमूर्धनि ॥
गृहमध्ये त*मादाय *चरुं हुत्वा विधानतः ।
*यस्त्वाहृदेत्यृचा चैव तुभ्यमग्न ऋचैकया ॥
सोमो दददित्येताभिः प्रत्यृचं पञ्चभिस्तथा ।
स्विष्टकृदादिहोमं च कृत्वा शेषं समापयेत ॥

*स च—

शेषः । *दाने समर्थ इति च पत्न्या अनुमत्यनपेक्षाव्यञ्जकम् पञ्चऋगन्ते—'इदं पुत्रं तुभ्यमहं सम्प्रददे न मम' इति दद्यादित्य र्थः । 'प्रतिगृह्णीत मानवं सुमधेसः' इति मन्त्रलिङ्गात् । ब्रह्मुष्याय णे च 'न मम' इत्यस्य त्यागः । *देवस्य त्वेति । प्रतिग्रहीतृकृसम चकारेण स्वशाखोक्तकामस्तुतिसमुच्चयः । *आदाय धृतवस्त्रद्वयकु ण्डलोष्णीषादिं वाद्यादिघोषपूर्वकमानीय ।*चरुमिति। आचार्यकृ म् । होममन्त्रानाह-*यस्त्वाहृदेत्यृचा चैवेति । एवं सप्तभिर्मन्त्रै सप्तचर्वाहुतीर्हुत्वेत्यर्थः । अत्र बव्हृचानां शौनकोक्त एव विधिः तत्र 'यस्त्वा हृदा' इत्येकया ऋचा होमः । अन्येषान्तु बौधायनोक्त अत्र दातुः समक्षं गत्वा 'पुत्रं मे देहि' इति भिक्षिते ददामीति इत आह । तं प्रतिगृण्हामि 'सन्तत्यै त्वा गृण्हामि'इति । अथैनं कुण्डल भ्यामङ्गुलीयकेन चालङ्कृत्य परिधानप्रभृत्यग्निमुखान्तं कृत्वा पक्व न् जुहोति । 'यस्त्वा हृदा कीरिणा मन्यमानः' इति पुरोनुवाक्यम नूच्य 'यस्मै त्वं सुकृते जातवेदः' इति याज्यया जुहोति । अथव "आहुतीर्हुत्वा स्विष्टकृत्प्रभृतिसिद्धमाधेनुवरप्रदानात्" इति बौधा यनोक्तः प्रतिग्रहविधिः । तत्र 'यस्त्वा हृदा' इत्यादिना द्वयेन होम तत्र स्फुट एव शौनकोक्ताद्भेदः । 'तुभ्यमग्ने' इत्यादिमन्त्रैर्होमाभ वात । एवं च शौनकोक्ते यस्त्वा हृदादृग्द्वयेन चैव' इति पठित्व 'ऋक्द्वयकरणको होमः' इति वदतां महासाहसम् । आज्योत्पवन

ब्राह्मणानां सपिण्डेषु कर्तव्यः पुत्रसंग्रहः।
तदभावेऽसपिण्डो वा अन्यत्र तु न कारयेत्॥

मिताक्षरादौ तु*व्याहृतिभिराज्येन होम उक्तः। स च होमोत्तरं जलपूर्वकं देयः, न वाङ्मात्रेण, "व्याहृतिभिर्हुत्वा प्रतिगृह्णीयात्" इति वसिष्ठोक्तेः।

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
*सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः॥

इति मनूक्तेः।

दिकमित्यादिना बर्हिषि हविरासादनान्तं लभ्यते। मिताक्षरामते तु व्याहृतिहोमान्तमित्याह—*स चेति। *व्याहृतिभिरिति। 'निवेशनस्य मध्ये'इति प्रकृतम्। केचित्तु होमोत्तरमित्यस्य होमात्पूर्वमित्यर्थः, होम उत्तरो यस्मादिति व्युत्पत्तेः। होमव्यवधानवारणार्थं "निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा" इति वासिष्ठेन व्याहृतिहोमस्य प्रतिगृहीतशिशोर्गृहानयनोत्तरभावित्वप्रतीत्याऽर्थादेव क्वार्थपूर्वकालत्वाविवक्षणादित्याहुः; तच्चिन्त्यम्। *सदृशमिति। सदृशं प्रतिग्रहीतृसवर्णम्। कौस्तुभे तु त्रयाणां वर्णानां ब्राह्मणत्वादिना तत्रापि देशभेदप्रयुक्तगुर्जरत्वादिजात्या च समानजातीयमित्युक्तम्। एतच्च प्रतिग्रहीतुरेव पुत्रत्वार्थम्। यत्तु गुणैः सदृशं, ततश्च ब्राह्मणादेः क्षत्रियादिरपि भवत्येवेति, तदशुद्धम्,

सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः।

इत्युपसंहारविरोधात्। माता पिता वेति। मातापितृभ्याम् अन्यतराभावे अन्यतरेण विधिपूर्वकं दत्त इत्यर्थः। मात्रादिग्रहणं च पालकाभ्यां पालितस्य दत्तकस्यान्यस्मै दानवारणार्थं, पितामहादेर्दातृत्वस्य वारणार्थं च। अद्भिरिति वसिष्ठाद्युक्तविध्युपलक्षणम्। प्रीतिसंयुक्तमिति देयपुत्रविशेषणम्।

'विक्रयं चैव दानं च न नेयाः स्युरनिच्छवः।

दाराः पुत्रश्च'इतिवचनात्। स ज्ञेयो दत्रिम इति संज्ञासंज्ञि-संबन्धबोधकगतेन 'स' इति सर्वनाम्ना मातापितृकर्तृकप्रीतिजलगुण-कापत्निमित्तकदानकर्मीभूतसजातीयपुंस एव परामर्शः, यथा 'अष्टवर्षं ब्राह्मणमुपनयीत, (१)तमध्यापयीत' इति तच्छब्देनाष्टवर्षत्व-ब्राह्मणत्वपुंस्त्वोपनयनसंस्कारविशिष्टस्य। तेन स्त्रियो न दत्तक-त्वप्रसङ्गः। आपदीति। तथा चानापदि न देय इत्यर्थः। अयं च प्रतिषेधो दातुरेव पुरुषार्थः, न क्रत्वर्थ इति प्राञ्चः। अस्य वाक्याददृष्टार्थताऽवगमात्। कथञ्चिद् दृष्टार्थत्वेऽपि नि-यमादृष्टस्यावश्यकत्वान्न तदतिक्रमे कार्यविशेषप्रयोजकदत्तकत्व-रूपादृष्टसिद्धिः। एतेन विवाहे रोगिण्यादिनिषेधातिक्रमे दृष्टविरोध एव, भार्यात्वं तूत्पद्यत एवेत्यपास्तमिति नव्याः। आपदीत्यस्य नाऽनापत्परिसंख्यायकत्वं त्रैदोष्यात्, किन्त्वाप-त्निमित्तमात्रम्। न चापदो निमित्तत्वे तस्यां तददाने प्रत्यवायाप-त्तिः, एतद्वचनस्य संज्ञासंज्ञिसंबन्धमात्रबोधकत्वेन दानाबोधकत्वा-दित्यन्ये। यदपि 'पुत्रसंग्रहः' इति वाक्ये पुत्रपदं[पुत्र]पुत्रीसाधारणा-र्थकम्, 'पुमान् पुत्रो जायते' इति श्रुतौ वृत्तिकारेण तथोक्तेः। तेन पुत्र्या अपि स्वीकार उक्तविधिना कार्यः। ((२) दानप्रतिग्रह-विधिषूद्देश्यविशेषणपुंस्त्वाविवक्षणात्, इतिहासपुराणादौ कुन्त्या-दत्तकत्वोक्तेश्च। किञ्च "क्त्रेर्मम्नित्यम्" (अष्टा० सू० ४-४-२०) इति ममन्तो दत्रिमशब्दः) दानकर्मत्वाविशेषाद्वरायान्यस्मै वा दत्तां कन्यामप्याचष्टे इति संज्ञासंज्ञिभावनिर्वाह इति; तदप्यनादेयम्,

क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः॥

इति मनुना दत्तकस्य क्रियालोपभयेनौरसप्रतिनिधित्वोक्तेरौरस

---

(१) 'तमध्यापयीत' नास्ति घ०

(२) कंसान्तर्गतो ग्रन्थः घ पुस्तके नास्ति

तत्रैव वासिष्ठः— 'न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा, न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा, अन्यत्रानुज्ञानाद्भ-

---

इव तत्प्रतिनिधिष्वपि पुंस्त्वविवक्षाया आवश्यकत्वात् । अन्यथौरसेऽपि पुंस्त्वाविवक्षणापत्त्या औरसकन्यायाश्च (१)प्रथमम् और्ध्वदेहिकाधिकारप्रसङ्गेन बहुव्याकोपः स्यात्, कुन्त्याश्च दत्तकत्वं विधिं विनैव[स्यात्],

आत्मीकृत्य सुवर्णेन परकीयां तु कन्यकाम् ।
धर्मेण विधिना दानमसगोत्रेऽपि युज्यते ॥

इत्यत्र सुवर्णशब्दस्य प्रलोभनोपायपरत्वात्,

ऋष्युक्तमेव कर्तव्यं न तु तत्कृतमाचरेत् ।

इति न्यायाच्च । 'पुमान्पुत्रो जायते' इति श्रुतौ च पुंशब्दवैयर्थ्यवारणाय वृत्तिकारेण तथोक्तम्, न च बुधैस्तत्र निर्भरः कार्यः । पूर्वयुगेष्वपि पुंसवनोत्तरं क्वचित्प्रथमकन्योत्पत्तिदर्शनेन ऋष्युक्ततन्मन्त्रस्याप्यसमवेतार्थत्वात् । वृत्तावपि पुंशब्दस्य नपुंसकान्यपरत्वात् । अपत्यार्थकपुत्रशब्देन नपुंसकस्यापि प्रत्ययापत्तेस्तत्सार्थक्याच्च । किञ्च सुत इत्यनेन कन्याया अव्यावृत्तौ प्रकृते नपुंसकापत्ये लक्षणापत्तिः । मम तु पुंस्त्वविशिष्टापत्यलाभेन नपुंसकस्येव कन्याया अपि व्यावृत्तिरित्याद्यन्यतोऽवसेयम् । सुत इति । अनेकपुत्रसत्त्वेऽपि ज्येष्ठो न देयः ।

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ।
पितृणामनृणश्चैव स तस्मात्सर्वमर्हति ॥

इति मनुना तस्यैव पैत्रर्णापाकरणादिपुत्रकार्यकरणे मुख्यत्वकथनात् । सर्वं द्रव्यम् । अत एवायमपि दातुरेव निषेधः, आहत्यैव ज्येष्ठप्रतिग्रहनिषेधाभावात् । मातापित्रोश्चायं (२)विशेषः—

---

(१) दत्तकादिभ्य इति शेषः ।
(२) निषेध इति घ पुस्तके पाठः

र्तुः' इति । इदं च भर्तृसत्त्वे । अन्यथा—

दद्यान्माता पिता वा यं स पुत्रो दत्रिमः स्मृतः ।

इति वत्सव्यासवचोविरोधः स्यात् । दानं प्रतिग्रहोपलक्षणम् । यत्तु समन्त्रकहोमस्य पुत्रप्रतिग्रहाङ्गत्वात्

उभयोर्जीविनोः पत्युरपि पत्न्यनुमत्यैव दातृत्वं ग्रहीतृत्वं च, कथञ्चिदपि तदनुमत्यभावे अत्यन्तापदि पत्युः स्वातन्त्र्यमपि । पत्न्यास्तु पत्यौ जीवति सन्निहिते प्रोषिते वा तदनुमत्यैव दातृत्वं, मृते तु स्वातन्त्र्यं, तद्वक्ष्यति—इदं च भर्तृसत्त्वे इति । 'स्त्री' इति स्त्रीग्रहणात्पत्युः पूर्वोक्त एव विषये स्वातन्त्र्यं, न तु सर्वदा, "शुक्रशोणितसम्भवः पुत्रो मातापितृनिमित्तकः, तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः" इति वासिष्ठे 'मातापितरौ' इत्युक्तेः । एतदेवाभिप्रेत्य 'दाने समर्थे' इति दातृविशेषणम् । कदाचिदनुमतिं विनापि स्वातन्त्र्यव्यञ्जकं दद्यादिति । सधवायां मातृपदवैयर्थ्येन तस्य विधवापरत्वात्तत्रानुज्ञाया अश्रवणादिति भावः । वस्तुतस्तु "अन्यत्रानुज्ञानाद्धर्तुः" इत्येतत्सधवाया एव, दृष्टार्थत्वात् । विधवायास्तु भर्त्रनुज्ञासत्त्वे सम्यगेव, तदभावे पितुस्तदभावे ज्ञातीनां वाऽनुज्ञया दानप्रतिग्रहौ भवतः,

नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा ।

विफलं तद्भवेत्तस्या यत्करोति व्रतादिकम् ॥

इति वचनात् । किञ्च 'अन्यत्रानुज्ञानाद्धर्तुः' इत्यनेनापूर्वा भर्त्रनुज्ञा न विधीयते, किन्तु

रक्षेत्कन्यां पिता, विन्नां पतिः, पुत्रास्तु वार्धके ।

अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियः ॥

इति योगीश्वरवचनेनावस्थाविशेषप्राप्ता साऽनूद्यते, लाघवात् । तथा च भर्त्राज्ञां विनापि विधवाया अधिकारः । केचित्तु 'यत्करोति व्रतादिकम्' इत्यादिपदेनादृष्टार्थकदानादौ पित्राद्यनुमत्यपेक्षा प्रतीयते, ततश्च 'प्राप्ते पुनर्वचनं नियमार्थम्' इति न्यायेनाऽनुज्ञाया

व्याहृत्यादिमन्त्रपाठे च स्त्रीशूद्रयोरनधिकारात् तयोर्दत्तकः पुत्रो न भवत्येवेति शुद्धिविवेके रुद्रधरेणोक्तम् । वाचस्पतिश्चैवमेवाह । तन्न, भर्तुरनुज्ञया स्त्रिया अपि

भर्त्रीयत्वं नियम्यते, वैयर्थ्यापरपर्यायानुवादापेक्षया सार्थक्यस्य सम्यक्त्वात् । एवं चानुज्ञादानानन्तरजाताया विधवाया एव तयोरधिकारः, न त्वतथाभूतायास्तस्याः, इत्याहुः, तदसत्, यत्र पुत्रकार्यकरणानुरोधेन विधवायाः तद्व्याघातके कर्मणि प्रवृत्तिर्मा प्रसाङ्क्षीदिति अनुज्ञा स्वाभाविकप्रवृत्तिविमुखीकरणार्थैव । किञ्च पुत्रदानं नादृष्टार्थमिति स्पष्टमेव,

पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ।

इति वाक्ये क्रियालोपभयात्मकहेतूपादानात् । नियमादृष्टन्तु दूरेऽस्ति । तस्मात् 'व्रतादिकम्' इत्यादिपदेन नैतत्प्राप्तिः । अपिचास्तु पुत्रदानाद्यधीनमादृत्याप्यदृष्टं, तथापि तदज्ञानानाया अनुज्ञाविरहस्थलीयदानादौ पुत्रत्वापत्तिरतो वासिष्ठे अनुज्ञा नि(१)बद्धा । न "स्वातन्त्र्यं क्वचित् स्त्रियः" इति याज्ञवल्क्येन च विधवा यदधीना सामान्यतस्तदनुज्ञाऽप्यभ्यनुज्ञातेति कथञ्चिदनुज्ञा परतन्त्राया आवश्यकी, न तु याज्ञवल्क्योक्तिमनादृत्य स्वतन्त्रायाः । अथ तत्रापि प्रशस्तब्राह्मणानुज्ञया दानादिकं भवेदित्येतावता तुष्यतु भवानिति । केचित्तु—इदं दत्तकपुत्रलक्षणम्, तथा च पितामहादिदत्तेऽतिव्याप्तिरतो माता पिता वेति । तत्र वाकारोऽव्याप्तिनिरासार्थः । विधिं विना मात्रादिदत्तेऽतिव्याप्तिः, अतोऽद्भिरिति वासिष्ठोक्तविध्यर्थकम् । एवमनापदि असवर्णे वा दत्तेऽतिव्याप्तिः, अतः आपदीति, सदृशमिति च । (२) पितृवियोगमसहमाने दत्तेऽतिव्याप्तिः, अतः प्रीतीत्यादि । प्रतिग्रहीत्रा सह प्रीतियुक्तामित्यर्थः, इत्याहुः, तन्न, ध-

---

(१) 'अभिबद्धा' इति घपुस्तके ।

(२) 'पितृवियोगासहमाने' इति घ पुस्तके ।

प्रतिग्रहोक्तेः। यद्यपि मेधातिथिना भार्यात्ववददृष्टरूपं दत्तकत्वं होमसाध्यमुक्तम्। स्त्रियाश्च होमासंभवस्तथापि व्रतादिवद्विप्रद्वारा होमादि कारयेदिति हरिनाथादयः। संबन्धतत्त्वेऽप्येवम्। एवं शूद्रस्यापि, 'स्त्रीशूद्रा-

---

र्मशास्त्रे तल्लक्षणे प्रयोजनाभावात्,

क्षत्रियाणां क्षत्रजातौ गुरुगोत्रसमेऽपि वा।

इति शौनकवाक्यविरोधाच्च गुरुगोत्रसमेऽव्याप्तेः। अन्ये तु ब्राह्मणाय क्षत्रियेण दत्ते क्षत्रिये दत्तक इति लौकिकानामस्ति व्यवहारः, अतो लक्षणस्य व्यवहारफलकत्वमते नेदं लक्षणं, किन्तु दत्तकपदप्रवृत्तिनिमित्तम्, तेनानापदि असवर्णे वा दत्ते न तत्प्रसङ्गः। यथा—

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋताविया॥
आगर्भसंभवाद्गच्छेत् पतितस्त्वन्यथा भवेत्।
अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः॥

इति सर्वविशेषणवत्त्वं क्षेत्रजपदप्रवृत्तिनिमित्तं,न तु नियोगाभावे, सत्यपि नियोगे घृताभ्यङ्गाभावे वा क्षेत्रोत्पत्तिमात्रेण तत्। अन्यथा—

अनियुक्तासुतश्चैव पुत्रिण्यासुश्च देवरात्।
उभौ तौ नार्हतो भागं कामजातकतस्करौ॥
नियुक्तायामपि पुमान्नार्यां जातोऽविधानतः।
नैवार्हः पैतृके रिक्थे पतितोत्पादितो हि सः॥

इति मनुविरोधात्। (१)न चोक्तवचनवशादङ्गाभावे प्रधानमात्रेण क्षेत्रजत्वं नास्तीति सिद्धम्, दत्तके तु आपत्याद्यङ्गाभावेऽपि प्रधानमात्रेण दत्तकत्वं भविष्यतीति वाच्यम्।

क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्,

---

(१) 'नचोक्तवचनवदङ्गाभावे' इति घ पुस्तके।

अ सधर्माणः' इति स्मृतेः । अत एव शूद्रकर्तृकहोमो विप्रद्वारैव पराशरेणोक्तः ।

दाक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः ।
ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत् ॥

पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥

इति मनुना यथोक्तानामेव क्षेत्रजादित्वोक्तेरङ्गसाकल्यस्यावश्यकत्वात् । तस्मादनापत्तावसवर्णे च प्रवृत्तिनिमित्तमेव नास्तीत्याहुः । परे तु अविधिदत्ते—

अविधाय विधानं यं परिपुष्णाति पुत्रकम् ।
विवाहविधिभाजं तं न कुर्याद्धनभाजनम् ॥
स्वगोत्रेण कृता ये स्युर्दत्तकक्रीतकादयः ।
विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते ॥

इति बृद्धगौतमात् । असवर्णग्रहणे—

यदि स्यादन्यजातीयो गृहीतोऽपि च नन्दनः ।
अंशभाजं न कुर्वीत मन्वादीनां मतं हि तत् ॥

इति शौनकात् । अनापदि दाने—

विक्रयं चैव दानं च न नेयास्युरनिच्छवः ।
दाराः पुत्राश्च सर्वस्वं स्वात्मनैव तु योजयेत् ॥
आपद्येव तु कर्त्तव्यं दानं विक्रय एव च ।
अन्यथा तु न कर्तव्यमिति शास्त्रस्य निश्चयः ॥

इति माधवोदाहृतवचनाच्च । विशेषणाभावे रिक्थनिषेधमुखेन दत्तपुत्रत्वाभावो भवन् विशेषणवति विशिष्टाभावः पुत्रत्वरूपविशेष्याभावे पर्यवस्यतीत्याहुः । नन्वत्यन्तदौर्गत्या भरणासामर्थ्येनाऽऽपत्, न तु ग्रहीतुरपुत्रत्वमपीति । कुत इति चेत् ?

अन्याहितं याचितकमाधिः साधारणं च यत् ।
निक्षेपः पुत्रदारं च सर्वस्वं चान्वये सति ॥

अत्र माधवाचार्यः—'यो विप्रः शूद्रदक्षिणामादाय तदीयं हविः शान्तिपुष्ट्यादिसिद्धये वैदिकैर्मन्त्रैर्जुहोति तस्य विप्रस्यैव दोषः। शूद्रस्तु होमफलं लभेतैव' इति व्याचचक्षे।

आपद्यपि च कष्टायां वर्तमानेन (१)देहिना।
अदेयान्याहुराचार्या यच्चान्यस्मै प्रतिश्रुतम्॥

इति नारदवचनदर्शनाद् 'यमाद्भिः पुत्रमापदि'इत्यादौ विरोधो मा प्रसाङ्क्षीत् इति।

विक्रयं चैव दानं च न नेयाः स्युरनिच्छवः।

इति दानेष्वनिच्छुपरतया तत्परिहारस्यापि पर्यालोचनया पुत्रपालनासामर्थ्यस्यैवापत्तित्वरूपत्वात्। अन्यथा दातृग्रहीत्रोरापत्तिभेदेन विरोध एव न स्यात्। तस्मात् प्रतिग्रहीतुरपुत्रत्वं नापत्तिरिति। अथ 'दद्यात्' इति वत्सवचने आपन्नोपात्तैव, तथा च मातापितृभ्यां तदन्यतरेण वाऽपत्तिं विनाऽप्यपुत्राय स्नेहविशेषादिना पुत्रदानं स्यात्। न च मन्वादिभिरापदीत्युपात्तमेवेति वाच्यं, ज्येष्ठैकपुत्रयोर्दानादौ द्वयोर्दोषः, अनापदि दाने दातुर्दोष इत्यादिग्रन्थपर्यालोचनया केनचित्कारणेन दोषमङ्गीकृत्यैव दानादौ क्रियमाणे पुत्रत्वस्य दुर्निवारत्वात्। सत्यम्। अस्ति हि—

आपद्येव च कर्तव्यं दानं विक्रय एव च।
अन्यथा तु न कर्तव्यमिति शास्त्रस्य निश्चयः॥

इति कात्यायनेन स्पष्टमेवैवकारमभिधायान्यथा तु न कर्तव्यमित्यभिधानम्। तेन तदतिक्रमे तत्राद्दष्टविशेषात्मकपुत्रत्वानुत्पत्तेर्ध्वनिनात्। अन्यथा दुष्टरत्नादे रत्नत्वाद्यपरिहारवदापत्त्यसत्त्वे दत्ते पुत्रे पुत्रत्वात्यागः शङ्क्येतेति तथाऽभिधानसाफल्यात्। एवम्—

अदेयं यश्च गृह्णाति, यश्चादेयं प्रयच्छति।

---

(१) 'देहिनाम्' इति घ पुस्तके।

तावुभौ चोरवच्छास्यौ दण्ड्यौ चोत्तमसाहसम् ॥

इति वचनात् प्रतिग्रहीत्रादेश्चोरतुल्यतया चोरगृहीत इव स्वत्वानुदयाच्च। किञ्च आपदीति नैमित्तिके निमित्तवत एवाधिकारः। तथा चानापदि दाने दानस्वरूपासिद्धिः, दत्ताप्रदानिके भर्त्राद्यनुमतिं विना स्त्र्यादिकृते दाने (१)दानस्वरूपासिद्धिवत्। एवमापत्तिं विना विक्रयेऽपीति तदुपादानम्। सदृशं सवर्णम्। नचैवमसवर्णदाने दातुर्दोष इत्येव स्यादिति वाच्यम्। 'आपद्येव च कर्तव्यम्' इत्यनेनानापदि दानं निषिध्यते, न त्वसवर्णस्य तेनान्येन वा केनचित्। तस्मात्तत्र निषेधाभावेन दोषकल्पनाऽनवकाशेऽपि तस्य विशेषणतावच्छेदकत्वपर्यालोचनया विवक्षितत्वादेतादृशस्य पुत्रत्वाभावसमर्पकत्वात्। भर्त्रनुज्ञयेति निषादस्थपतिवत्स्त्रीशूद्रयोः प्रतिग्रहेऽधिकारः। तत्र 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद् वाऽन्यत्रानुज्ञानाद्भर्तुः' इतिनिषेधस्थस्य 'अन्यत्रानुज्ञानाद्भर्तुः'इत्यस्य 'न प्रतिगृह्णीयात्'इत्यत्रान्वय इति भावः। केचित्तु सत्यमेव 'न प्रतिगृह्णीयाद्' इत्यनन्तरम् 'अन्यत्रानुज्ञानाद्भर्तुः'इति स्मर्यते, तथापि तस्य 'न स्त्री पुत्रं दद्यात्' इत्यत्रैव सम्बन्धः 'माता पुत्रं दद्यात्' इति विधेः सत्त्वात् 'न स्त्री पुत्रं दद्यात' इति निषेधे च विकल्पापत्तिरतस्तदन्वयेऽनुज्ञाता माता पुत्रं दद्यादित्यर्थात्, 'स्त्री पुत्रं प्रतिगृह्णीयात्'इतिविध्यभावेन तदन्वयस्य निष्फलत्वात्। न च 'न स्त्री पुत्रं प्रतिगृह्णीयात्' इतिनिषेधवैयर्थ्यमिति वाच्यम्, 'अपुत्रः पुत्रं प्रतिगृह्णीयात' इति विधिसत्त्वेन तत्सार्थक्यात्। न च सामान्यतः प्राप्तस्य विशेषतो निषेधेऽपि विकल्पो दुर्वार इति वाच्यम्, 'न रात्रौ श्राद्धं कुर्यात्' इत्यत्रापि विकल्पापत्तेः। यदि, वस्तुतस्ते पर्युदासा एव 'रात्रिभिन्ने श्राद्धं कुर्यात्' इति सामान्यविध्येकवाक्यतापन्नास्तदाऽयमपि 'स्त्रीभिन्नोऽपुत्रः पुत्रं गृह्णीयात्' इति सामान्यविध्येकवाक्यतापन्नएव

(१) दानस्वरूपामितिवत् इति घ पुस्तके।

निषेधः। वस्तुतो रागप्राप्त्यैव निषेधः। न चैवं व्यवहितान्वयप्रसङ्ग इति वाच्यम्,

भर्त्रा प्रीतेन यद्दत्तं मृते तस्मिन् स्त्रियोऽपि तत्।
सा यथाकाममश्नीयाद्यद्वा स्थावरादृते॥

इति वचने 'स्थावरादृते दत्तम्' इत्यन्वये तात्पर्यसत्त्वे व्यवहित-योजनोपगमात्। न च तत्र तस्य 'तत्' इत्यत्रान्वयेन 'स्थावरादृते तदश्नीयात्' इत्यन्वयः सुकर इति वाच्यम्, तथा सति स्थावरे स्त्री-सत्त्वापत्तेः, स्थावरे प्रीतिदत्तेऽपि पुत्रस्वत्वस्यैवेष्टत्वात्। एवं च स्त्रियोऽग्निविद्याकल्पनमपि नास्ति, अन्यथा प्रतिग्रहाङ्गहोमानुरोधेनाग्निमन्त्रपाठयोरपि रथकारवत्कल्पनापत्तेः। न च तत्र विप्रद्वारा होमः सुकर इति वाच्यम्, एवमपि

देवस्यत्वेति मन्त्रेण हस्ताभ्यां (१)परिगृह्य च।
अङ्गादङ्गेत्यृचं जप्त्वा आजिघ्रेच्छिरसूर्धनि॥

इति प्रतिग्रहाङ्गमन्त्रपाठबाधापत्त्या विप्रद्वारा तत्कल्पनापत्तेः। न चैवं-

पिण्डोदकक्रियाहेतोर्नामसंकीर्तनाय च।

इत्यस्य हेतोः पुरुषमिव स्त्रियं प्रत्यविशेषात् तस्याः प्रतिग्रहाधिकारः सेत्स्यतीति वाच्यम्, "तेन हि अन्नं क्रियते" इति हेतुर्यथा 'शूर्पेण जुहोति' इत्यनेन बाधात्स्थालीपिठरादौ न प्रवर्त्तते, तथोक्तहेतुरविद्यत्वादिना बाधात्स्त्रियां न प्रवर्त्तते इत्यस्यैव युक्तत्वात्। न च कलावन्येषां पुत्राणां वर्जितत्वाद् अनापत्त्या दत्तकः स्वीकार्य एवेति वाच्यम्, भवन्मते पत्युरनुज्ञया सपत्न्या दत्तको वाच्यः, स व्यर्थः;

अनेकानि सहस्राणि कौमारब्रह्मचारिणाम्।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम्॥

---

(१) 'प्रगृह्य' घ०

मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्यव्रते स्थिता ।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥

इति मनुनाऽपुत्राया अपि स्वर्गप्राप्तेरभिधानात्,

अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तं पिण्डं कृत्स्नमंशं लभेत च ॥

इति वाक्ये अपुत्रेत्यधिकारिसंकोचकविशेषणोपादानेन पुत्रप्रतिग्रहव्यावृत्तेर्गर्भीकृतत्वाच्च । ननु 'अन्यत्रानुज्ञानाद्भर्तुः' इत्यस्य 'न स्त्री पुत्रं दद्यात्' इत्येतावन्मात्रान्वयित्वे 'प्रतिगृह्णीयाद्वा'इति वाशब्दान्वयोऽनुपपन्नः, विकल्पासंभवात् । न च वाशब्द उपमार्थकः तथा सति यथा भर्त्रनुज्ञया प्रतिगृह्णीयात्तथा भर्त्रनुज्ञया दद्यादित्यर्थे स्त्रियाः प्रतिग्रहाधिकारापत्तेरिति चेत्? न', वाशब्दस्योपमानार्थकत्वात् । यथा स्त्री न प्रतिगृह्णीयात्तथाऽननुज्ञाता स्त्री न दद्यादित्यर्थसंभवात् । अथवा, वाशब्दः समुच्चये । स्त्री न प्रतिगृह्णीयादननुज्ञाता स्त्री न दद्याच्चेत्यर्थादित्याहुः । तदेतदरमणीयमेव । अस्ति हि 'न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्वेषाम्' इति वासिष्ठे स हि सन्तानाय पूर्वेषामिति हेतुः । तत्र 'तेन ह्यन्नं क्रियते' इत्यादिर्हेतुःस्थालीपिठरादिसाधारण्याच्छूद्रेण बाधान्न विवक्षार्हः । अयन्तु विवक्षितोऽसाधारण्यादिति । भर्तुः स्वस्य च संतानानुवृत्तयेऽपुत्रायाः प्रतिग्रह आवश्यकः स्मर्यते । पठन्ति च

'अपुत्रा मृतपुत्रा वा पुत्रार्थं समुपोष्य च ।'

इत्यादिप्रयोगविधिमपि । गान्धार्याः पेशीप्रसवानन्तरं व्यासवचनेन शतविभागे दौहित्रजलोकावाप्त्यर्थं तत्प्रार्थनया कन्याभागो व्यासेनानुज्ञातः । प्रकृते च संतानजन्यलोकावाप्त्यर्थं सकलपदैकवाक्यतया सधवाया विधवाया वा पुत्रप्रतिग्रहे ऽधिकारः । न हि पातिव्रत्यमात्रात्सांतानिकलोकसंभवः । यदपि तन्मात्राद्भर्त्रा सह समानलोकावाप्तिस्मरणं, तदपि भर्तुः सांतानिकलोकासत्त्वे कथं त-

त्मापकम् ? तस्माद्भर्तुः तल्लोकार्थं स्त्रियः प्रतिग्रहविधिः । वाशब्द विकल्पार्थ एवान्यतरार्थपर्यवसायी, तस्य क्रियायामेवान्वयः तथाच यथा 'माता पिता वा दद्याताम्' इत्यत्र मातृपित्रन्यतरास तदन्यतरो दद्यादित्यर्थः । तथा स्त्री दानप्रतिग्रहयोरन्यतराभ तदन्यतरद् भर्त्रनुज्ञां विना न कुर्यादित्यर्थः । तस्मादापत्तियुक्त मातृपित्रन्यतरः पुत्रदानं कुर्यादिति न एक एव विधिः, गौरवात् न स्त्री पुत्रमिति निषेधपर्यालोचनया विकल्पापाताच्च; किन्त 'आपत्तियुक्तः पिता पुत्रं दद्यात्' 'आपत्तियुक्ता माता पुत्रं दद्यात इति द्वौ दानविधी । एवम् 'अपुत्रः पुमान् ब्राह्मणादिः पुत्रं प्रति गृह्णीयात्' 'अपुत्रा ब्राह्मण्यादिः पुत्रं प्रतिगृह्णीयात्' इति द्वौ प्रतिग्रहविधी ।

अपुत्रो ब्राह्मणः कुर्यात् पुमान् पुत्रप्रतिग्रहम् ।
सपत्नीकक्रियार्थं च न कान्ता केवला क्वचित् ॥

इति मानवे 'पुमान्' इति दर्शनात् सपत्नीककक्रिया पुत्रोत्पत्तिः। अः भर्तृसान्निध्ये कान्तायाः प्रतिग्रहासम्भवान्न कान्ता केवलेति यथा श्रुतनिषेधो नोपपद्यतेऽतो भर्त्रनुज्ञातैव केवला कान्ता प्रतिग्रहं कुर्या त् नाननुज्ञातेति 'न स्त्री पुत्रं प्रतिगृह्णीयाद् अन्यत्रानुज्ञानाद्भर्तुः इति विधिलाभः । 'आपत्तियुक्ता माता पुत्रं दद्यात्' इत्येतावन्मा त्रोक्तौ भर्तृसान्निध्यादावपि स्वातन्त्र्येण केवलायास्तस्या दातृत्वा पत्तिरतः 'भर्त्रनुज्ञातैव केवला माता पुत्रं दद्यात्' इति तान्निष्कर्ष स्वीकार्यः, अतो न विकल्पप्रसङ्गः । अत्र एवकारस्यान्ययोगव्यव च्छेदोऽर्थः, स एव 'न स्त्री पुत्रं दद्यात् अन्यत्रानुज्ञानाद्भर्तुः' इत्यनेन विवृतः । उक्तं च दीधितिकृता 'चैत्रेणैव पच्यते तेमनम्' इत्यादौ चैत्रान्यकर्तृकपाककर्मत्वशून्यं तेमनं चैत्रकर्तृकपाककर्मेत्यर्थः । 'चैत्रेणैव पच्यते गगनम्' इत्यादिप्रयोगवारणाय विशेष्योपादान मिति । न त्वयोगव्यवच्छेदोऽर्थः, तथा सत्येवकारवैयर्थ्यप्रसङ्गात् ।

एतेन 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद् वा अन्यत्रानुज्ञानाद् भर्तुः' इत्यत्र नञ्द्वयं व्यर्थम्, 'अनुज्ञाता स्त्री दद्यात् प्रतिगृह्णीयाच्च' इत्यस्यैव सम्यक्त्वादिति न शङ्क्यं, नञ्द्वयत्यागे सामान्यवाक्यलब्धाननुज्ञातस्त्रीकर्तृकदानादेर्दुर्वारत्वात् । अन्यथा सामान्यवाक्यस्य निर्विषयत्वापत्तेः, अननुज्ञातैवेत्येवकारासत्त्वे निषेधागर्भतया दोषापुत्रत्वयोरलाभाच्च । न च 'न स्त्री पुत्रं दद्यात् अन्यत्रानुज्ञानाद्भर्तुः' इत्यादिवाक्येतरसामान्यवचनानुपगमे स्त्रियः दानप्रतिग्रहयोरविधानप्रसङ्गः,इष्टापत्तौ च स्त्रियस्तत्कर्मणो लौकिकत्वापत्त्या दत्तकत्वरूपादृष्टानुत्पादप्रसङ्ग इति वाच्यम्, तर्हि अननुज्ञातमातृत्वाभावविशिष्टमातृपितृगतापत्तिमात्रस्यैव दानाधिकारितावच्छेदकत्वोपगमेनैतद्दोषस्य वारणीयत्वात् । एवं प्रतिग्रहवाक्येऽपि ऊह्यम् । अथवा यथा 'दीक्षितो न ददाति, न जुहोति' इति सामान्यतः प्राप्तानुवादेनापि निषेधः, तथा इहापि सामान्यतः प्राप्तानुवादेनैव 'न स्त्री पुत्रं दद्यात्' इत्यादिनिषेध इति । अत्र विशेषणे निषेधसंक्रमादान इव प्रतिग्रहेऽपि स्त्रिया अधिकार इत्यभिप्रेत्यैव भर्त्रनुज्ञया स्त्रिया अपीत्युक्तम् । अदृष्टरूपामिति । पुत्रं प्रतिग्रहीष्यन्नित्यादिके पुत्रप्रतिग्रहविधौ पुत्रमिति द्वितीयावशात्पुत्रस्य भाव्यत्वे जन्यपुंस्त्वरूपपुत्रत्वस्य भाव्यत्वासम्भवाददृष्टं भाव्यमङ्गीकार्यम् । तदेव च श्राद्धादिसकलपुत्रकार्यप्रयोजकमित्यर्थः । स्त्रियाश्चेति । तथा च तस्याः प्रतिग्रहे कथमधिकार इत्यभिमानः । अत्र च दत्तके पितृश्राद्धाधिकारितावच्छेदकमदृष्टम्, औरसे तु जन्यपुंस्त्वमेवेति प्रसिद्धम् । अथवा औरसेऽप्यदृष्टमेव तथा, अन्यथौरसपौनर्भवाऽविनियुक्तासुतानामविशेषापत्तेः, जन्यपुंस्त्वस्य समत्वात्, गर्भाधानस्याकरणात् 'तस्यां जातस्तु दुष्यति' इत्यादिवचनाद्गर्भाधानादिकर्माधीनादृष्टसत्त्वाच्च । एवमेव होमातिरिक्तः सर्वोऽपि ग्रहणापादानग्रहीतृगोचरो नियमः क्रीत-

स्वयंदत्तकृत्रिमापविद्धेष्वपि यथासम्भवं द्रष्टव्योऽदृष्टार्थत्वादिति त्रिंशत्श्लोकीटीकायां लिखद्भिर्विवेचनकारैः क्रीतादिषु अदृष्टस्य प्रापणाच्च। पुत्रिकापुत्रेऽपि अदृष्टं सुप्रसिद्धमेव। एवमेव क्षेत्रजगूढज कामीनपौनर्भवस्वयंकृतसहोढजेष्वदृष्टं क्षेत्राद्यधीनमस्त्येव। अत एव द्वादशविधपुत्रेतरस्य लौकिकपुत्रत्वेऽपि नाधिकार इति। वस्तु तस्तु जन्यपुंस्त्वमेव पितृश्राद्धाद्यधिकारितावच्छेदकम्। अन्यथा गर्भाधानं विना जातस्य तल्लोपापत्तेः। अत्र च क्षेत्रजत्वादिना नैव तथेति व्रतादिवदिति। स्त्रिया व्रतादिहोमादौ ब्राह्मणेन वैदिकमन्त्रः पठनीयः, बाधकाभावात्, स्त्रीशूद्रयोरेवाध्ययननिषेधात्। एतावता स्त्रिया दान इव प्रतिग्रहेऽधिकारं प्रसाध्य शूद्रस्याह। तदुभयत्र तमाह—एवमिति। शूद्रस्यापीति। प्रतिग्रहोऽस्तीत्यनुवर्त्तते, 'अधिकार' इति शेषः। अत एव शूद्रस्य प्रतिग्रहोक्तिरेव। कर्तृकहोम इति समन्त्रकपदगर्भम्। पराशरेणेति।

उपवासो व्रतं होमस्तीर्थस्नानजपादिकम्।
विधेः संपादितं यस्य सम्पन्नं तस्य तत्फलम्॥

इति वदता इति शेषः। वाक्यान्तरमपि दर्शयति—दक्षिणार्थमिति। अत्र विप्रो दक्षिणार्थं शूद्रस्य होमं कुर्यात् इत्यर्थो लभ्यते, तत्र निन्दायामाह—अत्रेति। प्रतिग्रहादिमन्त्रोऽपि ब्राह्मणेन नैव पठनीय इत्यपि बोध्यम्। न च स्त्रीशूद्रयोर्होमस्य व्यवस्थापनं व्यर्थं तेन विना अदृष्टरूपदत्तकत्वासम्भवात्, तयोः प्रतिग्रहमन्त्रस्याप्यभावात्। तस्य ब्राह्मणद्वारा सम्पादने तु होमस्यापि तथा सम्पादनसम्भवात्। इत्थमेव च 'धार्मिकाणां होमसाध्यं दत्तकत्वम्' इति घण्टाघोषः। वासिष्ठः "पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवबन्धुसन्निकृष्टमेव प्रतिगृह्णीयात्। संदेहे चोत्पन्ने दूरे शूद्रमिव स्थापयेत्। विज्ञायते हि एकेन बहूंस्त्रायते" इति। बंधुसन्निकृष्टं भ्रातृ

पुत्रादिकम् अदूरबान्धवं संहितदेशवर्तिपित्रादिकं ज्ञातकुलशील-मन्यमपि । परीक्षितस्यापि कथञ्चिदब्राह्मण्यादिसंदेहे उत्पन्ने यावत्त-न्निवृत्ति दूरे स्थापयेत् तेन न व्यवहरेत् । अपुत्रस्य पुत्रकरणा-वश्यकत्वं द्योतयति-विज्ञायते इति । श्रूयते इत्यर्थः । एकेन अनौरसेनापि पुत्रेण बहून् पित्रादीन् नरकात् त्रायते इति श्रुत्यर्थ इति । अत्रादूरबान्धवमित्यनेन भ्रातृपुत्रादिरुक्तः । केचित्तु एक-भ्रातुः सपुत्रत्वे द्वितीयभ्रातुः पुत्रप्रतिग्रहे नाधिकारः ।

'अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा ।'

इति बौधायनेनैवकारदानात् । न चैतावताऽपुत्रत्वं कथं नास्ति इति वाच्यम् ,

बहूनामेकपुत्राणामेकश्चेत्पुत्रवान् भवेत् ।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥

इति मनुना भ्रातृपुत्रस्य पुत्रत्वोक्तेः,

येऽप्येकजाता बहवो भ्रातरस्तु सहोदराः ।
एकस्यापि सुते जाते सर्वे ते पुत्रिणो मताः ॥

बहूनामेकपत्नीनामेष एव विधिः स्मृतः ।
एका चेत् पुत्रिणी तासां सर्वासां पिण्डदस्तु सः ॥

इति बृहस्पतिवचनाच्च । अत्र यथा सपत्नीपुत्रस्याकृत-स्यापि पिण्डदानाद्यधिकारात् पुत्रत्वं निर्विवादं, तद्वद् अकृतस्यैव भ्रातृपुत्रस्यापुत्रपितृव्यपुत्रत्वमपि

अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत् ।
स एव तस्य कुर्वीत श्राद्धपिण्डोदकक्रियाः ॥

इति बृहत्पाराशरवचनाच्च । यत्तु एतन्मन्वादिवचनं भ्रा-तृपुत्रस्य सपत्नीपुत्रस्य च पुत्रीकरणसम्भवे अन्येषां तन्निषेधार्थं न स्वकृतयोस्तयोः पुत्रत्वप्रतिपादकम् । पुत्रो हि सर्वेभ्यः प्राक्

पिण्डदानरिक्थग्रहणयोरधिकारी। न च भ्रातृपुत्रस्य पत्न्यादिभ्यः प्राक् श्राद्धे रिक्थग्रहणे वाऽधिकारः।

पुत्रः कुर्यात् पितुः श्राद्धं पत्नी च तदसन्निधौ।
धनहार्यथ दौहित्रस्ततो भ्राताऽथ तत्सुतः॥

इत्यादिकालादर्शोक्तसङ्ग्रहवाक्येन श्राद्धे,

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुता गोत्रजा बन्धुशिष्यसब्रह्मचारिणः॥

इति याज्ञवल्क्येन रिक्थे च व्यवहिताधिकारोक्तेरिति, तन्न सम्यक्। कालिकापुराणे—

अपुत्रस्य गतिर्नास्ति श्रूयते लोकवेदयोः।

इति ऋषीणां प्रश्ने

अपुत्रस्य गतिर्नास्ति मेऽस्य चेह च सत्तमाः।
स्वपुत्रैर्भ्रातृपुत्रैश्च पुत्रवन्तो हि सम्मताः॥

इति मार्कण्डेयोत्तरवाक्ये भ्रातृपुत्रेण पुत्रित्वोक्त्या तत्सत्त्वे अपुत्रत्वविरोधात्। न च पिण्डदानादौ व्यवहिताधिकारविरोध इति वाच्यम्, मनुना बृहस्पतिना च भ्रातुः पुत्रस्य सपत्नीपुत्रस्य च पुत्रत्वमतिदिश्यते, अतिदेशविषयश्चाव्यवहितोपस्थितो भवति इति भ्रातृपुत्रस्य सपत्नीपुत्रस्य च और्ध्वदेहिके अव्यवहिताधिकारात्,

विद्ध्यादौरसः पुत्रो जनन्या और्ध्वदेहिकम्।
तदभावे सपत्नीजः क्षेत्रजाद्यास्तयाहृता॥
तदभावे पतिस्तस्यास्तदभावे सपिण्डकः॥

इति कालादर्शे कात्यायनोक्तेश्च। तत्तुल्यन्यायेन भ्रातुः पुत्रस्याप्यव्यवहिताधिकारसिद्धेः तस्य व्यवहिताधिकारबोधकवाक्यं त्वनौरसभ्रातृपुत्रविषयम्। तथा च सर्वज्ञनारायणः—भ्रातृणामे-

कजातानाम्' इति मनुवचनं भ्रातृपुत्रसत्त्वेऽन्येषां पिण्डदानाधिकारनिषेधपरमित्याह। नचैवं 'पुत्रं प्रतिग्रहीष्यन्' इत्यादि 'निवेशनमध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसन्निकृष्टमेव गृह्णीयाद्'इति वसिष्ठेन बन्धुसन्निकृष्टं बन्धुद्वारा सपिण्डमिति भ्रातृपुत्रस्य पुत्रीकरणोक्तिविरोध इति वाच्यम्। मिताक्षरादौ 'बन्धुसन्निकृष्ट एव गृह्णीयात्' इति प्रथमान्तपाठात् तथापाठिनां च भ्रातुः समक्षं प्रतिग्रहे सति ग्रहीतृमरणानन्तरं निर्विवादमंशलाभसिद्धेः, हेमाद्र्यादौ च 'बन्धुसन्निकृष्टमेव गृह्णीयात्' इति द्वितीयान्तपाठात्। तत्रापि क्रियाविशेषतया बन्धुसन्निकृष्टं यथा स्यात्तथा पुत्रं प्रतिगृह्णीयाद् इत्यर्थादुक्तार्थपर्यवसानात्। न हि एतावता भ्रातृपुत्रस्य पुत्रीकरणप्राप्तिः सम्भवति। वस्तुतस्तु बन्धुश्चासौ सन्निकृष्टश्च तमित्यर्थः। बन्धुत्वं गोत्रजत्वम्, तथा च गोत्रजत्वेन सन्निकृष्टो मुख्यः, तदभावेऽसगोत्र इति विवक्षितम्।

स्वगोत्रजसुतालाभे कारयेदन्यगोत्रजम्।

इति(१)शाकलवाक्यात्। यस्तु 'अदूरबान्धवमसन्निकृष्टमेव गृह्णीयात्' इति माधवादिपाठः, तत्रासन्निकृष्टं भ्रातृपुत्रादिव्यतिरिक्तमिति तद्व्याख्यानम्, असम्बन्धिनमिति अपरार्कव्याख्यानं चेति न कश्चिद्विरोधः। न चापुत्रीकृत एव भ्रातृपुत्रश्चेत् पिण्डदस्तदा तस्य रिक्थहारित्वापत्तिः सपत्नीपुत्रवत् इति वाच्यम्, इष्टापत्तेः। अथवा 'यश्चार्थहरः स पिण्डदायी' इति प्रायिकं, राजादौ व्यभिचारात्, न तु नियमः। एवञ्च भ्रातृपुत्रस्य स्वस्थानमस्तु रिक्थहारित्वं पिण्डदत्वं चौरसाभाव एव पुत्रीकरणं विनापीति। यत्र च भ्रात्रा पुत्रग्रहणानन्तरं तद्भ्रातुः पुत्र उत्पन्नः भ्रातृपुत्रममनुरुध्य वा पुत्रग्रहणे कृते तत्र दत्तकस्यैव पिण्डदत्वमिति, तदेतन्न श्रद्दधीमहि;

(१) 'शाकल्यात्' इति घ पुस्तके।

अपुत्रस्यैव भ्रातृपुत्रस्य पुत्रत्वे(१)पुत्रत्रयोदशत्वापत्तेः,

पुत्रान् द्वादशधानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड् बन्धुदायादाः षडदायादबान्धवाः ॥

इति तद्द्वादशत्वविरोधात् । 'भ्रातॄणामेकजातानाम्' इति व
मालम्ब्योक्तं च विज्ञानेश्वरेणापि "इदं भ्रातृपुत्रस्य पुत्रीकरण
वेऽन्येषां पुत्रत्वनिषेधार्थं न पुनः पुत्रत्वप्रतिपादनाय 'तत्
इत्यनेन विरोधाद्" इति । न च व्यवहिताधिकारबोधकवाक्यम
सभ्रातृपुत्रविषयमित्युक्तमिति वाच्यम्, तथा वक्तुमशक्यत्
तथा हि किमौरसाभावे औरसो भ्रातृपुत्रः, ततः पुत्रिकापुत्र
क्षेत्रजादिर्वा ? किं वा द्वादशविधपुत्राभावे सः, ततः पत्न्या
आद्ये—

पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ।

इत्यनेन विरोधः । द्वितीयेऽपि 'अविभक्तस्य भ्राता, विभक्तस्य
इत्यनेन विरोधः । न च तर्हि भ्रातृपुत्रस्य पुत्रत्वप्रतिप
वाक्यविरोधः 'नापुत्रस्य लोकोऽस्ति' इत्युपक्रम्य "जाय
वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते यज्ञेन देवेभ्यः, प्रजया पित
ब्रह्मचर्येण ऋषिभ्यः" इत्यादिशास्त्रबोधितस्याप्रजत्वप्रयु
षस्य भ्रातृपुत्रेणाऽपि निवृत्तिबोधकत्वात् । युक्तं चैतत्, स्वपु
भ्रातृपुत्रेणाऽपि वंशविच्छेदपरिहारसम्भवात् । 'पत्न्यां
पूर्वं कश्चित् मत्पिण्डदानरिक्थाधिकारी भवेत्' इ
कामनया भ्रातृपुत्रस्य दत्तकविधिना स्वीकारस्यौचि
वर्जितत्वाच्च । किञ्च सदृश एव प्रतिनिधिरिति
प्रतिनिधिन्यायः। तेन च पुत्रसदृश एव पुत्रप्रतिनिधिः सिद्ध
तथा च न मन्वादिवाक्येष्वश्रुतप्रतिग्रहादिकल्पनाक्लेशः,

(१) 'पुत्रत्वे' घपुस्तके नास्ति ।

मिताक्षरादिविरोधः, नापि भ्रातृपुत्रस्य याज्ञवल्क्योक्तपञ्चमस्थाननिवेशभङ्गः, पुत्रीकृतस्य प्रथमस्थाननिवेशेऽप्यतथाभूतस्य तदुक्तेः। किञ्च कालिकापुराणे एव शंकरसुतयोर्वेतालभैरवयोर्मध्ये भैरवपुत्रस्य तद्भ्रात्रा नन्दिवाक्येन पुत्रार्जने प्रवृत्तेन वेतालेन पुत्रीकरणं स्मर्यते ।

ततः कदाचिद्दुर्वश्यां भैरवो मैथुनं गतः ।
तस्यां संजनयामास सुवेशं नाम पुत्रकम् ॥
तमेव चक्रे तनयं वेतालोऽपि स्वकं सुतम् ॥ इति ।

न चात्र पुत्रीकरणं न प्रतीयते इति वाच्यं, तस्य भ्रातृपुत्रत्वमात्रेण स्वीयत्वसिद्धेः 'तमेव तनयं स्वकं सुतं चक्रे' इत्युपादानविरोधात् , स्वीयसुतानुष्ठानस्यैव शब्दार्थत्वादिति । 'भ्रातृणामेकजातानाम्' इत्यत्र भ्रातृपदं भ्रातृभगिन्योः परस्परपुत्रवारणार्थम् । अग्रिमभागिनेयनिषेधेन तुल्यन्यायेन भ्रात्रीयनिषेधस्यापि लाभादिति केचित् । एकजातपदं च भिन्नोदराणामेकपितृकाणामपि सपिण्डान्तरलाभसत्त्वे पुत्रवारणार्थं, न तु सर्वथा भिन्नोदरभ्रातृपुत्रस्याग्राह्यत्वार्थं तन्निषेधस्यानुपलम्भात् । एक इति एकोऽपीत्यर्थः, तेन द्वयोः पुत्रवत्त्वे अन्येषामपुत्राणां न भ्रातृपुत्रग्रहणासम्भवः । 'पुत्रवान्' इत्यत्र पुत्रे कापि संख्या न प्रतीयते 'राजपुरुषः' इत्यादौ राज्ञि तत्प्रतीतेरभेदैकत्वसंख्याप्रस्तावे शाब्दिकैर्निराकरणात् । एतेन पुत्रौ पुत्रा वा विद्यन्ते यस्येति विग्रहाद् द्व्यादिसंख्याप्रतीत्या 'न त्वेव एकं पुत्रं दद्यात्' इति निषेधोऽनर्थक इति प्रत्युक्तम् । संख्यांशे उदासीनतया तन्निषेधोपपत्तेः । पुत्रपदं चौरसपरं, तेन न दत्तकादेः पुत्रीकरणापत्तिः । अत्र तेनेत्येकवचनं पुत्रिण इति बहुवचनं च न विवक्षितम् । अन्यथा तद्बलाद् बहवोऽप्येकं पुत्रं युगपत्प्रतिगृह्णीयुः इति विधिकल्पनापत्तेः, यत्र द्वौ एकपुत्रौ द्वौ च भ्रातरौ तदनुरोधेन तदविवक्षाया आवश्यकत्वाच्च । अन्यथा पुत्रे एकत्वस्य भ्रात्रोर्बहुत्वस्य च

बाधेन पुत्रत्वमेव न स्यात् । केचित्तु दत्तके पुत्रप्रतिनिधित्वं पालके च पितृप्रतिनिधित्वमित्याहुः । दत्तके पुत्रत्वं पालके पितृत्वमिति मिताक्षरा । मतद्वयेऽपि जनको यथा पुत्रस्य पोषणसंस्कारादिकं करोति तथा पालकोऽपि दत्तकस्य तत्कुर्यात् । यथा चौरसः पितुराज्ञादि पालयति, तच्छ्राद्धादिकं च करोति, तद्रिक्थं च गृह्णाति, तत्सपिण्डादिविवाहं न करोति, तथा दत्तकोऽपि पालकस्याज्ञां पालयेत्, तच्छ्राद्धं कुर्यात्, तद्रिक्थं गृह्णीयात्, तद्गोत्रसपिण्डयोः कन्यां च वर्जयेत् इति । अयं तु विशेषः—दत्तकानन्तरम् औरसे उत्पन्ने चतुर्थांशं दत्तको गृह्णीयात् ।

उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः ।
सवर्णा, असवर्णास्तु ग्रासाच्छादनभाजनाः ॥

इति कात्यायनोक्तेः । 'सवर्णाः क्षेत्रजदत्तकादयः' इति मिताक्षरा । कौस्तुभे तु—

दत्तपुत्रे यदा जाते कदाचित्त्वौरसो भवेत् ।
पितुर्वित्तस्य सर्वस्य भवेतां समभागिनौ ॥
अविधानं विधानं वा यदि प्राप्नोति नन्दनः ।
विवाहविधिभाजं तु न कुर्याद्धनभाजनम् ॥
तस्मिन्जाते सुते दत्ते न कृते च विधानके ।
तत्सर्वस्यैव वित्तस्य स स्वामी पितुरञ्जसा ॥
जातेष्वन्येषु पुत्रेषु ज्येष्ठपुत्रप्रतिग्रहात् ।
पिता चेद्विभजेद्वित्तं नैवासौ ज्येष्ठभाग्भवेत् ॥ इति ।

प्रथमश्लोको जातकर्मादिसंस्कृतदत्तकस्यौरसेन समांशलाभपरः, द्वितीयश्लोकस्य यदि प्रतिग्रहीत्रा जातकर्माद्युपनयनान्तसंस्कारो न कृतः, दत्तकविधानं तु कृतं, तदा तस्य विवाहमात्रलाभः, नत्वन्यधनलाभ इत्यर्थः । यदि प्रतिगृहीतस्यापि दत्तकविधानं न कृतं, किन्तु जातकर्माद्युपनयनान्तसंस्कारमात्रं, तदा तस्य दत्तक-

त्वाभावादौरसस्यैव सर्वधनलाभः न केवलसंस्कृतस्येति तृतीय-श्लोकार्थः । एवञ्च यदा कतिपये संस्कारा दत्तकविधानं च कृतं तदा चतुर्थांशलाभो द्रष्टव्यः । चतुर्थश्लोकस्तु यदा समांशः क्रियते तदा तस्य ज्येष्ठत्वेऽपि ज्येष्ठांशनिषेधार्थ इत्युक्तम् । तन्मिताक्षरा-नादरणेनानादरणीयम् । दत्तकपुत्रीस्वीकुर्वतां तु तस्याः पत्न्य-भावे धनग्रहणेऽधिकारो दुहितृत्वात् इति । शौनकः—

ब्राह्मणानां सपिण्डेषु कर्तव्यः पुत्रसंग्रहः ।
तदभावेऽसपिण्डो वा अन्यत्र तु न कारयेत् ॥
क्षत्रियाणां स्वजातौ वा गुरुगोत्रसमोऽपि वा ।
वैश्यानां वैश्यजातौ वा शूद्राणां शूद्रजातिषु ॥
सर्वेषां चैव वर्णानां जातिष्वेव न चान्यतः ।
दौहित्रो भागिनेयश्च शूद्रस्यापि च दीयते ॥
नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन ।
बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः ॥
दक्षिणां गुरवे दद्याद्यथाशक्ति द्विजोत्तमः ।
नृपो राष्ट्रार्धमेवापि वैश्यो वित्तशतत्रयम् ॥
शूद्रः सर्वस्वमेवापि अशक्तश्चेद्यथाबलम् ॥ इति ।

ब्राह्मणानामिति । सपिण्डेष्वपि भ्रातृपुत्रो मुख्यः, तदभावे सगोत्रः सन् सपिण्डो यः कश्चित् । तदभावे त्वसगोत्रः सपिण्डः, तदभावे त्वसपिण्डः सगोत्रः, तदभावेऽसपिण्डः सन्नसगोत्र इति । तत्र भ्रातृपुत्रस्य पुत्रीकरणं प्रपञ्चितम् । तदभावे सपिण्ड एव सगोत्रः,

स्वगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः ।
विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते ॥

इति वृद्धगौतमात् । गोत्रतां संततित्वम् । तदभावे केवल-सपिण्डोऽपि, शौनकेन तदभाव एवासपिण्डोक्तेः । असपिण्डेष्वपि

सगोत्रो मुख्यः 'न सापिण्ड्यं विधीयते' इति शेषबलेनासपिण्डसगोत्रलाभात् । तदभावे असगोत्रः,

दत्ताद्या अपि तनया निजगोत्रेण संस्कृताः ।
आयान्ति पुत्रतां सम्यगन्यबीजसमुद्भवाः ॥

इति कालिकापुराणात्,

गोत्ररिक्थे जनयितुर्न भजेदत्रिमः सुतः ।

इति मनुनाऽसगोत्रस्य धननाच्च । प्रयत्नत इति आपद्धारार्थमित्यर्थः । अत्र दत्तकपुत्रीस्वीकर्तृपते भिन्नभिन्नगोत्रजातौ परस्परमसपिण्डौ कन्यापुत्रौ यत्र परस्परमसपिण्डाभ्यामेकगोत्राभ्यां प्रतिगृहीतौ तत्र तयोः कन्यापुत्रयोः परस्परं विवाहो न जायते एकगोत्रत्वादिति केचित् । अन्ये तु तयोर्विवाहो भवति । एकगोत्रसम्बन्धमात्रस्याविवाहप्रयोजकत्वाभावात्, किन्तु एकगोत्रजन्यत्वस्य 'असमानार्षगोत्रजाम्' इत्युक्तेः । अन्यथा असमानार्षगोत्राम्' इत्येव ब्रूयात् । तेन तस्या मातापितृगोत्रोद्भूतो निषिध्यते

राम् 'अमातृगोत्रप्रभवाम्' इति प्रभवद्वारार्थमिति । अर्धराज्येोत्पन्नमिसुत्रो गृहीतः तद्वर्षायमिति यावत् ।
वर्षाहृतं धनम् ।
क्षत्रियस्य यत्र स्वाम्यं तत् तद्राज्यं,
ग्रामाद्यर्धधनमेव देयमित्यर्थः ।

थ राजतम् ।

व्यवस्थया ॥

म् । सर्वस्वमिति । एकवर्षीयनम्' इत्युक्तेः, 'सर्वस्वं चान्वये सनेति । एकवर्षभृतिद्रव्ये यावद्दातुं

शक्यं ततः किञ्चिदाधिकं दद्यादित्यर्थः । दत्तकपुत्रमरणे तत्प्रतिग्रहीतृतत्पत्नीतत्पुत्रान्तरादीनां सर्वेषां सापिण्ड्याद्दशाहाशौचं, पालकमरणे दत्तकादेर्दशाहं सपिण्डसगोत्रत्वात् । जनकमरणे तु न दशाहमित्याद्यग्रे बोध्यम् ।

दौहित्रो भागिनेयश्च शूद्रस्यापि च दीयते ।

इत्यत्रोक्तं कौस्तुभे शौनकः—

दौहित्रो भागिनेयश्च शूद्राणां विहितः सुतः ।
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित् ॥ इति ।

पूर्वार्धे भागिनेयस्य दौहित्रसाहचर्यादुत्तरार्धे भागिनेयपदं दौहित्रोपलक्षणं, पुत्रत्वबुद्ध्यनर्हभ्रातृपितृव्यमातुलाद्युपलक्षणं चेति । अन्ये त्वाहुः—अपेः अवधारणमर्थः, तथा च जातित्वेन दौहित्रभागिनेयावुद्दिश्य शूद्रकर्तृकतानियमविधानादन्येषां तत्पुत्रनिषेधः फलति । न च तत्र चकारादन्येषामपि समुच्चयः कुतो न भवति ? एवञ्च तत्राऽपेरवधारणार्थकत्वमपि न कल्प्यते इति वाच्यं, तथा सति एतद्वाक्यवैयर्थ्यापत्तेः सर्वेषामेव जातित्वेन तदुपयप्राप्तेरिति । ननु एकस्यां दानक्रियायां दौहित्रभागिनेयकर्मकत्वशूद्रकर्तृकत्वयोर्विधाने वाक्यभेदः । न च तदुभयविशिष्टैकदानविधानान्न वाक्यभेदः, विशिष्टविधाने वाक्यभेदविरहादिति वाच्यम् । "माता पिता वा" इति दर्शनादापन्निवृत्तिरूपदृष्टप्रयोजनवत्त्वेन विशिष्टदानविधानासम्भवात्, दानभावनाया भाव्यसाकाङ्क्षतया श्रुतस्य शूद्रस्यैव भाव्यत्वेनान्वयसम्भवेनाश्रुतस्य तादृशप्रयोजनस्यान्वयासम्भवाच्च । तस्मात् 'दौहित्रभागिनेयौ शूद्राय दद्यात्' इत्यर्थः । ततश्च शूद्रकर्मकदानोद्देशेन दौहित्रभागिनेयौ नियम्येते शूद्रस्य द्वावेव दत्तपुत्रौ नान्ये इति, ब्राह्मणादीनां तु सर्वेऽपीति । न च शूद्रस्य स्वतःसिद्धत्वेन कुतो दानभाव्यत्वमिति वाच्यं, 'व्रीहीनवहन्ति' इत्यत्र व्रीहीणां स्वरूपेणाभाव्यत्वेऽपि संस्कारवत्तयाऽवहननभाव्यत्ववच्छू-

द्रस्य स्वरूपेण दानाभाव्यत्वेऽपि पितृत्वरूपसंस्कारवत्तया तद्भाव्यत्वादिति चेत्? न, 'दीयते' इति हि कर्मणि यक्, कर्मत्वेन च दौहित्रभागिनेययोः प्रतीत्या तयोरेव भाव्यत्वं लभ्यते। ततश्च शूद्रसम्बन्धिदानेन दौहित्रं भागिनेयं च पुत्रं कुर्यादित्यर्थः। तथा च प्रोक्तरीत्या कर्तृनियमाद् ब्राह्मणादेः तन्निषेधे पर्यवसानम्। पठन्ति च—

ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्।
दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः॥

इति वृद्धगौतमवचनम्,

सगोत्रजसुतालाभे पालयेदन्यगोत्रजम्।
दौहित्रं भागिनेयं वा मातृष्वसृसुतं विना॥

इति शाकलसंहितावचनं चेति। अन्ये तु दौहित्रभागिनेययोः शूद्राणां पत्युरेवाधिकारः,

दौहित्रं भागिनेयं च शूद्राणां च पतिर्यदि।

इति वचनात्; शेषं ब्राह्मवादित्याहुः। भट्टास्तु शूद्रस्यैव दौहित्रभागिनेयौ द्वौ नेतरस्येति न नियमः यथा 'दण्डी प्रैषानन्वाह'इति दण्डित्वेन प्रैषानुवचने मैत्रावरुणस्य विनियोगात् प्रैषानुवचनकर्तृत्वेन भाव्युपयोगिनो मैत्रावरुणस्यैव 'मैत्रावरुणाय दण्डं प्रयच्छति'इत्यत्र दण्डितया भाव्यत्वं, 'यजमानः स्वदण्डदानेन मैत्रावरुणं भावयेत्' इत्यर्थात्, तथा इहाप्यनपाकृतर्णत्वेन चतुर्थ्यर्थषष्ठ्या दौहित्रभागिनेयदानेन शूद्रं भावयेदित्यर्थः। एवञ्च दौहित्रभागिनेययोर्विधेयत्वेन नियमविधिविषयत्वं युक्तं, शूद्रस्य तु शेषितया तन्नियमे परिसंख्यापत्तेः, यथा 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति, सा च त्रिदोषेति। तस्माद्दौहित्रभागिनेयावेव शूद्रस्य मुख्यौ, तदभावे तु अन्योऽपि सजातीयः 'शूद्राणां शूद्रजातिषु' इति तेनै-

दत्तके विशेषः कालिकापुराणे—

*पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते ।
आचूडान्तं न पुत्रः स पुत्रतां याति चान्यतः ॥
चूडो[illegible]संस्कारा निजगोत्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥
ऊर्ध्वं तु पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप ॥
*गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत् ॥

वोक्तेः । नचेदं जातिपदं दौहित्रभागिनेययोरुपसंहार्यते इति वाच्यं, तथा सत्येकस्मृतौ सामान्यवाक्यवैयर्थ्यापत्तेः । एवञ्च ब्राह्मणादिभिरपि दौहित्रभागिनेयौ ग्राह्यौ बाधकाभावादिति वदन्ति । *पितुर्गोत्रेणेति । आचूडान्तं संस्कृत इत्यन्वयः । अभिविधावाङ् । स पुत्रोऽन्यतोऽन्यस्य ब्राह्मणादेः पुत्रतां न यातीति निषिध्यते । अत्र प्रतिग्रहीतुरेव जातकर्मादिविधानाज्जातमात्रप्रतिग्रहो मुख्यः, इहाऽपि 'आचूडान्तम्' इत्युक्तेश्च । पञ्चवर्षान्तं गौणः 'ऊर्ध्वन्तु पञ्चमाद्वर्षात्' इत्युक्तेः । *गृहीत्वेति । पुत्रेष्टिस्तस्य दासभावापनायिका । एतच्च विषादेरपि,

ऊर्ध्वन्तु पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप ।

इति सामान्यतो निषेधादिति यथाश्रुतानुरोधिनः । तदसत्, उक्तकालिकापुराणस्य राज्यार्हपुत्रपरत्वात् । तस्यैव च प्रतिग्रहीतृकर्तृकसंस्कार आवश्यकः । एवं हि कालिकापुराणम्—

न क्षेत्रजादितनयं राजा राज्येऽभिषेचयेत् ।
पित्रर्णशोधने नित्यमौरसे तनयेऽसति ॥ (असतीति च्छेदः)
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च भागाहास्तनया इमे ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च दासश्च षडेते पुत्रपांसनाः ॥

अलाभे पूर्वपूर्वेषां परान् समभियोजयेत् ।
पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत् ॥
दत्ताद्या अपि तनया निजगोत्रेण संस्कृताः ।
आयान्ति पुत्रतां सम्यगन्यबीजसमुद्भवाः ॥
पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते ।
आचूडान्तं न पुत्रः स पुत्रतां याति चान्यतः ॥
चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दासतोऽच्यते ॥
ऊर्ध्वन्तु पञ्चमाद्वर्षान्न दत्ताद्याः सुता नृप ।
गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत् ॥
पौनर्भवं तु तनयं जातमात्रं समानयेत् ।
कृत्वा पौनर्भवस्तोमं जातमात्रं तु तस्य वै ॥
सर्वांस्तु कुर्यात्संस्कारान् जातकर्मादिकानथ ।
कृते पौनर्भवस्तोमे सुतः पौनर्भवस्ततः ॥
एकोद्दिष्टं पितुः कुर्यान्न श्राद्धं पार्वणादिकम् ।
क्रीता या रमिता मौल्यैः सा दासीति निगद्यते ॥ इति ।

अस्यार्थः—दत्ताद्या इति । पुत्राः प्रतिग्रहीतृकर्तृकजातकर्मादिसकलसंस्कारसंस्कृता एव राज्यार्हाः, नाऽन्ये, सम्यक् पुत्रतां राज्यार्हतामियर्थात् । अन्यथा 'पुत्रमायान्ति' इत्येव ब्रूयात्, न तु सम्यगित्यपि । 'अन्यथा दास उच्यते' इत्यत्रापि अन्यथा(प्रतिग्रहीतृकर्तृकचूडान्तसंस्काराभावे दासः तद्द्राज्यभागानर्हः अन्यत्रान्यशब्दप्रयोगस्य "मासमाग्निहोत्रं जुहोति"इति वत्तद्धर्मातिदेशार्थत्वात् एवमेव 'दासं राज्ये न योजयेत्' इत्यभिधाय दत्तकराज्याधिकारं प्रकृत्य 'अन्यथा दासतोच्यते'इत्येतस्य संगतेरिति। पौनर्भवस्तोमः सोमयागप्रभेदः, तस्य सुतसंस्कारार्थत्वम् । अनाहिताग्नीनां तु तादृशयागासम्भवेऽपि तदेवताकचरुर्द्रष्टव्यः । ब्राह्मणादेस्तु न जन्मतः प्रति

ग्रहेऽधिकारः,

सदृशं तु प्रकुर्याद्यं गुणदोषे विचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स ज्ञेयः कृत्रिमः सुतः ॥

इति मनूक्तकृत्रिमपुत्रलक्षणे गुणदोषविचक्षणं प्राकृतव्यवहारं न तु बालमिति मेधातिथिविरोधात्, श्राद्धाकरणे दोषः, तत्करणे गुण इति गुणदोषावधारणकुशलमिति सर्वज्ञनारायणविरोधात् । "सदृशं तुल्यम्, 'इमं पुत्रं करोमि' इति एकस्य पुत्रचिकीर्षावदन्यस्य 'अहमस्य पुत्रो भवामि' इति तद्बुभूषया प्रतिग्रहीतृसादृश्यवन्तम्; सकामं यं कुर्यात्" इतिबौधायनसंवादात्, 'अहमस्य पुत्रो भवामि' इति मतिश्च न जातमात्रादाविति रत्नाकरविरोधाच्च । तस्मात्पञ्चाधिकवर्ष एव प्रतिग्रहार्ह इत्येके । अन्ये तु एतत्सर्वमसगोत्रदत्तकपरमित्याहुः । परे तु असगोत्रोऽपि उपनयनान्तसंस्कारोत्तरमपि परिणीतोऽपि उत्पन्नपुत्रोऽपि च दत्तको भवति बाधकाभावात्, "शुनःशेपो विश्वामित्रपुत्रः स्वयमेवाभवत्" इति बह्वृचब्राह्मणसंवादाच्च । शुनःशेपश्चोपनीतः । अनुपनीतस्य वेदाध्ययनासम्भवेन वैदिकमन्त्रैः प्रजापत्यादिस्तुतौ इन्द्रदत्तहिरण्मयरथप्रतिग्रहे च प्रवृत्त्यनुपपत्तेः । न च स स्वयंदत्त इति वाच्यम् 'दत्ताद्यास्तनयाः' इत्यत्राद्यपदेन कृत्रिमादीनामपि ग्रहणेन भवन्मते तस्यापि निषेधात् । न च श्रुतिवशाज्जातोपनयनः स्वयंदत्त एव स्वीकार्य इति वाच्यं, तर्हि जातोपनयनस्य दत्तकस्यापि दुर्वारत्वात्, श्रुत्या दत्ताद्या इत्यस्याप्रामाण्योन्नयनात्, 'पितुर्गोत्रेण' इत्यादेश्च प्रायशः कालिकापुराणादावदर्शनाच्च । अथवाऽस्तु 'दत्ताद्याः' इत्यस्य प्रामाण्यं, परन्तु 'अन्यबीजसमुद्भवाः' इति यथाश्रुतं व्यर्थम् दत्तादेरन्योत्पन्नत्वनैयत्यात् । अतस्तेनान्यकृतगर्भाधानादि उपनयनान्तसंस्कारयुक्तत्वं बोध्यते, बीजिनः पितुरुपनयनेऽधिकारात् । अन्यकृतोपनयनान्तसंस्कारा अपि दत्ताद्यास्तनयाः संस्कृताः कृतदत्रिमादि-

विधानाः निजगोत्रेणैव पुत्रतां सम्यक् यान्ति प्राप्नुवन्ति, दात्रिम-संस्कारवशेन पितृगोत्रत्यागस्य मनुनोक्तेः। एवं 'पितुर्गोत्रेण' इत्याद्यप्यस्तु, परन्तु "न पुत्रः स पुत्रतां याति चान्यत" इत्यस्य अन्यस्य पितृभिन्नस्य प्रतिग्रहीतुः पितृगोत्रेण पुत्रतां न याति किन्तु पितृगोत्रं विहायैव पुत्रतां यातीत्यर्थः। चूडेति। 'अन्यथा दास उच्यते' इति चतुर्थपादवशात् निजगोत्रेण प्रतिग्रहीतृगोत्रेण अन्यथा दातृगोत्रेण वा चूडादिसंस्काराः कृताश्चेत्तदा ते तनया दत्ताद्या भवन्ति, तेषामदासता दासभिन्नता उच्यते इत्यर्थः। उर्ध्वं त्विति। एतच्च यथाश्रुतमलग्नकम् 'गृहीत्वा पञ्चवर्षीयम्' इत्यनेन विरोधात्, किन्तु न हि निन्दान्यायेन पञ्चवर्षप्रतिग्रहस्तावकम्, तत्र प्रथमं पुत्रेष्टिः कार्या। तत्र दातृगोत्रेणोपनयन-परिणयान्तसंस्काराणां संजातत्वात् पुत्रपूतत्वार्था पुत्रेष्टिः पालकेन विहितकर्मान्तरानुष्ठानात्प्रथमं कार्या इत्यर्थः। यच्च-

अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः।
स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभाक्॥

इति वाक्यं, तत्पतितवेदमुपनयनपरमिति।

केचित्तु 'दत्ताद्याः' इत्यादिपञ्चवचनानि द्व्यामुष्यायणपराणि। तथाहि—दत्ताद्या इति अन्यबीजसमुद्भवा अपि दत्ताद्यास्तनयाः प्रतिग्रहीत्रा स्वगोत्रेण संस्कृता एव कृतजातकर्मादिसंस्कारा एव प्रतिग्रहीतुः सम्यक् पुत्रतां प्राप्नुवन्तीत्यर्थः। द्व्यामुष्यायण एकगोत्रः स इति भावः। पितुर्गोत्रेणेति। आचूडान्तं जनकगोत्रेण यः संस्कृतः सोऽन्यस्यैव पुत्रतां न याति, किन्तु द्व्यामुष्यायणो द्विगोत्र इत्यर्थः। चूडेति। चूडान्ताः प्राक्तनाः संस्काराश्चेत् पितृगोत्रेण जातास्तदा चूडामभृति निजगोत्रेण कृता एव चेत्तदा दत्ताद्यास्तनया भवन्ति द्व्यामुष्यायणा अप्येकगोत्रा इति भावः, चूडायां निजगोत्रानुष्ठान-

स्यैकगोत्रत्वप्रापकत्वात्। चूडायां तत्तद्गोत्रिणां प्रत्यार्षेयशिखाकरणोक्तेः। अन्यथाऽदासता दासवैलक्षण्यमात्रमुच्यते, एतस्य रिक्थग्राहित्वात्, न तु पुत्रत्वमित्यर्थः। उर्ध्वं त्विति स्तावकं, संस्कारेभ्यः प्रथमं पुत्रेष्टिः कार्येत्यर्थः। यथा च प्रतिग्रहीतृगोत्रेण चूडाकर्म समानगोत्रत्वप्रापकं, तथा तद्गोत्रे एतच्छाखोक्तविधिनोपनयनं तत्समानशाखीयत्वप्रापकमित्याह 'अन्यशाखोद्भवो दत्त' इतीत्याहुः। परन्तु एतेषां द्व्यामुष्यायणपरत्वेऽपि न केवलदत्तके विरोध इति शिवम्। वस्तुतस्तु दत्तको द्विविधः केवलो द्व्यामुष्यायणश्च। तत्र संविदं विना दत्त आद्यः। आवयोरसाविति संविदा दत्तोऽन्त्यः। तत्र दत्तकत्वस्य होमसाध्यादृष्टविशेषरूपताया उपपादितत्वात् तादृशादृष्टवशादेव प्रतिग्रहीतृकुले पुत्रपित्रादिसम्बन्धविशेषप्रयुक्तानि कार्याणि भवन्ति।

गोत्ररिक्थे जनयितुर्न भजेदत्रिमः सुतः।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥

इति मनुना दत्तकस्य जनकगोत्ररिक्थे निराकृत्य पुत्रं ददतो जनकस्य गोत्ररिक्थे अनुगच्छतीति गोत्ररिक्थानुगः पिण्डः सापिण्ड्यं स्वधा श्राद्धौर्ध्वदेहिकादि च व्यपैतीति गोत्रादिसत्त्वे श्राद्धादिसत्त्वं, तदसत्त्वे च श्राद्धाद्यभाव इत्यन्वयव्यतिरेकाभ्यां जनकश्राद्धादावधिकारनिराकरणात्। वस्तुतस्तु यथा 'जातपुत्रः कृष्णकेशोऽग्नीनादधीत' इत्यादौ वयोऽवस्थाविशेषः, यथा वा 'अर्धमन्तर्वेदि मिनोति, अर्धं बहिर्वेदि मिनोति'इत्यादौ सन्धिदेशो लक्ष्यते, तद्वत् गोत्ररिक्थपिण्डस्वधाशब्दैः जनकादिसम्बन्धप्रयुक्तं (१)कार्यं लक्ष्यते। व्यपैतीत्यनेन च तन्निवृत्तेरभिधानात्सोदरपितृव्यादिसम्बन्धनिवृत्तिरपि सिध्यति। तथा च केवलदत्तकस्य प्रतिग्रहीतुरेवौर्ध्वदेहिकश्राद्धादावधिकारः। तत्पुत्रस्य पितुः सपिण्डीकरण-

१ 'कार्यमात्रं' घपुस्तके।

पार्वणश्राद्धादि प्रतिग्रहीत्रैव सह कुर्यात्, एवं तत्पुत्रोऽपि। उभयोः पुत्राभावे त्वनायत्या सपिण्डान्तरवत पूर्वपितुरपि और्ध्वदेहिकादि कार्यम्। यत्तु केवलदत्तके मानाभावः तदविधानादिति, तन्न, केवलदत्तकस्य कस्यचिदपि क्वचिदपि व्यवहाराभावेऽपि प्रोक्तमनुना जनकादिसम्बन्धनिवृत्तेरभिधानात्, द्व्यामुष्यायणे च तदबाधादेव दुर्वारत्वात्, "ऊर्ध्वं सप्तमात् पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात्" इति गौतमकृतो बीजिकुले सप्तपुरुषं विवाहनिषेधो द्व्यामुष्यायणे सापिण्ड्यसद्भावेन व्यर्थ इति तत्सिद्धेश्च, तस्य जनकसापिण्ड्यासत्त्वेन विवाहप्राप्तेस्तत्सार्थक्यात्। किञ्च-

द्व्यामुष्यायणका ये स्युर्दत्तक्रीतादयः सुताः।
गोत्रद्वयेऽप्यनुद्वाहः शौङ्गशैशिरयोर्यथा॥

इति वचनेन द्व्यामुष्यायणस्य गोत्रद्वयं मनुना च पितृगोत्रनिवृत्तिरिति विरोधस्य परिहारार्थं सोऽपि स्वीकार्यः। एवमेव शूरेण कुन्तिभोजाय केवलदत्रिमत्वेन दत्तायाः कुन्त्याः पुत्रस्यार्जुनस्य शूरपुत्रवसुदेवदुहित्रा सुभद्रया सापिण्ड्यनिवृत्तिरुक्ता भट्टसोमेश्वरेण, सापि च केवलदत्तकास्वीकारे कथं सङ्गच्छेदिति। अस्य च केवलदत्तकस्य पालकपितृकुले एव सप्तपौरुषं, पालयितृमातृकुले एवञ्च पञ्चपौरुषं सापिण्ड्यम् दर्शितगौतमवचनात्, मनुना जनककुले तन्निवृत्तेरुक्तत्वाच्च। यत्तु, जनकगोत्रेणोपनयनादिसंस्कृतस्य जनककुले पितृतः सप्तपौरुषं मातृतश्च पञ्चपौरुषं, सापिण्ड्यं प्रतिग्रहीतृकुले तु त्रिपुरुषं प्रतिग्रहीतरि गौणपितृत्वप्रयोजकस्योत्पादकत्वस्योपनेतृत्वस्य चाभावात्। जनकगोत्रेणासंस्कृतस्य तु प्रतिग्रहीत्रादिभिरेव सप्तपौरुषं पञ्चपौरुषं च सापिण्ड्यमिति सापिण्ड्यमीमांसायां, तद्ग्रन्थकार एवाग्रे दूषयिष्यति। द्व्यामुष्यायणस्य श्राद्धेऽधिकारो ग्रन्थ एव व्यक्तीभविष्यति। अन्ये तु दत्तको द्विविधः केवलो द्व्यामुष्यायणश्च। तत्र केवलः प्रतिग्रहीतुरेव पुत्रः संपादितप्रतिग्र-

हीतृगोत्रसापिण्ड्यादिः सन्निवृत्तजनकगोत्रसापिण्ड्यादिः । व्याप्य-पुत्रत्वविधायकवचनैरेव व्यापकगोत्रसापिण्ड्यादिसिद्धेः 'गोत्र-रिक्थे जनयितुः' इति वाक्याच्च । अत्र पिण्डः सापिण्ड्यं न तु श्राद्धं 'ददतः स्वधा'इत्यनेन पौनरुक्त्यापत्तेः । न च प्रतिग्रहीतृसंस्कारेण तद्गोत्रादिसम्बन्धसिद्धावपि जनकगोत्रस्य तज्जन्यसंस्कारस्य च सत्त्वात्कथं तन्निवृत्तिरिति वाच्यं, निरुपाधिकदानादेव तन्निवृत्तेर्मनोरभिप्रेतत्वात् । अत एव तस्य प्रतिग्रहीतृगोत्रेणैव सर्वक्रियानुष्ठानं प्रतिग्रहीतृसपिण्डा एव तज्जननादौ दशाहाद्याशौचं प्रतिग्रहीतृकुल एव च तत्सपिण्डीकरणादि कुर्वन्ति । नचास्य जनकगोत्रसापिण्ड्याद्यभावे जनकसगोत्रासपिण्डाविवाहप्रसङ्ग इति वाच्यम्, 'असगोत्रा च या पितुः' इतिनिषेधात् । चकारेणासपिण्डा गृह्यते ।

ये ह्यामुष्यायणा ये च दत्तकक्रीतकादयः ।
गोत्रद्वयेऽप्यनुद्वाह्याः शौङ्गशैशिरयोर्यथा ॥

इति सङ्ग्रहाच्च । नचैवं तत्पुत्रस्य दत्तककन्याया विवाहः स्यादिति वाच्यम्, तस्याः पितृष्वसृत्वात् ,

पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि ।
मातुः सपत्नीं भगिनीमाचार्यतनयां तथा ॥
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ॥

इति याज्ञवल्क्योक्तेः । तत्पौत्रस्य च जनकपौत्र्या विवाहो भवत्येव, बाधकाभावात् । दत्तकानन्तरमौरसे जाते तु समरिक्थं गृह्णीयात् ,

दत्तपुत्रे यदा जाते कदाचित्त्वौरसो भवेत् ।
पितुर्वित्तस्य सर्वस्य भवेतां समभागिनौ ॥

इति वचनात् । आवयोरयमिति संविदा दत्तस्तु ह्यामुष्यायणः, 'एकपिण्डे द्वावनुकीर्त्तयेत् प्रतिग्रहीतारं चोत्पादयितारं च' इति

वचनात् । न च संविदि मानाभावः,

तथैवाक्षेत्रिणो बीजं परक्षेत्रे प्रवापिणः ।
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥
क्रियाभ्युपगमात्त्वेतद् बीजार्थं यत्प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्री तथैव च ॥

इति मनुवाक्यस्यैव संविदि प्रमाणत्वात् । यदत्रापत्यं भावि तदावयोरिति संविदा यत्क्षेत्रं क्षेत्रस्वामिना बीजवापार्थं दीयते तत्रोत्पन्नस्यापत्यस्य द्वावपि पितरौ भागिनाविष्यर्थात् । नचास्त्वयं क्षेत्रजादौ ह्यामुष्यायणत्वप्रयोजकोऽभिसन्धिः, दत्तके तु तत्सत्त्वे मानाभाव इति वाच्यम्, एकवस्तुनि लोके एवाभिसन्धिनोभयस्वामिकत्वसिद्धेः । न च दातुः पुत्रान्तरसत्त्वे संवादो व्यर्थः एकपुत्रस्य तु, 'न त्वेवैकं पुत्रं दद्यात्'इति वसिष्ठेन निषेध एवेति वाच्यं, प्रीतिशयेनानेकपुत्रस्यैव संवादसम्भवात् । एवं यः कृतोपनयनो दत्तः प्रतिग्रहीत्रा कृतविवाहादिः तत्र प्रतिग्रहीतृगोत्रसम्बन्धे जातेऽपि न जनकगोत्रसम्बन्धनिवृत्तिः,

अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः ।
स्वगोत्रेण स्वगृह्योक्तविधिना स स्वशाखभाक् ॥

इति वसिष्ठेनोपनयनोत्तरगृहीतस्य शाखाद्वयभागित्वोक्तेर्गोत्रद्वयभागित्वस्याप्यौचित्यात्, स्वगोत्रेणेति सहार्थतृतीयासत्त्वाच्च । अयमपि ह्यामुष्यायणः । ह्यामुष्यायणत्वं हि तत्तच्छाखाद्वयगोत्रभागित्वम् । एतेन चूडाप्राक्तनसंस्कारानन्तरं दत्ते प्रतिग्रहीत्रा चूडायां कृतायां ह्यामुष्यायणत्वं प्रत्युक्तम् वसिष्ठेन शाखाद्वयभागित्वोक्तेस्तस्य जनककृतोपनयन एव भावात् । यत्तु 'दत्ताद्या अपि तनयाः' इति कालिकापुराणं, तद्

अभावे पूर्वपूर्वेषां परान् समभिषेचयेत् ।

इति पूर्वोपक्रमादनेकदत्तकसमवाये राज्याधिकारयोग्यता-

तारतम्यबोधकम् । अन्यथा 'गृहीत्वा पञ्चवर्षीयम्' इति कृतचूडस्यापि परिग्रहार्थकवाक्यविरोधात् । एवं यः सोपाधिकदानेन दत्तः प्रतिग्रहीत्रा जातकर्मादिभिः संस्कृतः सोऽपि ह्यामुष्यायणः, निरुपाधिकदानाभावेन स्वगोत्रनिवृत्त्यभावात् । एवञ्च केवलदत्तकस्य जनककुले सापिण्ड्याभावेऽपि ह्यामुष्यायणस्य सर्वस्यापि तत्सन्ततेश्च गोत्रद्वयेऽप्यविवाहः, गोत्रद्वयसम्बन्धात्, कुलद्वयेऽपि त्रिपुरुषसापिण्ड्याच्च । द्वे श्राद्धे कुर्यात्, एकश्राद्धं वा; 'पितॄनुद्दिश्य एकपिण्डे द्वावनुकीर्तयेत् प्रतिग्रहीतारं चोत्पादयितारं चातृतीयात्' इति वचनात्,

दत्तकानां तु पुत्राणां सापिण्ड्यं स्यात्त्रिपूरुषम् ।
जनकस्य कुले तद्वद् ग्रहीतुरिति धारणा ॥

इति एतद्विषयकसङ्ग्रहोक्तेश्च । एतन्मते शुद्धदत्तपुत्रस्य जनकगोत्रे विवाहो न कार्यः । न च

गोत्ररिक्थे जनयितुर्न भजेदौरसः सुतः ।

इत्यनेन जनकगोत्रनिवृत्तिरुक्तैवेति वाच्यम्,

असपिण्डा च या मातुरसगोत्रा च या पितुः ।

इति तदुद्वाहनिषेधादिति स्मृतिचन्द्रिकाप्यनुकूलैव, यत्तु इदमपेशलमेव । 'संविदा तूभयोः' इति ह्यामुष्यायणदत्तकोऽपि गौतमादिसम्मतः तत्र जनकगोत्रानिवृत्तेर्गोत्रद्वयेऽप्यविवाहः, न च केवलदत्तकपुत्रस्य,

असपिण्डा च या मातुरसगोत्रा च या पितुः ।

इति मनूक्तेः । तथा वरस्य पितुर्मातुर्वाऽसपिण्डा असगोत्रा चेति न तदर्थः, मातृपितृद्वारकसापिण्डयशून्या वरस्यासगोत्रा चेति 'असमानार्षगोत्रजाम्, इति याज्ञवल्क्यैकवाक्यत्वात् एकमूलकल्पनालाघवात् । तथा च केवलदत्तकस्य जनकगोत्रेण विवाहे बाधकाभाव इति, तदशुद्धतरम्, मनुना 'असगोत्रा च याऽत्मनः' इति

विहाय 'असगोत्रा च या पितुः' इत्यभिधानविरोधात्, असपिण्डा च या मातुः पितुश्च वरस्यासगोत्रेत्यन्वयासम्भवाच्च ।

अभोज्या च महाश्वस्य अभेद्या च द्विपस्य च ।

इत्यादौ अश्वगजयोरभोज्या बालस्याभेद्या चेत्यन्वये सिद्धान्तविरोधादित्याहुः । अयन्तु विशेषः, एतन्मते पूर्वसिद्धान्तसंवादः प्रायशोऽस्त्येव । परन्तु शुद्धदत्तकस्योभयकुले साप्तपौरुषं सापिण्ड्यमिति कौस्तुभकृतां ग्रन्थकृतां च स्वरसः । शङ्करभट्टप्रभृतीनां तु ग्रहीतुः कुले साप्तपौरुषं सापिण्ड्यं जनककुले च तदभावेऽपि साप्तपौरुषमविवाह इति विशेषः । प्राञ्चस्तु भट्टसोमेश्वरादिभिरनेकैर्दत्रिमा पुत्री मन्यते । अङ्गराजाय लोमपादाय दशरथेन शान्ता नाम्नी कन्या दत्ता,

अयं राजा दशरथः सखा मे दयितः सुहृत् ।
अपत्यार्थे ममानेन दत्तेयं वरवर्णिनी ॥
याचमानस्य मे ब्रह्मन् शान्ता प्रियतरा मम ।
सोऽयं ते श्वशुरो वीर यथैवाहं तथा नृपः ॥

इत्यादिरामायणे ऋष्यशृङ्गं प्रति लोमपादवाक्यात् । क्रीता च स्कान्दे—

आत्मीकृत्य सुवर्णेन परकीयां तु कन्यकाम् ।
धर्म्येण विधिना दानमसगोत्रेऽपि युज्यते ॥

कृत्रिमा च हरिवंशे—

पृथां दुहितरं चक्रे कुन्तिस्तां पाण्डुरावहत् । इति ।

अत्र वसुदेवभगिनीं पृथां कुन्तिर्दुहितरं चक्रे इति चक्रेपदोक्तेः तस्याः कृत्रिमत्वम् । अपविद्धा चादिपर्वणि शकुन्तलोपाख्याने—

जनयामास स मुनिर्मेनकायां शकुन्तलाम् ।
प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम् ॥
जातमुत्सृज्य तं गर्भं मेनका मालिनीमनु ।
कृतकार्या ततस्तूर्णमगच्छच्छक्रसंसदम् ॥

*पञ्चमोर्ध्वं तु स्वदानेच्छोरेव दानं, नान्यथा ।
विक्रयं चैव दानं च न नेयाः स्युरनिच्छवः ।
दाराः पुत्राश्च सर्वस्वमात्मनैव तु*योजयेत् ॥

इति हेमाद्रिमाधवधृतव्यासदक्षादिवचनात् । यच्च याज्ञवल्क्यः—

स्वकुटुम्बाविरोधेन देयं दारसुतादृते । इति,

तदूर्ध्वं स्वदानानिच्छुपुत्रपरम् । तेन *सर्वस्वदाने स्वदानेच्छुदारपुत्रदानं सिद्धम् । *यत्तु विश्वजिदधिकरणं षष्ठे,तत्र *पुत्रादीनां ज्ञातित्वेन स्वशब्दवाच्यत्वात्पुत्रत्वेन

इत्याद्युक्त्वा—

उपस्थातुं गतश्चाहमपश्यं शयितामिमाम् ।
निर्जने विपिने रम्ये शकुन्तैः परिवारिताम् ॥
आनयित्वा ततश्चैनां दुहितृत्वे न्यवेशयम ।

इत्यभिधानादित्याहुः । ग्रन्थकृतोऽप्येतत्सर्वं सम्मतमेव । अत्र 'स ज्ञेयो दत्रिमः सुतः' इत्यत्र सुतपदोपादानात्कन्या न दत्रिमा भवितुमर्हति । न च तत्र सुतशब्दस्य नपुंसकेतरापत्यमर्थः, लक्षणापत्तेः । नापि कन्यायास्तथात्वं वदतां मतेऽपि पत्न्यादेः प्राक् पिण्डदानरिक्थादानयोरधिकारः । तस्मादौपाख्यानिकरीत्यनुरोधेन कन्यासु विधिमदृष्ट्वाऽङ्गीकारे मानाभावः । उपाख्यानोक्तास्वेव कन्यासु शौनकवसिष्ठाद्यन्यतरोक्तविधिर्नात इत्यत्रापि मानाभावादित्यभट्टानामभिप्रायः । प्रीतिसंयुक्तामित्युक्तं स्पष्टयति—*पञ्चमोर्ध्वमिति । *योजयेत् सम्बध्नीयात्, दद्यादित्यर्थः । *सर्वस्वदाने 'विश्वजिति सर्वस्वं ददाति" इत्यादौ । मीमांसाविरोधमाशङ्क्य निराकरोति—*यत्त्विति । *पुत्रादीनामिति । सर्वस्वशब्दे स्वशब्दो ज्ञातिवचनः,तथा च पुत्रत्वेन ज्ञातित्वात्तदनापत्तिरिति शङ्काऽर्थः ।

दानमाशङ्क्य निराकृतम्, *जन्यपुंस्त्वस्य दानेनानिष्पत्तेः। दासत्वेन दानं भवत्येव। *तस्मात्यथेष्टविनियोगार्हत्वं स्वत्वं भवत्येव। *पुत्रे स्वत्वाभावं वदन् पुत्रक्रयविक्रयादि *शुनःशेपविक्रयादिश्रौतलिङ्गा*दासक्रयविक्रयादिव्यवहारायोगात् मूर्ख एव। (१)*योऽपि'न(२)हि प्रभाया*रणः सुशेवोऽन्योदर्यो*मनसा मन्तवा उ' इति श्रुतौ दत्तकनिषेधः, सोप्यैरसातिशयार्थः। अन्यथा शुनःशेपादिप्रतिग्रहश्रौतलिङ्गविरोधापत्तेः। 'उपेयां तव पुत्रताम्'

निराकरणहेतुमाह-*जन्येति। पुत्रत्वं जन्यपुंस्त्वं, तच्च दानेन नोत्पद्यते, तस्य प्रागेव सिद्धत्वादित्यर्थः। दासत्वेन दाने बीजमाह-*तस्मादिति। सर्वस्वशब्दे स्वपदमीदृशस्वत्वार्थकमिति भावः। पुत्रदानाभावे केनचिद्बीजान्तरमुक्तं तदुपन्यस्य दूषयति—*पुत्रेइति। *शुनः शेपेति। बव्हृचब्राह्मणे कथाप्रसिद्धिः। तत्र शुनःशेपविक्रयोक्तिर्विश्वामित्रपुत्रत्वेन स्वत्वान्न विरुध्यते। *दासेति। दासत्वेन क्रयविक्रयव्यवहारः शुनःशेपे न युज्यते, दासत्वस्यैवाभावादित्यर्थः। दत्तकसामान्यनिषेधमाशङ्क्य निराकरोति-*योऽपीति। *अरणः अपार्णः अपगतोदकसम्बन्धः, अन्यकुलजः, यश्चान्योदर्यः अन्येनोदीरिताद्रजसो जातः, अनेन क्षेत्रजो लब्धः, अथवाऽन्यजायोदरसम्भूतः यः स्वीयायां जायायां जातः स स्वीये एवोदरे जातः 'अर्धो वा एष आत्मनो यत्पत्नी' इति श्रुतेः। सुशेवः सुष्ठु शेवं सुखं यस्मात्सः हितैषी, तथापि न हि ग्रभाय ग्रहणाय योग्यः। किञ्च *मनसा न मन्तवा मनसाऽपि ममायं पुत्र इति न मन्तव्य इत्यर्थः। ननु श्रौतं लिङ्गं क्रीतं स्वयंदत्तञ्च संस्कारानन्तरमपि दत्तकं साधयेदिति, तत्राह—

---

(१)'योऽपि' नास्ति ख०

(२) ऋ० सं० पञ्चमाष्टके द्वितीयेऽध्यायेऽयं मन्त्रः।

इत्युक्तेः । *इदं च औतलिङ्गं स्वयंदत्तक्रीतपरं न दत्तकपरम् । द्वादशविधपुत्रमध्ये 'दत्तात्मा तु स्वयंदत्तः, क्रीतश्च ताभ्यां विक्रीतः' इति याज्ञवल्क्येन तयोर्दत्तकाद्भेदोक्तेः । तयोश्च 'दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः'

*इदञ्चेति । तथाच औतं लिङ्गं क्रीतं स्वयन्दत्तञ्च संस्कारानन्तरं साधयति, न तु दत्तकम्, तदंशे लिङ्गाभावादिति भावः । एतच्च यथाश्रुताभिप्रायेण । यथेष्टविनियोगयोग्यत्वमिति । अत्रनिष्कर्षानुसारिणः । "स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु, ब्राह्मणस्याधिकं लब्धं, विजितं क्षत्रियस्य, निर्विष्टं वैश्यशूद्रयोः" इति गौतमसूत्रादेर्लोकसिद्धकारणानुवादत्वं वदतां विज्ञानेश्वरादीनामयमाशयः—स्वत्वमतिशयविशेषः, तत्कारणता क्रयप्रतिग्रहादीनां लोकव्यवहारादेव, न शास्त्रात्, तगविदुषामपि तदर्शनात् । अत एव संविभागेन समुदितद्रव्यगतस्यापि पूर्वस्वत्वस्य नाशः, स्वत्वान्तरोत्पत्तिश्चेति प्राञ्चः । पूर्वस्वत्वनाशस्वत्वान्तरोत्पत्तिकल्पने गौरवात् पूर्वस्वत्वमेव संविभागेन तत्तन्निष्ठतया ज्ञाप्यते इति नव्याः । अत एव क्षत्रियस्य वैजेयेऽपि जितस्य यत्र ग्रहादौ स्वत्वं स्थितं तत्रैव जेतुरपि स्वत्वं । जेतस्य करग्राहितायान्तु जेतुरपि तन्मात्रं न तु स्वत्वं, लोकेथैव कार्यकारणभावात् । तादृशस्वत्वाभावादेव च सार्वभौमेन सम्पूर्णा पृथिवी न देया, माण्डलिकेन तु सम्पूर्णमण्डलं न देयमेति षाष्ठसिद्धान्तः सङ्गच्छते । तत्तद्ग्रामक्षेत्रादौ स्वत्वं तु तत्तद्भौमिकानामेव, राज्ञां तु करग्रहमात्रम् । अत एवेदानीन्तनक्षेत्रदानेऽपि न भू*मिदानसिद्धिः, किन्तु तत्र वृत्तिकल्पनमात्रम् । भौमिकेभ्यः क्रीते तु तत्सिद्धिः । अत एव क्रीतगवादिजातवत्सादौ स्वीकृतगवादिजातत्वरूपोपायस्य शास्त्रेणाबोधनेऽपि स्वत्वव्यवहारः । एवं स्वीयभार्योत्पन्नपुत्रकन्यादौ स्वत्वं स्यात् । न चेष्टापत्तिः, त-

* भूदान इति घ पुस्तके ।

इति कलौ निषेधात्। तेन संस्कारोत्तरं स्वयं क्रीतौ न

था सति 'विश्वजिति सर्वस्वं ददाति' इति विहितसर्वस्वदाने तेषां दानापत्त्या कन्यापुत्रादि न देयमिति षाष्ठसिद्धान्तभङ्गापत्तिरितिचेत्? न, भार्यायां स्वत्वानुपगमात्। विप्रभार्यायां प्रतिग्रहेण स्वत्वमिति चेत्?तथापि क्षत्रियभार्यायां तदभावात्। एवञ्च भार्योत्पन्नेऽपत्ये न स्वत्वम्, लोके स्वत्वास्पदीभूतादुत्पत्तेरेव स्वत्वप्रयोजकत्वात्। एवं च क्षत्रियादिदत्तकप्रतिग्रहो गौण एवेति क्वापि दत्ते न स्वत्वम्। 'सजातीयेष्वयं प्रोक्तः' इति सजातीयेनैव सजातीयस्यैव प्रतिग्रहविधानात्। न चैवमपि विप्रान् प्रत्येव स मुख्योऽस्तु, तद्विधौ युगपद्वृत्तिद्वयविरोधापत्तेः। न च पुत्रप्रतिग्रहविधिर्विप्राधिकारिक एव न क्षत्रियाद्यधिकारिक इति सुवचम्।

दौहित्रो भागिनेयश्च शूद्रस्यापि च दीयते।

इति वचनेनेतरेषामप्यधिकारात्। तथाच न षाष्ठसिद्धान्तभङ्गः। एवं ब्राह्मविवाहविधिना विप्रस्य क्षत्रियकन्याविवाहे दानप्रतिग्रहयोर्गौणत्वादन्यत्र मुख्यत्वाच्च युगपद्वृत्तिद्वयविरोधः, क्षत्रियादीन् प्रति ब्राह्मादिविवाहप्रवृत्तिस्तु सर्वसंमतैव। एवञ्च तादृशविवाहोढायां विप्रायामपि न स्वत्वमिति भार्याप्यदेयैव।

स्वकुटुम्बाविरोधेन देयं दारसुतादृते।

इति याज्ञवल्क्यवचस्तु 'नान्तरिक्षे' इति वदनुवादमात्रम्। यत्तु षष्ठे गर्भदासदानमुक्तम् तत्तन्मातरि दानप्रतिग्रहक्रयविक्रयाद्यभावेन तदुत्पन्नेऽपि तत्र तदभावाच्चिन्त्यमिति। 'सजातीयेष्वयं प्रोक्तः' इति ब्राह्मादिविवाहवचांसि च विधिसमाहारमात्रम्। तथा च दत्तके भार्यायां च विप्रादिभेदाद्विधिभेदः तेन विप्रदत्तको विप्रभार्या च मुख्या, तत्पर एव 'दारसुतादृते' इति निषेधः। लोकसिद्धं स्वत्वं च गर्भदासेऽपि कार्यकारणभावान्तरमुपेत्योपे-

भवतः, तदुत्तरे दत्तको *न भवत्येवेति सिद्धम् ॥

अथ यमलयोः संस्कारक्रमार्थं ज्येष्ठकनिष्ठभाव उच्यते। मनुः—

पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः।
कथं तयोर्विभागः स्यादिति चेत्संशयो भवेत् ॥
सदृशः स्त्रीप्रजातानां पुत्राणामविशेषतः।
न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते ॥

तेन कनिष्ठायां पूर्वजात एव ज्येष्ठो न ज्येष्ठायां पश्चाज्जात इत्यर्थः। स एव श्राद्धाधिकारी।

जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम्।
यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता मता ॥

देवलः—

यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम्।
संतानः पितरश्चैव तस्मिन् ज्यैष्ठ्यं प्रतिष्ठितम् ॥

भागवते तु—

द्वौ तदा भवतो गर्भौ स्मृतिर्वेशविपर्ययात्।

इत्युक्तेःपश्चादुत्पन्नस्य ज्यैष्ठ्यमुक्तम्। अत्र देशाचारतो व्यवस्था। पूर्वमेव तु युक्तम्। 'गर्भाष्टमे' इत्यादौ विशेषनिर्देशे एव गर्भग्रहणं नान्यत्र। अन्यथा तद्वैयर्थ्यात् ॥

अथ सूतिकास्नानम्। ज्योतिषे—

करेन्द्रभाग्यानिलवासवान्त्य-
मैत्रेन्दवाश्विध्रुवभेऽह्नि पुंसाम्।
तिथावरिक्ते शुभमामनन्ति
प्रसूतिकास्नानविधिं मुनीन्द्राः ॥

यमित्यपि केचित्। *न भवत्येवेति। संस्कारोत्तरंत्र्यामुष्यायण इति मतान्तरं स्मर्त्तव्यम्। केवलदत्तकश्च व्यवस्थापित एवेति शिवम्।

अथ नामकर्म । मदनरत्ने बृहस्पतिः—

*द्वादशे दशमे वाऽपि जन्मतोऽपि त्रयोदशे ।
षोडशे विंशतौ चैव द्वात्रिंशे वर्णतः क्रमात् ॥

याज्ञवल्क्यः-'अहन्येकादशे नाम' । हेमाद्रौ भविष्ये—

नामधेयं दशम्यां तु द्वादश्यां मासि केचन ।
अष्टादशेऽहनि तथा वदन्त्यन्ये मनीषिणः ॥

*दशम्यामतीतायामिति ज्ञेयम् 'आशौचापगमे नामधेयम्' इति विष्णूक्तेः। गृह्यपरिशिष्टेऽपि-'जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामकरणम्' । व्युष्टे-अतीते । ज्योतिर्निबन्धे गर्गः—

अमासंक्रान्ति विष्ट्यादौ प्राप्तकालेऽपि नाचरेत् ।

*द्वादशे इति । ब्राह्मणस्य एकादशाहद्वादशाहौ, क्षत्रियस्य त्रयोदशाहः, वैश्यस्य षोडशाहविंशत्यहौ, 'षोडशैकोनविंशे वा' इति पाठे षोडशाहैकोनविंशत्यहौ, शूद्रस्य द्वात्रिंशे इत्यर्थः । *दशम्यामिति । एतेन—

दशमे द्वादशे वापि जन्मतो दिवसे शुभे ।
षोडशे विंशतौ चैव द्वादशे वर्णतः क्रमात् ॥

इति पठित्वा 'आशौचमध्ये नामकर्म'इति प्रलपन्तः परास्ताः । 'यथाचारं नियतदिने वा' इति प्रयोगरत्ने । तदुक्तं 'शतरात्रे संवत्सरे वा' इति । अत्र मुख्यकालादौ व्यतीपातादिसत्त्वे उत्तरेषु कालेषु कार्यम् , व्यतीपातादौ कर्मणो निषेधात् । तमेव निषेधमाह-*अमेति । *विष्ट्यादाविति । आदिना—

व्यतीपाते च संक्रान्तौ ग्रहणे वैधृतावपि ।
श्राद्धं कुर्यात् , शुभं नैव प्राप्तकालेऽपि मानवः ॥

इति गर्गोक्तवैधृतिव्यतीपातग्रहणानां ग्रहः । गुरुशुक्रास्तबाल्यवार्धक्यवक्रातिचारमलमासादिनिषेधस्तु नास्ति । उक्तकाला-

श्रीधरः—

*मित्रादित्यमघोत्तराशतभिषक्स्वातीधनिष्ठाच्युत-
प्राजेशाश्विशशाङ्कपौष्णदिनकृत्पुष्येषु राशौ स्थिरे ।
छिद्रां पञ्चदशीं विहाय नवमीं शुद्धेऽष्टमे भार्गव-
ज्ञाचार्यांशुतपादभागदिवसे नामानि कुर्याच्छिशोः ॥

मनुः—

शर्मान्तं ब्राह्मणस्य स्याद्वर्मान्तं क्षत्रियस्य तु ।
वैश्यस्य धनसंयुक्तं शूद्रस्य प्रेष्यसंयुतम् ॥

मदनरत्ने नारदीये—

सूतकान्ते नामकर्म विधेयं स्वकुलोचितम् ।
नाम पूर्वं तु मासस्य मङ्गलं सुसमाक्षरैः ॥

तत्रैव गार्ग्यः—

मासनाम गुरोर्नाम दद्याद् बालस्य वै पिता ॥

स्मृतिसङ्ग्रहे—

कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः ।
उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः ॥
योगीशः पुण्डरीकाक्षो मासनामान्यनुक्रमात् ॥

तिक्रमे तु ज्योतिःशास्त्रोक्ते शुभे काले कार्यम्,

नामधेयं दशम्यां तु द्वादश्यां वाऽपि कारयेत् ।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥

इति यमोक्तेः,

देशकालोपघाताद्यैः कालातिक्रमणं यदि ।
अनस्तगे इज्यासिते तत्कार्यञ्चोत्तरायणे ॥

इति नारदोक्तेश्च । तमेव शुभकालमाह—*मित्रेति । बृहस्पतिः ।

पूर्वाह्णः श्रेष्ठ इत्युक्तो मध्याह्नो मध्यमः स्मृतः ।
अपराह्णं च रात्रिं च वर्जयेन्नामकर्मणि ॥

अत्र *मार्गशीर्षादिश्चैत्रादिर्वा क्रम इति मदनरत्ने ।
तन्मासनाम प्रथमं दद्यात्सम्बुध्य चैव हि ।

अत्रकुलदेवतासम्बद्धं नाम प्रथमं कुर्यात् । वचनन्त्वग्रे । तच्च 'श्रीमहालक्ष्मीभक्तः' इत्यादि । ततो मासनाम 'पूर्वं तु मासस्य' इति-पूर्वशब्ददानात् 'तन्मासनाम प्रथमं दद्यात्' इति वाक्याच्च । *मार्गेति । अत्र मार्गशीर्षादिरेव क्रमो न च चैत्रादिः,

चैत्रादिमासनामानि वैकुण्ठोऽथ जनार्दनः ।
उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः ॥
योगीशः पुण्डरीकाक्षः कृष्णोऽनन्तोऽच्युतस्तथा ।
चक्रधारीति चैतानि क्रमादाहुर्मनीषिणः ॥

इति गार्ग्योक्तेरित्यर्थः । यदि मलमासे जन्म तदोत्तरमास-नाम 'षष्ट्या तु दिवसैर्मासः' इत्युक्तवाक्यात् । ततो नाक्षत्रं नाम कृत्वा व्यावहारिकं नाम कार्यम् । अत्र 'नामकर्म करिष्ये' इत्येव संकल्पः, कुलदेवतादिनामकरणस्यापि प्रधानत्वात् । यद्यपि तदाश्वलायनगृह्यसूत्रे नास्ति तथापि 'पारक्यमविरोधि यत्' इत्युक्तेरावश्यकम् । अन्यथा मातामहानां तत्रानुक्तेर्दर्शादौ प्राधा-न्यानुपपत्तेः । किञ्च तेषां करणं भवन्मतेऽङ्गम्, तया अङ्गप्रधा-नेतरकर्मणोऽतिरिक्तत्वात् । तल्लोपे च प्रायश्चित्तं भवन्मतेऽपि, अन्यथा तदङ्गापूर्वानुदयेन प्रधानापूर्वानुपपत्तेः । तस्मादमुकनाम्ने स्वस्तीति पुण्याहवाचनादौ प्रयोगो न युक्तः । किञ्च यत्र पूर्वं व्यावहारिकस्थाप्यनामनिश्चयो नास्ति तत्र कथं स्यादिति । अत्र व्यावहारिकं नाम 'शर्मान्तं ब्राह्मणस्य' इत्यादिना दर्शितं, तच्च त्रिपुरुषवाचि वा देववाचि स्वेष्टं वा कार्यम्,

देवतानां विशेषेण पित्रोर्वा नाम शस्यते ॥

इति कपिलसंहितावाक्यात् । पित्रोः कर्तुः पित्रोः । स्वेष्टपाह-पारस्करः 'दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता ना-

*देवालयगजाश्वानां वृक्षाणां वापिकूपयोः ॥
सर्वापणानां पण्यानां चिह्नार्थं योषितां नृणाम् ।

म करोति व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितमयुजाक्षरमीकारान्तं स्त्रियै तद्धितमिति' । घोषवदक्षराण्यादौ यस्य तद् घोषवदादि । घोषवन्ति अक्षराणि च वर्गाणां तृतीयचतुर्थपञ्चमानि हकारश्चेत्येतानि । अन्तर्मध्ये अन्तस्था यरलवा यस्य तत् । दीर्घाक्षरमभिष्ठाने समाप्तौ यस्य तत् । कृतं 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति परिभाषया कृदन्तम् । तद्धितं तद्धितान्तम् । अयुग्माक्षरमीकारान्तं च न कुर्यात् । तदेतत्त्रयं स्त्रियै हितमित्यर्थः । आश्वलायनः 'नाम चास्मै दद्युः घोषवदाद्यन्तरन्तस्थमभिनिष्ठानान्तं व्यक्षरं चतुरक्षरं वा व्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामः युग्मानि त्वेव पुंसामयुग्मानि स्त्रीणाम्' इति । घोषवदादि अन्तरन्तस्थमिति प्राग्वत् । अभिनिष्ठानो विसर्गः अन्ते यस्य तत् । अक्षरम् स्वरः । व्यञ्जनेषु न संरूपानियमः । युग्मानि त्वेवेति तदन्यलक्षणासत्त्वेऽपि न दोष इत्यर्थः । तेन देव इत्यादिवद् रुद्र इत्यादि । षडक्षरादिकं वा भवति । महाभाष्ये 'घोषवदाद्यन्तरन्तस्थमवृद्धमनरिप्रतिष्ठितं कुर्याच्च तद्धितं त्रिपुरुषानुकमिति । अवृद्धं वृद्धिर्यस्याचामादिस्तद्वृद्धम्, तद्विरुद्धम् । अनरिप्रतिष्ठितमिति । एवं —

नैव कार्यं नृपादीनां नाम जीवनहेतुतः ।
पूर्वः परस्य वर्णस्य हीनस्यापि न धारयेत् ॥

इत्यपि बोध्यम् । त्रिपुरुषानुकायति अभिधत्ते तत् । "अन्येषामपि" इति दीर्घः । अयुग्मानीति । विशेषमाह गोभिलः 'अयुग्दान्तं स्त्रीणाम्'इति'यशोदा''शर्मदा'इत्यादि। केचित्तु यन्नाम तदन्तं कार्यं यथा'पार्वतिदा'इत्यादि इत्याहुः।मन्मते'यशोदादा'इत्येव स्यात् । *देवालयेत्यादि । देवालयादीनां नाम कार्यमित्यर्थः । वासिष्ठः ।

काव्यानां च कवीनां च पश्वादीनां च सर्वशः ॥
राजप्रासादवास्तूनां नामकर्म विशिष्यते ॥

*नाक्षत्रमपि नाम कार्यम् । 'अभिवादनीयं च स मीक्षेत तन्मातापितरौ विद्यातामोपनयनात्' (१)इत्या श्वलायनोक्तेः । *'कुलदेवतानक्षत्रसम्बद्धं पिता नाम कुर्यात्' इति मदनरत्ने शङ्खोक्तेः । तच्च नक्षत्रपादा क्षराद्याक्षरं कुर्यादित्युक्तं परिशिष्टे—

तदक्षरादिकं नाम यस्मिन् धिष्ण्ये यदक्षरम् ।

इति । सुदर्शनभाष्ये तु—

*रोरेमसृज्येचिषु वृद्धिरादौ

तद् व्यक्षरं वा चतुरक्षरं वा त्रिवर्जयेदन्त्यलकाररेफौ ।
तन्मासनामादिकमेव चिन्त्यं स्फुटं वदेद्दक्षिणकर्णरन्ध्रे ॥

नाक्षत्रं व्यावहारिकं च कार्यमित्याह–*नाक्षत्रमपीति । अभिवादनीयम् उपनयने यन्नाम्नाऽभिवादनं कर्त्तव्यं तत् व्यावहारिकम् । *कुलेति । कुलसम्बद्धं देवतासम्बद्धं नक्षत्रसम्बद्धं चेत्यर्थः । *रोरे इति । रोहिणीमघारेवतीमृगशीर्षज्ये-

---

(१) एतत्पूर्वमन्योऽपि विशेषस्तेनोक्तः–'व्यक्षरं चतुरक्षरं वा, व्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामः युग्मानि त्वेव पुंसामयुजानि स्त्रीणाम्' इति । अत्र नारायणीयवृत्तिः–द्वे अक्षरे यस्य तत् व्यक्षरं व्यञ्जनपरिमितं, चतुरक्षरं वा उक्तलक्षणं नाम कुर्युः । भद्रः देवः भवः भवनाथः नागदेवः रुद्रदत्तः देवदत्तः इत्येवंलक्षणानि नामानि भवन्ति । व्यक्षरं चतुरक्षरं वेति यदुक्तं तत्काम्यमपीत्याह–(व्यक्षरमिति) प्रतिष्ठाब्रह्मवर्चसे च कुमारस्य, तत्संस्कारत्वात्, न कर्तुः । अथवा युग्मानि युग्माक्षराणि पुंसां नामधेयानि भवन्ति । एवकारोऽवधारणार्थः । कथं युग्ममेवाद्रियेत न पूर्वाणि लक्षणानीति । तेन शिवदत्तः नागदत्तः देवस्वामी वसुशर्मा रुद्रः जनार्दनः वेदघोषः पुरन्दरः विष्णुशर्मा इत्यादि सिद्धम् । अयुजान्ययुग्माक्षराणि स्त्रीणां नामानि भवन्ति । सुभद्रा सावित्री सत्यदा वसुदा इत्यादि' इति ।

ठात्पे च वान्त्यश्रवशाश्वयुक्षु ।
शेषेषु नाम्वोः कपरः स्वरोन्त्यः
स्वाप्वोरदीर्घः सविसर्ग इष्टः ॥

इत्युक्तम्। ठात्पे इति प्रोष्ठपदेत्यत्रादौ ठात्परे च वृद्धिः प्रौष्ठपाद इति । अन्त्यमपभरणीशब्दः श्रुतावुक्तः । तत्र श्रवणादौ च वादिवृद्धिः । अपभरणः आपभरण इत्यादि* । मदनरत्ने वसिष्ठः—

जन्माहे द्वादशाहे वा दशाहे वा विशेषतः ।
उत्तरारेवतीहस्तमूलपुष्याः सवारुणाः ॥
अवणादितिमैत्रं च स्वाती मृगशिरस्तथा ।
प्राजापत्यं धनिष्ठा च प्रशस्ता नामकर्मणि ॥

अथ दोलारोहः । पारिजाते बृहस्पतिः—

दोलारोहस्तु कर्तव्यो दशमे द्वादशेऽपि वा ।
षोडशे दिवसे वाऽपि द्वाविंशे दिवसेऽपि वा ॥

ष्ठाचित्राशब्देषु आदिवृद्धिः । रौहिणः, रैवतः, माघः, मार्गशीर्षः, ज्यैष्ठः, चैत्रः । *ठात्पे इतीति । ठकारात्पकारे परे वृद्धिः चकारादौ च, प्रौष्ठपादः 'जे प्रोष्ठपदानाम्' इति सूत्रात् । श्रवशाश्वेति । श्रवः, शतभिषक्, अश्वयुक् एषु वा आदिवृद्धिरित्यर्थः । *इत्यादीति । आदिना श्रवणः श्रावणः, शतभिषक् शातभिषजः, अश्वयुक् आश्वयुजः । "जातार्थेऽण् डिद्वा वक्तव्यः" इति वार्तिकात् शतभिषज इत्यपि बोध्यम् । शेषेषु उक्तादन्येषु आदिवृद्धिर्न । कृत्तिकः, तिष्यः, आश्लेषः, पूर्वाफल्गुनः, उत्तराफल्गुनः, हस्तः, विशाखः, अनुराधः, पूर्वाषाढः, उत्तराषाढः, धनिष्ठः, पूर्वाभाद्रपदः, उत्तराभाद्रपदः, इति । अःम्वोः आर्द्रामूलयोः अन्त्यस्वरः कपरो भवति । आर्द्रकः, मूलकः । स्वाप्वोः स्वातीपुनर्वस्वोः अन्त्यः स्वरः अदीर्घः दीर्घरहितः, ह्रस्व इति यावत् । सविसर्गश्च इष्टः, स्वातिः पुन-

काव्यानां च कवीनां च पश्वादीनां च सर्वशः ॥
राजप्रासादवास्तूनां नामकर्म विशिष्यते ॥

*नाक्षत्रमपि नाम कार्यम् । 'अभिवादनीयं च समीक्षेत तन्मातापितरौ विद्यातामोपनयनात्' (१)इत्याश्वलायनोक्तेः । *'कुलदेवतानक्षत्रसम्बद्धं पिता नाम कुर्यात्' इति मदनरत्ने शङ्खोक्तेः । तच्च नक्षत्रपादाक्षराद्याक्षरं कुर्यादित्युक्तं परिशिष्टे—

तदक्षरादिकं नाम यस्मिन् धिष्ण्ये यदक्षरम् ।

इति । सुदर्शनभाष्ये तु—

*रोरेममृज्येचिषु वृद्धिरादौ

तद् द्व्यक्षरं वा चतुरक्षरं वा त्रिवर्जयेदन्त्यलकाररेफौ ।
तन्मासनामादिकमेव चिन्त्यं स्फुटं वदेद्दक्षिणकर्णरन्ध्रे ॥

नाक्षत्रं व्यावहारिकं च कार्यमित्याह-*नाक्षत्रमपीति । अभिवादनीयम् उपनयने यन्नाम्नाऽभिवादनं कर्तव्यं तत् व्यावहारिकम् । *कुलेति । कुलसम्बद्धं देवतासम्बद्धं नक्षत्रसम्बद्धं चेत्यर्थः । *रोरे इति । रोहिणीमघारेवतीमृगशीर्षज्ये-

---

(१) एतत्पूर्वमन्योऽपि विशेषस्तेनोक्तः-'द्व्यक्षरं चतुरक्षरं वा, द्व्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामः युग्मानि त्वेव पुंसामयुजानि स्त्रीणाम्' इति । अत्र नारायणीयवृत्तिः-द्वे अक्षरे यस्य तत् द्व्यक्षरं व्यञ्जनमपरिमितं, चतुरक्षरं वा उक्तलक्षणं नाम कुर्युः । भद्रः देवः भवः भवनाथः नागदेवः रुद्रदत्तः देवदत्तः इत्येवंलक्षणानि नामानि भवन्ति । द्व्यक्षरं चतुरक्षरं वेति यदुक्तं तत्काम्यमपीत्याह-(द्व्यक्षरमिति)प्रतिष्ठाब्रह्मवर्चसे च कुमारस्य, तत्संस्कारत्वात्, न कर्तुः । अथवा युग्मानि युग्माक्षराणि पुंसां नामधेयानि भवन्ति । एवकारोऽवधारणार्थः । कथं युग्ममेवाद्रियेत न पूर्वाणि लक्षणानीति । तेन शिवदत्तः नागदत्तः देवस्वामी वसुशर्मा रुद्रः जनार्दनः वेदघोषः पुरन्दरः विष्णुशर्मा इत्यादि सिद्धम् । अयुजान्ययुग्माक्षराणि स्त्रीणां नामानि भवन्ति । सुभद्रा सावित्री सत्यदा वसुदा इत्यादि' इति ।

ठात्पे च वान्त्यश्रवशाश्वयुक्षु ।
शेषेषु नाम्वोः कपरः स्वरोन्त्यः
स्वाप्वोरदीर्घः सविसर्ग इष्टः ॥

इत्युक्तम्। ठात्पे इति प्रोष्ठपदेत्यत्रादौ ठात्परे च वृद्धिः प्रौष्ठपाद इति । अन्त्यमपभरणीशब्दः श्रुतावुक्तः । तत्र श्रवणादौ च वादिवृद्धिः । अपभरणः आपभरण इत्यादि* । मदनरत्ने वसिष्ठः—

जन्माहे द्वादशाहे वा दशाहे वा विशेषतः ।
उत्तरारेवतीहस्तमूलपुष्याः सवारुणाः ॥
श्रवणादितिमैत्रं च स्वाती मृगशिरस्तथा ।
प्राजापत्यं धनिष्ठा च प्रशस्ता नामकर्मणि ॥

अथ दोलारोहः । पारिजाते बृहस्पतिः—

दोलारोहस्तु कर्तव्यो दशमे द्वादशेऽपि वा ।
षोडशे दिवसे वाऽपि द्वाविंशे दिवसेऽपि वा ॥

ष्ठाचित्राशब्देषु आदिवृद्धिः । रौहिणः, रैवतः, माघः, मार्गशीर्षः, ज्यैष्ठः, चैत्रः । *ठात्पे इतीति । ठकारात्पकारे परे वृद्धिः चकारादौ च, प्रौष्ठपादः 'जे प्रोष्ठपदानाम्' इति सूत्रात् । श्रवशाश्वेति । श्रवः, शतभिषक्, अश्वयुक् एषु वा आदिवृद्धिरित्यर्थः । *इत्यादीति । आदिना श्रवणः श्रावणः, शतभिषक् शातभिषजः, अश्वयुक् आश्वयुजः । "जातार्थेऽण् डिद्वा वक्तव्यः" इति वार्तिकात् शतभिषज इत्यपि बोध्यम् । शेषेषु उक्तादन्येषु आदिवृद्धिर्न । कृत्तिकः, तिष्यः, आश्लेषः, पूर्वाफल्गुनः, उत्तराफल्गुनः, हस्तः, विशाखः, अनुराधः, पूर्वाषाढः, उत्तराषाढः, धनिष्ठः, पूर्वाभाद्रपदः, उत्तराभाद्रपदः, इति । अन्त्यस्वरः कपरो भवति । आर्द्रकः, मूलकः । स्वाप्वोः स्वातीपुनर्वस्वोः अन्त्यः स्वरः अदीर्घः दीर्घरहितः, ह्रस्व इति यावत् । सविसर्गश्च इष्टः, स्वातिः पुन-

ज्योतिर्निबन्धे—
करत्रये वैष्णवरेवतीष्वदितिद्वये वाऽऽहिबनक्षध्रुवेषु ।
कुर्याच्छिशूनां नृपतेश्च तद्वदान्दोलनं वै सुखिनो भवन्ति ॥
तत्रैव—
आन्दोलाशयने पुंसो द्वादशो दिवसः शुभः ।
त्रयोदशस्तु कन्याया न नक्षत्रविचारणा ॥
अन्यस्मिन्दिवसे चेत्स्यात्तिथिर्गास्ये प्रशस्यते ॥
अथ दुग्धपानम् । नृसिंहः—
एकत्रिंशद्दिने चैव पयः शङ्खेन पाययेत् ।
अन्नप्राशननक्षत्रे दिवसोदयरात्रिषु ॥
अथ कर्णवेधः । मदनरत्ने वसिष्ठश्रीधरौ—
मासे षष्ठे सप्तमे वाऽष्टमे वा वेध्यौ कर्णौ द्वादशे षोडशेऽब्दे ।
मध्येनाह्नः पूर्वभागे न रात्रौ *नक्षत्रे द्वे द्वे तिथी वर्जयित्वा ॥
अत्र *जन्ममासो वर्ज्यः । ज्योतिर्निबन्धे गर्गः—
मासे षष्ठे सप्तमे वाऽप्यष्टमे मासि वत्सरे ।
कर्णवेधं प्रशंसन्ति पुष्ट्यायुःश्रीविवृद्धये ॥
मदनरत्ने—
प्रथमे सप्तमे मासि अष्टमे दशमेऽथ वा ।
द्वादशे च तथा कुर्यात्कर्णवेधं शुभावहम् ॥

वसुरिति ग्राह्यम् । अधिकारिणमाह-शङ्खः 'पिता वा कुर्यादन्यो वा कुलवृद्धः' । इति नामकरणमिति ।

प्रकृतण्डो(१)लारोहणादि ज्योतिर्विदादिष्टे मुहूर्ते कार्यम् । *नक्षत्रे द्वे इत्यादि । यस्मिन् दिने नक्षत्रद्वयं तिथिद्वयं वा तद्दिनं वर्जयेदित्यर्थः ।

*जन्ममास इति । प्रथमाब्दे विहितत्वेन निषेधानवकाशादिदं द्वितीयाद्यब्दपरम् ।

(१) खट्वारोहणादि इति घ पुस्तके ।

हेमाद्रौ व्यासः—

कार्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपि वा ।
कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने ॥

श्रीधरः—

हरिहयकरचित्रासौम्यपौष्णोत्तरार्या-
दितिवसुषु घटालीसिंहवर्ज्ये सुलग्ने ।
शशिगुरुबुधकाव्यानां दिने पर्वरिक्त-
रहिततिथिषु शुद्धे नैधने कर्णवेधः ॥

मदनरत्ने बृहस्पतिः—

द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी ।
द्वादशी पञ्चमी शस्ता तृतीया कर्णवेधने ॥
सौवर्णी राजपुत्रस्य राजती विप्रवैश्ययोः ।
शूद्रस्य चायसी सूची मध्यमाऽष्टाङ्गुलात्मिका ॥

हेमाद्रौ देवलः—

कर्णरन्ध्रे रवेश्छाया न विशेदग्रजन्मनः ।
तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः ॥

शङ्खः—

अङ्गुष्ठ(१)मात्रसुषिरौ कर्णौ न भवतो यदि ।
तस्मै श्राद्धं न दातव्यं दत्तं चेदासुरं भवेत् ॥

अथ ताम्बूलभक्षणम् । चण्डेश्वरः—

सार्धमासद्वये दद्यात्ताम्बूलं प्रथमं शिशोः ।
कर्पूरादिकसम्मिश्रं विलासाय हिताय च ॥

---

(१) इदं च वाक्यं परिसंख्याविधया । 'शिशोर्विवर्धने कार्यं यावदाभरणक्षमम् ।' इति संस्कारकौस्तुभोक्तविष्णुधर्मोक्तवाक्यतो यथेच्छाभरणानुकूल्येनाङ्गुष्ठाधिकच्छिद्रनिरासार्थम् । न तु विधयाऽङ्गुष्ठमात्रच्छिद्रविध्यर्थम् । तथा सति सूर्यच्छायाप्रवेशानुकूलच्छिद्रनियामकदेवलवाक्यवैयर्थ्यापत्तिः ।

मूलार्कचित्रकरातिष्यहरीन्द्रभेषु
पौष्णे तथा मृगशिरोदितिवासवेषु ।
अर्केन्दुजीवभृगुबोधनवासरेषु
ताम्बूलभक्षणविधिर्मुनिभिः प्रदिष्टः ॥

अथ निष्क्रमणम् । ज्योतिर्निबन्धे—

तृतीये वा चतुर्थे वा मासि निष्क्रमणं भवेत् ॥

यमः—

ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम् ।
चतुर्थे मासि कर्तव्यं शिशोश्चन्द्रस्य दर्शनम् ॥

अत्र—

सूर्येन्द्वोः कर्मणी ये च तयोः श्राद्धं न विद्यते ।

इति छन्दोगपरिशिष्टात् 'छन्दोगानां निष्क्रमणे वृद्धि श्राद्धं नास्ति' इति कल्पतरुः ।

व्यासः—

मैत्रे पुष्यपुनर्वसुप्रथमभे पौष्णेऽनुकूले विधौ
हस्ते चैव सुरेश्वरे च मृगभे तारासु शस्तासु च ।
कुर्यान्निष्क्रमणं शिशोर्बुधगुरौ शुक्रे विरिक्ते तिथौ
कन्याकुम्भतुलामृगारिभवने सौम्यग्रहालोकिते ॥

मदनरत्ने—

अन्नप्राशनकाले वा कुर्यान्निष्क्रमणक्रियाम् ।

विष्णुधर्मे—

दिगीशानां दिने तत्र तथा चन्द्रार्कयोर्द्विजः ।
पूजनं वासुदेवस्य गगनस्य च कारयेत् ॥
बहिर्निष्कासयेद्गेहात् शङ्खपुण्याहनिस्वनैः ।
चन्द्रार्कयोर्दिगीशानां दिशां च गगनस्य च ॥
निक्षेपार्थमिमं दक्षि ते मे रक्षन्तु सर्वदा ।

अप्रमत्तं प्रमत्तं वा दिवारात्रमथापि वा ॥
रक्षन्तु सततं सर्वे देवाः शक्रपुरोगमाः ।

माधवीये मार्कण्डेयः—

अग्रतोऽथ प्रविन्यस्य शिल्पभाण्डानि सर्वशः ।
शस्त्राणि चैव वस्त्राणि ततः पश्येत्तु लक्षणम् ॥
प्रथमं यत्स्पृशेद्बालस्ततो भाण्डं स्वयं तदा ।
जीविका तस्य बालस्य तेनैव तु भविष्यति ॥ इति ।

अथोपवेशनम् । प्रयोगपारिजाते पाद्मे विष्णुधर्मे च—

पञ्चमे च तथा मासि भूमौ तमुपवेशयेत् ।
तत्र सर्वे ग्रहाः शस्ता भौमोऽप्यत्र विशेषतः ॥
उत्तरात्रितयं सौम्यं पुष्यश्चै शक्रदैवतम् ।
प्राजापत्यं च हस्तश्च शस्तमाश्विनमित्रभम् ॥
वाराहं पूजयेद्देवं पृथिवीं च तथा द्विजः ।
रक्षैनं वसुधे देवि सदा सर्वगतं शुभे ॥
आयुःप्रमाणं सकलं निक्षिपस्व हरिप्रिये ।
अचिरादायुषस्त्वस्य ये केचित्परिपन्थिनः ॥
जीवितारोग्यवित्तेषु निर्दहस्वाग्निरेण तान् ।
वरेण्याशेषभूतानां माता त्वमसि कामधुक् ॥
अजरा चाप्रमेया च सर्वभूतनमस्कृता ।
चराचराणां भूतानां प्रतिष्ठानाव्यया ह्यसि ॥
कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यताम् ॥

अथान्नप्राशनम् । पारिजाते नारदः—

जन्मतो मासि षष्ठे स्यात्सौरेणान्नाशनं परम् ।
संवत्सरे वा संपूर्णे केचिदिच्छन्ति पण्डिताः ॥

मदनरत्ने लौगाक्षिः 'षष्ठेऽन्नप्राशनं जातेषु दन्तेषु वा' इति । शङ्खः—'संवत्सरेऽन्नप्राशनमर्धसंवत्सरे वा' इति ।

ज्योतिर्निबन्धे नारदः—

षष्ठे वाप्यष्टमे मासि पुंसां, स्त्रीणां तु पञ्चमे ।
सप्तमे मासि वा कार्यं नवान्नप्राशनं शुभम् ॥
रिक्तां दिनक्षयं नन्दां द्वादशीमष्टमीममाम् ।
त्यक्त्वाऽन्यतिथयः प्रोक्ताः सितजीवज्ञवासराः ॥
चन्द्रवारं प्रशंसन्ति कृष्णे चान्त्यत्रिकं विना ।

श्रीधरः—

आदित्यतिष्यवसुसौम्यकरानिलाश्वि-
चित्राजविष्णुवरुणोत्तरपौष्णमित्राः ।
बालान्नभोजनविधौ दशमे विशुद्धे
छिद्रां विहाय नवमीं तिथयः शुभाः स्युः ॥

वसिष्ठः—

बालान्नभुक्तौ व्रतबन्धने च
राजाभिषेके खलु जन्मधिष्ण्यम् ।
शुभं त्वनिष्टं सततं विवाहे
सीमन्तयात्रादिषु मङ्गलेषु ॥

मार्कण्डेयविष्णुधर्मयोः—

ब्रह्माणं शङ्करं विष्णुं चन्द्रार्कौ च दिगीश्वरान् ।
भुवं दिशश्च संपूज्य हुत्वा वह्नौ तथा चरुम् ॥
देवतापुरतस्तस्य धात्र्युत्सङ्गगतस्य च ।
अलङ्कृतस्य दातव्यमन्नं पात्रे सकाञ्चनम् ॥
मध्वाज्यदधिसंयुक्तं प्रा(१)शयेत्पायसं तु वा ॥ इति।

अथाब्दपूर्तिः । व्यवहारनिर्णये—

नवाम्बरधरो भूत्वा पूजयेच्च चिरायुषम् ।

(१) प्राशनमन्त्रस्तु आश्वलायनेनोक्तः-'अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥' इति ।

मार्कण्डेयं नरो भक्त्या पूजयेत्प्रयतस्तथा ॥
ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम् ।
प्रह्लादं च हनूमन्तं बिभीषणमथार्चयेत् ॥
स्वनक्षत्रं जन्मतिथिं प्राप्य संपूजयेन्नरः ।
षष्टीं च दधिभक्तेन वर्षे वर्षे पुनः पुनः ॥

तिथितत्त्वे एतन्नामभिस्तिलहोमोऽप्युक्तः । आदित्यपुराणे—

सर्वैश्च जन्मदिवसे स्नातैर्मङ्गलवारिभिः ।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वनक्षत्रं च पितरौ तथा देवः प्रजापतिः ।
प्रतिसंवत्सरं यत्नात्कर्तव्यश्च महोत्सवः ॥

कृत्यचिन्तामणौ—

गुडदुग्धतिलान्दद्याद्धस्ते ग्रन्थौ च बन्धयेत् ।
गुग्गुलं निम्बसिद्धार्थदूर्वागोरोचनादिकम् ॥
संपूज्य भानुविघ्नेशौ महर्षिं प्रार्थयेदिदम् ।
चिरंजीवी यथा त्वं भो भविष्यामि तथा मुने ॥
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्वदा ।
मार्कण्डेय नमस्तेऽस्तु सप्तकल्पान्तजीवन ॥
आयुरारोग्यसिद्ध्यर्थं प्रसीद भगवन्मुने ।
चिरंजीवी यथा त्वं तु मुनीनां प्रवर द्विज ॥
कुरुष्व मुनिशार्दूल तथा मां चिरजीविनम् ।
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ॥
सतिलं गुडसंमिश्रमञ्जल्यर्धमितं पयः ।
मार्कण्डेयादरं लब्ध्वा पिबाम्यायुर्विवृद्धये ॥

इति पयः पिबेत् । तिथितत्त्वे स्कान्दे—

खण्डनं नखकेशानां मैथुनाध्वागमौ तथा ।

आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत् ॥

तत्रैव दीपिकायाम्—

कृतान्तकुजयोर्वारे यस्य जन्मतिथिर्भवेत् ।
अनृक्षयोगसंप्राप्तौ विघ्नस्तस्य पदे पदे ॥

(कृतान्तः शनिः)

तस्य *सर्वौषधिस्नानं गुरुदेवाग्निपूजनम् ॥

वृद्धमनुः—

मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥

अत्र *जन्मतिथिरौदयिकी ग्राह्या ।

युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥

इति कृत्यतत्त्वार्णवे वचनात् । विशेषो मत्कृतशूद्रधर्मे ज्ञेयः॥

अथ काटिसूत्रम् । प्रयोगपारिजाते ब्राह्मे—

प्रतिसंवत्सरान्तर्क्षे वक्ष्ये नृणां विधिं परम् ।
दत्त्वा गोभूहिरण्यादि तथा स्वर्णादिनिर्मितम् ॥

---

*सर्वौषधीति । छन्दोगपरिशिष्टे-

कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दने ।
वचाचम्पकमुस्ताश्च सर्वौषध्यो दश स्मृताः ॥

अपरार्के—

वला च शंखपुष्पी च कुष्ठं चैव वचा तथा ।
नागकेशरचूर्णे च सर्वौषधिगणो मतः ॥

महार्णवे—

मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम् ।
सटी चम्पकमुस्ता च सर्वौषधिगणो मतः ॥ इति ।

*जन्मतिथिरिति । तद्द्वैधे राजमार्त्तण्डः—

बध्नीयात्कटिसूत्रं च वासः संगृह्य नूतनम् ।
दूर्वाङ्कुरैरथाज्येन चरुणा वा पिनाकिनम् ॥
आयुष्यहोमं कृत्वा च तर्पयेत्पितृदेवताः ।

अथ चौलम् । प्रयोगपारिजाते षड्गुरुशिष्यः—

*जाताधिकाराज्जन्मादितृतीयेऽब्दे तु चौलकम् ।
आद्येऽब्दे कुर्वते केचित्पञ्चमेऽब्दे द्वितीयके ॥
*उपनीत्या सहैवेति विकल्पाः कुलधर्मतः ।

बृहस्पतिः—

तृतीयेऽब्दे शिशोर्गर्भाज्जन्मतो वा विशेषतः ।
पञ्चमे सप्तमे वापि स्त्रियाः पुंसोऽपि वा समम् ॥

तत्रैव नारदः—

जन्मतस्तु तृतीयेऽब्दे श्रेष्ठमिच्छन्ति पण्डिताः ।
पञ्चमे सप्तमे वापि जन्मतो मध्यमं भवेत् ॥
अधमं गर्भतः स्यात्तु नवमैकादशेऽपि वा ॥ इति ।

पारिजाते बृहस्पतिः—

उत्तरायणगे सूर्ये विशेषात्सौम्यगोलके ।
शुक्लपक्षे शुभं प्रोक्तं कृष्णपक्षे शुभेतरत् ॥
अशुभोऽन्त्यत्रिभागः स्यात्कृष्णपक्षे त्रिधाकृते ।

तत्रैव वासिष्ठः—

द्वित्रिपञ्चमसप्तम्यामेकादश्यां तथैव च ।

यस्मद्वये जन्मतिथिर्यदि स्यात् कुर्यात्तदा जन्मभसंयुतां च ।
असंगता तेन दिनद्वये चेत् पूज्या परा या भवतीह यत्नात् ॥ इति ।

खट्वारोहदुग्धपानकर्णवेधनिष्क्रमणजीविकापरीक्षोपवेशनवराहादिपूजान्नप्राशनाऽब्दपूर्त्तिकटिसूत्राणि मयूखादौ कौस्तुभादौ प्रयोगपारिजातादौ च विस्तृतानि बोध्यानि ।

*जातेति । तृतीयाब्दे । *उपनीत्या सहेति कालः । अथ-

दशम्यां च त्रयोदश्यां कार्यं क्षौरं विजानता ॥

नृसिंहीये—

षष्ठ्यष्टमी चतुर्थी च नवमी च चतुर्दशी ।
द्वादशी दर्शपूर्णे द्वे प्रतिपचैव निन्दिताः ॥

वसिष्ठः—

रवेरङ्गारकस्यैव सूर्यपुत्रस्य चैव हि ।
निन्दिता दिवसाः क्षौरे शेषाः कार्यकराः स्मृताः ॥

ज्योतिर्निबन्धे बृहस्पतिः—

*पापग्रहाणां *वारादौ विप्राणां शुभदं रवौ ।
क्षत्रियाणां क्षमासूनौ विट्शूद्राणां शनौ शुभम् ॥
हस्ताश्विविष्णुपौष्णाश्च श्रविष्ठादित्यपुष्यभम् ।
सौम्यचित्रे नवक्षौरे उत्तमा नव तारकाः ॥
त्रीण्युत्तराणि वायव्यं रोहिणी वारुणं तथा ।
क्षौरे षण्मध्यमाः प्रोक्ताः शेषा द्वादश गर्हिताः ॥
निधने जन्मनक्षत्रे वैनाशे चन्द्रमेऽष्टमे ।

माद्वितीयतृतीयपञ्चमसप्तमाः कुलधर्ममनुसृत्य कालाः, ते च जन्मतो मुख्याः, गर्भतो गौणाः । उदगयनमावश्यकं, शुक्लपक्षश्च मुख्यः, कृष्णपक्षोऽन्त्यतृतीयभागं विना गौणः, 'उदगयने आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः' इत्याश्वलायनसूत्रात् । गुरुशुक्रयोर्बाल्यवार्धक्यास्तमयाः मलमासश्च वर्ज्याः ।

चण्डेश्वरः—

मार्गे मासि तथा ज्येष्ठे क्षौरं परिणयं व्रतम् ।
ज्येष्ठपुत्रदुहित्रोश्च यत्नेन परिवर्जयेत् ॥

वृत्तशते—

न जन्मधिष्ण्ये न च जन्ममासे न जन्मकालीनदिने विदध्यात् ।
ज्येष्ठे न मासि प्रथमस्य सूनोस्तथा सुतायाः अपि मङ्गलानि ॥

जन्मदिने विशेषः ।*पापग्रहाणामिति निर्धारणे षष्ठी । *वा-

विपत्करे वधे क्षौरं प्रत्यरे च विवर्जयेत् ॥

अथ लग्नशुद्धिरन्ये च योगा ज्योतिर्विद्भ्यो ज्ञे-
यः । *अन्ये च विशेषाः श्मश्रुकर्मनिर्णये वक्ष्यन्ते ।

एतच्च शिशोर्मातरि गर्भिण्यां न कार्यम् । तदाह
ज्योतिर्निबन्धे मदनरत्ने च वृद्धगार्ग्यः—

पुत्रचूडाकृतौ *माता यदि सा गर्भिणी भवेत् ।
शस्त्रेण मृत्युमाप्नोति तस्मात्क्षौरं विवर्जयेत् ॥

तस्यापवादमाह तत्रैव नारदः—

सूनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् ।
पञ्चाब्दात्प्रागथोर्ध्वं तु गर्भिण्यामपि कारयेत् ॥
यदि गर्भविपत्तिः स्याच्छिशोर्वा मरणं यदि ।
*सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यते ॥

बृहस्पतिः—

गर्भिण्यां मातरि शिशोः क्षौरकर्म न कारयेत् ।
व्रताभिषेकेष्वेवं स्यात्कालो वेदव्रतेष्वपि ॥

*अभिषेकः समावर्तनम् । 'गर्भिण्यामपि पञ्चममास-
मन्तं न दोषः' इत्युक्तं मुहूर्तदीपिकायां गर्गेण—

पञ्चममासादूर्ध्वं मातुर्गर्भस्य जायते मृत्युः । इति ।

दिः सूर्यः । रात्र्यादिनिषेधानामग्रे विस्तरं सूचयति—*अन्ये
ति ।

*मातेति जनयिष्यर्थकम् । तेन सपत्नमातुर्गर्भेऽपि न
षः । तदुक्तं भट्टोजिना—

भिन्नभार्यासुतस्येह न दोषश्चौलकर्मणि । इति ।

*सहोपनीत्येति । यत्तु—

सूनोर्मातरि गर्भिण्यां मौञ्जीचूडे न कारयेत् । इति,

तत् प्रत्येकं निषेधकं, न तु सहितस्येति । *अभिषेकः

मदनरत्ने बृहस्पतिः-

पुत्रचूडाकृतौ माता गर्भिणी यदि वा भवेत् ।
विपद्यते गुरुस्तत्र दम्पती शिशुरब्दतः ॥
गर्भे मातुः कुमारस्य न कुर्याच्चौलकर्म तु ।
पञ्चमासादधः कुर्यादत ऊर्ध्वं न कारयेत् ॥

गर्गः--

ज्वरस्योत्पादनं यस्य लग्नं तस्य न कारयेत् ।
दोषनिर्गमनात्पश्चात्स्वस्थो धर्मं समाचरेत् ॥

लग्नमिति मङ्गलोपलक्षणम् । ज्योतिर्गर्गः--

विवाहोत्सवयज्ञेषु माता यदि रजस्वला ।
तदा स मृत्युमाप्नोति पञ्चमं दिवसं विना ॥

वसिष्ठः--

यस्य माङ्गलिकं कार्यं तस्य माता रजस्वला ।

अर्धं तदेव । तत्रैव बृहस्पतिः--

प्राप्तमभ्युदयश्राद्धं पुत्रसंस्कारकर्माणि ।
पत्नी रजस्वला चेत्स्याच्च कुर्यात्तत्पिता तदा ॥

पितेति कर्तृमात्रोपलक्षणम् । *संकटे तु *वाक्यसारे उक्तम्--

अलाभे सुमुहूर्तस्य रजोदोषे ह्युपस्थिते ।
श्रियं संपूज्य *विधिवत्ततो मङ्गलमाचरेत् ॥

एतच्च मण्डनोत्तरं न कार्यम् ।

न मण्डनाच्चापि हि मुण्डनं च
गोत्रैकतायां यदि *नाब्दभेदः ।

स्नानं समावर्तनम् । *संकटे इति । मुहूर्तान्तराभावे नान्दीश्राद्धानन्तरं चौलप्रयोगसमाप्तेः पूर्वं चेत्यर्थः । *वाक्यसारे इति । चतुर्थदिनेऽपीति शेषः । *विधिवदिति विवाहे स्पष्टम् । *नाब्दभेद इति । अनेनाब्दभेदे न दोष इत्यर्थः

इति मदनरत्ने वसिष्ठोक्तेः । तत्रैव कात्यायनः-

*कुले ऋतुत्रयादर्वाङ् मण्डनाश्च तु मुण्डनम् ।
प्रवेशान्निर्गमो नेष्टो न कुर्यान्मङ्गलत्रयम् ॥

तथा वृद्धमनुः-

एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः ।
न समानक्रियां कुर्यान्मातृभेदे विधीयते ॥

आशौचे तु संग्रहे--

संकटे समनुप्राप्ते सूतके समुपागते ।
कूष्माण्डीभिर्घृतं हुत्वा गां च दद्यात्पयस्विनीम् ॥
चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् । इति ।

ज्योतिर्निबन्धे--

षष्ठेऽब्दे षोडशे वर्षे विवाहाब्दे तथैव च ।
अन्तर्वत्न्यां च जायायां नेष्यते मुण्डनं क्वचित् ॥

अन्योऽपि विशेषो विवाहप्रकरणे वक्ष्यते । दीपिकायाम्-

न चूडा जन्मभाग्नेयदारुणेषु शनौ कुजे ।
प्रतिपद्द्वयरिक्तासु विद्यारम्भस्तु पञ्चमे ॥

प्रयोगरत्ने--

*मध्ये शिरसि चूडा स्याद्वासिष्ठानां तु दक्षिणे ।
उभयोः पार्श्वयोरात्रिकश्यपानां शिखा मता ॥

माधवीयेऽप्येवम् । आपस्तम्बस्त्वाह-"तूष्णीं केशान्विनीय यथर्षि शिखा निदधाति" । यथर्षि प्रवरसंख्यया । तासां मध्यशिखावर्जमुपनयने वपनं कार्यम्, "प्रतिदिशं प्रवपति" इत्युपनयने तेनैवोक्तेः । "रिक्तो वा एषोऽनपिहितो यन्मुण्डस्तस्मै तदपिधानं यच्छिखा" इति श्रुतेः,

---

सूचितः. *कुलं त्रिपुरुषम्, 'पुरुषत्रयपर्यन्तम्' इत्यग्रे वचनात् । 'प्रेतकर्माण्यनिर्वर्त्य' इत्यपि अग्रिममिह स्मर्त्तव्यम् ।

*मध्ये इति । मध्यशिखायाश्चोपनयने वपनं न कार्यमिति

विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ।

इति निषेधाच्च । सत्रे तु वचनात्सशिखं वपनमिति सुदर्शनभाष्ये उक्तम् । यत्तु- "कुमारा विशिखा इव" इति लिङ्गं, त*च्छन्दोगपरम् । अपरार्के मदनरत्ने च लौगाक्षिः-"दक्षिणतः कमुञ्जा वसिष्ठानामुभयतोऽत्रिकश्यपानां मुण्डा भृगवः पञ्चचूडा आङ्गिरसो वाजिमेके मङ्गलार्थं शिखिनोऽन्ये यथाकुलधर्मं वा"इति । कमुञ्जा शिखा । वाजिः केशपङ्क्तिः । स्मृतिदर्पणे--

एका शिखा दक्षिणतो वसिष्ठ-
गोत्रस्य पञ्चाङ्गिरसो भृगोस्तु ।
नैका शिखा कश्यपगोत्रजानां
शिखोभयत्रापि यथाकुलं च ॥

एतच्छूद्रातिरिक्तविषयम्।"शूद्रस्यानियताः केशवेशाः" इति वसिष्ठोक्तेः । यत्तु पाद्मे--

न शिखी नोपवीती स्यान्नोच्चरेत्संस्कृतां गिरम् ।

इति शूद्रमुपक्रम्योक्तम्, तदसच्छूद्रस्येति केचित् । विकल्प इति तु युक्तम् । अत एव हारीतः--

स्त्रीशूद्रौ तु शिखां छित्वा क्रोधाद्वैराग्यतोऽपि वा ।
प्राजापत्यं प्रकुर्यातां निष्कृतिर्नान्यथा भवेत् ॥

एतत्परिग्रहपक्षे । अत्र देशभेदाद्व्यवस्थेति दिक् । ज्योतिर्निबन्धे--

नर्मदोत्तरदेशे तु सिंहस्थे देवमन्त्रिणि ।
शुभकर्म न कुर्वीत निषेधो नास्ति दक्षिणे ॥

बोध्यम् । *छन्दोगेति । यत्तु मनुः-

मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः । इति,

अत्र भोजने प्रायश्चित्तमुक्तं पराशरमाधवीये—

निवृत्ते चूडहोमे तु प्राङ् नामकरणात्तथा ।
चरेत्सान्तपनं भुक्त्वा जातकर्मणि चैव हि ॥
अतोऽन्येषु तु संस्कारेषूपवासेन शुद्ध्यति ।

एते संस्काराः स्त्रीणाममन्त्रकाः कार्याः । होमस्तु समन्त्रक इति प्रयोगपारिजाते । आश्वलायनोऽपि—

होमकृत्यं तु पुंवत्स्यात्स्त्रीणां चूडाकृतावपि । इति ।

मनुरपि—

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः । इति ।

होमोऽप्यमन्त्रक इत्येके । 'संस्काराः स्त्रीणामहोमकास्तूष्णीं स्युः' इति स्मृत्यर्थसारे । होमो नेति वृत्तिकृत् ।

कात्यायनः—

सशिखं वपनं कार्यमास्नानाद्ब्रह्मचारिणा ।

इति [च] सर्वमुण्डत्वं, तत्सामगानामेव ।

एते लूनशिखास्तस्य दर्शनैरविरोद्गतैः ।
कुशाः काशा विराजन्ते वटवः सामगा इव ॥

इति विष्णुपुराणादित्यर्थः ।

कौथुमिः—

शिखिवच्छिखया भाव्यं ब्रह्मावर्तं निबद्धया ।
प्रदक्षिणं द्विरावृत्य पाशान्तः सम्प्रवेशनात् ॥
प्रथमं द्विगुणं कृत्वा ब्रह्मावर्तमितीरितम् ।
गायत्रीजपनं कार्यं शिखाया विनिबन्धने ॥ इति ।

'मण्डलोर्ध्वशिखिनः' इति पाठः । जातकर्मादीनां लोपे प्रायश्चित्तमारभ्याधानमाचौलादित्युपनयने वक्ष्यति । *आवृत् अनुष्ठानपद्धतिः ।

अथ विद्यारम्भः । मदनरत्ने नृसिंहः--

*अक्षरस्वीकृतिं कुर्यात्प्राप्ते पञ्चमहायने ।
उत्तरायणगे सूर्ये कुम्भमासं विवर्जयेत् ॥

दीपिकायाम्--

वर्षे पर्जन्यके काले षष्ठीं रिक्तां शनिं कुजम् ।
अनध्यायान्विना नत्वा देवं ग्रन्थकृतं गुरुम् ॥

श्रीधरः--

हस्तादित्यसमीरमित्रपुरजित्पौष्णाश्विचित्राच्युते-
ष्वारार्क्यर्क्षदिनोदयादिरहिते राशौ स्थिरे चोभये ।
पक्षे पूर्णनिशाकरे प्रतिपदं रिक्तां विहायाष्टमीं
षष्ठीमष्टमशुद्धभाजि भवने प्रोक्ताक्षरस्वीकृतिः ॥

विष्णुधर्मोत्तरे--

पूजयित्वा हरिं लक्ष्मीं तथा देवीं सरस्वतीम् ।
(१)स्ववेदं सूत्रकारांश्च स्वां विद्यां च विशेषतः ॥
एतेषामेव देवानां नाम्ना तु जुहुयाद् घृतम् ।
दक्षिणाभिर्द्विजेन्द्राणां कर्त्तव्यं चात्र पूजनम् ॥ इति ।

अथ धनुर्विद्या । दीपिकायाम्--

अदितिगुरुयमार्कस्वातिचित्राग्निपित्र्य-
ध्रुवहरिवसुमूलेष्विन्दुभागान्त्यभेषु ।
शनिशशिबुधवारे विष्णुबोधे विपौषे
सुसमयतिथियोगे चापविद्याप्रदानम् ॥

---

*अक्षरेति । विद्यारम्भश्च गुरुं पूजयित्वा कार्यः,
प्राङ्मुखो गुरुरासीत वारुण्यभिमुखः शिशुः ।
अध्यापयीत प्रथमं ज्ञातिभिश्च सुपूजितः ॥
इति वचनात् ।

---

(१) 'स्वविद्यां सूत्रकारान्' ख०

अथानुपनीतस्य विशेषः । गौतमः—

*"प्रागुपनयनात्कामचारवादभक्षाः"इति। भक्षणं लशुनादेरपि इति हरदत्तः । अपरार्के वृद्धशातातपः—

शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम् ।
रजस्वलादिसंस्पर्शे स्नानमेव कुमारके ॥
प्राक् चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः ।
कुमारकस्तु विज्ञेयो यावन्मौञ्जीनिबन्धनम् ॥

आपस्तम्बोऽपि-"अन्नप्राशनात्प्रयतो भवत्यासंवत्सरादित्येके" इति । गौतमोऽपि—"न तदुपस्पर्शनादाशौचम्" । तस्यानुपनीतस्य चाण्डालादिस्पृष्टस्यापि स्पर्शान्न स्नानम् । इदं च षष्ठवर्षात्प्राक् , ऊर्ध्वं तु स्नानं भवत्येव ।

बालस्य पञ्चमाद्वर्षाद्रक्षार्थं शौचमाचरेत् ।

गणेशं च सलक्ष्मीकं हरिं देवीं सरस्वतीम् ।
स्वविद्यासूत्रकारांश्च स्वविद्यांश्च प्रपूजयेत् ॥

धात्रीपूजनमपि केचिदिच्छन्ति । स्वविद्यांस्तु शक्तितो वस्त्रालङ्कारबहुदक्षिणाभिरिति । नृसिंहः—

ततः प्रभृत्यनध्यायान् वर्जनीयान्विवर्जयेत् ।
अष्टमीद्वितयं चैव पक्षान्ते च दिनत्रयम् ॥ इति ।

*प्रागुपनयनादिति । एतेन वृन्दावने श्रीहरेर्विहारेऽनुमतिर्लभ्यते । न हीशत्वात्तदनुमतिर्युक्ता, 'वर्त्त एव च कर्मणि' इति विरोधात् । एतेन—

कृच्छ्रत्रयं चोपनेता त्रीन्कृच्छ्रांश्च वटुश्चरेत् ।

इति प्रायश्चित्तं कामचारादिनिमित्तमिति न भ्रमः कार्यः, तस्य प्रागुपनयनादनुज्ञातत्वात् । किन्तु उपनेतृत्वाधिकारार्थम् । इदं च महापापातिरिक्तविषयम् ,

स्यात्कामचारभक्षोक्तिर्महतः पातकादृते ।

इति स्मृतेः। कामचारादिकेऽप्येवम्।

*ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च।
चरेदुगुरुः सुहृच्चैव प्रायश्चित्तं विशुद्धये॥
अतो बालतरस्यास्य नापराधो न पातकम्।

इति स्मृतेरिति हरदत्तः। स्मृत्यर्थसारेऽप्येवम्।

अथोपनयनम्। आश्वलायनः—

*गर्भाष्टमेऽष्टमे वाब्दे पञ्चमे सप्तमेऽपि वा।
द्विजत्वं प्राप्नुयाद्विप्रो वर्षे त्वेकादशे नृपः॥

इति पारिजाते स्मृत्यन्तरात्। महापापन्तु पञ्चवर्षात्प्रागपि वर्ज्यम्,

अनुपेतस्तु यो विप्रो मद्यं मोहात्पिबेद्यदि।
तस्य कृच्छ्रत्रयं कार्यं पित्रा भ्रात्राऽपि चान्यतः॥

इति माधवीये जातूकर्ण्योक्तेः। गौतमः-'यथोपपादितमूत्रपुरीषो भवति न तस्याचमनकल्पो विद्यते' इति। यथोपपादितेत्युक्त्या

दिवासन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः।

इत्यादिनियमाभावः, कल्पेत्युक्त्या च 'द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्' इत्यादेर्निषेधश्च लभ्यते। एवं मातापित्रौर्ध्वदैहिकाधिकारो वक्ष्यते। *एवमिति। लशुनादिभक्षणमपि षष्ठवर्षात्प्रागेवेत्यर्थः। उत्तरं तु तत्र बालस्य प्रायश्चित्तं कार्यं, तच्च पित्रादिभिरेवेत्याह—*ऊनेति। एवं महापापेऽपि पित्रादिभिरेव प्रायश्चित्तं कार्यम्, एतद्वचनात्। पञ्चवर्षात्प्राक् महापापे तु कैमुतिकन्यायेनैव प्रायश्चित्तेऽपि पित्रादेरधिकारः। आचार्यस्य त्वयं विशेषः। विष्णुः—

सहस्रं द्वादशाख्यं च सावित्रीं प्रजपेद्बुधः।
स्वाधिकारार्थमेवास्याः प्रदानार्थं हि तत्स्मृतम्॥ इति।

*गर्भाष्टमे इति। याज्ञवल्क्यः—

गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्।

मनुः—

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे ॥

विष्णुः—

षष्ठे तु धनकामस्य विद्याकामस्य सप्तमे ।
अष्टमे सर्वकामस्य नवमे कान्तिमिच्छतः ॥

आपस्तम्बः—"गर्भाष्टमेषु ब्राह्मणमुपनयीत" *बहुवचनं गर्भषष्ठगर्भसप्तमयोः प्राप्त्यर्थमिति सुदर्शनभाष्ये । केचित्तु विप्रस्य षष्ठं न मन्यन्ते । आपस्तम्बः—"अथ काम्यानि, सप्तमे ब्रह्मवर्चसकाममष्टमे आयुष्कामं नवमे तेजस्कामं दशमेऽन्नाद्यकाममेकादशे इन्द्रियकामं द्वादशे पशुकाममुपनयेत्" । गौणकालमाह मनुः—

*आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्त्तते ।
आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥

राज्ञामेकादशे सैके विशामेके यथाकुलम् ॥

अत्र विज्ञानेश्वरः—'अष्टमे जन्मतोऽष्टमे, एकादशे गर्भपदस्याब्दपदस्य चानुवृत्त्या गर्भादेकादशेऽब्दे जन्मतो वा एकादशेऽब्दे, सैके एकादशे द्वादशे इति यावत् , तथा च गर्भाद् द्वादशेऽब्दे जन्मतो वा द्वादशेऽब्दे क्रमेण ब्राह्मणक्षत्रियवैश्यानामुपनयनं कार्यमित्यर्थः ।

गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ।

इति स्मृत्यन्तरात् । पञ्चमाब्दाद्युपनयनानि तु काम्यानि । तत्र गर्भपञ्चमादीन्यपि केचिन्मन्यन्ते, तदनुसारेणाह—*बहुवचनमिति । *आषोडशादिति मर्यादायामाङ् ,

सावित्री पतिता यस्य दशवर्षाणि पञ्च च ।
सशिखं वपनं कृत्वा व्रतं कुर्यात् समाहितः ॥

ज्योतिर्निबन्धे—

अग्रजा बाहुजा वैश्याः स्वावधेरूर्ध्वमब्दतः ।
अकृतोपनयाः सर्वे *वृषला एव ते स्मृताः ॥

इति प्रोक्तप्रायश्चित्तानुरोधात् । एवं चाऽऽद्वाविंशादाचतुर्विंशतेरिति मर्यादायामेवाङ्, समभिव्याहारात् । एवं च

आ षोडशाच्च द्वाविंशाच्चतुर्विंशाच्च वत्सरात् ।
ब्रह्मक्षत्रविशां काल औपनायनिकः परः ॥

इति याज्ञवल्क्यवाक्येऽपि मर्यादार्थकस्याङो द्वाविंशाच्चतुर्विंशादित्यत्र सम्बन्धः । यत्तु—

औपनायनिकः कालः परः षोडशवार्षिकः ।
द्वाविंशतिः परोऽन्यस्य चतुर्विंशतिमः परः ॥

इति व्यासवाक्यं तद्भर्भाधानाभिप्रायेणेति न विरोधः । यथा

अष्टादशदिनादर्वागशुचित्वं न विद्यते ।
चतुर्दशदिनादर्वागशुचित्वं न विद्यते ॥

इत्यत्र प्रथमं रजोदर्शनदिनात्प्रभृति, द्वितीयं तु स्नानादिनादिति । *वृषलां एवेति । न चेत्प्रायश्चित्तमनुतिष्ठन्तीति शेषः । विप्रक्षत्रियविशां क्रमात् पञ्चदशैकविंशतित्रयोविंशतिवर्षसमाप्त्युत्तरमेव पातित्यम् ,

अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः ।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥

इति याज्ञवल्क्यवचनात् । पातित्ये तु असमर्थस्य मनुः—

येषां द्विजानां सावित्री नानूच्येत यथाविधि ।
तांश्चारयित्वा त्रीन्कृच्छ्रान् यथाविध्युपनाययेत् ॥

शक्तस्य सामग्रीवैकल्येन पञ्चदशवर्षातिक्रमे तु यमः—

सावित्री पतिता यस्य दश वर्षाणि पञ्च च ।
सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः ॥

गर्गः—

विप्रं वसन्ते क्षितिपं निदाघे
वैश्यं घनान्ते व्रतिनं विदध्यात् ।
माघादिशुक्रान्तिकपञ्चमासाः
साधारणा वा सकलद्विजानाम् ॥

हेमाद्रौ ज्योतिषे—

माघादिषु च मासेषु मौञ्जी पञ्चसु शस्यते ।

कालादर्शे वृद्धगार्ग्यः—

माघादिमासषट्के तु मेखलाबन्धनं मतम् ।
चूडाकरणमन्नं च श्रावणादौ विवर्जयेत् ॥

मैत्रेयसूत्रेऽपि—"वसन्तो ग्रीष्मः शरदित्यृतवो वर्णानुपूर्व्येण माघादिषण्मासा वा सर्ववर्णानामेतदुदगयनमनयोर्विकल्पः" इति । अत्रेदं तत्त्वम्—नात्र वसन्तेनोत्तरायणस्य संकोचः श्राद्धे दर्शस्यापराह्णविधिनेवाधाने वसन्तादेः कृत्तिकादिनेव सायंप्रातर्विधिना यावज्जीवविधेरिव युक्तः । आद्ययोः परस्परव्यभिचारान्नियमः, अन्त्ये निमित्ते साङ्गकर्मोक्तेः कालापेक्षा; इह तूत्तरायणं विना

एकविंशतिरात्रं तु पिबेत्पञ्चतियावकम् ।
हविषा भोजयेच्चैव ब्राह्मणान् सप्त पञ्च च ॥
(द्वादशेत्यर्थः)
ततो यावकशुद्धस्य तस्योपनयनं स्मृतम् ॥ इति ।

उपनेत्रादिसकलसामग्रीसत्त्वेऽपि कामतो गौणकालातिक्रमे तु उद्दालकव्रतं चरेत् "पतितसावित्री उद्दालकव्रतं चरेत्, द्वौ मासौ यावकेन वर्तयेत्, मासं पयसा, अर्द्धमासमामिक्षया, अष्टरात्रं घृतेन, षड्रात्रमयाचितं हविष्यं भुञ्जीत,

वसन्तस्याभावान्न नियमः, न वा निमित्तत्वम्। न च 'एकं वृणीते' इतिवद(१)वयुत्यानुवादः तद्वाक्यभेदापरिहारात्। उत्तरायणविधिवैयर्थ्यात्त्वनुकल्पोऽयमिति। माघ आदिर्येषांपञ्चानाम्, एवं षट्। पारिजाते बृहस्पतिः-

ऋषचापकुलीरस्थो जीवोऽप्यशुभगोचरः।
अतिशोभनतां दद्याद्विवाहोपनयादिषु॥

त्रिरात्रमब्भक्षोऽहोरात्रमुपवसेत् व्रात्यस्तोमेन वा यजेत"इति वसिष्ठोक्तेः। तथाच याज्ञवल्क्योक्तो व्रात्यस्तोमः सकलसामग्रीसत्त्वेऽपि अकृतोपनयने बोध्यः। उदालकव्रताशक्तस्य तु आपस्तम्बः-'अतिक्रान्ते सावित्र्याः काले ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेदथोपनयनं ततः संवत्सरमुदकोपस्पर्शनमथाध्ययनम्' इति। ऋतुं मासद्वयं, त्रैविद्यकं ब्रह्मचर्यं वेदत्रयार्थं भैक्षाशनगुरुशुश्रूषादिकमिति। वस्तुतस्तु व्रात्यस्तोमं विनोपनयने नाधिकारः—

सावित्री पतिता व्रात्या व्रात्यस्तोमादृते क्रतोः।

इति वचनात्। स चानुपनीतेनानाहिताग्निनाऽविदुषाऽपि अवकीर्णिपशुवत् कार्यः। यागोपयुक्ताध्ययनमगत्या कार्यम्। ततः स्मृत्युक्तं प्रायश्चित्तं कृत्वोपनयनं कार्यमिति। केचित्तु गौणकालानन्तरे संवत्सरे यमोक्तं यावकव्रतं, तदुत्तरोत्तरं संवत्सरेषु क्रमेण मनूक्तं कृच्छ्रत्रयं, आपस्तम्बोक्तमृतुत्रैविद्यकं ब्रह्मचर्यम्, उदालकव्रतं व्रात्यस्तोमो वेत्याहुः। गुरुशुक्रादिग्रहबलासत्त्वे मासिकादेरपकर्षाभावादावुपनेत्रभावादौ वा गौणकाले उपनयनं कार्यम। बुद्ध्या मुख्यकालत्यागे तु "त्रीन् कृच्छ्रान वटुश्चरेत्" इति वटुप्रायश्चित्तं द्विगुणमिति विशेषः।

---

(१) अवयुत्य पृथक्कृत्य

वृत्तशते—

न जन्मधिष्ण्ये न च *जन्ममासे
न जन्मकालोनदिने विदध्यात्।
ज्येष्ठे न मासि प्रथमस्य सूनोः
तथा सुताया अपि मङ्गलानि॥

राजमार्तण्डः—

*जातं दिनं दूषयते वसिष्ठो
ह्यष्टौ च गर्गो नियतं दशात्रिः।
जातस्य पक्षं किल भार्गवश्च
शेषाः प्रशस्ताः खलु जन्ममासि॥

जन्ममासे *तिथौ मे च *विपरीतदले सति।
कार्यं मङ्गलमित्याहुर्गर्गभार्गवशौनकाः॥
जन्ममासनिषेधेऽपि दिनानि दश वर्जयेत्।
आरभ्य जन्मदिवसाच्छुभाः स्युस्तिथयोऽपरे॥

ग्रन्थान्तरे—

व्रते जन्मत्रिखारिस्थो जीवोऽपीष्टोऽर्चनात्सकृत्।
शुभातिकाले तुर्याष्टव्ययस्थो द्विगुणार्चनात्॥
*शुद्धिर्नैव गुरोर्यस्य वर्षे प्राप्तेऽष्टमे यदि।

*जन्ममासे इति। जन्ममासश्च—

आरभ्य जन्मदिवसं यावत्त्रिंशदिनं भवेत्।
जन्ममासः स विज्ञेयो गर्हितः सर्वकर्मसु॥

इति द्रष्टव्यः। यदि जन्ममासस्त्यक्तुं न शक्यते तदाऽऽह—*जातमिति। *तिथौ जन्मतिथौ, मे जन्मनक्षत्रे। *विपरीतदले उत्तरभागे। *शुद्धिरिति। शुद्धिर्गोचराष्टकवर्गाभ्याम्। वसन्तः प्रशस्तः,

मृगकुम्भगते भानौ मध्यमं, मीनमेषयोः।
उत्तमं, गोयुगस्थेऽर्के ह्यधमं चोपनायनम्॥

चैत्रे मीनगते भानौ तस्योपनयनं शुभम् ॥
जन्मभादष्टमे सिंहे नीचे वा शत्रुभे गुरौ ।
मौञ्जीबन्धः शुभः प्रोक्तश्चैत्रे मीनगते रवौ ॥

नारदः-

बालस्य बलहीनोपि शान्त्या जीवो बलप्रदः ।
यथोक्तवत्सरे कार्यमनुक्ते चोपनायनम् ॥

शान्तिश्चाग्रे वक्ष्यते । ज्योतिर्निबन्धे नृसिंहः-

तृतीया पञ्चमी षष्ठी द्वितीया चापि सप्तमी ।
पक्षयोरुभयोश्चैव विशेषेण सुपूजिताः ॥
*धर्मकामौ सिते पक्षे कृष्णे च प्रथमा तथा ।
शुक्लत्रयोदशीं केचिदिच्छन्ति मुनयस्तथा ॥

टोडरानन्दे वसिष्ठः-

नैमित्तिकमनध्यायं कृष्णे च प्रतिपद्दिनम् ।
मेखलाबन्धने शस्तं चौले वेदव्रतेष्वपि ॥
प्रशस्ता प्रतिपत्कृष्णे न पूर्वा परसंयुता ॥
*एतदतीतकालस्यार्तस्य बटोरुपनयनविषयम् ।

इति बृहस्पत्युक्तेः । तत्रापि मीनार्कयुक्तश्चैत्रः प्रशस्ततमः, अनेकनिषेधापवादकत्वात् । अत्र—

शुक्रे नष्टे तथा जीवे दुर्बले चन्द्रभास्करे ।
तदोपनयनं कार्यं चैत्रे मीनगते रवौ ॥
जीवभार्गवयोरस्ते सिंहस्थे देवतागुरौ ।
मेखलाबन्धनं शस्तं चैत्रे मीनगते रवौ ॥

इत्यादयोऽपि द्रष्टव्याः । *धर्मकामौ दशमीत्रयोदश्यौ,
कृष्णे पञ्च प्रशंसन्ति तिथयश्चोपनायने ।

इति वचनात् पञ्चमीपर्यन्ताः प्रशस्ताः, षष्ठ्यादयोऽप्रशस्ता इत्यर्थः।

*एतदिति । इदमुपलक्षणम् , प्रायश्चित्तार्थोपनयनविषयताया

प्रशस्ता प्रतिपत्कृष्णे कदाचिच्छुभगे विधौ ।
चन्द्रे बलयुते लग्ने वर्षाणामपि लङ्घने ॥

इति व्यासोक्तेरित्याहुः । *एवं सप्तम्यपि, तस्य गलग्रहत्वोक्तेः । बृहस्पतिः—

शुक्लपक्षः शुभः प्रोक्तः कृष्णश्चान्त्यत्रिकं विना ।

तथा—

मिथुने संस्थिते भानौ ज्येष्ठमासो न दोषकृत् ।

अपि "स्वाध्यायवियुजो घस्राः" इत्यत्र वक्तव्यत्वात् । प्रतिपत्पदं सप्तम्यादेरुपलक्षणमित्याह—*एवमिति ।*सप्तम्यपीति । अपिना त्रयोदशीसमुच्चयः, तस्यापि गलग्रहत्वात् । अतीतकालस्येत्यादि वर्त्तते । एवं "माघादिमासषट्केषु" इति "षष्ठ आषाढो माघादिशुक्लान्तकपञ्चमासाः" इत्यनेन विरोधात्, पञ्चम्यन्तकृष्णपक्षश्च "आपूर्यमाणपक्षे" इत्यनेन विरोधादधार्यविषयकः । एवं 'सार्वकालमेके विवाहम्' इति चाधार्यकन्याविषयकमिति बोध्यम् । यत्तु—

चैत्रे कृष्णद्वितीयायां तिसृष्वेवाष्टकासु च ।
मार्गे च फाल्गुने चैव आषाढे कार्तिके तथा ॥

इति अनध्यायवचनं, तत्र कृष्णद्वितीयायामित्यनुषङ्गाच्चैत्रादिपञ्चकृष्णद्वितीयालाभात्तदन्यकार्तिकमार्गशीर्षयोरुपनयनाभ्यनुज्ञा वैश्यपरा,

विप्रस्य क्षत्रियस्यापि मौञ्जी स्यादुत्तरायणे ।
दक्षिणे च विशां कार्या नानध्यायेऽपि संक्रमे ॥

इति वचनात् । विप्रक्षत्रिययोः प्रायश्चित्तार्थोपनयनपरा च,

अनध्यायेऽपि कुर्वीत यस्य नैमित्तिकं भवेत् ।

इति वचनात् । अनध्यायेऽपीत्यपिना वैश्योपनयनसंग्रहात् । एवंच

रात्रिभागः समाख्यातः खरांशोर्दक्षिणायने ।
व्रतबन्धादिकं तस्मिंश्चूडाकर्म च वर्जयेत् ॥

मदनरत्ने नारदः—

*विनर्तुना *वसन्तेन कृष्णपक्षे गलग्रहे ।
अपराह्णे चोपनीतः पुनःसंस्कारमर्हति ॥

अपराह्णस्त्रेधाविभक्तदिनतृतीयांश इत्युक्तं तत्रैव ।

*वसन्ते गलग्रहो न दोषायेत्यर्थः । नारदः-

कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयम् ।
त्रयोदशीचतुष्कं च अष्टावेते गलग्रहाः ॥

इति दक्षिणायननिषेधो न तत्र प्रवर्त्तते । एवं—

चन्द्रे बलयुते लग्नाच्छुभभावे शुभे स्थिते ।
चतुर्दशीं प्रशंसन्ति कुमारे वयसाऽधिके ॥

इति च अधार्यविषयं प्रायश्चित्तोपनयनविषयं चेति रामचन्द्रः ।

*विनर्त्तुनेति । वसन्तेन वर्णभेदेन विहितेन तत्तद्ऋतुना विना कृष्णपक्षे गलग्रहे उपनीत इति अन्वयफलमाह—*वसन्ते इति । वसन्ते गलग्रहो न दोषायेत्येकोऽन्वयः । वसन्तपदं च तत्तद्वर्णविहिततत्तद्ऋतुपरम् । ऋत्वन्तरीयशुक्लपक्षे च गलग्रहो न दोषायेत्यपरः । अपराह्ण इति ।

ऊर्ध्वं सूर्योदयात्पूर्वं मुहूर्तानां तु पञ्चकम् ।
पूर्वाह्णः प्रथमः प्रोक्तो मध्यान्हस्तु ततः परम् ॥
अपराह्णस्ततः प्रोक्तो मुहूर्तानां तु पञ्चकम् ॥

इति स्कान्दात् । तत्र पूर्वाह्णो मुख्यः, मध्याह्नोऽनुकल्पः ।

सर्वदेशेषु पूर्वाह्णे मुख्यं स्यादुपनायनम् ।
मध्याह्ने मध्यमं प्रोक्तमपराह्णे तु गर्हितम् ॥

इति ज्योतिर्भानवात् । एवं च मध्याह्नोऽनुकल्पतयाऽधार्योपनये नवाब्दाद्युपनये वोपादेयः । गौणाब्दमपेक्ष्य मुख्याब्दस्य न्याय्यतया व्रात्यस्तोमादिगुरुप्रायश्चित्तभयेन च तत्र गौणदिनभागस्योपादानात् । केचित्तु अष्टमाब्दादावपि गौणतया मध्याह्न-

वसिष्ठः—

पापांशकगते चन्द्रे अरिनीचस्थितेऽपि च।
*अनध्याये चोपनीतः पुनःसंस्कारमर्हति॥
*अनध्यायस्य पूर्वेद्युस्तस्य चैवापरेऽहनि।
व्रतबन्धं विसर्गं च विद्यारम्भं न कारयेत्॥

मङ्गीकुर्वन्ति। यत्र पूर्वाह्णादौ गुरुशिष्यविरोधनिवारकं निरीक्षणं जातम्, उपनयनं तु तदुत्तरमुहूर्तादिव्यवधानेन मध्याह्ने, तत्र पूर्वाह्णोपनयनभ्रमो न कार्यः। एवं क्रमेण यद्यपराह्णं जातं तदा पुनःसंस्कारः कार्य इति। *अनध्याये चेति। इदमनध्यायपदं नित्यनैमित्तिकानध्यायपरम्। अनध्यायपदस्य नित्यानध्यायपरत्वे नैमित्तिकानध्याये, नैमित्तिकानध्यायपरत्वे च नित्यानध्यायेऽपूर्वोपनयापत्तेः।

नैमित्तिकमनध्यायं कृष्णे च प्रतिपदिनम्।

इति नैमित्तिकानध्यायानां कृष्णप्रतिपदादिनित्यानध्यायानां चाधार्योपनयनपरतैव 'स्वाध्यायविप्लुजो घस्राः' इति वाक्यात् प्रायश्चित्तोपनयनपरताऽपि, न त्वपूर्वोपनयनपरता। अन्यथा नैमित्तिकानध्याये प्रतिपदि चापूर्वोपनयनापत्तेः। एतेन पुनःसंस्कारविधिगतानध्यायपदं नित्यानध्यायमात्रपरं, न त्वनित्यानध्यायपरमपीत्यपास्तम्। पुनःसंस्कारः पुनरुपनयनमेव न जातकर्मादि उपेतपूर्वस्य विशेषेणोपनयनस्यैवाचार्येण विधानात्। *अनध्यायस्येति। इदमनध्यायपदं नित्यानध्यायपरं न त्वनित्यानध्यायपरम्, तेषामनित्यत्वेन नित्यानित्यसंयोगविरोधात्। अत्रानध्यायात्परं दिनं द्वितीयाभिन्नं ग्राह्यम्, द्वितीयाया विहितत्वात्। ननु गलग्रहेषु नवमीगणनाद् अनध्यायोत्तरदिननिषेधो व्यर्थः। मैवं, निषेधद्वयेन दोषाधिक्यकल्पनात्। यद्वा नवमी यत्र पञ्चमुहूर्त्तं ततो न्यूना वा, तत्र गलग्रहनिषेधो नवम्यनन्तरं न प्रवर्त्तते, "निषेधः कालमात्रके"

राजमार्तण्डः—

*आरम्भानन्तरं यत्र प्रत्यारम्भो न सिध्यति ।
गर्गादिमुनयः सर्वे तमेवाहुर्गलग्रहम् ॥

ज्योतिर्निबन्धे-

अष्टकासु च सर्वासु *युगमन्वन्तरादिषु ।
अनध्यायं प्रकुर्वीत तथा सोपपदास्त्रपि ॥

सोपपदास्तु स्मृत्यर्थसारे--

सिता ज्येष्ठे द्वितीया च आश्विने दशमी सिता ।
चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः ॥

एवं प्रदोषदिनं वर्ज्यम् । प्रदोषस्वरूपमाह गोभिलः-

*षष्ठी च द्वादशी चैव अर्धरात्रोननाडिका ।
प्रदोषमिह कुर्वीत तृतीया तूनयामिका ॥

इत्युक्तेः । तत्रायं निषेधः सार्थकः । *आरम्भेति । बह्वृचभिन्नानामुपनयनादिने वेदारम्भः । तदनन्तरदिनेऽनध्यायवशात्प्रत्यारम्भो न जायते इत्यर्थः । अनेन छलेन सप्तमीत्रयोदश्यावुक्तौ । *युगेति ।

"वैशाखमासस्य तु या तृतीया नवम्यसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पञ्चदशी च माघे ॥
एता युगाद्याः कथिताः पुराणे" ॥ इति ।

"आश्वयुक्शुक्लनवमी द्वादशी कार्तिके तथा ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्याप्यमावास्या पौषस्यैकादशी तथा ।
आषाढस्यापि दशमी तथा माघस्य सप्तमी ।
श्रावणे चाष्टमी कृष्णा तथाऽऽषाढे च पूर्णिमा ।
कार्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी तथा ॥
मन्वन्तरादयश्चैताः ॥" इति ।

*षष्ठी चेति ।

ज्योतिर्निबन्धे व्यासः—

*या चैत्रवैशाखसिता तृतीया
माघस्य सप्तम्यथ फाल्गुनस्य ।
कृष्णे (१)द्वितीयोपनये प्रशस्ता
प्रोक्ता भरद्वाजमुनीन्द्रमुख्यैः ॥

*अत्रापि कृष्णप्रतिपद्वज्ज्ञेयम् । यत्तु बृहद्गार्ग्यः—

आदित्यास्तमयादूर्ध्वमर्द्धरात्रात्त्रयोदशी ।
सप्तमी च चतुर्थी च नवनाडीषु चेद्विशेत् ॥
तत्र किञ्चन नाध्येयं प्रदोषे पारिभाषिके ॥

इति निष्कर्षानुरोधेन षष्ठ्यादिः सायंकालान्तं ग्राह्यः । तथा च बृहन्मनुः—

चतुर्थ्यां च त्रयोदश्यां सप्तम्यामर्द्धरात्रतः ।
अर्वाक् नाध्ययनं कुर्याद्यदीच्छेत्तस्य धारणम् ॥

स्मृत्यर्थसारे—

चतुर्थ्याः पूर्वरात्रे तु नवनाडीषु दर्शने ।
नाध्येयं पूर्वरात्रे स्यात्सप्तमी च त्रयोदशी ॥
अर्द्धरात्रात्पुरा चेत्स्यान्नाध्येयं पूर्वरात्रके ॥ इति ।

वक्ष्यति चाग्रे 'रात्रौ यामत्रयादर्वाक्' इति । *येति । चैत्रशुक्लतृतीयाया रथसप्तम्याश्च मन्वादित्वेन वैशाखशुक्लतृतीयाया युगादित्वेन फाल्गुनकृष्णद्वितीयायाश्चातुर्मास्यद्वितीयात्वेन निषेधे प्राप्तेऽयं प्रतिप्रसवः । नन्वस्याऽप्रशस्ता इति च्छेदान्निषेधपरता युक्तेति चेत् ? न,

चातुर्मास्यद्वितीया या तृतीया चाक्षया तथा ।
उपनीतो यतः श्रीमान् विद्यावान् धनवान् भवेत् ॥

इति वासिष्ठात् । *अत्रापीति । वक्ष्यमाणप्रायश्चित्तार्थोपन-

(१) 'तृतीयो' इति पाठान्तरम् ।

अनध्याये प्रकुर्वीत यस्तु नैमित्तिको भवेत् ।
सप्तमी माघशुक्ले तु तृतीया चाक्षया तथा ॥
बुधत्रयेन्दुवाराश्च शस्तानि व्रतबन्धने ॥ इति,
तत् प्रायश्चित्तार्थोपनयनविषयम् ।

*स्वाध्यायवियुजो घस्राः कृष्णप्रतिपदादयः ।
प्रायश्चित्तनिमित्ते तु मेखलाबन्धने मताः ॥

इति तेनैवोक्तेरिति निर्णयामृतकालादर्शौ । यद्यपि 'अथोपेतपूर्वस्य' इत्युक्त्वा 'अनिरुक्तं परिदानं कालश्च' इत्याश्वलायनेन पुनरुपनयने कालनियम उक्तस्तथापि निमित्तान्तरमेव सः । तदानीमकरणे तु पूर्वोक्तकालो ज्ञेयः । प्रतिवेदमुपनयने कालानियम इति तु युक्तम् । गर्गः

ग्रहे रवीन्द्वोरवनिप्रकम्पे
केतूद्गमोल्कापतनादिदोषे ।
व्रते *दशाहानि वदन्ति तज्ज्ञा-
स्त्रयोदशाहानि वदन्ति केचित् ॥

संकटे तु चण्डेश्वरः—

दाहे दिशां चैव धराप्रकम्पे वज्रप्रपातेऽथ विदारणे च
केतौ तथोल्कांशुकणप्रपाते त्र्यहं न कुर्याद्धृतमङ्गलानि

तत्रैव—

वेदव्रतोपनयने स्वाध्यायाध्ययने तथा ।

यनेऽपीत्यर्थः । *स्वाध्यायवियुजो घस्राः स्वाध्यायवर्जितदिनानि । *दशाहानीति । तानि च—

चन्द्रसूर्योपरागे तु त्र्यहं प्रागशुभं भवेत् ।
सप्ताहमशुभं पश्चात्स्मृतं ग्रहणसूतकम् ॥

इति गर्गोक्तानि । स्मृत्यन्तरे—

सर्वग्रासे तु सप्ताहमर्द्धग्रासे दिनत्रयम् ।

न दोषो यजुषां सोपपदास्वध्ययनेऽपि च ॥

हेमाद्रौ ज्योतिषे—

हस्तत्रये पुष्यधनिष्ठयोश्च
पौष्णाश्विसौम्यादितिविष्णुभेषु ।
शस्ते तिथौ चन्द्रबलेन युक्ते
कार्यौ द्विजानां व्रतबन्धमोक्षौ ॥

ज्योतिर्निबन्धे नारदः—

श्रेष्ठान्यर्कत्रयान्त्येज्यचन्द्रादित्युत्तराणि च ।
विष्णुत्रयाश्विमित्राब्जयोनिभान्युपनायने ॥

बृहस्पतिः—

त्रिषूत्तरेषु रोहिण्यां हस्ते मैत्रे च वासवे ।
त्वाष्ट्रे सौम्यपुनर्वस्वोरुत्तमं ह्युपनायनम् ॥

ज्योतिर्निबन्धे—

*पूर्वाहस्तत्रये सार्पश्रुतिमूलेषु बह्वृचाम् ।
यजुषां पौष्णमैत्रार्कादित्यपुष्यमृदुध्रुवैः ॥
सामगानां हरीशार्कवसुपुष्योत्तराश्विभैः ।
धनिष्ठादितिमैत्रार्केष्विन्दुपौष्णेष्वथर्वणाम् ॥

त्रिद्येकाङ्गुलतो ग्रासे दिनमेकं तु वर्जयेत् ॥
पञ्च दिनानि वासिष्ठस्त्रिदिनं गर्गस्तु कौशिकस्त्वेकम् ।
च्यवनाचार्यस्य मते पञ्चमुहूर्तं दूषयति राहुः ॥ इति ।

*पूर्वाहस्तत्रये पूर्वाहस्तयोस्त्रये—

मूले हस्तत्रये सार्पे शैवे पूर्वात्रये तथा ।
ऋग्वेदाध्यायिनां कार्यं मेखलाबन्धनं बुधैः ॥

(शैवम् आर्द्रा ।)

पुष्ये पुनर्वसौ पौष्णे हस्ते मैत्रे शशाङ्कभे ।
ध्रुवेषु च प्रशस्तं स्याद् यजुषां मौञ्जिबन्धनम् ॥

राजमार्तण्डस्तु *ब्राह्मणस्य पुनर्वसुं निषेधति ।

ताराचन्द्रानुकूलेषु ग्रहाब्देषु शुभेष्वपि ।
पुनर्वसौ कृतो विप्रः पुनःसंस्कारमर्हति ॥

ज्योतिर्निबन्धे नारदः—

सर्वेषां जीवशुक्रज्ञवाराः प्रोक्ता व्रते शुभाः ।
चन्द्रार्कौ मध्यमौ ज्ञेयौ सामबाहुजयोः कुजः ॥
शाखाधिपतिवारश्च शाखाधिपबलं तथा ।
शाखाधिपतिलग्नं च दुर्लभं त्रितयं व्रते ॥

शाखाधिपाश्च रत्नसंग्रहे—

ऋगथर्वसामयजुषामधिपा गुरुसौम्यभौमसिताः ।
*जीवसितौ विप्राणां, क्षत्रस्थारोष्णगू, विशां चन्द्रः ।

पुष्यवासवहस्ताश्विशिवविष्णूत्तरात्रयम् ।
प्रशस्तं मेखलाबन्धं बटूनां सामगायिनाम् ॥
मृगनेत्राश्विनीहस्तरेवत्यदितिवासवम् ।
अथर्वशाखिनां शस्तो भगणोऽयं व्रतार्पणे ॥ इति ।

*ब्राह्मणस्येति । अत्र हेमाद्यादिधृतानां पुनर्वस्वपनयविधायकसामान्यवाक्यानां व्यवस्थावाक्यानां च द्विजपदस्वारस्येन याजुषादिपदस्वारस्येन च याजुषाथर्वणक्षत्रियवैश्यपरतैव । राजमार्त्तण्डवाक्यगतविप्रपदवशात्तु सर्वेषां ब्राह्मणानामुपनयने पुनर्वसुनिषेध इति भावः । तुना चारुचिः, सा च विप्राणामपि पुनर्वस्वपनयनाचारात्पुनर्वसुः पुनरुपनयनकाल इत्यर्थोपगमादिति । न च तादृक्षत्रियादौ मानाभावः, उपनीतानां क्षत्रियादीनामपि ब्राह्मणवत् 'स्वाध्यायोऽध्येतव्यः' इति विधिना परम्पराप्राप्तस्वस्वशाखाध्ययनविधानात् ।

*जीवेति । वर्णाधिपाः ।

इति। पारिजाते बृहस्पतिः—

बह्वृचानां गुरोर्वारे यजुर्वेदजुषां बुधे।
सामगानां धरासूनोरथर्वविदुषां रवेः॥

अत्र लग्नशुद्ध्यादि दैवज्ञेभ्यो ज्ञेयम्। विस्तरभयान्नोच्यते।

लल्लः—

व्रतेऽह्नि पूर्वसन्ध्यायां वारिदो यदि गर्जति।
तद्दिने स्यादनध्यायो व्रतं तत्र *विवर्जयेत्॥

ज्योतिर्निबन्धे—

*नान्दीश्राद्धं कृतं चेत्स्यादनध्यायस्त्वकालिकः।
तदोपनयनं कार्यं वेदारम्भं न कारयेत्॥

एतद् बह्वृचातिरिक्तानाम्, *तेषां तद्दिने वेदारम्भाभावात्। अतस्तेषामुपनयनं *न भवत्येव। ऐतरेयोपनिषदि—"मृगादिज्येष्ठान्तं वर्षर्तुः, तं विना वर्षादौ त्रिरात्रमनध्यायः" इति वेदभाष्ये उक्तम्। एतच्च प्रातःस्तनिते, सायं स्तनिते तु दिवैव चरुं श्रपयित्वा सायंसन्ध्योत्तरं

---

*विवर्जयेदिति। विशेषेण वर्जयेदित्यर्थः। पूर्वसन्ध्यागर्जने दोषोऽधिक इति भावः। *नान्दीश्राद्धमिति। बह्वृचातिरिक्तानां यजुर्वेदिनाम्। *तेषां बह्वृचानाम्। एवमग्रेऽपि। *न भवत्येवेति। लल्लेन निषेधात्। कौस्तुभे तु कार्यमित्यन्तं सावधारणं, "वेदारम्भं न कारयेत्" इति निषेधस्तु संभवत्प्राप्तिकविशेषविषय इत्युक्तं, तत्तु नूतनोपनयानुष्ठानप्रचारलाभाय एवकारपूरणं, न तु तज्जन्यबाटवसंस्कारलाभायेति वदन्ति। आश्वलायनानां तु तद्दिन उपनयनाकरणेऽपि वृद्धिश्राद्धदिनादिनषट्कमध्ये मुहूर्तान्तरसत्त्वे तेनैव, ऊर्ध्वं मुहूर्ते च वृद्धिश्राद्धान्तरेणैवोपनयनं यथाकालं कार्यमिति प्रयोगरत्ने। प्रातःस्तनिते उपनयनकरणे तु पुनरुपनयनं कार्यम्।

अनध्याये कृतो विप्रः पुनःसंस्कारमर्हति।

होमं कुर्यात् ।

न सन्ध्यागर्जिते काले न वृष्ट्युत्पातदूषिते ।
ब्रह्मौदनं पचेदग्नौ पक्वं चेन्न निवर्तते ॥
ब्रह्मौदनं पचेदग्नौ पक्वमन्नं न दुष्यति ॥
इति संग्रहोक्तेः इति प्रयोगरत्ने भट्टचरणाः ॥

अत्र शान्तिरप्युक्ता नृसिंहप्रसादे—

*ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं यदि ।
तदा विघ्नकरं ज्ञेयं बटोरध्ययनस्य तत् ॥
तस्य शान्तिप्रकारं तु वक्ष्ये शास्त्रानुसारतः ।
प्रधानं पायसं साज्यं द्रव्यं शान्तियजौ भवेत् ॥
सूक्तं बृहस्पतेर्विद्वान्पठेत्प्रज्ञाविवृद्धये ।
गायत्री चैव मन्त्रः स्यात्प्रायश्चित्तं तु सर्पिषा ॥
धेनुं सवत्सकां दद्यादाचार्याय पयस्विनीम् ।
ब्राह्मणान्भोजयेत्पश्चात्ततो ब्रह्मौदनं चरेत् ॥

उपनयने चाधिकारिणो माधवीये वृद्धमनुनोक्ताः—

इति वाक्यात् । उपनयनचरुश्रपणयोरन्तरानध्याये पुनरुपनयनम् इति प्रयोगरत्ने भट्टाः । ते त्वग्रिमां शातिं न मन्यन्ते ।

*ब्रह्मौदनेति । अथैतत्प्रयोगः—अस्योपनीतस्यामुकशर्मणो ब्रह्मौदनविधेः प्राग्गर्जितादिसूचिताध्ययनविघ्ननिरसनद्वारा श्रीपरमेश्वरप्रीत्यर्थं शान्तिं करिष्ये इति सङ्कल्प्य गणेशार्चनस्वस्तिवाचने कृत्वा आचार्यवरणादि, स्थण्डिलेऽग्निं प्रतिष्ठाप्य चक्षुषी आज्येनेत्यन्ते अत्र प्रधानं सवितारम् अष्टोत्तरशतमाज्यपायसाहुतिभिः शेषेणेत्यादिहस्तेन गायत्रीमन्त्रेण १०८ प्रधानहोमः । तत आचार्यो यस्तस्तम्भेति बृहस्पतिसूक्तं पठेत् । ततः स्विष्टकृदादिकर्मशेषं समापयेत् । ततो यजमान आचार्याय सवत्सां धेनुं दद्यात् । अष्टोत्तरशतं ब्रा-

पिता पितामहो*भ्राता *ज्ञातयो *गोत्रजा *ऽग्रजाः ।
उपायनेऽधिकारी स्यात्पूर्वाभावे परः परः ॥

प्रयोगरत्ने—

पितैवोपनयेत्पुत्रं तदभावे पितुः पिता ।
तदभावे पितुर्भ्राता तदभावे तु सोदरः ॥

पितेति विप्रपरं न क्षत्रियादेः । तेषां पुरोहित एव उपनयनस्य दृष्टार्थत्वात , तेषां चाध्यापनेऽनधिकारात् । *अत्र पितृव्यस्य ज्येष्ठभ्रात्रभावेऽधिकारः ।

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ।

ह्मणभोजनं सङ्कल्प्य ब्रह्मौदनं पचेदिति । *भ्राता पितुरेव अग्रिमवाक्यात् न तु सोदरः, तस्याग्रिमवाक्येऽन्ते निवेशात् । *ज्ञातयः असगोत्रसपिण्डाः मातामहादयः । *गोत्रजाः सगोत्रसपिण्डाः पितृव्यपुत्राद्याः। गोत्रजाऽग्रजा इति सन्धिरार्षः । *अग्रजाः बटोरधिकवयसः । एतच्च पितृव्यमारभ्य सर्वत्र विशेषणम् । पितृव्याभावे एव ज्येष्ठभ्रातुरधिकारः"तदभावे तु सोदरः"इत्युक्तेः । मतान्तरमाह—*अत्रेति । इदं हि मतं कौस्तुभकृतामपि विमतम् । याज्ञवल्क्यवचनेऽपि पितृव्यात्पूर्वत्वाप्रतीतेश्च । मयूखकृद्भिस्तु तद्वचनस्य भगिनीविवाहविषयकत्वमुक्तम् । केचित्तु अविभक्तस्य भ्राता, विभक्तस्य सोदर इत्याहुः । तन्न, "तदभावे तु सोदरः"इत्यनेन विरोधात् । तदभावेपीति पाठं कल्पयित्वा अपिशब्दात्तत्सत्त्वसमुच्चय इति तु केचित् । उक्ताऽधिकार्यभावे तु व्यासः—

वेदैकनिष्ठं धर्मज्ञं कुलीनं श्रोत्रियं शुचिम् ।
स्वशाखीयमनालस्यं विप्रं कर्तारमीप्सितम् ॥

शौनकः—

कुमारस्योपनयनं श्रुताभिजनवृत्तवान् ।
तपसा धूतनिःशेषपाप्मा कुर्याद् द्विजोत्तमः ॥ इति ।

इति याज्ञवल्क्योक्तेः । तेनेदमविभक्तपरम् , पूर्वं तु विभक्तपरम् । मातृ रजोदोषे तु प्रागुक्तम् ।

अथ षण्ढमूकादीनां विशेषः । प्रयोगपारिजाते ब्राह्मे—

ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः ।
*तस्माच्च *षण्ढबधिरकुब्जवामनपङ्गुषु ॥
जडगद्गदरोगार्तशुष्काङ्गविकलाङ्गिषु ।
मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये ॥
ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्यु*र्यथोचितम् ।
मत्तोन्मत्तौ न संस्कार्यौ इति केचित्प्रचक्षते ॥
कर्मस्वनधिकाराच्च पातित्यं नास्ति चैतयोः ।
तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा ॥
संस्कारमन्त्रहोमादीन्करोत्याचार्य एव तु ।
उपनेयांश्च विधिवदाचार्यस्य समीपतः ॥
आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वा जपेत् ।
कन्यास्वीकरणादन्यत्सर्वं विप्रेण कारयेत् ॥

---

*तस्माच्चेति । अस्य 'तदपत्यं च संस्कार्यम्' इत्यन्तं सम्बन्धः । तस्मादुक्तश्रुत्या ब्राह्मणत्वात् । *षण्ढेति । अन्धादीनामुपलक्षणम् । *यथोचितम् । अशक्याङ्गं विहाय । अन्यथा मत्तोन्मत्तौ संस्कार्यौ । संस्कारमन्त्रा उपनयस्य वासःपरिधानादौ ये मन्त्रास्तानाचार्य एव पठेत् । होमादीनाचार्य एव कुर्यात् । आचार्यसमीपम् अग्निसमीपं वा नयनं सावित्रीवाचनं वा, एषां पक्षाणामन्यतमेन प्रधानसिद्धिरित्यर्थः । मूकबधिरादेः सावित्रीवाचनासम्भवात् स्पृष्ट्वा सावित्रीजपः कार्यः । वस्तुतस्तु आचार्यः स्वसमीपमग्निसमीपं वा बटुमानीय सावित्रीं वाचयेत् , अथवा बटुं संस्पृश्य सावित्रीं जपेदित्यर्थः । तथाचाचार्यसमीपनयनाङ्गको गायत्र्युपदेशः प्रधानम् , मूकादेस्तु तादृशो गायत्रीजप इति । एतेषां विवाहाभावात्तदनुजस्य न परिवेद-

एवमेव द्विजैर्जातौ संस्कार्यौ कुण्डगोलकौ ॥ इति । स्मृत्यर्थसारेप्येवम् । *कुण्डगोलकयोः संस्कार्यत्वं श्राद्धे निषेधश्च *क्षेत्रजपुत्रविषयः । *अन्यस्य "विन्नास्वेष विधिः स्मृतः" इति वचनात् अब्राह्मण्येनोपनयनाद्यप्राप्तेरित्यपरार्कः ।

उपनयनं च कुमारं भोजयित्वा कार्यम् "प्रागेवैनं तदहर्भोजयन्ति" इति मदनपारिजाते गोभिलोक्तेः । गायत्र्युपदेशश्चोत्तरतोऽग्नेः कार्यः "उत्तरेणाग्निमुपविशतः प्राङ्मुख आचार्यः प्रत्यङ्मुख इतरोऽधीहि भोः" इति शाङ्खायनसूत्रोक्तेः । यद्यपि कात्यायनेन "अथास्मै सावित्रमिन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखाय" इत्युक्त्वा "दक्षिणत-

---

नदोष इति भावः । *कुण्डेति ।

सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः ।
अनिन्द्येषु विवाहेषु पुत्राः सन्तानवर्धनाः ॥

इत्यस्य वेत्तृभ्यः सवर्णेभ्यः अनिन्द्यविवाहोढायां सवर्णायां जातः तत्समानजातीय इत्यर्थः "विन्नास्वेष विधिः स्मृतः" इत्युपसंहारे विन्नपदोपादानात् । *क्षेत्रजेति । सवर्णजेत्यर्थः । *अन्यस्येति । तेषां शूद्रधर्मेषु द्विजशुश्रूषादिषु साधारणधर्मेष्वहिंसादिषु चाधिकारः । वस्तुतस्तु कुण्डगोलककानीनादीनां विज्ञानेश्वरमते असवर्णत्वमेव । नन्वेवं कुण्डगोलकयोरब्राह्मण्ये श्राद्धे प्रतिषेधो व्यर्थः, किञ्च ब्राह्मण्यां ब्राह्मणादुत्पन्नस्याब्राह्मण्यमपि विरुद्धम् 'तज्जातीयात्तज्जातीयायामुत्पन्नस्य तज्जातीयत्वम्' इति न्यायात् ; यथा गवि गोरुत्पन्नो गौरिति । मैवम्, विन्नास्वित्युपसंहारेण तस्याब्राह्मणत्वाद् अत्यन्ताप्राप्तपतितनिषेधवच्छ्राद्धे तन्निषेधः । उक्तन्यायश्च प्रत्यक्षगम्यमनुष्यत्वगोत्वादिष्वेव न तु ब्राह्मणत्वादौ तस्य स्मृतिगम्यत्वादिति ।

स्तिष्ठत आसीनाय वैके" इति विकल्प उक्तः, तथापि कातीयानामेव सः। बह्वृचानां तूत्तर एव *वेदैक्यात्।

उपनयनं च कुमारं भोजयित्वा कार्यं "भागेवैनं तदहर्भोजयन्ति" इति गोभिलोक्तेः। उत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायेत्येकः पक्षः। दक्षिणतोऽग्नेस्तिष्ठत आसीनाय वेत्यपरः पक्षः। एके इति पूजार्थम्।

*वेदैक्यादिति। वस्तुतस्तु गायत्र्युपदेशोऽग्नेरुत्तरत इत्येतच्छाखान्तरीयाणामेव, न त्वाश्वलायनानां, तेषां नारायणवृत्तौ प्रयोगपारिजाते जीर्णप्रयोगरत्नपुस्तके च गायत्र्युपदेशार्थमग्नेरुत्तरतो गमनस्यानुक्तेः। तथाहि प्रथमतः अवक्षरणार्थं वटुनाऽग्नेरुत्तरदेशे गन्तव्यम् "समन्वारब्धे हुत्वोत्तरतोऽग्नेः प्राङ्मुख आचार्योऽवतिष्ठते पुरस्तात्प्रत्यङ्मुख इतरः" इत्याश्वलायनोक्तेः। अवक्षारणानन्तरम् अग्निकार्यं गुरुदक्षिणत एव स्वस्थाने उपविश्य कार्यम्।

ततः पूर्ववदासीत गुरुः शिष्योऽपि चात्मना।
व्यवधानं परिहरन्नग्नेर्गत्वाऽन्तिकं गुरोः॥
आसित्वा दक्षिणे तस्य बर्हिं परिसमुह्य च॥

इति शौनकोक्तेः। आश्वलायनः—'अग्नये समिधम्' इत्यादि 'हरस्वी भूयासम्' इत्यन्तमग्निकार्यमुक्त्वाऽऽह "जान्वाच्योपसंगृह्य ब्रूयादधीहि भोः सावित्रीं भोः अनुब्रूहि" इति। शौनकोऽपि—

मयि मेधां मयीत्याद्यैः षड्भिर्मन्त्रैर्विभावसुम्।
उपतिष्ठेद् गुरुरपि अग्नेः पश्चिमभूतले॥
आसीत प्राङ्मुखः शिष्योऽप्याचार्याभिमुखो भवेत्।
भूतले दक्षिणं जानुं पातयित्वाऽभिवादयेत्॥ इति।

जयन्तोऽप्याह—"अथोभयोरप्यग्नेः पश्चाद्यथोपदेष्टुं शक्यते तथोपविशत्याचार्यः" इति। जीर्णप्रयोगरत्नेऽपि "मयिमेधामित्यादिषण्मन्त्रैरग्न्युपस्थानमुक्त्वा दक्षिणं जान्वाच्य विधि-

भिक्षायां विशेषमाह कात्यायनः *"मातरमेवाग्रे भिक्षेत"। पराशरमाधवीये—

मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं न विमानयेत्॥

अथ संस्कारलोपे शौनकः—

*आरभ्याधानमाचौलात्कालेऽतीते तु कर्मणाम्।
व्याहृत्याग्निं तु संस्कृत्य हुत्वा कर्म यथाक्रमम्॥

वदुपसंगृह्याचार्यं ब्रूयात्—अधीहि भोः"इत्याद्युक्तम्। तस्मादाश्वलायनस्योत्तरतो गायत्र्युपदेशार्थं गमनं प्रमाद एवेति। *मातरमेवेति। यद्यपि 'अपत्याख्यायिनमग्रे भिक्षेत' इति सूत्रे पुंभिक्षाया एव प्राथम्यं प्रतीयते तथापि एतत्कात्यायनवाक्याद्वाक्यान्तराच्च मातृभिक्षाया एव प्राथम्यम् अविशेषपठितस्य सूत्रस्य स्त्रीभिक्षाप्राथम्येऽपि अविरोधात्। यद्यपि "भिक्षां भवान् ददातु अनुप्रवचनीयमिति वा"इति सूत्रे भिक्षाया भवन्मध्यतोक्ता तथापि "भवत्पूर्वां ब्राह्मणो भिक्षेत, भवन्मध्यां राजन्यः, भवदन्त्यां वैश्यः" इति वचनात्

आदिमध्यावसानेषु भवच्छब्दोपलक्षिता।
ब्राह्मणक्षत्रियविशां भिक्षा चर्या यथाक्रमम्॥

इति याज्ञवल्क्योक्तेश्च, "भवत्पूर्वामिति शास्त्रान्तरोक्तो विधिर्द्रष्टव्यः" इति वृत्तिग्रन्थाच्च भवत्पूर्वकतैव। एवं च सूत्रे कारिकायां यद् भवन्मध्यत्ववचनं, तत् क्षत्रियपरम्। अथवा, 'अनुप्रवचनीयभिक्षायाम् अपत्याख्यायिनम्' इत्यादिसूत्रोक्तायां भवन्मध्यतैव, अनुप्रवचनीयं भवान्ददात्विति पक्षान्तरे तथैवोक्तेः। अन्यथा वैरूप्यं स्यात्। भवत्पूर्वामित्यादिवृत्तिग्रन्थस्य याज्ञवल्क्यवचसां च सायंप्रातर्भिक्षापरत्वेनोपपत्तेरिति।

*आरभ्येति। गर्भाधानपुंसवनसीमन्तनयनविष्णुबलि-

एतेष्वेकैकलोपे तु पादकृच्छ्रं समाचरेत् ।
चूडायामर्धकृच्छ्रं स्यादापदि त्वेवमीरितम् ॥
अनापदि तु सर्वत्र द्विगुणं द्विगुणं चरेत् ॥

पारिजाते कात्यायनः—

लुप्ते कर्माणि सर्वत्र प्रायश्चित्तं विधीयते ।
प्रायश्चित्ते कृते पश्चाल्लुप्तं कर्म समाचरेत् ॥

स्मृत्यर्थसारे चैवम् । कारिकायां तु—

प्रायश्चित्ते कृतेऽतीतं लुप्तं कर्म कृताकृतम् ।

इत्युक्तम् ।

प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै ।
कार्यमित्येक आचार्या नेत्यन्ये तु विपश्चितः ॥ इति ।

*त्रिकाण्डमण्डने तु—

कालातीतेषु कार्येषु प्राप्तवत्स्वपरेषु च ।
कालातीतानि कृत्वैव विदध्यादुत्तराणि तु ॥

तत्र सर्वेषां तन्त्रेण नान्दीश्राद्धं कुर्यात्, देशकालकर्त्रैक्यात् ।

जातकर्मनामकर्मनिष्क्रमणान्नप्राशनचौलकर्मान्तनवसंस्काराणां प्रतिसंस्कारं समस्ताभिर्व्याहृतिभिरेकैकाज्याहुतिरूपं कालाश्रयनिमित्तकप्रायश्चित्तं कुर्यात् । चौलातिरिक्तानां संस्काराणां प्रमादादकरणे प्रत्येकं पादकृच्छ्रं, चौलाकरणेऽर्द्धकृच्छ्रं, बुद्धिपूर्वकं चौलातिरिक्ताकरणे प्रत्येकमर्द्धकृच्छ्रं, चौलाकरणे कृच्छ्रं बटुना कारयेत् , ततश्चौलहोमः कार्य इत्यर्थः । लुप्तसंस्कारकरणपक्षं दृढयति-*त्रिकाण्डेति । प्रायश्चित्तमात्रेण स्त्रीसंस्कारोत्पत्तौ मानाभावात्, शिश्वभ्युदयार्थत्वाच्चेति भावः । एते च संस्कारा ज्येष्ठस्य कृत्वैव कनिष्ठस्य कार्याः, त्रिकाण्डमण्डनवचनस्तादृशविषयेऽपि कालातीतेषु ज्येष्ठसंस्काररूपकार्येष्वित्यादिक्रमेण योजनासंभवात् ।

गणशः क्रियमाणानां मातृणां पूजनं सकृत् ।
सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु ॥

इति छन्दोगपरिशिष्टात् । *एतद्बहूनामपत्यानां युगपत्संस्कारकरणविषयमिति बोपदेवः । अतीतसंस्काराणां युगपत्करण इत्यन्ये । तत्रापि चौलस्योपनीत्या सहेति पक्षे उपनीतिदिन एवानुष्ठानं न पूर्वदिने, सहत्वस्य दिवसैक्ये सन्निकृष्टतरत्वात् । वृद्धाचारोऽप्येवम् ।

उपनीतिदिने मध्याह्नसन्ध्यामाह पारिजातेजैमिनिः—

यावद्ब्रह्मोपदेशस्तु तावत्संध्यादिकं च न ।
ततो मध्याह्नसन्ध्यादि सर्वं कर्म समाचरेत् ॥ इति ।

ब्रह्म गायत्री । यत्तु वचनम्—

उपायने तु कर्तव्यं सायंसन्ध्ये उपासनम् ।
आरभेद्ब्रह्मयज्ञं तु मध्याह्ने तु परेऽहनि ॥ इति,

तत् शाखान्तरविषयमिति पारिजातः । विकल्प इति युक्तं पश्यामः । उपनयनाग्निस्त्रिरात्रं *धार्यः 'त्र्यहमेतमग्निं धारयन्ति' इत्यापस्तम्बोक्तेः । बौधायनसूत्रे तु सदा धारणमप्युक्तम्—'उपनयनादिरग्निस्तमौपासनमित्याच-

---

ज्येष्ठे त्वकृतसंस्कारे गर्भाधानादिभिः क्वचित् ।
कनिष्ठो नैव संस्कार्य इति शातातपोऽब्रवीत् ॥

इति धर्मसारसिंधौ वचनाच्च । ज्येष्ठकनिष्ठपुत्रयोरुपनयने ज्येष्ठदुहितृकनिष्ठपुत्रयोश्च विवाहोपनयनयोः तपोग्निहोत्रमन्त्रेष्वित्यत्र वक्ष्यामः । पारिजाते—

एकमातृप्रसूतेषु कन्ये वा पुत्रकौ तयोः ।
सहोद्वाहं न कुर्वीत तथैव व्रतबन्धनम् ॥

*एतदिति । मतद्वयं नान्दीश्राद्धे निराकारिष्यामः ।

*धार्य इति । तदग्रे लक्षणे मेधाजननात्पूर्वकालीनाग्निकार्यस्य

क्षते, पाणिग्रहणादित्येके, नित्यो धार्योऽनुगतो निर्मन्थ्यः' इति। इदं जातारणिपक्षे। अन्यथा मन्थनासम्भवात्। ब्रह्मयज्ञे विशेषमाह तत्रैव जैमिनिः—

अनुपाकृतवेदस्य कर्तव्यो ब्रह्मयज्ञकः।
वेदस्थाने तु सावित्री गृह्यते तत्समा यतः॥ इति।

*येषां तद्दिन एव वेदारम्भस्तेषां नेदमिति दिक्॥

अथ ब्रह्मचारिधर्माः। याज्ञवल्क्यः—

*मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम्।
*भास्करालोकनाश्लीलपरिवादादि वर्जयेत्॥

तत्रैवोक्तेः, अग्न्यन्तरे तस्य कर्तुमशक्यत्वात्। उपनेतोपनयनाज्याहुतिभिः पुनरग्निमुत्पाद्य तस्मिन्मेधाजननात्प्राक्कालीनमाग्निकार्यं कारयित्वा मेधाजननं कुर्यात्। कटिसूत्रवस्त्राजिनोपवीतावक्षारणाग्निकार्यगायत्र्युपदेशादि तु पुनर्न भवति, बहुसंस्कारत्वात्। नाप्यनुप्रवचनीयः तस्योपनयनाङ्गत्वात् अग्निकार्यस्यानुप्रवचनीयाद् भूतपूर्वत्वात्।

सायं सन्ध्याविधिं कृत्वा अथोपनयनानले।
आधाय समिधं पूर्वं ततोऽन्वाधानपूर्वकम्॥

इति शौनकोक्तेः। एवं च यत्र सायमग्निकार्यात्प्रागुत्तरं वा तदग्निनाशः तत्र तमुत्पाद्यैवानुप्रवचनीयहोम इति। अथ तत्प्रयोगः—प्रमादान्नष्टस्योपनयनाग्नेः पुनरुत्पत्तिविधिं करिष्ये। अन्वाधाने चक्षुषीवर्जमुक्त्वा पूर्ववदाज्यं संस्कृत्य 'अग्न आयूंषि'इति तिसृणामृषिदैवतच्छन्दांसि उक्त्वा नष्टस्योपनयनाग्नेः पुनरुत्पत्तिहोमे विनियोगः। अग्नआयूंषि इति तिसृभिः प्रजापते इति च हुत्वा स्विष्टकृदादि कुर्यादिति। *येषामिति। अनुपाकृतवेदस्येत्यस्य फलम्। *मधु क्षौद्रम्। शुक्तं निष्ठुरवाक्यम्।

*भास्करेति। ब्रह्मचारिणः सदा सूर्यदर्शननिषेधः, स्नातक-

मनुः—

अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम् ।

वर्जयेदिति प्रकृतम् । पारिजाते कौर्मे—

नादर्शं चैव वीक्षेत नाचरेद्दन्तधावनम् ।
गुरूच्छिष्टं भेषजार्थं प्रयुञ्जीत, न कामतः ॥

एतन्निषिद्ध*मधवादिविषयम्, अन्यस्य गुरूच्छिष्टस्य सर्वदा प्राप्तेः । 'स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नीयात्' इति वसिष्ठोक्तेः । ज्येष्ठभ्रातुरित्यपि ज्ञेयम् 'पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यम्' इत्यापस्तम्बोक्तेः । गुरुपुत्रे तु स्मृत्यन्तरे उक्तम्—

गुरुवद् गुरुपुत्रः स्यादन्यत्रोच्छिष्टभोजनात् ।

प्रचेताः—

ताम्बूलाभ्यञ्जनं चैव *कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥

यमः—

मेखलामजिनं दण्डमुपवीतं च नित्यशः ।
कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत् ॥

स्य 'नेक्षेतोद्यन्तमादित्यम्' इत्यादिरुदितास्तमयगोचरो निषेध इति भेदः । ब्रह्मचारिणोऽप्युदितास्तमयगोचरो निषेध इत्यन्ये । *मधवादीति । मधु क्षौद्रम् । *व्याधीयीत व्याधिमान् स्यात् । एतच्च तदेकापनोद्ये व्याधौ ।

*कांस्यपात्रे इति । लोहमृन्मययोरपि "लोहे मृन्मये वा न भुञ्जीत" इति हारीतात् ।

स्त्रीणां तु प्रेक्षणालम्भात्ताभिः संकथनादपि ।

विपद्यते ब्रह्मचर्यमिति वर्त्तते । तत्र "प्रेक्षणालम्भने मैथुनशङ्कायाम्" इति गौतमोक्तेः पतिव्रतानां न निषेधः । आल-

अग्नीन्धनं भैक्ष्यचर्यामधःशय्यां गुरोर्हितम् ॥
*कुर्यादिति शेषः ।

मेखलामाह आश्वलायनः "तेषां मेखला मौञ्जी ब्राह्मण-

स्य स्पर्शः । भाषणोपलक्षणमेतत् । *कुर्यादितीति ।

आसमालम्भनात् कुर्यात् कृतोपनयनो द्विजः ।
भैक्षेण वर्त्तयेन्नित्यं नैकादी तु भवेद्व्रती ॥
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ।
न भैक्षं परपाकः स्यान्न च भैक्षं प्रतिग्रहः ॥
सोमपानसमं भैक्षं तस्माद् भैक्षेण वर्त्तयेत् ।
नित्यं स्नात्वा शुचिः कुर्यादेवर्षिपितृतर्पणम् ॥
देवताभ्यर्चनं चैव संध्योपासनमेव च ।

इत्यर्थः । व्यासः—

जघन्यशायी पूर्वं स्यादुत्थायी गुरुवेश्मनि । इति ।

मनुः—

गुरोर्यत्र परीवादो निन्दा वाऽपि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥

मनुः—

गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ।
गुरुपुत्रेषु पत्नीषु गुरोश्चै(१)वास्य बन्धुषु ॥
उन्मर्दनं तु गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनम् ॥
अभ्यञ्जनं स्नापनं च गात्रोद्वर्तनमेव च ।
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम् ॥
मनसाऽपि न चोल्लङ्घ्या गुरोराज्ञा कथंचन ।
गुरुवद्गुरुपत्नीषु तत्पुत्रादिषु सर्वदा ॥

---

(१) 'गुरोश्चैव स्वबन्धुषु' इत्यपि पाठान्तरम् ।

स्य धनुर्ज्या क्षत्रियस्या❀वी वैश्यस्य" इति । आचार्यः—

त्रिवृता मेखला कार्या त्रिवारं स्यात्समावृता ।
तद्ग्रन्थयस्त्रयः कार्याः पञ्च वा सप्त वा पुनः ॥

मनुः—

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥
मौञ्ज्यभावे तु कर्तव्या कुशाश्मन्तकबल्वजैः ॥

अत्र*प्रवरसंख्यानियम इति वृद्धाः ।

प्रत्यक्षे वा परोक्षे वा चरेत प्रथमाश्रमी ।
वेदोदितव्रतैरन्यव्रतानन्यान्न समाचरेत् ॥
न स्नायात्सर्वतीर्थेषु न भुञ्जीयादितस्ततः ।
तीर्थयात्रां न कुर्यात्,
भैक्षादन्यन्न भुञ्जीयादित्यर्थः ।
न भक्षयेच्च ताम्बूलं श्राद्धान्नं न च भक्षयेत् ॥

याज्ञवल्क्यः—

ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि ।
ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ॥

एकमिति । एकसम्बन्धि अन्नम् । एकस्यान्नं न भक्षयेत्, किन्तु बहूनाम् । श्राद्धे त्वेकस्यापीत्यर्थः । अन्ये च ब्रह्मचारिधर्मा अन्यतो बोध्याः । *आवी अव्यूर्णाकृता । मनुः—

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी ॥
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ।
मौञ्ज्यभावे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः ॥

चर्ममयज्यावारणाय—मौर्वीति । मूर्वा तृणभेदः । ज्यायां त्रिवृत्त्वमस्ति, नास्ति, इति मतद्वयं बोध्यम् । मौञ्ज्यलाभे उक्तमेखलानामभावे क्रमेण कुशाश्मन्तकबल्वजा ग्राह्येत्यर्थः । *प्रवरेति ।

-अथ दण्डाः। मनुः-

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ।
वैप्पलौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः॥

एषामभावे गौतमः-"याज्ञियो वा सर्वेषां मूर्धललाट*नासा[ग्र]प्रमाणः" इति। आजिनमाहाश्वलायनः *"अहतेन वाससा संवीतमैणेयेन वाऽजिनेन ब्राह्मणं रौरवेण क्षत्रियमाजेन वैश्यम्" इति। यद्यप्यै*णेयशब्देन मृगीचर्मैवोच्यते "एण्या ढञ्" इति पाणिनिस्मृतेः,

ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रिषु।

इति अमरकोशाच्च; तथापि*"कृष्णरुरुवस्तान्यजिनानि" इति शङ्खोक्तेः, "सर्वेषां वा रौरवम्" इति यमोक्तेश्च मृगचर्मणा सह विकल्पो ज्ञेयः। *वस्राजिनयोस्तु विक

एकप्रवरस्य एको ग्रन्थिः, त्रिप्रवरस्य त्रयः, पञ्चप्रवरस्य पञ्च, सप्त वेत्यर्थः। *बैल्वपालाशौ इत्यादिर्विकल्पः 'दण्डं प्रदाय'इत्येकत्वोक्तेः। *नासाग्रम् भ्रूमध्यम्।

*अहतेनेति।

ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम्।
अहतं तद्विजानीयात्सर्वकर्मसु पावनम्॥

*एणी सविन्दुर्मृगी। विकल्प इति। प्रावरणे वासः साधारणं यदि तु न प्रावरणं तदा ब्राह्मणादीनामजिनानीत्यर्थः। *कृष्णेति। मनुः—

कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः।
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि वा॥

वस्तः अजः॥ शाणेत्याद्यन्तरीयाणि। पारस्करः-'गव्यं वैश्यस्य सर्वेषां वा गव्यम्' इति। *वस्रेति। सर्वेषां वासोऽथवा ब्राह्मणादीनां यथायथमजिनानीत्यर्थः। गौतमः-"शाणक्षौमचीर

रुपः "कार्पासं *वाऽविकृतम्" इति*गौतमोक्तेः ।

अथ यज्ञोपवीतम् । मनुः—

कार्पाससमुपवीतं स्याद्विप्रस्योर्ध्ववृतं*त्रिवृत् ॥

पारिजाते देवलः—

*कार्पासक्षौमगोवालशणबल्व*तृणोद्भवम् ।
यथासंभवतो धार्यमुपवीतं द्विजातिभिः ॥
शुचौ देशे शुचिः सूत्रं संहताङ्गुलिमूलके ।
आवर्त्य षण्णवत्या तत्त्रिगुणीकृत्य यत्नतः ॥
अङ्गिलङ्गकैस्त्रिभिः सम्यक् प्रक्षाल्योर्ध्ववृतं *त्रिवृत् ।

कुतपाः सर्वेषां वासांसि अन्तरीयाणि" । शणविकारं शाणम् । अतसीविकारं क्षौमम् । श्वेतप(१)द इत्यन्ये । पश्चिमदिशि तृणभेदः क्षुमेति स्मार्त्ताः । दर्भादिनिर्मितं चीरम् । ऊर्णानिर्मितः कम्बलः कुतपः । चत्वार्येतानि सर्वेषां वासांसीत्यर्थः । स एव-"काषायमप्येके वार्क्षं ब्राह्मणस्य माजिष्ठहारीते इतरयोः" इति । वार्क्षमिति नियम्यते । वृक्षकषायेण रक्तं वार्क्षम् । इतरयोः क्षत्रवैश्ययोरित्यर्थः । *अविकृतम् अहतम् । *गौतमोक्तेरिति । ऐणेयेन वेति वाशब्दाच्च ।

*त्रिवृदिति ।

शणसूत्रमयं राज्ञो वैश्यस्याविकमुच्यते ॥

इत्युत्तरार्द्धम् । शणसूत्रमयं क्षौमम् । पैठीनसिः-*"कार्पासमुपवीतं ब्राह्मणस्य, क्षौमं राजन्यस्य, आविकं वैश्यस्य" इति । क्षौममिति । क्षुमा अतसी, पश्चिमस्यां दिशि तृणभेदो वा, तदुत्थमित्युक्तम् । तदसम्भवे त्वाह-*कार्पासेति । *तृणोद्भवमिति । तृणादिकमिति पाठे आदिना दर्भग्रहः । असम्भवतः असम्भवे । *त्रिवृदिति । वामावर्त्तवलितं त्रिगुणं कृत्वा दक्षिणावर्त्तवलितं

---

(१) श्वेत सदृशा इति घ पुस्तके पाठः ।

अप्रदक्षिणमावृत्य सावित्र्या त्रिगुणीकृतम् ॥
ततः प्रदक्षिणावर्तं समं स्यान्नवसूत्रकम् ।
त्रिरावेष्टय दृढं बद्धा ब्रह्मविष्ण्वीश्वरान्न्यसेत् ॥

तन्नवतन्तु कार्यम्

सावित्र्या त्रिगुणं कुर्यान्नवसूत्रं तु तद्भवेत् ।

इति तेनैवोक्तेः । छन्दोगपरिशिष्टे—

त्रिवृदूर्ध्वधृतं कार्यं तन्तुत्रयमधोधृतम् ।
त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥

*ऊर्ध्वधृतं दक्षिणं करमूर्ध्वं कृत्वा वलितम् ।

भृगुः—वामावर्तवलितं त्रिगुणं कृत्वा दक्षिणावर्तवलितं त्रिगुणं कार्यम् । स एकस्तन्तुरेवं त्रितन्तुकमित्यर्थः ।

कात्यायनः—

*पृष्ठदेशे च नाभ्यां च धृतं यद्विन्दते कटिम् ।
तद्वार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम् ॥

वसिष्ठः—

*नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपःक्षयः ।

त्रिगुणं कार्यं, स एकस्तन्तुः, एवं त्रितन्तुकमित्यर्थः । *ऊर्ध्वधृतमिति । दक्षिणेन करेणोर्ध्वधृतेन त्रिगुणीकृतम् ,

वलितं मानवे शास्त्रे सूत्रमूर्ध्वधृतं स्मृतम् ।

इति संग्रहोक्तेः । स्मृत्यन्तरे—

शुचौ देशे शुचिः सूत्रं संहताङ्गुलिमूलके ।
आवर्त्य षण्णवत्या तत्त्रिगुणीकृत्य धारयेत् ॥
अभिलङ्कैश्च मन्त्रैस्तत्प्रक्षाल्योर्ध्वधृतं त्रिवृत् ।
अप्रदक्षिणमावर्त्य सावित्र्या त्रिगुणीकृतम् ॥
ततः प्रदक्षिणावर्त्तं समं स्यान्नवसूत्रकम् ।
त्रिरावेष्ट्य दृढं बध्वा ब्रह्मविष्ण्वीश्वरान्न्यसेत् ॥ इति ।

*पृष्ठदेशे चेति प्रमाणम् । *नाभेरिति धारणम् ।

तस्मान्नाभिसमं कुर्यादुपवीतं विचक्षणः ॥

पारिजाते देवलः—

उपवीतं वटोरेकं द्वे तथेतरयोः स्मृते ।
एकमेव*यतीनां स्यादिति शास्त्रस्य निश्चयः ॥

स एव–*'बहूनि वाऽऽयुष्कामस्य'। तत्र मन्त्रमाह स एव–

यज्ञोपवीतमिति वा व्याहृत्या वापि धारयेत् ॥

हेमाद्रौ—

यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि ।
तृतीयमु*त्तरीयार्थे वस्त्राभावे तदिष्यते ॥(१)

---

*यतीनां त्रिदण्डिनाम् । *बहूनीति । कश्यपः—

त्रीणि चत्वारि पञ्चाष्ट गृहिणः स्यादशापि वा ।

अथ चत्वारिंशदपि क्वचित् । मनुः—

उद्धृते दक्षिणे हस्ते उपवीत्युच्यते द्विजः ।
सव्ये च प्राचीनावीती निवीती कण्ठसज्जने ॥

*उत्तरीयार्थेइति। उत्तरीयं च जातूकर्ण्येनोक्तम्-"सग्रन्थि परिमण्डलमुत्तरीयं कुर्यात्, वस्त्रोत्तरीयाभावे त्वेकाङ्गुलं द्व्यङ्गुलं वा सूत्रैरेव कृतं परिमण्डलमुत्तरीयं कुर्यात्"इति । जीवत्पितृकस्य तु उत्तरीयं निषिद्धम्

पादुके चोत्तरीयं च तर्जन्यां रौप्यधारणम् ।
न जीवत्पितृकः कुर्याज्ज्येष्ठे भ्रातरि जीवति ॥

इति स्मृतेः । तस्य इदमपि निषिद्धं तत्स्थानापन्नत्वात् । उपरिवस्त्रमात्रं तु भवत्येवेत्यन्यत्र विस्तरः । भृगुः—

सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥

---

(१) 'सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकम् । इत्यधिकं कस्मिंश्चित्पुस्तके ।

देवलः—

सावित्र्या दशकृत्वोऽद्भिर्मन्त्रिताभिस्तदुक्षयेत् ।
विच्छिन्नं चाप्यधो यातं भुक्त्वा निर्मितमुत्सृजेत् ॥

अत्र पूर्वार्द्धेन पुरुषार्थत्वम् उत्तरार्द्धेन क्रत्वर्थत्वं चेति । अलाभे तु स्मृतिसारे—

छेदे विनाशे वा स्नातः कन्यया निर्मितं शुभम् ।
विधवाद्याभिरथवा सूत्रं गृह्णीत वै शुचिः ॥ इति ।

ब्रह्मग्रन्थ्यादि अन्यतो बोध्यम् । बद्धयज्ञोपवीतं धृत्वाऽऽचमनं कुर्यात् "यज्ञोपवीतिनं कृत्वा यथाशास्त्रमाचामयति" इति स्मृतेः । आचमने देशश्च कारिकायाम्—

आचान्तमुत्तरेणेति यज्ञपात्राणि चानयेत् ।
अन्तरेणाग्निमात्मानं दक्षिणे चोपवेशयेत् ॥ इति ।

आचमनोत्तरं दक्षिणे उपवेशनं कार्यमित्यर्थः । एवं होमोत्तरमुत्तरदेशे अवक्षारणं कृत्वा दक्षिणदेशे अग्निकार्यं कार्यम् । एतच्चाग्निकार्यं तदनन्तरं प्रत्यहं सायंप्रातः कुर्यात् "सायंप्रातरसमिधमादध्यात्" इति गृह्यात्,

अग्निकार्यं ततः कुर्यात्सन्ध्ययोरुभयोरपि ।

इति याज्ञवल्क्याच्च । ततः सन्ध्योत्तरम् । सायमेवाग्निकार्यं कुर्यात् 'सायमेवाग्निमिन्धीतेत्येके' इति लौगाक्षिवाक्यात् । गौणकालमाह स एव—

कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया । इति ।

समिदाहरणं मनुः—

दूरादाहृत्य समिधः सन्निदध्याद्विहायसि ।
(विहायसि मण्डपादौ) ।
सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः ॥

आपस्तम्बः-"नास्तमिते समिधमाहरेत्" । तत्परिमाणं का-

मनुः—

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि*मन्त्रतः ॥

अथैतल्लोपे प्रायश्चित्तम् । मनुः—

अकृत्वा भैक्ष्यचरणम*समिध्य च पावकम् ।
अनातुरः सप्तरात्रम*वकीर्णिव्रतं चरेत् ॥

अमत्या *आपदि त्यागे तु याज्ञवल्क्यः—

भैक्ष्याग्निकार्ये त्यक्त्वा तु सप्तरात्रमनातुरः ।
कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयम् ॥
उपस्थानं ततः कुर्यात्स(१)मासिञ्चन्त्वनेन तु ।

मन्त्रास्तु मिताक्षरायां ज्ञेयाः । सकृल्लोपे तु ऋग्विधाने—

त्यायनः—

नाङ्गुष्ठादधिका कार्या समित्स्थूलतया क्वचित् ।
न विहीना त्वचा चैव न सकीटा न पाटिता ॥
प्रादेशान्नाधिका नोना तथा न स्याद् द्विशाखिका ।
विशीर्णा विदला ह्रस्वा वक्रा ससुषिरा कृशा ॥
दीर्घा स्थूला च समिधो वर्जनीयाःमयव्रतः ॥ इति ।

*मन्त्रत इति । मन्त्राश्चोपनयनोक्ताः ।

*असमिध्येति । समिदाधानमकृत्वेत्यर्थः ।

*अवकीर्णिव्रतमिति । व्रतानि चाह बौधायनः—

'अथ व्रतानि अहिंसासत्यमस्तेयं मैथुनवर्जनम्, अक्रोधा गुरुशुश्रूषा, अममोदः, शौचमाहारशुद्धिः' इति ।

*आपदीति । 'कार्यव्यासङ्गेन' इति मयूखः । गुरुशुश्रूषा-

---

(१) समा सिञ्चन्तु मरुतः समिन्द्रः सं बृहस्पतिः । समायमग्निः सचतां यशसा ब्रह्मवर्चसा ॥ इति मन्त्रः ।

मानस्तोके जपेन्मन्त्रं शतसंख्यं शिवालये ।
अग्निकार्यं विना भुक्तौ न पापं ब्रह्मचारिणः ॥

स्मृत्यर्थसारे तु संध्याग्निकार्यलोपे स्नात्वाऽष्टसहस्रं जपः । भिक्षालोपे*ऽष्टशतम् । अभ्यासे द्विगुणं पुनःसंस्कारश्चेत्युक्तम् । अपरार्के संवर्तः—

यः सन्ध्यां चैव नोपास्ते अग्निकार्यं यथाविधि ।
गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहितः ॥
अग्निकार्यं सन्ध्याद्वये कार्यम्
अग्निकार्यं ततः कुर्यात्सन्ध्ययोरुभयोरपि ॥

इति याज्ञवल्क्योक्तेः । सायमेव वा 'सायमेव वाग्निमिन्धीतेत्येके' इति लौगाक्षिणोक्तेः । पारिजाते वृद्धशातातपः—

ब्रह्मचारी तु योऽश्नीयान्मधु मांसं तथैव च ।
प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेत् ॥

ऋग्विधाने—

*तं वो धिया जपेन्मन्त्रं लक्षं चैव शिवालये ।
ब्रह्मचारी स्वधर्मेषु न्यूनं चेत्पूर्णमेति तत् ॥

दिनेति मुक्तावली । *अष्टशतं अष्टोत्तरशतम् । एवमष्टसहस्रमित्यत्र । अत्र ब्रह्मचारिणोऽल्पधर्मलोपे प्रायश्चित्तं समावर्त्तने वक्ष्यति । बहुधर्मलोपे तु प्रायश्चित्तमाह ऋग्विधाने-*तं वो धियेति। स्थालीपाकविधानम् 'अथ पशुकल्प'इत्याद्याश्वलायनोक्तं गर्दभयागश्चामावास्यायां कार्यः 'यो ब्रह्मचारी अवकिरेदमावास्यायां रात्र्याम्' इति तैत्तिरीयकश्रुतेः । 'पशोरभावे चरुः' इति विज्ञानेश्वरः। 'श्रोत्रियस्य चरुः' इति माधवः । इदमवकीर्णिप्रायश्चित्तं ब्राह्मणक्षत्रियविशां समानमेव ।

अवकीर्णी द्विजो राजा वैश्यश्चापि खरेण तु ।
इष्ट्वा भैक्षाशिनो नित्यं शुद्ध्यन्त्यब्दात्समाहिताः ॥

इति शाण्डिल्येन त्रयाणामपि तुल्यप्रायश्चित्तोक्तेः । मिताक्षरायाम्—

यद्युत्तिष्ठत्यनाचान्तो भुक्त्वानासनात्ततः ।
सद्यः स्नानं प्रकुर्वीत सोऽन्यथा प्रयतो भवेत् ॥

जमदग्निः—

संध्याकाले त्वतिक्रान्ते स्नात्वाचम्य यथाविधि ।
जपेदष्टशतं देवीं ततः सन्ध्यां समारभेत् ॥

अकामतस्तु गौतमः—

सन्ध्याकाले त्वतिक्रान्ते त्रिसन्ध्यमपि सर्वदा ।
चतुर्थार्घ्यं प्रकुर्वीत शिखाव्याहृतिसंपुटम् ॥

यमः—

प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत् ।
दृष्ट्वा सूर्यं निरीक्षेत गामग्निं ब्राह्मणं तथा ॥
मौनव्रतं समाश्रित्य आसीनो न वदेद्द्विजः ।
भुञ्जानो हि वदेद्यस्तु तदन्नं परिवर्जयेत् ॥

मिताक्षरायाम्—

विना यज्ञोपवीतेन यस्तूच्छिष्टो भवेद् द्विजः ।
प्रायश्चित्तमहोरात्रं गायत्र्यष्टशतं तु वा ॥

ऊर्ध्वोच्छिष्टे उपवासः, अधरोच्छिष्टे गायत्रीजपः । अज्ञाने आपदि च तत्रैव ।

पिबतो मेहतश्चैव भुञ्जतोऽनुपवीतिनः ।
प्राणायामत्रयं षट्कं नक्तं च त्रितयं क्रमात् ॥

उपवीतं विना पाने त्रयः, मेहने षट्, भोजने नक्तमित्यर्थः ।

स्त्रीसङ्गे तु मनुः—

अवकीर्णी तु काणेन गर्दभेन चतुष्पथे ।
स्थालीपाकविधानेन यजेद्वै निर्ऋतिं निशि ॥

विस्तरस्तु मिताक्षरादौ ज्ञेयः । उपवीतनाशे तु हा-

आङ्गिराः—

कृते मूत्रपुरीषे तु यदा नैवोदकं भवेत् ।
स्नात्वा लब्ध्वोदकं पश्चात्सचैलस्तु विशुध्यति ॥

शातातपः—"अनुदकमूत्रपुरीषकरणे सचैलं स्नानं महाव्याहृति होमश्च" इति । कामतस्तु यमः—

आपद्गतो विना तोयं शारीरं सन्निषेव्य तु ।
एकाहं क्षपणं कृत्वा सचैलं स्नानमाचरेत् ॥

जले मूत्रादिकरणे—

विनाऽद्भिरप्सु वाप्यार्त्तः शारीरं सन्निषेव्य च ।
सचैलो बहिराप्लुत्य गामालभ्य विशुध्यति ॥

शूलपाणिः—

विना यज्ञोपवीतेन भुङ्क्ते च ब्राह्मणो यदि ।
स्नानं कृत्वा जपं कृत्वा उपवासेन शुध्यति ॥

भरद्वाजः—

मलमूत्रे त्यजेद्विप्रो विस्मृत्यैवोपवीतधृक् ।
उपवीतं तदुत्सृज्य दध्यादन्यन्नवं तदा ॥

मण्डनः—

यज्ञोपवीतस्याभावे वस्त्रोपव्यानमाचरेत् ।
तदभावे तु सूत्रेण त्रिवृतोपव्ययीत सः ॥

रीतः—*मनोव्रतपतीभिश्चतस्र आज्याहुतीर्हुत्वा पुनः प्रतीयात् । तत्रैव मरीचिः—

ब्रह्मसूत्रं विना भुङ्क्ते विण्मूत्रे कुरुतेऽथवा ।
गायत्र्यष्टसहस्रेण प्राणायामेन शुद्ध्यति ॥

मनुः—

भोःशब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।
आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ॥
अकारश्चास्य नाम्नोन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥

शर्मन्निति नकारात्पूर्व इत्यर्थः । अभिवादनप्रत्यभिवा-

---

*मन इति । मनोज्योतिरित्येका, 'त्वमग्ने व्रतया असि'इति तिस्र इत्यर्थः, यथार्हं समन्त्रा इत्यर्थः । उपनयनानन्तरमनुप्रवचनीयपर्यन्तं ब्रह्मचारी तिष्ठेत् 'तिष्ठेदहःशेषमस्तमिते ब्रह्मौदनम्' इति आश्वलायनोक्तेः । अतिष्ठतस्तु—

विहितं वा निषिद्धं वा पालयान्त्रिदिवं व्रजेत् ।
अपालयन्पुनर्मोहादपवित्रं पदं व्रजेत् ॥

इति व्यासेन दोषोक्तेः तत्र प्रायश्चित्तमुपवासः,

वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥

इति मन्वुक्तेः । तत्र सद्यःकालं तस्य दुष्करत्वात्तत्प्रत्याम्नायरूपमेकब्राह्मणभोजनं कार्यम् ।

उपवासस्तु गायत्र्याः सहस्रं विप्रभोजनम् ।
प्राणायामा दशाष्टौ च समेतच्चतुष्टयम् ॥

इति षट्त्रिंशन्मतात् । तत्प्रयोगः—मम उपनयनोत्तरमनुप्रवचनीयादर्वाक् विहितस्थितिलोपजनितप्रत्यवायपरिहारार्थमुपवासप्रत्या-

दनादौ विशेषः स्मृत्यर्थसारे पारिजातादौ *ज्ञेयः। यमः—

न्यायविप्रभोजनं करिष्ये। *ज्ञेय इति। किंचित्तूच्यते, अत्रिः—

दक्षिणं पाणिमुद्धृत्य प्रकाममभिवादयेत्।
श्रोत्रिये त्वञ्जलिः कार्यः पादोपग्रहणं गुरोः॥

उपग्रहणं स्पर्शः। मनुः—

व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः।
सव्येन सव्यः स्पृष्टव्यो दक्षिणेन तु दक्षिणः॥

गुरुपाद इति शेषः, बौधायनः—श्रोत्रे संस्पृशेदिति। अथ प्रत्यभिवादने मनुः—

भोःशब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने।
आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने॥
अकारश्चास्य नाम्नोन्ते वाच्यः सर्वाक्षरः प्लुतः॥

अत्र नामान्ते अकारो न विधीयते, किन्तु नामान्ते योऽकारः तस्य प्लुतमात्रं, ततः शर्मशब्दः 'शर्मान्तं ब्राह्मणस्योक्तम्'इति वचनात्। तेन आयुष्मान् भव राम ३ शर्मन् इत्येव प्रयोगः। न तु राम शर्मा३न्निति शर्मन्शब्दस्य नामानन्तर्गतत्वात्। क्षत्रियादीनामभिवादने प्रायश्चित्तमाह शातातपः—

क्षत्रं वैश्यं चाभिवाद्य प्रायश्चित्तं कथं भवेत्।
ब्राह्मणानां दशाष्टौ वा अभिवाद्य विशुध्यति॥
अभिवाद्य द्विजः शूद्रं सचैलं स्नानमाचरेत्।
ब्राह्मणानां शतं सम्यगभिवाद्य विशुध्यति॥ इति।

स्मृत्यर्थसारे—

मत्तं प्रमत्तमुन्मत्तं धावन्तमशुचिन्तरम्।
वमन्तं जृम्भमाणं च कुर्वन्तं दन्तधावनम्॥

*ज्यायानपि कनीयांसं संध्यायामभिवादयेत्।
विना शिष्यं च पुत्रं च दौहित्रं दुहितुः पतिम्॥

अथ पुनरुपनयनम्। पारिजाते शातातपः—

अभ्यक्तशिरसं स्नानं कुर्वन्तं नाभिवादयेत्।
जपयज्ञगणस्थं च समित्पुष्पकुशानलान्॥
उदपात्रार्घभिक्षान्नं वहन्तं नाभिवादयेत्।
अभिवाद्य द्विजश्चैतानहोरात्रेण शुध्यति॥
देवतामतिमां दृष्ट्वा यतिं चैव त्रिदण्डिनम्।
नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति॥

भट्टोजी—

सर्वेऽपि वा नमस्कार्याः सर्वावस्थासु सर्वदा।

विष्णुः—

सभासु चैव सर्वासु यज्ञे राजगृहेषु च।
नमस्कारं प्रकुर्वीत ब्राह्मणान्नाभिवादयेत्॥

एतेन नमस्काराभिवादनयोर्भेद उक्तः। शातातपः—

उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भघातिनीम्।
अभिवाद्य द्विजो मोहादहोरात्रेण शुध्यति॥

मनुः—

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः॥

'ज्यायांसमभिवादयेत्'इति स्मृतेरपवादमाह—*ज्यायानपीति। तेन कनीयांसः पितृव्यादयः संबन्धिनः अन्नदाः केवलं प्रत्युत्थेया एव नाभिवाद्या इत्यर्थः।

लशुनं *गृञ्जनं जग्ध्वा पलाण्डुं च त
उष्ट्रमानुषकेभाश्वरासभीक्षीरभोजन
उपायनं पुनः कुर्यात्तसकृच्छ्रं चरेन्मुह

हेमाद्रौ वृद्धमनुः—

जीवन्यदि समागच्छेद् घृतकुम्भे नि
उद्धृत्य स्नापयित्वाऽस्य जातकर्मादि

तत्रैव पाद्मे—

प्रेतशय्याप्रतिग्राही पुनः संस्कारमर्ह

चन्द्रिकायां बौधायनः—

*सिन्धुसौवीरसौराष्ट्रांस्तथा प्रत्यन्त
अङ्गवङ्गकलिङ्गान्ध्रान् गत्वा संस्कारम

हेमाद्रौ प्रायश्चित्तकाण्डे वृद्धगौतमः—

खरमुष्ट्रं च महिषमनड्वाहमजं तथा
वस्तमारुह्य मुखजः क्रोशे चान्द्रं वि

---

*गृञ्जनं लशुनानुकारी कन्दभेदः, पलाण्डुव
ञ्जनं पत्रविशेषः यदीयं चूर्णं गायकाः कण्ठशु
'तमाखु' इति प्रसिद्धामित्यादि अग्रे विस्तरः। अत्र
नरूपनयनं, क्वचित्तु जातकर्मादिसहितं तत्। त
विनर्त्तुना वसन्तेन पापांशकगते अनध्याये चो
शाजलस्पर्शात् अपराह्णे चोपनीतः। *सिन्धुसौ

सौराष्ट्रसिन्धुसौवीरानावन्त्यं दक्षिणापथ
एतान्देशान् द्विजो गत्वा पुनःसंस्कारमर्ह

अत्र तीर्थयात्रार्थं गमने तु न दोषः—

अङ्गवङ्गकलिङ्गांश्च सौराष्ट्रान्मगधांस्तथा।
तीर्थयात्रां विना गच्छन् पुनःसंस्कारमर्ह

मार्कण्डेयः—

खरमारुह्य विप्रस्तु योजनं यदि गच्छति।
तप्तकृच्छ्रत्रयं प्रोक्तं शरीरस्य विशोधनम्॥
पुनर्जन्म प्रकुर्वीत घृतगर्भविधानतः॥

मदनरत्ने मिताक्षरायां च स्नानमात्रमुक्तम्। मनुः—

*अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च।
पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातयः॥

मिताक्षरायां पराशरः—

यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः।
अनाशकानिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति॥

इति श्लोकगौतमात्। यद्यप्येषु प्रायश्चित्तं नोक्तं तथापि कृच्छ्रं कृच्छ्रार्द्धं वा कार्यं 'चीर्णान्ति' इति अग्रिमवाक्यात्। 'लशुनं गृञ्जनं जग्ध्वा' शुनमिति पाठे जग्ध्वा इत्यत्रान्वयः, शुनः इति पाठे क्षीरभोजनादित्यत्र। एषु तप्तकृच्छ्रमत्रैवोक्तम्। *अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टं न तु सुरामिश्रम्। अत्र स्मृत्युक्तं मलभक्षणादेः सुरासंसृष्टभक्षणादेश्च प्रायश्चित्तं कार्यम्। मिताक्षरायाम्—

अज्ञानात्तु सुरां पीत्वा रेतो विण्मूत्रमेव च।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः॥

अत्रापि स्मृत्युक्तं रेतोभक्षणादिप्रायश्चित्तम्। पैठीनसिः—अविखरोष्ट्रमानुषीक्षीरप्राशने तप्तकृच्छ्रं पुनरुपनयनं च कुर्यात्। विष्णुः—विड्वराहग्रामकुक्कुटनरगोमांसभक्षणेषु द्विजातीनां प्रायश्चित्तान्ते पुनःसंस्कारं कुर्यात्। प्रजापतिः—

मांसं भुक्त्वा ब्रह्मचारी पुनःसंस्कारमर्हति।

अत्र स्मृत्युक्तं मांसभोजनप्रायश्चित्तं कुर्यात्। संवर्त्तः—

ब्रह्मचारी तु योऽश्नीयान्मधु मांसं कथंचन।

स चरेत्तीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च ।
जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात् ॥

बौधायनसूत्रे—अथोपनीतस्य व्रतानि भवन्ति—नान्यस्योच्छिष्टं भुञ्जीतान्यत्र पितृज्येष्ठाभ्यां, न स्त्रिया सह भुञ्जीत, मधुमांसश्राद्धसूतकान्नानि, दशाहसन्धिनीक्षीरं, छत्राकनिर्यासौ,विलापनं, गणान्नं,गणिकान्नमिति। एतेषु पुनःसंस्कारः । प्रतिषिद्धदेशगमनमित्येके । अथाप्युदाहरन्ति—

सुराष्ट्रसिन्धुसौवीरमवन्तीं दक्षिणापथम् ।
एतानि ब्राह्मणो गत्वा पुनःसंस्कारमर्हति ॥

अथ पुनःसंस्कारं व्याख्यास्यामो देवयजनप्रभृत्याग्निमुखात्कृत्वा पालाशीं समिधमाज्येनाङ्क्त्वाऽभ्याधाय

प्राजापत्यं च कृत्वाऽसौ मौञ्जीहोमेन शुध्यति ॥

मधु क्षौद्रं, मौञ्जीहोमः पुनरुपनयनं मांसासाहचर्यात्। कौर्मे—

चण्डालान्नं द्विजो भुक्त्वा सम्यक् चान्द्रायणं चरेत् ।
बुद्धिपूर्वं तु कृच्छ्रार्द्धं पुनःसंस्कारमेव च ॥

हेमाद्रिः—एकादशाहे चान्द्रं पुनःसंस्कारश्चेति । देवलः—

ब्रह्मचारी न कुर्वीत शववाहादिकाः क्रियाः ।
यदि कुर्याच्चरेत्कृच्छ्रं पुनःसंस्कारमेव च ॥

एतत्पित्रादिभिन्नविषयम् । "प्रेतशय्याप्रतिग्राही" अत्र शय्याग्रहणं घोरप्रतिग्रहोपलक्षणम्। एवमादिषु तत्तद्विहितप्रायश्चित्तं कृत्वा केवलं पुनरुपनयनं कुर्यात् । द्वितीयं तावत् 'खरमुष्ट्रं च माहिषम्' 'खरमारुह्य विप्रस्तु' 'यः प्रस्रवसितो विप्रः'। वासिष्ठः—

संन्यस्य दुर्मतिः काश्चित्प्रत्यापत्तिं व्रजेद्यदि ।
स कुर्यात्कृच्छ्रमश्रान्तः षण्मासात्प्रत्यनन्तरम् ॥

वाचयति–पुनस्त्वादित्या रुद्रा वसवः० कामाः स्वाहा इति।अथ व्रात्यप्रायश्चित्ते जुहोति यन्म आत्मनो मिन्दाभूत०पुनरग्निश्चक्षुरदादिति द्राभ्यामथ पक्वाज्जुहोति–सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त०घृतेन स्वाहा इति। अथाज्याहुतीरुपजुहोति–येन देवाः पवित्रेण०इति तिसृभिरनुच्छन्दसं स्विष्टकृत्प्रभृति सिद्धमाधेनुवरदानादथापरमा परिदानात्कृत्वा पालाशीं समिधमाधायाथ व्रात्यप्रायश्चित्ते जुहोत्यथ व्याहृतीर्जुहोति। अथापरो ब्राह्मणवचनादेव सावित्र्या शतकृत्वो घृतमभिमन्त्र्य प्राश्य कृतप्रायश्चित्तो भवति। गुरोर्वाप्युच्छिष्टं भुञ्जीत। अथाप्युदाहरन्ति वपनं दक्षिणादानं मेखलादण्डाजिनभैक्षचर्याव्रतानि च निवर्तन्ते पुनःसंस्कारकर्मणि इति।

आश्वलायनगृह्येपि–अथोपेतपूर्वस्य इत्यादिना पुनःसंस्कार उक्तः। तथा पित्रादिव्यतिरेकेण ब्रह्मचारिणः प्रेतकर्मकरणे पुनरुपनयनमित्यपरार्कादयः। त्रिस्थलीसेतौ–

कर्मनाशाजलस्पर्शात्करतोयाविलङ्घनात्।
गण्डकीबाहुतरणात्पुनःसंस्कारमर्हति॥

गौडास्तु—

करतायाजलस्पर्शात्कर्मनाशाविलङ्घनात्।

इति पठन्ति। तन्न, दानधर्मेषु करतोयास्नाने प्राशस्त्योक्तेः।

करतोये सदानीरे सरिच्छ्रेष्ठेऽतिविश्रुते।
आप्लावयति पौराणां पापं हरकरोद्भवे॥

इति स्मृतिदर्पणचन्द्रकालिखितस्नानमन्त्राच्च। पराशरः—

अजिनं मेखला दण्डो भैक्षचर्या व्रतानि च।
निवर्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि॥

हरदत्तस्तु-य एकं वेदमधीत्यान्यं वेदमध्येतुमिच्छति तस्य पुनरुपनयनम्, तेन प्रतिवेदमुपनयनं कर्तव्यम् इत्याह। अन्ये नैतन्मन्यन्ते। *"सर्वेभ्यो वै वेदेभ्यः सावित्र्यनूच्यते" इत्यापस्तम्बोक्तेः। ताद्विधिः कारिकायाम्-

*वेदान्तरमधीत्यैव ऋग्वेदं ये त्वधीयते।

अत्र षाण्मासिकं विप्रस्य, चांद्रायणत्रयं क्षत्रियस्य, कृच्छ्रत्रयं वैश्यस्येति विज्ञानेश्वरः। देशान्तरगतस्यौर्ध्वदेहिककरणानन्तरं पुनरागमने जीवन्-यदि समागच्छेत्। एवमादिषु उक्तप्रायश्चित्तानन्तरं जातकर्मादिकं कृत्वा पुनरुपनयनं कुर्यात् इति प्रघट्टकार्थः। *सर्वेभ्य इति—

त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्।
तादित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः॥

इति स्मृतेश्च। तथाचोपनयने सावित्र्या अनुवचने सर्वे वेद अनूक्ता भवन्तीत्यर्थः। अथर्वणवेदाध्ययनार्थं तु पृथगुपनयनं कार्यं, नान्यत्र 'संस्कृतोभृग्वङ्गिरसमधीयीत' इति श्रुतेः। भृग्वङ्गिरसम् आथर्वणम्। *वेदान्तरामिति। तथा च शौनकः—

यो वेदान्तरमध्यैत तत्सूत्रविधिना ततः।
कृतोपनयनोऽधीत्य तं वेदं सकलं द्विजः॥
द्वितीयमिममृग्वेदमध्येतुमभिवाञ्छया।
एतद्गृह्योक्तविधिना पुनरप्युपनीयते॥
केशानां वपनं तत्र न क्रियेत क्रियेत वा।
मेधाजननकर्मापि विज्ञेयं च कृताकृतम्॥
कर्तव्यपक्षाश्रयणे मेधाजननकर्मणः।
ब्रह्मौदनस्य होमस्य त्रिरात्रादिव्रतं तथा॥
कस्य ब्रह्मादिमन्त्रेण परिदानं च नेष्यते।

उपनीतिरियं तेषामलंकरणवर्जिता ॥
*यद्वैतदुपनीतस्य प्रायश्चित्तं यदा भवेत्।
कृताकृतं च वपनं मेधाजननमेव च ॥

तत्रोदगयनादिश्च कालो नापेक्ष्यते। तत्र तु—

तत्सवितुर्वृणीमहे वयमित्येवमादिका।
ऋक् सावित्री परिग्राह्या यद्यदन्यत्समीरितम् ॥
अन्योपनयने तत्तदलंकारविवर्जितम्।
इहापि सर्वं कुर्वीत उपनीतं पुनर्भवेत् ॥ इति।

वसिष्ठः—

एकवेदस्य शाखानां मध्ये योऽन्यां समाश्रयेत्।
स्वशाखां संपरित्यज्य शाखारण्डः स उच्यते ॥
अधीत्य शाखामात्मीयां परशाखां ततः पठेत्।

इति शाखारण्डस्य पुनरुपनयनमित्यर्थः।

*यद्वेति। पुनरुपनयनात्मकप्रायश्चित्तं स्मृत्युक्तप्रायश्चित्तं कृत्वैव कार्यम्। "चीर्णान्ते प्राच्यामुदीच्यां वा दिशि गत्वा ग्राम्यपशूनां शब्दो न श्रूयते तस्मिन् देशेऽग्निं प्रज्वाल्य ब्रह्मासनमास्तीर्य प्राक्प्रणीतेन विधिना पुनः संस्कारमर्हति" इति।

अथाश्वलायनानां पुनरुपनयनप्रयोगः—विष्ट्यादिरहिते काले पूर्वाण्हे प्राचीमुदीचीं वा दिशं गत्वा यत्र ग्राम्यपशूनां शब्दो न श्रूयते तस्मिन्देशे कर्त्ता प्राङ्मुखः ममामुकदेशगमनसूचितैनोनिबर्हणार्थं पुररुपनयनं करिष्ये इति संकल्प्य गणेशपूजनाद्याचार्यवरणान्तं कुर्यात्। तत आचार्योऽस्य पुनरुपनयनं करिष्ये इति संकल्प्य पुनरुपनयनं कर्त्तुं स्थण्डिलादि करिष्ये इति संकल्प्याग्निप्रतिष्ठापनान्तं कृत्वा देवतापरिग्रहार्थमन्वाधानं करिष्ये इति संकल्प्यास्मिन्नन्वाहितेऽग्नावित्यादि आज्यभागवर्जमुक्त्वा अत्र प्रधानं त्रिरग्निं पवमानं प्रजापतिं चाज्येन शेषेणेत्यादि आज्यसंस्कारान्तं

मेधाजननसङ्गावे व्रतचर्या भवेदिह ।
अनुप्रवचनीयश्च तदभावे ह्ययं न हि ॥
*परिदानं न कार्यं स्यान्निमित्तानन्तरं त्विदम् ।
*पूर्वस्या वाचयेत्स्थाने तत्सवितुर्वृणीमहे ॥ इति ।

कुर्यात् । ततः पञ्चाशता कुशैर्निर्मिते आसने संस्कार्यमुपवेश्य समन्त्रं वासः परिधाप्यापरं प्रावारयेत् । नात्राजिनम् । ततः समन्त्रं यज्ञोपवीतं धारयित्वा तीर्थप्रवेशेनोत्तरं भागं गमयित्वा तत्र विधिवदाचमय्य पुनः स्वस्थानं नीत्वा बर्हिरास्तरणादि आज्यभागवर्जम् 'अग्न आयूंषि'इति तिसृभिः "प्रजापते न त्वदू" इत्ययनया च हुत्वा उत्तरभागे उपनयनवदवक्षारणं कृत्वादित्यमीक्षयेत् । 'कस्य ब्रह्मचार्यसि' इति तु न भवति "मेधाजननं चानिरुक्तं परिदानं कालश्च" इत्याश्वलायनोक्तेः । ततो 'युवा सुवासा' इत्यर्द्धर्चेन संस्कार्यं प्रदक्षिणमावर्त्योत्तरेण तस्यांसयोः पाणी गमयित्वा एनं दक्षिणं भागं निनयेत् । ततः संस्कार्योऽग्निकार्यमुपनयनवत्कुर्यात् । ततोऽग्नेः पश्चिमतः प्रत्यङ्मुख आचार्यपादावुपसंगृह्याधीहि भोः सावित्रीं भो अनुब्रूहीति वदेत् । आचार्यः तत्सवितुरित्यस्य श्यावाश्वः सवितानुष्टुप् पुनरुपनयने विनियोगः । प्रथमं स्वयं पादश उक्त्वा वाचयेत् । ततोऽर्धर्चशः, ततः सर्वाम् । अनन्तरं 'मम व्रते' इत्यनेन संस्कार्य हृदये ऊर्ध्वाङ्गुलिं पाणिं निधाय स्विष्टकृदादिहोमशेषं समापयेत् । संस्कार्य आचार्याय गोनिष्क्रयं दत्त्वा व्यवरान्ब्राह्मणान् भोजयेत् । नात्र मेखलादण्डभिक्षाः "अजिनं मेखलादण्डः" इत्युक्तवचनात् । अत्र स्वस्तिवाचनादिकं न कार्यं प्रायश्चित्तार्थमेतद्विधानात् । दृष्टश्च प्रायश्चित्तान्तरे नान्दीश्राद्धाद्यभावः । *परिदानं कस्य ब्रह्मचार्यसीत्यादेः परिददामीत्यन्तमन्त्रस्योच्चारणम् । *पूर्वस्या इति । पुनरुपनयन एव गायत्रीस्थान एषऋक् भवति, न तु तदनन्तरभाविषु सन्ध्याब्रह्मयज्ञादिषु पूर्वविहि

यत्तु हारीतः–द्विविधाः स्त्रियः ब्रह्मवादिन्यः सद्योवध्वश्च । तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे च भैक्ष्यचर्या इति, 'सद्योवधूनामुपनयनं कृत्वा विवाहः कार्यः'–इति, तद् युगान्तरविषयम् ।

पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते ।
अध्यापनं च वेदानां सावित्रीवाचनं तथा ॥

इति यमोक्तेः ।

अथानध्यायाः । पारिजाते (१)बृहस्पतिः—

प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः ।
इज्योऽनध्याय एष्वशक्तौ नाधीयीत कदाचन ॥

नारदः—

अयने विषुवे चैव शयने बोधने हरेः ।
अनध्यायस्तु कर्तव्यो मन्वादिषु युगादिषु ॥

निर्णयामृते—

चातुर्मास्यद्वितीयासु मन्वादिषु युगादिषु ।
अनध्यायस्तु कर्तव्यो या च सोपपदा तिथिः ॥

गर्गः—

शुचावूर्जे तपस्ये च या द्वितीया विधुक्षये ।
चातुर्मास्यद्वितीयास्ताः प्रवदन्ति मनीषिणः ॥

तगायत्रीबाधे मानाभावात् । केचित्तु स्त्रीणां कर्मनाशा जलस्पर्शादौ उपनयनाभावे न पापकल्पनाया असंम्भवात् न पुनरुपनयनस्थानिकप्रायश्चित्तकल्पना सम्भवतीत्याहुः । अन्येतु उपनयनस्थानिकविवाहसत्त्वाद्धिरण्यगर्भदानवत्पुनर्विवाहः कार्यः । विवाहासम्भवेतु संस्कारकारणीभूतविवाहमन्त्रपाठमात्रं कार्यमित्याहुः । वस्तुतस्तत्रानादिष्टप्रायश्चित्तं कार्यम् ।

---

(१) 'हारीतः' क०

स्मृत्यर्थसारेऽपि-'आषाढीकार्तिकीफाल्गुनीसमीपस्थद्वि(१)तीयासु च' इति । मनुः—

उपाकर्मणि चोत्सर्गे त्रि(२)रात्रं क्षपणं स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥ इति ।

उत्सर्गे तु-*'मनूक्तपक्षिण्यहोरात्राभ्यां त्र्यहस्य विकल्पः' इति विज्ञानेश्वरः ।*अष्टकाशब्देन सप्तम्यादि त्रयं ज्ञेयम् । 'तिस्रोऽष्टकास्त्रिरात्रम*न्त्यामेके'(३) (इति गौतमोक्तेः । 'ऋत्वन्तास्विति सौरऋत्वन्तासु, चाद्रान्तस्य पर्वत्वेनैव निषेधसिद्धेः') इति सर्वज्ञनारायणः । एते नित्याः ।

'प्राणयामशतं कृत्वा सर्वपापापनुत्तये ।
उपपातकजातानामनादिष्टस्य चैव हि ॥'

इति योगीश्वरवचनादिति । शुचिः आषाढः, ऊर्जः कार्तिकः, तपस्यः फाल्गुनः, एता द्वितीयाश्चतुर्षु चतुर्मासेषु भवन्तीति (४)चातुर्मास्य द्वितीया इत्युच्यन्ते ।

*मनूक्तेति ।

'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।
विरमेत् पक्षिणीं रात्रीं यद्वाप्येकमहर्निशम्' ॥ इति ।

मनुः—

'उत्सर्गे प्रथमेऽध्याये त्वनध्यायस्त्र्यहं भवेत् ।
धारणाध्ययनादौ तु पक्षिणी दिनमेव वा ॥'

इति तु कालादर्शः । नन्वष्टकापदं व्यर्थमष्टमीत्वादित्यत्राह-*अष्टकेति । त्रिरात्रशब्देन पूर्वोत्तरदिनलाभः । अष्टकास्विति बहुत्वात्सर्वा ग्राह्याः । *अन्त्यामिति । अन्त्यामपीत्यर्थः । नाधी-

---

(१) 'द्वितीया च' क० (२) 'त्रिरात्रलक्षणं' क०
(३) कंसान्तर्गतं नास्ति क०
(४) 'चातुर्मास्यद्वितीया' क० ख० ।

नैमित्तिकानप्याह याज्ञवल्क्यः—

त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु ।
*उपाकर्मणि चोत्सर्गे*स्वशाखाश्रोत्रिये तथा ॥
सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने ।
*समाप्य वेदं*त्र्यहमारण्यकमधीत्य च ॥
पञ्चदश्यां चतुर्दश्यामष्टम्यां*राहुसूतके ।
ऋतुसंधिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च ॥
पशुमण्डूकनकुलश्वाहिमार्जारमूषकैः ।
कृतेऽन्तरे त्वहोरात्रं*शक्रपाते तथोच्छ्रये ॥

यीतेति शेषः 'एकस्यामेव' इति सूत्रात् । *उपाकर्मणि चेति । मनूक्तत्र्यहेण विकल्पः । गौतमः—'प्राधीतस्य निशायां चतुर्मुहूर्त्तम्' इति । उपाकृत्याध्येतुं प्रवृत्तः प्राधीतः । आदिकर्मणि क्तः । तस्य प्रदोषऽष्टघटीरनध्यायः 'मासं प्रदोषे नाधीयीत' इत्युक्तेः । *स्वशाखेति । प्रेते इति विपरिणतं वर्त्तते । संध्या गर्जितेति च्छेदः । विशेषोग्रोनिर्घातः आकाशे उत्पातध्वनिः । *समाप्येति ।

'समाप्य वेदं त्रिदिनं (न)वेदाध्ययनं भवेत् ।'

इति विश्वामित्रोक्तत्रिदिनेन विकल्पः । *त्र्यहम् अहोरात्रम् । *राहुसूतके ग्रहणे । अत्र त्र्यहमिति प्रकृते पुनरहोरात्रग्रहणं संध्यागर्जितनिर्घातभूकम्पोल्कापतनेषु अनध्यायस्याऽऽ(१)कालिकत्वार्थम् । *शक्रपाते शक्रध्वजस्यावरोपणदिने तस्योच्छ्रयदिने च । तत्पातकाल आग्नेये ।

मासि भाद्रपदे राजन् शक्रयष्टिनिपातनम् ।
पौर्णमास्यां तु कर्त्तव्यम् ॥

इति शङ्खः । शक्रध्वजपतने त्रिरात्रम् । तदुच्छ्रयदिनमाह गार्ग्यः—

द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदे तथा ।

---

(१) तावन्मात्रकालपर्यन्तमित्यर्थः ।

ग्रहणे द्युनिशोक्तावपि ग्रस्तास्ते*त्र्यहमित्युक्तं प्रा
क्। स्मृत्यर्थसारे तु-'रात्रौ तु(१)*ग्रहे तिस्रो रात्रीः,दिव
च त्र्यहम्' इत्युक्तम्। ऋतुः सौरः। सुक्तत्वेत्युत्सवविष
यम् 'ऊर्ध्वं भोजनादु*त्सवे' इति गौतमोक्तेः। *श्राद्धि
महैकोद्दिष्टभिन्नम्। तत्र तु त्र्यहमिति मनुः। स्मृत्यर्थ
सारे चैवम्। यत्तु-*'पङ्क्त्यवान्तराये त्र्यहमुपवासो वि
प्रवासश्च' इति गौतमोक्तं, तत् प्रथमाध्ययने।

शक्रमुत्थापयेद्राजा विश्वश्रवणवासवैः॥
विश्वमुत्तराषाढा, वासवं धनिष्ठा। *त्र्यहमिति।
त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके।
इति मनूक्तेः।

राजा चन्द्रः, चकारात्सूर्यः। सूतकं बहुच्छायाभिभवः,
तु राज्ञः सूतकं मरणं, लक्षणापत्तेः। तत्र सज्योतिरनाध्यायः '
ज्योतिः प्रेते विषयस्थे राजनि' इति गौतमोक्तेः। अहोरात्रं व
अहोरात्रानुवृत्तौ 'सब्रह्मचारिणि प्रेते भूमिपतावपि' इति गोभि
लोक्तेः। इदं च ग्रस्तास्ते। खण्डग्रहे तु द्युनिशम्, आकालि
कमित्यर्थः। *ग्रहे सम्पूर्णग्रहे। दिनं नान्तरीयकम्। एवमग्रे र
त्रिर्नान्तरीयका बोध्या। 'सम्पूर्णग्रहे त्रिरात्रं, खण्डग्रहे आकालिक
इति मयूखः। *उत्सवे विवाहोपनयनादौ। अत्र प्राधीतस्ये
वाक्यशेषात् प्रथमाध्ययनेऽनुत्सवेऽपि भोजनोत्तरमनध्यायः
*श्राद्धिकं पार्वणश्राद्धसम्बन्धि महत्पदं संपातायातम्।

प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम्।
त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके॥
इति एकोद्दिष्टस्य मनूक्तेः। नवश्राद्धेऽन्नजरणपर्यन्तमनध्य
इति कोचित्। एकोद्दिष्टपदेन नवश्राद्धमपि ग्राह्यमित्यन्ये।*पङ्क्त

(१) 'ग्रहणे तिस्रो' ख०

याज्ञवल्क्यः—

श्वक्रोष्टृगर्दभोलूक*सामबाणार्तनिःस्वने।
अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके॥
देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे।
*भुक्त्वार्द्रपाणिर*म्भोन्तरर्धरात्रे*ऽतिमारुते॥
पांसुप्रवर्षे *दिग्दाहे* सन्ध्यानीहारभीतिषु।

दीति। त्र्यहम् अनध्याय इति प्रकृतम्। श्वादीनां सप्तानां निःस्वनेऽन्वयः। *सामेति। सामवेदपठनकाले वेदान्तरानध्यायः।

सामध्वनावृग्यजुषी नाधीयीत कदाचन।

इति वचनात्,

ऋग्वेदो देवदेवत्यो यजुर्वेदस्तु मानुषः।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः॥

इति निन्दार्थवादाच्च। आपस्तम्बः—'शाखान्तरध्वनौ साम्नामनध्यायः' इति। अमेध्यादिसप्तानामन्तिके इत्यनेनान्वयः। पतितेत्युपलक्षणं "पतितचण्डालशवसूतिकाश्रावणे त्रिरात्रं वाग्यता आसीरन्" इति वासिष्ठेन प्रायश्चित्तास्नानात्। अशुचौ देशेऽशुचावात्मनि च। *भुक्त्वार्द्रपाणिरित्येकम्। *अम्भोन्तः जलमध्ये। *अतिमारुते विशेषमाह गौतमः—'नाधीयीत वायौ पांसुहरे कणसाविणि नक्तम्' इति। *दिग्दाहे अग्न्युत्पाते तु आपस्तम्बः—'उल्कायामग्न्युत्पाते सर्वासां विद्यानामाकालिकोऽनध्यायः'। अग्न्युत्पातश्च समानप्रायभावः। *सन्ध्येति। बौधायनः—

प्रातः सन्ध्या त्रिनाडी स्यात्सायंसन्ध्या तथाविधा।
सायंप्रातःसन्ध्ययोश्च नाधीयीत कदाचन॥

*पूतिगन्धे मनुः—

नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च।
धर्मनैपुणकामानां पूतिगन्धे च सर्वतः॥

धावतः *पूतिगन्धे च*शिष्टे च गृहमागते ॥
खरोष्ट्रयानहस्त्यश्ववनौवृक्षगिरिरोहणे ।
सप्तत्रिंशदनध्यायानेतांस्ता*त्कालिकान्विदुः ॥

बाणो वंशः । *शततन्तुर्वीणेति हरदत्तः । अमेध्याः सूतिकादयः । स्तनितं गर्जः ।*वर्षातोऽन्यत्र गर्ज-

---

नैपुणं पूर्णता । वसिष्ठः-'नगरेषु कामं गोमयपर्युक्षिते परिलिखिते वा' इति । तेन पूतिगन्धहानेर्नानध्याय इत्यर्थः । *शिष्टे चेति । शिष्टाज्ञायां तु नानध्यायः ।

स्वागतं चातिथिं दृष्ट्वा नाधीयीतैव बुद्धिमान् ।
अप्यनुज्ञापिते तस्मिन्नध्येतव्यं प्रयत्नतः ॥

इति यमोक्तेः । खराद्यष्टानां रोहणेऽन्वयः । यानं रथादि, खरोष्ट्राभ्यां युक्तं यानं शकटादीत्यन्ये । ईरिणमूखरं मरुभूमिर्वा । *तात्कालिकान् निमित्तसमकालिकान् । वीणेति पठतां मतमाह-*शतेति । एतच्च नृत्यगीतवादित्राद्युपलक्षणं "नृत्यगीतवादित्ररुदितशब्देषु तावत्कालम्" इति बौधायनात् । "बाणभेरीमृदंग (१)गर्दाभ्रशब्देषु" इति गौतमात् । गर्दः शकटः । गर्तेति पाठे रथः । "आरोहथोवरुणमित्रगर्त्तम्" इति श्रुतेः 'गर्त्तो हि रथ उच्यते' इति यास्कात् । *वर्षात इति । मनुः—

विद्युत्स्तनितगर्जेषु महोल्कानां च संप्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥ इति ।

अनध्यायहेतुर्यत्र काले जातः परेद्युस्तत्पर्यन्तकाल आकालः, तत्र भव आकालिकः विद्युदादित्रयसाहित्यं विवक्षितं द्वन्द्वनिर्देशात् । विद्युदादीनां निमित्तत्वं सन्ध्यायामेव ।

एतांस्त्वभ्युदितान्विद्याद्यदा प्रादुष्कृताग्निषु ।
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ॥

---

(१) 'गर्ताभ्र' ख०

वृष्टिविद्युतां यौगपद्ये आकालिकः वर्षासु तात्कालिक इति*नारायणः । (१ऐतरयोपनिषदि अपर्त्तौ वर्षे त्रिरात्रमिति मृगादिज्येष्ठान्तं वर्षर्तुः तं विना वर्षादौ त्रिरात्रमनध्याय इति वेदभाष्ये उक्तम् ।) संध्यागर्जे तु हारीतः *सायंसंध्यास्तनिते रात्रिः, प्रातःसंध्यास्तनितेऽहोरात्रं, रात्रौ विद्युत्यप(२)रराज्यवधिः, 'विद्युति नक्तं चापररात्रात्' इति गौतमोक्तेः । 'तृतीयदिनांशोत्तरं तु विद्युति सर्वरात्रम्' इत्याह स एव । त्रिभागादिप्रवृत्तौ सर्वमिति, अर्धरात्रे *मध्यया(३)मद्वयमिति विज्ञाने-

इति मनूक्तेः । अभ्रदर्शनेऽपि प्रादुष्कृताद्यन्वयः । अवृतौ प्रावृड्भिन्नर्त्तौ । *नारायण इति । वस्तुतस्तु 'अयमाकालिको वर्षासु । वर्षातोऽन्यत्र तु ऽयहम् "विद्युत्स्तनयित्नुवृष्टिषु अपर्त्तौ ऽयहम्" इति आपस्तम्बोक्तेः । स्तनयित्नुः तद्गर्जितम् । अपर्त्तुमाह गार्ग्यः—

अनूराधर्क्षमारभ्य षोडशर्क्षेषु भास्करः ।
यावत्प्रवर्त्तते तावदकालं मुनयो विदुः ॥ इति ।

एवं चार्द्रादिविशाखान्तः कालः । एतेन माघादिषु वृष्टेर्नियतत्वान्नासावपर्त्तुरिति प्रत्युक्तम् । *सायमिति । यत्तु मनुः—

प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने ।
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा ॥ इति ।

तत्रायमर्थः—विद्युत्स्तनितवर्षाणि प्रक्रान्तानि, तत्र विद्युत्स्तनितनिःस्वने अग्निषु प्रादुष्कृतेषु सत्सु सायंसन्ध्यायां जातेसज्योतिः रात्रावनध्यायः, शेषे वर्षे सायं जाते यथा दिवा तथा रात्रौ, अहोरात्रमित्यर्थः । एतत्सर्वं वर्षास्वेव । 'यदा वर्षासु विद्युत्स्तनितं वा तदा सज्योतिः' इति पैठीनस्युक्तेः । अपर्त्तौ ऽयहमुक्तं

(१) कंसान्तर्गतं नास्ति ख० (२) 'पररात्रावधिः' क० (३) 'यामद्वयं' क०

श्वरः। *मध्यदण्डचतुष्टय इति निर्णयामृते। मनुः—

न विवादे न कलहे न सेनायां न सङ्गरे।
न*भुक्तमात्रे ना*जीर्णे न*वमित्वा न*सूतके॥
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते॥

कौर्मे—

श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च।
कदाचिदपि नाध्येयं कोविदारकपित्थयोः॥

प्राक्। *मध्येति।

महानिशा तु विज्ञेया मध्यं मध्यमयामयोः।
तस्यां स्नानं न कुर्वीत स्वाध्यायं पितृतर्पणम्॥

इति स्मृतेः। दक्षः—

प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत्।
यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते॥

(१)*मध्येति।

महानिशा तु विज्ञेया चतस्रो घटिकास्तथा।

इति वचनात्। अत्र दोषाधिक्यं कल्प्यम्। *भुक्तमात्रे भुक्त्वार्द्रपाणिरित्येतत्समानार्थम्। *अजीर्णे जरणोचितकालेऽपि अन्नस्याजरणे। *वमित्वेति। गौतमः—"संकलोपाहितवेदसमाप्तिछर्दिश्राद्धमनुष्ययज्ञभोजनेषु अहोरात्रम्" इति। संकलोपाहितोऽग्न्युत्पातः। छर्दौ विशेषमाहापस्तम्बः—"छर्दयित्वा स्वप्नान्ते घृतं वा प्राश्य" अधीयीतेत्यर्थः। स्वप्नान्तमोदयादनध्यायः। *सूतके 'मुक्तके' इति पाठे अम्लोद्गारे इत्यर्थः। हेमाद्रौ—

सर्वकुत्सितगन्धे च परिखाते सभासु च।
गोविप्ररोधने सर्वराष्ट्रेषु श्राद्धपङ्क्तिषु॥

---

(१) 'मध्यमिति' ख०

मनुः—

शयानः प्रौढपादश्च कृत्वा चैवा*व(१)सक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा*सूतकान्नाद्यमेव च ॥

प्रौढपादः*पादोपरि पाददाता आसनारूढपादो वेति हरदत्तः । सोपपदास्वपि प्राग्उक्तम् । स्मृत्यर्थसारे—श्रवणद्वादशी*महाभरण्योः प्रेतद्वितीयायां रथसप्तम्यामाकाशे शवदर्शने चाहोरात्रम् । असपिण्डे *गुरौ (२)मृते त्रिरात्रम् । आचार्ये उपाध्याये च पक्षिणी । आचार्यभार्यापुत्रशिष्येष्वहोरात्रम् । अग्न्युत्पातेन गोविप्रमृतौ त्रिरात्रम् । अयने विषुवे च पक्षिणी*अकालवृष्टौ

श्राद्धपङ्क्तिषु विहितमन्त्रभिन्नेषु वेदभागेषु इत्यर्थः । विहितमन्त्रा 'उपहूये' इत्यादयः । *आवसक्थिका वस्त्रादिना जानुनोः पृष्ठेन सह बन्धः । *सूतकेति । आप्रायश्चित्तमेतत् । *पादेति । प्रसारितपादोऽपि बोध्य इत्यर्थः । *महेति । स्मृतिचन्द्रिकायाम्—

महानवम्यां द्वादश्यां भरण्यां वा महाद्युते ।
तथाऽक्षयतृतीयायां शिष्यान्नाध्यापयेद्बुधः ॥
माघमासस्य सप्तम्यां रथाख्यायां विवर्जयेत् ॥

महच्छब्दस्य द्वादश्यादिष्वपि सम्बन्धः । महानवमी आश्विनशुक्लनवमी । महाद्वादशी कार्तिकशुक्लद्वादशी । महाभरणी प्रौष्ठपद्यनन्तरा भरणी । *गुराविति । महागुरुमृतौ द्वादशरात्रं बोध्यम् । *अकालेति । पक्षिणीति वर्तते । 'विद्युत्स्तनयित्नुवृष्टिष्वपर्त्तौ एकेन द्वाभ्यां वा आकालम्' इत्यापस्तम्बः । हेमाद्रौ—'गजगण्डसारससिंहव्याघ्रमहापापिकृतघ्नावेक्षणमन-

---

(१) 'वसक्थिका' क० (२) 'मृते' नास्ति क०

च। आरण्यमार्जारसर्पनकुलपञ्चनखादेरन्तरागमने त्रिरात्रम्। आरण्य*श्वशृगालादिवानररजकादौ द्वादशरात्रम्। खरवराहोष्ट्रचाण्डालसूतिको*दक्याशवादौ मासम्। *गोगवयाजानास्तिकादौ त्रिमासम्। *शशमेषश्वपाकादौ षण्मासम्। गजगण्डसारससिंहव्याघ्रम-(१)हापापिकृतघ्नादावब्दमनध्यायः। शोभन*दिने चान-

---

ध्यायः'। एतेषां यावदवेक्षणं तावदनध्याय इत्यर्थः। प्रचेताः-'चतुष्पथमहापथराजोद्यानेषु नाधीयीत'। शङ्खः—

नाधीयीताभियुक्तोऽपि यानगो न च गोगतः।
देवायतनवल्मीकश्मशानवनसन्निधौ॥

गौतमः-'ग्रामान्तमहापथाशौचेष्वनध्यायः'। स्मृत्यर्थसारे-'काकोलूकमूषककुक्कुटमण्डूकादेरन्तरागमने दिने चेद्दिनान्तं रात्रौ चेद्रात्र्यन्तमनध्यायः।

*श्व[शृगाल]दीरिति। आदिना वनमूषकादिग्रहः। एवं रजकादावित्यादिना तत्समानधर्मचर्मकारादिग्रहः। एवमग्रेऽपि आद्यर्थो बोध्यः। अन्तरागमने इति च वाक्यपञ्चके वर्त्तते। *उदक्या आपस्तम्बस्तु'-ब्रह्माध्येष्यमाणो मलवद्वाससेच्छन्सम्भाषितुं ब्राह्मणेन सम्भाष्य तया सम्भाषेत, ब्राह्मणेनैव सम्भाष्याधीयीत' इतिब्राह्मणसम्भाषणपर्यन्तमनध्यायमाह। *गविति। अविगवयाजव्याघ्रनास्तिकादाविति पाठान्तरम्। *शशेति उपलक्षणम्।

गुर्वन्तेवासिनां चैवमध्येतॄणां च मध्यतः।
ययुः शशश्वपाकाजा नाधीयीतार्द्धवत्सरम्॥ इति।

एतच्च प्रथमारम्भेऽजगमने। व्याघ्रेऽपि प्रथमारम्भ एवाब्दम्। अन्यदा तु उभयत्रापि त्रिमासमुक्तम्। *दिनं तिथिः। अनध्याय-

---

(१) 'महापातकी' क०

ध्यायः । विवाहप्रतिष्ठोद्यापनादिष्वासन्नेषु सगोत्राणामनध्यायः ।

उदयेऽस्तमये (१)वापि मुहूर्तत्रयगामि यत् ।
तद्दिनं तदहोरात्रं चानध्यायविदो विदुः ॥
केचिदाहुः क्वचिद्देशे यावत्तद्दिननाडिकाः ।
तावदेव त्वनध्यायो न तन्मिश्रे दिनान्तरे ॥

प्रदोषं त्वाह प्रजापतिः—

*षष्ठी च द्वादशी चैव अर्धरात्रोननाडिका ।
प्रदोषे न त्वधीयीत तृतीया नवनाडिका ॥

निर्णयामृते गर्गः—

रात्रौ यामद्वयादर्वाक् सप्तमी वा त्रयोदशी ।
प्रदोषः स तु विज्ञेयः (२)सर्वविद्याविगर्हितः ॥

तिथेः प्रातः सायं वा द्विमुहूर्त्तत्वेऽपि अनध्यायः 'यद्यनध्यायतिथिर्द्विमुहूर्तोऽपि दृश्येत तमप्यनध्यायं कुर्वीत' इतिबौधायनात् । स्मृत्यन्तरे—

प्रतिपल्लेशमात्रेण कलामात्रेण चाष्टमी ।
दिनं दूषयते सर्वं सुरा गव्यघटं यथा ॥

लेशादिमत्त्वं सूर्योदयोत्तरं न तु प्राक् । दिनम् अस्तात्पूर्वमाचारात् । हेमाद्रौ—

प्रदोषेषु त्रयोदश्यां नाध्येयं प्रतिपत्सु च ।
त्रयोदश्यनध्यायं शाब्दिका मन्यन्ते । *षष्ठी चेति । व्याख्यातम् । बृहन्मनुः—

चतुर्थ्यां च त्रयोदश्यां सप्तम्यामर्द्धरात्रतः ।
अर्वाग् नाध्ययनं कुर्याद्यदीच्छेत्तस्य धारणम् ॥

---

(१) 'चापि' क० (२) 'वेदाध्ययनगर्हितः' क०

रात्रौ नवसु नाडीषु चतुर्थी यदि दृश्यते ।
प्रदोषः स तु विज्ञेयः सर्वविघ्नविगर्हितः ॥

कौर्मे-

*अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्मशास्त्रेष्वन्येषु पर्वण्येतानि वर्जयेत् ॥

शौनकः-

*नित्ये जपे च काम्ये च क्रतौ पारायणेऽपि च ।
नानध्यायोऽस्ति वेदानां ग्रहणे ग्राहणे स्मृतः ॥

इत्यनध्यायाः ॥

स्मृत्यर्थसारे—

चतुर्थ्याः पूर्वरात्रे तु नवनाडीषु दर्शने ।
नाध्येयं पूर्वरात्रे स्यात्सप्तमी च त्रयोदशी ॥
अर्द्धरात्रात्पुरा चेत्स्यान्नाध्येयं पूर्वरात्रके ।

यामद्वयादर्वागिति पाठः, यामत्रयादर्वागिति त्वशुद्धः।

*अनध्यायस्त्विति ।

चतुर्दश्यष्टमीपर्वप्रतिपद्गर्जितेषु च ।
वेदाङ्गन्यायमीमांसाधर्मशास्त्राणि चाभ्यसेत् ॥

*नित्ये इति ।

नित्ये नैमित्तिके काम्ये व्रते यज्ञे क्रतौ तथा ।
प्रवृत्ते काम्यकार्ये च नानध्यायाः स्मृतास्तथा ॥
देवतार्चनमन्त्राणां नानध्यायः कदाचन ॥

क्रतुः अहर्गणसाध्यः । ग्रहणग्राहणयोरेवानध्यायः, 'सर्वं वाक्यं सावधारणम्' इतिन्यायात । ग्रहणं गुरुमुखोच्चारणानूच्चारणं, ग्राहणं धारणम् । शौनकः—

नानध्याये जपेद्वेदान् रुद्रांश्चैव विशेषतः ।
पौरुषं पावमानं च गृहीतनियमादृते ॥

अथ महानाम्न्यादिव्रतम् ।

श्रीधरः—

तिथिनक्षत्रवारांशवर्गोदयनिरीक्षणम् ।
चौलवत्सर्वमाख्यातं सगोदानव्रतेषु च ॥

स्मृत्यर्थसारे—

चतुर्दश्यष्टमीपर्वप्रतिपत्स्वेव सर्वदा ।
दुर्मेधसामनध्यायस्त्वन्तरागमनेषु च ॥
तथा विस्मृतिशीलानां बहुवेदप्रपाठिनाम् ॥

एतेषामन्यत्र नानध्यायः । मनुः—

तपोविशेषैर्विविधैर्व्रतैश्च श्रुतिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥ इति ।

आपस्तम्बः—'ब्राह्मणेन निष्कारणो वेदः षडङ्गोऽध्येयो ज्ञेयश्च' ।

स्वशाखामपरित्यजन् परशाखां पठेत् ।

यः स्वशाखां परित्यज्य परशाखां समाश्रयेत् ।
अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति ॥

इति वचनात् । मनुः—

वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।

स्ववेदमधीत्य वेदान्तराध्ययनं कुर्यात्, शाखावचनस्येहापि-प्रवृत्तेः । व्यासः—

अनध्यायेष्वधीतं यद् यच्च शूद्रस्य सन्निधौ ।
प्रतिग्रहनिमित्तं यन्नरकार्थं तदुच्यते ॥

यमः—

योऽर्थार्थीमां द्विजे दद्यात्पठेच्चैवाविधानतः ।
अनध्याये च तं प्राहुर्वेदविप्लावकं द्विजम् ॥

ए(१)षां लोपे शौनकः—

*व्रतानि विधिना कृत्वा स्वशाखाध्ययनं चरेत् ।
अकृत्वाभ्यस्यते येन स पापी विधिघातकः ॥

नारदः—

द्यूतं पुस्तकशुश्रूषा नाटकासक्तिरेव च ।
स्त्रियस्तन्द्रा च निद्रा च विद्याविघ्नकराणि षट् ॥

पुस्तकस्य पुराणादेः शुश्रूषा श्रोतुमिच्छा । ब्रह्मचारी द्विविधः—उपकुर्वाणो नैष्ठिकश्च । आद्यः द्वादशाब्दानि पञ्च वा वेदग्रहणान्तं गुरुसन्निधौ वसेत् । नैष्ठिकस्तु देहान्तम् । तत्समये समावर्त्तनं कुर्यादित्याद्यन्यत्र विस्तरः ।

*व्रतानीति । स्मृतिः—

प्रथमं स्यान्महानाम्नी द्वितीयं स्यान्महाव्रतम् ।
तृतीयं स्यादुपनिषद्गोदानाख्यं ततः परम् ॥ इति ।

उद्द्योते—यजुर्वेदिनां प्राजापत्यैन्द्राग्नेयसौम्यानि, सामवेदिनां केशान्तगोदानमाहानाम्नीजेष्ठसामव्रतानि, अथर्वणानां गोदानसावित्रीव्रतवेदव्रतविसर्जनव्रतानि, इमानि व्रतानि त्रयोदशवर्षमारभ्य ब्राह्मणेन, एकोनविंशमारभ्य क्षत्रियेण, एकविंशमारभ्य वैश्येन कार्याणि ।

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते ।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥

इति मनुना षोडशादिवर्षस्य केशान्तकालत्वेनोक्तेः तदनुरोधेन वर्षग्रहणात् । केशान्तो गोदानम् । एषां कालातिक्रमे देवलः—

कृच्छ्रं द्वादशरात्रं (वै) चरित्वाऽऽज्याहुतीः शतम् ।
अष्टाविंशतिरष्टौ वा क्रमात्कुर्याद्व्रतानि च ॥ इति ॥

---

(१) 'एतेषां' क०

*प्रत्येकं कृच्छ्रमेकैकं चरित्वाऽऽज्याहुतीः शतम् ।
हुत्वा चैव तु गायत्र्या स्नायादित्याह शौनकः ॥

स्मृत्यर्थसारे तु–'श्रीन्षड् वा(१)दश वा कृच्छ्रान्कृत्वा पुनर्व्रतं चरेत्' इत्युक्तम् ।

अथ समावर्तनम् । सुरेश्वरः—

भौमभानुजयोर्वारे *नक्षत्रे च व्रतोदिते ।
ताराचन्द्रविशुद्धौ च स्यात्समावर्तनक्रिया ॥

बौधायनसूत्रे तु–'रोहिण्यां तिष्ये उत्तरयोः (२)फल्गुन्योर्हस्ते चित्रायामैन्द्रे वि(३)शाखायां वा स्नायात्'

एषां लोपे त्वाह–*प्रत्येकमिति । इदं तु बोध्यं–द्वादशवर्षाणि अध्ययनव्रतचर्यं विधाय यः स्नाति स विद्याव्रतोभयस्नातकः । व्रतमात्रं चेद्व्रतस्नातकः ।

गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया ।
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ॥

इति याज्ञवल्क्यात् । वरमभिलषितार्थम् । "विद्यान्ते स्नायात्" इति वचनं तु विद्यामध्ये स्नानं न कार्यमित्येतदर्थं, विद्याया अन्तमारण्यकमिति वार्थः । अत्र चोपनयनान्तानां संस्काराणामावश्यकत्वं, न स्नानादीनाम् । तेन "यमिच्छेत् तमावसेत्" "ब्रह्मचर्यादेव प्रव्रजेत्" इत्यादि सङ्गच्छते ।

*नक्षत्रे चेति । बौधायनः—'रोहिण्यां तिष्ये उत्तरयोः फल्गुन्योर्हस्ते चित्रायामैन्द्रे विशाखयोर्वा स्नायात्' इति । समावर्त्तनं च स्वयमेव कुर्यात् "समावर्त्यमानः" इति सूत्रात् । एवं च वृद्धिश्राद्धमपि स्वयमेव कुर्यात् ,

कुर्वीत स्वयमेवेदं कर्माचार्यानपेक्षकः ।

---

(१) 'दश' क०
(२) 'फाल्गुन्योर्हे' ख० (३) 'विशाखयोर्वा' ख०

इत्युक्तम्। वसिष्ठः—

स्नानं मध्याह्नकाले तु होरायां कारयेच
पूर्वाह्णे तदभावे तु कुर्यात्स्नानं यथाद्
'सर्वऋतवो विवाहस्य' इति सूत्रात् यद
विवाहस्तदा समावर्तनमपि तत्रैव । उ
समावर्तने 'अनाश्रमी न तिष्ठेत' इति वि
स्युक्तं सुदर्शनभाष्ये । *एतच्च ब्रह्मचारि
श्चित्तं कृत्वा कार्यम्। तदाह—बौधायनः—'
(१)भंभिच्चाग्निकार्यराहित्यकौपीनोपवीत(२
जिनाधारणदिवास्वापच्छत्रपादुकास्त्रिवधा
नुलेपनाञ्जनद्यूतनृत्यगीतवाद्याभिरतौ ब्रह्मच
चरेत्, महा(३)व्याहृतिहोमं च कुर्यात्। स
पूर्वमृतानां त्रिरात्रमाशौचं कार्यम्।

विधायाऽभ्युदयश्राद्धं पूर्वेद्युरपरेऽहनि ॥

इति शौनकोक्तेः। हाराबल्यां तु विवाह
स्कारत्वान्नान्दीश्राद्धं पितैव कुर्यात्, तदभावे भ्रा
वे स्वयं कुर्यादित्युक्तं, तच्चिन्त्यं शौनकविरोधात्।
पे प्रायश्चित्तमुक्त्वाऽऽह—*एतच्चेति। 'पाहीति
पाठः। प्रयोगरत्ने प्रयोगः। यदि ब्रह्मचारिण
मुक्तप्रयोगो न सम्भवति तदाऽऽपस्तम्बोक्तः सम
कार्यः। ब्रह्मचारी संकल्प्य स्वचिन्हानि मेखलादीं
श्मश्रुवपनादि नखकृन्तनं च कृत्वा तीर्थे तूष्णीं स्न
रपरिधानद्विराचमनतिलकधारणानि कृत्वा श्रो
माहात्म्योपसमाधाय तत्र प्रजापतिं मनसा ध्यायन् त

(१) 'दर्भा' क० (२) 'मेखलाजिनाधारण'
(३) 'व्याहृतिहोमं पाहित्रयोदशहोमं च कुर्यात्' ख०

आदिष्टी नोदकं कुर्यादा व्रतस्य समापनात् ।
समाप्ते तूदकं दत्त्वा त्रिरात्रमशुचिर्भवेत् ॥

इति मनूक्तेः । आदिष्टी ब्रह्मचारीति विज्ञानेश्वरः । ब्रह्मचर्ये यदि कश्चिन्न मृतस्तदा त्रिरात्रमध्ये विवाहः कार्योऽन्यथा नेति सिध्यति । जनने तु सत्यपि न त्रिरात्रम् , तत्रातिक्रान्ताशौचाभावादुदकं दत्त्वेति वचनाद्वेति दिक् । तत्रापि विकल्पः ।

पितर्यपि मृते नैषां दोषो भवति कर्हिचित् ।
आशौचं कर्मणोऽन्ते स्यात्र्यहं वा ब्रह्मचारिणाम् ॥

इति छन्दोगपरिशिष्टात् ।

स्नातकव्रतान्याह व्यासः—

यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम् ।
छत्रं चोष्णीषममलं पादुके चाप्युपानहौ ॥
रौक्मे च कुण्डले वेदः कृत्तकेशनखः शुचिः ॥

वेदो दर्भबटुः । मनुः—

उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलंकारं स्रजं करकमेव च ॥

अन्यान्यपि बहूचगृह्यस्मृत्यादिभ्यो ज्ञेयानि ।

अथ छुरिकाबन्धः । ज्योतिर्निबन्धे नारदः—

छुरिकाबन्धनं वक्ष्ये नृपाणां प्राक्करग्रहात् ।
विवाहोक्तेषु मासेषु शुक्लपक्षेष्यनस्तगे ॥

धमादधातीति कौस्तुभादौ बोध्यम् । उपाकर्मस्नानविवाहानां क्रमिकत्वादुपाकर्माकृत्वा विवाहो न कार्यः ,

अनारभ्योक्तकाले तु वेदान्कन्यां य उद्वहेत् ।
नूतनो ब्रह्मचारी स्यात्सर्वधर्मबहिष्कृतः ॥

इत्याश्वलायनोक्तेश्च ,

जीवे शुक्रे च भूपुत्रे चन्द्रतारावलान्विते ।
मौञ्जीबन्धर्क्षतिथिषु कुजवर्जितवासरे ॥

सङ्ग्रहे—

शूद्राणां राजपुत्राणां मौञ्ज्यभावेऽस्त्रबन्धनम् ।
मौञ्जीबन्धोक्ततिथ्यादौ कार्यं भौमदिनं विना ॥

अथ विवाहः । याज्ञवल्क्यः—

*अविप्लुतब्रह्मचर्यो लक्षण्यां *स्त्रियमुद्वहेत् ।
*अनन्यपूर्विकां *कान्तामसपिण्डां यवीयसीम् ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ॥

ग्रहदोषादुपाकर्म प्रथमं न भवेद्यदि ।
उक्तकालेऽथवाषाढे कुर्याच्छ्रदि वाऽपि च ॥
अकाले नैव तत्कुर्यादुपाकर्म कथञ्चन ॥
अकृत्वा नोद्वहेत्कन्यां मोहाच्चेत्पतितो भवेत् ॥

इति स्मृत्यन्तराच्च ।

*अविप्लुतेति । खण्डितब्रह्मचर्यस्तु प्रायश्चित्तं कृत्वोद्वहेदिति स्मृत्यर्थसारः । *स्त्रियमिति । सिद्धाया एव स्त्रियः कर्मत्वोक्त्या भार्यात्वलक्षणसाध्यरूपेण तद्वाच्यतयोद्वाहः स्त्रीसंस्कारार्थत्वेन विधेयः । न च तस्य पुरुषसंस्कारार्थत्वं प्रतिग्रहमात्रेण संस्कारोपगमे गोकाञ्चनादिप्रतिग्रहेऽपि पुंसः संस्कारप्रसङ्गात् । पुंसस्तु नैष्ठिकब्रह्मचर्यादिनाप्यायुःक्षपणस्य सुकरत्वादुद्वाहस्य संवेशार्थिनो रागप्राप्तत्वेऽपि तदाश्रितं स्वस्तिवाचनादिकं वैधमेव, भोजनाद्याश्रयेण प्राङ्मुखत्वादिवत् । एवञ्च वरपितुः पुत्रविवाहं करिष्ये इति संकल्पोऽशुद्ध एव । *अनन्येति । या दानेनोपभोगेन वा पुरुषान्तरपूर्विका न भवति तामित्यर्थः । एतेन मनोदत्ता वाग्दत्ता अग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्त पुनर्भुवो व्यावर्त्यन्ते । *कान्तां वोढुर्मनोनय-

लक्षण्यां (१)बाह्याभ्यन्तरलक्षणैर्युक्ताम् । बाह्यानि *काशीखण्डादौ प्रसिद्धानि । आन्तराण्याश्वलायनोक्तानि*'अष्टौ पिण्डान्कृत्वा' इत्यादीनि ।

मनुः—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

दत्तिममातुर्गृहीता (२)असपिण्डा सगोत्रा । तत्कुलनिवृत्तये चकारान्मा(३)तुरसगोत्रा दत्तस्य पितुर्जनककुले पितुरसगोत्रापि सपिण्डत्वान्निषिद्धेत्यन्यश्चकारः । असपिण्डां सापिण्ड्यरहिताम् ।

नानन्दकारिणीम् । *काशीखण्डादाविति । काशीखण्डं प्रसिद्धम् । आदिना—

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृदङ्गीमुद्वहेत्स्त्रियम् ॥

इत्यादिग्रहः । विष्णुपुराणे—

नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् ।
नर्क्षवृक्षनदीनाम्नीं नान्यपर्वतनामिकाम् ॥

इत्यादयो निषेधा अपि द्रष्टव्याः । प्रयोगपारिजातादौ तद्विस्तरः॥ *अष्टौ पिण्डानिति । "अष्टौ पिण्डान्कृत्वा ऋतमग्रे प्रथमं जज्ञे ऋतं सत्ये प्रतिष्ठितं यदि यं कुमार्यभिजाता तादियमिह प्रतिपद्यतां यत्सत्यं तदृश्यतामिति पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति । क्षेत्राच्चेदुभयतः सस्यादगृह्णीयादन्नवत्यस्याः प्रजा(४)भविष्यतीति विद्यात् , गोष्ठात् पशुमती, वेदिपुरीषाद्ब्रह्मवर्चस्विनी, अविदासिनो ह्रदात्सर्वसंपन्ना, देवनात्कितवी, चतुष्पथाद्विप्रवा-

---

(१) 'बाह्यान्तरलक्षणैर्यु' क० (२) 'असपिण्डोऽपि सगोत्रः' क० ख०
(३) 'मातुरगोत्रा दत्तकस्य' क० (४) 'भविष्यामि' ख०

*तच्चै*कशरीरावयवान्वयेन भवति । *एकस्य हि पितुर्मातुर्वा शरीरस्यावयवाः पुत्रपौत्रादिषु साक्षात्परम्परया वा शुक्रशोणितादिरूपेणानुस्यूताः । यद्यपि पत्न्याः पत्या सह भ्रातृपत्नीनां च परस्परं नैतत्सम्भवति तथापि *आधारत्वेनैक(१)शरीरावयवान्वयोस्त्येव 'अस्थिभिरस्थीनि' इति मन्त्रलिङ्गात् । एकस्य हि पितृशरीरस्यावयवाः पुत्रद्वारा तास्वाहिता इति मदनरत्नपारिजातविज्ञानेश्वरादयः । वाचस्पतिशुद्धिविवेक-

---

जिनी, ईरिणादधन्या, श्मशानात्पतिघ्नी" इत्याश्वलायनसूत्रम् । अविदासिनः अनुपक्षयवतः । नारायणवृत्तौ प्रयोगो बोध्यः । इयं च परीक्षा कन्यावरयोः कुलपरीक्षोत्तरं कार्या 'कुलमग्रे परीक्षेत' इत्याश्वलायनोक्तेः ।

*तच्च सापिण्डयं च । *एकेति । समानः एकः पिण्डो देहो देहावयवो यस्याः सा सपिण्डा, न सपिण्डा असपिण्डेति विग्रहात् । *एकस्येति । पुत्रस्य साक्षाज्जनकशरीरावयवान्वयः पुत्रशरीरे पितुरवयवानामस्थिमज्जादीनां मातुरवयवानां रक्तमांसादीनां साक्षात्प्रवेशात् । "एतत षाट्कौशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतः, अस्थिस्नायुमज्जानः पितृतः, त्वङ्मांसरुधिराणि मातृतः" इति श्रुतेः । पितामहादिभिः साकं तु पितृद्वारा पितामहादिशरीरावयवान्वयात् "प्रजामनु प्रजायसे" इति श्रुतेः । एवं पितृव्यपितृष्वसृमातृष्वस्रादिभिरपीति । *आधारत्वेनेति । आरभ्यारम्भकभावेन हि एकशरीरावयवान्वयो विवक्षितः । तथाच भ्रात्रोरारम्भकैकपितृ(२)शरीरावयवान्वयः । भर्तृभार्ययोरपि आरभ्यैकपुत्रशरीरावयवद्वारा तत्पितामहशरीरावयवान्वयः । क्वचिच्चैकावयवाधारत्वेनापि, यथा

---

(१) 'शरीरान्वयोऽस्त्येव' क०' (२) 'शरीरान्वयः' घ०

शूलपाण्यादिगौडमैथिलादयोऽप्येवम्। (१)श्रुतावपि–एतत्षाट्कौशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतोऽस्थिस्नायुमज्जानः पितृतस्त्वङ्मांसरुधिराणि मातृतः इति, 'प्रजामनु प्रजायसे' इति च।

चन्द्रिकापरार्कमेधातिथिमाधवादयस्तु एकपिण्डदानक्रियान्वयित्वं सापिण्ड्यम्।

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्॥

इति मात्स्योक्तेः। नच पितृव्यादिष्वेतन्नास्तीति वाच्यं, तत्कर्तृकश्राद्धे दैवतैक्येन तत्सत्त्वात्। देवदत्तकर्तृकश्राद्धे हि ये देवताभूतास्तेषां मध्ये यः कश्चिदन्यकर्तृकश्राद्धेऽनुप्रविशति तेषां सापिण्ड्यम्। तद्भार्याणामपि भर्तृकर्तृकश्राद्धे सहाधिकारित्वेन तदन्वयात्।

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके।

इति स्मृतेश्च। श्रुतीनां च वैराग्यार्थत्वात्त(२)स्याः सापिण्ड्यनिमित्तत्वे मानाभावात्। नच मातुलादिष्वेतन्नास्तीति वाच्यं, मातामहरूपदैवतैक्यात्। ननु गुरुशिष्यादेरपि श्राद्धदेवतात्वात्सापिण्ड्यं स्यात्। किं बहुना?

सर्वाभावे तु नृपतिः कारयेत्तस्य रिक्थतः।

इति मार्कण्डेयपुराणाद्राज्ञोऽपि श्राद्धकर्तृत्वात्सापिण्ड्यप्रसङ्गः। सत्यम्,

---

मात्रोर्भर्तृद्वारा श्वशुरावयवाधारत्वमित्यादि अन्यत्राप्यूह्यम्। नन्वेवमगम्यागमनेऽपि गन्तृगम्ययोरेकशरीरारम्भकत्वात्सापिण्ड्यापत्तिः। न चानिषिद्धत्वं विशेषणं रजस्वलानाम्भार्याणामपि नि-

(१) 'श्रुतिरपि' क० (२) 'तस्य' ख० ग०

*पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ।
इति याज्ञवल्क्यवचनेन मातापितृसंबन्ध एव त
त्सत्त्वात्। ऊर्ध्वं 'सापिण्ड्यं निवर्तते'इति शेषः। ननु पञ्
मत्वाद्यत्र नियम्यते, *न मातृत इत्यादि, वाक्यभेदात
मैवम्, *मातृकुले पञ्चमत्वस्य पितृकुले सप्तमत्वस्य
बोधने*तुल्यत्वात्। *पौरुषेयत्वाददोष इति चेत्
ल्यम*न्यत्रापि, अन्यकर्तृके राज्ञस्तत्पितॄणां वा
वतात्वाभावाच्च । किञ्च अवयवान्वयपक्षे*यथा यो

षेधात; इति चेत् ? न, निषिद्धव्यभिचारकान्यत्वेन विशेषणात
व्यभिचारश्च भार्यान्यस्त्रीगमनम्। तथाच यः शरीरावयवान्व
विवक्षितः स निषिद्धभार्याभिन्नस्त्रीगमनक इति न दोषः। निं
द्धत्वं च वेदमेयाभावप्रतियोगिकृतिसाध्यत्वं, तादृशानिवर्त्तनाग
चरत्वं वेत्यन्यदेतत्। मातापितृसम्बन्ध एवेत्यर्थः। राजादेर्नि
ण्यपिण्डान्वयस्य सापिण्ड्यप्रयोजकत्वानुपगमादिति भावः। तत
त इत्यत्र वक्ष्यति—(१)किञ्चेति। *पञ्चमादिति। मातृतः प
मादेवोर्ध्वं सापिण्ड्यं निवर्त्तते न चतुर्थादपीत्यर्थः। *न मातृ
इत्यादि। नियम्यते इति वर्त्तते। मातृत एव पञ्चमादूर्ध्वं सापिण्
निवर्त्तते इति नेत्यर्थः, *मातृकुले इति। मातरमादाय कु
समुदाये इत्यर्थः, एवं पितृकुले इत्यत्रापि, ल्यब्लोपपञ्चम्याः प
म्याद्यन्वयस्वीकारात्। *तुल्यत्वादिति। वाक्यभेदाभावेत्य
दि, उभयत्राप्यर्थभेदाभावात। अन्यथा घटमानय कलशमान
त्रापि वाक्यभेदापत्तेरित्यर्थः। वाक्यभेदोद्धारवैयर्थ्यं शङ्कते
*पौरुषेयत्वादिति। *अन्यत्रापीति। तन्मूलभूतश्रुता
पीत्यर्थः। याज्ञवल्क्यवाक्याच्छ्रुतावपौरुषेयत्वमेव विशेषः। व
क्यभेदतदुद्धारौ तूभयत्रापि समावेवेत्यर्थः। *यथेति। साक्षात

---

(१) किञ्चेति नास्ति घ० ङ०

रूढ्या परिहारस्तथे*हापि। तेन मातृकुले पितृकुले चैकपिण्डदानक्रियान्वयित्वं सापिण्ड्यमित्याहुः। तेनैकस्य पित्रादयः षट् पुत्रादयश्च षट् सपिण्डा भवन्ति।

अत्र केचिदुभयतः सापिण्ड्यानिवृत्तावेवोद्वाहो नान्यथेत्याहुः। शुद्धचिन्तामणिवाचस्पतिहरदत्तादयस्तु सगोत्रत्ववत्सापिण्ड्यस्य सप्रतियोगिकत्वेन संयोगवदुभयनिरूप्यत्वात् एकतो निवृत्तावन्यतो निवृत्तेरावश्यकत्वान्मूलपुरुषमारभ्या(१)ष्टमो वरो मूलपुरुषमारभ्य द्वितीयतृतीयादिकां (२)कन्यामुद्वहेदित्याहुः। शिष्टास्तु न वधूवरयोः*स्वतः सापिण्ड्यं, किंतु कूटस्थसंततित्वात्तत्सापिण्ड्येनैव। अतोऽष्टमवरं प्रति कन्याया असापिण्ड्येऽपि कन्यायाः कूटस्थेन सापिण्ड्यात्तत्संततिस्थत्वाद्वरस्तां प्रति सपिण्ड एवेत्यविवाहः। सापिण्ड्यासापिण्ड्ययोः प्रतियोगिभेदेनाविरोधादित्याहुः। *इदमेव च युक्तम्। आशौचेऽप्ये*वं सापिण्ड्यं ज्ञेयम्।

रम्परयाऽन्वयव्यावृत्तेर्निर्मर्यादत्वाद्याज्ञवल्क्येन दर्शितायां मर्यादायां रूढिः। *इहापीति। तादृशमर्यादायां रूढिरित्यर्थः। अत्र मूलपुरुषादेकतः कन्या तत्कन्या तत्कन्या तत्कन्येत्येवं पञ्चम्यां कन्यायामव्याप्तेररुचिर्बोध्या। *उभयनिरूप्यत्वात् उभयान्यतरप्रतियोग्यनुयोगित्वात्।

*स्वत इति। वधूप्रतियोगिकं वरे, वध्वां च वरप्रतियोगिकमित्यर्थः, तथा सति दीर्घत्वादिवत्तत्प्रत्यक्षापत्तेः। तत्सापिण्ड्येनैवेति तृतीयार्थो भेदः। तथाच स्व(३)(सपिण्डकूटस्थ) संततित्वं सापिण्ड्यमिति भावः। *इदमेव चेति। पञ्चमादूर्ध्वं वधूवरा-

---

(१) 'अष्टमो वरो मूलपुरुषमारभ्य' नास्ति क०

(२) 'कन्यां' नास्ति क० (३) कंसान्तर्गतं नास्ति घ०

न्यतरमातृतः तत्सापिण्डकूटस्थसन्ततित्वात्मकं विवाहप्रतिबन्धकं सापिण्ड्यं वधूवरयोर्निवर्त्तते इत्यर्थः । एवं पितृतः सप्तमादित्यत्रापि । यत्र च वरोऽष्टमादिः कन्या तु द्वितीयादिका, तत्र (१)कूटस्थस्य वधूपित्रादिसप्तमादूर्ध्वत्वाभावेन विवाहप्रतिबन्धकसापिण्ड्यसद्भाव इति भावः । अन्ये त्वाहुः-यत्र वृक्षे प्रथमतो मूलाग्रयोः कपिसंयोगः, ततो मूले तदभावः, तत्र तदानीं मूलस्य नावच्छेदकत्वं कालानवच्छिन्नदेशादेरवच्छेदकत्वानुपगमात् । यथाऽवान्तरकालावच्छिन्न एव स्थूलकालोऽवच्छेदकः, तथा तत्कालावच्छिन्नदेश एव तथेति । इदानीं मूले वृक्षः कपिसंयोगीति प्रत्ययो न प्रमा किन्तु मूले वृक्षः कपिसंयोगीत्यादिरेव तथा तद्वत् अयं वंशो वरावच्छेदेन सापिण्ड्यवानिति प्रत्ययो न प्रमा किन्तु कन्यावच्छेदेन सापिण्ड्यवानिति प्रत्यय एव तथा । तादृशप्रमाविषयकन्यायाश्च शुद्धवरेणापि न विवाहः ।

पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया।
क्रियापरा अपि हि ते पतिताः शूद्रतां गताः ॥

इति प्रयोगपारिजाते मरीचिना दोषोक्तेः । पञ्चमे सप्तमे इत्येतत्कैश्रुतिकन्यायेन द्वितीयातृतीयादिकन्यासङ्ग्राहकम् । क्रियापराः स्वतः शुद्धाः, असपिण्डा इति यावदित्याहुः । वस्तुतस्तु यथाऽसपिण्डामिति कन्याविशेषणं तथाऽसपिण्ड इति वरविशेषणम् ।

एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ।
यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः ॥

इति वचनेनानन्यपूर्वकत्व-यवीयस्त्व—भ्रातृमत्त्व-रूपगुणत्रयभिन्नसर्वगुणान्तर्गतासापिण्डत्वलाभात् । तच्च सापिण्ड्यं कन्यायां वरनिरूपितं वरे च कन्यानिरूपितं पृथगेव, न तूभयनिरूपितं वरे

(१) 'कूटस्थवधू' ख०

यत्र तु मध्ये विच्छिन्नमपि सापिण्ड्यं मण्डूकप्लुतिवत्पुनरनुवर्तते। यथा कूटस्थात्पञ्चम्योः कन्ययोः *पुत्रौ तत्र निवृत्तिः, तदपत्ययोस्त्वनुवृत्तिस्तत्रापि न सापिण्ड्यासापिण्ड्ययोर्दोषः; *संबन्धिभेदात्। तेन तत्र न विवाहः।

तदतिदेशवैयर्थ्यात्। एवञ्चोक्तस्थले वरवध्वोरुभयत्र सापिण्ड्यशून्यत्वाभावान्न विवाहः। न च सपिण्डशब्दस्य ससम्बन्धिकत्वादेव तल्लाभे अन्यत्र तदतिदेशे मानाभाव इति वाच्यं बाधाभावस्यैव तदतिदेशे मानत्वादिति। अधिकमन्यतोऽवगन्तव्यम्। *एवं सापिण्ड्यमिति। एकतः सप्तमपर्यन्तानामन्यतोऽष्टमादिजननादौ दशरात्रम्, अष्टमादीनां च सप्तमपर्यन्तजननादौ त्रिरात्रमाशौचमित्यर्थः। एकतो निवृत्तौ निवृत्तिमते चोभयत्रापि त्रिरात्रमेव। *पुत्राविति। पुत्रश्च पुत्री चेति विग्रहः। ननु कूटस्थात्पञ्चमीसन्तानभूते निवृत्तस्यापि तन्मातृकुलसापिण्ड्यस्य सप्तमेऽनुवृत्त्या प्रवृत्तिः पितुः सप्तमत्व एव सापिण्ड्यनिवृत्तेरिति न युक्तं, यद् गतं तद्गतमेवेति न्यायात्। किञ्च तर्हि याज्ञवल्क्येन पञ्चम्या मातुरित्येवोक्तं भवेदित्यत्राह-*सम्बन्धीति। पञ्चमादूर्ध्वमित्याद्यन्वयार्थमेव हि पञ्चमादिरभिहितम्। तथा च मातृतः सापिण्ड्यं पञ्चमादूर्ध्वं निवर्त्तते पितृतः सापिण्ड्यं सप्तमादूर्ध्वं निवर्त्तते इत्यर्थः। तत्र मातृद्वारकं सापिण्ड्यं षष्ठे निवृत्तं पितृद्वारकं सापिण्ड्यं च सप्तमेऽस्ति। सम्बन्धिनोर्मातापित्रोर्भेदात्सापिण्ड्यभेदात्। तत्र मण्डूकप्लुतिवदिति दृष्टान्तः। प्लुतिघटकौ पूर्वोत्तरसंयोगौ द्वौ, अत्र सापिण्ड्ये द्वे एतावन्मात्रे बोध्यः। दृष्टान्ते सम्बन्धी मण्डूक एकः दार्ष्टान्तिके तु सम्बन्धिनौ मातापितरौ भिन्नौ इति विशेषः। नहि दृष्टान्ते सर्वसाम्यमिति न्यायात्।

केचित्तु सोदकत्ववत्सापिण्ड्यमखण्डमेव तत्र दीर्घत्वादिवत्

*अत्र कूटस्थमारभ्य गणना कार्या। तदुक्तम्—

वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः।
पञ्चमी चेत्तयोर्माता तत्सापिण्ड्यं निवर्तते ॥ इति।

कूटस्थो *मूलपुरुषः।

सप्तमीयोगिकं। तच्चैकगोत्रे सप्तमपर्यन्तं, भिन्नगोत्रे पञ्चमपर्यन्तमिति वदन्ति। तदसत्, भिन्नगोत्रे सप्तमपर्यन्तं सापिण्ड्यासत्त्वप्रसङ्गात्। इष्टापत्तिस्तु धार्मिकाणामनुचितेति।

पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा।

इति याज्ञवल्क्यवाक्ये कस्मात्पञ्चमादिति सप्तमादिति वेत्यत्राह—*अत्रेति।*मूलपुरुष इति। यतः सन्तानभेद इति यावत्। तदाह—संतानो भिद्यते यस्मात्पूर्वजादिति। तथाच मातृद्वारकं सापिण्ड्यं कूटस्थात्पञ्चमादूर्ध्वं, पितृद्वारकं सापिण्ड्यं कूटस्थात्सप्तमादूर्ध्वं निवर्त्तते इत्यर्थः। कूटस्थात्पञ्चम्या मातुरनुपादाने सापिण्ड्यस्य मातृद्वारकत्वभङ्गः स्यात्। मातृद्वारकत्वं च स्वाश्रयीभूतान्त्यमातृघटितसन्तानवृत्तित्वमित्यर्थतो मातृलाभः। एवं कूटस्थात्सप्तमस्य पितुः प्रवेशो बोध्यः। पञ्चमादित्यत्र पूरणप्रत्ययात् पञ्चानां पूरणोन्त्यो लभ्यते। न च पञ्चम्या मातृत इत्येव कुतो नोक्तमिति वाच्यम्, तथा सति कूटस्थात्पञ्चम्या मातुरूर्ध्वं सापिण्ड्यं नास्तीत्यर्थः स्यात्। तथाच कूटस्थात् षष्ठ्यां सापिण्ड्यसामान्यनिवृत्त्यापत्त्या अष्टमवरविवाह्यत्वप्रसङ्गः। अतः पञ्चमादित्युक्तं, ततश्चोक्त एवार्थः। तथाच तत्र मातृद्वारकं सापिण्ड्यं नास्ति पितृद्वारकं तु वर्त्तते, अतो ज्ञायते एकतो निवृत्तावुद्वाहो न भवतीति। अथवा मातृतः पितृत इति सप्तम्यौ, वृत्तित्वं तदर्थः, सापिण्ड्ये तदन्वयः। तथाच मातृनिष्ठं सापिण्ड्यं कूटस्थादूर्णनाभां सन्तानघटकात्पञ्चमादूर्ध्वमित्यर्थः। अथवा मातृतो यः सन्तानभेदप्रतियोगी प्रथमस्तस्मात्पञ्चमादित्यादिरर्थः।

विश्वरूपनिबन्धे—

*एवमुक्तप्रकारेण पितृबन्धुषु सप्तमात् ।
ऊर्ध्वमेव विवाह्यत्वं पञ्चमान्मातृबन्धुतः ॥
संतानो भिद्यते यस्मात्पूर्वजादुभयत्र च ।
तमादाय गणेद्धीमान्वरं यावच्च कन्यकाम् ॥

---

*एवमिति। पितृबन्धुषु बन्धुत्वं ज्ञातित्वं,तच्च कूटस्थतदपत्यषट्कान्यतमत्वम्। पितरमादाय तादृशज्ञातित्वाश्रयेषु पितृकुले पितृपक्षे इत्यादावप्ययमेवार्थः।वृत्तित्वं सप्तमत्वान्वितं सप्तम्यर्थः। तथाच तादृशज्ञातित्वाश्रयवृत्तिकूटस्थावधिकसप्तमत्ववत ऊर्ध्वमित्यर्थः । एवं मातृबन्धुषु पञ्चमादिसत्र कूटस्थतदपत्यचतुष्टयान्यतमत्वाश्रयवृत्तितादृशपञ्चमत्ववत ऊर्ध्वमित्यर्थः । माता च जननी । केचित्तु मातृपदं कूटस्थतदपत्यचतुष्टयरूपपञ्चके पारिभाषिकम्

तिस्रः पूज्याः पितुः पक्षे, तिस्रो मातामहे तथा ।
इत्येता मातरः प्रोक्ताः पितुर्मातुः स्वसाऽष्टमी ॥

इति चतुर्विंशतिमते मातामह्यादौ मातृशब्दप्रयोगात् । एवं पितृशब्दोऽपि सप्तसाधारणपितृत्वेन बोधकः । ताभ्यां सप्तम्यन्तात्तसिः । एवञ्च मातृघटितसंताने सापिण्ड्यं संतानभेदावधि कूटस्थमारभ्य गणनायां संतानघटकान्त्यपञ्चमाद्ऊर्ध्वं निवर्त्तते इत्यर्थः । एवं पितृत इत्यत्रापि बोध्यम् । पितृबन्धुष्वित्यादौ सन्तानभेदारम्भकप्रथमादिसप्तमान्तः समुदायो बन्धुः । उद्भूतावयवभेदाविवक्षया बहुवचनम् । सप्तमत्वादौ वृत्तित्वरूपसप्तम्यर्थान्वयः । अर्थ ऊह्यः । एवं पितृबन्धुभ्यः सप्तमीं मातृबन्धुभ्यः पञ्चमीमिति वासिष्ठे बन्ध्वन्तं माग्वत् । तादर्थ्ये चतुर्थी । तथाच तादृशसप्तमान्तसमुदायार्थां सप्तमीं कूटस्थादष्टमीमिति तादृशपञ्चमान्तसमुदायार्थां पञ्चमीं कूटस्थात् षष्ठीमिति वार्थ इत्याहुः ।

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा ।

*स्मृतितत्त्वे नारदः—

आ सप्तमात्पञ्चमाच्च बन्धुभ्यः पितृमातृतः ।
अविवाह्या सगोत्रा च समानप्रवरा तथा ॥

अत्र बन्धुभ्य इति पञ्चमीनिर्देशात्पितुः पितृष्वसृ पुत्रात्सप्तमीं, मातुः म(१)तृष्वसृपुत्राच्च पञ्चमीमपि त्यजे त् । एवमन्यबन्धुषु ज्ञेयम् । तत्रापि त्रिगोत्रात्यये ऽर्वागा विवाहं कुर्यात् वक्ष्यमाणवचनात् । त्रिगोत्रगणना मातामहगोत्रापेक्षया, नतु स्वापेक्षया । अन्यथा पितु *पितामहदुहितुर्दौहित्री(२)पुत्री परिणेया स्यात्

इत्यत्र मातृतो यः सन्तानभेदप्रतियोगी प्रथमः ततः पञ्चमी मित्यर्थः ।

पञ्चमीं मातृपक्षात्तु पितृपक्षात्तु सप्तमीम् ।

इत्यादावप्येवमेव । 'सप्त पितृतः परिहरेत् पञ्च मातृतः' इत्य त्र पितृसंताने कूटस्थात्सप्त मातृघटितसन्ताने कूटस्थात् पञ्च परि हरेदित्यर्थः । एवमन्यत्राप्यूह्यम् । गौडमतमाह—*स्मृतितत्त्व इत्यादि । एतन्मतेऽपि बन्धुपदमाशौचप्रकरणस्थबन्धुत्रयान्तर्ग तबन्धुपरं, तत्रात्मबन्धुर्न ग्राह्यः 'पितृमातृतः' इत्येवोक्तेः । तस्य बन्धवन्वयः पञ्चम्यर्थ ऊह्यः । तेन पितृबन्धुमातृबन्ध्वोर्लाभः । पि तृबन्धुर्मातृबन्धुश्च त्रेधा—

पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः ।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबन्धवः ॥

इत्युक्तेः । तेनान्यबन्धुष्विसस्य सङ्गतिः । *पितामहदुहि तुर्दौहित्रीपुत्रीति । पितामहकन्या तत्कन्या तत्कन्या तत्कन्ये त्यर्थः, स्वगोत्रापेक्षया गणनायां पितामहस्य स्वगोत्रत्वात् । तदू

(१) 'पितृष्वस्' ख० ग० (२) 'पुत्राः' क०

*वध्वाः मातामहगोत्रापेक्षया तु त्रिगोत्रान्तर्गतेन विवाहप्रसङ्ग इति संबन्धतत्त्वादयो गौडग्रन्थाः। संबन्धविवेके शूलपाणिरप्याह—*पञ्चमात्सप्तमाच्चार्वागपि त्रिगोत्रान्तरिता विवाह्या।

*असंबद्धा भवेन्मातुः पिण्डेनैवोदकेन वा।
सा विवाह्या द्विजातीनां* त्रिगोत्रान्तरिता च या॥

इति बृहन्मनूक्तेः,

सन्निकर्षेऽपि कर्तव्यं त्रिगोत्रात्परतो यदि।

इति देवलोक्तेश्चेति। *एतच्च दाक्षिणात्या न मन्यन्ते।

हितुर्द्वितीयं गोत्रं तद्दौहित्र्यां तच्चतुर्थमिति तत्पुत्र्याः त्रिगोत्रानन्तर्गतत्वापत्तिः। विवक्षयोक्तापत्तिं वारयति—*वध्वा इति। मातामहगोत्रापेक्षया त्रिगोत्रात्यये इत्यस्य गोत्रवृत्तित्रित्वानाश्रयमातामहगोत्रका वधूर्विवाह्येत्यर्थः। प्रकृते च पितामहदौहित्र्या गोत्रं तृतीयं तदेव च वधूमातामहगोत्रमिति न तद्विवाहप्रसङ्गः। याज्ञवल्क्यवचनेऽप्याह—*पञ्चमादिति। गोत्रैक्ये सप्तपुरुषपर्यन्तं सापिण्ड्यं, तद्भेदे तु त्रिगोत्रं, तस्य सापिण्ड्यसङ्कोचकत्वात्। तच्चाशौचोपयोगि,

सपिण्डता तु सर्वेषां गोत्रतः सप्तपौरुषीः।

इति शङ्खोक्तेः। विवाहप्रतिबन्धके पितृसापिण्ड्ये त्रिगोत्रान्तरितत्वं तदनन्तरितत्वं च स्फुटम्। मातृसापिण्ड्ये त्वाह—*असंबद्धेति। मातुः पिण्डेनासम्बद्धेत्यन्वयः। पिण्डो देहः, मातृदेहसम्बन्धशून्या। मातुरुदकेनेति मातृबन्धुनेत्यर्थः, असम्बद्धेत्यत्रान्वयः। *त्रिगोत्रेति। पितृमातृसापिण्ड्यद्वयसंकोचकं, स्वगोत्रसाधारणत्रित्वानाश्रयेत्यर्थः। अयमनुकल्पः, कूटस्थमारभ्य सप्तमीत्वाद्यनाश्रयाविवाहो मुख्यकल्पः, सन्निकर्षेपीत्यपिशब्दात्। *एतच्चेति। सम्बन्धतत्त्वमते पितृतोऽष्टमीं मातृतश्च षष्ठीम्-

यत्तु वसिष्ठः—

*पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा । इति,

यच्च विष्णुपुराणम्—

पञ्चमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम् ।
गृहस्थ उद्वहेत्कन्यां न्याय्येन विधिना नृप ॥ इति,

तत्पञ्चमीं सप्तमीमतीत्येति व्याख्येयम् ।

पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया ।
क्रियापरा अपि हि ते पतिताः शूद्रतां गताः ॥

इत्यपरार्के मरीचिवचनात् । हारलतायां शङ्खलिखितौ—

*सपिण्डता तु सर्वेषां गोत्रतः सप्तपौरुषी ।
पिण्डश्चोदकदानं च आशौचं च तदानुगम् ॥

गोत्रं संतानम् । आशौचं तानभिव्याप्य गच्छतीत्यर्थः ।

द्वहेत्, पितृष्वसुर्नवमीं मातुः पितृष्वसुः सप्तमीं च त्यजेदिति नौचित्यापत्तेः। तस्मान्नारदवाक्ये मर्यादायामाङ्, सन्तानादिति शेषः । सन्तानं मर्यादीकृत्येत्यर्थः । तथाच पितृमातृसन्तानभेदारम्भकमथमादिसमुदायात् तत्समुदायमादाय सप्तमत्वपञ्चमत्वाक्रान्तसन्तानपर्यन्तमविवाह्येत्येवार्थः । शूलपाणिमते कैमुतिकन्यायेन पञ्चमे सप्तमे चैवेति वाक्यविरोध इति। *पञ्चमीमिति। उद्वहेदिति वर्त्तते। पञ्चमे इत्यादेः कूटस्थात्पञ्चमे इत्यादिरर्थः, कूटस्थाच्चतुर्थी माता षष्ठश्च पिता भवतीत्यभिप्रायः । नन्वत्र पञ्चमे इति कूटस्थभिन्नगोत्रघटितपञ्चान्तर्गतविवाहनिन्दा, सप्तमे इति च कूटस्थसमानगोत्रसप्तान्तर्गतविवाहानिन्दा चेति वाग्मिनः परिष्कुर्वन्तीत्यत्राह—*सपिण्डतेति । सर्वेषां ब्राह्मणादीनां, गोत्रतः कूटस्थसमानगोत्रगर्भं, पिण्डश्चेत्यादि और्ध्वदेहिकोपलक्षणं, तदानुगं ता-

शुद्धिविवेके शुद्धिचिन्तामणौ च ब्राह्मे—

सर्वेषामेव वर्णानां विज्ञेया सप्तपौरुषी।
सपिण्डता ततः पश्चात्समानोदकधर्मता॥
ततः कालवशात्तत्र विस्मृतौ नामगोत्रतः।
समानोदकसंज्ञा तु तावन्मात्रापि नश्यति।

सप्तोर्ध्वं त्रयः सोदकाः, ततो गोत्रजाः। तत्रैव ब्राह्मे—

अविभक्तधनास्त्वेते सपिण्डाः परिकीर्तिताः।

तेनाविभक्तधनाभावे विभक्तः सपिण्डो धनहारी, नान्यथेत्यर्थः। तेन विवाहे आशौचे धनग्रहणे च त्रिधा सापिण्ड्यं सिद्धम्। यत्तु—'पञ्चमीं मातृतः परिहरेत्सप्तमीं पितृतस्त्री*न्मातृतः, *पञ्च पितृतो वा' इति पैठीनसिस्मृतौ 'त्रीनित्यनुकल्पः' इति माधवोक्तेः,

---

दृशपिण्डतानुसारि। तथाच कूटस्थसमानगोत्रसप्तपुरुषनिष्ठसापिण्ड्यमौर्ध्वदेहिकादावनुकूलमित्यर्थः। सापिण्ड्यमौर्ध्वदेहिकादावनुकूलं विवाहप्रतिबन्धकं च। तत्र एतस्यैव विवाहप्रतिबन्धकत्वे यत्र कूटस्थात्षष्ठी पञ्चममातृकन्या, षष्ठः पञ्चमपितृकवरः, तौ च भिन्नगोत्रान्तर्गतौ तत्र तयोर्विवाहप्रसङ्ग इत्यर्थः। यदि च गोत्रतः सन्तानात्। एवञ्च कूटस्थसन्ताने सप्तपौरुषी सपिण्डता इत्यर्थ आद्रियते तदा कूटस्थकन्यातत्कन्यादिक्रमेण षष्ठी कन्यैव सप्तमश्च पुरुषः, तत्राप्येतत्सत्त्वेन कूटस्थकन्यान्तरमादाय पञ्चम्यां कन्यायां च तत्सत्त्वेन न तयोर्विवाहः। शङ्खादिवचनवशात्तु समानगोत्रसप्तपुरुषवृत्तित्वेनाशौचाद्यानुकूल्यमिति बोध्यम्।

*त्रीनिति। चतुर्थीं कन्यामुद्वहेदित्यत्र तात्पर्यम्। *पञ्चेति। षष्ठीमुद्वहेदित्यर्थः। यद्यपि त्रीन् परिहरेत् पञ्च परिहरेत् इत्युक्त्या तदत्यागे दोष गौरवमिति लभ्यते तथापि अनुकल्पत्वेन

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा ।
*दशभिः पुरुषैः ख्याताच्छ्रोत्रियाणां महत्
उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीम् ।
*पञ्चमीं तदभावे तु पितृपक्षेप्ययं विधिः
सप्तमीं च तथा षष्ठीं पञ्चमीं च तथैव च
एवमुद्वाहयेत्कन्यां न दोषः शाकटायनः
तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि
विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः
यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत् ।
नित्यं स व्यवहार्यः स्याद्वेदाच्चैतत्प्रदृश्यते

इति चतुर्विंशतिमतात्,

चतुर्थीमुद्वहेत्कन्यां चतुर्थः पञ्चमोऽपि वा
पराशरमते षष्ठीं पञ्चमीं* न तु पञ्चमीम्

इति पराशरोक्तेश्चानुकल्पत्वेनापदि*पञ्च
णयनं कार्यमिति प्रतीयते । *अत्र हि त
स्पष्टमेवानुकल्पत्वमुक्तम्, तन्न यथाश्रुतं ज्ञेयं,

केषांचित्समाधानमुत्थापयति-*दशभिरिति । 'कु
त' इति कुलस्यैव गौरवात्तदनुसारेण सापिण्ड्यसंको
द्भियाऽधमकुलकन्यास्वीकार इत्याशयः। *पञ्चमीं त
ति मातृपक्षे। अयं क इत्यत्राह-पञ्चमीमिति । *
मिति । पञ्चमः पञ्चमीं नोद्वहेदित्यर्थः । *पञ्चम्याद
पि तृतीयादिपरिणयनमिति वाच्यं 'तृतीयां च' इत्यु
'वेदाच्चैव' इत्यनेन तस्य दृढीकारात्तस्य स्वातन्त्र्येण
यतया न तथोक्तम् । अनुकल्पत्वं कुत इत्यत्राह-*अ
*पूर्वोक्तेति । पञ्चमे सप्तमे चैवेत्यादि । अत्रानुकल्पं

मरीचिवचोविरोधात्। *वस्तुनि विकल्पासम्भवात्।

*पञ्चमात्सप्तमाद्धीमान्यः कन्यामुद्वहेद्द्विजः।
गुरुतल्पी स विज्ञेयः सगोत्रां चैवमुद्वहन्॥

इति विष्णूक्तेः, पराशरस्य (१)मूलाभावाच्च। तस्मान्मदनपारिजातायुक्तादिशा *दत्तकसापत्नसम्बन्धाद्यनुप्रवेशे *ब्राह्मणादीनां क्षत्रियादिसपिण्डविषये वा पूर्वोक्तानि *नेयानि, *न त्वनुकल्प इति भ्रमितव्यम्। *यत्तु

एव सप्तमोर्ध्वां सप्तमीं चोद्वहेदित्यर्थादित्याशयेन दूषयति-*वस्तुनीति। क्रियाभिन्ने इत्यर्थः। नन्वेवं चेत्तदा सप्तमोर्ध्वोद्वाहं वा कुर्यादित्यस्तु क्रियाविकल्प इत्यत्राह-*पञ्चमादिति। कुलहीनतायां तादात्म्येन पञ्चमादिर्हेतुः कुललक्षण एव पञ्चमाद्यन्यत्वं विवाहप्रयोजकविशेषणमिति पञ्चमत्वादिना कुलहीनेत्यर्थः। एतद्वचन एव निर्भरः न तु मरीचिवाक्येऽपि, क्रियापराः विप्रसेवादिरूपविहितपरा अपि शूद्राः पतिता इति शूद्रमात्रपरत्वसम्भवात्। *दत्तकेति। द्व्यामुष्यायणदत्तकस्य मातृकुले सपत्नमातामहकुले च त्रिपुरुषं सापिण्ड्यम्। आदिना—

पुरुषत्रयपर्यन्तं भ्रात्रादेर्नैतदिष्यते।

इत्यस्य परिग्रहः। तथाविधसापिण्ड्यशून्यायाः पञ्चम्यादेः परिणयनकार्यताबोधकानीत्यर्थः। *ब्राह्मणादीनामिति। तत्रापि त्रिपुरुषमेव सापिण्ड्यादिति भावः। *नेयानीति। एतेन मदनपारिजातायुक्तादिक् क्षोदक्षमाऽस्तु वा,मा वा, तदनुसरणे भवतां न दोष इति सूचितम्। *न त्विति। अयमभिप्रायः—दशभिरित्यादिना वस्तुतो महापापातिपापोपपापादिरहितत्वश्रोत्रियत्व-

---

[१] 'मूलाभावश्च' क०

स्मृतिचन्द्रिकामाधवादय आहुः—*"तृतीये सङ्गच्छावहै, चतुर्थे सङ्गच्छावहै" इति शतपथश्रुतेः, *'तृप्तां जुहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिव' इति, 'ग-

---

दानादिकर्मत्रयकर्तृत्वसपरिहारयागाद्यकर्तृत्वादियुक्तमहाकुलीनानां सप्तमीमुद्वहेदित्यभिधानेन तादृशगुणाधिक्ये एव न दोषः, अन्यथा तु दोष इति रीत्या सप्तमोद्वाहनिन्दनात् शाकटायन इत्यभिधानेन च स्वरूपव्याक्रियैव पराक्रियेति न्यायात् जर्त्तिलयवाग्वा वा जुहुयादित्यादेः पयोहोमस्तुत्यर्थत्ववत्कैमुतिकन्यायेनाष्टमोद्वाहविधिस्तुत्यर्थत्वमेव पञ्चम्याद्युद्वाहविधिनामुपेयं, न तु अनुकल्पतयापि तत्कर्तव्यतार्थकत्वं सगोत्रां चैवमुद्वहन्निति दृष्टान्तेन बलवदनिष्टसाधनत्वावेदनादिति ।

इदानीं तृतीयोद्वाहमुत्थापयति—*यच्चिति । *तृतीये इति । दर्शपूर्णमासप्रकरणे स्रुग्व्यूहनार्थवादः एकस्मात् मिथुनाद्वावुत्पन्नौ मिथः सङ्कल्पयतः—तृतीये वा चतुर्थे वा विवहावहै इति तदर्थः । अत्र प्रमाणान्तराविरोधादर्थवादाद्विधिः कल्प्यः । *तृप्तामिति । "आयाहीन्द्र पथिभिरीळितेभिर्यज्ञमिमं नो भागधेयं जुषस्व" इति पूर्वार्धम् । ततश्चायमर्थः—हे इन्द्र त्वमीळितैः प्रशस्तैः पथिभिः मार्गैः नोऽस्माकं यज्ञमायाहि आगच्छ । आगत्य च तृप्तामाज्यप्लुतां वपां भागधेयं जुषस्व सेवस्व, तत्र द्वौ दृष्टान्तौ । मातुलस्य जुहुः अपत्यं योषा स्त्री भागिनेयस्य भाग इव, पैतृष्वसेयी च मातुलपुत्रस्य भाग इव चेति । गर्भे तु नौ जनिता दम्पतीकर्देवस्त्वष्टा सविता विश्वरूप इति । अयमर्थः—यमी यमं स्वभ्रातरं मैथुनार्थं याचितवती ततो यमेन प्रत्याख्याता वदति—क प्रजापतिः विश्वरूपो विश्वात्मा सविता त्वष्टा नौ आवयोर्गर्भे दम्पत

भैं तु नौ (१)जनिता दम्पतीकः' इति च मन्त्रवर्णात्,

*मातृष्वसृसुतां केचित्पितृष्वसृसुतां तथा ।
विवहन्ति क्वचिद्देशे सङ्कोच्यापि सपिण्डताम् ॥

इति शातातपोक्तेश्च मातुलकन्योद्वाहः कार्यः । यद्यपि पितृष्वसृकन्योद्वाहोऽपि प्राप्तस्तथापि ।

अस्वर्ग्यं*लोकविद्विष्टं धर्म्यमप्याचरेन्न तु ।

इति निषेधाद्वचनान्तरेण तदुद्वाहस्याविधानाच्च न कार्यः । अयं तु*दाक्षिणात्यशिष्टाचारात्कार्य इति । नच पूर्वोक्तश्रुतीनामर्थवादमात्रता मानान्तरेणा *सिद्धौ *'उपरि हि देवेभ्यो धारयति' इतिवदनुवादानुपपत्त्या विधिकल्पनात् । यत्तु शातातपः—

जनिता । तथाचावयोरपत्ययो(२)(र्भाविदम्पत्यनिश्चयात्तद्वरमावामेव दम्पतीभावाय इति । *मातृष्वसृसुतामिति । माता स्वसा यस्य स मातृष्वसा मातुलस्तत्सुतामित्यर्थः) मातुलस्य सुतामिति पाठान्तरात् । *लोकविदिति । लोचृ दर्शने । लोक्यते इति लोकम् इष्टानिष्टसाधनतया ज्ञायमानं सदसत्कर्म, तद्वेदिभिर्द्विष्टं द्वेषविषयीकृतं विहितमपि नाचरेदित्यर्थः, द्विष्टसाधनतया द्वेषोदयादिति भावः । *दाक्षिणात्येति ।

उद्वहेद्दक्षिणे विद्वान्मातुलस्य च वै सुताम् ।
उत्तरे नोद्वहेद्विप्रो ह्येष धर्मः सनातनः ॥
मातुलस्य सुतां विप्रो दक्षिणे तां समुद्वहेत् ।
वर्जनीया प्रयत्नेन सैव वाजसनेयिभिः ॥

इति आचारानुरोधिवाक्यात् । *असिद्धाविति । अप्राप्तार्थस्य स्तावकत्वासम्भवात् । *उपरि हीति । "अधस्तात्समिधं धारयन्नुद्रवेत्" इत्यस्योपरि हीति न स्तावकम्, अप्रसिद्धत्वात् । अतो यथा

---

[१] 'जनिना' ग० (२) कस्यान्तर्गतं नास्ति ख० ।

मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् ॥

यच्च मनुः—

पैतृ(१)ष्वसेयीभगिनीं स्वस्रीयां (२)मातुरेव च ।
मातुश्च भ्रातुरा*प्तस्य गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत् बुद्धिमान् ॥

यच्च व्यासः—

मातुः सपिण्डा यत्नेन वर्जनीया द्विजातिभिः । इति,

तद्*गान्धर्वादिविवाहोढमातृविषयम् । तत्र*पितृगोत्रानिवृत्तेः । अत एव मार्कण्डेयपुराणम्—

गान्धर्वादिविवाहेषु पितृगोत्रेण (३)धर्मवित् । इति ।

उपरि समिधं धारयन्ननुद्रवेदिति विधिः कल्प्यते, तथा मातुलसुतामुद्वहेदिति विधिः कल्प्य इत्यर्थः । *आप्तस्य सन्निकृष्टस्य सपिण्डस्य मातुलस्येति यावत् । *गान्धर्वादीति ।

ब्राह्मादिषु विवाहेषु ऊढा कन्या यदा भवेत् ।
भर्तृगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया ॥

इति प्रकृत्येत्यादि ।

गोत्ररिक्थे जनयितुर्न भजेदौरसः सुतः ।

इति मनुवाक्ये उद्देश्यविशेषणस्य पुंस्त्वस्याविवक्षितत्वेन कर्मणो जनककुले सम्बन्धनिवृत्तेः सापिण्ड्यस्यापि निवृत्तिरुक्ता। एवञ्च ब्राह्मादिविवाहे कन्यायाः दानसत्त्वेन सापिण्ड्यनिवृत्तेस्तत्परं मातुलकन्यापरिणयनवचनम् । आसुरादिषु तदभावान्न सापिण्ड्यनिवृत्तिरिति तत्पराणि प्रायश्चित्तवचांसीत्यर्थः । *पितृगो-

---

(१) 'पितृष्वसेयीं' क०
(२) 'मातुलस्य' क०
(३) 'धर्मवत्' क०

*ब्राह्मादिविवाहे तु परिणेयेति। भट्टसोमे(१)श्वरोऽपि तृतीयेऽध्याये वाक्यपादे मातुलकन्योद्वाहमुदाहृत्य स्मृतिविरोधेनाचारप्राप्तस्यास्य वार्तिके बाधोक्तावपि पूर्वोक्तश्रौतलिङ्गबलीयस्त्वादस्य कर्तव्यतामाह। तदेतद्दत्तकस्य पालकद*त्रिममातृसोदरकन्याविषयत्वेनासवर्णमातुलकन्याविषयत्वेन युगान्तर(२)परत्वेन चोपपन्नमपि*अविचारितरमणीयं यथा, तथास्तु; तथा(३)पि कलौ तावन्निषिद्धमेव।

ऋति। पितृसापिण्ड्येत्यर्थः। यथाश्रुते ब्राह्मादिविवाहे पितृसापिण्ड्यनिवृत्त्यनाधिधानेन हेतुन्यूनताप्रसङ्गात्। वस्तुतस्तु प्रागुक्तरीत्या दत्त्रिमवाक्ये पुंस्त्वविवक्षाया आवश्यकतया 'स्वगोत्राद्भ्रश्यते नारी' इत्येव गोत्रनिवृत्तिरिति सगोत्रत्वावच्छिन्नसापिण्ड्याभावान्मातुलकन्याविवाहो भवत्येवेत्याह-*ब्राह्मादीति। दत्तकस्य पालकेऽन्वयः। संबन्धिकतया देवदत्तस्य गुरुकुलमितिवत् दत्तकस्येति षष्ठीगतः (४)*दत्त्रिमेति। तत्र पालिके ये दत्तकृत्रिमे मातरौ तयोः सोदरेत्यर्थः। दत्तकस्य पालकमातृकुले त्रिपुरुषं पञ्चपुरुषं वा सापिण्ड्यं, परन्तु माता दत्तेति तत्पतिगृहीतृकुले एव तत् न तु तस्या जनककुले, एवं कृत्त्रिमाया मातुर्जनककुले तन्नास्तीति भावः। *अविचारितरमणीयमिति। विचार्यमाणे तु न रमणीयम्। तथाहि "गर्भे तु नौ" इति मन्त्रो मातुलकन्या परिणयवि-

---

(१) 'सोमश्वरेणापि' ख०।

(२) 'युगान्तरत्वेन' ख०।

(३) संस्कारकौस्तुभे तु-'कलावपि येषां कुले देशे अनुकल्पत्वेन सापिण्ड्यसंकोचः परंपरया समागतः, तेषां तादृशसंकोचेन विवाहे न दोषः। अस्ति च भार्यात्वोपपत्तिः। अन्येषां तैः सह व्यवहारे नैव दोषः। हेमाद्यादौ श्राद्धनिषेधोपि स्वकुलदेशे परंपरयाऽनागतसापिण्ड्यसंकोचेन कृतविवाहविषय एवेति बोध्यम्।' इत्युक्तम्।

(४) 'षष्ठीमतो कृत्त्रिमेति' ख० घ०ङ०।

धिं कल्पयितुं नालं, तथा सति "प्रजापतिरुषस्यभ्यैत् स्वां दुहितरम्" इत्यादावपि अन्योऽपि स्वदुहितरं गच्छेदिति विधिकल्पनापत्तेः। प्रत्यक्षस्मृत्यन्तरानुमितश्रुतिविरोधान्न तत्कल्पनमिति चेन्मातुलकन्यापरिणये किमयं पाणिपिहितः? तस्मात् पूर्वाचरितमत्र कीर्तितमित्येतावन्मात्रं ((१)विधिं कल्पयितुं नालम् ।) वस्तुतस्तु नौ आवां जनिता जनकः गर्भे तु गर्भ एव कः कृतवान् इत्येवार्थः। करिति रेफान्तदर्शनात्, जनितेत्यस्य अन्तोदात्तत्वेन तृजन्तत्वाच्च। लुडन्तत्वे तु "तिङ्ङतिङः"(अष्टा०सू०८-१ २८) इति निघातापत्तेः तस्मात् जनितेत्यस्य जनयिष्यतीति व्याख्यानमयुक्तम्। अत एव "नवा उ ते तन्वा तन्वां संपपृच्यां पापमाहुर्यः स्वसारं निगच्छत्। अन्येन मत् प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत्"इति यमोक्तप्रत्याख्यानं संगच्छते। अस्या अर्थः-हे सुभगे ते तव तन्वा शरीरेण तन्वां स्वां तनुं नवा उ नैव संपपृच्यां संपर्कयिष्यामि। कुतः? यः स्वसारं निगच्छन गच्छति तं लोका देवाश्च पापिष्ठमाहुः। तर्हि मत्संतोषः कथं स्यात्तत्राह-मत् मत्तः जायमानः प्रमुदः त्वम् अन्येन पुंसा कल्पयस्व अर्जयस्व। ते भ्राता यमः एतत्कर्म न वष्टि न काङ्क्षति इति। 'आयाहीन्द्र' इत्यपि च रागप्राप्तानुवादः। अप्राप्तार्थस्य हि "उपरि हि"इत्यादिवद्विधिकल्पकत्वं,न तु रागप्राप्तार्थकस्येति। यत्तु दानेन सापिण्ड्यं निवर्त्तते इत्युक्तं,तन्न, "दद्यान्माता पिता वा"इति हि पुंस्त्वविशिष्टमनूद्यैव संज्ञा कन्याया दत्रिमसंज्ञाविरहात्। दत्रिमममनूद्य च सापिण्ड्यनिवृत्तिर्विधीयमाना न कन्याया भवति। नन्वेवं दत्रिमस्य सापिण्ड्यनिवृत्तौ जनककन्यादिपरिणयनं स्यात् "ऊर्ध्वं सप्तमात् पितृबन्धुभ्यो मातृबन्धुभ्यश्च पञ्चमाद्बीजिनश्च सप्तमात्" इति वचनेन जनककुलेऽपि आसप्तमं विवाहनिषेधात्।

---

(१) कंसान्तर्गतं नास्ति ग०।

गोत्रान्मातुः सपिण्डाच्च विवाहो गोवधस्तथा ।

इत्या(१)दिपुराणात् । *माधवीये बौधायनोप्यस्य निन्दामाह—'पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथो(२)त्तरत ऊर्णाविक्रयोनुपेतेन स्त्रिया च सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृपरिणयनम्' इति । 'अथोत्तरतः (३)सीधुपानादिकमुक्त्वा इतर इतरस्मिन्कुर्वन्दुष्यति इतर इतरस्मिन्' इति । *भट्टसोमेश्वरेणापि स्मृतिविरुद्धानां मातुलकन्योद्वाहादीनामस्माद्वचनादप्रामाण्यमि-

स्वगोत्राद् भ्रश्यते नारी विवाहात्सप्तमे पदे ।

इति वचनात्तु गोत्रनिवृत्तिरिति । (४)(नचासुरादिविवाहेऽपि सप्तपद्यादेः सत्त्वाद्गोत्रनिवृत्तिप्रसङ्ग इति वाच्यं पूर्वोत्तराङ्गसहितदानमेव तन्निवर्त्तकम् । असुरादिषु) दानाभावान्न तन्निवृत्तिरिति(५) (माधवाचार्याणामपि मातुलकन्यापरिणये निर्भरो नास्तीत्याह—*माधवीये[ऽपि]इति। दक्षिणतः तथोत्तरतः यानि दक्षिणतस्तान्यनुव्याख्यास्यामः । यथाऽनुपेतेन स्त्रिया च सहभोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगमनमिति । अथोत्तरत ऊर्णाविक्रयः, शीधुपानं, उभयतोदद्भिर्व्यवहारः, आयुधीयकं समुद्रयानमिति पाठः। मातुलदुहित्रृगमनमित्यन्वयः । शीधु मद्यम् उभयतो दन्ता येषां तैः व्यवहारः क्रयविक्रयादिः, आयुधीयकम् आयुधेन जीवनम् । न च-तदनन्तरम् 'इतरस्मिन्कुर्वन् दुष्यति' इति बौधायनवाक्याद्दक्षिणे मातुलकन्यापरिणये कथं दोष इति वाच्यम् । विप्रतिपत्तिपदेनाचारत्वोक्तेः दुष्यतीत्यनेनापाङ्क्त्वाविशिष्टपातकोक्तेः । *भट्टसोमेश्व-

(१) 'इत्यादित्यपु' क० ।

(२) 'तथोत्तरतः यानि दक्षितसस्तान्यनुव्याख्यास्यामः यथैतदनुपेतेन स्त्रिया च' क० । (३) 'सिंधु' क० ।

(४) कंसान्तर्गतं नास्ति घ० ।

(५) कंसान्तर्गतं नास्ति घ०।

त्युक्तम् । बृहस्पतिरपि—

उद्वह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः ।
मत्स्यादाश्च नराः पूर्वे, व्यभिचाररताः स्त्रियः ॥
उत्तरे मद्यपाश्चैव स्पृश्या नृणां*रजस्वलाः ॥

इत्यनाचारत्वमाह । अत एव हेमाद्रौ मात्स्ये कर्नाटकादीनां तत्कारिणां श्राद्धे निषेधः । बोपदेवेनापि लिखितं ब्राह्मम्—

यत्र मातुलजोद्वाही यत्र वै वृषलीपतिः ।
श्राद्धं न गच्छेत्तद्विप्राः कृतं यच्च निरामिषम् ॥ इति ।

तस्मान्मातृतः पञ्च, पितृतः सप्त त्यक्त्वोद्वहेदिति

रेणापीति । प्राग्भट्टसोमेश्वरेण (१) (कर्तव्यत्वोक्तिविरोधस्तु न)

वसुदेवाङ्गजाता च कौन्तेयस्य विरुध्यते ।

इति भट्टपादैस्तदकर्तव्यत्वोक्तेस्तट्टीकायां भट्टसोमेश्वरेणापि तथोक्तेः । (नच सकललोकादर्शभूतस्य भगवतोऽर्जुनप्रद्युम्नादेर्मातुलकन्योद्वाहरूपदुराचारप्रवर्तकत्वं कथमिति वाच्यं युगान्तरीयत्वेनादोषात् । वस्तुतस्तु भगवतो नारायणत्वादर्जुनस्य नरत्वेन नारायणांशत्वाद्रुक्मिपर्यंशभूतसुभद्राविवाहो न मानुषः । शास्त्रस्य मनुष्याधिकारत्वाच्च तत्र न प्रवृत्तिः । किञ्च देवादिभिः कृतं मनुष्यैर्न कार्यम् ।

अनुष्ठितं च यद्देवैर्मुनिभिर्यदनुष्ठितम् ।
नानुष्ठेयं मनुष्यैस्तत्तदुक्तं धर्ममाचरेत ॥

इति बौधायनोक्तेः । *रजस्वला इति ।

सनाताश्चापि गृह्णन्ति भ्रातृभार्यामभर्तृकाम् ।
सर्वदेशेष्वनाचारो रथ्याताम्बूलचर्वणम् ॥

इत्युत्तरश्लोकेनानाचारत्वं प्रतिपाद्यते । तस्य ईदृशकर्मणि प-

---

(१) कंसान्तगतं नास्ति घ० ।

*सिद्धम् ।

संबन्धविवेके सुमन्तुः-'ब्राह्मणानामेकपिण्डस्वधानामादशमाद्धर्मविच्छित्तिर्भवति, आसप्तमाद्रिक्थविच्छित्तिर्भवति, आतृतीयात्पिण्डविच्छित्तिः, अन्यथा (१)पिण्डशौचक्रियाविच्छेदाद्(२)ब्रह्महतुल्यो भवति ।' अस्यार्थमाह शूलपाणिः-'जीवत्पित्रादित्रिकस्य वृद्धप्रपितामहादयस्त्रयः श्रा(३)द्धदेवतात्वात्पिण्डभाजो भवन्ति, तदूर्ध्वं त्रयो नवपुरुषपर्यन्ता लेपभाजः, श्राद्धकर्ता च दशम इति दशमादूर्ध्वं*सापिण्ड्यनिवृत्तिः । दशमादित्युपलक्षणम् । तेन पितृपि(४)तामहजीवने नवपुरुषपर्यन्तं, पितृजीवने चाष्टपुरुषपर्यन्तं सापिण्ड्यमिति ज्ञेयम् । अपुत्रधनग्रहणे संनिहितानाभावे सप्तपुरुषपर्यन्तमधिकारः धनग्राहिणमारभ्य तृतीयः पौत्रः तदूर्ध्वं श्राद्धविच्छेदः । अन्यथा धनहारित्वेऽपुत्रश्राद्धाद्यकरणे ब्रह्म-

---

रलोकभयमात्रं न त्वैहिकभयमिति तात्पर्यम् ।*सिद्धमिति ।(५)(नन्वसपिण्डापर्युदासेन सपिण्डोद्वाहनिवृत्तिर्न लभ्यते) इति चेत् ? न, सपिण्डोद्वाहे प्रायश्चित्ताम्नायेन सपिण्डोद्वाहनिषेधे पर्युदासपर्यवसानात्, प्रायश्चित्तस्य वा पर्युदासातिक्रमनिमित्तकत्वात् ।

"दशभिः पुरुषैः रूपाताच्छ्रोत्रियाणां महाकुलात्।
उद्वहेत्सप्तमादूर्ध्वम्" इत्यत्र तादृशमहाकुलादूर्ध्वं तदभावे सप्तमादूर्ध्वमुद्वहेदिति मतमाह-सम्बन्धेति । धर्मविच्छित्तिपदार्थमाह-*सापिण्ड्यनिवृत्तिरिति । इत्यर्थ इत्यन्तः शूलपा-

---

(१) 'पिण्डाशौच' क० ।
(२) 'ब्रह्महत्यातुल्या भवन्ति' क० ।
(३) 'श्राद्धदैवता' क० ।
(४) 'पितृमातामह' क० । (५) कंसान्तर्गतं नास्ति घ० ।

हेत्यर्थः। *आ तृतीयादित्यनूढकन्याविषयम्, 'अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते' इति वसिष्ठोक्तेः। एतच्चाशौचविषयं सापिण्डयं, न तु विवाहादौ। तत्र पूर्वोक्तवचनैः पञ्चमत्वसप्तमत्वनियमादिति मेधातिथिप्रमुखा दाक्षिणात्याः। *वाग्दानोत्तरमेतदिति शुद्धिविवेकः। मातृकुलविषयं कानीन(१)कन्यकाविषयं चैतत्। अन्यथा—

अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषम्।
प्रत्तानां भर्तृसापिण्ड्यं प्राह देवः प्रजापतिः॥

इति कौर्मेण विरोधः स्यादिति रत्नाकरस्मृतितत्त्वादिगौडग्रन्थाः। युक्तं चैतत्, अन्यथा कन्योत्पत्तौ पुरुषत्रयपर्यन्तमेव सूतकं स्यान्नोर्ध्वम्।

*सापत्नमातामहकुले त्वाह मिताक्षरायां शङ्खः—

यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः।
एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्तते त्रिषु॥

पृथक्क्षेत्राः भिन्नजातीयस्त्रीषु जाताः। पृथ(२)ग्ज-

णिग्रन्थः। अत्रदर्शपर्यन्तं सापिण्ड्यसत्त्वं दूषयितुमाह-*आतृतीयादिति। एतन्मते धर्माविच्छित्तिरित्यस्य लेपकरणान्तो धर्मस्तस्य विच्छित्तिरित्यर्थः। आसप्तमादिति च छलत उपेताशौचविषयम्। *वाग्दानोत्तरमिति। मतद्वयं चाशौचसापिण्ड्यप्रपञ्चः।

*सापत्नेति। असवर्णायाः सवर्णाया वा सापत्नमातुर्जनकतया सापत्नमातामहो द्वेधा। तत्राद्यामादाय पृथक् क्षेत्रा इति, अन्त्यामालम्ब्य पृथग्जना इति। ते एकपिण्डाः सपिण्डाः। पृथक्

---

(१) 'कानीनकन्या' क०।
(२) 'पृथग्जनाः' नास्ति क पुस्तके।

नाः सजातीयभिन्नमातृषु जाताः। *अत्र त्रिपुरुषं सापिण्ड्यमिति विज्ञानेश्वरो व्याचख्यौ। पृथ्वीचन्द्रोदये सापिण्ड्यदीपिकायां चैवम्। मदनपारिजाते तु पृथक्क्षेत्रजाः भिन्नमातृजाः, पृथग्जनाः भिन्नजातीयाः। *एतद्धि*जातीयसापत्नमातृकुलविषयम्। सवर्णसापत्नमातृकुले चतुःपुरुषं सापिण्ड्यम्,

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा।

इति वसिष्ठोक्तेः। *सप्तमीमिति ब्राह्मणादीनां*क्षत्रियादिदारोत्पन्न(१)पितृकुलविषयं चेत्युक्तं तत्स्व*कपोलकल्पितत्वात् ग्रन्थान्तरविरोधाच्च निर्मूलम्, *'पितृपत्न्यः सर्वा मातरः' इत्युक्त्वा सुमन्तुना 'तदपत्यानि

शौचाः। शौचं तु आशौचप्रकरणे वक्ष्यति। पृथक् शौचत्वं भिन्नजातीयत्वात्। पिण्डः एकशरीरावयवान्वयः। सापिण्ड्यं त्रिषु अतीतेषु आवर्त्तते निवर्त्तते इति। अस्य तात्पर्यमाह-*अत्रेति। सजातीयानां सापत्नमातामहकुले त्रिपुरुषं मातामहपर्यन्तं सापिण्ड्यमत्राशौचे आशौचानुकूलमित्यर्थः। *एतत् त्रिपुरुषसापिण्ड्यम्। *विजातीयेति। तादृशमातुः प्रसवे तदुत्तमरणे वा इति यावत्। मातृतः पञ्चमीमिति। पिण्डः (?)त्यजेदित्यर्थः। तथा च चतुःपुरुषं सापिण्ड्यमित्याशयः। पितृतः सप्तमीं त्यजेत्। पिण्ड इत्यस्य विषयमाह-*सप्तमीमिति। *क्षत्रियादीति। क्षत्रियादिदारोत्पन्नस्य यत्पितृकुलमित्यर्थः। तत्र षट्पुरुषं सापिण्ड्यमित्यर्थः। इदमपि सापिण्ड्यद्वयमाशौचोपयोगि। *स्वकपोलेति। *पितृपत्न्य इति। (२) (भ्रातॄणां मातुलत्वे भगिनीनां

---

(१) 'दारोत्पन्नमातृकुल' क०।

(२) कंसान्तर्गतं ङ पुस्तके नास्ति।

भागिनेयानि' इति पृथङ्निषेधाच्च । अन्यथा सापिण्ड-त्वेन निषेधात्सापत्नमातुलत्वादिनिर्देशो व्यर्थः । अत एव तेन स्मृतिकौमुद्यां सवर्णसापत्नमातामहकुलपरत्वेन तथैव शङ्खवचनं व्याख्यातम् । तेन वासिष्ठं 'पञ्चमीं स-प्तमीमतीत्य' इति व्याख्येयम् । तस्मात्प्राच्येव व्याख्या युक्ता । *प्रयोगरत्ने भट्टैः स्मृतितत्त्वादिगौडग्रन्थेषु च सपत्नमातामहकुले यावदुक्तं वाचनिकमेव सापिण्ड्य-मुक्तम् । यथाह सुमन्तुः—*'मातृपितृसं(१)बद्धा आ सप्त-मादविवाह्या भवन्ति, *आ पञ्चमादन्येषां, पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसा-रस्त*द्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि; अ-न्यथा संकरकारिणः स्युस्तथाध्यापयितुरेतदेव' इति ।

मातृष्वसृत्वस्यार्थसिद्धत्वेन वसिष्ठवाक्यस्य विवाहसापिण्ड्यपरत्व-मेव, पञ्चमीत्यादिस्त्रीलिङ्गनिर्देशात् । तस्याशौचसापिण्ड्यपरत्वं तु कल्पितमित्यर्थः । ग्रन्थान्तरमिति । तत्र त्रिपुरुषं सापिण्ड्योक्त्या चतुःपुरुषे तद्विरोधः । अत्र पाठान्तरं फल्गुत्वान्नादृतम् । तत् मातामहसंततौ कियद्दूरमविवाह इत्यत्राह—*प्रयोगेति । *मा-त्रिति । पिता च माता च इति विग्रहः । अन्येषां मातृसंबन्धात् आप-ञ्चमादविवाह्याः । मातरमारभ्य पञ्चमं विना चतुर्थपर्यन्तं ये संब-न्धास्ते विवाहप्रतिकूला इत्यर्थः । तत्र वरकन्यान्यतरस्य वैमातृ-काणां त्वाह—*आपञ्चमादिति । एवमन्येषां पितृसंबन्धा आस-प्तमादविवाह्या इत्यत्रापि भ्रातॄणां मातुलत्वे भगिनीनां मातृष्वसृ-त्वस्यार्थसिद्धत्वेन 'तद्भगिन्यो मातृष्वसारः' इत्यस्य पाठाभावेऽपि न कश्चिद्दोषः । *तद्दुहितर इति । तयोः तद्भ्रातृतद्भगिन्यो-

---

(१) 'सम्मन्धा' क० ।

दुहितर इत्यर्थः, तदपत्यानीति सामान्योपादानात्। अत्र कोचि
यावद्वचनं वाचनिकमिति न्यायेन परिगणितेष्वेव सापिण्ड्यं न
सप्तमादिपर्यन्तमित्यर्थमाहुः। वस्तुतस्तु यावदुक्तं वाचनिकमि
स्यायमभिप्रायः-वाक्यभेदपरिहाराय सपत्नमातामहात्कूटस्थाच्च
पुरुषं सापिण्ड्यमातिदेशिकमनेन विधीयते। अतो मातुलदुहि
ष्विव तत्पुत्रेष्वपि (सा (१)पिण्ड्यात्कन्यायाः) सपत्नमातुल
त्रेण न विवाहः। तद्दुहितर इत्यत्र तत्पदं मातुलतद्भगिन्योः पर
मर्शार्थम्। दुहितृपदं पुत्राणामप्युपलक्षणम्। तदपत्यानीति तत्प
च दुहितृपुत्रयोः परामर्शार्थम्। तेन तदपत्यानीत्यस्य दुहित्रपत्य
नि पुत्रापत्यानि चार्थः। तदयमर्थः-मातृभगिनीदुहित्रपत्यशब्द
ऽसपत्नमातामहात्कूटस्थात् चतुर्थमभिव्याप्य सपत्नमातामहकु
लक्षयित्वा तेन सह यस्य सपत्नमाता तस्य मातुलमातृष्वसृभा
नीभागिनेयपदैर्लक्षितं (सा (२)पिण्ड्यं विधीयते। एवञ्च य
सपत्नमाता तदपत्यस्यासापिण्ड्येऽपि निषेधः,)

असपिण्डा च या मातुरसगोत्रा च या पितुः।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने॥

इति मानवनिषेधात्। अत्र चकारेण पितुरसपिण्डापि ग्राह्य
एवं चकारेण मातुरसगोत्रापि ग्राह्या। तेन दत्रिमस्य यः प्रति
ह्रीता स तज्जनन्या असपिण्डोऽपि सगोत्र इति तत्कुलनिवृत्तिः
दारकर्मणि दारत्वसंपादके विवाहादौ। मैथुने मिथुनसाध्येऽन्य
धानादौ। ननिवदं 'पञ्चमात्सप्तमादूर्ध्वम्' इत्यनेन समानार्थमेवास्
लक्षणापत्तेः। नचैवं मातृतः षष्ठे पितृतोऽष्टमे वा विवाहो न स्य
त् कन्याया मात्रादिसापिण्डत्वादिति वाच्यं, मातुः पितुर्वा सगोत्र
सपिण्डां च नोद्वहेदिति हि मनुवचनं पर्यवसन्नं, तच्च नौपदेशिक
सापिण्ड्येन प्रवर्त्तते षष्ठाष्टमयोः पञ्चमात्सप्तमादूर्ध्वमित्यभ्यनुज्ञान

(१) कंसान्तर्गतं नास्ति घ० (२) कंसान्तर्गतं नास्ति घ०

त्, तादृशीमपि वैधीं प्राप्तिमुपजीव्य निषेधप्रवृत्तौ विकल्पाप्रवृत्तेः किन्त्वातिदेशिक एव । तत्र कस्यचिदुद्वाहविधेरभावाद्रागप्राप्तस्यैवायं निषेध इति न कस्यापि बाधः । अन्ये तु एवंविधलक्षणाङ्गीकारो व्यर्थः । यत्रैकरूपेण बुबोधयिषा 'काकेभ्यो दधि'इत्यादौ तत्रैव हि लक्षणा, न तु प्रकृते, सपत्नमातरि विवाहप्रसक्त्यभावेनेह शसापिण्ड्यातिदेशवैयर्थ्यात् । तस्मात् पितृपत्नीत्वावच्छेदेन मातृत्वमतिदिश्यत इत्येक एवायमतिदेशविधिः । तद्वशाच्च तद्भ्रात्रादिसन्ताने भगिनीत्वादिकथनं मुख्यभ्रात्रादिसंतानवद्विवाहवत्प्रतिबन्धकतापरम् । एवञ्च तदपत्यानां भागिनेयत्वातिदेशेऽपि तत्कन्यानां न भागिनेयकन्यात्वापत्तिः मातुलकन्यानां भगिनीत्वातिदेशेऽपि तत्सुतानां न भ्रातृत्वातिदेश इति परिगणितेष्वेव सापिण्ड्यमिति पक्षं समर्थयन्ते । तदेतदपेशलम् । एवं हि लोभेन विवाह्यानां कन्यानां बहुतरत्वं संपादयसि, सपत्नमातुलदौहित्र्या अविवाह्यत्वे सपत्नमातुलपौत्र्या विवाह्यत्वे इष्टापत्तिं च करिष्यसि, तदेतत्सर्वमनुचितमिति । तस्मात्पितृपत्न्यां मातृत्वोक्तिः तद्भ्रातरि मातुलोक्तिश्च तत्पितुः कूटस्थत्वप्रकाशार्था । मातुलाद्युपादानं च द्वितीयतृतीयगणनार्थम् । मातृष्वसार इति च सन्तानभेदप्रदर्शनं कूटस्थत्वदृढीकाराय । तत्पाठाभावे तु मातृमातुलाभ्यामेव तद्व्यक्तिः । भगिनीत्वादिकथनं च तदुद्वाहस्यात्यन्तनिन्द्यत्वार्थम् । व्यक्तिचतुष्टयगणनञ्च तदग्रे उद्वाहप्रतिबन्धवारणाय । किञ्च मातृत्वातिदेशोऽपि तत्पुत्रादौ भ्रातृत्वाद्यतिदेशाभावे तत्पौत्रीदौहित्र्योर्विवाहः प्रसज्येत लोकविद्विष्टत्वात्तद्वारणमिति चेत? तर्हि (मा(१)तुलपुत्र्यादिविवाहस्यापि तथैव सुवारत्वाद्भगिनीत्वाद्यतिदेशमपि त्यजेः । तस्मात्तादृश) कूटस्थात्पञ्चमीमुद्वहेदित्यर्थः । आतिदेशिकसापिण्ड्यमिति च विवाहप्रतिबन्धकतायां परिभाषामात्रम् तादृशपरिभाषा च "अस

[१] कंसान्तर्गतं नास्ति घ०

आ पञ्चमादिति मातृकुले त्रिगोत्रान्तरितविषयं वेति *प्राच्याः। मात्स्ये—

समानप्रवरा चैव *शिष्यसन्ततिरेव च।
*ब्रह्मदातुर्गुरोश्चैव सन्ततिः प्रतिषिध्यते॥

तद्भगिन्यो मातृष्वसार इति तु आकरे न पठितम्। क्वचिद्वचनादविवाहः। (१)यथा गृह्यपरिशिष्टे-'अविरुद्धसम्बन्धामुप(२)गच्छेत इत्युक्त्वा विरुद्धसम्बन्धः स्वयमेवोक्तः। यथा*'भार्यास्वसुर्दुहिता पितृव्यपत्नी स्वसा च' इति। बौधायनः—

मातुः सपत्न्या भगिनीं तत्सुतां च विवर्जयेत्।
((३)पितृव्यपत्न्या भगिनीं तत्सुतां च विवर्जयेत्)॥

अतो मातृष्वसुः*सापत्नपुत्रकन्याप्यविवाह्या। 'सापिण्डा च या मातुः" इत्यादावुपयोगिनी। अन्यथा वरकन्यान्यतरस्य पितृमातृसम्बन्धिसप्तमपञ्चमान्तर्गतस्य सपत्नमातृसम्बन्धिचतुर्थान्तर्गतस्य च विवाहे इयर्थोपगमान्न कोपि विरोध इति। *प्राच्या इत्यरुचिः स्पष्टैव। अध्यापयितुरेतदेवेत्युक्तं स्पष्टयति—*शिष्येति। *ब्रह्म गायत्री। केचित्तु पुरुषत्रयमित्यग्रेऽनुपदं स्पष्टम्। *भार्येति। अत्र वध्वा वरो भ्रातृस्थानीयः। अत्र भार्यास्वसानिषेध आर्थिकः। एतदर्थकमेव "मातुः सपत्न्या" इति बौधायनवाक्यं, मातुः सपत्न्या अपि भार्यात्वेन सङ्ग्रहात् पितृव्यपत्नीस्वसुः सुतायाः वारणार्थं तत्। अतो विरुद्धसम्बन्धस्य हेयत्वात्। *सापत्नेति। मातृष्वसुः सपत्नी सापत्नमातृस्थानीयेत्यर्थः। पितृव्येति। अत्र वरस्य वधूर्मातृस्थानीयेति (स(४)म्बन्धविशेषः।)

(१) 'तथा च' क०
(२) 'मुपयच्छेत' क० ख०
(३) कंसान्तर्गतं नास्ति क०
(४) कंसान्तर्गतं नास्ति घ०

पन्नमातृकुलजाम्' इति मदनपारिजातोक्तेरिति केचित् । केचित्तु 'ज्येष्ठो भ्राता पितुः समः' इति मनूक्तेस्तत्पत्न्याः मातृत्वात्तत्पितुर्मातामहत्वाज्ज्येष्ठभ्रातृपत्नीभगिनी न विवाह्या । तथा—

उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता ।

इति मनूक्ते*गुरुणा त्रिपुरुषं सापिण्ड्यम्, सखापि निर्वाप्यः, अतस्तेषां कन्या नोद्वाह्याः,

गायत्र्या उपदेष्टुश्च कन्यां नैवोद्वहेद्द्विजः ।
*गुरोश्च कन्यां शिष्यो वा तत्सन्तत्यापि नेष्यते ॥
पुरुषत्रयपर्यन्तं*भ्रात्रादेर्नैतदिष्यते ।

---

*गुरुणेति । गुरुणा त्रिपुरुषं सखापि निर्वाप्य इति पाठः । *गुरोरिति । गायत्र्युपदेशाकरणेऽपि चतुर्दशविद्याद्यन्यतमस्य चतुःषष्टिकलान्यतमकलाशास्त्रस्य वाऽध्यापकस्य चेत्यर्थः । ततः तस्मात् तेन गुरुणापि पुरुषत्रयपर्यन्तामित्यन्वयः, तत्सन्तत्या चेति पाठान्तरं सुगमम् । एवञ्च शिष्यसन्ततिरपि पुरुषत्रयपर्यन्तं ग्राह्या । *भ्रात्रादेः गुर्वादिभ्रात्रादेः सन्ततौ उद्वाहनिषेधो नेत्यर्थः । (गु(१)रुणा सापिऽण्ड्यं सखापि निर्वाप्यः । निर्वाप्यापिण्डान्वयरूपसापिण्ड्यमित्यर्थः । गुरोः सख्युश्च त्रिपुरुषं न विवाह इति यावत्) सर्वोपि निर्वाप्य इति पाठः सुगमः । केचित्तु गायत्रीदातृमात्रस्य कन्या त्याज्या, न तु गोत्रं कुलं च,

सावित्रीं यस्य योऽदद्यात्तत्कन्यां न विवाहयेत् ।
तद्गोत्रे तत्कुले वापि विवाहो नैव दोषकृत् ॥

इति वचनादित्याहुः । एतत्स्वगोत्राज्ञानविषयमिति नारायणः ।

गुरोः सगोत्रप्रवरा नोद्वाह्या क्षत्रवैश्ययोः ।
स्वगोत्राद्यनभिज्ञैस्तु विप्रैराचार्यगोत्रजाः ॥

---

(१) कंसान्तर्गतं घ पुस्तके नास्ति ।

वाक्सम्बन्धकृतानां तु स्नेहसम्बन्धभागिनाम् ॥
विवाहोऽत्र न कर्तव्यो लोकगर्हा प्रसज्यते ॥

इति वचनाच्चेत्याहुः । *तत्र मूलं चिन्त्यम् ।

दत्तकविषये तूच्यते । तत्र गौतमः-'ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात्' इति । बन्धुग्रहणान्न दत्तकमात्रपरमिदं, किन्तु सन्तानेऽपि । एतत्क्षेत्रजादि*सर्वद्वयामुष्यायणपरमिति हरदत्तः । अत्र

इति विशेष इत्यप्याहुराचार्याः । *तत्रेति । शाखान्तरे सखित्वदीक्षोक्तेस्तत्परमेव वाक्सम्बन्धकृतानामिति । (१)यथाश्रुतार्थे मूलमित्यर्थः ।

बन्धिति तादर्थ्ये चतुर्थी । तथाच पालकपितृघटितसन्तानभेदारम्भककूटस्थादिसमुदायार्थः पालकपितृप्रभृतिसन्तानार्थश्च यः सप्तमस्तस्मादूर्ध्वमित्यर्थः ।) *सर्वेति । यदा क्षेत्री रुग्णो बन्धुभ्यः प्रार्थयते मम (२)क्षेत्रे पुत्रमुत्पादयेति, यदा वा सन्तानक्षये गुरवो विधवां नियुञ्जते, यथा त्रिचित्रवीर्यक्षेत्रे सत्यवती व्यासं, तत्र जातः पुत्रः क्षेत्रिणो बीजिनश्चेति द्व्यामुष्यायणः ।

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ (३)रिक्थी पिण्डदाता च धर्मतः ॥

इति याज्ञवल्क्यात् । अत्रोभयत्रापि संवित्करणं द्व्यामुष्यायणत्वबीजम् ।

तथैवाक्षेत्रिणो बीजं परक्षेत्रे प्रवापिणः ।
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥
क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत्प्रदीयते ।
तस्येह स्वामिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥

---

(१) गुरुणा सापिण्ड्यं सखापिनिर्वाप्यः घ०, कंसान्तर्गतंनास्ति
(२) क्षेत्रमुत्पादयेति घ० (३) सौरिक्थापिण्ड घ० ।

स्मृतिचन्द्रिका-'नियोगात् य उत्पादयति तस्माद्वी*जिनोप्यूर्ध्वं सप्तमादित्यर्थः'इति । *दत्तकस्य*जनकविषयमेतदिति सापिण्ड्यमीमांसायाम् । *तेन दत्तकस्य जनककुले सासपौरुषं, जननीकुले पा(१)श्चपौरुषं सापिण्ड्यम् ,

दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिण्डता ।
सप्तमी पञ्चमी चैव गोत्रित्वं पालकस्य च ॥

इति बृहन्मनूक्तेः, 'बीजिनश्च' इति गौतमोक्तेश्च । पालकपितृकुले तु पञ्चपुरुषम्, पालकमातृकुले त्रिपुरुषम् । तथा चापरार्के पैठीनसिः-'त्रीन्मातृतः पञ्च पितृतः पुरुषानतीत्योद्वहेत्' इति । एतत्स एव व्याचख्यौ-'दत्तका-

---

इति मनूक्तेः । व्याख्यातं चैतत् । (२)यत्तु—

य एतेऽभिहिताः पुत्राः प्रसङ्गादन्यबीजजाः ।
यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु ॥ इति,

तत्तु सत्यौरसपुत्रे पुत्रिकायां च न ते कार्या इत्येवंपरम् । एवं स्वयंदत्ते ब्यामुष्यायणः। यथा बह्वृचब्राह्मणे 'देवरातो यथैवाङ्गिरसः सन्नुपेयां तव पुत्रताम्' इत्यादिना 'अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः'इत्याद्यन्तेन जातोपनयनो ब्यामुष्यायण उक्तः, "दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणार्षेण जातास्ते असम्मतकुलीना ब्यामुष्यायणाः"इति पैठीनस्युक्तेः। नचेदं दत्तकमात्रविषयं 'गोत्ररिक्थे जनयितुः' इत्यनेन विरोधात् । एवम् अन्येतुमते प्राक् ब्यामुष्यायणा उक्तास्ते चेह वर्तव्याः । *बीजिनोपि अपिना क्षेत्री समुच्चीयते । एतन्मते ब्यामुष्यायणान्तरानुक्तेर्न्यूनता । *दत्तकस्येति । अयं ग्रन्थो ब्यामुष्यायण एव दत्तकः संस्कारानन्तरं च स नास्तीति मतेन । *जनकेति । न तु पालकविषयम् ।

---

(१) 'पञ्चपौरुषं' ख० (२) यत्तु मनुः परातेऽभि घ०

दीन्पुत्रान् पितृपक्षतो निवृत्त *पिण्डगोत्रार्षेयान्प्रत्येत-दुच्यते पञ्च पितृत इति, ना(१)न्यान्प्रति' इति । यत्तु वृद्धगौतमः—

स्वगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः ।
विधिना गोत्रमायान्ति न सापिण्ड्यं विधीयते ॥

यच्च वसिष्ठः—

अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः ।
स्वगोत्रेण स्वशाखोक्तविधिना स्यात्स्वशाखभाक् ॥

इति । यच्च नारदः—

धर्मार्थं वर्धिताः पुत्रास्तत्तद्गोत्रेण पुत्रवत् ।
*अंशपिण्डविभागित्वं तेषु केवलमीरितम् ॥

तत् पालककुले साप्तपौरुषं सापिण्ड्यं नेत्येवंपरं, न(२)तु सर्वथा सापिण्ड्यनिषेधपरमिति सापिण्ड्यमीमांसायाम् । *मदनपारिजाता(३)दपि दत्तकानुप्रवेशेऽल्पं सापिण्ड्यं प्रतिभाति । तथाहि, तेन त्रीनतीत्येत्युदाहृत्य *यस्य माता दत्तपुत्री प्रतिग्रहीत्रा पुत्रीकृता तस्याः प्रतिग्रहीतृकुले त्रीनतीत्येति, पञ्च पितृत इति तत्र (४)न्यूनसापिण्ड्यादित्याह—*तेनेति । *पिण्डः सापिण्ड्यम्, आर्षेयं प्रवरः । अयं ग्रन्थः केवलदत्तकाभावात्केवलासगोत्रदत्तकपरः । स्वगोत्रेणोपनायित इत्यन्वयः । गोत्रपदात्सापिण्ड्यनिवृत्तिरित्यभिमानः ? *अंशपिण्डविभागित्वम् अंशपिण्डशून्यत्वमित्यभिमानः । *मदनेति । एतन्मते जनकपरमेव पालकस्य गोत्रित्वमात्रं, तत्कथम् ? पञ्च मातृत सप्त पितृतोतीत्येत्यनेन विरोधात् । अतो दत्तकानुप्रवेशोऽङ्गीकृतः । *यस्येति । दत्तस्य

(१) 'नान्यत्प्रतीतिः' क० (२) 'ननु' क०
(३) 'जातादावपि' क० (४) न्यूनतासापि ब०

यस्य दत्तपुत्रः पिता तस्य दत्तस्य यज्जनककुलं तद्विषयमित्युक्तम्। वस्तुतस्तु पूर्ववचसां महानिबन्धेषु काप्यनुपलम्भादपरार्कादिलिखनाभावात् पूर्वोक्तव्यवस्थायाश्च प्रतिभज्ञानतुल्यत्वाद्यैरेतल्लिखितं तेषामेव शोभते।

मम तु पालककुले एकपिण्डदानक्रियान्वयित्वरूपं सप्तपौरुषमेव सापिण्ड्यम्। 'बीजिनश्च' इति गौतमोक्तेर्जनककुलेपि तावदेव। 'त्रीन् मातृतः' इत्यादि तु सवर्णसापत्नमातृकुलपरं, 'यद्येकजाता बहवः' इति शाङ्खैकवाक्यत्वादिति युक्तं प्रतिभाति। अत एवास्य द्व्यामुष्यायणत्वं हेमाद्रिप्रवरमञ्जरीवृत्तिकृन्नारायणादिभिरुक्तम्। भट्टसोमेश्वरेणापि-'पृथायाः कुन्तिभोजस्य पालककन्यात्वेपि ऊर्ध्वं सप्तमात् पितृबन्धुभ्यो बीजिनश्च' इति गौतमोक्तेर्दत्तिमायाः पृथायाः जनकस्य शूरसेनस्य कुलेपि सप्तपौरुषं, पालककुलेपि तावदेव सापिण्ड्यमुक्तम "अपि वा कारणाग्रहणे" (जै० सू० ४-१-३-५) इत्यत्र। सापिण्ड्यदीपिकायां तु दत्तक्रीतादीनां जनकगोत्रेणोपनयने कृते जनककुले सप्तपौरुषं सापिण्ड्यम्, पालकमातापितृकुले त्रिपुरुषम्, पिण्डनिर्वापान्निर्वाप्यलक्षणं त्रिपुरुषं सापिण्ड्यम्, पालकगोत्रेणोपनयने तत्कुले सप्तपौरुषमित्युक्तम्। तन्न,

चूडोपायनसंस्कारा निजगोत्रेण वै कृताः।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते॥

इति कालिकापुराणादुपनयनोत्तरं दत्तकनिषेधात्। त्रिपुरुषमित्यत्रापि मूलं मृग्यमित्यलं बहुना।

मातापितृद्वारकसापिण्ड्यवतीनां कन्यानामियं संख्या

रामवाजपेयिनोक्ता—

*उद्वोढुः पितरौ पितुश्च पितरौ तज्जन्मकृद्दम्पति-
द्वन्द्वं तस्य चतुष्कमष्ट च ततोऽप्यस्य क्रमात्षोडश।
वंशारम्भकदम्पतीप्रमितिरित्यासप्तकक्षं रदा
*एकैकान्वयकन्यकाः पितृकुले त्वासप्तकक्षं ब्रुवे॥
*यद्यप्येकस्य बहवः सुताः स्युस्तदपीह तु।
सम्बन्धसाम्यादेकैव गणितेत्यवधार्यताम्॥
*एकस्मान्मिथुनात्सुतोथ दुहिता द्वन्द्वद्वयं तद्भवात्
तस्माद्वन्द्वचतुष्कमष्ट च ततोऽतः षोडशाऽतो रदाः।
यावत्सप्तमकक्षमग्निकृतवः कन्या इहैकान्वये
ता दन्तैर्गुणिता रसैकखदृशो वंशे सपिण्डाः पितुः॥

पुत्री दत्ता तत्र प्रतिग्रहीतृकुले प्रतिग्रहीता ततोदत्ततोदत्तेति त्रि-पुरुषस्य प्रतिग्रहीतुरित्य(१)र्थः।

*उद्वोढुरिति। वरः प्रथमः, ततो द्वितीयस्थाने स्थितं वर-पितरौ द्वन्द्वं, तृतीयस्थाने पितुः पितरौ द्वन्द्वं, चतुर्थस्थाने तयोः प्रत्येकं जनके द्वन्द्वे पञ्चमस्थाने द्वन्द्वद्वयघटकपुंद्वयस्त्रीद्वययोः जनक-द्वन्द्वानि चत्वारि, षष्ठस्थाने तद्घटकाष्टसङ्ख्यस्त्रीपुंव्यक्तिजनकानि द्वन्द्वानि अष्टौ, सप्तमस्थाने तद्घटकषोडशव्यक्तिजनकानि द्वन्द्वानि षोडश इति। रदाः दन्ताः द्वात्रिंशत् द्वन्द्वानि। आसप्तकक्षं वंशा-रम्भकदम्पतिप्रमितिरित्यन्वयः। इतः परं तत्कन्याः प्रतिजा-नीते—*एकैकेति। पितृकुले आसप्तकक्षम् एकैकान्वयकन्यकाः ब्रुवे इत्यन्वयः। एकैकस्य द्वन्द्वस्यान्वये यदि कन्याद्वयादि तत्र सं-ख्याद्वैगुण्यमाशङ्क्य समाधत्ते—*यद्यपीति। सुगमम्। उक्तद्वात्रिं-शद्वन्द्वानां मध्ये एकद्वन्द्वं कुले उद्वोढुः सपिण्डकन्यानां (२)त्रिष-ष्टिरूपामवान्तरसंख्यामाह—*एकस्मादिति। प्रथममेकं मिथुनं,

---

(१) 'रित्यर्थः। दत्तकः' ख० ङ० (२) 'त्रिषष्टिरूपा' घ०।

*मातुर्जन्मददम्पती च मिथुनद्वन्द्वं तयोः सार
तस्याः पञ्चमकक्षमश्वमितिरित्येकान्वयः पुंसुत
द्वन्द्वाद्द्वन्द्वयुगं ततोऽब्धय इतोऽष्टौ पञ्चकक्षं
क्षोण्यः सप्तगुणाः शराभ्रविधवो मातुः सपिण्डा
*कुलद्वयस्य कन्यकायुता मिथः सपिण्डकाः ।
हिमांशुदग्धरादृशो विवाहकर्मवर्जिताः ॥ इ
एतच्च सर्ववर्णसाधारणं, सर्वत्र सापिण्ड्यसद्भावा

ततः पुत्रः कन्या चेति द्वन्द्वं द्वितीये स्थाने, ततः प्रत्येकं
पुत्रः कन्या चेति द्वन्द्वद्वयं तृतीये, ततो द्वन्द्वद्वयात्तद्वीत्यैव द्व
ष्टयं चतुर्थे, ततः तच्चतुष्टयात्तद्वीत्यैव द्वन्द्वाष्टकं पञ्चमे, ततः
ष्टकात्तथैवं रीत्या षोडश द्वन्द्वानि षष्ठे, तेभ्यो द्वन्द्वेभ्यो द्वा
न्द्वानि सप्तमे, इति रीत्या एकैकस्यान्वये सप्तमकक्षं यावत
म्रिक्रतवः त्रिषष्टिः कन्या इत्यर्थः । ता दन्तैर्द्वात्रिंशद्भिर्गु
रसैकखदृशः रसाः षट्, एक, खं शून्यं, दृक् द्विः, अङ्कानां
गतिः २०१६ षोडशाधिकसहस्रद्वयम् उद्वोढुः पितुः वंशे
सपिण्डा इत्यर्थः । *मातुरिति । उद्वोढुरिति वर्त्तते । व
रौ द्वितीयस्थानस्थं द्वन्द्वं, तृतीयस्थाने मातुः पितरौ द्वन्द्वं,
स्थाने द्वे द्वन्द्वे, पञ्चमस्थाने सागराः चत्वारि द्वन्द्वानि इति
मातुः आपञ्चमकक्षम् अश्वमितिः सप्तसंख्या । प्रथमद्वन्द्वस्य प्रा
नात् तत्र एक द्वन्द्वस्यान्वयः पुत्रकन्ये इति एकं द्वन्द्वम् । तस्म
न्द्वात् द्वन्द्वयुगं द्वन्द्वद्वयं, ततः अब्धयश्चत्वारि द्व
ततोऽष्ट द्वन्द्वानि इति आपञ्चकक्षं शरक्षोण्यः शराः
क्षोणी एकः, वामगत्या १५ पञ्चदश । ते सप्तगुणाः श
विधवः पञ्चाधिकशतम्, उद्वोढुर्मातुः कुले उद्वोढुः सपिण्डा
र्थः । *कुलेति । मिथोयुताः संकलिताः हिमांशुदग्धरादृशा

---

(१) 'अभ्रिक्षणवः त्रिषष्टिः' घ० ।

विज्ञानेश्वरोक्तेः,

पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतः क्रमात्।
सपिण्डता निवर्तेत सर्ववर्णेष्वयं विधिः॥

इति हरनाथधृतदेवलवचनाच्च। सम्बन्धतत्त्वे सुमन्तुः-'पितृष्वसृसुतां मातृष्वसृसुतां मातुलसुतां *मातृसगोत्रां समानार्षेयीं विवाह्य चान्द्रायणं चरेत्परित्यज्यैनां मातृवद् बिभृयात्' इति दिक्।

ष्टमेकविंशत्यधिकमेकाविंशातिशतम् उद्वोढुर्विवाहकर्माणि वर्जिता इत्यर्थः। मातुलकन्यादिविवाहे तु ईदृशधार्मिकोक्तसंख्याभङ्गः स्यादिति अभिप्रायः। *मातृसगोत्रां मातुलसगोत्राम्। अधिकमग्रे। विवाहमात्रे इदं, मैथुनादौ तु सपिण्डापत्यदारेष्वित्यादि स्मृत्यन्तरोक्तं द्रष्टव्यम्। अत एव मातृवदिति दृष्टान्तः। दिगर्थस्तु सपिण्डादिषु भार्यात्वं नोत्पद्यते। रोगिण्यादौ तदुत्पद्यते इति मिताक्षरा। रोगिण्यादौ ऋक्षादिनाम्नीषु च भार्यात्वानुत्पत्तौ तज्जन्यपुत्रादेर्वर्णत्वानापत्तिभये भार्याभिन्नागमने प्रायश्चित्तापत्त्या च तत्र तदुत्पत्तिस्वीकारे सपिण्डादिष्वपि प्रत्युद्वाहितादिवत् भार्यात्वं स्वीकार्यम्। तत्परिणेतुरिव सपिण्डादिपरिणेतुरपि निषेधबलात् पापमात्रमित्यन्ये।

परे तु यस्या गमने मरणान्तं नैमित्तिकं तदुत्पन्नस्य 'पतितोत्पन्नः पतितो भवति' इति वचनेन पातित्याद् 'अनिन्द्येषु विवाहेषु' इत्यादौ राक्षसादीनामिव पातित्यप्रयोजकनरकप्रयोजकानामपि विवाहानां ग्रहणान्न वर्णत्वम्। प्रत्युद्वाहादिजन्ये रोहिण्यादिजन्ये च पातित्याभावाद्विवाहस्य तादृशनरकाप्रयोजकत्वाच्च वर्णत्वम्। अतः प्रथमे वैयर्थ्याद्भार्यात्वं नोपेयते, द्वितीये तदुपेयते इत्याहुः।

भ्रातृमतीमिति पुत्रिकाकरणशङ्कानिरासाय,

यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता।

*ऋषेरिदमार्षं प्रवरः, गोत्रं*प्रसिद्धम्, समाने आर्षगोत्रे यस्य तस्माज्जाता या न भवति ताम् ॥

अथ संक्षेपेण गोत्रप्रवरनिर्णयः॥ तौ च भिन्नौ निषेधे निमित्तं, *'सगोत्राय दुहितरं न प्रयच्छेत्'इति आपस्तनोपयच्छेत्तु तां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥

इति मनूक्तेः । यस्याः पिता पुत्रिकाकरणाभिप्रायवान्न वेत्ति न विज्ञायेतेत्यर्थः । अनेनापरिभाषिताऽपि पितुरभिप्रायमात्रेण पुत्रिका भवतीति गम्यते । अभिसंधेराकारमाह मनुः—

अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् ।
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम् ॥ इति ।

वरेण सह संप्रतिपत्तौ तु पुत्रिकाकरणं स्पष्टमेव । सा च संप्रपत्तिर्द्वेधा—केवलमातामहसम्बन्धित्वेन उभयसम्बन्धित्वेन चेति । आद्ये दानमन्त्रमाह मनुः—

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।
अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति ॥ इति ।

अन्त्ये चाह कात्यायनः—

अपुत्रोऽहं प्रदास्यामि तुभ्यं कन्यां, भवानपि ।
पुत्रार्थी चेदिहोत्पन्नः स नौ पुत्रो भवेदिति ॥

यत्र च नैतादृशशङ्का तामभ्रातृकामपि उद्वहेदिति । असमानार्षगोत्रजामिति स्त्रीविशेषणं व्याचष्टे-*ऋषेरिति । *प्रसिद्धमिति । यद्यपि पाणिनिना "अपत्यं पौत्रप्रभृतिगोत्रम्" (अष्टा० सू०४-१-१६२) इति पारिभाषितं तथापि सा परिभाषा शब्दशास्त्रे एव, इह तु पुत्रपौत्रादिपरम्परैव । सा च वक्ष्यमाणविश्वामित्रादिऋषिवंश इत्यर्थः । *सगोत्रायेति । व्याघ्रष्यायणादीनां संकृतीनां वसिष्ठैः सह प्रवरभेदेन विवाहे प्रसक्ते प्रथमो निषेधः, एवं वत्साग्निषेणयोर्गोत्रभेदेऽपि विवाहे प्राप्ते

म्बोक्तेः, 'असमानप्रवरैर्विवाहः' इति गौतमोक्तेश्च । तत्र गोत्रलक्षणमाह प्रवरमञ्जर्यां बौधायनः—

विश्वामित्रो जमदग्निर्भरद्वाजोऽथ गौतमः ।
अत्रिर्वसिष्ठः कश्यप इत्येते सप्त ऋषयः ॥

सप्तानामृ*षीणामगस्त्याष्टमानां यदपत्यं त*द्गोत्रम्। इति । यद्यपि केवलभार्गवेष्वार्ष्टिषेणादिषु केवलाङ्गिरसेषु हरितादिषु च *नैतत्, भृग्वङ्गिरसोरु*क्तेष्वनन्तर्गतेः; तथाप्यत्रे*ष्टापत्तिरेवेति केचित् *अ-

---

द्वितीयश्च निषेध आवश्यकः । तथाच प्रथमे सगोत्रत्वाद्वितीये सप्रवरत्वान्न विवाह इत्यर्थः । *ऋषीणामिति । ऋषित्वं मन्त्रद्रष्टृत्वम् 'ऋषिर्दर्शनात्' इति यास्कोक्तेः । सप्तर्षिशब्दश्च रूढः पञ्चजनशब्दवत् । *गोत्रमिति । अगस्त्याष्टमानामित्यस्यानुवृत्तिः । तेन अगस्त्याष्टमसप्तर्ष्यपत्यम् ऋषिभूतं यत्तदेतेषां गोत्रमित्यर्थः । यथा जमदग्नेर्गोत्रं वत्सादयः । तथा गौतमस्य आयास्यादयः, भरद्वाजस्य दक्षगर्गादय इत्यादि । ऋषित्वोपादानादस्मदादौ तदपत्यत्वेऽपि नातिव्याप्तिः । *नैतादिति । तेषां सप्तर्ष्यपत्यत्वाभावात् । *ऊक्तेषु सप्तर्षिषु । *इष्टापत्तिरेवेति । न चैवम्—"अन्यत्र भृग्वाङ्गिरो गणात्" इति बौधायनोक्ताग्निमपर्युदासानुपपत्तिः, भृग्वङ्गिरोगणेषु समानगोत्रत्वस्यैवाप्राप्तेः;—इति वाच्यं, तेषां हि गोत्रत्वं दुरुपपादमेव । गोत्रसंदंशपाठात्तु जामदग्न्यभृगुगणस्य गौतमभरद्वाजाङ्गिरोगणयोश्च गोत्रत्वात्तत्सादृश्येन गोत्रत्वभ्रान्त्या प्रसक्तिमपेक्ष्य पर्युदासः, श्राद्धे कुण्डगोलकवत् । एवं सति आर्ष्टिषेणगोत्रोऽयं हरितगोत्रोयमिति व्यवहारो गोत्रभूतभृग्वङ्गिरोगणसादृश्यादभ्रान्त्यैव । नन्वेवं तत्र केवलानामगोत्रत्वे किमविवाहप्रयोजकमित्यत्राह—*अतएवेति । केचिदित्यरुचिः । सा च यद्यपि 'सगोत्राय दुहितरं न प्रयच्छेत्' इत्यत्र सप्तर्ष्यपत्यत्वमेव गो-

त एव स्मृत्यर्थसारे प्रवरैक्यादेवात्राविवाह उक्तः। यद्यपि वसिष्ठादीनां न गोत्रत्वं युक्तम्, तेषां सप्तर्षित्वेन तदपत्यत्वाभावात्; तथापि *तत्पूर्वभाविवासिष्ठाद्यपत्यत्वेन गोत्रत्वं युक्तम्। *अत एव*पूर्वेषां परेषां चैत-

---

त्रत्वम् 'असमानप्रवरैर्विवाहः' इति पृथक् निषेधात्; तथाऽपि तावत्समानगोत्रत्वमित्यत्र प्रवरवत्त्वं गोत्रत्वम् 'प्रवराण्युक्तानैर्गोत्राणि' इति सत्याषाढोक्तेः। इहापि 'प्रवरेष्वनुवर्त्तते' इत्युक्तश्च। तस्य च भृग्वाङ्गिरोगणेऽपि एकप्रवरत्वेन प्राप्तेः पर्युदासोपपत्तिरिति।

अन्ये तु प्रवरवत्त्वं गोत्रत्वम् 'असमानप्रवरैः' इति पृथक्निषेधवैयर्थ्यात्। किन्तु 'गोत्रं वंशपरम्पराप्रसिद्धम्' इति विज्ञानेश्वराद्युक्तेः, सगोत्रत्वेन ये पठितास्तेषां यमुपक्रम्य प्रवराम्नानं स गोत्रम्। बौधायनोक्तिस्तूपलक्षणम्। तेन भृग्वाङ्गिरोगणेषु सप्तर्षिभिन्नत्वेऽपि अधिकाराद्गोत्रत्वम्। एवञ्च भृग्वादेरनुवृत्त्या च वत्सार्ष्टिषेणाद्योः सगोत्रत्वे प्रसक्ते पर्युदासोपपत्तिरित्याहुः।

ननु—

भृग्वाङ्गिरोऽन्यं यत्किञ्चिद्दृषेर्यावत्सुवर्त्तनम्।
तावत्समानगोत्रत्वमिति केचित्समूचिरे॥
तन्नैवं सति सर्वत्र सगोत्रत्वनिबन्धने।
अनुद्वाहे तु कुत्र स्यात्प्रवरैक्यं प्रयोजकम्?॥

वत्सत्वादिना सगोत्रत्वस्यैव सत्त्वादिति चेत्? वत्सार्ष्टिषेणयोर्गोत्रभेदेपि प्रवरैक्यादेवाविवाहादिति। *तत्पूर्वेति। वसिष्ठादीनामिति वर्त्तते। *अत एव। युववसिष्ठस्य प्राचीनवसिष्ठापत्यत्वादेव। *पूर्वेषामिति। तथाचागस्त्याष्टमप्रोक्तसप्तर्षीणां यदृषिभूतं पुत्रपौत्रादि अपत्यं तत्पूर्वभाविनामुत्तरभाविनां च गोत्रमित्यर्थः। तेन वत्सो जमदग्निगोत्रमिति तत्पुरुषेण, वयं वत्सगोत्रा इति बहुव्रीहिणा च क्रमेण व्यवहारः। वसिष्ठस्य प्राची-

ङ् गोत्रम् । अत्र *विशेषोऽस्मत्कृतप्रवरदर्पणे ज्ञेयः ॥

प्रवरास्तु प्रवरणानि प्रवराः । *कल्पकारा हि 'वा-

सिष्ठापत्यत्वाभावे तस्य गोत्रत्वाभावापत्तिरित्युपष्टंभसङ्गतिः । अगस्त्याष्टमसप्तर्षीणां तु न गोत्रत्वं, तदपत्येषु गोत्रत्वव्यवहारानुपपत्तेः । केचित्तु वसिष्ठादेर्गोत्रत्वमौपचारिकं कुण्डिनादेः स्वगोत्रे एकगोत्रत्वेनाविवाहप्रयोजकत्वबद्वासिष्ठादेः सर्वस्वगोत्रेषु सदृशगोत्रत्वप्रयोजकत्वेनाविवाहप्रयोजकतया सा(१)दृश्यमित्याहुः, तदसत् । न ह्यघमर्षणकौशिकविश्वामित्रेति गोत्रभूतो विश्वामित्रो निर्दिश्यते, तथा सति तस्य द्विप्रवरत्वापत्त्या विश्वामित्राणां त्र्या(२)र्षेय इत्यादिनिर्देशानुपपत्तेः । नचैकस्यैव गोत्रत्वं प्रवरत्वं च(३)सम्भवति अभेदे षष्ठ्यनुपपत्तेः । तस्माद् ऋष्यपत्यभूता एव तुल्यनामानो गौतमादय ऋषयः गोत्रत्वेन प्रवरत्वेन च स्वीकार्या इति । *विशेषः गोत्रस्य म्रियमाणतयानुवृत्तिखण्डनम् ।

वरणानि ऋषिसम्बन्धेनाग्निप्रार्थनानि, तान्युपपादयति—*कल्पकारा हीति । कल्पसूत्रेषु आश्वलायनानां मन्त्रः (४) 'अग्ने महाँ असि ब्राह्मणभारत' इत्यादिः । अग्निर्देवो होता देवानित्यादि(५)श्च । तत्र प्रथमो होतृमन्त्रः । तत्र हे अग्ने त्वं महाँ असीति-प्रार्थ्य वासिष्ठ इति पुनः प्रार्थ्यते । यथाऽयं यजमानो वासिष्ठः वसिष्ठवंशोत्पन्नत्वात् , तथा त्वमपि वासिष्ठः, तेनोत्पादितत्वात् । एतेन प्रसिद्धब्राह्मण्यानां वसिष्ठानां यथा हविस्त्वया देवान्प्रति नीयते, तथा तद्वंश्यस्यास्य यजमानस्य प्रसिद्धब्राह्मण्यस्य हविर्देवान्प्रति त्वया नेयमिति प्रार्थना ध्वन्यते । द्वितीयश्चाध्वर्युमन्त्रः ।

(१) 'सादृशमि' ख० घ० (२) 'त्र्यार्षेय इ' ङ०
(३) 'सम्भवति अभवति अभेदे' घ० ङ
(४) 'अग्ने महाँ अ' घ० ङ (५) कंसान्तर्गतं नास्ति । घ० ङ

सिष्ठेति होता' 'वासिष्ठवदित्यध्वर्युः, इत्यादिना*येषां प्र-
*वरणममनन्ति ते प्रवराः । तच्च वरणं यद्यपि *गोत्र-
भूतस्यापि क्वचिद्दृष्टश्यते तथापि पूर्ववद*ऋषिभेदो द्रष्ट-
व्यः । *अन्यथा *तेषां व्यार्षेये 'एकार्षे' इत्यादिनिर्देशा-
नुपपत्तेः । अन्येतु तद्गोणांव्यार्षेय इति भेदमाहुरिति
*दिक् । तत्त्वं तु गोत्रभूतस्य पितृपितामहप्रपितामहा एव
प्रवराः, 'पितैवाग्रेऽथ पुत्रोऽथ पौत्रः' इति शतपथश्रुतेः,

तत्र मन्त्रे वासिष्ठवदित्यग्निः प्रार्थ्यत इत्यर्थः । आदिपदात् भार्गवच्यावनाप्रवानौर्वजामदग्न्येति अण्गन्तादिना होता, तद्वैपरीत्येन जमदग्निवद्भार्गवप्रवानवच्च्यवनवद्भृगुवदित्यध्वर्युरित्यस्य ग्रहः । एवं कात्यायनादिमन्त्रा ऊह्याः । *येषाम् । ऋषीणाम् ।) *वरणम् अग्निप्रार्थनम् । सम्बन्धः षष्ठ्यर्थः *गोत्रभूतस्यापीति । यथा वासिष्ठेति होता वसिष्ठवदित्यध्वर्युरित्यादौ । *ऋषिभेदः वृद्धवसिष्ठोऽन्यः, युववसिष्ठो ऽन्यः । *अन्यथा ऋषिभेदानुपगमेन गोत्रभूतस्य प्रवरत्वासम्भवेन *तेषां वसिष्ठादीनाम् । वासिष्ठेन्द्रप्रमदाभरद्वाजास्त्रित्यत्र वासिष्ठेत्यत्र च गोत्रभूतवसिष्ठत्यागे व्यार्षेयत्व एकार्षेयत्वयोर्लोपापत्तेरित्यर्थः । नन्वेवम(७)ग्नेर्वरणकर्मत्वे "मन्त्रकृतो वृणीते" इत्यृषीणां कर्मताभङ्गापत्तिरित्यत आह-*दिगिति । ऋषीणां वरणकर्मत्वं नास्त्येव । तदुपगमे वासिष्ठेति वासिष्ठवदिति प्रत्ययवैयर्थ्यापत्तेः । वासिष्ठादेः प्रार्थनाकर्मत्वे सम्बुध्यन्तशब्दापेक्षणात् । तस्मादग्नेरेव प्रार्थनाकर्म । मन्त्रकृत इति षष्ठी । मन्त्रकृतश्च ऋषयः तत्सम्बन्धेन होत्रादयः प्रार्थनाकर्तार इति सर्वं सुस्थम् । माधवस्तु गोत्रप्रवर्तकस्य ऋषेर्व्यावर्त्तको मुनिगणः प्रवरः । यथा गोत्रप्रवर्त्तकस्य भरद्वाजस्य व्यावर्त्तकावङ्गिरोबृहस्पती । आङ्गिरसबार्हस्पत्यभारद्वाजेति त्रिप्रवरान्वितभारद्वाजगोत्रोऽहमिति प्रयोगादि-

'परं परं प्रथमम्' इत्याश्वलायनोक्तेश्च। *अत्र विशेषमाह बौधायनः—

एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते।
तावत्समानगोत्रत्वमन्यत्र भृग्वङ्गिरसां गणात्॥इति स्मृत्यर्थसारे—

*व्रियमाणतया वापि सत्तया वाऽनुवर्तनम्।

त्याह। तन्न, वासिष्ठेत्येकप्रवरान्वितवासिष्ठगोत्रोऽहमित्यादौ वसिष्ठभेदं(२) विनाऽगतेः। दिगर्थस्तु—गोत्रभूत(३)स्यर्षेः पितृपितामहप्रपितामहादय एव प्रवराः, तेषां च पितृपुत्रपौत्रक्रमेण(४)वरणे प्रवेशः 'पितैवाग्रेऽथ पुत्रोऽथ पौत्रः' इति शतपथ श्रुतेः 'परं परं प्रथमम' इत्याश्वलायनवृत्तौ तथोक्तेश्च। अत एवाऽऽङ्गिरसबार्हस्पत्यभारद्वाजेत्यादौ तथैव दृश्यते। आङ्गिरसेत्यादि तद्धितस्तु यजमानस्य ऋषिसम्बन्धद्योतनार्थः। गोत्रात्पूर्वेषां मन्त्रकृतामेव प्रवरत्वं 'मन्त्रकृतो वृणीते' इति सूत्रादिति। तद्गोत्राणामिति। तथाच (५)'तेषां त्रार्षेय' इति न निर्देशः, किन्तु तद्गोत्राणां तदपत्यानां त्र्यार्षेय इत्येव। तथाच 'वसिष्ठेन्द्रप्रमदाभरद्वाजस्विति वसिष्ठानाम्' इत्यत्र वसिष्ठापत्यानां त्रयः प्रवरा इति (५॥)अत्र वसिष्ठस्य प्रवरत्वे बाधकाभाव इत्यर्थः।(६)वयं वसिष्ठगोत्रा इत्यादि प्रयोगः। *अत्रेति। सगोत्रायेति (७)निषेधे। अविवाहप्रयोजकसमानगोत्रत्वे इत्यर्थः। भृग्वङ्गिरोभिन्नैकऋष्यनुवृत्त्यैव सगोत्रत्वं नान्यथेत्यर्थः। ननु सा कुतो ज्ञायते इत्यत आह—*व्रियमा-

---

(१) 'व्रीयमाणा तया' ग०।
(२) 'विनाअयगतेः' ख० घ०। (३) 'तस्यर्षे' ख०।
(४) 'वरणं प्र' घ०। (५) 'ते त्र्यार्षेय' घ०।
(५॥) एकप्रवरस्थले। (६) 'वयं वासिष्ठगोत्रा' घ० ङ०।
(७) 'निषेधः वि' घ० ङ०।

*एकस्य दृश्यते यत्र तद्गोत्रं तस्य कथ्यते ॥

भृग्वङ्गिरोगणेषु तु माधवीये स्मृत्यन्तरे—

पञ्चार्षे त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ।

(१)भृग्वङ्गिरोगणेष्वेव शेषेष्वे*कोपि वारयेत् ॥

शेषगोत्रेषु एकोऽपि समानः प्रवरो विवाहं वारयेदित्यर्थः । बौधायनोऽपि भृग्वङ्गिरसावधिकृत्य "द्व्यार्षेयसन्निपातेऽविवाहस्त्र्यार्षेयाणां, त्र्यार्षेयसन्निपातेऽविवाहः पञ्चार्षेयाणाम्" इति । *भृग्वङ्गिरोगणेष्वपि

णतयेति । *एकस्य अष्टान्यतमस्य । यस्य अनुवर्तनं यत्र दृश्यते तस्यर्षेः अपत्यं गोत्रमुच्यते इत्यर्थः । तयोः सगोत्रत्वमिति यावत् । सगोत्रत्वमेकसप्तर्ष्यपत्यत्वं च तदनुवृत्त्या ज्ञायते । तदनुवृत्तिश्च द्वेधा-म्रियमाणतया, सत्तया च । तत्राद्या वत्सादिषु जमदग्न्यादेः तत्प्रवरेषु जामदग्न्यादिपदसंकीर्त्तनात् । द्वितीया च कपिषु भारद्वाजस्य । तत्प्रवरेषु आङ्गिरसामहैर्ष्यौरुक्ष(२)यसेषु भारद्वाजपदसङ्कीर्तनाभावेऽपि केवलं सूत्रादिगततदनुक्रमणेषु भारद्वाजगोत्र-(३)संदेशपाठेन तदनुवृत्तिप्रतीतेः । म्रियमाणत्वं पदेन प्रार्थनाकर्म सम्बन्धितया प्रार्थनाकर्मत्वम् । म्रियमाणतया वाऽनुवृत्तिर्न सार्वत्रिकीत्यतः सत्तयेत्युक्तम् । अधिकारेण क्वचिदुत्पादकतया च । अत एव भरद्वाजस्य कप्युत्पादकत्वमपि वदन्ति । *एकोपीति । शेषेष्वित्यनुवर्त्तते । भृग्वङ्गिरोगणभिन्नेषु इति तदर्थः । भृग्वङ्गिरोगणेषु त्वेकप्रवरसाम्ये विवाहो भवत्येवेति भावः । एतच्च केवलभृग्वङ्गिरोगणविषयम् । भृग्वङ्गिरोगणान्तर्गतगणेषु त्वाह—*भृग्विति । सप्तमीनिर्देशाज्जमदग्न्यादिगणत्रयेऽन्तर्गतत्वलाभः । एकेति जमदग्निषु भार्गवच्यावनाप्नवानेति, भार्गवौर्वजामदग्न्येति, गौतमेषु

---

(१) 'भृग्वङ्गिरोगणेष्वेवं' क० ।

(२) 'यसेसु' ख० । (३) 'सदंशपाठेन' ख० ।

जमदग्निगौतमभरद्वाजेष्वेकप्रवरसाम्ये*सर्वेषामप्यसाम्ये वा*सगोत्रत्वादेवाविवाह इति *दिक्।

अथ गोत्राणि प्रवराश्चोच्यन्ते। तत्र बौधायनः—

गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च।

आङ्गिरसौ(१)शिजकाक्षीवतेति, आङ्गिरसौतथ्यदैर्घतमसेति, भ(२)रद्वाजेषु आङ्गिरसबार्हस्पत्यभारद्वाजेति आङ्गिरसतैत्तिरिकापिभुवेति त्रिप्रवरेषु। *सर्वेषामिति। भरद्वाजेषु भारद्वाजगार्ग्यसैन्येति, आङ्गिरसतैत्तिरिकापिभुवेति। *सगोत्रत्वादेवेति। अविवाहप्रयोजकं सगोत्रत्वं तावद्द्वेधा—एकगोत्रत्वं सदृशगोत्रत्वं च। तत्राद्यमेकैकगणांतः पातिषु, तत्र मूलभूतस्य वत्सादेरेकस्यैव गोत्रत्वात्। यत्रापि गणावान्तरऋषीणामेव गोत्रत्वं, तत्रापि तदपत्यानि प्रति तस्यैकत्वमेव। द्वितीयं तु भिन्नभिन्नगणान्तःपातिषु, वत्सविदयोर्भिन्नयोरपि गोत्रयोरेकसप्तर्ष्यपत्यत्वेन सादृश्यात्। [*दिगिति।] दिगर्थस्तु—समानप्रवरत्वं द्वेधा—एकप्रवरसाम्यं द्वि(३)प्रवरसाम्यं च। आद्यं भृग्वङ्गिरोगणव्यतिरिक्तेषु शेषेषु इति वचनात्। (४)द्वितीयं भृग्वङ्गिरोगणेषु। तच्चासङ्कीर्णे तत्राविवाह प्रयोजकं, तेषां गोत्रत्वाभावेन समानगोत्रत्वाप्रसक्तेः। अत एव च तेषु द्वित्रिप्रवरसाम्याभावे विवाह एव भवति। समानगोत्रत्वं चासङ्कीर्णे कपीनां भरद्वाजगणैः सहाविवाहप्रयोजकम्। तेषां भरद्वाजगणस्थत्वेनाङ्गिरोगणस्थत्वादेकप्रवरसाम्येऽपि अपेक्षितद्वि-

---

(१) 'क्षितकाक्षीवेति' ख०।

(२) 'भरद्वाजेषु आङ्गिरसतैत्तिरिकापिभुवेत्यादि सगोत्रत्वादेवेति' ख० घ०।

(३) 'द्वित्रिप्रवरसाम्यं आ' घ० ङ०।

(४) 'द्वितीये भृ'। ङ० घ०।

*ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥

तत्र*सप्त भृगवः । वत्सा बिदा आर्ष्टिषेणा (१)यास्का मित्रयुवो वैन्याः शुनका इति । *वत्सानां भार्गवच्यावनाप्नवानौर्वजामदग्न्येति, भार्गवौर्वजामदग्न्येति वा, भार्गवच्यावनाप्नवानेति वा । *बिदानां पञ्च-भार्गवच्यावनाप्नवानौर्ववैदेति, भार्गवौर्वजामदग्न्येति वा । एतौ

त्रिप्रवरसाम्याभावादिति । अन्यत्र सर्वत्र प्रायश एते सङ्कीर्णे इति बोध्यम् ।

*ऊनपञ्चाशदिति । तथाच बौधायनमते कारिका—

सप्तेह भृगवः, सप्तदशाङ्गिरस एवच ।
ततोऽत्रयश्च चत्वारो, बोद्धव्याः (२)कश्यपास्त्रयः ॥
चत्वारोत्र वसिष्ठाः स्युर्विश्वामित्रास्ततो दश ।
अगस्तयश्च चत्वार इति संग्रहकृद्वचः ॥ इति ।

*सप्तेति । भृगवो द्विविधाः-जामदग्न्याः, केवलाश्च । तत्र द्वौ वत्सबिदौ जामदग्न्यौ । वत्सादयः षट् केवला एव । बिदा अपि केवला इति केचित् । इह तु वत्सत्वादिना एकीकृत्य दर्शिताः । *वत्सानामिति । जामदग्न्यवत्सानामाद्यद्वयं, तत्र और्वजामदग्न्यशब्दयोः सत्त्वात् । (३)तृतीयं तु अजामदग्न्यवत्सानाम् । तत्र और्वजामदग्न्यशब्दयोरसत्त्वादिति विवेकः । 'तृतीयं केवलजामदग्न्यगोत्रस्येत्याश्वलायनः' इति दर्पणः । *बिदानामिति । तत्र त्रिप्रवरेषु बिदेषु और्वजामदग्न्यशब्दयोः । सत्त्वाज्जमदग्नेर्त्रिरमाणतयाऽप्यनुवृत्तिः । पञ्चप्रवरेषु बिदेषु जामदग्न्यशब्दाभावेऽपि

---

(१) 'यस्का' ग० । (२) 'कश्यपास्त्रयः' ख० ।
(३) 'तृतीयं तु तत्र' ख० ।

द्वौ जामदग्न्यसंज्ञौ । आर्ष्टिषेणानां भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति, भार्गवार्ष्टिषेणानूपेति वा । *एषां त्रयाणां परस्परमविवाहः । *वात्स्यानां भार्गवच्यावनाप्नवानेति । वत्सपुरोधसयोः पञ्च । भार्गवच्यावनाप्नवानवात्सपौरोधसेति । बैजवनिमतिथयोः पञ्च । भार्गवच्यावनाप्नवानबैजमतिथेति । एते त्रयः क्वचित् । एषामपि *पूर्वैरविवाहः । अत्र तत्तद्गणस्था ऋषयोऽन्यश्च विशेषे मत्कृते प्रवरदर्पणे ज्ञेयः । यस्कानां भार्गववै-

---

जामदग्न्यत्वप्रयुक्तौर्वशब्दसत्त्वाज्जमदग्नेः सत्तयाऽनुवृत्तिः, आश्वलायनसूत्रवृत्तौ "और्वजामदग्न्यशब्दौ जामदग्न्यत्वप्रयुक्तौ" इत्युक्तेः । ये तु जामदग्न्यविदानामिदम्, "अजामदग्न्यविदानां भार्गवौर्वबैदेति त्रय इति कात्यायनः" इति अजामदग्न्यविदानामाहुः, तेषामौर्वशब्दसत्त्वेऽपि कात्यायनोक्त्याऽजामदग्न्यत्वमभिमतम् । आर्ष्टिषेणप्रभृतिपञ्चानां न जामदग्न्यत्वं जमदग्नेः सत्तयाऽप्यनुवृत्त्यभावात् । *एषामिति । आर्ष्टिषेणानां वत्सविदाभ्यां सहाविवाहः, त्रिप्रवरसाम्यात् । यद्यपि त्रिप्रवरार्ष्टिषेणानां नान्याभ्यां सह द्विप्रवरसाम्यं, तथापि पञ्चार्षेयपक्षसंमतत्वमपि प्रवरसाम्येष्वविवाहप्रयोजकं, (१)"वत्सा विदा आर्ष्टिषेणा इत्येतेषामविवाहः" इति बौधायनात् । एवञ्च जामदग्न्यवत्सविदयोः सगोत्रत्वसप्रवरत्वाभ्यामविवाहः, अजामदग्न्यवत्सार्ष्टिषेणाभ्यां तयोः सप्रवरत्वादेवेति । तदुक्तम्—

जामदग्न्यौ वत्सविदावार्ष्टिषेणाः परस्परम् ।
नान्वियुः प्रवरैक्येन, सगोत्रत्वेन चादिमौ ॥ इति ।

*वात्स्यानामिति । अवाच्यानां भार्गवच्यावनाप्नवानवाच्येति दर्पणः । *पूर्वैरिति । परस्परं चेति शेषः । त्रिप्रवरत्वसाम्यादिति

---

(१) 'वत्साविष्टदा आ' ङ० घ० ।

तहव्यसावेतसेति । (१)*मित्रयुवां भार्गव*वाध्यश्वदै-
वो(२)दासेति, भार्गवच्यावनदैवो(३)दासेति वा, वा-
ध्यश्वेत्येको वा । वैन्यानां भार्गववैन्यपार्थेति । एत
एव इयैताः । शुनकानां शुनकेति वा गार्त्समदेति वा
भार्गवगार्त्समदेति द्वौ वा । भार्गवशौनहोत्रगार्त्समदे-
ति त्रयो वा (४)वेदविश्वज्योतिषां भार्गव(५)वेदविश्व-
ज्योतिषेति । शाठरमाठराणां भार्गवशाठरमाठरेति । ए-
तौ द्वौ क्वचित् । यस्कादीनां स्वगणं त्यक्त्वा(६)सर्वै-
र्विवाहः । तदुक्तं स्मृत्यर्थसारे—

(७)यस्का मित्रयवो वैन्याः शुनकाः प्रवरैक्यतः ।
स्वं स्वं हित्वा गणं *सर्वे विवहेयुः परावरैः ॥ इति॥

भावः।(८)यास्कानां वैतहव्येति नामान्तरम्। [*(९)मित्रयूनामिति पाठः ।] एषां दिवोदासा इति नामान्तरम् । *वाध्यूश्वेति । अन्योपान्त्ययोर्व्यत्ययो वा । शौनहोत्रस्थाने शौनकेति केचित् । *सर्वे विवहेयुः परावरैरिति । वक्ष्यमाणैः सर्वैः प्रागुक्तवत्सबिदार्ष्टिषेणैश्च त्रिभिः परस्परं यास्कादीनां चतुर्णां स्वस्वगणं हित्वा विवाहो भवति, त्रियमाणतया सत्तया वा एकस्यानुवृत्त्यभावेन सगोत्रत्वाभावात् प्रवरैक्यात् द्वित्रिप्रवरसाम्याभावाच्चेत्यर्थः । मित्रयूनां पाक्षिक(१०)द्विप्रवरसाम्यात् (११)द्विप्रवरव-

---

(१) 'मित्रयुवानां' क० ।
(२) 'दिवोदासेति' क० । (३) 'दिवादोसेति वा' क० ख० ।
(४) 'वेदानां' क० । (५) 'वदैवैश्व' क० ।
(६) 'सर्वे विवाहः' क० ।
(७) 'यस्का मित्रयुवो वैन्याः' क० । 'यस्का मित्रयुवा वैन्याः' ख० ।
(८) 'यस्कानां वैतहव्येति' ङ० घ० ।
(९) कोष्ठान्तर्गतं नास्ति ।
(१०) 'द्वित्रिप्रवर' ख० । (११) 'त्रिप्रवरैर्वै' ङ० घ० ।

अथाङ्गिरसः । ते गौतमाः, भरद्वाजाः, केवलाङ्गिरसश्चेति त्रिधा । (१) अत्र गौतमा *दश-आयास्याः,

---

त्सादिभिस्सहाविवाह इति केचित् । तत्पक्षग्राहिणामविवाहः, पक्षान्तरग्राहिणां मित्रयूनां विवाह एवेत्यन्ये । चतुर्विंधशौनकानामेकगणस्थत्वाद्गोत्रत्वाभावेऽपि अविवाह एव, "एतेषामविवाहः"इति कात्यायानादिभिः सर्वेषामविवाहाभिधानात् । अधिकगणद्वयस्यापि परस्परं पूर्वोक्तैश्च विवाहः, द्वित्रिप्रवरसाम्याभावात् । हारावल्यां तु शुनकानां गार्त्समदेति, मित्रयूनां वाध्यूश्चेति च नामान्तरम् ।

कात्यायनेन तु गणा भृग्वोर्द्वादश कीर्तिताः ।
जामदग्न्याश्चतुर्भेदास्तथैवाजामदग्न्यकाः ॥
वात्स्यायना अवाच्याश्च वैजवाः (२)शाबरादिकाः ।
विदार्ष्टिषेणा वत्सादि वेदविश्वादयस्तथा ।
पार्थश्रैता आपिशला वीतहव्याद्गृत्समाः ॥

(३) विदादयोष्टावजामदग्न्याः । वात्स्यायना जामदग्न्यवत्सा एवेति । तत्प्रवराः-अवाच्यानां भार्गवच्यावनावाच्येति त्रयः । (४)वैजवमैमथितयोः शाबरमाठराणां चोक्ता एव । विदानां भार्गवच्यावनाप्नवानेति त्रय एव । वत्सपुरोधसां प्रोक्ता एव, भार्गववत्सपुरोधसेति त्रयो वा । मित्रयूनामपि शालायनेति । वन्यानां पार्थश्रैनेति, यस्कादीनां वीतहव्येति, शुनकानां गृत्समदेति नामान्तरं, मित्रयूनां शालायनेति नामान्तरमिति लौगाक्षिरित्युक्तम् ।

*दशेति । "सप्तदशाङ्गिरस एव" इति संग्रहवचने सप्तैव गौतमा

---

(१) 'तत्र' क० ।
(२) 'शाठरादिकाः' घ० ङ० ।
(३) 'विवादयोष्टा' ख० । (४) 'वैजननेम' ङ० घ० ।

शरद्वन्ताः, कौमण्डाः, दीर्घतमसः, (१)औशनसाः, कारेणुपालेयाः, राहूगणाः, सोमराजकाः, वामदेवाः, बृहदुक्थाश्चेति । तत्रायास्यानामाङ्गिरसायास्यगौतमेति । (२)शरद्वतानामाङ्गिरसगौतमशा(३)रद्वतेति । कौमण्डानामाङ्गिरसौतथ्यकाक्षीवतगौतमकौमाण्डेति वा, *आङ्गिरसायास्यौशिजगौतमकाक्षीवतेति वा, आङ्गिरसौत-

---

प्राह्वाः, राहूगणानां सोमराजकानां बृहदुक्थानां च बौधायनेनानुक्तेः । चत्वारो भरद्वाजाः षट् केवलाङ्गिरस इति सप्तदशेत्यर्थः । आयास्यानां गौतमेति नामान्तरम् । शरद्वन्तेत्यकारान्तं, शरद्वदिति तान्तं वा नाम पुष्पवन्तपदवत् । वर्णादिविपर्यासे च न प्रवरादिभेदो यथौतथ्य औ(४)चथ्येत्यादि । *आङ्गिरसायास्येति । पञ्च प्रवराः । आयास्यौशिजानामित्यन्ये । "आङ्गिरसौतथ्यगौतमौशिजकाक्षीवतेति पञ्चकाक्षीवतानाम्" इत्याश्वलायनः । आङ्गिरसौ शिजेति (५)त्रयः औशिजानामित्यन्ये । *वामदेव्येति । गौतमवामदेवेति वा । अत्र राहूगणादित्रयस्याश्वलायनोक्तत्वादिहोक्तिः । अयास्यबृहदुक्थकाक्षीवदीर्घतमऋक्षपृषदश्वोतथ्याः सप्तान्ये आश्वलायनोक्ताः तत्रा(६)द्याश्चत्वारः सङ्क्षेपोक्त(७)सप्ता-

---

(१) 'औशनसः' क० ख० ।

(२) 'शरद्वन्तानां' क० ख० ।

(३) 'शरद्वन्तेति' क० ख० ।

(४) 'औचथेत्यादि' ख० ।

(५) 'त्रयः प्रवराः औशिजाना' ङ० घ० ।

(६) तत्राद्यास्त्रयः सप्तमश्चेति चत्वार इत्यर्थः ।

(७) 'सप्तान्तर्भाविना एव' घ० ङ० ।

थ्यगौतमौशिजकाक्षीवतेति वा, आङ्गिरसौशिजकाक्षीवतेति त्रयो वा। दीर्घतमसामाङ्गिरसौतथ्यकाक्षीवतगौतमदैर्घतमसेति, आङ्गिरसौतथ्यदैर्घतमसेति त्रयो वा। औशनसानामाङ्गिरसगौतमौशनसेति त्रयः। (२)कारेणुपालेयानामाङ्गिरसगौतमकारेणुपालेति त्रयः। राहूगणानामाङ्गिरसराहूगणगौतमेति। सोमराजकानामाङ्गिरससोमराजकगौतमेति। वामदेवानामाङ्गिरस*वामदेव्यगौतमेति। बृहदुक्थानामाङ्गिरसबार्हदुक्थगौतमेति, आङ्गिरसवामदेवबार्हदुक्थेति वा। *उतथ्यानामाङ्गिरसौतथ्यगौतमेति। औशिजानाम्-'आङ्गिरसौशिजकाक्षीवत' इत्यापस्तम्बः, "आङ्गिरसापास्यौशिजगौतमकाक्षीवत" इति कात्यायनः। एतौ द्वौ क्वचित्। *रा(३)घुवानामाङ्गिरसराघुवगौतमेति के(४)चित्। तत्र मूलं चिन्त्यम्। एषां*सर्वेषां गौतमानामविवाहः॥

अथ भरद्वाजाः। ते चत्वारः—भरद्वाजाः, गर्गाः,

न्तर्भाविता एव। ऋक्षपृषदश्वा अग्रे वाच्यौ। उतथ्यमाह-*उतथ्यानामिति। ग्रन्थान्तरे औतथ्यआयास्यौशिजराहूगणसोमराजकबृहदुक्थकक्षीवद्राघुवा उक्ताः। तत्र सप्तानामन्तर्भूतत्वाद्राघुवानाह-*राघुवानामिति। *सर्वेषामिति। गौतमस्य म्रियमाणतया सत्तया वाऽनुवृत्तेर्गोत्रैक्यात्, प्रायेण द्वित्रिप्रवरसाम्याच्च। तदुक्तम्—

गौतमाः सप्त चायस्याः शरद्वन्तस्तथापरे।
कौमण्डा दैर्घतमसस्तथा कारेणुपालयः॥
वामदेवा औशनसा गोत्रैक्यान्नान्वियुर्मिथः॥ इति।

---

(१) 'तमसेति वा आङ्गि' क०। (२)'कारेणुपालानामाङ्गिरस' क०ख०।
(३) 'रघुवाना' ख०। (४) 'क्वचित्' क०।

*ऋक्षाः, कपय इति । भरद्वाजानामाङ्गिरसबार्हस्पत्य-भारद्वाजेति त्रयः । गर्गाणामाङ्गिरसबार्हस्पत्यभार-द्वाजसैन्यगार्ग्येति पञ्च, आङ्गिरससैन्यगार्ग्येति त्रयो वा *अन्त्ययोर्व्यत्ययो वा, भारद्वाजगार्ग्यसैन्येति वा । *गर्गभेदानामाङ्गिरसतैत्तिरिकापिभुवेति । ऋक्षाणां क-पिलानां चाङ्गिरसबार्हस्पत्यभरद्वाजवान्दनमानवचसेति पञ्च, आङ्गिरसवान्दनमानवचसेति त्रयो वा । कपीना-माङ्गिरसामहीयवौरुक्षयसेति । आत्मभुवामाङ्गिरस-*भारद्वाजबार्हस्पत्यमन्त्रवरात्मभुवेति पञ्च । अयं क्वचि-त् । *भरद्वाजानां सर्वेषामविवाहः ॥

---

*ऋक्षाः आश्वलायनोक्ता एव । रौक्षायणा इति बौधाय-नोक्ताः । *अन्त्ययोरिति । उभयत्रापीति शेषः । शैन्येति ताल-व्यादिः क्वचित् । *गर्गभेदानामिति । तित्तिरयः कपिभूमयः खण्डिता इतिगर्गभेदास्त्रयः । कापिभुवेत्यस्यानन्तरम् आङ्गिरससै-न्यगार्ग्येति वेति पाठः । 'आमहीयवा' इत्याश्वलायनः । आमह-व्येति बौधायनः । "प्रागृक्षाणां कपीनां च" इति लिखनात्पञ्च-प्रवरः कपिः ऋक्षान्तर्भूतः । गर्गान्तर्भूत इत्यन्ये । तस्यानेन क-पिना सगोत्रत्वान्न विवाहः । तदुक्तम्—

भरद्वाजगणस्यापि तथा कपिगणस्य च ।
विवाहो न विधेयः स्यादन्योऽन्यं तु कदाचन ॥ इति ।

यद्यपि चाश्वलायनेन गौतमेषु ऋक्षाः पृषदश्वाश्च पठितास्तथापि आपस्तम्बादिभिः ऋक्षाणां भरद्वाजेषु पाठात् म्रियमाणतया सत्तया वा भारद्वाजानुवृत्तेः सगोत्रत्वात्प्रायेण द्वित्रिप्रवरसाम्याच्च । केचित्तु आङ्गिरसबार्हस्पत्यभारद्वाजेति, आङ्गिरसभारद्वाजकापेयेति पक्षद्वयमा-हुः । *भारद्वाजेति । भारद्वाजबार्हस्पत्ययोर्व्यत्ययो वा । *भरद्वा-

अथ केवलाङ्गिरसः। (ते(१)च षट्-हारिताः, कुत्साः, कण्वाः, रथीतराः, मुद्गलाः, विष्णुवृद्धाश्चेति) हारीतानाम् आङ्गिरसाम्बरीषयौवनाश्वेति। आद्यो*मान्धाता वा। कुत्सानामाङ्गिरसमान्धातृकौत्सेति। कण्वानामाङ्गिरसाजमीढकाण्वेति, आङ्गिरसघोरकाण्वेति वा। रथीतराणामाङ्गिरसवैरूपरथीतरेति, आङ्गिरसवैरूपपार्षदश्वेति वा, *अष्टादंष्ट्रपार्षदश्ववैरूपेति वा, अन्त्ययोर्व्यत्ययो वा। मुद्गलानामाङ्गिरस (भा(२)र्म्याश्वमौद्गल्येति, आद्यस्ताक्ष्यो वा, आङ्गिरसताक्ष्यमौद्गल्येति वा। विष्णुवृद्धानामाङ्गिरस)पौरुकुत्स्यत्रासदस्यवेति। एषां*स्वगणं विहाय*सर्वैर्विवाहो भवति। *हारितकुत्सयोस्तु

जानामिति। भारद्वाजाङ्गिरसामित्यर्थः। पृषदश्वानां केवलाङ्गिरोगणे रथीतरेषु पाठाच्चैतैरेव सहाविवाहः, गौतमैस्तु सह भवत्येव विवाह इति। तदुक्तम्—

भरद्वाजाः सकपयो गर्गा रौक्षायणा इति।
चत्वारोऽपि भरद्वाजगौत्रैक्यान्नान्वियुर्मिथः॥ इति।

*मान्धातेति। मान्धात्राम्बरीषयौवनाश्वेतीत्यर्थः [*अष्टादंष्ट्रेति]। "अष्टादंष्ट्रेत्यष्टादंष्ट्राणाम्" इत्याश्वलायनः। *स्वगणामिति। *सर्वैरिति। परस्परं पूर्वैरङ्गिरोभिश्चेत्यर्थः सगोत्रत्वाभावात्, द्वित्रिप्रवरसाम्याभावाच्च। स्वस्वगणे तु न विवाहः। तदुक्तम्—

केवलाङ्गिरसश्चैके विष्णुवृद्धाः सकण्वजाः।
हरिता रथीतराश्च मुद्गलाः प्रवरैक्यतः॥
स्वं स्वं हित्वा गणं सर्वे विवहेयुः परावरैः॥ इति।

*हारितेति। आर्षेयाणां पाक्षिकत्र्यार्षेयसन्निपातात्। "हरित-

---

(१) 'कंसान्तर्गतं नास्ति क०। (२) कंसान्तर्गतं नास्ति।

न भवति ॥

अथा(१)त्रयः । ते चत्वारः—अत्रयः, वादभुत
विष्ठिराः, मुद्गला इति । *आद्यानामात्रेयार्चनाः
वाश्वेति । वादभुतकानाम्—आत्रेयार्चनानसः
केति । धनंजयानामात्रेयार्चनानसधानञ्जयेति
गविष्ठिराणामात्रेयार्चनानसगाविष्ठिरेति, आत्रे
ष्ठिरपौर्वातिथेति वा । मुद्गलानामात्रेयार्चनानस
थेति । वामरथ्यसुमङ्गलबैजवापानामात्रेयार्चनान
ति, आत्रेयार्चनानसगाविष्ठिरेति वा । सुमङ्गला
सुमङ्गलश्यावाश्वेति केचित् । *अत्रेः पुत्रि
णामात्रेयवामरथ्यपौत्रिकेति । अत्रीणां*सर्वे
वाहः ।

कुत्सपिङ्गशंखदर्भभैमगवानाम्" इत्याश्वलायनेन स
म्योक्तेश्च ।

*आद्यानामिति । अत्रीणामाद्यात्रीति नामा
*अत्रेरिति । वामरथ्याः वालेयाः हालेयाः कौद्रेयाः
गोपवना इत्यत्रेः पुत्रिकापुत्राः । एषामत्रिवसिष्ठाभ्यां न ।
अत्रिविश्वामित्राभ्यामित्यन्ये । तदुक्तम्—

विश्वामित्रात्रिगोत्रेण नोद्वहेयुर्धनञ्जयाः ।
अत्रेस्तु पुत्रिकापुत्रा वामरथ्यादयस्तथा ॥
तथैव जातूकर्ण्याश्च वासिष्ठैरात्रिभिः सह ॥ इति ।

उक्तरश्लोकस्यैवैकान्वय इति प्रथमं मतम् । प्रथमश्च
कान्वय इत्युत्तरं मतम् । *सर्वेषामिति । सगोत्रत्वा
त्वाच्च । तदुक्तम्—

---

(१) 'अथात्रेयः' क० ख० ।

अथ विश्वामित्राः । ते दश-कुशिकाः,लोहिताः (१)रौक्षकाः, का(२)मकायनाः, अजाः, कताः, धनंजयाः, अघमर्षणाः, पूरणाः, इन्द्रकौशिका इति । कुशिकानां वैश्वामित्रदेवरातौदलेति । लोहितानां वैश्वामित्राष्टकलौहितेति, अन्त्ययोर्व्यत्ययो वा, वैश्वामित्रमाधुच्छन्दसाष्टकेति वा, (वैश्वा(३)मित्राष्टकेति द्वौ वा) । रौक्षकाणां वैश्वामित्रगाथिनरैवणेति, वैश्वामित्ररौक्षकरैवणेति वा । कामकायनानां वै(४)श्वामित्रदेवश्रवसदै(५)वतरसेति । अजानां वैश्वामित्रमाधुच्छन्दसाजेति, वैश्वामित्राश्मरथवाधूलेति वा । (ध(६)नंजयानां विश्वामित्रमाधुच्छन्दसधानंजयेति, वैश्वामित्रमाधुच्छन्दसाघमर्षणेति वा । कतानां वैश्वामित्रकात्यात्कीलेति ।) अघमर्षणानां वैश्वामित्राघमर्षणकौशिकेति । पूरणानां वैश्वामित्रपौरणेति द्वौ, वैश्वामित्रदेवरातपौरणेति वा । इन्द्रकौशिकानां वैश्वामित्रेन्द्रकौशिकेति द्वौ । एते बौधायनोक्ताः । रौहिणानां वैश्वामित्रमाधुच्छन्दसरौहिणेति । रेणूनां वैश्वामित्र(७)गाथिनरैणवेति । वेणूनां वैश्वामित्रगाथि-

चत्वारोऽत्रय आ(८)द्यत्रिवादूभूतकगविष्ठिराः ।
मुद्गलाश्चेति गोत्रैक्यात्प्रवरैक्याच्च नान्वियुः ॥ इति ।

लोहितानामष्टकेति, रौक्षकाणां रेवणेति,कामकायनानां श्रौतमतेति, अघमर्षणानां विश्वामित्रेति, रेणूनां हर्यश्वेति(९)गाथिनेतिच, जन्हूनां कौशिकेति शालङ्कायनेति च, आश्मरथ्यानाम् अजेति कुशि-

(१) 'रौक्षाकाः' क० । (२) 'कामायनाः' ख० ।
(३) कंसान्तर्गतं नास्ति क० । (४) 'वैश्वामित्रदैवश्रवस' क० ।
(५) 'दैवतरसेति वा' ख० । (६) कंसान्तर्गतं नास्ति क० ।
(७) 'गाथिनवणवेति' क० ।
(८) 'आद्यात्रिवा' घ० ङ० । (९) 'गाथिनेति' घ० ङ० ।

नवैणवेति । जह्नूनां वैश्वामित्रशालङ्कायनकौशिकों आश्मरथ्यानां वैश्वामित्राश्मरथ्यवाधूलेति । उदवेण वैश्वामित्रगाथिनवैणवेति । एते आश्वलायन स्योक्ताः । अन्यैस्त्वन्येपि*षड्गणा उक्ताः । तेऽस्म मत्कृतौ ज्ञेयाः । *एषां विश्वामित्राणामविवाहः ॥

अथ कश्यपाः । ते पञ्च-निध्रुवाः (१)कश्यपाः, रेभ शण्डिलाः, लौगाक्षयश्च । निध्रुवाणां काश्यपावत्स रनैध्रुवेति । कश्यपानां काश्यपावत्सारासितेति । रेभ काश्यपावत्सारैरेभ्येति । (२)शण्डिलानां काश्यपावत्स रशाण्डिल्येति । *अन्त्यस्थाने देवलो वा, सितो

केति च नामान्तरम् । उदवेणूनां वेणूनां च प्रवरैक्यम् । *षडिं (३)"साहुलानां वैश्वामित्रसा(४)हुलमाहुलेति, हिरण्यरेतसां वै मित्रहैरण्यरेतसेति द्वौ, सुवर्णरेतसां वैश्वामित्रसौवर्णरेत द्वौ, कपोतरेतसां वैश्वामित्रकापोतरतेसेति द्वौ, घृतकौशिक वैश्वामित्रघृतकौशिकेति द्वौ, कथकानां वैश्वामित्रकाथक थकेति त्रय इत्यर्थः । "अष्टकरोहितानां विश्वामित्राष्टकेति इति आपस्तम्बः । *एषामिति । परस्परमिति शेषः स त्वात् सप्रवरत्वाच्च । तदुक्तम्—

कुशिका लोहिताश्चैव रौक्षकाः कामकायनाः ।
(५)कता धनञ्जया अजा अघमर्षणपूरणाः ।
इन्द्रकौशिकजाश्चेति विश्वामित्रगणा दश ।
नोद्वहेयुः सगोत्रत्वात्क्वचिच्च प्रवरैक्यतः ॥ इति ।

[*अन्त्यस्थाने इत्यादि ।] आसितो वेति च्छेदः । त्र

(१) ' कश्यपाः शण्डिलाः रेभाः' क० । (२) 'शाण्डिलानां'
(३) 'स्रीहुलानां ख० । (४) 'साहुलामा' ख० ।
(५) 'कता धनञ्जया अजाघमर्षणपूरणाः' ख० ।

*शाण्डिलासितदेवलेति वा, काश्यपासितदेवलेति वा, अन्त्ययोर्व्यत्ययो वा, देवलासितेति द्वौ वा । लौगाक्षीन् वक्ष्यामः । एषां कश्यपानामविवाहः ।

अथ वसिष्ठाः । ते पञ्च–वसिष्ठाः, कुण्डिनाः, उपमन्यवः, पराशराः, जातूकर्ण्याश्चेति । वासिष्ठानां वासिष्ठेन्द्रप्रमदाभरद्वस्विति, वासिष्ठेत्येको वा । कुण्डिनानां वासिष्ठमैत्रावरुणकौण्डिन्येति । उपमन्यूनां वासिष्ठेन्द्रप्रमदाभ(१)रद्वस्विति, वासिष्ठभरद्वस्विन्द्रप्रमदेति वा, आद्ययोर्व्यत्ययो वा । पराशराणां वासिष्ठशाक्त्यपाराशर्येति । जातूकर्ण्यानां व(२)सिष्ठात्रिजातूकर्ण्येति । *वसिष्ठानां

न्तरमते काश्यपानामयं (३)प्रवरः । *शाण्डिलेति । शाण्डलेति च ऋष्यन्तरमते । आसितदैवलशाण्डिल्येति भवदेवः । शाण्डिलासितदैवलेति प्रवरपक्षे सत्तयैव कश्यपस्यानुवृत्तिः । शाण्डिलानां निध्रुवै रेभैश्चाविवाहः, काश्यपावत्सारशाण्डिल्येति पाक्षिकप्रवरमादाय समप्रवरत्वात्सगोत्रत्वाच्च । अन्येषां तु कश्यपस्य त्रियमाणतया सत्तया चानुवृत्तेः सगोत्रत्वात्समप्रवरत्वाच्च । तदुक्तम्—

त्रयश्च कश्यपगणा निध्रुवारैभशाण्डिलाः ।
गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्परम् ॥ इति ।

(४)आभरद्वसव्येति अभरद्वस्विति वा । पराशराणां प्रवरा आद्यवासिष्ठानां केचिदाहुः । *वसिष्ठानामिति । गोत्रैक्यात्प्रवरैक्याच्च । तदुक्तम्—

वसिष्ठाः कुण्डिनाश्चैव उपमन्यु पराशराः ।
वसिष्ठा इति चत्वारो गोत्रैक्यान्नान्वियुर्मिथः ॥ इति ।

---

(१) 'भरद्वासव्येति वसिष्ठाभर' क० ख० ।
(२) 'वासिष्ठात्रि जातू' ख० ग० ।
(३) 'प्रवरः शाण्डिल्येति शाण्डिलेति' घ० ङ० ।
(४) 'अभरद्वसव्येति' ख० ।

सर्वेषामविवाहः, *अन्त्यस्याग्निभिश्च ।

अथागस्त्याः । ते चत्वारः-इध्मवाहाः, साम्भवाहाः, सोमवाहाः, यज्ञवाहाश्चेति । आद्यानामागस्त्यदा(१)र्ढ्यच्युतैध्मवाहेति, आग(२)स्त्येत्येको वा । सोमवाहानामागस्त्यदा(३)र्ढ्यच्युतसोमवाहेति । सा(४)म्भवाहानां साम्भवाहोऽन्त्यः, यज्ञवाहानां यज्ञवाहोऽन्त्यः, आद्यौ पूर्वोक्तावेव । सारवाहानां तदन्तास्त्रयः । दर्भवाहानां तदन्तास्त्रयः । अगस्तीनामागस्त्यमाहेन्द्रमायोभुवेति । पूर्णमासानामागस्त्यपौर्णमासपारणेति । हिमोदकानामागस्त्यहै(५)मवर्चिहैमोदकेति । पाणिकानामागस्त्यपैनायकपाणिकेति । एते षट् क्वचित् । *अगस्तीनां सर्वेषामविवाहः ।

अथ *द्विगोत्राः । शौङ्गशैशिरीणामाङ्गिरसबार्हस्प-

---

*अन्त्यस्येति । द्विगोत्रत्वादिति वक्ष्यति ।

*अगस्तीनामिति । सगोत्रत्वात्सप्रवरत्वाच्च । तदुक्तम्—

अगस्तयः साम्भवाहाः सोमवाहा इति त्रयः ।
गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्परम् ॥

*द्विगोत्रा इति । ते च भरद्वाजानां केवलाङ्गिरसामत्रीणां कश्यपानां वासिष्ठानां च, नान्येषाम् । तेषां त्रयो भेदाः-शौङ्गशैशिरयः, संकृतयः, लौगाक्षयश्च । तत्र भारद्वाजात् शुङ्गाद्विश्वामित्रस्य (६)शैशिरक्षेत्रे जातः शौङ्गशैशिरिः । तदुक्तम्—

भारद्वाजेन शुङ्गेन विश्वामित्रस्य शैशिरे ।
क्षेत्रे जातो द्विगोत्रर्षिः प्रोच्यते शौङ्गशैशिरिः ॥

---

(१) 'दार्ढ्यच्युतै' क० । (२) 'अगस्त्येको वा' ख० ।
(३) 'दार्ढ्यच्युत' क० । (४) 'साम्भवानां' क० ।
(५) 'हैमवर्चि' ग० । (६) 'शैशरे' घ० ङ० ।

त्यभारद्वाजका(१)त्याक्षीलेति पञ्च, कात्याक्षीलयोः स्थाने शौङ्गशैशिरिर्वा, । *आङ्गिरसका(२)त्याक्षीलेति त्रयो वा । एषां भरद्वाजैर्विश्वामित्रैश्चाविवाहः । *एवं कपिलानां कतानां च । *संकृति*पूतिमाषादीनां आङ्गिरसगौरि(३)वीतिसांकृत्येति, शाक्त्यगौरि(४)वीतिसांकृत्येति वा, ((५)अन्त्ययोर्व्यत्ययो वा)। एषां स्वगणस्थैर्वासि-

विश्वामित्रभरद्वाजैस्तज्जानां तेन नान्वयः ॥ इति ॥

*आङ्गिरसकात्येति । आद्यो भारद्वाजो वा । *एवमिति । भरद्वाजैर्विश्वामित्रैश्चाविवाह इति सम्बध्यते । तत्र कपिलानाम् आङ्गिरसबार्हस्पत्यभारद्वाजवान्दनमातवचसेति पञ्चोक्ताः । न चात्र विश्वामित्रसम्बन्धे मानाभावः । विश्वामित्रं देवरातं प्रकृत्य "तस्यैते कापिलेयबाभ्रवाः" इत्यैतरेयब्राह्मणे कापिलेयोक्त्या लिङ्गविधया मानत्वात् । कपिलानां वैश्वामित्रत्वाभावे एषां वैश्वामित्रत्वानुपपत्तेः । कतानां वैश्वामित्र(६)कात्यात्कीलेति त्रय उक्ताः । न चैषां भरद्वाजसम्बन्धे मानाभावः, शौङ्गशैशिरीणां भारद्वाजकात्येति प्रवरपक्षे कतस्य भरद्वाजसम्बन्धलाभात् । अतएव कतः 'शौङ्गशैशिरिः' इत्युच्यते। *संकृतीति । संकृतीनां निर्भेदत्ववारणाय ।*पूतिमाषादीति। उभयत्रापि गौरिवीतिसांकृत्ययोर्व्यत्ययो वा बोध्यः । एषां सर्वेषां वासिष्ठत्वमप्यस्ति आपस्तम्बादिभिर्वासिष्ठगणे पाठात्, वासिष्ठशक्तेः पाक्षिकवरणाच्च । एते आङ्गिरसमु(७)ताः वासिष्ठैः क्रयक्रीता इति केचित् । वासिष्ठपुत्रस्य शक्तेर्दत्तपुत्रा इत्यन्ये । अत एव वासिष्ठैर्लौगाक्षिभिश्च सगोत्र-

(१) 'कात्यात्कीलेति पञ्च, कात्यात्कीलयोः' क० ।
(२) 'कात्यात्कीलेति' क० । (३) 'गौरिवीत' क० ।
(४) 'वीतसांकृत्येति' क० । (५) 'कंसान्तर्गतं नास्ति क० ।
(६) 'कात्कात्कीलेति' ख० । (७) 'युताः' ख० ।

ष्टैः *शौङ्गशौशिरैर्लौगाक्षिभिश्चाविवाहः । *काश्यपैरपीति प्रयोगपारिजाते । लौगाक्षीणां काश्यपावत्सारवासिष्ठेति, काश्यपावत्सारासितेति वा । एतेऽहर्वसिष्ठा नक्तंकश्यपाः । *एषां वसिष्ठैः कश्यपैः (१)संकृतिभित्सप्रवरत्वाच्चाविवाहः । (२)स्वगणस्थैरिति च सर्वेऽपि वासिष्ठा इत्येवमर्थम् । यद्यपि एषां केवलाङ्गिरसत्वमस्ति बौधायनेन केवलाङ्गिरोगणमध्ये पाठात्तथापि तैः सह न विवाहप्रतिबन्धः सगोत्रत्वाभावात्, द्वित्रिप्रवरसाम्याभावाच्च । *शौंगशौशिरैरिति । एषां भारद्वाजाङ्गिरसत्वमाश्रित्य भारद्वाजाङ्गिरोभिः शौङ्गशौशिरैश्च सह विवाहो न भवतीत्यभिप्रायेण । अन्ये तु केवलाङ्गिरोगणमध्ये एवैषां पाठः । भरद्वाजस्य सत्तयाऽनुवृत्तौ कपिवत् ज्ञापकाभावान्न भरद्वाजाङ्गिरसत्वं, नापि शौङ्गशौ(३)शिरत्वमिति मन्यन्ते । परेतु आङ्गिरसशब्दादाङ्गिरसत्वं, शक्तिगौरिवीतशब्दाच्च वासिष्ठत्वं वासिष्ठस्य म्रियमाणतयाऽनुवृत्त्यभावेऽपि सत्तयाऽनुवृत्तेः । तदुक्तम्—

संकृतीनां द्विवंश्यत्वाद्वासिष्ठैश्च चतुर्विधैः ।
स्ववर्गीयैः सगोत्रत्वात्प्रवरैक्याच्च नान्वयः ॥ इति ।

अतः शौङ्गशौशिरैर्वसिष्ठैश्चाविवाहो युक्त एवेति प्राहुः । *काश्यपैरिति ।

काश्यपेयगणस्यापि वासिष्ठस्य गणस्य च ।
संकृतिपूतिमाषाभ्यां विवाहो न परस्परम् ॥ इति ।

केचित्तु तत्र एतत्कारिकामात्रं मूलं, तन्नाश्रयणीयं कश्यपगणे पाठाभावादित्याहुः । *एषामिति । सगोत्रत्वात् क्वचित्सप्रवरत्वाच्च । तदुक्तम्—

(१) 'संकृत्याद्यैश्चा' क० ख० । (२) 'अन्ये तु स्वगणस्थै' घ० ङ० । (३) 'शिशिरत्वमिति' ख० ।

श्राविवाहः। *देवरातस्य जामदग्न्यैर्विश्वामित्रैश्चाविवाह इति प्रयोगपारिजाते। तदयुक्तम्। ब(१)ह्वृच श्रुतौ—

यथैवाङ्गिरसरसः सन्नुपेयां तव पुत्रताम्।
आङ्गिरसो जन्मनास्याजी(२)गर्तिः श्रुतः कविः॥

इत्याङ्गिरोगणस्थत्वेन भार्गवजामदग्न्यत्वस्मृतेर्हरिवंशादिस्मृतेश्च बाधात्। (३)तेन द्वौ देवरातौ एक आङ्गिरसः श्रुत्युक्तः, अन्यो भार्गवः। तयोः कल्पभेदेऽप्याङ्गिरसेन देवरातेन जामदग्न्यैर्भवत्येव विवाहः, भार्गवे-

---

वासिष्ठैः काश्यपैर्नित्यं लौगाक्षीणामनन्वयः।
अहर्वसिष्ठतोक्तिस्तु प्रयाजाद्यादि गोचर॥ इति।

*देवरातस्येति। देवरातानां वैश्वामित्रदेवरातौदलेति त्रयः प्रवराः। तदुक्तम्—

जमदग्निगणस्यापि विश्वामित्रगणस्य च।
न देवरातगोत्रेण विवाहः स्यात परस्परम्॥ इति।

न च देवरातस्य बौधायनादिभिर्जामदग्न्येष्वकथनात् जामदग्न्यत्वे मानाभावः, तत्र जमदग्न्यनुजत्वप्रसिद्धेः। तथा च हरिवंशे—

और्वस्यैव मृचीकस्य सत्यवत्यां महायशाः।
जमदग्निस्तपोवीर्यो जज्ञे ब्रह्मविदां वरः॥
मध्यमस्तु शुनःशेपः शुनःपुच्छः कनिष्ठकः।
देवैर्दत्तः शुनः शेपो विश्वामित्राय भार्गवः॥
देवैर्दत्तः स वै यस्मादेवरातस्ततोऽभ(४)वत्॥

इतिजमदग्निसम्बन्धकथनात्। न चैतावता देवरातस्य भार्ग-

---

(१) 'बव्हृच' नास्ति क०। (२) 'जीगर्तः' क०।
(३) 'तेन प्रत्यक्षश्रुत्या हरिवंशादि द्वौ' ख०।
(४) 'भवेत्' घ० ङ०।

ण तु नेति तत्त्वम् । *धनंजयानां विश्वामित्रैरात्रिभिश्चाविवाहः । *जातूकर्ण्यानां वसिष्ठैरात्रिभिश्चाविवा-

वत्वं भविष्यति न जामदग्न्यत्वमिति वाच्यं, मत्स्यपुराणे जमदग्नेर्जामदग्न्याविदेषु पाठाज्जामदग्न्यत्वे तद्भ्रातुर्देवरातस्यापि तथात्वात् । एकर्ष्युत्पन्नयोर्भिन्नगोत्रप्रवरत्वासम्भवात् । न च विदान्तर्गतस्य जमदग्नेर्देवरातज्येष्ठत्वे किं मानमिति वाच्यं, भार्गवत्वस्यैव तन्मानत्वात् । यत्तु देवरातौ द्वौ एको भार्गवः, अन्य आङ्गिरसः । यथैवाङ्गिरसः सन्नुपेयां तव पुत्रताम् । आङ्गिरसो जन्मना(१)स्याजीगर्त्तिः श्रुतः कविः इति श्रुतेः । तत्र हरिवंशो न प्रवर्त्तते तस्य भार्गवदेवरातत्वात् । तथाचाभार्गवेण देवरातेन जामदग्न्यैर्विवाहो भवत्येवेति । तदपि न, कल्पभेदेन तादृशश्रुत्युपपत्तेराङ्गिरसदेवरातस्यैव भार्गवत्वात, भृग्वङ्गिरसोः पञ्चप्रवरत्वादिनाऽतिसाम्येन भार्गवेणैवाङ्गिरसेत्यभिधानसम्भवाच्च । *धनञ्जयानामिति । वैश्वामित्रमाधुच्छन्दसधानञ्जयेति त्रयः प्रवराः । आत्रेयार्चना(२)नासधानञ्जयेति पक्षान्तरे प्रवरसाम्यात् सगोत्रत्वात् विश्वामित्रानुवृत्तेश्च । तदुक्तम्—

आत्रेयस्य गणस्यापि विश्वामित्रगणस्य च ।
धनञ्जयाख्यगोत्रेण नान्योऽन्यं पाणिपीडनम् ॥ इति ।
अत्रेस्तु पुत्रिकापुत्रा वामरथ्यादयस्तथा ।
विश्वामित्रात्रिगोत्राभ्यां नोद्वहेयुर्धनञ्जयाः ॥ इति ।

वामरथ्या धनञ्जयाश्च विश्वामित्रात्रिभ्यां नोद्वहेयुरित्यर्थः । *जातूकर्ण्यानामिति । वासिष्ठेयात्रेयजातूकर्ण्येति त्रयः प्रवराः, वासिष्ठात्र्योरनुवृत्तेः । तदुक्तम्—

तथैव जातूकर्ण्याश्च वसिष्ठैरात्रिभिस्सह । इति

(१) 'स्राजीगर्त्तिः' घ० ङ० ।
(२) 'नानस' घ० ङ० ।

हः । एवं(१)दत्तक्रीतकृत्रिमस्वयंदत्तपुत्रिका *पुत्रादीनाम् उत्पादकपालकयोः पित्रोर्गोत्रप्रवरा वर्ज्या इति प्रवरमञ्जरीनारायणवृत्तिप्रयोगपारिजातादयः । अत्र सर्वत्रो*पपत्तयः मूलं च मत्कृते प्रवरदर्पणे ज्ञेयमिति दिक् ॥

नोद्वहेयुरितिवर्त्तते *पुत्रादीनामिति । आदिना क्षेत्रजग्रहः *उपपत्तय इति । तुल्यन्यायात् ।

ह्यामुष्यायणका ये च दत्तकक्रीतकादयः ।
गोत्रद्वयेऽप्यनुद्वाह्याः शौङ्गशैशिरयोर्यथा ॥

इति संग्रहोक्तेश्च, "अथ ये दत्तक्रयक्रीतकृत्रिमाः पुत्रिकापुत्राः परपरिग्रहेणार्षेया जातास्ते ह्यामुष्यायणा भवन्ति । यथैते शौङ्गशैशिरिणो यानि चान्यानि एवं समुत्पत्तीनि कुलानि भवन्ति" इति कात्यायनवचनाच्च । नारायणवृत्तौ जनकपालकयोर्दत्तादीनां गोत्रनिषेधः, शौङ्गशैशिरिग्रहणस्य प्रदर्शनार्थत्वादित्युक्तेश्च । यत्तु—

गोत्ररिक्थे जनयितुर्न भजेदत्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥ इति

मानवेन जीवदशायाम् आर्षेणवर्णाभिवादेषु, मृते श्राद्धदेवतात्वे, ज(२)नकगोत्रसम्बन्धनिवृत्त्यर्थम् , उत्तरार्द्धे तथैवोक्तेः । अतएव—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।

इत्यत्र पितृशब्देन दत्तकस्य जनक एवोक्तः । अन्यथा पितृशब्दवैयर्थ्यात् । अत्र चावयोरयमिति संविदं निराकृत्य केवलदत्तकनिराकरणं दिगर्थः श्राद्धे विस्तरः । वस्तुतस्तु मनुवचनमपि ह्यामुष्यायणदत्तकपरमेव । तस्यापि च विवाहो जनकगोत्राया निषिद्ध एव । स्वस्वजनकगोत्रसम्बन्धाभावेन तस्याः स्वगोत्रत्वाभावेऽपि पितृसगोत्रत्वात् । एतदर्थमेव 'असगोत्रा च या पितुः' इ-

(१) 'दत्तकक्रीत' ख० ।
(२) 'जनकागोत्रसम्बन्धनिवृत्त्यर्थम् उत्तरार्द्धे' घ० ङ० ।

क्षत्रियवैश्ययोस्तु पुरोहितगोत्रप्रवरावेवेति *सर्वसिद्धान्तः। यद्यपि बह्वृचपरिशिष्टे कपि(१)भरद्वाजयोर्वित्युक्तं मनुनेति प्रपञ्चितं प्राक्। ह्यामुष्यायणानां सर्वेषां गोत्रद्वयसम्बन्धिवरणे प्राप्ते व्यवस्थामाहाश्वलायनः-"तेषामुभयतः प्रवरान् प्रवृणीते एकमितरतो द्वावितरतः द्वौ वा इतरतः त्रीनितरतः न हि चतुर्णां प्रवरोऽस्ति न पञ्चानाम्" इति। तत्रापि कात्यायनो लौगाक्षिश्च-'पू(२)र्वःप्रवर उत्पादयितुः उत्तरः प्रतिग्रहीतुः' इति विशेषमाहेति।

*सर्वेति। क्षत्रियाणां मनुगोत्रम्। मानवैलपौरूरवसेति त्रयः प्रवराः। वैश्यानां भलन्दनं गोत्रम्। भालन्दनवात्सप्रमाङ्किलेति त्रयः प्रवराः।

मनुर्वैवस्वतश्चैव इडो राजा पुरूरवाः।
क्षत्रियाणां वरा ह्येते विज्ञेया मन्त्रवादिनः॥
भलन्दनश्च वत्सश्च मङ्किलश्चेति ते त्रयः।
एते मन्त्रकृतो ज्ञेया वैश्यानां प्रवराः सदा॥

इति मात्स्यात्। यद्वा पुरोहितगोत्रप्रवरा एव तेषामिति। तत्रान्त्यपक्ष एव सर्वसम्मतः। मन्वादेरगस्त्याष्टप्रसप्तर्षित्वाभावेन गोत्रत्वाभावादिति हि विज्ञानेश्वरः। तयोरेकरूपगोत्रप्रवरत्वे सर्वेषां परस्परमविवाहप्रसङ्ग इति प्रवरमञ्जरीकारादयः। तथाच क्षत्रियवैश्ययोः विवाहे पुरोहितगोत्रप्रवरावेव वर्ज्यौ।

गुरोः सगोत्रप्रवरा नोद्वाह्या क्षत्रविट्जनैः।

इति स्मृत्यर्थसारात्। एतेन क्षत्रवैश्ययोः सजातीयैरविवाहप्रसङ्ग इति न शङ्क्यम्। तेषां प्रवराणां विवाहनिषेधाप्रयोजकत्वात्। तदुक्तम्—

समानप्रवरोद्वाहनिषेधः क्षत्रवैश्ययोः।

(१) 'भारद्वाजयो' क०। (२) 'पूर्वाप्रवर' ख०।

वाह उक्तस्त*थापि—

भरद्वाजाश्च कपयो गर्गा रौक्षायणा इति ।
चत्वारोपि भरद्वाजगोत्रैक्यान्नान्वयुर्मिथः ॥
कपिगर्गभरद्वाजा मिथो रौक्षयणा द्विजाः ।
नोद्वहेयुः सगोत्रत्वात्प्रवरैक्याच्च कुत्रचित् ॥

इति स्मृत्यर्थसाराद्युक्तेरविवाह एव तयोरिति(१) ॥

स्वगोत्राद्यज्ञाने तु सत्याषाढः-'अथाज्ञानबन्धोः पुरोहितप्रवरेणा*चार्यप्रवरेण वेति'।

आचार्यगोत्रप्रवरानभिज्ञस्तु द्विजः स्वयम् ।
दत्त्वात्मानं तु कस्मैचित्तद्गोत्रप्रवरो भवेत् ॥
यद्वा स्वगोत्रप्रवरविधुरो जामदग्निजः ।
विवाहं च न तेनैव गोत्रेण तु समाचरेत् ॥

प्रवरान्मानवेत्यस्मात्प्रवराच्चान्यगोचरः ॥ इति ।

अस्मात् भालन्दनेत्यादितः । कर्माणि वरणादौ वैच्छिको विकल्प इति बहवः । *तथापीति। पञ्चप्रवरोऽपि कपिर्गर्गान्तर्भूतः त्रिप्रवरकपिना सगोत्रश्चेति कपिना कपेर्न विवाह इत्युक्तप्रायम् ।

*आचार्येति । उपनेता आचार्यः, तद्गोत्रप्रवरेणेत्यर्थः । एत-

---

(१) प्रवरमञ्जर्यां यद्यपीदमुक्तं, तथापि भृग्वङ्गिरोगणेषु भवत्येव । तथा बह्वृचपरिशिष्टे बौधायनः-एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते । तावत्समानगोत्रत्वमृते भृग्वङ्गिरोगणात् ॥ माधवीये स्मृत्यन्तरे-पञ्चानां तु त्रिसामान्यादविवाहस्त्रिषु द्वयोः । भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोपि वारयेत् ॥ इति देशाचाराच्च । सोप्याभीरदेशे प्रसिद्धः । चतुर्विंशतिमते-यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत् । नित्यं स व्यवहार्यः स्याद्वेदाच्चैतत्प्रदृश्यते॥ इति दिक् । तथाच भृगुः-यस्मिन् देशे पुरे ग्रामे त्रैविद्ये नगरेपि वा । यो यत्र विहितो धर्मस्तं धर्मं न विचालयेत् ॥ इति । पुनश्चतुर्विंशतिमते-यस्मिन् देशे य आचारः पारंपर्यक्रमागतः । वर्णानां किल सर्वेषां सदाचारः स उच्यते ॥ ख०

गुरुतल्पव्रताच्छुद्ध्येद्भर्भस्तज्ज्ञोऽन्त्यतां व्रजेत् ।
भोगतस्तां परित्यज्य पालयेज्जननीमिव ॥
अज्ञानादैन्दवैः शुद्ध्येत्त्रिभिर्गर्भस्तु काश्यपः ॥
एवं सापिण्ड्येऽपि-

इत्यभियुक्तवचनमपि तत्परमेवेत्यर्थः । दिगर्थस्तु ब्रा(१)ह्मादि विवाहचतुष्टये 'स्वगोत्राद्भ्रश्यते नारी' इति स्वगोत्रभ्रंशेऽपि तद्गोत्राविवाहः सर्वैरपि कलौ न कार्य इत्युक्तमिति । अत्राहुः-'उक्तसत्याषाढवचनस्य निर्मूलत्वमयुक्तम् । न च सत्याषाढसूत्रे तन्नोपलभ्यते इति प्रवरमञ्जर्योमुक्तमिति वाच्यम्, बहुभिः प्रामाणिकैस्तस्य तत्रोक्त एवं कातीयत्वेनाभिधानात् प्रवरमञ्जरीकारीयाऽऽग्रहस्य हेयत्वात् । गुर्जरेषु तद्वचनं कुतो न प्रवर्तते ? इत्यपि न शङ्क्यं, तेषामृग्वेदादिसम्बन्धेन तदाचाराचरणात् । एवञ्च माध्यन्दिनीयानामृग्वेद्याद्यरूढानामित्यर्थः । न च सर्वेषां तद्विवाहः कलिवर्ज्यः, तस्य ह्यामुष्यायणपरत्वात् । 'असगोत्रा च या पितुः' इत्यत्र चकारेण मातुः समुच्चयेन मातुरसगोत्रेत्यस्य दत्तकपरत्वोक्त्या तदेकवाक्यत्वाच्च, "पुरोडाशं चतुर्धा करोति" "आग्नेयं चतुर्धा करोति" इत्यादाविव सामान्यतो मातृगोत्रानिषेधस्य माध्यन्दिनीयेषूपसंहाराच्च । एवं दोषातिगुरुत्वोक्तिरपि न समञ्जसा, प्रायश्चित्तैक्यश्रवणात् । "सगोत्रां मातुरप्येके नेच्छन्ति" इत्यत्रेच्छन्तीत्यभिधानेन तदपरिणयपक्षेऽरुचिध्वननाच्च । एवमेकगोत्रत्वमेवाविवाहप्रयोजकं, न सदृशगोत्रत्वं; मातृगोत्रमितिविशेषोपादानात् । सगोत्रामिति निषेधेऽपि समोत्रपदेन एकगोत्रमेव ग्राह्यम् । तेन न गणैक्यप्रयुक्तदोषः, असमानगणामिति निषेधस्य क्वाप्यनभिधानाच्चेति ।

---

(१) 'ब्राह्मादि' घ० ङ०, 'माह्यादि' ख० ।

सपिण्डापत्यदारेषु *प्राणत्यागो विधीयते ।
इति बृहद्यमोक्तेः । तिथितत्त्वे बौधायनः—'सपिण्डां सगोत्रां चेदमत्योपयच्छेन्मातृवदेनां बिभृयात् ॥'
कन्याविवाहकाल उक्तो ज्योतिर्निबन्धे—

---

*प्राणत्याग इति । गुरुतल्पव्रतमित्यर्थः । सगोत्रसप्रवरोद्वाहे प्रायश्चित्तमाह शातातपः—

परिणीय सगोत्रां तु समानप्रवरां तथा ।
त्यागं कृत्वा द्विजस्तस्यास्ततश्चान्द्रायणं चरेत् ॥

सगोत्रा पितृसगोत्रा "पितृगोत्रं कुमारीणाम्" इत्युक्तेः । एवं समानप्रवरा इत्यत्रापि । सपिण्डाऽपीह बोध्या । एतच्च प्रमादेन सगोत्रादिपरिणयमात्रे । कामतः परिणये प्रजोत्पत्तौ च (स(१)गोत्रां) समानप्रवरां च कामतः परिणीय प्रजामुत्पाद्य गुरुत(२)ल्पव्रतं चरेत्, प्रजां चण्डालेषु निक्षिपेत् । अकामतस्तु संभोगे अर्द्धकृच्छ्रं, कामतो गर्भाभावे गुरुतल्पव्रतार्द्धमिति हारावली । अकामतः प्रजोत्पादने चान्द्रायणम् । प्रजाया भरद्वाजगोत्रान्तर्भावः । विवाहमात्रे कृच्छ्रम् । सर्वत्र व्रतांते ऽष्टोत्तरशतं समिद्धोमः । तां परित्यजेदिति दैवज्ञशंकरः । मातुलसुतादिविवाहमात्रे चान्द्रं, 'मातुलस्य सुता(३)मूढ्वा'इति वचनात् । एवं सगोत्रादिरपि ग्राह्या । 'परिणीय सगोत्रां तु' इति वचनात् । अत्र प्रतिगमनं चान्द्रायणाद्वत्तिरित्येके । अज्ञानात्सकृद्गमने चान्द्रद्वयं, ज्ञानात्तु कृच्छ्राब्दः । अज्ञानादेकादिने अभ्यासे त्रैवार्षिकं, ज्ञानतस्तु षड्वार्षिकम् । एकरात्रादूर्ध्वमकामतो ऽभ्यासे च वार्षिकं, तत्रैव कामतोऽग्निप्रवेशरूपं मरणान्तम् । एतद्दहुकालमविच्छिन्नाभ्यासे । अल्पकालाभ्यासे तु द्वादशाब्दम् । रेतःसे-

---

(१) 'सगोत्रां' नास्ति घ० ङ० ।
(२) 'तल्पं' ख० ।
(३) 'सुतेति' घ० ङ० ।

कादर्वाङ् निवृत्तौ मासोपवासः, चान्द्रायणद्वयं वेति दर्पणः। अत्र त्यागं (१)कृत्वेत्यत्र भोगत इति चन्द्रिका।

समानप्रवरां कन्यामेकगोत्रामथापि वा।
विवाहयति यो मूढस्तस्य वक्ष्यामि निष्कृतिम्।
उत्सृज्यतां ततो भार्यां मातृवत् परिपालयेत्॥

इति शातातपेन मातृवदित्युक्तेः, "ब्राह्मणीं त्यजेन्मातृव-(ङ्ग(२)गिनीवत्) इति बौधायनोक्तेश्च।

भोगतस्तां परित्यज्य पालयेज्जननीमिव।

इति दृष्टान्तविवरणात्। धर्मकार्येऽपीत्यन्ये, 'व्रतपरिनिष्ठिते ब्राह्मणीं त्यजेत्' इति बोधायनोक्तेः। मूढपदादज्ञानतो विवाहे एतत्। ज्ञाने द्विगुणं,

विहितं यदकामानां कामात्तद्विगुणं भवेत्।

इति स्मृतेः। ऊढ्वोपगमने तु सगोत्रागमनप्रायश्चित्तेन समुच्चयः। निमित्तयोः परस्परं व्यभिचारात्।

समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च।
तस्यामुत्पाद्य चण्डालं ब्राह्मण्यादेव हीयते॥

इति बौधायनात्। "अकामतः परिणयने कृच्छ्रं, प्रजोत्पादने चांद्रायणम्" इति बौधायनोक्तेः। गमनप्रायश्चित्ते एकत्वमविवक्षितं, विज्ञानेश्वरेण अज्ञानतः सकृत्सगोत्रागमने चान्द्रद्वयोक्तेः। यद्वा चान्द्रं विवाहपरं गमनफलकस्य विवाहस्य गमनपदेनाभिधानात्। गमनप्रायश्चित्तं तु गुरुतल्प(३)समत्वप्रयुक्तं षडब्दं सगोत्रासमानयोगचाण्डालयादिगमने विहितम्।

बहूनामेकधर्माणामेकस्यापि यदुच्यते।
सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृताः॥

---

(१) 'कृत्वेव भोगतः' घ० ङ०।
(२) कोष्ठान्तर्गतं नास्ति घ० ङ०। (३) 'समयत्व' ख०

इति वचनात् । सगोत्रागमनेतु (१)अर्द्धं चान्द्रद्वयादि च विज्ञानेश्वरोक्तविधया माधवाद्युक्तविधया व्यवस्थितं बोध्यम् अधिकविस्तरे ग्रन्थान्तरतो ज्ञेयः । सगोत्राद्यपत्यानामज्ञानत उत्पत्तौ जन्यजनकभावस्य यौ न संसर्गस्य सद्यः पातित्यापादकत्वात् तत्प्रयुक्तं प्रायश्चित्तं कारयित्वा कश्यपगोत्रेण व्यवहारः कार्यः, "गर्भस्तु काश्यपः" इत्युक्तेः,"भोगेन दुष्यति (२)काश्य इति विज्ञायते" इति बौधायनोक्तेश्च । ज्ञानत उत्पत्तौ तु चण्डालत्वमेव ।

आरूढपतितापत्यं ब्राह्मण्यां यश्च शूद्रतः ।
सगोत्रोढासुतश्चैवं चण्डालास्त्रय ईरिताः ॥

इति वचनादिति प्रवररत्नः । विश्ववादर्शे—

अज्ञानाद्यदि वोद्वाहः प्रायश्चित्तं तथैव च ।
सगोत्रप्रवरायाश्च ततः संग्रहणे विधिः ॥

षट्त्रिंशन्मते—

समानप्रवरां मातृसगोत्रां मातृनामिकाम् ।
परिणीय सपिण्डां वा प्रायश्चित्तीयते द्विजः ॥
प्रायश्चित्तं वदन्त्यत्र युगधर्मव्यवस्थया ।
मोहोद्वाहे तु दम्पत्योरेकं चान्द्रायणं स्मृतम् ॥
द्वैगुण्यं ज्ञानतस्तत्र परिणीतौ विधीयते ।
कन्यादातुर्भवेत्कृच्छ्रं ज्ञानतो द्विगुणं भवेत् ॥
व्रतस्यकरणाशक्तौ प्रत्याम्नायं समाचरेत् ।
चीर्णव्रतां दुहितरं पिताचीर्णव्रतः शुचिः ॥
भारद्वाजेषु विप्रेषु कश्यपेष्वथवा क्षिपेत् ।
दुहितृत्वेन संगृह्य भारद्वाजोऽथ कश्यपः ॥
घृतकुम्भस्य गर्भे तु तामादध्याद्विधानतः ।

---

(१) 'ऽयर्द्धं' घ० ङ० । (२) 'कश्यप' घ० ङ० ।

जातकर्महयावन्नप्राशनं चौलमेव च ॥
विधाय मधुपर्कं च मन्त्रमात्रेण मन्त्रवित् ।
मुहूर्ते विप्रकथिते शुचि तामप्यलङ्कृताम् ॥
संस्कारार्थाय मानाय पत्येतु प्रतिपादयेत् ।
वैवाहिकानथो मन्त्रानशेषानप्यतान्द्रितः ॥
स्वगृह्योक्तक्रमेणैव पठेदूधृतवधूकरः ।
चतुर्थीकर्मपर्यन्तं विधिमेवं समाप्य तु ॥
कृताशीर्वचनो विप्रैर्दक्षिणाभिः सुतोषयेत् ।
प्रणम्य विसृजेद्देवान् पश्चाद्भोजयते तथा ॥
कृ(१)त्वेत्थं पुनरुद्वाहं न किल्बिषमवाप्नुयात् ।
अन्यथा कुरुते यस्तु संग्रहं स नराधमः ॥
व्रजेत्स पितृभिः सार्द्धं नराकानेकविंशतिम् ।
मातृनाम्नीविवाहे तु विशेषोऽत्राभिधीयते ॥
परिवर्त्यैव नामास्याः पुनरुद्वाहमाचरेत् ।
नैवं विवोढुरेनः स्यादित्येवं मुनयो विदुः ॥
त्रिरात्रं ब्रह्मचर्यं स्यात्पुनरुद्वाहकर्मणि ।
सगोत्रापरिणीतौ तु परित्यागो विधीयते ॥

सगोत्राशब्दः समानप्रवराया अप्युपलक्षकः, 'समानप्रवराम्' इत्युपक्रमबलात् । एवञ्च मातृनाम्नीविवाहे पुनरुद्वाहमात्रं, नतु तत्परित्याग इति गम्यते। तत्र-

ज्ञानाज्ज्ञातमपत्यं तु काश्यपत्वं प्रपद्यते ।
ऐन्दवद्वयतः शुध्येन्मिन्दाहुत्या च तत्पिता ॥ इति ।

दुहितृत्वेनेति । भारद्वाजाय (२)कश्यपाय वा इमां कन्यां दुहितृत्वेन संप्रददे इत्युक्त्वा दद्यादित्यर्थः । घृतकुम्भस्य गर्भे इति

---

(१) 'कृत्वेत्थं' ख०
(२) 'कश्यपाय इमां' ख० ।

सामीप्ये षष्ठी, तादृशघृतकुम्भसम्भवे त्वधिकरणत्वमेव । प्रत्याम्नायमिति ।

कृच्छ्रे गामेकिकां दद्यात्तिस्रश्चान्द्रायणे तु ताः ।

इति स्मृत्युक्तम् । ऐन्दवद्वयं चान्द्रायणद्वयम् । मिन्दाङ्कुत्येति जात्यैकवचनम् । तथाच "यन्म आत्मनो मिन्दाऽभूत्" "पुनरग्निश्चक्षुरदात्" इति द्वयलाभः । (१)पाठान्तरे "निन्दा च मेऽनिन्दा च मे" "तन्म उभयव्रतम्" इत्याहुतिद्वयम् । तथाच त्रिकाण्डमण्डनः—

पारिणीतसगोत्रायामज्ञानाज्जनितः शिशुः ।
काश्यपो न तु चण्डालः पितुः कृच्छ्रद्वयं स्मृतम् ॥
निन्दाहुती द्वे जुहुयाद्व्रतान्ते दीप्तपावके ॥ इति ।

पुनरुद्वाहे नोत्तरायणादिकालानियमः, "सार्वकालिकमेके विवाहम्" इत्याश्वलायनोक्तेः । ईदृशवचनस्येदृशस्थल एव चारितार्थ्यात् । विधान(२)परिधाने—

वसिष्ठौ द्वौ च विज्ञेयौ ब्रह्मपुत्रो ऽथ शापतः ।
मैत्रावरुणिरित्येव वसिष्ठो विग्रहान्तरात् ॥
ब्रह्मात्मजाच्छक्तिपराशरव्यासशुकादयः ।
ज्ञेया, विवेकस्त्वनयोर्द्वितीयात्कुण्डिनादयः ॥

अतएव भिन्नगोत्रत्वाद्भिन्नशरीरत्वाच्च वसिष्ठवा(३)सिष्ठगणयोर्विवाहो भवति ।

वासिष्ठ इन्द्रप्रमदो भरद्वाजस्तु (४)संकृतिः ।
कौण्डिन्यः प्रतिभाषश्च गौरिवीतः पराशरः ॥
मैत्रावरुणिशक्तीद्वावुपमन्युगणः स्मृतः ।
एकादश वसिष्ठस्य गोत्राण्यस्मिन्नदोग्रहः ॥

---

(१) निन्दाहुत्येति पाठान्तरे इत्यर्थः । (२) 'पारिधाने' घ० ङ० ।
(३) 'वासिष्ठ' नास्तिः घ० ङ० । (४) 'संकृमिः' घ० ङ० ।

*षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः ।
सोमो भुङ्क्ते ततस्तद्वद्गन्धर्वश्च तथाऽनलः ॥

राजमार्तण्डः—

अयुग्मे दुर्भगा नारी युग्मे तु विधवा भवेत् ।
तस्माद्युग्मान्विते युग्मे विवाहे सा पतिव्रता ॥
मासत्रयादूर्ध्वमयुग्मवर्षे युग्मेपि मासत्रयमेवयावत् ।
विवाहशुद्धिंप्रवदन्तिसन्तोवात्स्यादयःस्त्रीजनिजन्ममासात

पराशरमाधवीये तु—

जन्मतो गर्भाधानाद्वा पञ्चमाब्दात्परं शुभम् ।
कुमारीवरणं दानं मेखलाबन्धनं तथा ॥

इत्युक्तम् । सम्बन्धतत्त्वे यमः—

कन्या द्वादशवर्षाणि याऽप्रदत्ता वसेद् गृहे ।
ब्रह्महत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम् ॥

भारते—

मा(१)त्स्ये—मैत्रावरुणयोर्वदर्याश्रमे तपस्यतोः उर्वशीं दृष्ट्वा रेतः स्कन्नम् । तच्च ताभ्यां पापभयाज्ज(२)लकुम्भे निक्षिप्तम् । ततो वसिष्ठ अगस्तिश्चाभूत् । ततो वसिष्ठादरुन्धत्यां शक्तिरुत्पन्नः, ततः पराशरस्ततो व्यास इत्युक्तम् । निमिमुख्यवसिष्ठयो(३)र्याजनप्रसङ्गे मिथः शप्तयोर्विदेहयोर्ब्रह्मवाक्यादेव कुम्भे जन्य जातं निमिस्तु निमेषरूपेण नेत्रयोर्जातः । एतौ द्वौ भिन्नपितृकौ पृथग्भूतावमातृकौ भिन्नजात्योरेकगृहोत्पत्तिवत् एककुम्भे जातावित्यनयोर्विवाहो भवतीति ।

*षडब्देति ।

---

(१) 'मात्स्ये तु' घ० ङ० ।

(२) 'जलपूर्णकुम्भे' घ० ङ० ।

(३) 'याजप्रसङ्गेन मिथः शप्तयोर्विदेहयोर्ब्रह्मयोर्ब्रह्म' घ० ङ० ।

त्रिंशद्वर्षः षोडशाब्दां भार्यां विन्देत (१)नग्निकाम्।
द्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः॥
अतोऽप्रवृत्ते रजसि कन्यां दद्यात्पिता सकृत्।

तत्रैव—

सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः।
कन्यायाः शस्यते राजन्नन्यथा धर्मगर्हितः॥

राजमार्तण्डः—

राहुग्रस्ते तथा युद्धे पितॄणां प्राणसंशये।
*अतिप्रौढा च या कन्या चन्द्रलग्नबलेन तु॥

भविष्ये—

उभयस्यापि पक्षस्य मनोऽभ्युदयपूर्वकम्।
कुमार्यास्त्वष्टवर्षायाः शस्यते पाणिपीडनम्॥

गर्भाष्टमोऽपि बोध्यः।

वैवाहिको विधिः स्त्रीणामौपनायनिकः परः।

इत्युक्तेर्ये गर्भाष्टमपञ्चमवर्षादयः कालास्ते कन्याविवाहेऽपि ग्राह्याः। अत एव मनुरपि—

उत्कृष्टायानुरूपाय सदृशाय वराय च।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्विचक्षणः॥ इति।

अप्राप्तपञ्चवर्षादिकालामप्याह। *अतिप्रौढा चेति। चकारादतिबालाऽपि, अस्याः पित्रोः प्राणसंशयानुरोधेन विवाह्यत्वात्।

---

(१) नग्निकालक्षणं तूक्तं गृह्यसंग्रहे-'नग्निकां तु वदेत् कन्यां यावन्नर्तुमती भवेत्। ऋतुमती त्वनग्निका तां प्रयच्छेत्तु नग्निकाम्॥ अप्राप्ता रजसो गौरी प्राप्ते रजसि रोहिणी। अव्यञ्जिता भवेत् कन्या कुचहीना च नग्निका॥' इति। तथा रजोदर्शनात्प्रागेव विवाहकारणमुक्तं तत्रैव। यथा—'व्यञ्जनैस्तु समुत्पन्नैः सोमो भुञ्जीत कन्यकाम्। पयोधरैस्तु गन्धर्वो रजसाऽग्निः प्रकीर्तितः॥ तस्माद्व्यञ्जनोपेतामरजामपयोधराम्। अभुक्तां चैव सोमाद्यैः कन्यकां तु प्रशस्यते॥' इति।

मनुः—

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥

यद्यपि—

विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैः ।

इति संवर्तोक्तेः, 'अत ऊर्ध्वं रजस्वला' इत्यादेश्च दशवर्षादूर्ध्वं विवाहो निषिद्धः, तथापि दातुरभावे द्वादशषोडशाब्दे ज्ञेये ।

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् ।

इति पराशरमाधवीये बौधायनोक्तेश्च । मनुः—

स्त्रीसंबन्धे दशैतानि कुलानि परिवर्जयेत् ।
हीनक्रियं निःपुरुषं निश्छन्दोरोमशार्शसम् ॥
क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ।
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ॥
न पक्ष्यहिप्रेष्यनाम्नीं(१)न बिभीषणनामिकाम् ।

यमः—

तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत् ।

तथा मूलजादीनां फलं प्रागुक्तम् । तथा*वर्णवद्दश ग्रहमैत्र्यादिघटितविचारो ज्योतिर्विद्भ्यो ज्ञेयः । विस्तरान्तु नोच्यते ।

अथ गुर्वर्कबलम् । ज्योतिर्निबन्धे गर्गः—

स्त्रीणां गुरुबलं श्रेष्ठं पुरुषाणां रवेर्बलम् ।
तयोश्चन्द्रबलं श्रेष्ठमिति गर्गेण भाषितम् ॥
जन्मत्रिदशमारिस्थः पूजया शुभदो गुरुः ।
विवाहेऽथ चतुर्थाष्टद्वादशस्थो मृतिप्रदः ॥

*वर्णेति ।

(१) 'न च भीषणनासिकाम्' क० ।

देवलः—

नष्टात्मजा धनवती विधवा कुशीला
पुत्रान्विता हतधवा सुभगा विपुत्रा ।
स्वामिप्रिया विगतपुत्रधवा धनाढ्या
वन्ध्या भवेत्सुरगुरौ क्रमशोभिजन्मा ॥

बृहस्पतिः—

क्षपचापकुलीरस्थो जीवोप्यशुभगोचरः ।
अतिशोभनतां दद्याद्विवाहोपनयादिषु ॥

लल्लः—

द्वादशदशमचतुर्थे जन्मनि षष्ठाष्टमे तृतीये च ।
प्राप्ते पाणिग्रहणे जीवे वैधव्यमाप्नोति ॥

गर्गः—

सर्वत्रापि शुभं दद्याद्द्वादशाब्दात्परं गुरुः ।
पञ्चषष्ठाब्दयोरेव शुभगोचरता मता ॥
सप्तमात्पञ्चवर्षेषु स्वोच्चस्वर्क्षगतो यदि ।
अशुभोपि शुभं दद्याच्छुभर्क्षेषु किं पुनः ॥
रजस्वलायाः कन्याया गुरुशुद्धिं न चिन्तयेत् ।
अष्टमेऽपि प्रकर्तव्यो विवाहस्त्रिगुणार्चनात् ॥
अर्कगुर्वोर्बलं गौर्या रोहिण्यर्कर्ब(१)ला स्मृता ।
कन्या चन्द्रबला प्रोक्ता वृषली लग्नतो बला ॥
अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

विलोक्य जन्मनक्षत्रे राशिकूटादिकं शुभम् ।
सुलग्ने सुमुहूर्ते च दद्याच्चैव यथाविधि ॥

---

(१) 'बलान्विता' क० ।

अथ बृहस्पतिशान्तिः । शौनकः—

*कन्यकोद्वाहकाले तु आ(१)नुकूल्यं न विद्यते ।
ब्राह्मणस्योपनयने गुरोर्विधिरुदाहृतः ॥
सुवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत् ।
ईशान्यां धवलं कुम्भं धान्योपरि निधाय च ॥

इति भविष्यात् ।

*कन्यकोद्वाहकाले त्विति । प्रकारान्तरं स्कान्दे—

कन्याविवाहकाले तु शुद्धिर्यस्या न विद्यते ।
ब्राह्मणस्योपनयने गुरोर्विधिरुदाहृतः ॥
एभिः पूजा गुरोः कार्या विधिवद्भक्तिभावितैः ।
मदन्तीकामपुष्पाणि पत्रपालाशसर्षपाः ॥

मदन्ती पूतिका, कामो मदनः ।

गु(२)डूचीवान्यपामार्गविडङ्गं शङ्(३)खिनी वचा ।
सहदेवी विष्णुक्रान्ता सर्वौषध्यः शतावरी ॥
तथैवाश्वत्थभङ्गाश्च पञ्चगव्यं जलं तथा ।
नूतनं सोदकु(४)म्भं च पीतवस्त्रसमन्वितम् ॥
पञ्चरत्नैः समायुक्तमीशान्यां स्थापितानलात् ।
या ओषधीति मन्त्रेण सर्वास्तस्मिन्विनिक्षिपेत् ॥
कुम्भस्योपरिभागे तु स्थापयित्वा बृहस्पतिम् ।
सुवर्णपात्रे सौवर्ण्यां प्रतिमायां युधिष्ठिर ॥
कारयेत्तु यथाशक्त्या वित्तशाठ्यविवर्जितः ।
पीतवस्त्रयुगच्छन्नां पीतयज्ञोपवीतिकाम् ॥
पूजयेद्गन्धपुष्पाद्यैस्ततो होमं समाचरेत् ।
समिधोऽश्वत्थवृक्षस्य होम्या अष्टोत्तरं शतम् ॥

---

(१) 'अनुकूल्यं' क० । (२) 'गडूची' ख० ।
(३) 'शङ्खनी' ख० । (४) 'कुम्भे' घ० ङ० ।

दमनं मधुपुष्पं च पलाशं चैव सर्षपान् ।
मांसी गुडूच्यपामार्गो विडङ्गी शङ्खिनी वचा ॥
सहदेवी हरिक्रान्ता सर्वौषधिशतावरी ।
बला च सहदेवी च निशाद्वितयमेव च ॥
कृत्वाज्यभागपर्यन्तं स्वशाखोक्तविधानतः ।
ग्रहोक्तमण्डलेऽभ्यर्च्य पीतपुष्पाक्षतादिभिः ॥

ततो होमावसाने तु पूजयेच्च बृहस्पतिम् ।
पीतगन्धैस्तथा पुष्पैर्धूपैर्दीपैश्च शक्तितः ॥
दध्योदनं च नैवेद्यं फलताम्बूलसंयुतम् ।
मंत्रेणानेन कौन्तेय समभ्यर्च्य पुनः पुनः ॥
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ बृह(१)स्पते ।
क्रूरग्रहैः पीडितानाममृताय नमो नमः ॥
पूजयित्वा सुराचार्यं पश्चादर्घ्यं निवेदयेत् ।
गम्भीरदृढरूपाङ्ग देवेज्य सुमते प्रभो ॥
नमस्ते वाक्पते शान्त गृहाणार्घ्यं नमोऽस्तु ते ।
अर्घ्यं दत्त्वा सुरेशाय जपहोमं समापयेत् ॥
भक्त्या यत्ते सुराचार्य होमपूजादि (२)यत्कृतम् ।
तत्त्वं गृहाण शान्त्यर्थं बृहस्पते नमो नमः ॥
मन्त्रेणानेन सङ्कल्प्य पश्चात्सम्प्रार्थयेन्नृ(३)प ।
"जीवो बृहस्पतिः सुरिराचार्यो गुरुराङ्गिराः ॥
वाचस्पतिर्देवमन्त्री शुभं कुर्यात्सदा मम" ॥

प्रार्थनामन्त्रः ।

एवं तं प्रार्थयेद्देवमाचार्यं च प्रपूजयेत् ।
सर्वोपस्करसंयुक्तां प्रतिमां तां युधिष्ठिर ॥

(१) 'बृहस्पतेः' घ० ङ०।
(२) 'मत्कृतं' घ० ङ०। (३) 'नृपः' घ०ङ०।

देवपूजोत्तरे काले ततः कुम्भानुमन्त्रणम् ।
अश्वत्थसमिधश्चाज्यं पायसं सर्पिषा युतम् ॥
यवव्रीहितिलाः साज्या मन्त्रेणैव बृहस्पतेः ।
अष्टोत्तरशतं सर्वं होमशेषं समापयेत् ॥
पुत्रदारसमेतस्य अभिषेकं समाचरेत् ।
कुम्भाभिमन्त्रणोक्तैश्च समुद्रज्येष्ठमन्त्रतः ॥
प्रतिमां कुम्भवस्त्रं च आचार्याय निवेदयेत् ।
ब्राह्मणान्भोजयेत्पश्चाच्छुभदः स्यान्न संशयः ॥
इति बृहस्पतिशान्तिः ।

प्रणम्य च गवा युक्तामाचार्याय निवेदयेत् ।
अथाचार्यस्तु नियतो वेदवेदाङ्गपारगः ॥
यजमानं सपत्नीकं शान्तचित्तं जितेन्द्रियम् ।
कुम्भोदकं गृहीत्वा तु मन्त्रैरेतैः प्रसिञ्चयेत् ॥
(१)इदमापोऽथ मन्त्रेण तामग्निमित्यृचा तथा ।
या ओषधीरश्वावतीः कूष्माण्डैश्चा(२)भिषेचयेत् ॥
पश्चात्सम्भोजयेद्विप्रान् यथाशक्त्या युधिष्ठिर ।
एवं पूजां गुरोः कृत्वा सर्वान्कामानवाप्नुयात् ॥ इति ।

अथ

वरस्य भास्करं लग्नं कन्यायाश्च गुरोर्बलम् ।

इतिवचनाद्वरस्य रविबलाभावे कुमारस्योपनयने च दुष्टरवौ रविशान्तिमाह शौनकः—

ब्राह्मणस्योपनयने नानुकूलो भवेद्रविः ।
तस्य शान्तिं प्रवक्ष्यामि मन्त्रौषधिविधानतः ॥
उपायनात्तु पूर्वेद्युः कृत्वा पुण्याहवाचनम् ।
गृहस्येशानदिग्भागे गोमयेनोपलेपयेत् ॥

---

(१) 'इममा' घ० ङ० । (२) 'आभिषिञ्चयेत्' घ० ङ० ।

शौनकः—

गुर्वादित्ये व्यतीपाते वक्रातीचारगे गुरौ ।
नष्टे शशिनि शुक्रे वा बाले वृद्धेऽथवा गुरौ ॥
पौषे चैत्रेऽथ वर्षासु शरद्यधिकमासके ।
केतूद्गमे*निरंशेऽर्के सिंहस्थेऽमरमन्त्रिणि ॥
विवाहव्रतयात्रादिपुरहर्म्यगृहादिकम् ।
क्षौरं विद्योपविद्यां च यत्नतः परिवर्जयेत् ॥

मदनपारिजाते ज्योतिःसागरे—

बाले शुक्रे वृद्धे शुक्रे वृद्धे जीवे नष्टे जीवे ।
बाले जीवे जीवे सिंहे सिंहादित्ये जीवादित्ये ॥
तथा मलिम्लुचे मासि सुराचार्येऽतिचारगे ।
वापीकूपविवाहादिक्रियाः प्राणुदितास्त्यजेत् ॥

कुङ्कुमेनोल्लिखेत्पद्ममष्टपत्रं सकेसरम् ।
सुवर्णेन रविं कृत्वा द्विभुजं पद्मधारिणम् ॥
कृत्वाज्यभागपर्यन्तं तन्त्रं कृत्वा तु पूर्ववत् ।
स्वशाखोक्तविधानेन आचार्यो होममाचरेत् ॥
आकृष्णेनेति मन्त्रेण समिदाज्यचरून्हुनेत् ।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ॥
तिलव्रीहींश्च हुत्वाऽथ होमशेषं समापयेत् ।
दारपुत्रसमेतस्य ऋत्विग्भिरभिषेचयेत् ॥
कुम्भाभिमन्त्रणोक्तैश्च समुद्रज्येष्ठमन्त्रकैः ।
ऋत्विग्भो दक्षिणां दत्त्वा आचार्याय च शक्तितः ॥
प्रतिमां वस्त्रयुग्मं च आचार्याय प्रदापयेत् ।
एवं यः कुरुते शान्तिं सर्वदोषो विनश्यति ॥ इति ।

त्रिषडायस्थो रविरुत्तमः, तद्भिन्नो ऽशुभः तत्राष्टमोऽधिशुभः ।

सिंहस्थं मकरस्थं च गुरुं*यत्नेन वर्जयेत् ।

लल्लः—

अतिचारगतो जीवस्तं राशिं नैव चेत्पुनः ।
लुप्तः संवत्सरो ज्ञेयः सर्वकर्मबहिष्कृतः ॥

सिंहस्थगुरोर*पवादमाह पराशरः—

*गोदाभागीरथीमध्ये नोद्वाहः सिंहगे गुरौ ।
*मघास्थे सर्वदेशेषु तथा मीनगते रवौ ॥

वसिष्ठोऽपि-

विवाहो दक्षिणे कूले गौतम्यां, नेतरत्र तु ।
भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तथा ॥
विवाहो व्रतबन्धश्च सिंहस्थेऽब्धे न दुष्यति ।

---

*निरंशे । राशिप्रथमभागस्थे । *यत्नेनेति । प्रागुदितासु क्रियासु इति विपरिणतमनुवर्तते । विशेषतोऽपि स्कान्दे—

सिंहस्थिते गुरौ राजन् विवाहं नैव कारयेत् ।
मकरस्थे न कर्तव्यं यदीच्छेदात्मनः शुभम् ॥
व्रतबन्धं प्रतिष्ठां विवाहं मन्दिरप्रवेशं च ।
यात्रां च याम्यदेशे कुर्यादार्यो न सिंहांशे ॥

इत्यादि सिंहस्थे गुरौ सर्वदेशेषु विवाहादि सर्वमपि कर्म न कार्यमित्यर्थः । *अपवादमिति । आवश्यके कर्मणीत्यादि । *गोदेति । गङ्गागोदान्तरालं हित्वा सिंहांशोत्तीर्णे गुरौ कार्यमित्यर्थः,

नीचराशिगतो जीवः प्रशस्तः सर्वकर्मसु ।
नीचांशकगतस्त्याज्यो यस्मादंशेषु नीचता ॥

इति वसिष्ठोक्तेः । *मघास्थे इति । मघास्थे गुरौ सर्वदेशेषु नोद्वाह इत्यन्वयः ।

माघ्यां यदि मघा न स्यात्सिंहे गुरुरकारणम् ।
सिंहस्थेऽपि मघासंस्थं गुरुं यत्नेन वर्जयेत् ॥

क(१)न्यादातृक्रममाह याज्ञवल्क्यः—

*पिता पितामहो भ्राता*सकुल्यो जननी तथा।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥
अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ।
(२)गम्यं स्वभावे दातॄणां कन्या कुर्यात्स्वयंवरम्॥

भ्रातॄणां संस्कृतानामेवाधिकारमाह (३)स एव याज्ञवल्क्यः—

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः।
भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकम्॥

*अत्र चकारेण पूर्वसंस्कृतैरित्यस्यानुवृत्तेर्विवाहपर्याप्तद्रव्यदाने (४)स्वांशचतुर्थभागदाने वा संस्कृतग्रहणं व्यर्थं स्यात्, अतः कर्तृनियमोऽयम्। तेनानुपनीतभ्रातृणां मात्रादिसत्त्वे मात्रादेरेवाधिकारो न भ्रातुरित्युक्तं सं-

---

अन्यत्र सिंहभागे तु विवाहादिकमाचरेत्।
इति केचित्। मीनगते रवौ चैत्रे सर्वदेशेषु नोद्वाह इत्यर्थः।

*पितेति। प्रकृतिस्थः। उन्मादादि दोषहीनः। *सकुल्यः पितृव्यतत्पुत्रादिः। नाशोऽसान्निध्याद्यपि। अतएव 'पिता प्राप्तस्वयं कन्याम्' इत्यादि क्रमान्तरमनुपदं वक्ष्यति। गम्यं स्वयं वरं कुर्यादित्यन्वयः। गम्यं गमनार्हं सावर्ण्यादिगुणयुक्तम्। नन्वसंस्कृता भ्रातरः पूर्वसंस्कृतैर्भ्रातृभिः संस्कार्याः, असंस्कृता भगिन्यश्च भ्रातृभिः संस्कार्या इत्यर्थे अनुपनीतभ्रातॄणां भगिनीविवाहेऽधिकारापत्तिरित्यत्राह—*अत्रेति। तुरीयांशस्यात्याधिक्येऽतिन्यूनत्वे वा दोष इति विवाहपर्याप्तपरं तुरीयपदमिति भावः। *व्यर्थं

---

(१) 'कन्यावाग्दातृक्रम' ख०। (२) 'गम्यत्वभावे' ख०।
(३) 'सएव' नास्ति क०। (४) 'स्वांशसमांशे च' क० ख०।

बन्धतत्त्वादौ। कन्यास्वयंवरे मातुर्दातृत्वे च ताभ्यामेव नान्दीश्राद्धं कार्यम्। *तत्र च स्वयं प्रधानसंकल्पमात्रं कृत्वाऽन्यद्ब्राह्मणद्वारा कारयेदिति प्रयोगपारिजाते। *वरस्तु संस्कृतभ्रात्राद्यभावे स्वयमेव नान्दीश्राद्धं कुर्यात् न माता,

पुत्रेषु विद्यमानेषु नान्यं वै कारयेत्स्वधाम्।

इति निषेधात्, उपनयनेन कर्माधिकारस्य जातत्वाच्चेति पृथ्वीचन्द्रोदयः। माधवीयेऽपरार्के च नारदः--

*पिता दद्यात्स्वयं कन्यां भ्राता वाऽनुमते पितुः।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते।
तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः॥
सकुल्यः पितृपक्षीयो बान्धवो मातृवंशजः।

मदनपारिजाते कात्यायनः--

*स्वयमेवौरसीं दद्यात्पि(१)त्रभावे स्वबान्धवाः।
मातामहस्ततोऽन्यां (२)हि माता वा धर्मजां सुताम्॥

स्यादिति। तावद्द्रव्यदातृत्वेनैवार्थतः संस्कृतत्वलाभादिति भावः। अनुकल्पमाह-*तत्र च स्वयमिति। *वरस्तु इति।

नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः।

इत्यत्राधिकं स्फुटी करिष्यामः। *पितेति। पितामहादीनां कन्यादानेऽधिकारः पूर्वनाशे एव, 'पूर्वनाशे' इत्युक्तेः। प्रतिनिधित्वं च 'पितुरनुमते' इत्युक्तेः। पितृपक्षीय उक्तः। मातृवंश्यः मातुलपुत्रादिः। मातामहमातुलयोरभावे सकुल्यस्याधिकारे प्राप्ते आह-*स्वयमिति। स्वयं पिता, स्वबान्धवाः पितुर्भ्रातृपितामहा-

---

(१) 'पितृभावे' ख०। (२) 'वै' क०।

ततोऽन्यामौरसीभिन्नां धर्मजां नियोगात्क्षेत्रजां मातामहो (१) माता मातुलो वा दद्यात् । तेनौरसीदाने पितृबन्धुषु सत्सु मातामहादीनां नाधिकारः अनुमतिं विना । अस्यापवादस्तत्रैव—

दीर्घप्रवासयुक्तेषु*पौगण्डेषु च बन्धुषु ।
माता तु समये दद्यादौरसीमपि कन्यकाम् ॥

मनुः—

यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत् ।

परकीयकन्यादाने विशेषो भदनरत्ने स्कान्दे—

*आत्मीकृत्य सुवर्णेन परकीयां तु कन्यकाम् ।
धर्मेण विधिना दानम*सगोत्रेऽपि युज्यते ॥

अत्र प्रकृतिस्थग्रहणादप्रकृतिस्थेन कृतमकृतमेव,

स्वतन्त्रो यदि तत्कार्यं कुर्यादप्रकृतिं गतः ।
तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेतुतः ॥

इत्यपरार्के नारदोक्तेः । यदि तु सप्तपदीविवाहहोमादि प्रधानं जातं तदाङ्गवैकल्येऽपि नावृत्तिर्विवाहस्य ।

दयः । *पौगण्डेषु पञ्चाब्दात्किञ्चिदधिकेषु ।

*आत्मीकृत्येति । इयं च कन्या क्रीतेति नन्दपण्डितोक्तं न युक्तम् ,

अनाथां (२)कन्यकां दत्त्वा सदृशाभ्यधिके वरे ।
द्विगुणं फलमाप्नोति कन्यादाने यदीरितम् ॥

इति स्कान्दे एवमन्यकन्यायाः धर्मार्थमन्येन दानव्यञ्जनात् । आत्मीकृत्येत्यस्यात्मन इव कृत्वेत्यर्थः । *असगोत्रेऽपीति । असपिण्डोऽप्यर्थः । कन्याया एव सगोत्रसपिण्डादि वर्ज्य—

---

(१) 'माता' नास्ति क० । (२) 'कन्यकां दृष्ट्वा' ख० ।

गौडा अप्येवमाहुः। तत्रैव मरीचिः--

*गौरीं ददन्नाकपृष्ठं, वैकुण्ठं रोहिणीं ददत्।
कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलाम्॥

अथ मासनिर्णयः। तत्र जन्ममासे विशेषः प्रागुक्तः। ज्योतिःप्रकाशे व्यासः--

माघफाल्गुनवैशाखे यद्यूढा मार्गशीर्षके।
ज्येष्ठे वाऽऽषाढमासे च सुभगा वित्तसंयुता॥
श्रावणे वापि पौषे वा कन्या भाद्रपदे तथा।
चैत्राश्वयुक्कार्तिकेषु याति वैधव्यतां*लघु॥

नारदः--

माघफाल्गुनवैशाखज्येष्ठ*मासाः (१)शुभप्रदाः।
कार्तिको मार्गशीर्षश्च मध्यमौ,*निन्दिताः परे॥

घ्। *गौरीमिति। मनुः--

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥

*लघु शीघ्रम्। आषाढस्त्वार्द्राप्रवेशात्प्राक् ग्राह्यः,

न कदाचिदृक्षेषु भानोरार्द्राप्रवेशनात्॥

इत्युक्तेः। *मासाः सौराः 'सौरो मासो विवाहादौ' इत्युक्तेः। चान्द्रोऽपि कश्यपेनोक्तः--

उपवासव्रतोद्वाहयात्राक्षौरोपनायनम्।
तिथिवर्षादिनिखिलं चान्द्रमानेन गृह्यते॥ इति।

*निन्दिता इति। यत्तु--

वात्स्यो वर्षम(२)नूनमिच्छति, तथा रैभ्योऽयनं चोत्तरम्।
श्रीवासोन्त्य(३)मृतुं विहाय मुनयो माण्डव्यशिष्या जगुः॥

(१) 'शुभावहाः' क०।
(२) 'मनूक्तमि' घ० ङ०। (३) 'मृतुं विवाहमु' ख०।

वासिष्ठः--

*पौषेऽपि कुर्यान्मकरास्थितेऽर्के
चैत्रे भवेन्मेषगतो यदा स्याद् ।
प्रशस्तमाषाढकृतं विवाहं
वदन्ति गर्गा मिथुनास्थितेऽर्के ॥

आचार्यचूडामणौ ज्योतिर्गर्गराजमार्तण्डौ--

माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च ।
दश मासाः प्रशस्यन्ते चैत्रपौषविवर्जिताः ॥

आपस्तम्बः-'सर्व ऋतवो विवाहस्य शैशिरौ मासौ परिहाप्योत्तमं च नैदाघम् । ' 'अत्र माघफाल्गुनाषाढवर्जं नव मासा मुख्यः कालः' इति सुदर्शनभाष्ये इडविलायां ब्रह्मविद्यातीर्थैश्चोक्तम् । बौधायनसूत्रेऽपि-'स-

---

चैत्रं प्रोज्झ्य, पराशरः परिणये पौषं च दौर्भाग्यदम् ।
आषाढादि च तुष्टयं न हि तथा कैश्चित्प्रदिष्टं बुधैः ॥ इति ।
माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च ।
दश मासाः प्रशस्यन्ते चैत्रपौषविवर्जिताः ॥

इत्यादि, तत्सर्वं प्रत्यासन्नऋतुकालाया विवाहविषयम् ।

ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति ॥

इति वाक्यात् । पाठान्तरं काल्पनिकम् । *पौषेपीति । अपवादः ।

(१)ऋषो न निन्द्यो यदि फाल्गुने स्यात्
मेषस्तु वैशाखगतो न निन्द्यः ।

इत्यादिरपि द्रष्टव्यः । कृत्तिकास्थमिति, अज्येष्ठेति चात्यावश्यकविषयम् ।

---

(१) 'ऋक्षो न' ख० ।

वैं मासा विवाहस्य, शुचितपस्तपस्यवर्जमित्येके'। तेन 'पूर्वोत्तरौ शिशिरसंबंधिनौ मासौ पौषचैत्रौ विहाय' इति निर्णयामृतव्याख्यानं मौर्ख्यकृतमित्युपेक्ष्यम्। निशि चेत्सर्वेषु द्वादशस्वपि मासेषूद्वहेदिति कालादर्शः। ये(१) तु ज्योतिषे माघादिविधयस्ते गृह्यसूत्राणां द्विजपरत्वेन प्राबल्याच्छूद्रादिपराः। ज्योतिषे—

वात्स्यो वर्षमनूनमिच्छति तथा रैभ्योऽयनं चोत्तरम्।
श्रीवासोऽन्तमृतुं विहाय मुनयो माण्डव्यशिष्या जगुः॥
चैत्रं प्रोज्झ्य पराशरः परिणये पौषं च दौर्भाग्यदम्।
ह्याषाढादि चतुष्टयं न हितदं कैश्चित्प्रदिष्टं बुधैः॥

चण्डेश्वरः—

मार्गे मासि तथा ज्येष्ठे क्षौरं परिणयं व्रतम्।
ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत्॥
कृत्तिकास्थं रविं त्यक्त्वा ज्येष्ठपुत्रस्य कारयेत्।
उत्सवादिषु कार्येषु दिनानि दश वर्जयेत्॥

रत्नकोशे—

जन्मर्क्षे जन्मदिवसे जन्ममासे शुभं त्यजेत्।
ज्येष्ठे मास्याद्यगर्भस्य शुभं वर्ज्यं स्त्रिया अपि॥

पराशरः—

अज्येष्ठा कन्यका यत्र ज्येष्ठपुत्रो वरो यदि।
व्यत्ययो वा तयोस्तत्र (२)ज्येष्ठमासः शुभप्रदः॥

मिहिरः—

ज्येष्ठस्य ज्येष्ठकन्याया विवाहो न प्रशस्यते।
तयोरन्यतरे ज्येष्ठे ज्येष्ठो मासः प्रशस्यते॥
द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकं ज्येष्ठं शुभावहम्।

(१) 'यत्तु ज्योतिषे' ख०। (२) 'ज्येष्ठो मासः' क०।

ज्ये(१)ष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतम् ॥
यत्तु-'सार्वकालमेके विवाहम्' इति, तदासुरादि-
ाहाविषयम्, 'धर्म्येषु विवाहेषु कालपरीक्षणं, नाध-
ः' इति गृह्यपरिशिष्टात । रत्नमालायामप्येवम् ।
ासुरादयो माघचैत्रादिनिषिद्धकालेष्वपि भवन्ति ।
ाः सौराः 'सौरो मासो विवाहादौ' इत्युक्तेः ।
झषो न निन्द्यो यदि फाल्गुने स्यात्
अजस्तु वैशाखगतो न निन्द्यः ।

इति त्वपवादः ॥

थ दश दोषाः । व्यवहारोच्चये—
श्च लत्ता च तथैव पातः खर्जूरवेधौ दशयोगचक्रम् ।
ेश्च जामित्रमुपग्रहश्च बाणाख्यवज्रे च दशैव दोषाः ॥
ं लक्षणं ज्योतिषे ज्ञेयम् ।
तेचारगे गुरौ तु वासिष्ठः—
अतिचारगते जीवे वर्जयेत्तदनन्तरम् ।
विवाहादिषु कार्येषु अष्टाविंशतिवासरान् ॥
न्नमालायाम्—
कपञ्चनवयुग्मषड्दशत्र्याणि सप्तचतुरष्ट(२)लाभगः ।
ृशाजवृषभादिराशितोघातचन्द्रइतिकीर्तितो बुधैः ॥
दः—
भूबाणनन्दहस्ताश्च रसदिग्वह्निशैलजाः ।
वेदा वसुशिवादित्या घातचन्द्रो(३) यथाक्रमम् ॥
यात्रायां युद्धकार्येषु घातचन्द्रं विवर्जयेत् ।
विवाहे सर्वमाङ्गल्ये चौलादौ व्रतबन्धने ॥
घातचन्द्रो नैव चिन्त्य इति पाराशरोऽब्रवीत् ।

(१) 'ज्येष्ठत्रये' ख० । (२) 'लाभदः' क० ।(३) 'घातचन्द्रा' क० ।

ज्योतिर्निबन्धे—

विवाहचौलव्रतबन्धयज्ञे पट्टाभिषेके च तथैव राज्ञाम् ।
सीमन्तयात्रासु तथैव जाते नो चिन्तनीयःखलु घातचन्द्रः॥

नारदः—

अकालजा भवेयुश्चेद्विद्युन्नीहारवृष्टयः ।
प्रत्यर्कपरिवेषेन्द्रचापाभ्रध्वनयो यदि ॥
दोषाय मङ्गले नूनं न दोषायैव (१)कालजाः ॥

अकालवृष्टिस्वरूपमाह लल्लः—

पौषादिचतुरो मासाः प्रोक्ता वृष्टिरकालजा । इति ।

शार्ङ्गधरः—

निर्घाते क्षितिचलने ग्रहयुद्धे राहुदर्शने चैव ।
आ पञ्चदिनात्कन्या परिणीता नाशमुपयाति ॥
उल्कापातेन्द्रचापप्रबलघनरजोधूमनिर्घातविद्युद्-
वृष्टिप्रत्यर्कदोषादिषु सकलबुधैस्त्याज्यमेवैकरात्रम् ।
दुःस्वप्ने दुर्निमित्ते ह्यशुभफलदृशो दुर्मनोभ्रान्तबुद्धौ
चौले मौञ्जीनिबन्धे परिणयनविधौ सर्वदा त्याज्यमेव ॥

ज्योतिः प्रकाशे—

अर्वाक् षोडश नाड्यः संक्रान्तेः पुण्यदाःपरतः ।
उपनयनव्रतयात्रापरिणयनादौ विवर्ज्यास्ताः ॥

गर्गः—

दिग्दाहे दिनमेकं च (२)ग्रहे सप्तदिनानि तु ।
भूकम्पे च समुत्पन्ने त्र्यहमेव तु वर्जयेत् ॥
उल्कापाते त्रिदिवसं धूमे पञ्च दिनानि च ।
वज्रपाते चैकदिनं वर्जयेत्सर्वकर्मसु ॥
दर्शनादर्शनाद्राहुकेत्वोः सप्तदिनं त्यजेत् ।

(१) 'कालजः' ख० । (२) 'गृहे' ख० ।

यावत्केतूद्गमस्तावदशुभः समयो भवेत् ॥

अस्यापवादोऽद्भुतसागरे—

अथ दिवसत्रयमध्ये मृदु पानीयं यदा भवति ।
उत्पातदोषशमनं तदैव संप्राहुराचार्याः ॥

संबन्धतत्त्वे—

भूकम्पादेर्न दोषोऽस्ति वृद्धिश्राद्धे कृते सति ॥

अथापरिहार्ये (१)कन्यावैधव्ययोगे विशेष उच्यते ।

मार्कण्डेयपुराणे—

बालवैधव्ययोगे तु कुम्भद्रुप्रतिमादिभिः ।
कृत्वा लग्नं (२)रहः पश्चात्कन्योद्वाह्येति चापरे ॥

अत्र पुनर्भूदोषाभाव उक्तो विधानखण्डे—

स्वर्णाम्बुपिप्पलानां च प्रतिमा विष्णुरूपिणी ।
तया सह विवाहे तु पुनर्भूत्वं न जायते ॥

सूर्यारुणसंवादे—

*विवाहात्पूर्वकाले च चन्द्रताराबलान्विते ।
विवाहोक्ते च तां कन्यां कुम्भेन सह चोद्वहेत् ॥

---

*विवाहादिति । विवाहात्पूर्वकाले चन्द्रतारानुकूले नवीनपूर्णकुम्भं सूत्रं गन्धपुष्पादिसामग्रीं च संपाद्यास्याः कुमार्या जन्मलग्नात्सप्तमादिस्थानगतभौमसूचितदोषपरिहारार्थमस्याः पत्युर्घकालजीवनार्थं च कुम्भविवाहं करिष्ये इति संकल्प्य कुम्भं संपूज्य 'वरुणाङ्गस्वरूपाय कुम्भाय नमः' इति मन्त्रेण हरिद्राकुङ्कुमाभ्यां लिप्त्वा कुमारीमपि लिप्त्वा इमां कन्यां (३)काश्यपगोत्रां वरुणाङ्गस्वरूपाय कुम्भाय तुभ्यमहं सम्प्रददे इति दत्त्वा पश्चादश्वन्तुसूत्रेणोभौ संवेष्टय "परित्वा" इति मन्त्रेण ततः सूत्रमुद्वास्य

---

(१) 'कन्याया वैधव्य'क० । (२) 'ततः'क० ख० ।
(३) 'काश्यपसागोत्रां' घ० ङ० ।

सूत्रेण वेष्टयेत्पश्चाद्दशतन्तुविधानतः ।
कुङ्कुमालंकृतं देहं तयोरेकान्तमन्दिरे ॥
ततः कुम्भं च निःसार्य प्रभज्य सलिलाशये ।
ततोऽभिषेचनं कुर्यात्पञ्चपल्लववारिभिः ॥

कुम्भप्रार्थना तत्रैव—

वरुणाङ्गस्वरूपाय जीवनानां समाश्रय ।
पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु ॥
देहि विष्णो वरं देव कन्यां पालय दुःखतः ।
ततोऽलंकारवस्त्राढ्यां वराय प्रतिपादयेत् ॥

इति कुम्भविवाहः ॥

कुम्भकण्ठे बध्वा कुम्भं प्रार्थयेत् । तत्र मंत्रः—

वरुणाङ्गस्वरूपाय जीवनानां समाश्रय ।
पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु ॥
देहि विष्णो वरं देव कन्यां पालय दुःखतः ॥

इति सम्प्रार्थ्य कुम्भं निःसार्य नद्यादौ भङ्क्त्वाऽऽचम्य गृहमेत्य पञ्चपल्लवैः कन्यायाः पुण्यजलैः 'शान्तिरस्तु' इति (१)पञ्चवाक्यैरभिषेकः कार्य इति कौस्तुभे । अथ प्रयोगः—विवाहकर्त्ता पित्रादिः देशकालौ संकीर्त्य कन्यावैधव्यहरं कुम्भविवाहं करिष्ये इति संकल्प्य गणेशपूजनादि नान्दीश्राद्धान्तं कृत्वा वरुणविष्णुप्रतिमयोरग्न्युत्तारणं कृत्वा महीद्यौरित्यादिक्रमेण कुम्भं संस्थाप्य तत्र वरुणं पूजयित्वा तत्र विष्णुप्रतिमां संस्थाप्य आवाहनादिषोडशोपचारैः सम्पूज्य प्रार्थयेत्—

वरुणाङ्गस्वरूपाय जीवनानां समाश्रय ।
पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु ॥
देहि विष्णो वरं देव कन्यां पालय दुःखतः ॥ इति ।

---

(१) 'पञ्चानुवाक्यैः' ख० ।

मूर्तिदानमपि तत्रैवोक्तम्—

ब्राह्मणं साधुमामन्त्र्य संपूज्य विविधार्हणैः ।
तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजाम् ॥
शुद्धवर्णसुवर्णेन *वित्तशक्त्याथ वा पुनः ।
निर्मितां रुचिरां शङ्खगदाचक्राब्जसंयुताम् ॥
दधानां वाससी पीते (१)कुमुदोत्पलमालिनीम् ।
सदाक्षिणां च तां दद्यान्मन्त्रमेतं (२)मुदीरयेत् ॥
यन्मया (३)प्राचि जनुषि ह्यन्त्या पतिसमागमम् ।
विषोपविषशस्त्राद्यैर्हतो वातिविरक्तया ॥
प्राप्यमानं महाघोरं यशः सौख्यधनापहम् ।
वैधव्याद्यतिदुःखौघनाशाय शुभलब्धये ॥
बहुसौभाग्यलब्ध्यै च महाविष्णोरिमां तनुम् ।
सौवर्णीं निर्मितां शक्त्या तुभ्यं संप्रददे द्विज ॥

ततो विष्णुरूपिणे कुम्भायेमां कन्यां श्रीरूपिणीं समर्पयामीति समर्प्य "परित्वा" इत्यादिमन्त्रैर्मन्त्राद्दश्याऽधस्तादुपरिष्टाच्च कुम्भं कन्यां च परिवेष्ट्य ततः कुम्भं निःसार्य सलिलाशये प्रभञ्जयित्वा 'समुद्रज्येष्ठा' इत्यादि मन्त्रैः शुद्धजलेन पञ्चपल्लवैः कन्यामभिषिच्य ब्राह्मणान् भोजयेदिति । *वित्तशक्त्येति । (४)रचितम् पलतदर्द्धतदर्धान्यतरमध्ये इति बोध्यम, दानपरिभाषायां तथा दर्शनात् । अथ प्रयोगः—कन्या स्नानाचमने कृत्वा देशकालौ संकीर्त्य मम वैधव्यहरं महाविष्णुप्रतिमादानमहं करिष्ये इति संकल्प्य गणेशपूजां कृत्वा स्वस्तिवाचनं च कृत्वाऽकृत्वा वाऽऽचार्यं कृत्वा यथाशक्ति संपूज्य विष्णुप्रतिमायास्तद्धस्तेनाग्न्युत्तारणं षोडशोप-

---

(१) 'कमलोत्पल' क० । (२) 'मुदीरयेत्' क० ।
(३) 'प्राञ्चजनुषि' ग० । (४) अस्याग्रे 'इतिशेषः' इत्यपेक्षितम् ।

अनघाद्याहमस्मीति त्रिवारं प्रजपेदिति ।
एवमस्त्विति तस्याशीर्गृहीत्वा स्वगृहं विशेत् ॥
ततो वैवाहिकं कुर्याद्विधिं दाता मृगीदृशः ।

अन्येऽप्यश्वत्थविवाहवृक्षसेचनादयस्तत्रैव ज्ञेयाः । विस्तरभयान्नोच्यन्ते ॥

अथ (१)प्रतिकूलादि । ज्योतिर्निबन्धे गर्गः—

*कृते तु निश्चये पश्चान्मृत्युर्भवति कस्यचित् ।
तदा न मङ्गलं कुर्यात्कृते वैधव्यमाप्नुयात् ॥

ज्योतिर्मेधातिथिः—

वधूवरार्थं घटिते सुनिश्चिते वरस्य गेहेऽप्यथ कन्यकायाः ।
मृत्युर्यदि स्यान्मनुजस्य कस्यचित्तदानकार्यं खलुमङ्गलंबुधैः॥

मङ्गलं विवाहः । स्मृतिचन्द्रिकायाम्—

कृते वाङ्निश्चये पश्चान्मृत्युर्भवति गोत्रिणः ।
तदा न मङ्गलं कार्यं नारीवैधव्यदं ध्रुवम् ॥

भृगुः—

वाग्दानानन्तरं यत्र कुलयोः कस्यचिन्मृतिः ।
तदोद्वाहो नैव कार्यः स्ववंशक्षयदोषतः ॥

शौनकः—

वरबंध्वोः पिता माता पितृव्यश्च सहोदरः ।

चारपूजनं [च] कार्यम् । तत्र पीते वाससी कुमुदोत्पलमाला च दापनीया । ततो देवं कन्या प्रणम्य यन्मयेत्यादि मन्त्रान् पठित्वा ब्राह्मणाय दद्यात् । ततः सुवर्णमितं यथाशक्ति वा हेमदक्षिणां दद्यात् । ततः "अनघाद्याहमस्मि" इति त्रिर्वदेत् । 'एवमस्तु' इति ब्राह्मणोऽपि त्रिः। ततो यथाशक्तिब्राह्मणान् भोजयित्वा विवाहयोग्या भवेत इति । *कृते त्विति । एतेन "वाग्दानादि चरेत्

(१) 'प्रतिकुलादिः' क० ।

एतेषां प्रतिकूलं च महाविघ्नप्रदं भवेत्॥
पिता पितामहश्चैव माता चैव पितामही।
पितृव्यः*स्त्रीसुतौ भ्राता भगिनी चाविवाहिता॥
एभिरत्र विपन्नैश्च प्रतिकूलं बुधैः स्मृतम्।
अन्यैरपि विपन्नैस्तु केचिदूचु*र्नतद्भवेत्॥

माण्डव्यः—

वाग्दानानन्तरं माता पिता भ्राता विपद्यते।

ाः" इत्यभिधानेन च मन्त्रवद्वाङ्निश्चयोत्तरमेव प्रतिकूलदोष इति। टेतनिश्चयोत्तरं प्रतिकूलदोष इति ज्योतिषमतम्। घटितनिश्चयश्च ोतिर्विदादेशेन वरपित्रादिकं प्रति फलदानादिरूपः। *स्त्रीसु-ाविति। एतौ न वध्वाः असम्भवात्। अतः द्वितीयादिविवाहे स्य पूर्वोढा स्त्री तस्यामुत्पन्नश्च सुतः। एतत्पौत्रस्योपलक्षणम्, तृव्यपदं च तत्पुत्रस्य। एवञ्च वरमारभ्य जनकत्रिपुरुषी, जन्य-पुरुषी, कूटस्थमारभ्य सन्तानभेदेन त्रिपुरुषी चात्र बोद्धव्या। न तद्भवेदिति। तत् तादृशं महाविघ्नकरं न भवेदित्यर्थः। प्रति-लं चेदं विवाह एव वैधव्यपदानुरोधात्। अत्र यद्यपि "मृत्युर्भ-ते कस्यचित् (मनुजस्य(१) कस्यचिदित्यविशेषेणाप्युक्तम्, तथापि ामह्यादीनामिव मातामह्यादीनामपि मरणस्य प्रतिकूलदोषनिमि-त्वेन क्वचिदप्यकीर्त्ते) नादविवाहितभगिन्या इव विवाहितभ-न्या मरणस्य तथात्वानुक्तेश्च अग्निमेधातिथिवाक्ये "स्व-ात्रि(२)णाम्" इति, चान्द्रिकावाक्ये "गोत्रिणः" इति च कीर्त्ते-द्भ्वा वरस्य वा सगोत्रसपिण्डेषु त्रिपुरुषान्तर्गते(३)मृते प्रतिकूल-ष इत्यत्र तात्पर्यम्। सङ्कटे तु किञ्चित्कालप्रतीक्षा कार्या, ादा न मङ्गलं कार्यम्" इति तदाशब्दात्। वरवध्वोरित्यत्र पि-

(१) कंसान्तर्गतं नास्ति घ० ङ०। (२) 'गोत्रीणामिति' ख०।
(३) 'मृते' नास्ति घ० ङ०।

विवाहो नैव कर्तव्यः (१)स्ववंशास्थितिमिच्छता ॥

*संकटे तुमेधातिथिः—

वाग्दानानन्तरं यत्र कुलयोः कस्यचिन्मृतिः ।
तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत् ॥

स्मृतिरत्नावल्याम्—

*पितुरब्दमशौचं स्यात्तदर्धं मातुरेव च ।
मासत्रयं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः ॥

त्रादिचतुष्टयमुपादाय 'महाविघ्नपदम्' इति विघ्नमहत्त्वोक्तेः । तत्र वक्ष्यमाणवत्सराद्यन्यतमकालं प्रतीक्ष्य विनायकशान्तिः कार्या । उभयत्रापि च तयोरेव पश्चाद्विवाहः,

विवाहस्तु ततः पश्चात्तयोरेव विधीयते ।

इति वचनात् । एतच्च मातापित्रोरेकैकमरणे, तद्वाक्ये तयोः पृथगुपादानात् । तयोर्युगन्मरणे तु कालप्रतीक्षाशान्तिभ्यामपि तद्वधूवरपोर्नैव विवाहः

कृते वाङ्निश्चये पश्चात्पितरौ निधनं गतौ ।
तयोस्तत्प्रतिकूलं स्यान्नान्येषां तु कदाचन ॥

इति कृष्णभट्टीयवाक्ये "नान्येषां तु कदाचन" इति कदाचनशब्दात् । अन्येषां सपिण्डानाम् । "एभिरत्र विपन्नैश्च" इत्यत्रापि मातापितरौ विहाय वक्ष्यमाणमासत्रयादिकालप्रतीक्षासहिता विनायकशान्तिरेव । *सङ्कटे इति । वरान्तरासत्त्वादिना तद्वरायैव तत्कन्याया देयत्वे । * पितुरिति । अत्र पूर्वं प्रतिकूलस्यैवोक्तेः मरणमात्रहेतुकप्रतिकूलत्वे वर्षाद्याशौचावधिव्यवस्थानर्थक्यम् । अत (उ(२)भयत्रापि च तयोरेव पश्चाद्विवाहः) इदमाशौचं तत्तद्वर्षाद्यवधिकं यथा प्रतिकूलवैधव्यादिसूचकं तथाऽगतौ शान्तिकादिप्रयोजकं च । एवमन्यदपि यत्संगतिकं काम्यं पञ्चवर्षाद्युपनयादि

---

(१) 'स्ववंशहितमिच्छता'क० । (२) कंसान् तर्गतं नास्ति घ० ङ० ।

अन्येषां तु सपिण्डानामाशौचं मासमीरितम् ।
*तदन्ते शान्तिकं कृत्वा ततो लग्नं विधीयते ॥
ज्योतिः प्रकाशे—
*प्रतिकूलेऽपि कर्तव्यो विवाहो मासतः परः ।
शान्तिं विधाय गां दत्त्वा वाग्दानादि चरेत्पुनः ॥
शान्तिं विनायकशान्तिम् । तथा च मेघातिथिः—
संकटे समनुप्राप्ते *याज्ञवल्क्येन योगिना ।
शान्तिरुक्ता गणेशस्य कृत्वा तां शुभमाचरेत् ॥इति।

लादि च तत्राप्यधिकारप्रतिबन्धकम् । एवञ्च पित्रादिमरणोत्तरं
द्यिन्तमपूर्वाधानादौ नाधिकारः । न हि तत्र विवाहवच्छान्ति-
का, येन तां कृत्वा तत्राधिकारः स्यात् । एवञ्च जन्मतोऽष्टवर्षाद्यु-
नादावपि अनधिकारान्मासिकाद्यनपकर्षस्थलवन्नवमवर्ष एवा-
कार इति । *तदन्ते वर्षान्ते । *प्रतिकूले इत्यादि ।
तिकूले सति संवत्सरोर्ध्वं शान्तिपूर्वकं विवाहः कार्य इति
यः कल्पः । षण्मासोत्तरं मासोत्तरं वेति त्वनुकल्पाविति ।
चेत्तु एतत् पितृमरणे एव । मातृमरणे तु षण्मासं मुख्यः
ः, तदर्द्धं मासमात्रं वेति अनुकल्पौ, पितृमरणे मातृमरण-
लीयषण्मासोपादानेनेह तदर्धलाभात् । एवं भार्यामरणे
त्रयं सार्द्धमासं मासमात्रं वेति त्रयः कल्पाः । भ्रातृमरणे
मरणे च सार्द्धं मासं मासं वेति द्वौ । पितामह्यादिसपिण्डम-
। तु मासमेव,

प्रतिकूले सपिण्डस्य मासमेकं विवर्जयेत् ।

तिवाक्यादिति युक्तमुत्पेक्षन्ते । *याज्ञवल्क्येनेति ।

विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः ।
गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥

त्यादिनोपक्रम्य शान्तिविधानं प्रदर्श्य,

प्रतिकूले न कर्तव्यो गच्छेद्यावदृतुत्रयम् ।
प्रतिकूलेपि कर्तव्यमित्याहुर्बहुविप्लवे ॥
प्रतिकूले सपिण्डस्य मासमेकं विवर्जयेत् ॥

एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ।
कर्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमाम् ॥

इतिसर्वकर्माङ्गत्वेनोपसंहारात् । तत्कालो यद्यपि—

स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्वकम् ।

इतिसामान्यतस्तत्र पुण्याह उक्तः, तथापि विष्णुधर्मे—

हस्तपुष्यास्वयुक्सौम्यवैष्णवान्यतमे शुभे ।
नक्षत्रे च मुहूर्ते च मैत्रे वा ब्रह्मदैवते ॥

भविष्ये—

शुक्लपक्षे चतुर्थ्यां तु वासरे धिषणस्य च ।
तिष्ये च वीरनक्षत्रे तस्यैव पुरतो नृप ॥

बृहत्पराशरः—

चतुर्थ्यां शुक्लपक्षे तु अयने चोत्तरे तथा ।
पुण्यार्थं सर्वसिद्ध्यर्थं कुर्याच्छान्तिं विनायकीम् ॥

दृढ्यभावश्छान्दस इति पुण्यार्थं विवाहादिकर्माङ्गतया । देवनक्षत्रं कृत्तिकादिविशाखान्तं किञ्चिद्ग्राह्यं, "यत्पुण्यं नक्षत्रम्" इति श्रुतेः । अत्र सर्वेषामधिकारः,

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैर्वा सिद्धिकामुकैः ।
कर्मनिर्विघ्नसिद्ध्यर्थं संपूज्यश्च गजाननः ॥

इति लैङ्गात्—

यजमानस्तु शूद्रश्चेद्द्विजैस्तान्नियोजयेत् ।

इति महार्णवाच्च । कुमार्यादिस्त्रीणामपि—

कुमारी न च भर्त्तारमपत्यं गर्भमङ्गना ।

इति याज्ञवल्क्यात् । अङ्गना (१)चापत्यं न लभते, नापि गर्भिणी, गर्भो न जीवतीति यावत्,

तेनोपहतपुंसां च कर्म स्यान्निष्फलं कृतम् ।
स्त्रीणामपि तथा सर्वं क्रियमाणं तु निष्फलम् ॥

इति बृहत्पराशराच्च । एवं गणेशशान्तिरप्यस्ति भविष्ये—

चतुर्थ्यां वारणं हैमं पलादूर्ध्वं सुशोभनम् ।
कारयित्वाङ्कुशयुतं तिलद्रोणोपरि न्यसेत् ॥
वस्त्रैः पुष्पैः पूजयित्वा नैवेद्यान्तान् पृथक् पृथक् ।
ततस्तु ब्राह्मणे दद्याद्गणेशः प्रीयतामिति ॥
कार्यारम्भेषु सर्वेषु तस्य विघ्नं न जायते ।
वारणाः सप्त जन्मानि भवन्ति मदविह्वलाः । इति ।

'चैत्रे श्रावणे वा कार्या विनायकशान्तिर्विकल्पिता चैव' इति हेमाद्रिः ।

"ग्रहांश्चैव विधानतः" इत्याद्यभिधानादुपनयनविवाहयोर्ग्रह-शान्तिरपि कार्या । सा च याज्ञवल्क्योक्ता, गृह्यपरिशिष्टाद्युक्ता वा । तत्र स्थण्डिलं कुण्डं वा कार्यम् । तत्र एकाग्निब्रह्माचार्यपक्ष एकः । तेषां नवसंख्यां कुण्डेषु तत्तद्ग्रहाकारांश्चाह प्रयोगपारिजाते भगवान्—

मनोरमे शुचौ देशे होमशालामलंकृताम् ।
कृत्वा तु संवृतां प्राज्ञो ग्रहस्थानं प्रकल्पयेत् ॥
तन्मध्ये भास्करस्थानं भवेत्पूर्वोत्तरे बुधः ।
पूर्वस्मिन् भार्गवस्थानं सोमो दक्षिणपूर्वके ॥
दक्षिणस्यां कुजस्थानं राहोर्दक्षिणपश्चिमे ।
शनेस्तु पश्चिमे स्थानं केतोरुत्तरपश्चिमे ॥
उत्तरस्यां गुरोः स्थानमेवं च स्थण्डिलं भवेत् ॥

(१) 'चापत्यं लभते' ख० ।

स्थण्डिलमन्यर्थम् ।

भास्करस्य तु वृत्तं स्याच्चन्द्रस्य चतुरस्रकम् ।
कुजस्य तु त्रिकोणं स्याद्वाणाकारं बुधस्य तु ॥
गुरोर्दीर्घचतुष्कोणं पञ्चकोणं सितस्य तु ।
चापाकारं शने राहोः सूर्पं केतोर्ध्वजाकृतिम् ॥
एकस्थानप्रणीतेऽग्नौ सर्वतः परिभाविते ।
होमं कुर्युर्द्विजाः सर्वे कुण्डे कुण्डे यथोदितम् ॥
नवधा विभजेदग्निं श्रौतकर्मविधानतः ।
ऋत्विजश्च यथायोग्यं कुण्डेषु ब्राह्मणाः पृथक् ॥
अथ स्रुवेण जुहुयात्सूर्यपावकरुद्रकान् ।
ऋत्विजो जुहुयुः सर्वे स्रुवेणैव पृथक् पृथक् ॥
(१)अष्टौ च शकलान् गृह्य समारोपणमग्निषु ।
प्रधानेऽग्नौ विधायेमानित्थं (२)होमं चरेदिति ॥

भास्करस्य तु वृत्तं स्यादित्यादेः स्थाने ऽन्वयः । एवं र
ळं चेति स्थण्डिलानां कुण्डानां च तत्तदाकारः तत्तद्विङ्निर्दे
क्तः । ब्राह्मणाः पृथगिति नवाचार्या नवब्रह्माणश्चोक्ताः । अ
मध्यकुण्डेऽग्निं संस्थापयेत् । ततोऽष्टावाचार्या (३)अष्टकुण्
प्रणयेयुः । ततो नवाचार्या आज्यभागान्तेऽर्कादिसमिद्भिर्गुडोद
हविर्भिराज्येन च ग्रहादिमन्त्रैर्हुत्वा व्यस्तसमस्ताभिर्व्याहृ
स्तिलान् हुत्वा स्विष्टकृदादिहोमान्ते पूर्णाहुतीर्जुहुयुः । तत
चार्याः प्रधानाग्नौ समिधा स्वस्वाग्निसमारोपणं कुर्युरित्यग्नि
नानन्तरमेवाचार्यकुण्डादग्निप्रणयनमुक्तम् । परेतु तत्राचा
अग्निस्थापनाद्याज्यभागान्तं कृत्वा अन्यकुण्डेष्वग्निप्रणयनं क

---

(१) 'अष्टौ च शकलान्गृह्य समारोहणमग्निषु' घ० ङ ।
(२) 'होमं समाचरेत् इति' घ० ङ० ।
(३) 'अष्टसु कुण्डेषु अग्निं' घ० ङ ।

तेनाज्यभागान्तं पूर्वाङ्गं स्विष्टकृदाद्युत्तराङ्गं च तन्त्रेण भवतीति वदन्ति । पीठस्य वृत्ताद्याकारो लघुपीठमालायाम्–

सूर्यस्यार्काङ्गुलं वृत्तमेकाद्रीषुचतुः कृतम् ।
तद्व्यासार्धं तेन सम्यक् जायते नेत्रसुन्दरम् ॥

एक १ अद्रि ७ इषु ५ चतु ४ र्भिः क्रमेण अङ्गुलयवयूकालिक्षाभिर्व्यासार्द्धम् । तद्द्विगुणो व्यासः । ३ । ७ । ३ ।

व्यासस्य वर्गे भनवाग्निनिघ्ने सूक्ष्मं फलं पञ्चसहस्रभक्ते ।

इति सूत्रेण फलं द्वादशाङ्गुलम् । यथा व्यासवर्गः १५ । ३ । ० । अयं भनवाग्नि ३९२७ निघ्न ७०६८६ । पञ्चसहस्र ५००० भक्तक्षेत्रफलं १२ जातं द्वादशाङ्गुलमिदं सूत्रस्य वर्तुलं पीठम् ।

चान्द्रं सिद्धाङ्गुलं वेदकोणं वेदाद्रिपक्षयुक् ।

वेद ४ अद्रि ७ पक्ष २ क्रमेणाङ्गुलादिभिः इदं कोटिमानं भुजमानं च । तदुभयघाते (१)क्षेत्रफलं २४०० ४ । ६ । सिद्धाङ्गुलं चतुर्विंशत्यङ्गुलम् । इदं चन्द्रस्य चतुरस्रं पीठम् ।

भौमस्याब्धिफलं व्यस्रं त्रिखाम्बुधिभिरादृतम् ॥

त्रि ३ ख० शून्य अम्बुधय ४ श्चत्वारोङ्गुलाद्याः, तैः आदृतं भौमस्य चतुरङ्गुलं फलं त्रिकोणं पीठं त्रिकोणे त्रयोभुजाःसमप्रमाणाः । तत्राधस्तना भूमिः । उपरितनौ भुजौ । तन्मानं (२) ३० । ४ । तत्र सूत्रम्–

(३)आबाधाभुजकृत्योरन्तरमूलं प्रजायते लम्बः ।
लम्बगुणं भूम्यर्द्धं स्पष्टं त्रिभुजे फलं भवति ॥ इति ।

भूम्यर्द्धमाबाधा १ । ४ । २ । २ । ६ । (४)भूजः । ३ । ४ । ४ । अस्य कृतिः समद्विघातः । ९ । ३ । ० । अनयोरन्तरं (५)७ ।

---

(१) 'क्षेत्रफलं २४० ४६ सि' घ० ङ० ।
(२) '३ । ० । ४ ।' ङ । (३) 'स्वबाधा' ख० ।
(४) 'भुजः' ३० । ० । ४ । घ० ङ० । (५) '७ । ० । २' घ० ङ ।

२।०। अस्य मूलं २।५।१ अनेन भूम्यर्द्धं १।४।२। गुणितं ४।०।२।७। स्पष्टं भौमत्र्यस्रक्षेत्रफलम्।

चतुर्यवान्तरं वेदाङ्गुलं स्यात्तु भुजद्वयम्।
ऊर्ध्वाधस्तद्वयर्द्धिश्च प्रत्येकं स्याच्चतुर्यवा।
भूमिः षड्यववेदाभ्यां भुजाभ्यां षट्त्रिकोणकम्॥
तद्युक्तं बाणसमयं बुधपीठं प्रचक्षते॥

दीर्घचतुरस्रौ भुजौ चतुरङ्गुलौ चतुर्यवा तत्र कोटिः तत्फलं भुजकोटिघातः फलं २।०।० त्रिकोणभूमिमानं १।४।०। भुजमानं २।६।०। भूम्यर्द्धमाबाधा ०।६।०। स्वाबाधाभुजकृत्योरिति क्रमेण लम्बः २।५।२।८। भूम्यर्द्धगुणितः त्र्यस्रे क्षेत्रफलं २।०।० जातं। उभयोरैक्ये ४।०।०। बुधबाणक्षेत्रफलम्।

तर्काङ्गुलं गुरोः पीठं दस्रानलभुजद्वयम्।

दस्रौ द्व्यङ्गुलौ द्वौ भुजौ अनलौ त्र्यङ्गुलौ द्वौ भुजौ कोटिसंज्ञौ, तत्रैकभुजैककोट्योर्घातः फलं षडङ्गुलं गुरुपीठम्।

शुक्रस्य पीठं पञ्चास्रं व्यासार्द्धं कुनगेषुभिः।
व्यासेन वृत्तेपूर्वादिसमाज्याः पञ्चमन्धगाः॥
प्रोज्झिते बाह्यतो वृत्ते नवाङ्गुलफलं मतम्।

कुर्भूमिः१, नगाः सप्त, इषुः पञ्च, तैः तस्य वृत्तस्य व्यासार्द्धं, तद्द्विगुणो व्यासः। तन्मध्ये पूर्वादिक्रमेण पञ्च समानि चिह्नानि कृत्वा पञ्च ज्याः (१)कार्याः। बाह्यवृत्तप्रोज्झनेन पञ्चास्रं नवाङ्गुलक्षेत्रफलं भृगुपीठम्। तत्र पञ्च त्रिकोणानि तत्र एकस्य फलं। ज्यामिता भूमिः २।२।३। भूम्यर्द्धमा(२)बाधा १।१।४। व्यासार्द्धमितो भुजः१।७।५। आभ्यां स्वाबाधाभुजकृत्योरित्युक्तरीत्या लम्बः १।४।५। अनेन (३)भूम्यर्द्धं १।१।४। लम्बेन गुणितम्।

---

(१) 'कार्याः' नास्ति ङ०। (२) 'माबाधा १।१।१।४। व्यासा' ङ०। (३) 'म्यर्धं १।१। १४। लम्बेन' ङ०।

एकत्रिकोणफलं १ । ६ । ४ । एतत्पञ्च(१)गुणं ९ । ० । ४ । पञ्चास्र (२)शुक्रपीठक्षेत्रफलम् ।

वेदाब्धिवेदाब्धिभूमिर्धनुः पीठं शनेर्भ्रमात् ।
मध्यस्थचतुरस्रस्य मानहानात् षड्ङ्गुलम् ॥
चतुरस्रे त्वपगते चतुर्दिक्षु चतुर्धनुः ।
एकं धनुः फलं तत्र ग्राह्यं हात्वा धनुस्त्रिकम् ॥

वेद ४ आब्धि ४ वेद ४ आब्धि ४ भू १ एतन्मितं व्यासार्द्धं, तद्द्विगुणो व्यासः । तेन भ्रमात् वृत्तं तस्य व्यासस्य वर्गे इति क्रमेण फलं ६ । ५ । ५ । ० । तत्र वृत्तमध्ये एकं चतुरस्रमस्ति तस्य(३)भुजः ६ । ३ । ५ । कोटिरपि सैव ६ । ३ । ५ । उभयोर्घातात् चतुरस्रफलं ४१ । ५ । ० । तेन फलेनोनं कार्यम् । ततोऽवशिष्टं २४ । ० । ० । अस्य चतुर्थांशः ६ । ० । ० । षडङ्गुल(४)धनुः फलम् । चतुरस्रेऽपगते चतुर्दिक्षु चतुर्धनुरवशेषस्तत्र धनुस्त्रयं त्यक्त्वैकधनुर्ग्रहात् । शनेर्ब्रह्मङ्गुलपीठपक्षे गुरुपीठमालाऽतस्तत्प्रकारो बोध्यः ।

वेदाङ्गुलैर्वेदकोणे पूर्वतो रेखयोरिह ।
तिर्यगूर्ध्वमग्न्यम्भोधिवृद्धिरधोबाल्हर्धमानतः ॥
वृत्तेर्द्धे राहुपीठं स्याच्छूर्प सिद्धाङ्गुलं शुभम् ॥

प्रथमत एकं चतुरस्रं तत्र भुजमानं ४ । ० । ० । तदेव कोटिमानं ४ । ० । ० । तत्र पूर्वयो रेखयोः तिर्यग्दक्षिणोत्तरवृद्धि २ अग्रयः त्रयः, अम्भोधयः ४, दक्षिणे अर्द्धे १ । १ । ६ । उत्तरे अर्द्धे १ । १ । ६ । अङ्गुलयवयूकानां वृद्धिः । अधो भूमेरर्द्धं कृत्वा वृत्तद्वयं कार्यम् । एवञ्चोपरि भूमिः ६ । ३ । ४ । अधो भूमिः ४ । ० । ० । लम्बः ४ । ० । ० । लम्बेन निम्नं कुमुखैक्यखण्डमिति रीत्या

(१) 'गुणं ९ । ० । ४ । पञ्चास्र'ङ० । (२) 'शुक्रपीठं पीठक्षेत्र'ख० ।
(३) 'भुजः ६ । ६ । ५ । तत्र' ङ० । (४) 'धनुः २ । चतुरस्रे' ङ० ।

फलं । तत्र कुमुखैक्यखण्डं ५ । १ । ६ । लम्बेन ४ निघ्नं तत्
लं २० । ७ । ० । अधोवृत्तव्यासार्धं १ । ० । ० । तद्विगु
व्यासः २ । ० । ० । व्यासस्य वर्गे भनवाग्निनिघ्ने इति क्रमे
फलं ३ । १ । १ । उभयैक्ये २४ । ० । १ । १ । राहुपीठश्
फलम् ।

पूर्वापरौ गतौ बाहू कोटिरर्द्धाङ्गुला भवेत् ।
ऊर्ध्वमेकाङ्गुलं हित्वा हित्वा चाधः शराङ्गुलम् ॥
चतुरेकाङ्गुलयवं लग्नास्यं त्र्यस्रमारभ ।
केतोर्ध्वजाभं कुण्डं स्याद्गजाङ्गुलमितं शुभम् ॥

पूर्वापरौ भुजौ अष्टाङ्गुलौ कोटिरर्द्धाङ्गुला । तत्फलं ४ । ०
० । उपरिभागे एकाङ्गुलम् अधोभागे च पञ्चाङ्गुलं त्यक्त्वा ०
त्र्यस्रं ४ । १ । ० । चतुः एक १ अङ्गुलयवं लग्नास्यं त्र्यस्रं कु
तत्र भू २ । ०। ० मानं । तदर्धमाबाधा १ । ० । ० । भुजः ४। ०।
स्वाबाधाभुजकृत्योरिति क्रमेण लम्बः ४ । ० । ० । अनेनाभ
धायां गुणितायां त्रिभुजफलं ४ । ० । ० । फलद्वयै(१)क्यं ८
एतत्केतुपीठं ध्वजाकारम् । सर्वत्रापि ग्रहमखे ग्रहपूजार्थम्, एवंक्रमे
पीठानि कार्याणि ।

अथ होमार्थं ग्रहपीठाकारकुण्डानि यथा—

मध्ये वृत्तं पूर्वतः पञ्चकोण माम्नायास्रं त्र्यस्रशूर्पे धनुश्च ।
केतुर्दीर्घाम्नायकोणं सबाण माग्नेयीतः कुण्डसंस्था क्रमेण ।
भानुः शुक्रश्चन्द्रमाश्चापि भौमो राहुर्मन्दः केतवो गीष्पतिश्च
सौम्यश्चैषां स्वामिनः स्युः क्रमेण तत्राऽत्र्यस्रं प्राकृतं कुण्डजातम्

आऽत्र्यस्रं त्र्यस्रमभिव्याप्य प्राकृतं पञ्चास्रं चतुरस्रं त्र्यस्रं
कुन्डार्काद्युक्तरीत्या कार्यम् ।

---

(१) 'द्वयैक्यम् एत' ङ० ।

यावा भूमिः सप्तविंशाङ्गुलाब्धि
यावा वृत्तार्द्धावृताऽन्या तिथेः स्यात्।
त्रयोविंशस्तत्र लम्बाङ्गुलश्च
राहोः शूर्पे कुण्डमेतद्विचित्रम्॥

यव एव यावः। पूर्वा भूमिः २७ स(१)प्तविंशाङ्गुली चतुर्थ-वा, अन्या इतरा पश्चिमा भूमिः तिथेः पञ्चदशात् स्यात्। सा च वृत्तावृत्तार्द्धेनावृता युक्ता। त्रयोविंशत्यङ्गुलश्च लम्ब इत्यर्थः। अथ फलं। पूर्वभूमिः २७। ४। पश्चिमभूमिः १५। तयोरैक्यं ४२। ४। तदर्धं २१। २। लम्बः २३। लम्बेन निघ्नं कुमुखैक्यखण्डमिति क्रमेण ४। ८८। पश्चाद्भूमेर्व्यासः ५९।

व्यासस्य वर्गे भनवाग्नि निघ्ने सूक्ष्मं फलं पञ्चसहस्रभक्ते।

इति सूत्रेण फलं १७६। तदर्धं८८। तयोरैक्यं ५७६। अथवा—

सिद्धांऽङ्गुलो भवेल्लम्बः पश्चाद्भूमिर्नखाङ्गुला।
पूर्वाऽष्टाविंशतिः प्रोक्ता शूर्पे स्याद्वृत्तकोणके॥

इत्यनेन पश्चाद्वृत्तं नास्तीति ध्वनितम्। चतुर्विंशत्यङ्गुलो लम्बः २४। नखानि विंशतिः। तथाच कुमुखद्वयं २०। २८। तयोरैक्यं ४८ तदर्धं २४ अनयोर्घातः तस्य फलं ५७६।

संग्राहोऽर्द्धे सार्धरामेण चापेन्तर्ज्यार्हः स्याद्वृत्तपादोदिगंकात्।
सूत्राद्द्वौद्वाद्बाह्यमौर्व्यर्हमेवं वृत्तं दद्याज्ज्यास्पृगेवं परार्द्धम्॥

चापे यदर्द्धं तत्र सार्द्धत्र्यङ्गुलेन संग्राहः भागः कार्यः। ततः दशाङ्गुलात्सूत्रादन्तर्ज्यार्हः वृत्तपादः कर्त्तव्यः। तथा तत्र एकादशाङ्गुलेन सूत्रेण चापज्यास्पृक् बाह्यज्यार्हं वृत्तं दद्यात्। तथाच ज्यासं(२)ग्राहचिह्नयोरन्तरं २१। एकविंशत्यङ्गुलं भवति। एवमेव द्वितीयार्द्धं भवति। अन्तर्बहिर्ज्यार्हत्वं तदसत्त्वार्थम्। अत्र फलं संग्राहार्द्धफलं ७३। ४। वृत्तपादफलं ७८४ ज्यास्पृक् सूत्रान्त-

(१) 'सप्तविंशाङ्गुलि' घ० ङ०। (२) 'संग्राहकचिह्नयो' घ० ङ०।

श्चतुरस्रफलं तत्र एका कोटिः ११ परा कोटिः ११ कोणांशप
तत्रागन्तुके चतुरस्रे कोटिः २१ । भु(१)जः २१ अनयोर्घ
४८ । ४ तत्र तद्वृत्तफलस्य हानिः शेषे १० । ४ । अंशत्रयं
शक्त्या शेषांशो ग्राह्यः २६ । तथाच ७३ । ४ एवं ७८ । ४
११० एकत्र २८८ एवं परार्द्धस्य २८८ मिलितं ५७ ६ ।

इषुवेदमितेन दीर्घदोष्णा गजदोष्णा लघुतापि च त्रिषष्टिः
जिनलम्बगुणेन वार्द्धषट्त्रिभुविचार्धात्मवदन्तिकेतुकुण्डम्

इषुवेदैः ४५ । गज ८ भुजकोटिघातः ३६० । जिन २४ लम्बं ।
षट्त्रि ३६ तदर्धं १८ भूमिस्तदर्धं ९ लम्बगुणं २१६ । ए
५७६ फलम् ।

एकेनयुग्मत्रिभिरङ्गुलीभिः परेण धृत्या च मितेन दोष्णा
सुदीर्घवेदास्रमुशन्तिकुण्डं निगद्यतेऽथो द्विविधं शराभम् ॥

फाले लम्बो भुश्च सिद्धाङ्गुलैस्त-
ल्लम्बा यष्टिः पार्श्वयोरङ्गुलीभिः ।
वेदैर्वेदेषुभिश्चात्र भूः स्या-
द्धृत्योभय्यप्यायता षट्त्रिपर्वैः ॥

(२)फाले लम्बः भूश्चतुर्विंशत्यङ्गुला तल्लम्बादुभयतः पार्श्व
श्चतुर्भिश्चतुर्भिरङ्गुलिभिरुपलक्षिता यष्टिः । अथवा पञ्चा
अत्र पक्षे भूरष्टादशाङ्गुलाँ । उभय्यपि यष्टिः षट्त्रिंशदङ्गुल
ता । अथ फलं फाले लम्बः २४ । भूमिः २४ अर्द्धं १२ ।
गुणं २८८ तथा दीर्घो भुजः ह्रस्वो भुजः ८ । अनयोर्घातः २८
एकत्र ५७६ । अथवा फाले लम्बः २३ भूः १८ अर्द्धं ९ ल
गुणं भूम्यर्द्धं २१६ । तथा भुजः ३६ ह्रस्वो भुजः १० अनये
तः ३६० । एकत्र ५७६ ।

यष्टिर्वाणैः सौम्यदिश्यग्र एव त्र्यस्रं तादृक् शूर्पकं पश्चिमास्य

(१) 'भुजः २२' ङ० । (२) 'फाले लम्बः' नास्ति ख० ।

बार्हस्पत्यं सौम्यदीर्घं धनुस्तत् पश्चादिग्ज्यं शुक्रियं सौम्यकोणम् ॥
सौम्यं सौर्यं प्राकृतं चात्रमौलं कण्ठो नाभिःखातको मेखलाश्च ।
आदित्यादेर्होमकुण्डान्यवादीत् श्रीकृष्णस्य प्रीतये राज्ञनाथिः ॥
आदित्यादेः पीठमालां निरुच्य पीठान्येवं दिग्गतानि प्रयोगात् ।
पीठे पूजां कुण्डमालासु होमं कृत्वा देवं श्रीहरिं भावयाशु ॥

श्रीकामादेस्तु अयुतहोमलक्षहोमकोटिहोमाः ग्रहमखाः । तत्र कोटिहोमः शतमुखदशमुखद्विमुखैकमुखभेदैश्चतुर्धा संवरणेन पृष्टः सनत्कुमार उवाच—

शताननो दशमुखो द्विमुखैकमुखौ तथा ।
चतुर्विधो महाराज ! कोटिहोमो विधीयते ॥
कृत्वा कुण्डशतं दिव्यं यथोक्तं हस्तसंमितम् ।
एकैकस्मिंस्ततः कुण्डे दशविप्रान्निमन्त्रयेत् ॥
सद्यः पक्षे तु विप्राणां सहस्रं परिकीर्तितम् ।
अल्पैरहोभिः कार्यः स्याद्वर्षाकालादिकेऽपि वा ॥
तदा दशमुखः कार्यः कोटिहोमो महामते ।
विप्राणां द्वे शते तत्र सुविभज्य नियोजयेत् ॥
(अथ (१)कुण्डद्वयं कृत्वा विभज्य च विभावसुम् ।
शतं तत्र नियोज्यं स्याद् विप्राणां प्रविभज्य वै ॥
यदा तु स्वेच्छया यज्ञं यजमानः समापयेत् ।)
कालेन महता राजन् तदा चैकमुखो भवेत् ॥
न संख्यानियमश्चात्र ब्राह्मणानां नरोत्तम ॥

इत्यादिना भविष्योत्तरे उक्तः । तत्र एकमुखः प्रकृतिः तत्र सकलधर्माम्नायात् । अन्ये विकृतयः । अतस्तेषु एकमुखविहितकुण्डादयः कार्याः । तत्र मण्डपस्त्रिविधः—

"उत्तमं (२)शतहस्तं तु तदर्द्धेन तु मध्यमम् ।

(१) कंसान्तर्गतं नास्ति ङ० । (२) 'शतमुखं' ङ० ।

जघन्यं तु तदर्द्धेन" ।

द्वत्यादिः । तेषां यथा(१)सम्भवंशतमुखादौ विनियोगः तत्र द्विमुखे—

अष्टहस्तप्रमाणेनायामेन [च] तथैव च ।
मेखला(२) त्रितयं तस्य द्वादशाङ्गुलविस्तृतम् ॥
मध्ये तु मण्डपस्यापि कुण्डं कुर्याद्विचक्षणः ॥

इति कुण्डं मध्यदेशश्च प्राप्तः । तत्र एकं दक्षिणतः अपरमुत्तरः इति कुण्डद्वयं कार्यम् तत्र—

दशलक्षमिते होमे षट्करं सम्प्रचक्षते ।

यद्वा,

कुण्डं पञ्चकरं प्रोक्तं दशलक्षाहुतौ क्रमात् ।

इति पक्षद्वयम् । तयोश्च शतपञ्चाशद्धस्तमण्डपयोः मध्यमनवमां सुखेन निवेशः । पञ्चविंशतिहस्ते मण्डपे तु मध्यमनवमांशे यद्यप्य ष्टाङ्गुलाष्टहस्ते विनिवेशो न सम्भवति, तथापि पूर्वपश्चिमनवमभ गयोः किञ्चिदंशं गृहीत्वा निवेशः कार्यः । एवं दशमुखेऽपि मध्य नवमभागे कुण्डद्वयं कार्यम्, अवशिष्टान्यष्ट कुण्डानि पूर्वादिक्रमे (३)एकैकाष्टनवमांशे कर्याणि । पूर्वदिक्नवमांशे प्राकृती समचः रस्रा चतुर्हस्ता देवपूजार्था वेदिः कार्या । तत्र शतहस्ततदर्द्धमण्ड पक्षे षट्कराणि पञ्चकराणि वा यावन्ति मध्यनवमभागे भवे तावन्ति तत्र कृत्वाऽवशिष्टान्यवशिष्टभागेषु यथासम्भवं कार्याणि पूर्वदिग्गतनवम(४)भागे वेदिश्चेति । शतमुखे तु सद्यःपक्ष एव ।

कृत्वा कुण्डशतं दिव्यं यथोक्तं हस्तसंमितम् ।

इत्याद्युक्तेः । नन्वत्र एकहस्ते कथं लक्षाहुतयः ? न च शी

(१) 'सम्भवं' नास्ति ङ० ।
(२) 'द्वितियं' ख० ।
(३) 'एकैकनवमांशे' ङ० ।
(४) 'भागे देहि' ख० ।

दाहिघृतेन कार्या इति वाच्यं, तस्याविधानात् तिलानां प्रकृतत्वेन तद्बाधापत्तेश्च । अत्र केचित्—

द्विहस्तमयुते तच्च लक्षहोमे चतुःकरम् ।
अयुते त्वथ होतव्ये कुण्डं स्याद्धस्तमात्रकम् ॥
द्विगुणं लक्षहोमे तु कोटिहोमे चतुर्गुणम् ॥

इति वाक्याद्विहस्तं कार्यम् । हस्तसंमितमित्यत्र द्विवचनान्तो बहुवचनान्तो वा विग्रह इति । अन्येतु व्याससमखातमेकहस्तमेककुण्डषट्पञ्चचतुस्त्रिव्यङ्गुलाभिः पञ्चभिर्मेखलाभिर्युतं कार्यम् । तच्च तिललक्षहोमोपयोगीत्याहुः । तत्र एकहस्ते पञ्चदशांशः खातः तत्फलं चतुर्विंशत्यधिकसप्ताशीतिः । एकाङ्गुलः कण्ठः । तयोः क्षेत्रफलं चतुर्विंशत्यधिकसप्तशतसहितचतुर्दशसहस्राङ्गुलानि १४७२४ एतद्द्विगुणं २९४४८ एतस्मादधिकक्षेत्रफलं पूर्वोक्ते हस्तकुण्डे इति तदेव युक्तम् । मेखलारहितसमखाते व्यङ्गुलसहितकण्ठेऽङ्गुलानि चतुरधिकपञ्चशतीसहितैकोनत्रिंशत्सहस्राणि । अस्मिन् पक्षे आहुतिपरिमाणं स्वल्पं कार्यं "शतं चतुःषष्टिर्वा व्रीहितुल्यानां तदर्द्धेन तिलानाम्" इति गृह्यपरिशिष्टात् । एवञ्च द्वात्रिंशत्तिलानामिति परिमाणमुपेत्य एकहस्तेऽपि द्विहस्तवदेव लक्षहोम इति । एषां च शतकुण्डानां पञ्चविंशतिहस्ते मण्डपे बाधान्न निवेशः । पञ्चाशद्धस्ते निवेशेऽपि न ब्राह्मणानां निवेशः सम्भवति । अतः शतहस्त एव मण्डपः कार्यः । अत्र केचित्—सर्वमण्डपस्य समांशेन शतं भागा कल्प्याः । तत्रैकैकभागे एकैकं कुण्डं कार्यमिति ।

तत्र बहूनां कुण्डानां प्रकृतिप्राप्तमध्यदेशबाधः स्यात्, अतः मध्यमनवमभागे विंशतिः कुण्डानि कार्याणि । यथा पञ्चकुण्डानामेका दक्षिणोत्तरा पङ्क्तिः । एवमन्यास्तिस्रः । तत्र मध्यमनवमांशस्यष्टाङ्गुलाधिकत्रयस्त्रिंशद्धस्तमितत्वाद्दक्षिणोत्तरयोर्द्वयोः सप्ताङ्गुलाधिकसार्द्धचतुर्हस्तात्मकमन्तरं तुल्यं भवति । प्राक्पश्चात्कुण्डमालयो-

रष्टाङ्गुलाधिकसप्तहस्तमन्तरमिति तत्रान्तरे सावकाशतया प्रतिकुकुण्डाभिमुखपङ्क्तिद्वयेन होतृब्राह्मणोपवेशनं सुखतो भवति । एवमवशिष्टान्यशीतिकुण्डानि, अवशिष्टेष्वष्टनवमांशेषु निवेश्यानि । तत्रापि मध्ये द्वे अष्टसु दिक्ष्वष्टेति रीत्या दशेति ।

अथवा मध्यमे नवमांशेऽष्टाविंशतिकुण्डानि निवेश्यानि । तथा सप्तानां कुण्डानां दक्षिणोत्तरा प्रथमा पङ्क्तिः । एवमेव तिस्रः पङ्क्तयः कार्याः । तत्र द्वयोर्द्वयोर्दक्षिणोत्तरयोः षडङ्गुलाधिकद्विहस्तमन्तरं समम् । अवशिष्टानि द्वासप्ततिकुण्डानि अवशिष्टेष्वष्टसु नवमांशेषु निवेश्यानि । तत्रैकैकनवमांशे नव कुण्डानि । तत्र मध्यमनवमांशस्थानामष्टाविंशतिकुण्डानां बहिः परिधिरूपेण षोडश, तद्बहिः परिधिरूपेण चतुर्विंशतिः, तद्बहिः परिधिरूपेण द्वात्रिंशदिति । न चात्र पक्षे मध्यमनवमांशे दक्षिणोत्तरयोः कुण्डयोः षडङ्गुलाधिकद्विहस्तमेवान्तरालं, तत्र स्वस्वकुण्डाभिमुख्येन ब्राह्मणपङ्क्त्युपवेशने कुण्डद्वयज्वालाक्लेशप्रसङ्ग इति वाच्यं, यदा दक्षिणामुखोपवेश्या यजुर्वेदिनो नोपलभ्यन्ते, यदा वोत्तरदिगभिमुखोपवेश्या अथर्वणा नोपलभ्यन्ते, उभये वा नोपलभ्यन्ते, तदा एतत्पक्षसौकर्यात् । चतुर्वेद्युपलम्भे तु प्राक्तन एव पक्षः कार्य इति । समित्तिलचर्वाज्यद्रव्येषु आदित्यादिनवग्रहा एव प्रधानदेवताः । व्यस्तसमस्तव्याहृतिभिरयुतादिहोमे तु त एव प्रधानदेवता इति तदुद्देशेनैव त्याग इत्येके । अयुतादिव्याहृतिहोमे त्वग्निवायुसूर्यप्रजापतय इति भट्टाः । इन्द्रादिलोकपालादयस्त्वङ्गदेवताः, इत्यस्तु प्रासङ्गिकम् । अधिकं शान्तिकमलकरादिग्रन्थेभ्यो द्रष्टव्यम् ।

अथ नवग्रहदानानि । तत्र सूर्यस्य —

कौसुम्भवस्त्रं गुडहेमताम्रं माणिक्यगोधूमसुवर्णपद्मम् ।
सवत्सगोदानमिति प्रणीतं दुष्टाय सूर्याय मसूरिकाश्च ॥
आरक्तकं चन्दनमम्बुजं च वदन्ति दानं हि दिवाकराय ॥

अथ चन्द्रस्य—

घृतकलशसितवस्त्रं दधिशङ्खमौक्तिकं सुवर्णं च ।
रजतं च सम्प्रदद्याच्चन्द्रारिष्टोपशमनाय ॥

सद्वंशपात्रस्थिततण्डुलाश्च कर्पूरमुक्ताफलशुभ्रवस्त्रम् ।
युगोपयुक्तं वृषभं च रौप्यं चन्द्राय दद्यात्घृतपूर्णकुम्भम् ॥

अथ भौमस्य—

प्रवालगोधूममसूरिकाश्च वृषश्च ताम्रः करवीरपुष्पम् ।
आरक्तवस्त्रं गुडहेमताम्रं दुष्टाय भौमाय सचन्दनं हि ॥

अथ बुधस्य—

नीलं वस्त्रं मुद्गदानं बुधाय रत्नं पाचीदासिकाहेमसर्पिः ।
कांस्यं दन्तः कुञ्जरश्चाथ मेषो रौप्यं सर्वं पुष्पजात्यादिकं च ॥

अथ गुरोः—

रथः सुवर्णं शुभपीतवस्त्रं सपीतधान्यं लवणं सुपुष्पम् ।
सशर्करं सद्रजनीप्रयुक्तं दुष्टाय शान्त्यै गुरवे प्रणीतम् ॥

अथ भृगोः—

चित्रवस्त्रमविदानवर्धिते दुष्टगे मुनिगणैः परिणीतम् ।
तण्डुलं घृतसुवर्णरूपकं वज्रकं परिमलो धवला गौः ॥
चित्राम्बरं शुभ्रतरस्तुरङ्गो धनुश्च वज्रं रजतं सुवर्णम् ।
सतण्डुलाज्योत्तमगन्धयुक्तं वदन्ति दानं भृगुनन्दनाय ॥

अथ शनेः—

नीलकं महिषं वस्त्रं कृष्णं लोहं सदक्षिणम् ।
दद्याच्च दक्षिणायुक्तं शनिदोषप्रशान्तये ॥
माषाश्च तैलं विमलेन्द्रनीलः तिला कुलित्था महिषी च लोहम् ।
सदक्षिणं चेदमुशन्ति नूनं दुष्टाय दानं रविनन्दनाय ॥

अथ राहोः—

गोमेदरत्नं च तुरङ्गमश्च सुनीलचैलानि च कम्बलाश्च ।

तिलाश्च तैलं खलु लोहमिश्रं स्वर्भानवे दानमिदं वदन्ति
राहोर्दानं बुधैर्मेषो गोमेदो लोहकम्बलौ ।
सुवर्णं नागरूपं च सतिलं ताम्रभाजनम् ॥

अथ केतोः—

वैडूर्यरत्नं सतिलं सतैलं सकम्बलश्चापि मदो मृगस्य ।
शस्त्रं च केतोः परितोषहेतोरुदीरितं दानमिदं मुनीन्द्रैः ॥
केतोर्वैडूर्यममलं तैलं मृगमदस्तथा ।
ऊर्णां तिलैश्च संयुक्तां दद्यात्क्लेशापनुत्तये ॥

संहिताप्रदीपे—

भानुस्ताम्बूलदानादपहरति नृणां वैकृतं वासरोत्थं
सोमः श्रीखण्डदानादवनितनुभुवो भोजनात्, पुष्पदानाः
सौम्यः, शक्रस्य मन्त्री हरिहरनमनाद्, भार्गवः शुभ्रवस्त्रै
स्तैलस्नानात्प्रभाते दिनकरतनयो ब्रह्मनद्यापरौ च ॥ इ

अथ नवरत्नमुद्रिकाघट्टनम्—

माणिक्यं तरणेर्मध्ये प्राच्यां वज्रं भृगोर्विधोः ।
आग्नेय्यां मौक्तिकं याम्यां प्रवालं मङ्गलस्य तु ॥
गोमेदं राक्षसे राहोः पश्चिमे नीलकं शनेः ।
वायौ वैडूर्यके केतोरुदीच्यां पुष्पकं गुरोः ॥

हारीतः—

स्पर्शिता स्याद्यदा कन्या वाचा वाप्युदकेन वा ।
अन्तरा प्रातिकूल्यं चेत्पूर्वोढा विधवा भवेत् ॥

एतच्च विवाहानन्तरचतुर्थीकर्ममध्ये बोध्यम् ।

कार्ष्णाजिनिः—

पिता वा यदि वा भ्राता ज्येष्ठो वा म्रियते यदि ।
अतीतेब्देऽपि वाग्दत्तां नोद्वहेद्युवतीं पुमान् ॥

दक्षः—

(१)ज्योतिः सागरे—

*दुर्भिक्षे राष्ट्रभङ्गे च पित्रोर्वा प्राणसंशये।
प्रौढायामपि कन्यायां नानुकूल्यं प्रतीक्ष्यते॥

मेधातिथिः—

*पुरुषत्रयपर्यन्तं प्रतिकूलं स्वगोत्रिणाम्।
प्रवेशान्निर्गमस्तद्वत्तथा मण्डनमुण्डने॥
*प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियाम्।
*आचतुर्थं ततः पुंसि पञ्चमे शुभदं भवेत्॥

अथ रजोदोषे निर्णयः। माधवीये—

प्रारम्भात्प्राग्विवाहस्य माता यदि रजस्वला।
निवृत्तिस्तस्य कर्तव्या सहत्वश्रुतिचोदनात्॥

दंपत्योः पितरौ भ्राता सोपनीतः सहोदरः।
पितृव्यस्तादृशश्चैव पितामहपितामही॥
एषामन्यतमे नष्टे नोद्वहेत्तां वधूं वरः॥

दम्पत्योरिति सर्वत्र सम्बध्यते। अत्र विनायकशान्त्या क्वचिद्विवाह इत्युक्तं प्राक्।

*दुर्भिक्षे इति।

दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च।
उदासीनस्थितस्यापि प्रातिकूल्यं न विद्यते॥

इतिवाक्यं प्रातिकूल्यं मरणप्रयुक्तदोष इत्येके। प्रातिकूल्ये च पुरुषत्रयावधिदोषकरमित्याह—*पुरुषत्रयेति। यथा सगोत्रसपिण्डयोः पुरुषत्रयपर्यन्तं प्रतिकूलस्य निषेधनिमित्तत्वम्, एवं प्रवेशमण्डनयोर्निर्गममुण्डननिषेधनिमित्तत्वमपि तावत्पर्यन्तमेवेत्यर्थः। *प्रेतकर्माणीति। पूर्ववाक्यात्स्वगोत्रिणामित्यनुवर्त्तते। *आचतुर्थमिति। संख्यान्तरोपादानात्प्रेतकर्मानिवृत्तेर्निमित्तस्या-

---

(१) 'ज्योतिः सारे' क० ख०।

प्रारम्भात् नान्दीश्राद्धात , 'नान्दीमुखं विवाहादौ' इत्यादिना तस्यैव प्रारम्भोक्तेः । मेधातिथिः—

चौले च व्रतबन्धे च विवाहे यज्ञकर्मणि ।
भार्या रजस्वला यस्य प्रायस्तस्य न शोभनम् ॥
वधूवरान्यतमयोर्जननी चेद्रजस्वला ।
तस्याः शुद्धेः परं कार्यं माङ्गल्यं मनुरब्रवीत् ॥

वृद्धमनुः—

विवाहव्रतचूडासु माता यदि रजस्वला ।
तदा न मङ्गलं कार्यं शुद्धौ कार्यं शुभेप्सुभिः ॥

गर्गः—

यस्योद्वाहादिमाङ्गल्ये माता यदि रजस्वला ।
तदा न तत्प्रकर्तव्यमायुःक्षयकरं यतः ॥

नान्दीश्राद्धोत्तरं रजोदोषे तु कपर्दिकारिकासु—

सूतिकोदक्ययोः शुद्ध्यै गां दद्याद्धोमपूर्वकम् ।
*प्राप्ते कर्मणि शुद्धिः स्यादितरस्मिन्न शुद्ध्यति ॥
अलाभे सुमुहूर्तस्य रजोदोषे च सङ्गते ।

भ्युदयिकनिषेधस्य नैमित्तिकस्योपादानाच्च तेन स्वगोत्रिणामाचतुर्थं सपिण्डीकरणान्तप्रेतकर्मसमाप्तिं विना आभ्युदयिकं न कुर्यादित्यर्थः । तेन परगोत्रिणां (चतुःपुरुष(१)पर्यन्तं न प्रेतकर्मसमाप्त्यपेक्षाप्रसङ्गः । अत्रापि वरवध्वोः पितृचतुर्थपुरुषात्मककूटस्थमारभ्य चतुःपुरुषौ) ग्राह्यौ । द्वादशाहादि सपिण्डीकरणपक्षे तु तदुत्तरानुमासिकान्यपि प्रेतकर्मशब्देन ग्राह्याणि उत्पत्तिवेलायां प्रेतोद्देश्यकानामेव प्रेतशब्दोल्लेखमन्तरेण पुनरावृत्तिविधानात् "नरः संवत्सरात्परं प्रेतदेहं परित्यज्य" इत्यग्निमवाक्याच्च ।

*प्राप्ते इति । नान्दीश्राद्धरूपप्रारम्भवति कर्मणि शु-

---

(१) कंसान्तर्गतं नास्ति । घ० ङ० ।

श्रियं संपूज्य तत्कुर्यात्पाणिग्रहणमङ्गलम् ॥
हैमीं माषमितां पद्मां श्रीसूक्तविधिनार्चयेत् ।
प्रत्यृचं पायसं हुत्वा अभिषेकं समाचरेत् ॥ इति ।
सूतकादिसंकटे तु कूष्माण्डीभिर्घृतं हुत्वा पयस्विनीं गां च दत्त्वा विवाहादि कुर्यादिति (१)च वक्ष्यते ॥

अथैकक्रियानिर्णयः । ज्योतिर्निबन्धे बृद्धमनुः—

एकमातृजयोरे*क(२)वासरे पुरुषस्त्रियोः ।
न समानक्रियां कुर्यान्मातृभेदे विधीयते ॥

द्धिः । इतरस्मिन् नान्दीश्राद्धरूपप्रारम्भाभावे तु नेत्यर्थः, 'अलाभे मुमुहूर्त्तस्य' इत्युक्त्या प्राप्तेः प्रारम्भात्मकत्वात् । यद्वा, नान्दीश्राद्धप्रारम्भोत्तरमित्यर्थः । प्राप्ते आरब्धे, इतरस्मिन्नारब्धे । होमश्च परिभाषाप्राप्ताज्यद्रव्येण समस्तव्याहृतिभिरष्टोत्तरशतसं(३)ख्यः। शुद्धिश्चानिष्टविरहः । अ(४)निष्टं चाह बृहस्पतिः—

वैधव्यं च विवाहे स्याज्जडत्वं व्रतबन्धने ।
चूडायां च शिशोर्मृत्युर्विघ्नं यात्राप्रवेशयोः ॥ इति ।

न त्वन्यारम्भयोग्यताः स्पर्शानधिकारात् । केचित्तु विभिन्नवाक्योपात्तयोरारम्भमुहूर्त्तालाभयोर्न परस्परसापेक्षत्वम् । तेनारम्भात्प्रागपि रजोदोषे लग्नान्तराभावे शान्तिं कृत्वा विवाहादि कुर्यादित्याहुः । अन्येतु 'अलाभे सुमुहूर्त्तस्य'इत्यपि प्रारब्धपरमेव कारिकावाक्यैकवाक्यत्वादित्याहुः ।

*एकेति । वत्सरभेदेन करणे तु न दोष इति सूचितम् । अत्र पुरुषस्त्रियोरित्यत्र पुरुषयोः स्त्रियोः पुरुषस्त्रियोश्चेति विवक्षितम् ,

एकः कर्त्ता शुभं कुर्यान्न पुत्र्योः पुत्रयोरपि ।
षण्मासे वाऽष्टमासे वा पूर्णे त्वब्दे शुभावहम् ॥

(१) 'च प्रागुक्तं' क० ख० । (२) 'वत्सरे' ख० ।
(३) 'सङ्ख्या' घ० ङ० । (४) 'अरिष्टं' घ० ङ० ।

*एतेन एकस्य पुंसो विवाहद्वयमेकदिने निषिद्धं, मातृभेदाभावात्। नारदः—

पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये।
*न तयोर्व्रतमुद्वाहान्मण्डनादपि मुण्डनम्॥

वराहः—

*विवाहस्त्वेकजातानां षण्मासाभ्यन्तरे यदि।
असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत्॥

मदनरत्ने वासिष्ठः—

न पुंविवाहोर्ध्वमृतुत्रयेपि
विवाहकार्यं दुहितुः प्रकुर्यात्।
न मण्डनाद्यापि हि मुण्डनं च
गोत्रैकतायां यदि नाब्दभेदः॥
एकोदरभ्रातृवि(१)वाहकृत्यं
स्वसुर्न पाणिग्रहणं विधेयम्।

इति वचनात्। *एतेनेति। 'द्विशोभनं त्वेकगृहेऽपि नेष्टम्' इत्याद्यग्रिमवाक्येष्वपि मातृभेदे विधीयते इत्ययमपवादः प्रवर्त्तते इति भावः। *न तयोर्व्रतमुद्वाहादिति। तयोः पुत्रपुत्र्योर्मध्ये एकस्योद्वाहानन्तरमन्यस्योपनयनं नेत्यर्थः। तथाच मिहिरः—

पुत्रोपनयनादूर्ध्वं षण्मासाभ्यन्तरे तथा।
पुत्र्युद्वाहं न कुर्वीत विवाहाद्व्रतबंधनम्॥ इति।

*विवाहस्त्विति। तुशब्द एवकारार्थे अन्ययोगव्यवच्छेदस्तदर्थः। तथाचान्याब्दप्रवेशेऽपि षण्मासमध्ये एकोदरस्य विवाहभिन्नं मङ्गलं नेत्यर्थः। नारदस्तु—

मातृयज्ञक्रियापूर्वं ज्येष्ठं कृत्वा तु मंगलम्।
ऋतुत्रयं पुनर्यावन्न कुर्याल्लघुमङ्गलम्॥

(१) 'विवाहकृत्यात्स्वसुर्न' क०।

षण्मासमध्ये मुनयः समूचु-
र्न मुण्डनं मण्डनतोपि कार्यम् ॥

एतदपवादस्तत्रैव—

ऋतुत्रयस्य मध्ये चेदन्याब्दस्य प्रवेशनम्।
तदा ह्येकोदरस्यापि विवाहस्तु प्रशस्यते ॥

सारावल्याम्—

फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने।
भेदादब्दस्य कुर्वीत नर्तुत्रयविलङ्घनम् ॥

संहिताप्रदीपे—

ऊर्ध्वं विवाहात्तनयस्य नैव
कार्यो विवाहो दुहितुः समार्धम्।
अप्राप्य कन्यां श्वशुरालयं च
वधूः प्रवेश्या स्वगृहं च नादौ ॥

मदनरत्ने वसिष्ठः—

द्विशोभनं त्वेकगृहेपि नेष्टं
शुभं तु पश्चान्नवभिर्दिनैस्तु।
आवश्यकं शोभनमुत्सवो वा
द्वारेथवाचार्यविभेदतो वा ॥

*एकोदरप्रसूतानां नाग्निकार्यत्रयं भवेत्।
भिन्नोदरप्रसूतानां नेति शातातपोऽब्रवीत् ॥

ज्योतिर्निबन्धे कात्यायनः—

कुले ऋतुत्रयादर्वाङ् मण्डनान्न तु मुण्डनम्।
प्रवेशान्निर्गमो नेष्टो न कुर्यान्मङ्गलत्रयम् ॥

इत्याह—*एकोदरेति। 'एकोदरप्रसूतानाम्' इति निर्देशाद्भिन्नोदरप्रसूतानां शोभनत्रयं भवति, भिन्नोदरप्रसूतानामपि नेति शातातप इति विकल्पः।

कुर्वन्ति मुनयः केचिदन्यस्मिन्वत्सरे लघु।
लघु वा गुरु वा कार्यं प्राप्तं नैमित्तिकं तु यत् ॥
पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः।
मुण्डनं चौलमित्युक्तं व्रतोद्वाहौ तु मङ्गलम् ॥
चौलं मुण्डनमेवोक्तं वर्जयेन्मण्डनात्परम्।
मौञ्जी चो*भयतः कार्या यतो मौञ्जी न मुण्डनम् ॥
*अभिन्नवत्सरेपि स्यात्तदहस्तत्र भेदयेत्।
अभेदे तु विनाशः स्यान्न कुर्यादेकमण्डपे ॥

संकटे तु कपर्दिकारिकासु वराहमिहिरश्च—

उद्वाह्य*पुत्रीं न पिता विदध्यात्
पुत्र्यन्तरस्योद्वहनं क(१)दाचित्।
यावच्चतुर्थं दिनमत्र पूर्वं
समाप्य चान्योद्वहनं विदध्यात् ॥

कश्यपः—

*मौञ्जीबन्धस्तथोद्वाहः षण्मासाभ्यन्तरेपि वा।
पुत्र्युद्वाहं न कुर्वीत विभक्तानां न दोषकृत् ॥

*उभयतः चौलात्प्राक् परतश्च। समानक्रियानिषेधमपवदति-*अभिन्नेति। यद्यपि मौञ्जितो मौञ्जी विवाहाद्वा विवाहोऽभ्यनुज्ञातस्तथापि दिनभेदो मण्डपभेदश्चावश्यक इत्यर्थः।

*पुत्रीमिति। इदं पुत्रस्याप्युपलक्षणं 'यावच्चतुर्थं दिनम्' इति दर्शनादेकपुत्रोद्वाहानन्तरमपरपुत्रोद्वाहश्चतुर्थीकर्मोत्तरमेव। अत एव रामायणादौ श्रीरामविवाहानन्तरमेव लक्ष्मणादीनामुद्वाहो न समकालमिति। *मौञ्जीबन्ध इति। उद्वाह्य पुत्रीमित्येतत्प्रकरणे एतल्लिखनात्,

पुत्रोद्वाहात् परं पुत्री विवाहो न ऋतुत्रये।

(१) 'कदापि' क०।

ज्योतिर्निबन्धे--

विवाहमारभ्य चतुर्थिमध्ये
*श्राद्धं दिनं *दर्शदिनं यदि स्यात् ।
वैधव्यमाप्नोति तदाशु कन्या
जीवेत्पतिश्चेदनपत्यता स्यात् ॥

तथा—

विवाहमध्ये यदि चेत्क्षयाह-
स्तत्र स्वमुख्याः पितरो न यान्ति ।
*वृत्ते विवाहे परतस्तु कुर्या-
च्छ्राद्धं स्वधाभिर्न तु दूषयेत्तम् ॥

"ये वा भद्रं दूषयन्ति स्वधाभिः" इति श्रुतेश्च । मासिकविषये कालहेमाद्रौ शाट्यायनिः—

न कार्यं व्रतमुद्वाहान्मङ्गलेनाप्यमंगलम् ॥

इति मयूखे सामान्यतो विवाहानन्तरमुपनयननिषेधाच्च । पुत्रीविवाहोत्तरं मौञ्जीबन्धः एकविवाहानन्तरमपरविवाहश्च, षण्मासाभ्यन्तरे तं न कुर्यादित्यर्थः । 'मौञ्जिबन्धमथोद्वाहम्'इति द्वितीयान्तपाठोऽयुक्तः । पुत्रीविवाहानन्तरं मौञ्जीबन्धम् एकविवाहोत्तरमपरविवाहं च न कुर्यात् । पुत्रोद्वाहानन्तरं पुत्र्युद्वाहं च न कुर्यात् । एते त्रयो निषेधा अविभक्तपराः न तु विभक्तपरा इत्यर्थः । "कुले ऋतुत्रयाद्" इत्यपि अविभक्तपरमिति केचित् । अत्र 'विवाहस्त्वेकजातानाम्' इति निषेधो मुख्यः । "उद्वाह्य पुत्रीम्" इति निषेधो मध्यमः, "न कुर्यादेकमण्डपे" इति त्वधम इति । *श्राद्धं दिनं क्षयाहः । *दर्शदिनं स्वरूपतः । यद्यपि तत्र श्राद्धस्याकरणाच्छ्राद्धोपलक्षितदिनलाभेन दर्शदिनमित्यनर्थकं तथापि विवाहमारभ्य चतुर्थीमध्ये श्राद्धाधिकारिणां श्राद्धदिनं तदनधिकारिणां दर्शदिनमित्यर्थान्न वैयर्थ्यम् । *वृत्ते विवाहे इति । क्षयाहपरं, दर्श-

प्रेतश्राद्धानि सर्वाणि सपिण्डीकरणं तथा ।
अपकृष्यापि कुर्वीत कर्तुं नान्दीमुखं द्विजः ॥

वृद्धिं विनापकर्षे दोषमाह तत्रैवोशनाः—

वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत् ।
स श्राद्धी नरके घोरे पितृभिः सह मज्जति ॥ इति ।

मेधातिथिः—

प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियाम् ।
आ(१)चतुर्थं ततः पुंसि पञ्चमे शुभदं भवेत् ॥

स्मृत्यन्तरे—

*सपिण्डीकरणादर्वागपकृष्य कृतान्यपि ।
पुनरप्यपकृष्यन्ते *वृद्ध्युत्तरानिषेधनात् ॥

स्मृतिसारावल्याम्—

भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा ।
एकस्मिन्मण्डपे चैव न कुर्यान्मण्डनत्रयम् ॥

*सहोदरविषयमेतत् । यमः—

एकोदरप्रसूतानामेकस्मिन्वासरे पुनः ।
वि(२)वाहो नैव कुर्वीत मण्डनोपरि मुण्डनम् ॥

श्राद्धं तु लुप्यत एव । अनुमासिकानामप्यपकर्षमाह—*सपिण्डीकरणादिति । अत्रानुमासिकापकर्षस्य कालादर्शादिभिः मृततिथावेवाभिधानाच्चौलोपनयनविवाहाधानेष्टापूर्त्तेषु अपकर्षः, तत्काललाभात्, न तु गर्भाधानाद्यन्नप्राशनान्तेष्विति निपुणतरमुपपादयिष्यामः । *वृध्युत्तरेति । वृध्युत्तरं तु प्रेतकर्माणि लुप्यन्ते । मनः समाधानाय तु रुद्रैकादशिनीपूजादिकमाचरन्ति । *सहोदरेति । तस्यैव "ज्येष्ठो भ्राता यदा तिष्ठेत्" इत्यादौ सोदरस्यैव

---

(१) 'आचतुर्थं' ख० । (२) 'विवाहे' ख० ।

गार्ग्यः—

*भ्रातृयुगे स्व सृयुगे भ्रातृस्वसृयुगे तथा ।
न कुर्यान्मङ्गलं किंचिदेकास्मिन्मण्डपेऽहनि ॥
एकास्मिन्वासरे प्राप्ते कुर्याच्चमलजातयोः ।
क्षौरं चैव विवाहं च मौञ्जिबन्धनमेव च ॥

ज्योतिर्विवरणे—

एकोदरयोरेकादिनोद्वहने भवेन्नाशः ।
*नद्यन्तर एकदिनं केप्याहुः*संकटे च शुभम् ॥
ऊर्ध्वं विवाहाच्छुभदा नरस्य
नारीविवाहो न ऋतुत्रयं स्यात् ।
नारीविवाहात्तदहेपि शस्तं
नरस्य पाणिग्रहमाहुरार्याः ॥

भिन्नमातृजयोस्तु एकवासरे विवाहमाह मेधातिथिः—

पृथङ्मातृजयोः कार्यो*विवाहस्त्वेकवासरे ।
एकस्मिन्मण्डपे कार्यः पृथग्वेदिकयोस्तथा ॥
*पुष्पपाट्टिकयोः कार्यं दर्शनं न शिरःस्थयोः ।

भ्रातृपदेन व्यवहारात् । *भ्रातृयुगे इति । भ्रातृयुग्मस्य स्वसृयुग्मस्य च एकस्मिन्नहनि एकस्मिन्मण्डपे वा मङ्गलं न कुर्यात् । पृथगयं निषेधः, समुच्चये मानाभावात् । यत्तु भ्रातृयुगं स्वसृयुगं च भिन्नमातृकं ग्राह्यमिति, तदसत् । भ्रात्रोर्युगमित्यत्र भ्रात्रोरित्यादि सरूपैकशेषो न स्यात् । समानार्थत्वाभावेन सारूप्याभावात् । *नद्यन्तर इति । नद्यादिव्यवधाने इत्यर्थः । आदिपदादेशादिव्यवधानं ग्राह्यम् । *संकटे चेति । विनायकशान्तेः संकटापहारकतया सा कार्या । *विवाहस्तु इति । पृथङ्मातृजयोरपि एकस्योपनयनमपरस्य विवाह इत्येवं जातीयास्तु संस्कारा एकस्मिन्नहनि न भवन्तीत्यर्थः । *पुष्पेति । उभाभ्यां भगिनी-

भगिनीभ्यामुभाभ्यां च यावत्सप्तपदी भवेत् ॥

यमयोस्तु विशेषो भट्टकारिकायाम्—

एकस्मिन्वत्सरे चैकवासरे मण्डपे तथा ।
कर्तव्यं मङ्गलं स्वस्रोर्भ्रात्रोर्यमलजातयोः ॥

ज्योतिर्निबन्धे नारदः—

*प्रत्युद्वाहो नैव कार्यो*नैकस्मै दुहितृद्वयम् ।
न चैकजन्ययोः पुंसोरेकजन्ये तु *कन्यके ॥
*नैवं कदाचिदुद्वाहो नैकदा मुण्डनद्वयम् ।
नैकजन्यै तु कन्ये द्वे पुत्रयोरेकजन्ययोः ॥
न पुत्रीद्वयमेकस्मै प्रदद्यात्तु कदाचन ॥ इति ॥

भ्यां शिरस्थयोः पुष्पपट्टिकयोर्दर्शनं न कार्यमिति सम्बन्धः । एतावता परस्परवरशिरःस्थपुष्पपट्टिकदर्शनं परस्परकन्ययोर्निषिद्धमिति लभ्यते ।

*प्रत्युद्वाह इति । जामातुर्भगिन्याः स्वपुत्रविवाह इत्यर्थः । *नैकस्मै इति (१)देयमिति शेषः । यद्यपि यथाश्रुते दुहितृद्वयमित्युपादानान्मृतायां प्रथमदुहितरि द्वितीयदुहितृदानेऽनुमतिर्लभ्यते । तथापि द्वयस्य दुहितृनिष्ठस्य दानकर्मत्वबाधात् द्वे दुहितरौ नदद्यादित्यर्थो वाच्यः । तत्र यदि साहित्यं समासार्थो विवक्षितः तदा सहिते दुहितरौ न दद्यादित्यर्थः स्यात् । तत्र जीवत्यां प्रथमायामसाहित्येन द्वितीयादाने विरोधो न स्यात् । अथ साहित्यमतन्त्रम् । तदा कथं मृतायां दुहितरि द्वितीया दीयेत जीवनस्यानुपादात् । तस्माद्दत्तदुहितृकाय दुहितरं न दद्यादित्यर्थ इति । *कन्यके न देये इत्यर्थः । *नैवमिति सापत्नपरम् । मुण्डनद्वयं सपत्नयोरपि न भवतीत्यर्थः ।

---

(१) 'देये इति' ख० ।

*कन्याया रजोदर्शने तु अपरार्के संवर्तः—

माता चैव पिता चैव ज्येष्ठभ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥

हारीतः—

पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या *वृषली ज्ञेया तत्पतिर्वृषलीपतिः ॥

देवलात्रिकश्यपाः-पूर्वार्धं तदेव ।

भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ।
यस्तां समुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः ॥
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ।

यत्तु "द्वादशे वृषली भवेत्" इत्युक्तं तद्रजस्वला चेत्, 'रौरवं तु रजस्वलाम्' इत्युक्तेः । तदेव प्रपञ्चयति—*कन्याया इति । *वृषलीति । त्रिधावृषलीदेवलोक्ता—

वन्ध्या च वृषली ज्ञेया वृषली च मृतप्रजा ।
अपरा वृषली ज्ञेया कुमारी या रजस्वला ॥ इति ।

तत्र रजस्वलापरिणये दोषः । रजोदर्शनाभावे तु द्वादशाद्वाया अपि विवाहे न दोषः । यतः 'द्वादशे वृषली भवेत्' इत्यादौ वृषलीपदं रजस्वलार्थकम् । तथाच विवाहात्पूर्वं रजोदर्शनं यथा न भवति तथाकार्यमिति, न तु द्वादशे वर्षे तस्या वृषली संज्ञा, अन्यथा—

त्रिंशद्वर्षोद्वहेत्कन्यां यद्वा द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षो वा धर्मे सीदति सत्वरः ॥

त्र्यष्टवर्षश्चतुर्विंशतिवर्षः ।

त्रिंशद्वर्षो दशाब्दां तु भार्यां विन्देत नग्निकाम् ।
एकविंशति वर्षो वा सप्तवर्षामवाप्नुयात् ॥

इति मनुवचनाविरोधात् । तस्याश्चोद्वाहो "यस्तां समुद्वहेत्"

माधवीये बौधायनः—

*त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् ॥

विष्णुः—

*ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरम् ॥

अत्र वरस्य दोषाभावमाह यमः—

कन्या द्वादश वर्षाणि याऽप्रदत्ता वसेद् गृहे ।

भ्रूणहत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम् ॥

इत्यादिना निषिध्यते । यत्तु मनुः—

काममामरणात्तिष्ठेद् गृहे कन्यर्तुमत्यपि ।

न त्वेवैनां प्रयच्छेत गुणहीनाय कर्हिचित् ॥ इति ।

तत् सगुणप्रशंसार्थम् ,

दद्याद् गुणवते कन्यां नग्निकां ब्रह्मचारिणे ।

अपि गुणविहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥

इति बौधायनेनोपरोधनेन रजस्वलात्वप्रयोजको न भवेदित्युक्तेः । यदि ऋतुदर्शनेऽपि पित्रादिर्न ददाति तदा-*त्रीणिवर्षाणीति ।

ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम् ।

इति वाक्यशेषात् । *ऋतुत्रयमुपास्यैवेति गुणवद्वरपरम् । इयं च प्रतीक्षा दातृसद्भावे । तदभावे तु—

यदा तु कश्चिन्नैव स्यात्कन्या राजानमा(१)व्रजेत् । इति ।

तदभावे तु "(२)गम्यत्वभावे" इति वचनात्स्वयं गम्यं गमनार्हं वरः कार्यः कन्ययैव इति । गुणानाह यमः—

कुलं च शीलं च वयश्च रूपं विद्यां च वित्तं च सनाथतां च ।

एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥

सनाथता पोषकादियुक्तता । शेषम् उदारत्वबहुभार्यत्वादि ।

---

(१) 'चरेत्' घ० ङ० । (२) 'गम्यत्वभावे' घ० ङ० ।

*एवञ्चोपनतां पत्नीं नावमन्येत्कदाचन ।
न तु तां*बन्धकीं विद्यान्मनुः स्वायंभुवोऽब्रवीत् ॥

मनुः—

अलंकारं नाददीत पितृदत्तं स्वयंवरे ।
पितृदत्तं मातृदत्तं स्तेयी स्याद्यदि*तं हरेत् ॥

वरं प्रत्याह—

पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् ।
स हि स्वाम्यादतिक्रामेदृतूनां प्रतिबोधनात् ॥

कात्यायनः—

दूरस्थानामविद्यानां मोक्षमार्गानुसारिणाम् ।
शूद्राणां निर्धनानां च न देया कन्यका बुधैः ॥

अयं च न शाकं भुञ्जीतेतिवद् दृष्टार्थो निषेधः । तत्रापि निर्धनानां निषेधः कलिपुरुषाणामत्यन्तोत्साहहेतुः । किञ्च—

स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् ।
हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ॥
क्षय्यामयाव्यपस्मारि श्वित्रिकुष्ठिकुलानि च ॥

इत्यादि । निष्पुरुषः षण्ढः,

यस्याप्सु पूयते बीजं ह्रादि मूत्रं च फेनिलम् ।
पुमान्स्याल्लक्षणैरेतैर्विपरीतस्तु षण्ढकः ॥

निश्छन्दो वेदाध्ययनहीनः । *एवञ्च स्वयंवरे च । *बन्धकीं सपापां व्यभिचारिणीं च,

त्रीणि वर्षाण्युदीक्षेत कुर्याद्दतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥
अदीयमाना भर्त्तारं यदि गच्छेत्स्वयं पतिम् ।
नैनः किञ्चिदवाप्नोति न च पुंसाऽधिगच्छति ॥

इति मानवात् । अदीयमाना दात्रपेक्षणात् तदभावाद्वा । पुंसा परेणेति शेषात्, न च व्यभिचारिणीत्यर्थः । *तम् अलङ्कारम् ।

अत्र प्रायश्चित्तमुक्तमाश्वलायनेन—

कन्यामृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मनः ।
शुचिं च कारयित्वा तामुद्वहेदानृशंस्यधीः ॥
पिता ऋतून्स्वपुत्र्यास्तु गणयेदादितः सुधीः ।
दानावधि गृहे यत्नात्पालयेच्च रजोवतीम् ॥
दद्यात्तदृतुसंख्या गाः शक्तः कन्यापिता यदि ।
दातव्यैकापि निःस्वेन दाने तस्या यथाविधि ॥
दद्याद्वा *ब्राह्मणेष्वन्नमतिनिःस्वः सदक्षिणम् ।
तस्यातीतर्तुसंख्येषु वराय प्रतिपादयेत् ॥
*उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पयः ।
अदृष्टरजसे दद्यात्कन्यायै रत्नभूषणम् ॥

*तामुद्वहन्वरश्चापि कूष्माण्डैर्जुहुयाद्द्विजः ॥ इति ॥

मदनपारिजाते यज्ञपार्श्वः—

*विवाहे विततेतन्त्रे*होमकाल उपस्थिते ।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः ॥
स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि ।
*युञ्जानामाहुतिं हुत्वा तत*स्तन्त्रं प्रवर्तयेत् ॥

---

*ब्राह्मणेषु अतीत ऋतुसंख्येष्वित्यन्वयः । अयमर्थः-उक्तप्रकाराणामन्यतमाश्रयणेन दाता कन्यादाने योग्यः । *उपोष्येति । दृष्टरजस्कायाः कन्याया उपवासत्रयान्ते गोपयःपानेन अदृष्टरजसे कुमार्यै सरत्नभूषणदानेन च विवाहयोग्यता । *तामुद्वहन्निति । वरस्य कूष्माण्डहोमेन तदुद्वाहयोग्यतेति । होमकाले रजोदर्शनेत्वाह-*विवाहे इति । *होमकाले विवाहहोमकाले । *युञ्जानामाहुतिं हुत्वेति । प्रयोगरत्ने युञ्जानो मन्त्रः तैत्तिरीयप्रसिद्धः । *तन्त्रं होमतंत्रम् । यद्वा, भट्टोजी—

विवाहहोमे प्रक्रान्ते यदि कन्या रजस्वला।
त्रिरात्रं दम्पती स्यातां पृथक्शय्याशनासनौ॥
चतुर्थेऽहनि संस्नातौ तस्मिन्नग्नौ यथाविधि।
विवाहहोमं कुर्यातामित्यादि स्मृतिसंग्रहे॥ इति॥

बौधायनसूत्रे—"अथ यदि कन्योपसाद्यमाना उह्यमाना वा रजस्वला स्यात्तामनुमंत्रयीत।

पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ।
पुमानिन्द्रश्च सूर्यश्च पुमांसं च दधात्वियम्॥" इति॥

अ(१)थवा दशरात्रमलंकृत्य प्राशयेत् पञ्चगव्यम्। अथ शुद्धां कृत्वा विवहेदिति क्वचित्पाठः। एवम् अग्रेदिधिषूरपि न परिणेया, तत्परिणये प्रायश्चित्तस्मरणात्। तथाच वसिष्ठः—'अग्रे दिधिषूपतिः कृच्छ्रं द्वादशरात्रं चरित्वा तस्मै दत्त्वा पुनर्निर्विशेत्' इति। अथवा प्रायश्चित्तान्तरं—'परिवित्ति—परिवेत्तृ—पर्याहित—पर्याधातृ—अग्रेदिधिषूपतीनां संवत्सरं प्राकृतं ब्रह्मचर्यम्' इति। अधिकमन्यत्र बोध्यम्। तयोः स्वरूपमाह देवलः—

ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेऽनुजा।
या, साऽग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृता॥ इति॥

अत्रापरार्कानुयायिनः—ज्येष्ठायामविरूपायामिति पूरणीयम्। विरूपायां तु शातातपः—

नाग्नयः परिविन्दंति न वेदा न त(२)पांसि च।
न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिका॥ इति॥

ज्येष्ठेऽधिकारिणि श्राद्धमकुर्वत्यपि कनिष्ठः कुर्वन्न परिविद्यते, एवं विरूपायां ज्येष्ठायामनूढायामपि कनिष्ठाविवाहो न दोषायेत्यर्थः। ज्येष्ठा चेत्कुत्सितदीर्घकुत्सितरोगार्ता केनापि नोह्यते तदा रजस्वलाभयात्तत्प्रागेव ज्येष्ठायामनूढायामपि कनिष्ठां ददन् गृह्णंश्च

(१) 'अथ द्वादशरात्रमलं' घ० ङ०। (२)'तपेऽपि च' घ० ङ०।

बौधायन(१)सूत्रम्—'अथ यदि कन्योपसाद्यमाना चोह्यमाना वा रजस्वला स्यात्तामनुमन्त्रयेत् ।

पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।

पुमानिन्द्रश्च सूर्यश्च पुसांसं च दधात्वियम् ॥'इति ॥ अथ द्वादशरात्रमलंकृत्य प्राशयेत्पञ्चगव्यमथ शुद्धां कृत्वा विवहेत् ॥

अत्र*गान्धर्वाद्यष्टौ विवाहाः, *तद्व्यवस्था चाकरे ज्ञेया । मनुः(२)—

न दोषभागिति भाव इत्याहुः ।

एवं पतित्यानन्तरोत्पन्नकन्याग्रहणे न दोषः,

कन्यां समुद्वहेदेषां सोपवासामकिञ्चनाम् ।

इति याज्ञवल्क्यात् । एषां पतितानां पतित्यानन्तरोत्पन्नां रिक्तां कन्यां स्वयमेवोद्वहेत्, न पतितहस्तादिति विज्ञानेश्वरः । "पतितोत्पन्नः पतितो भवति अन्यत्र स्त्रियाः" इति वसिष्ठेन तस्याः पातित्यनिषेधाच्च ।

*गान्धर्वादीति । तथाच मनुः—

ब्राह्मो दैवस्तथाचार्षः प्राजापत्यस्तथाऽसुरः ।

गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः ॥ इति ॥

तल्लक्षणानि सफलान्याहाश्वलायनः—"अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः, तस्यां जातो द्वादशावरान् द्वादश परान् पुनात्युभयतः । ऋत्विजे वितते कर्मणि दद्यादलंकृत्य स दैवो, दशावरान्दश परान् पुनात्युभयतः । सहधर्मं चरतामिति प्राजापत्यः, अष्टावरानष्ट परान् पुनात्युभयतः । गोमिथुनं दत्त्वो-

---

(१) 'सूत्रे' क० ख० ।

(२) इत आरभ्य 'गार्हैतः' इत्यन्तो ग्रन्थः क्वचिन्न दृश्यते । टीकायां तु व्याख्यातः परं त्वत्र न तस्यावश्यकतेति भाति । 'तद्व्यवस्था चाकरे ज्ञेया' इत्युक्तेः ।

*षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् ।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् ॥
चतुर *आसुरगान्धर्वराक्षसपैशाचान् । *तान् राक्ष-

पयच्छेत स आर्षः, सप्तावरान्सप्तपरान् पुनात्युभयतः । मिथः समयं कृत्वोपयच्छेत स गान्धर्वः । धनेनोपतोष्योपयच्छेत स आसुरः । सुप्तानां प्रमत्तानां वाऽपहरेत्स पैशाचः । हत्वा भित्त्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत्स राक्षसः" इति । सहधर्ममिति सहचरणस्य सिद्धत्वात्पुनर्विधानं यावज्जीवं तदर्थं, न तु मध्ये आश्रमान्तरस्य परिग्रह इत्यर्थः ।

सहोभौ चरतां धर्ममिति वाचानुभाष्यतु ।
कन्याप्रदानमुद्दिश्य प्राजापत्यो विधिः स्मृतः ॥

इति मनुवचनेऽप्येवमेव । अत्र पुनात्युक्त्यनुक्तिभ्यां गुणदोषौ सूचितौ । तावाह मनुः—

ब्राह्मादिषु विवाहेषु चतुर्थे वाऽनुपूर्वशः ।
ब्रह्मवर्चस्विनःपुत्रा जायन्ते शिष्टसंमताः ॥
इतरेष्वेव शिष्टेषु नृशंसानृतवादिनः ।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥

नृशंसा हिंस्राः । ब्रह्मद्विषः वेदद्विषः । *तद्व्यवस्थेति । तथाच मनुः—

चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः ।
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ॥ इति ।

राक्षसः क्षत्रियस्य मुख्यः । आसुरो वैश्यशूद्रयोर्मुख्यः । अनुकल्पमाह—*षडिति । ब्राह्मणस्यानुपूर्व्या क्रमेण ब्राह्मादिआसुरान्ताः षड् धर्म्याः । क्षत्रियस्य चत्वारो अवरा धर्म्याः । अवरानाह—*आसुरेति । *तानिति । अवरानित्यर्थः । तथाच वैश्यशूद्रयोरासुरगान्धर्वपैशाचास्त्रयो धर्म्या इति फलितम् ।

सवर्ज्यान्वैश्यशूद्रयोः । स एव—*'आसुरं वैश्यशूद्रयोः' । हेमाद्रौ पैठीनसिः—*'राक्षसो वैश्यस्य, पैशाचः शूद्रस्य ।' प्रचेताः—'पैशाचोऽसंस्कृतप्रसूतानां प्रतिलोमजानां च' । मनुः—

राज्ञस्तथासुरो वैश्ये शूद्रे चा*न्त्यस्तु गर्हितः ।

*क्षत्रियादेः संकटे पैशाचमाह माधवीये वत्सः—

मयूखकृतस्तु षडेव विप्रस्य धर्म्या नेतरौ । एवञ्च क्षत्रियादेर्ब्राह्माद्यनुज्ञा भवति । आसुरादयश्चत्वारः क्षत्रियस्य धर्म्या इति सर्वे । वैश्यशूद्रयोः(१) राक्षस वर्जमेत एव एवञ्च राक्षसः क्षत्रियस्यैवेति फलितमित्याहुः ।

प्राजापत्यादि पञ्चविवाहानवधीकृत्याह मनुः—

पञ्चानां च त्रयो धर्म्या द्वावधर्म्यौ स्थिताविह ।
पैशाचश्चासुरश्चैव न कर्त्तव्यौ कथञ्चन ॥
पृथक् पृथग्विमिश्रौ वा विवाहौ पूर्वचोदितौ ॥ इति ।

*आसुरामिति मुख्यः कल्पः । *राक्षस इति अनुकल्पः ।

अन्येतु आसुरं वैश्यशूद्रयोरिति मानवान्मुख्यासुरधर्मेणायं कार्यः । "आसुरो द्रविणादानात्" इति वरादद्रविणमादाय पित्रादिभिर्यदानरहितं कन्यार्पणं क्रियते स आसुरो विवाह इत्यर्थमाहुः ।

(पैशाच(२) इति मुख्यः आसुरो गर्हित इति सम्बन्धः ।) *अन्त्यः पैशाचः । अत्र कांचिद्विकल्पोप्युह्यः । *क्षत्रियादेरिति ।

---

(१) 'राक्षसवर्जमेव तत्' घ० ङ० ।
(२) कंसान्तर्गतं नास्ति घ० ङ० ।

सर्वोपायैरसाध्या स्यात्सुकन्या पुरुषस्य या ।
*चौर्येणापि विवाहेन सा विवाह्या रहः स्थिता ॥

गन्धर्वादिविवाहेष्वप्युदकपूर्वकं दानमाह तत्रैव यमः—

(१)नोदकेन न वा वाचा कन्यायाः पतिरुच्यते ।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥

पराशरमाधवीये देवलोऽपि—

गन्धर्वादिविवाहेषु पुनर्वैवाहिको विधिः ।
कर्तव्यश्च त्रिभिर्वर्णैः समर्थेनाग्निसाक्षिकः ॥

((२)त्रैवर्णोक्तेर्गान्धर्वादौ विप्रवर्जमधिकार उक्तः ।)

तत्रैव परिशिष्टे—

*गान्धर्वासुरपैशाचा विवाहो राक्षसश्च यः ।
पूर्वं(३) परिग्रहस्तेषु पश्चाद्धोमो विधीयते ॥

अतो होमादावकृते भार्यात्वाभावाद्वरान्तराय दे-
। । तथाच तत्रैव वसिष्ठबौधायनौ—

*बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता ।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥ इति ।

ादीनां सर्वेषामित्यन्ये । सङ्कटे उक्तविवाहासम्भवे । *चौर्ये-
ापीति । पैशाचेनापीति तात्पर्यम् । आसुरं निन्दति कश्यपः—

क्रीता द्रव्येण या नारी न सा पत्न्यभिधीयते ।
न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः ॥ इति ।

एतच्चात्मार्थं धनग्रहणे इत्युपरिष्टात् । *गान्धर्वादीति ।
न्धर्वादिविवाहचतुष्टये स्वीकारानन्तरं विवाहहोम इत्यर्थः । *ब-
ादिति । गान्धर्वाद्युपलक्षणम् । नन्वत्र सर्वविवाहेष्वेव संस्का-
भावेऽन्यस्मै दानस्य साम्याद्बलादपहारे राक्षसपैशाचयोरिति
ोष्योपादानं व्यर्थमिति चेत् ? मैवम् । मन्त्रैर्यदि न संस्कृता सं-

(१) 'नोदके न वाचा वा' क० । (२) कंसान्तर्गतं नास्ति क० ।
(३) 'परिश्रयस्तेषु' ग० ।

अत्र मन्त्रसंस्काराभावेऽन्यस्मै दानस्य सर्वविवाहेषु साम्याद्ग्रहणादपहारे राक्षसपैशाचयोर्विशेषवचनं व्यर्थम् । तेन तयोर्यदि न संस्कृता संस्कृता वेत्यावृत्य कन्यानुमत्यभावेऽन्यस्मै देयेति व्याख्येयम् । मदनपारिजाते नारदः—

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् ।
तेषां च निष्ठा विज्ञेया विद्वद्भिः सप्तमे पदे ॥

स्मृतिचन्द्रिकायामपरार्के चैवम् ।

आशौचे तु याज्ञवल्क्यः—

*दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि च कष्टायां सद्यःशौचं विधीयते ॥

केषामित्यपेक्षिते ब्रह्मपुराणे उक्तम्—

दातुः प्रतिग्रहीतुश्च कन्यादाने च नो भवेत् ।
विवाहयिष्णोः कन्याया लाजहोमादिकर्मणि ॥ इति ।
व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥

इति विष्णुवचनाच्च । प्रारम्भस्तेनैवोक्तः—

प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ॥ इति ।

स्कृता वेति तन्त्रावृत्त्यादिनार्थोपगमात्कन्यानुमत्यभावेऽन्यस्मै दातव्येति व्याख्यानात् ।

*दाने इति । दाने तथाच क्रतुः—

पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यति । इति ।

विवाहे पूर्वसम्भृतसम्भारे । विवाहपदं चौलोपनयनादिसंस्कारोपलक्षणम् । यज्ञे वृषोत्सर्गादौ । यज्ञपदं पूर्वप्रवृत्तप्रतिष्ठारामाद्युत्सवमात्रोपलक्षणम् । संग्रामे "संग्रामे समुपोढे राजा-

वरणमिति*मधुपर्कपरम् ।

गृहीतमधुपर्कस्य यजमानाच्च ऋत्विजः ।
पश्चादशौचे पतिते न भवेदिति निश्चयः ॥

इति ब्राह्मोक्तेः । मधुपर्कात्पूर्वं तु भवत्येवाशौचमिति शुद्धिविवेकः । रामाण्डारभाष्येप्येवम् । नान्दीमुखावधिश्च स्मृत्यन्तरे—

*एकविंशत्यहर्यज्ञे विवाहे दश वासराः ।
त्रिषट्चौलोपनयने नान्दीश्राद्धं विधीयते ॥

आरम्भाभावेऽपि लग्नान्तराभावे गद्यविष्णुः—

*न देवप्रतिष्ठा*विवाहयोः पूर्वसंभृतयोरपि । इति ।

*अत्र प्रायश्चित्तमाह मदनपारिजाते विष्णुः—

अनारब्धविशुद्ध्यर्थं कूष्माण्डैर्जुहुयात् घृतम् ।
गां दद्यात्पञ्चगव्याशी ततः शुद्ध्यति सूतकी ॥

संग्रहेऽपि—

संकटे समनुप्राप्ते सूतके समुपागते ।
कूष्माण्डीभिर्घृतं हुत्वा गां च दद्यात्पयस्विनीम् ॥
चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् ।
यदैव सूतकप्राप्तिस्तदैवाभ्युदयाक्रिया ॥

नं संन्नाहयेत्" इति सन्नहने (१)प्रास्थानिकहोमादौ च । देशविप्लवे देशोपप्लवशमनार्थे शान्तिकर्मणि । आपदि देशपलायनादौ । *मधुपर्केति । वरणवत्सु कर्मसु तच्छून्येषु तदीयाद्यपदार्थ इत्यग्रे स्पष्टम् । आवश्यके त्वाह-*एकविंशतीति । सूतकादिसम्भावनायां पूर्वमप्येतावति काले नान्दीश्राद्धं कार्यमित्यर्थः । *न देवेति । आशौचं नेत्यर्थः । *विवाहयोरिति । "यज्ञे सम्भृतसम्भारे विवाहे श्राद्धकर्मणि । सद्यः शौचम्" इतिस्मृत्यन्तराच्च । *अत्रेति । आरम्भाभावेऽप्य(२)ग्रे कालान्तरा-

---

(१) 'प्रास्थानिक शान्तिहोमादौ' घ० ङ० । (२) 'प्यत्र' घ० ङ० ।

अन्नादिषु विशेषः षट्त्रिंशन्मते—

विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके ।
परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः ॥

परैरसगोत्रैः ।

भुञ्जानेषु तु विप्रेषु त्वन्तरा मृतसूतके ।
अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः ॥

एतदाशौचात्पूर्वमपृथक्कृतान्नाविषयम् । तत्र शेषमन्नं त्याज्यमित्यर्थः । पृथक्कृतेषु तु बृहस्पतिराह—

विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके ।
पूर्वसंकल्पितान्नेषु न दोषः परिकीर्तितः ॥ इति ॥

धर्मार्थं विवाहकरणे फलमुक्तं महाभारते—

ज्ञात्वा स्ववित्तसामर्थ्यमेकं चोद्वाहयेद्द्विजम् ।
तेनाप्याप्नोति तत्स्थानं शिवभक्तो नरो ध्रुवम् ॥

अपरार्के दक्षः—

मातापितृविहिनं तु संस्कारोद्वाहनादिभिः ।
यः स्थापयति तस्येह पुण्यसंख्या न विद्यते ॥

मदनरत्ने भविष्ये—

विवाहादिक्रियाकाले तत्क्रियासिद्धिकारणम् ।
यः प्रयच्छति धर्मज्ञः सोऽश्वमेधफलं लभेत् ॥

कन्यागृहे भोजननिषेधोऽपि तत्रैव—

अप्रजायां तु कन्यायां न भुञ्जीत कदाचन ।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचति ॥

अपरार्के आदित्यपुराणे—

विष्णुं जामातरं मन्ये तस्य कोपं न कारयेत् ।
अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै गृहे ॥
ब्रह्मदेयां न वै कन्यां दत्त्वाश्नीयात्कदाचन ।
अथ भुञ्जीत मोहाच्चेत्पूयाशे नरके वसेत् ॥

तत्रैव कश्यपः—

*अहतं यन्त्रनिर्मुक्तं वासः प्रोक्तं स्वयंभुवा।
शस्तं तन्माङ्गलिकेषु तावत्कालं न सर्वदा॥

यन्त्रनिर्मुक्तं नूतनम्॥

विवाहमध्ये स्त्रिया सह भोजनेपि*न दोष इत्याह हेमाद्रौ प्रायश्चित्तकाण्डे गालवः—

विवाहकाले यात्रायां पथि चौरसमाकुले।
असहायो भवेद्विप्रस्तदा कार्यं द्विजन्मभिः॥
एकयानसमारोह एकपात्रे च भोजनम्।
विवाहे पथि यात्रायां कृत्वा विप्रो न दोषभाक्॥
अन्यथा दोषमाप्नोति पश्चाच्चान्द्रायणं चरेत्॥

भावे इत्यर्थः। एतच्च जननाशौचे एव, न तु मरणाशौचे एतत्प्रायश्चित्तस्यास्पृश्यत्वावगमेऽसामर्थ्यात्। एवञ्च बहूनां सम्भाराणां सम्पादितानां साधारणशक्तावेव "नदेव" इत्यादि वाक्यमिति बोध्यम्।

*अहतमिति। तच्च प्रोक्षणेन शुद्धमिति वक्ष्यते। *न दोष इति। अन्यदा तु दोष एव। "ना(१)श्नीयाद्भार्यया सार्द्धम्" इति मनुवचनात्। तत्र सार्द्धम् (२)एकपात्रे इत्यर्थः। (३)एककाले इत्यन्ये। यत्तु—

ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन।
न तस्य दोषमिच्छन्ति नित्यमेव मनीषिणः॥

इत्यङ्गिरोवाक्यं तद्विवाहपरम्। एतेन—

ब्राह्मण्या भार्यया सार्द्धं क्वचिद्भुञ्जीत वाऽध्वनि।
अधोवर्ण्या स्त्रियासार्द्धं भुक्त्वा पतति तत्क्षणात्॥

---

(१) नाश्नीयाद् भार्यया सार्धं नैनामीक्षेत चाश्नतीम्। क्षुवतीं जृम्भमाणां वा न चासीनां यथासुखम्॥ इति।

(२) 'एकरात्रे' घ० ङ०। (३) 'एककाल' घ० ङ०।

मिताक्षरायामप्येवम् । रत्नमालायाम्—
मूलमैत्रमृगरोहिणीकरैः पौष्णमारुतमघोत्तरान्वितैः ।
भौमसौररविवारवर्जितैः*पाणिपीडनविधिर्विधीयते ॥
अत्रानिष्टनक्षत्रादौ दानमुक्तं ज्योतिषे—
विपत्तारे गुडं दद्यान्निधने तिलकाञ्चनम् ।
प्रत्यरे लवणं दद्याच्छागं दद्यात्त्रिजन्मसु ॥
चन्द्रे च शङ्खं (१)लवणं च तारे
तिथौ विरुद्धे त्वथ तन्दुलांश्च ।
धान्यं च दद्यात्करणे च वारे
योगे विरुद्धे कनकं (२)प्रदेयम् ॥
विवाहमण्डपमाह वसिष्ठः—
षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितम् ।
मण्डपं तोरणैर्युक्तं तत्र*वेदीं प्रकल्पयेत् ॥
अष्टहस्तं तु रचयेन्मण्डपं वा त्रिषट्करम् ॥
दैवज्ञमनोहरः—
चित्रा विशाखा शततारकाश्विनी
ज्येष्ठाभरण्यौ शिवभाच्चतुष्टयम् ।
हित्वा प्रशस्तं फलतैलवेदिका
प्रदानकं कण्डनमण्डपादिकम् ॥

इति व्याख्यातम् । क्वचिद्विवाहेऽध्वनि चेत्यर्थात् । इदमपि न सर्वथा दोषाभावपरं किन्तु दोषाल्पत्वपरमिति माधवः । *पाणिपीडनेति ।

मुख्यो विवाहः पूर्वाह्णे मध्याह्ने चोत्तमोत्तमः ।
निशायां मध्यमः प्रोक्तः अपराह्णे तु गर्हितः ॥
इत्यत्रेयवाक्यं स्मर्त्तव्यम् ।
*वेदीमिति । ग्रन्थान्तरे तु—

---

(१) 'लवणे च' क० । (२) 'प्रदद्यात्' क० ।

हेमाद्रौ व्यासः—

कण्डनदलनयवारकमण्डपमृद्वेदिवर्णकाद्यखिलम् ।
तत्संबन्धिगतागतमृक्षे वैवाहिके कुर्यात् ॥

यवारकं 'चिकसा' इति प्रसिद्धम् ।

वैवाहिके तु दिवसे शुभे (१)वाथ तिथौ शुभे ।
चतुर्थिकं प्रकुर्वीत विधिदृष्टेन कर्मणा ॥

वेदिमाह नारदः—

हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समन्ततः ।
स्तम्भैश्चतुर्भिः सुश्लक्ष्णां वामभागे तु सद्मनि ॥
समां तथा चतुर्दिक्षु सोपानैरतिशोभिताम् ।
प्रागुदक्प्रवणारम्भां (२)स्तम्भैर्हंसशुकादिभिः ॥
एवंविधामारुरुक्षोन्मिथुनं साग्रवेदिकाम् ॥ इति ।

सप्तर्षिमते—

मङ्गलेषु च सर्वेषु मण्डपो गृहमानतः ।
कार्यः षोडशहस्तो वा द्वि(३)षट्हस्तो दशावधि ॥
स्तम्भैश्चतुर्भिरेवात्र वेदी मध्ये प्रतिष्ठिता ।

हस्तो वध्वाः । सोपानं पश्चिमतः उपरिभागे उक्तपरिमाणाद्विनम् ॥

अथ मृदाहरणम् । ज्योतिर्निबन्धे नारदः—

कर्तव्यं मङ्गलेष्वादौ मङ्गलाया अङ्कुरार्पणम् ।
नवमे सप्तमे वापि पञ्चमे दिवसेऽपि वा ॥
तृतीये बीजनक्षत्रे शुभवारे शुभोदये ।
सम्यग्गृहाण्यलंकृत्य वितानध्वजतोरणैः ॥
सह वादित्रनृत्याद्यैर्गत्वा प्रागुत्तरां दिशम् ।
तत्र मृत्सिकतां श्लक्ष्णां गृहीत्वा पुनरागतः ॥

---

(१) 'वाथ' क० । (२) 'स्तम्भ हंसशुकादिभिः' क०ख० ।
(३) 'व्यूनहस्तो दशावधि' क० ख० ।

मृन्मयेष्वथवा वैणवेषु पात्रेषु योजयेत् ।
अनेकबीजसंयुक्तां तोयपुष्पोपशोभिताम् ॥
शौनकः—
आधानं गर्भसंस्कारं जातकर्म च नाम च ।
हित्वान्यत्र विधातव्यं मङ्गलेऽङ्कुरवापनम् ॥
बृहस्पतिः—
आत्यन्तिकेषु कार्येषु कार्यं सद्योऽङ्कुरार्पणम्
तत्रैव वाग्दानं हरिद्रावन्दनं च कार्यम् ।
ज्योतिःप्रकाशे—
*चतुर्थो मण्डपः श्रेष्ठः सप्तमः पञ्चमस्तथा ।
नवमैकादशौ श्रेष्ठौ नेष्टौ षष्ठतृतीयकौ ॥
विवाहभे स्वोदये वा कन्यावरणमाचरेत् ॥
वरस्यापि वरणमाह चण्डेश्वरः—
उपवीतं फलं पुष्पं वासांसि विविधानि च ।
देयं वराय वरणे कन्याभ्रात्रा द्विजेन वा ॥ इति
वाग्दानोत्तरं वरमरणेऽपरार्कस्मृतिचन्द्रिकायां वरि
अद्भिर्वाचा च दत्तायां म्रियेतोर्ध्वं वरो यदि ।
*न च मन्त्रोपनीता स्यात् *कुमारी पितुरेव ।

विवाहे श्रीधरी वेदी विंशत्यस्रसमन्विता ।
इत्युक्तम् । विंशतिकोण इत्यर्थः । तत्प्रकारमग्रे वक्ष्यामः ।
*चतुर्थ इति । अष्टहस्तमारभ्य विंशतिहस्तान्ताः स
श्चविंशतिहस्तः, पञ्चाशद्धस्तः, शतहस्तः, सहस्रहस्तश्चेत्येकादश
ण्डपाः । चतुर्थः चतुर्दशहस्तः । आद्यौ द्वौ अष्टमश्च न वि
न निषिद्धाः । *न च मन्त्रोपनीता स्यादिति । मन्त्रोप
पाणिग्रहणादिकं विना वाचा दानमिवाङ्घ्रिदानमपि न भार्या
त्पादकमित्यर्थः ।

नोदकेन न वा वाचा कन्यायाः पतिरिष्यते ।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥

इति वाक्यान्तराच्च । तथाच सप्तपदीपरिक्रमणात्प्राक् वरमरणे विधवात्वं नास्तीति भावः । किन्तु मनुः--

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥

एतद्वचनेन पतिः पूर्व एव, पश्चाद्विवाहितो देवरस्तु तदीयधनान्तरवदस्या अपि भोक्तेति प्रतीयते । *कुमारी इति । सा चान्यस्मै देयेत्यभिप्रायः । तथाच पराशरः--

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ इति ।

वाग्दानानन्तरं पाणिग्रहणात्प्राक् पतौ (१)सम्भावितोत्पत्तिकपतित्वके नष्टे दूरदेशगमनेनापरिज्ञातवृत्तान्ते । शेषं सुगमम् ।

स्त्रीपुंसयोस्तु सम्बन्धाद्वरणं प्राग्विधीयते ।
वरणाद्ग्रहणं पाणेः स संस्कारो विलक्षणः ॥
तयोरनियतं प्रोक्तं वरणं दोषदर्शनात् ॥

इति नारदवाक्याच्च । स्त्रीपुंसयोः संसर्गात्प्राक् त्रयं क्रियते वरणं पाणिग्रहणं सप्तपदीप्रक्रमश्चेति । तत्र वरणं वरस्य सम्प्रदानत्वार्थं प्रार्थनं वाग्दानम् । तत्र तयोर्वरणपाणिग्रहणयोर्मध्ये वरणमनियतं यतस्तद्दोषदर्शनात्परावर्त्तते इत्यर्थः । अत्र वरणमनियतमित्युपादानाद्यदि पाणिग्रहणसप्तपदीक्रमणान्तं क्रियते, तदा दुष्टोढापि न परावर्त्तते इति सिद्धम् । अत एव बलादपहारप्रसङ्गे "पाणिग्रहणिका मन्त्रा" इत्युक्तम् । तथाच तत्रापि पाणिग्रहणादौ जातेन परावृत्तिः । एवं 'विकर्मस्थ' इत्यत्रापि । एवञ्च—

न एतत्तु परे चक्रुर्नापरे जातु साधवः ।
यदन्यस्याभ्यनुज्ञाता नरस्यान्यस्य दीयते ॥
सकृदंशो निपतति सकृत्कन्या प्रदीयते ॥

इति निर्दोषविषयं सदोषजातपरिग्रहणादिविषयं च । दोषदर्श-

(१) 'सम्भावितान्तिकपतित्वके' ग० ।

यत्तु नारदः--

उद्वाहितापि सा कन्या न चेत्संप्राप्तमैथुना ।
पुनःसंस्कारमर्हेत यथा कन्या तथैव सा ॥ इति ।

यच्च कात्यायनः--

वरो यद्यन्यजातीयः पतितः क्लीब एव च (१) ।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोपि वा ॥
*ऊढापि देया सान्यस्मै सहावरणभूषणा ॥ इति ।

*इदं कलौ निषिद्धम् ।

*देवरेण सुतोत्पत्तिर्दत्ता कन्या न दीयते ।

(२)इत्यादिपुराणे कलौ निषेधात् । *दत्ताशब्द ऊढापरः 'ऊढायाः पुनरुद्वाहम्' इति हेमाद्रावुक्तेः । अत एव सगोत्रासपिण्डादिविवाहेपि--

भोगतस्तां परित्यज्य पालयेज्जननीमिव ।

इत्युक्तम् ।

देशान्तरगमने तु कात्यायनः--

*वरयित्वा तु यः कश्चित् *प्रणश्येत्पुरुषो यदा ।
कृत्वागमांस्त्रिनतीत्य कन्यान्यं वरयेद्वरम् ॥

नादिति वरणस्य नियामकत्वमपि पूर्ववरस्य दोषेऽसतीति भावः । *ऊढापीति । वस्तुतस्तु ऊढापीत्यपिकाराद्वाग्दत्ताया एवान्यस्मै दानमनेनोच्यते । अन्यथा (३)सगोत्रोढाया अपि विवाहप्रसक्तौ "पालयेज्जनवनीमिव" इत्यनेन विरोधः स्यादिति । *इदमिति । उद्वाहितादानम् । *देवरेणेति । "अपुत्रां गुर्वनुज्ञातो देवर" इति विषयो वक्ष्यते । तर्हि वाग्दत्तायाः कथं कलौ दानं स्यादित्यत्राह-*दत्ताशब्द इति । *वरयित्वेति कन्याया अधार्यत्वे, त्रिऋतुपदात् । *प्रणश्येत् देशान्तरं गच्छेत् अन्यथा प्रतीक्षावैय-

---

(१) 'वा' क० । (२) 'इत्यादित्यपुराणे' क० ख० ।
(३) 'सगोत्राया अपि' घ० ङ० ।

अपरार्के नारदोपि--

*प्रतिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत् ।
त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरम् ॥

शुल्कदाने तु मनुवसिष्ठौ--

*कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः ।
देवराय प्रदातव्या*यदि कन्यानुमन्यते ॥

चन्द्रिकायां कात्यायनः--

प्रदाय शुल्कं गच्छेद्यः क(१)न्यायाः स्त्रीधनं तथा ।
भार्या सा वर्षमेकं तु देयाऽन्यस्मै विधानतः ॥
*अनेकेभ्यो हि दत्तायामनूढायां तु तत्र वै ।
*पूर्वागतश्च सर्वेषां लभेताद्यवरस्तु ताम् ॥
पश्चाद्वरेण यद्दत्तं तस्याः प्रतिलभेत सः ।
अथागच्छे*न्नवोढायां दत्तं पूर्ववरो हरेत् ॥

र्थात् । ऋतुः रजोदर्शनम् । *प्रतिगृह्य वाग्दत्तामङ्गीकृत्य शुल्कं दत्त्वा मरणं देशांतरगमनं वा, तत्राद्ये *कन्यायामिति । *यदीति । कन्याचेद्देवरमनुमन्यते तदा तस्मै देया, यदि तं नानुमन्यते तदाऽन्यस्मै देया इत्यर्थः । यद्यन्यस्मै दत्तायां कन्यायां पूर्ववर आयाति तदाह-*अनेकेभ्यो हीति । एतच्च निर्दोषैर्बहुभिर्वरणे कृते । आद्यवरः प्रथमदत्तः । *पुरागत इति । पूर्वागत इति वा पाठः । अन्येन पाणिग्रहणात्पूर्वमागत इत्यर्थः । परागत इति पाठेऽप्ययमेवार्थः । *नवोढायाम् । नवेन नूतनेन द्वितीयादिना विवाहितायां स्वदत्तं शुल्कमात्रं लभेत न तु (२)कन्याम् । अनेनैव न्यायेन यदि कांचित् कश्चित्समन्त्रमूढ्वा तां त्यक्त्वा जीवनोपायार्थं देशान्परिभ्रमन्कानिचिद्दिनानि नागतः ततः सा कन्या तत्पित्रादिभिरन्यस्मै विवाहिता तदा सा द्वितीयवोढुर्न भार्या किन्तु पूर्ववोढुरेव, यद्यदूषिता चेत् । वृथाचेष्टायाः फलाज-

---

(१) 'कन्यायां स्त्री' क० । (२) 'कन्यामित्यर्थः' ङ० ।

याज्ञवल्क्यः--

*सकृत्प्रदीयते कन्या हरंस्तां चौरदण्डभाक् ।
दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत् ॥

पूर्वस्य दोषसत्त्वे इदमिति विज्ञानेश्वरः । सम्बन्धतत्त्वे वसिष्ठः--

कुलशीलविहीनस्य पश्चाद्धि पतितस्य च ।
अपस्मारिविधर्मस्य रोगिणां वेषधारिणाम् ॥
दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव च ॥

मनुः-

षण्ढान्धबधिरादीनां विवाहोस्ति यथोचितम् ।
विवाहासम्भवे तेषां कनिष्ठो विवहेत्तदा ॥
पितृव्यपुत्रे सापत्ने परदारसुतेषु च ।
विवाहाधानयज्ञादौ परिवेदो न दूषणम् ॥

नकत्वादिति बोध्यम् । *सकृदिति । पूर्वार्द्धमदोषविषयम्, उत्तरार्धं सदोषविषयम् । एवञ्च "वाग्दत्ता मनोदत्ताऽग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा चेति सप्तपुनर्भुवस्तां गृहीत्वा धर्मं न विन्देत" इति बौधायनवाक्यमपि पूर्ववरस्यादोषत्वे एवेति भावः । यदि दत्तशुल्कामपि पिता न ददाति सा च ऋतुमती तदा तां शुल्कं च हरेदित्याह मनुः--

पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् ।
स हि स्वाम्यादतिक्रामेदृतूनां प्रतिबोधनात् ॥ इति ।

स पिता ऋतुकार्यापत्योत्पत्तिरोधात् । इदं च कन्यापूजार्थं शुल्कग्रहणे,

यासां नाददते शुल्कं ज्ञातयो न स विक्रयः ।
अर्हणं तत्कुमारीणामानृशंस्यं तु केवलम् ॥

इति मनूक्तेः । आत्मार्थग्रहणे तु--

क्रीता द्रव्येण या नारी न सा पत्न्यभिधीयते ।

*अन्यद्वक्तव्यं विस्तरभीतेर्नोच्यते इति दिक्।
अत्र नान्दीश्राद्धे विशेषं तदधिकारिविशेषं चाग्रे

न सा दैवे न सा पित्र्ये दासीं तां मु(१)नयो विदुः ॥
कन्याविक्रयिणो मूर्खा रहः किल्बिषकारिणः।
पतन्ति नरके घोरे दहन्त्यासप्तमं कुलम् ॥

इति यमोक्तेः। *अन्यादिति। वाग्दानोत्तरं कन्यायां दोषोपलम्भे वरस्त्यजेदित्याह मनुः,

विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम्। इति।

दोषास्तु—

दीर्घकुत्सितरोगार्त्ता व्यङ्गा संसृष्टमैथुना।
धृष्टाऽन्याहितभावा च कन्या दुष्टा प्रकीर्त्तिता ॥

इति नारदोक्ताः। अन्यस्मिन्नाहितो भावो यया साऽन्याहितभावा। कन्यादोषमनाख्यातुः पितुर्दण्डमाह याज्ञवल्क्यः—

अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम् ॥ इति।

अदुष्टात्यागे वरस्य दण्डमाह स एव—

अदुष्टां तु त्यजन्दण्ड्यो दूषयंस्तु मृषा शतम्। इति।

दिगर्थस्तु याज्ञवल्क्यः—

पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम्।
वैश्या प्रतोदमादद्याद्वदने त्वग्रजन्मनः ॥ इति।
वसनस्य दशा ग्राह्या शूद्रस्योत्कृष्टवेदने।

इति च। अग्रजन्मपदात्क्षत्रियेण वैश्याविवाहे प्रतोद एवेति।

मनुः—

नाग्निहोत्रादिभिस्तत् स्याद्रक्षातो ब्राह्मणस्य वा।
यत्कन्या विधिवद्दत्त्वा फलमाप्नोति मानवः ॥

सालङ्कृतकन्यादाने तु संवर्त्तः—

कूकुदश्चाश्वमेधी च प्राणदाता भयेषु च।

---

(१) 'कवयो' ङ।

वक्ष्यामः । इदं चा*द्यविवाहे पिता कुर्याद्वितीयादौ वर एव,

नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः ।
अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम् ॥

इति स्मृतेः । त्रिकाण्डमण्डनोपि--

पित्रोस्तु जीवतोः कुर्यात्पुनः पाणिग्रहं यदा ।
पितुर्नान्दीमुखश्राद्धं नोक्तं तस्य मनीषिभिः ॥

रेणुकाकारिका--

(१)उक्तकाले विवाहाङ्गं कुर्यान्नान्दीमुखं पिता ।
देशान्तरे विवाहश्चेत्तत्र गत्वा भवेदिदम् ॥

लग्नघटीस्थापनमाह नारदः--

षडङ्गुलमितोत्सेधं द्वादशाङ्गुलमायतम् ।
कुर्यात्पातालवत्ताम्रपात्रं तदृशभिः फलैः ॥
ताम्रपात्रे जलैः पूर्णे मृत्पात्रे वाथवा शुभे ।
मण्डलार्धोदयं वीक्ष्य रवेस्तत्र विनिक्षिपेत् ॥

तत्र मन्त्रः--

मुख्यं त्वमसि यन्त्राणां ब्रह्मणा निर्मितं पुरा ।
भव भावाय दम्पत्योः कालसाधनकारणम् ॥ इति ॥

वरस्य मधुपर्कमाह याज्ञवल्क्यः—

समं यान्ति रथैरेते त्रयो वै नात्र संशयः ॥ इति ।

एवम् 'अलङ्कृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः' इत्युक्तेः कन्यादानं विवाहः, दानविवाहपदयोः सामानाधिकरण्यात् । 'चौलकर्मोपनयनगोदानविवाहाः' 'सार्वकालमेके विवाहम्' इत्यत्र तु पाणिग्रहणादि । अन्यथा (२)"एषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयात्" इति विवाहात्प्रागुक्तहोमासङ्गत्यापत्तेः कन्यादानात्प्राग्होमासम्भवादित्यादि ।

*आद्यविवाहे इति । विशेषो वक्ष्यते । *स्वगृह्यादे-

---

(१) 'उक्ते काले' क० ख० । (२) 'एषां' नास्ति ङ ।

प्रतिसंवत्सरं त्वर्च्याः स्नातकाचार्यपार्थिवाः।
प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः॥

अत्र विशेषो गृह्यपरिशिष्टे—

वरस्य या भवेच्छाखा तच्छाखागृह्यचोदितः।
मधुपर्कः प्रदातव्यो ह्यन्यशाखेपि दातरि॥

अत्र (१)वरदातृशब्दौ ऋत्विगाद्युपलक्षणम्। तदाहुः—'अर्च्यशाखया मधुपर्कः' इति। 'अर्च्यस्य यच्छाखीयं कर्म तच्छाखया मधुपर्कः' इति याज्ञिकाः। जयन्तस्तु 'वरणवत्सर्वत्र यजमानशाखयैव मधुपर्कः' इत्याह। (२)तत्तु नाद्रियन्ते वृद्धाः। अत्र—

पञ्चाशता भवेद्ब्रह्मा तदर्धेन तु विष्टरः।

इत्यादिगृह्यपरिशिष्टादेर्विष्टरादिलक्षणं मधुपर्कादिविधिश्च *स्वगृह्यादेर्ज्ञेयः॥

कन्यादाने प्रपितामहपूर्वकमित्युक्तं स्मृत्यर्थसारे—

नान्दीमुखे विवाहे च प्रपितामहपूर्वकम्।
नाम संकीर्तयेद्विद्वानन्यत्र पितृपूर्वकम्॥

नान्दीमुखे इति बह्वृचाद्यतिरिक्तविषयम्, गृह्यपरिशिष्टे पित्राद्यानुलोम्याज्ञानात्। व्यासः—

भुक्त्वा समुद्वहेत्कन्यां सावित्रीग्रहणं तथा।
उपोषितः सुतां दद्यादर्चिताय द्विजाय तु॥

भुक्त्वेति *मधुपर्के वैधभोजनपरम्। गृह्यपरिशिष्टे—

रिति। वरस्य पादप्रक्षालने प्रथमतः सव्यपादो ग्राह्यः 'दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत्सव्यं शूद्राय' इति सूत्रात्। यजमानपत्नी तु वामतः,

सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः स्थिता।
विप्रपादक्षालने च अभिषेके च वामतः॥

इतिवचनात्। इत्यादि गृह्ये द्रष्टव्यः। *मधुपर्के वैधेति।

---

(१) 'वरदातृशब्दो' ख०। (२) 'यत्तु' ख०।

कन्यां वरयमाणानामेष धर्मो विधीयते
प्रत्यङ्मुखा वरयन्ति प्रतिगृह्णन्ति प्राङ्
(१)मदनरत्ने ऋष्यशृङ्गः—
वरगोत्रं स(२)मुच्चार्य प्रपितामहपूर्वकम्
नाम संकीर्तयेद्विद्वान्कन्याया श्चै*वमेव
तिष्ठेत्पूर्वमुखो दाता वरः प्रत्यङ्मुखो
मधुपर्कार्चितायैनां तस्मै दद्यात्सदक्षिणा
(३)उदपात्रं ततो गृह्य मन्त्रेणानेन दाप
गौरीं कन्यामिमां विप्र यथाशक्ति विभू
गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्र
भूमिं (४)गां चैव दासीं च वासांसि च
महिषीं वाजिनश्चैव दद्यात्स्वर्णमणीनपि
ततः स्वगृह्यविधिना होमाद्यं कर्म *कार
यथाचारं विधेयानि माङ्गल्यकुतुकानि च
एतत्कन्यादानं*त्रिः कार्यमिति शौनकः।
गृहप्रवेशनीयहोमे विशेषमाहाश्वलायनः—
अर्धरात्रे व्यतीते तु परेद्युः प्रातरेव हि

भोजनान्तरकल्पने मानाभावात्। वस्तुतस्तु भुक्त्वा
लौकिकभोजनस्याभोजनस्य च लाभः। एतेन म
मध्याह्नस्नानात्पाकालीनत्वं नियतमिति सूचितम्
इति। निशीथोत्तरं कन्यादाने तु दात्रा भोजनं का
दिनत्वात्। *एवमेवेति। दृष्टान्तात्कन्यायां गोत्र
नामकीर्त्तनं च लभ्यते। *कारयेदिति। तत्र वु
मग्नी कन्यादात्रादेया। गृहप्रवेशनीयहोमश्च स्वगृहे क
प्रार्थनया तद्गृहे वा। *त्रिःकार्यमिति। कन्या

---

(१) 'मदनरत्ने हेमाद्रौ च ऋ' क०। (२) 'समुच्च
(३) 'उपपात्रं' क०। (४) 'गाश्चैव

*गृहप्रवेशनीयः स्यादिति यज्ञविदो विदुः ॥ इति । औपासनहोमे विशेषमाह शौनकः—

मप्रजासिद्ध्यर्थं कन्यां प्रतिगृह्णामीति ब्रूयात् । "एवं त्रिः प्रयुज्य हुतस्य हि शुरुधः' इति तिस्रो जपेत्"इति गृह्य(१)परिशिष्टा-रेति,

त्रिवारमेवं कृत्वा तु कन्यां दद्यात्ततः पिता ।
दाता पठेदिमं मंत्रं कन्या तारयतु स्वयम् ॥

इत्याश्वलायनस्मृतेश्च ।

वरोऽथ प्रतिगृह्णीयात्स्पृशेत्क इति मन्त्रतः ।

इत्यत्राथपदेन त्रिर्दानानन्तरलाभाच्च । कन्याप्रतिग्रहो दक्षि-ऽसे कार्यः, 'दक्षिणेऽसे कन्यामभिमृश्य क इदं कस्मा अदात्' ति गृह्यपरिशिष्टात् । होमानन्तरं पाणिग्रहणादि पतित्वप्रा-यर्थम्,

पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ।

इति वचनात् । कांस्यपात्रस्थकन्याञ्जलेरुपरिस्थे वराञ्जलौ दातृ-स्ते भार्यया जलधारादानं कार्यम् । तेन कदाचित्कन्याहस्तासन्नि-नेऽपि सकृत्कन्यादानं सिध्यत्येव । ये तु कांस्यपात्रस्थवराञ्जले-परि दातृहस्ते इत्यादि मन्यन्ते तेषां कन्याञ्जलेरुपरि कन्याहस्तासत्त्वे ःकन्यादानं स्यात् । दात्रा च स्वयं कन्यादानजलं वरहस्ते दत्तं न ।।दिति । विष्णुधर्मे तु—

करे गृहीत्वा कन्यां तु दासदास्यो द्विजोत्तमः ।
करं तु हृदि विन्यस्य धर्मो ज्ञेयः प्रतिग्रहे ॥

इत्युक्तम् । तत्राधःस्थकन्याहस्तं दाता वरहस्ते पश्चाद् दद्या-त्यर्थः । *गृहेति । संस्कारमयूखे देवस्वामिभाष्ये—उपशान्तेऽन्यमग्निमाहृत्य नष्टाहरणप्रायश्चित्तं कृत्वा परिच-यं स्यात्" इति । अयमर्थः—गृहप्रवेशनीयहोमारम्भात्पूर्वं द्वादश-त्रमध्येऽन्यनुगमने श्रोत्रियागारादग्निमानीयाऽऽयतने स्थाप-

(१) 'परिशिष्टादेति' ब०।

यित्वा परिसमूहनादि कृत्वाऽऽज्यं संस्कृत्य 'अयाश्च' इत्येकामाहुतिं हुत्वा नित्यहोमं कुर्यात्। द्वादशरात्रोत्तरमाज्याहुतयो लाजाहुतयश्चा(१)दावर्त्तनीया इति। नारायणवृत्तौ तु 'यदि विवाहाग्निर्नष्टः स्यान्नष्टाहरणप्रायश्चित्तं कृत्वा परिचरेत्' इत्युक्त्वा 'तच्च शास्त्रान्तरदर्शनात्' इत्युक्तम्। शास्त्रान्तरं च 'उपवासश्चान्यतरस्य भार्यायाः पत्युर्वा अनुगतेऽपि वोत्तरया जुहुयान्नोपवसेत्' इत्यापस्तम्बवचनम्। अन्यतरस्य कालस्यान्होरात्रेर्वा सम्बन्धी भार्यायाः पत्युर्वा उपवासोऽनशनम्। (२)अपिवा अथवा उत्तरया 'अयाश्च' इत्येतयाऽऽज्येन जुहुयात्,नतूपवसेदित्यर्थः। (३)गृहप्रवेशनीयहोमोत्तरं द्वादशरात्रमध्ये अनुगमने उक्तप्रायश्चित्तमेव। तदूर्ध्वं तु विवाहहोमस्य गृहप्रवेशनीयहोमस्य चावृत्तिरिति। 'विवाहाग्निमुपसमाधाय' इति सूत्रे विवाहाग्निग्रहणान्न विवाहहोममात्रेणाग्नेर्गृह्यत्वसिद्धिः, किन्तर्हि विवाहहोमगृहप्रवेशनीयहोमाभ्याम्। तेनाग्निनाशे होमद्वयं कार्यमिति नारायणवृत्तिदर्शनात्, पाणिग्रहणसूत्रे नष्टाहरणप्रायश्चित्तमुक्त्वा "यदि वा वैवाहे दायविभागकाले गृह्यते गृहीतो वा नष्टो द्वादशरात्रमतिक्रान्तः तत उक्तया क्रियया पश्चाद्गृहीतो भवति। विवाहाज्याहुतयो गृहप्रवेशनीयाहुतयश्च हृदयाञ्जनं च भवति, न्यायात्। होमद्वयं चात्र समानतन्त्रं स्यात्" इति द्वादशरात्रपदगर्भनारायणवृत्त्युक्तेश्च। अत्र प्रमाणं गृह्यपरिशिष्टम्।

अथ पुनराधानम्। "अनुगतेऽग्नौ शिष्टागारादग्निमानीयोक्तवदुपसमाधाय परिसमुह्य परिस्तीर्य पर्युक्ष्याज्यमुत्पूय 'अयाश्चाग्ने' इत्येकामाज्याहुतिं हुत्वा यथापूर्वं परिचरेदेवमाद्वादशरात्रादत ऊर्ध्वं विवाहगृहप्रवेशहोमाभ्यामेकतन्त्राभ्यामादध्यात्" इत्यादि। गृह्यकारिका च—

औपासनोऽनुगच्छेच्चेदुपलेपादि पूर्ववत्।
आहृत्य श्रोत्रियागारात्प्रतिष्ठाप्य हविर्भुजम्॥

(१) 'आवर्जनीया'ङ०। (२) 'अपि वा'नास्ति ङ०। (३) 'गृहोपवेशनीय'ख०।

अन्यस्माद्धोमकालात्स्त्री नाश्नीयाद्यदि वा गृही ।
पर्युक्षणादिकं कृत्वा संस्कृत्याज्यं च पूर्ववत् ॥
अयाश्चेत्येतया हुत्वा यथापूर्वं जुहोत्यथ ॥

सर्वप्रायश्चितं च जुहुयादिति केचित् । तथा—

उपलेपादिकं कुर्यादाधारान्तं विवाहवत् ।
विवाहाज्याहुतीर्हुत्वा लाजाहोमो भवेदथ ॥
गृहप्रवेशनीयांश्च हुत्वा स्याद्वृद्धयाज्ञनम् ।
परिणीत्यादि नास्त्यत्र लाजानावपते स्वयम् ॥
समानतन्त्रकं वेदं होमद्वयमिदं भवेत् ॥ इति ।

अग्नेर्नाशापहारयोरिदमेव प्रायश्चित्तम्, "यदि तूपसाम्येत्" इति सूत्रेऽस्य नाशापहारयोः प्रदर्शनार्थत्वात् । यत्तु प्रयोगपारिजाते—'एवं रक्षितोऽग्निर्गृहप्रवेशनीयहोमादर्वागेव वाऽनुगमनश्चेत्तदा विवाहहोमः पुनः कार्यः । गृहप्रवेशनीयहोमानन्तरमनुगतश्चेत्तर्हि होमद्वयमपि पुनः कार्यमिति वृत्तिकारेणोक्तत्वात्तद्वत्' इति । तत्र विवाहहोमोत्तरं गृहप्रवेशनीयहोमात्पूर्वं द्वादशरात्रमध्येऽप्यग्नेरनुगमने विवाहहोमावृत्तिः कर्त्तव्येति नार्थः, किन्तु यथा दृष्टान्ते द्वादशरात्रोत्तरमेव विवाहहोमः । तद्वदार्ष्टान्तिकेऽपि द्वादशरात्रोत्तरमेव सः न तु ततः प्रागित्युक्तम् । दानहीरावल्यां तु—

उद्वाहौपासनात्पूर्वमनले शान्तिमागते ।
पुनर्लाजांतरं हुत्वा कर्मशेषं समापयेत् ॥

इति वचनाद्विवाहोत्तरमौपासनारम्भात्प्रागग्निनाशे विवाहहोमावृत्तिः कार्या ।

अथ तत्प्रयोगः—ममौपासनहोमारम्भा(१)त्पूर्वं नष्टस्य विवाहाग्नेः पुनरुत्पत्तिं करिष्ये इति सङ्कल्प्य विवाहहोमं कृत्वा शक्त्या ब्राह्मणान् भोजयेदिति ।

लाजाहोमप्रकारमाह भगवान्—

वधूः स्वाञ्जलिविच्छेदमकुर्वाणा तु (१)चैव तान् ।

(१) 'पूर्वमकृष्टस्य' ङ० । (२) 'चैतान्' ङ० ।

लाजानञ्जलिपार्श्वेन जुहुयादवधानतः ॥ इति ।

कारिकायाम्—

वरः शूर्पगताँल्लाजानवत्तांश्चाभिघारयेत् ।
पठेच्चार्यमणं मन्त्रमथ पत्नी स्थिता सती ॥
कुर्वन्त्यञ्जल्यवच्छेदमङ्गुल्यग्रैर्जुहोति तान् ॥ इति ।

पाणिग्रहणादिसप्तपदीक्रमणादि तु न भवति, वचनाभावात् ; कन्यासंस्कारत्वाच्च । अन्यत्रापि शाकलः—

आचतुर्थ्याद्विवाहाग्निरनुगच्छेत्प्रमादतः ।
स्थण्डिले श्रोत्रियागारादाहृत्याग्निं निधाय च ॥
आज्येन जुहुयात्तत्र स्वयमेव विवाहवत् ॥

इत्युक्तम् ।

तत्सर्वमप्रामाणिकमिति मयूखे । एतेन—

चतुर्थिमध्ये त्वनले विनष्टे सन्धानमग्नौ त्वथ लौकिकाग्नौ ।
औपासनात्पूर्वमथापि नष्टे विवाहहोमं विधिवच्च कुर्यात् ॥ इति ।
अर्वाक्त्रिरात्राज्जुहुयादयाश्च आसप्तरात्रात्तु मनस्वतीं च ।
एकादशाहेऽपि भवोच्चतंतुना द्वादशाहे भवदग्निनाशे ॥

इति च प्रत्युक्तम्, अप्रामाणिकत्वात् । शाकलवचनं तु येषां चतुरात्रमहूयमानोऽग्निर्लौकिको भवति तत्परमिति कश्चित् । एवं "यद्यग्नि अत्र चतुर्थे नश्येत्तदोद्वाहार्य तस्य 'अपहता' इति भस्माभ्युक्ष्य 'यत्ते योनिः' इति क्षिप्रं भस्म समारोप्य 'आजुहान' 'उद्बुध्यस्व' इति द्वाभ्यां समिधमाधाय सम्परिश्रित्य जुहुयात् । आयाश्चाग्ने पञ्चहोता 'ब्राह्मण' एकहोतेति दश स्रुवाहुतीर्महाव्याहृतीः सर्वप्रायश्चित्तानि जुहोति" इति बौधायनोक्तं, तत्सर्वमपि याज्ञुषपरं, बौधायनसूत्रेऽदर्शनादप्रामाणिकं वा । यत्तु औपासनात्पूर्वं यदि विवाहाग्निः शाम्येत्तदा प्रायश्चित्तं विश्वादर्शे—

उद्वाहौपासनात्पूर्वमनले शान्तिमागते ।

स्थालीपाकं ततः कृत्वा औपासनमथाचरेत् ॥
न च नाडीभ्य ऊर्ध्वं चेत्स्थालीपाको भवेन्न वा।
औपासनं तदा कुर्यात्परेद्युः सायमेव च ॥

इति, तदाश्वलायनान्यपरम् । आश्वलायनानां प्रायश्चित्तार्थं स्थालीपाकाभावात्। वस्तुतस्त्वेतदपि निर्मूलमेव। केचित्तु अत्रोपनयने विवाहे वा त्रिरात्रात्पूर्वं तदग्नावुपशान्ते प्रायश्चित्तं देशकालौ संकीर्त्य चतुर्थेऽह्नि अग्निनाशे प्रायश्चित्ताहुतीर्होष्यामीति सङ्कल्प्य आज्यं संस्कृत्य 'अयाश्च'इत्येकामाहुतिं हुत्वा अग्निर्होता अश्विनाध्वर्यू त्वष्टाग्नीत् मित्र उपवक्ता सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाःश्रातास्त इन्द्रसोमाः वातायेहवनश्रुतः स्वाहा, वाचस्पतये ब्रह्मण इदम् । अग्न्यश्विन्त्वष्टृमित्रसोमशुक्रेन्द्रबार्हिभ्य इदमित्यन्ये । अग्नये पञ्चहोत्रमिदमिति विश्वप्रकाशे । यन्म आत्मनो मिन्दाभूत् पुनरग्निश्चक्षुरदात् २ मनो ज्योतिर्जुषतां ३ त्रयस्त्रिंशत्तन्तवो येवितन्विरे ४ भूरग्नये च पृथिव्यै च ५ भुवो वायवे चान्तरिक्षाय च ६ सुवरादित्याय च (१)दिवे च ७ भूर्भुवः सुवश्चन्द्रमसे च ८ सप्त ते अग्ने समिधः ९ प्रजापते न त्वदेतान् १० इति दशाहुतीर्जुहुयादिति वदन्ति तदपि न आश्वलायनानाम्, अन्येतु—

कामान्ते दशहोमः स्यात्सान्विताग्नावथोद्वते ।
अयाश्च पञ्चहोता च यन्मे मिन्दाहुतीद्वयम् ॥
पुनर्मनस्वतीं चैव महाव्याहृतयस्तथा ।
आविवाहाच्च ब्रह्मौदनाच्चोपनयनेतथा ॥ इति ।

(२)कार्यान्ते 'अवस्यते स्तुवते कृष्णियाय' इतिमन्त्रं पठित्वा 'अयाश्च' इत्यादि दशाहुतीर्जुहुयादिति ।

आचतुर्थाद्विवाहाग्निर्नश्येद्ब्रह्मौदनावधि ।
कार्यान्ते दशभिर्मन्त्रैः प्रत्यृचं जुहुयाद् घृतम् ॥

---

(१) 'दिवे च'नास्ति ङ०। (२) 'कार्यान्ते' नास्ति ङ०।

*यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति
उपक्रम्योत्तरस्याह्नः सायं परिचरेदमुम् ॥

यदि रात्रौ*नवनाडीमध्येऽग्न्युत्पत्तिस्तदा तदैव ह मारम्भः, तदुत्तरं चेत्परदिने सायमारम्भ इति सुद नभाष्ये उक्तम् ॥

इति वचनाच्चेति, तदपि नाश्वलायनानामिति दिक् । *या ति । शौनकः—

यस्मिन्नह्नि विवाहः स्यात्सायमारभ्य तस्य तु ।
परिचर्या विवाहाग्नेर्विदधीत स्वयं द्विजः ॥

"पाणिग्रहणादिगृह्यं परिचरेत्" इति सूत्राच्च विवाहहोमो सायं नित्यहोमः कार्यः । पाणिग्रहणादिति कथञ्चन गृहप्रवेश यहोमानामावश्यकार्थम् । तेन नित्यहोमः गृहप्रवेशनीयात्पाग भवतीति । स्वयंपदोपादानादनवकाशेऽपूर्वारम्भः पत्न्यादिना भवति, दम्पत्योर्मध्ये पुंस एव मुख्याधिकारात् । तस्मात्सायंप्रा रपूर्वहोमः स्वयं च वर एवं कुर्यात् । यानि तु—

पत्नी कुमारी पुत्रो वा शिष्यो वाऽपि यथाक्रमम् ।
पूर्वपूर्वस्य चाभावे विदध्यादुत्तरोत्तरः ॥
स्वयं पत्न्यपि वा पुत्रः कुमार्यन्तेवासिनौ वा ।
ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विटपतिः ।
एतैरेव हुतं यच्तु तद्धुतं स्वयमेवहि ॥

इत्यादीनि, तानि द्वितीयादिहोमपराणि । नात्र भद्राव्यतीप तादिनिषेधः, तस्य नित्यत्वात् । *न चेति ।

प्रातर्होमे सङ्गवान्तः काले त्वनुदितेऽथ वा ।
सायमस्तमिते होमः कालस्तु नवनाडिकाः ॥

इति वचनात् । इदं तु बोध्यम् । सायं नित्यहोमकालौ द्वा व यावद्रात्रिमा नापैतीतिमुख्यः, प्रदोषान्तो गौणः । नवनाडिक शब्देनापि कथञ्चित्प्रदोषान्ताभिधानात् । घटीत्रयस्य संध्यात्वात्

अथ देवकोत्थापनम् ।

समे च दिवसे कुर्यादेवकोत्थापनं बुधः ।
(१)षष्ठं च विषमं नेष्टं मुक्त्वा पञ्चमसप्तमौ ॥

एवं प्रातरपि द्वौ-उदितः समवान्तश्च । तत्रोभयत्रापि कथञ्चिन्मुख्यकालाश्रये नित्यहोमस्य नापूर्वप्रारम्भः, गौणकाले तदयोगात् । यथा कृष्णाद्वितीयादौ नक्षत्राधानेऽतीतपौर्णमासस्य न प्रारम्भः । मुख्यकाले पौर्णमास्यामनाहिताग्नित्वेनानधिकारात्तथेहापीति । वस्तुतस्तु पुनराधाने पुनः सन्धाने गौणकाले न होमप्रारम्भः । नच "आधानप्रभृति यजमान एवाग्नयः" इति श्रुतिविरोधः, आधानोत्पन्नानामग्नीनां नाशेऽपि अदृष्टस्य यजमाने सत्त्वात्पुनराधानादिनाश्रमसंपादनमात्रमिति तत्र होमस्याधानपूर्वत्वादिति वाच्यं, तच्छ्रुतेरर्थवादत्वादिति । अधिकमन्यतोऽनुसंधेयम् । यत्तु बौधायनः—

आसायं कर्मणः प्रातराप्रातः सायकर्मणः ।
आहुतिर्नातिपद्येत पार्वणं पार्वणान्तरात् ॥ इति ।

तच्छाखान्तरपरमिति प्रयोगपारिजातः ।

अत्र कुण्डसिद्धिटीका ।

वेदी चतुर्विधा प्रोक्ता चतुरस्रा च पद्मिनी ।
श्रीधरी सर्वतोभद्रा दीक्षासु स्थापनादिषु ॥
चतुरस्रा चतुष्कोणा वेदी सर्वफलप्रदा ।
तडागादिप्रतिष्ठायां पद्मिनी पद्मसन्निभा ॥
राज्ञां स्यात्सर्वतोभद्रा चतुर्भद्राऽभिषेचने ।
विवाहे श्रीधरी वेदी विंशत्यस्रसमन्विता ।
दर्पणोदरसंकाशा निम्नोन्नतविवर्जिता ॥ इति ।

अन्यत्रापि—

कन्याहस्तैः सप्तभिः पञ्चभिर्वा कार्या वेदी श्रीधरी नित्यमेव ।

(१) 'षष्ठे च विषमे' क० ।

तत्र सप्तहस्ता त्रिविधा-एकाशीतिकोष्ठा,षष्टिकोष्ठा,एकचत्वारिंशत्कोष्ठा च ।

तत्र प्रथमा यथा-संलग्नकोष्ठत्रया प्रथमा पङ्क्तिः, तदधः उभयतोनिःसृतकोष्ठाभ्यां युक्ता संलग्नकोष्ठपञ्चका द्वितीया । तदधः उभयतोनिःसृतकोष्ठा संलग्नकोष्ठसप्तका तृतीया । तदधः उभयतोनिःसृतकोष्ठाभ्यां संलग्नकोष्ठनवका चतुर्थी । तदधः उभयतोनिःसृतकोष्ठाभ्यां संलग्नैकादशकोष्ठका पञ्चमी । तथैव षष्ठी, सप्तमी चेति । तदधोन्तर्गतकोष्ठनवकाऽष्टमी । तदधोन्तर्गतकोष्ठसप्तका नवमी । तदधोन्तर्गतकोष्ठपञ्चका दशमी । तदधोन्तःकोष्ठत्रया एकादशीति एकाशीतिकोष्ठानि । तत्र फलं कोष्ठेषु सर्वेषु भुजः कोटिश्च सम एव । तत्र भुजोऽष्टादशाङ्गुलानि पञ्च यवाः तिस्रो यूकाः १८-५-३, तावती कोटिः १८-५-३ इति । तयोर्घातः ३४८-३-४ कोष्ठै ८१ रेकाशीतिभिर्घातः । तथाच फलं २२४ अष्टाविंशतिसहस्रशतद्वयचतुर्विंशत्यङ्गुलानि ।

द्वितीया यथा द्विकोष्ठा प्रथमा पङ्क्तिः तदधः उभयतोनिःसृतकोष्ठाभ्यां चतुः कोष्ठा तदधस्तादृशी षट्कोष्ठा तदधस्तादृशी अष्टकोष्ठा तदधस्तादृशी दशकोष्ठा (१)तदधो दशकोष्ठा तदधः अन्तरष्टकोष्ठा (२)तदधोऽन्तः षट्कोष्ठा तदधोन्तश्चतुःकोष्ठा । तदधान्तो द्विकोष्ठेति । तत्र भुजः एकविंशत्यङ्गुलानि, त्रयो यवाः, षट् यूकाः २१-३-६ कोटिः २१ । ३ । ६ भुजः अटिघातः. तत्फलं ४७० । ३ । ६ षष्टि कोष्ठघातः फलं २८२२४ तदेव ।

तृतीया यथा-एककोष्ठा, तदधः उभयतो निःसृतकोष्ठाभ्यां त्रिकोष्ठा, तदधस्तादृशी पञ्चकोष्ठा तदधस्तादृशी सप्तकोष्ठा, तदधस्तादृशी नवकोष्ठा, तदधः उभयतोन्तः सप्तकोष्ठा, तदधः प-

(१) 'तदधो दशकोष्ठा' नास्ति ख० ।
(२) 'तदधः षट् कोष्ठा, तदधश्चतुः कोष्ठा तदधोद्वि' ख० ।

निर्णयदीपे गार्ग्यः—

*नान्दीश्राद्धे कृते पश्चा*द्यावन्मातृविसर्जनम् ।
दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च ॥

ष्ठकोष्ठा, तदधस्त्रिकोष्ठा, तदध एककोष्ठेति एकचत्वारिंशत्कोष्ठेति । तत्र भुजः २६ । १ । ३ । कोटिः २६ । १ । ३ । भुजकोटिघातः ६८८ । १ । ७ । कोष्ठ४१घातः फलं तदेव २८२२४ ।

पञ्चभिर्हस्तैर्यथा—तत्र क्षेत्रफलं १४४०० । भुजः १५ । ४ । कोटिः १५ । ४ । तदुभयघातः फलं २५ । ३ । ३२ । षष्टिभिर्गुणने फलं १४४०० चतुःशताधिकचतुर्दशसहस्रीति दिक् । तद्वहिस्सोपानं कार्यम् ।

अथ विवाहोपनयनयोः स्वस्तिवाचनपीठं यथा—

श्रीमत्स्वस्तिकमादितो भुवि शुभं कुर्यात्सितैस्तण्डुलै-
र्द्वात्रिंशत्परितोऽङ्कुलानि सततं तावच्च कोष्ठैर्युतम् ।
प्राक् पञ्चोत्तरतस्तु पञ्च वितता मध्ये तु रेखाद्वयं
कोणेष्वायतनेषु वाऽप्युभयतस्तिर्यक् तथैकैकिका ॥
एवं यच्चतुरस्रकं विरचयेत्कुक्ष्योः पदाकारवत् ।
प्राच्यां स्याद्गजशुण्डवत्कलशवत्कुर्यात्प्रतीच्यां तथा ॥
मध्ये स्थाप्य च तण्डुलोपरि शुभौ कुम्भौ लसत्पल्लवौ
पूर्णौ रत्नजलैस्ततो ह्युपविशेद्द्वासने प्राङ्मुखः ॥ इति ।

नान्दीश्राद्धानन्तरं मण्डपोद्वासनावधि केषाञ्चिन्निषेधमाह—

*नान्दीश्राद्धे इति । स्वधाकारः पितृयज्ञः । न च नित्यश्राद्धनिषेधेनैव तन्निषेधः सिध्यतीति वाच्यम्,

श्राद्धं च पितृयज्ञः स्यात्पिण्डो बलिरथापिवा ॥

इति पितृबलिवैकल्पिकपितृयज्ञनिषेधासिद्धेः । तेन तत्सहचरितवैश्वदेवस्यापि निषेधः । नियतमण्डपकमहादानादिव्यावृत्तये—*यावन्मातृविसर्जनमिति । तत्र मातृविसर्जनस्य मण्डपोद्वा-

अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च ।
ब्रह्मयज्ञं चाध्ययनं नदीसीमातिलङ्घनम् ॥
(१)उपवासं व्रतं चैव श्राद्धभोजनमेव च ।
नैव कुर्युः सपिण्डाश्च मण्डपोद्वासनावधि ॥

बृहस्पतिः—

तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे ।
नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति ॥

योगियाज्ञवल्क्यः—

न स्नायादुत्सवेऽतीते मङ्गलं विनिवर्त्य च ।
अनुव्रज्य सुहृद्बन्धूनर्चयित्वेष्टदेवताम् ॥

ज्योतिषे—

स्नानं सचैलं तिलमिश्रकर्म प्रेतानुयानं*कलशप्रदानम् ।
अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मङ्गलतोऽब्दमेकम् ॥
मासषट्कं विवाहादौ (२)व्रतप्रारम्भणेऽपि च ।
जीर्णभाण्डादि न त्याज्यं गृहसम्मार्जनं तथा ॥
ऊर्ध्वं विवाहात्पुत्रस्य तथा च व्रतबन्धनात् ।
आत्मनो मुण्डनं नैव वर्षं वर्षार्धमेव च ॥
अभ्यङ्गे सूतके चैव विवाहे पुत्रजन्मनि ।
माङ्गल्येषु च सर्वेषु न धार्यं गोपिचन्दनम् ॥

ज्योतिर्निबन्धे—

उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका

सनावधिकत्वं विशेषणम् । तादृशं च तद्विवाहोपनयनयोरेव नान्यत्र । न चेदं महादानादौ मातृविसर्जनावलम्बं विधातुं समर्थं, तथाविधप्रत्ययाभावात् । विवाहोपनयनयोरेव मातृविसर्जनमण्डपोद्वासनयोः क्रमस्य सिद्धेः । *कलशप्रदानं श्राद्धीयमृदकुम्भा-

---

(१) 'उपवासव्रतं' क० । (२) 'व्रतप्रारम्भणे न' ख० क० ।

हन्यात्तज्जननीं क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकम् ।
पौषे च श्वशुरं पतिं च मलिने चैत्रे सपित्रालये
तिष्ठन्ती पितरं निहन्ति न भयं तेषामभावे भवेत् ॥

निबन्धे—

विवाहात्प्रथमे पौषे आषाढे चाधिमासके ।
न सा भर्तुर्गृहे तिष्ठेच्चैत्रे पितृगृहे तथा ॥

हेमाद्रौ स्मृत्यन्तरे—

*विवाहव्रतचूडासु वर्षमर्धं तदर्धकम् ।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ॥
(१)(तथा अर्धं पूर्ववत् ।
सपिण्डा नैव कुर्वीरन्नद्भिः स्नानमृतुत्रये ।
तीर्थे संवत्सरे प्रेते पितृयज्ञे महालये ॥
कृतोद्वाहोपि कुर्वीत पिण्डनिर्वपणं सदा ॥)

अथ वधूप्रवेशः । जयतुङ्गे—

मार्गशीर्षे तथा माघे माधवे ज्येष्ठसंज्ञके ।
सुप्रशस्ते भवेद्वेश्मप्रवेशो नवयोषिताम् ॥

नारदः—

आरभ्योद्वाहदिवसात्षष्ठे वाऽप्यष्टमे दिने ।
वधूप्रवेशः संपत्त्यै दशमेऽथ समे दिने ॥

सङ्ग्रहे—

विवाहमारभ्य वधूप्रवेशो

दि । एतद्वचनबलादेवोदकुम्भश्राद्धान्यपकृष्याचरन्ति । *विवाहेति ।

उपरागे पितुःश्राद्धे पातेऽमायां च सङ्क्रमे ।
निषेधेऽपि हि सर्वत्र तिलैस्तर्पणमाचरेत् ॥

इति अपवादवाक्ये पितृपदं मात्रादेः पातपदं च वैधृतेरुपलक्षणम् ।

(१) कंसान्तर्गतं नास्ति क० ।

युग्मे तिथौ षोडशवासरान्तात् ।
ऊर्ध्वं ततोऽब्दे युजि पञ्चमान्ता-
दतः परस्तान्नियमो न चास्ति ॥

नारदः-

समे वर्षे समे (१)मासि यदि नारी गृहं व्रजेत् ।
आयुष्यं हरते भर्तुः सा नारी मरणं व्रजेत् ॥

प्रयोगरत्ने तु-

वधूप्रवेशः प्रथमे तृतीये शुभप्रदः पञ्चमकेऽथ वाह्नि ।
द्वितीयके वाथ चतुर्थके वा षष्ठे वियोगामयदुःखदः स्यात् ॥

इत्युक्तं, तत्र मूलं चिन्त्यम् । वृद्धवसिष्ठोपि-

षष्ठाष्टमे वा दशमे दिने वा विवाहमारभ्य वधूप्रवेशः।
पञ्चाङ्गसंशुद्धदिनं विनापि विधावसद्गोचरगेऽपि कार्यः ॥

लल्लः—

*स्वभवनपुरप्रवेशे देशानां विप्लवे तथोद्वाहे ।
नववध्वा गृहगमने प्रतिशुक्रविचारणा नास्ति ॥

तीर्थे तिथिविशेषे च गयायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्यात्तिलैस्तर्पणमेव च ॥

इत्यपवादान्तरमपि द्रष्टव्यम् । *स्वभवनेति ।

पित्र्ये गृहे चेत्कुचपुष्पसम्भव-
स्तदा न दोषः प्रतिशुक्रसम्भवः ।
यावच्चन्द्रः पूषभात्कृत्तिकाद्ये
तावच्छुक्रोऽन्धो न दुष्टोऽग्रदृक्ष ॥ इति ।

शुक्रदोषशान्त्यै कुर्याच्छान्तिं वसिष्ठोक्तां दद्याद्वै सितमश्वं सितातपत्रं सुवर्णं च । शान्तिस्तु भृगुवारे भृगूदये उपोष्य शुद्धरजतनिर्मितां कांस्यपात्रस्थतण्डुलोपरिस्थां शुक्रप्रतिमां सम्पूज्य

---

(१) 'मासे' क० ।

माण्डव्यः-

नित्ययाने गृहे जीर्णे प्राशनान्तेषु सप्तसु।
वधूप्रवेशे माङ्गल्ये न मौढ्यं गुरुशुक्रयोः॥

ज्योतिः प्रकाशे-

वामे शुक्रे नवोढायाः सुखं हानिश्च दक्षिणे।
धनं धान्यं च पृष्ठस्थे सर्वनाशः पुरः स्थिते॥
नवोढायास्तु वैधव्यं यदुक्तं संमुखे भृगौ।
तदेव विबुधैर्ज्ञेयं केवलं तु विरागमे॥
पूर्वतोऽभ्युदिते शुक्रे (१)प्रयायाद्दक्षिणापरे।
पश्चादभ्युदिते चैव यायात्पूर्वोत्तरे दिशौ॥

व्यवहारतत्त्वे—

पौष्णात्करात्र श्रवणाच्च युग्मे
हस्तत्रये मूलमघोत्तरासु।
पुष्ये च मैत्रे च वधूप्रवेशो
रिक्तेतरे व्यर्ककुजे च शस्तः॥

सेश्वतवस्त्रां विप्राय दद्यात्। 'शुक्रं ते अन्यत्'इत्यृचमष्टोत्तरशतं जपेत्। अथवाश्विनीनक्षत्रे यात्रामुहूर्त्तं दृष्ट्वा गच्छेत्।

स्वामिनीनीयमानायाः प्रतिशुक्रो न विद्यते।
प्रतिशुक्रकृतो दोषो नूतने गमने नृणाम्॥
राज्ञां विजययात्रायां नान्यदा दोषमावहेत्।
यात्रोक्ते ऋक्षलग्नादौ राहौ दक्षिणपृष्ठगे।
विवाहोक्तादिने मासे यायात्पतिनिकेतनम्॥
राहुः पूर्वादिकाष्ठासु मासैर्मार्गादिभिस्त्रिभिः।
यात्ययं दक्षिणादृश्या नेष्टः सम्मुखवामतः॥
कश्यपेषु वसिष्ठेषु भृग्वत्र्यङ्गिरसेषु वा।
भारद्वाजेषु वत्सेषु प्रतिशुक्रो न विद्यते॥

---

(१) 'प्रयायाद्दक्षिणे परे' क०।

गर्गः—

व्यतीपाते च संक्रान्तौ ग्रहणे वैधृतावपि ।
श्राद्धं विना शुभं नैव प्राप्तकालेऽपि मानवः ॥

तथा—

अमासङ्क्रान्तिविष्ट्यादौ प्राप्तकालेऽपि नाचरेत् । इति ।

अथ द्विरागमनम् । ऋक्षोच्चये—

माघफाल्गुनवैशाखे शुक्लपक्षे शुभे दिने ।
गुर्वादित्यविशुद्धौ स्यान्नित्यं पत्नीद्विरागमः ॥

बादरायणः—

नीहारांशुदिनोत्तरादितिगुरुब्रह्मानुराधाश्विनी-
शुक्रे भास्करवायुविष्णुवरुणत्वाष्ट्रे प्रशस्ते तिथौ ।
कुम्भाजालिगते रवौ शुभकरे प्राप्तोदये भार्गवे
(१)जीवज्ञास्फुजितां दिने नववधूवेश्मप्रवेशः शुभः ॥

अथ *पुनर्विवाहः । श्रीधरीये—

पुनर्विवाहं वक्ष्यामि दम्पत्योः शुभवृद्धिदम् ।
लग्नेन्दुलग्नयोर्दोषे ग्रहतारादिसम्भवे ॥
अन्येष्वशुभकालेषु (२)दुष्टरोगादिसम्भवे ।

इति गुरुचरणाः । चतुर्थदिवसे हस्तिपूजामाह यज्ञपार्श्वः—

चतुर्थे दिवसे रात्रौ लिखेन्मानःसरोवरम् ।
हिरण्यगर्भं तन्मध्ये गन्धपुष्पाक्षतादिभिः ॥
सम्पूज्याप्सरसश्चैव सोमगन्धर्वपावकान् ।
सम्पूज्य चाश्वहस्त्यादीनारोप्य स्वगृहं प्रति ॥
प्रवेशनादिकं कर्म अन्यथा तु भवेदृणम् ॥ इति ।

*पुनरिति । विवाहे कृते पश्चाद्गशुद्धिरादित्ये ज्ञाते

---

(१) 'जीवज्ञां' क० ।
(२) 'दुष्टयोगादि' क० ।

विवाहे चापि दम्पत्योराशौचादिसमुद्भवे ॥
तस्य दोषस्य शान्त्यर्थं पुनर्वैवाह्यमिष्यते ॥

याज्ञवल्क्यः—

*सुरापी व्याधिता धूर्ता वन्ध्यार्थघ्न्यप्रियंवदा।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥

मनुः—

वन्ध्याष्टमेऽधिवेत्तव्या दशमे तु मृतप्रजा।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥

सङ्ग्रहे तु—

अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत्।
मृतप्रजां पञ्चदशे सद्यस्त्वप्रियवादिनीम् ॥

(१)याज्ञवल्क्यः—

एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति।
समर्थस्तोषयित्वार्थैः पूर्वोढामपरां(२)व्रजेत् ॥
*आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम्।
त्यजन्दाप्यस्तृतीयांशमद्रव्यो *भरणं स्त्रियाः ॥

मनुः—

अधिविन्ना तु या नारी निर्गच्छेद्रोषिता गृहात्।
सा सद्यःसन्निरोद्धव्या त्याज्या वा कुलसन्निधौ॥ इति।

तयोरेव वधूवरयोः पुनर्विवाहः कार्य इत्यर्थः। तत्कालः प्रयोगरत्ने ज्योतिषग्रन्थे च ज्ञेयः। द्वितीयविवाहमाह—*सुरापीति। सुरापी शूद्रापि—

पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत्।

इति स्मरणात्। धूर्ता वञ्चिका, विसंवादिनी वा। अधिवेदना भार्यान्तरपरिग्रहः। *आज्ञेति। अधिवेदनकारणाभावेऽप्यधिवेत्तारमधिकृत्य। *भरणम् अन्नवस्त्रादिः।

---

(१) 'याज्ञवल्क्यः' नास्ति क०। (२) 'वहेत्। याज्ञवल्क्यः' क०।

हेमाद्रौ कात्यायनः--

अग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया ।
कारयेत्तद्बहुत्वं चेज्ज्येष्ठया *गर्हिता न चेत् ॥

याज्ञवल्क्यः--

सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् ।
सवर्णासु विभौ धर्म्ये ज्येष्ठया न विनेतरा ॥

द्वितीयविवाहहोमेऽग्निमाह कात्यायनः--

सदारोऽन्यान्पुनर्दारानुद्वहेद्यदि कारणान्तरात् ।
यदीच्छेदग्निमान्कर्तुं क होमोऽस्य विधीयते ॥
*स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचन ॥

त्रिकाण्डमण्डनोपि--

आद्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि ।
तदा वैवाहिकं कर्म कुर्यादावसथेऽग्निमान् ॥

सुदर्शनभाष्ये तु-'द्वितीयविवाहहो(१)मो लौकिक एव न पूर्वोपासने' इत्युक्तम् । इदं चा*सम्भवे ।

*तत्र चाग्निद्वयसंसर्गः कार्यः । तदा(२)ह शौनकः--

अथाग्न्योर्गृह्ययोर्योगं सपत्नीभेदजातयोः ।
सहाधिकारसिद्ध्यर्थमहं वक्ष्यामि शौनकः ॥

---

*गर्हिता पातित्यादिमती । *स्वेऽग्नावेवेति । अस्मिन्पक्षे पुनर्गृहप्रवेशनीयहोमो न भवति, तस्य गृह्यत्वसिद्ध्यर्थत्वात्तस्य च सिद्धत्वात् । इदं च तत्राग्निसत्त्वे । *असम्भवे इति । औपासनासम्भवे इत्यर्थः । *तत्र चेति । देशान्तरेऽन्यसन्निधौ वा लौकिके विवाहहोमं गृहप्रवेशहोमं च कुर्यात् । तत्र च कालान्तरेऽग्निद्वयसंसर्गः कार्य इत्यर्थः । अग्निद्वयसंसर्गपर्यन्तं नित्यहोमद्वयं दर्शपूर्णमासस्थालीपाकद्वयं च कार्य-

(१) 'होम' नास्ति क० ।
(२) 'तत्त्वाह' क० ।

अरोगामुद्वहेत्कन्यां धर्मलोपभयात्स्वयम् ।
कृते तत्र विवाहे च व्रतान्ते तु परेऽहनि ॥
पृथक्स्थण्डिलयोरग्निं समाधाय यथाविधि ।
(१)तन्त्रं कृत्वाज्यभागान्तमन्वाधानादिकं ततः ॥
जुहुयात्पूर्वपत्न्यग्नौ तयान्वारब्ध आहुतीः ।
अग्निमीळे पुरोहितं सूक्तेन नवर्चेन तु ॥
समिध्येनं समारोप्य अयं ते योनिरित्यृचा ।
प्रत्यवरोहेत्यनया कनिष्ठाग्नौ निधाय तम् ॥
आज्यभागान्ततन्त्रादि कृत्वारभ्य तदादितः ।
समन्वारब्ध एताभ्यां पत्नीभ्यां जुहुयाद् घृतम् ॥
चतुर्गृहीतमेताभिर्ऋग्भिः षड्भिर्यथाक्रमम् ।
अग्नावग्निश्चरतीत्यग्निनाग्निः समिध्यते ॥
अस्तादलिति तिसृभिः पाहिनो अग्न एकया ।
ततः स्विष्टकृदारभ्य होमशेषं समापयेत् ॥
गोयुगं दक्षिणा देया श्रोत्रियायाहिताग्नये ।
पत्न्योरेका यदि मृता दग्ध्वा तेनैव तां पुनः ॥
आदधीतान्यया सार्धमाधानविधिना गृही ॥ इति ।

धायनसूत्रे तु—

"अथ यदि गृहस्थो द्वे भार्ये विन्देत कथं तत्र कुर्यादिति, मन् काले विन्देतोभावग्नी परिचरेदपरा।ग्निमुपसमाधाय स्तीर्याज्यं विलाप्य स्रुचि चतुर्गृहीतं गृहीत्वाऽन्वारब्धा-नुहोति नमस्त ऋषेरादाव्यधायै त्वा स्वधायै त्वा मान ाभिमतस्त्वदद्भ्याऽरिष्टां स एव ब्रह्मन्न वेद सुस्वाहेत्य-यं ते योनिर्ऋत्वियते इति समिधि समारोपयेत् । ग्निमुपसमाधायाजुह्वान उद्बुध्यस्वाग्न इति समिधमा-परिस्तीर्य स्रुचि चतुर्गृहीत्वा द्वयोर्भार्ययोरन्वारब्ध-

१) 'तत्र' ख० ग० ।

योर्यजमानोऽभिमृशति यो ब्रह्मा ब्रह्मण इत्येतेन सूक्तेनैकं चतुर्गृहीतं जुहोत्यग्निमुखात्कृत्वा पक्वाज्जुहोति संमितं संकल्पेथामिति पुरोनुवाक्यामनूच्याग्ने पुरीष्य इति याज्यया जुहोत्यथाज्याहुतीरुपजुहोति पुरीष्यमस्तमित्यन्तादनुवाकस्य स्विष्टकृत्प्रभृति सिद्धमाधेनुवरदानादथाग्रेणाग्निं दर्भस्तम्बे हुतशेषं निदधाति ब्रह्मजज्ञानं पितावित्राजामिति (द्वा(१)भ्यां संसर्गविधिः कार्यः)" । द्वितीयादिविवाहे काल उक्तः संग्रहे—

*प्रमदामृतिवासरादितः पुनरुद्वाहविधिर्वरस्य च ।
विषमे परिवत्सरे शुभो युगले चापि मृतिप्रदो भवेत् ॥

तृतीयवि(२)वाहे निषेधो मात्स्ये--

उद्वहेद्वातिसिध्यर्थं तृतीयां न कदाचन ।
मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम् ॥
नश्यत्येव न सन्देहो गर्गस्य वचनं यथा । इति ।

सङ्ग्रहे—

तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत् ।
चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् ॥

मिति गर्भाधानग्रन्थादौ स्पष्टम् । अग्निद्वयसंसर्गप्रयोगः प्रयोगरत्ने बोध्यः । *प्रमदेति । अन्यत्रास्मावश्यके उक्तम् ।

पत्नीवियोगे प्रथमे च वत्सरे
नो चेद्विवर्षे पुनरुद्वहेत्सः ।
अयुग्ममासे तु शुभप्रदः स्या-
द्वसिष्ठगर्गादिभि(३)रप्यभणि ॥
अपुत्रा चेन्मृता भार्या तस्या भर्त्तुर्विवाहकम् ।
युग्माब्दे युग्ममासे वा विवाहः शुभदो मतः ॥

(१) कंसान्तर्गतं नास्ति क० ।
(२) 'विवाहनिषेधो' क० ।
(३) 'पराशराद्याः' ग० टिप्पण्याम् ।

तद्विधिस्तु-'रविशन्योर्हस्ते वा*वरः संकल्प्य स्वस्तिवाचनं नान्दीश्राद्धं कृत्वाऽऽचार्यं वृत्वा आकृष्णेनेति छायायुतं सूर्यम(१)र्कं संपूज्य गुडौदनं दत्त्वा वस्त्रेण तन्तुभिरावेष्टय—

त्रिलोकवासिन्सप्ताश्व छायया सहितो रवे।
तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॥

इति संप्रार्थ्य जलेन त्रिः सिञ्चेत्।

मम प्रीतिकरा येयं मया सृष्टा पुरातनी।
अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रति रक्षतु॥
नमस्ते मङ्गले देवि नमः सवितुरात्मजे।
त्राहि मां कृपया देवि पत्नीत्वं म इहागता॥
अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च।
वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः॥
तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय॥ इति।

तत आचार्यः 'काश्यपगोत्रामादित्यस्य प्रपौत्रीं सवितुः पौत्रीमर्कस्य पुत्रीमर्ककन्यामसुकगोत्राय वराय दास्ये' इति वाग्दानं कृत्वा वरस्य मधुपर्कं कृत्वाऽन्तःपटं धृत्वा 'स्वस्तिन' इति सूक्तं जप्त्वा पूर्ववत्कन्यां दत्त्वा 'अर्ककन्यामिमां०' इत्यूहेन कन्यादानमन्त्रमुक्त्वा दक्षिणां दद्यात्। ततो गायत्र्या वेष्टितसूत्रेण बृहत्सामेति मन्त्रेण कङ्कणं बद्ध्वाऽर्कस्य चतुर्दिक्षु कुम्भेषु विष्णुं संपूज्याग्निं प्रतिष्ठाप्याघारान्ते सङ्गोभिरिति बृहस्पतये, यस्मै त्वा

सपुत्रायां तु भार्यायां मृतायां ब्राह्मणस्य तु।
प्रथमे न तु कर्त्तव्यो विवाहोऽशुभदो यतः॥

जीवन्त्यां प्रथमायां स्वस्य द्वितीयादिविवाहे नायं कालनियमः। *वर इत्यादि। अनावश्यकतया वरमधुपर्कादि नोक्तम्।

(१) 'सूर्यमर्कं' क०।

ामकामायेत्यृचाऽग्नये व्यस्तसमस्तव्याहृतिभिराज्यं हु
वाचार्याय गोयुगं दत्त्वा—

मया कृतमिदं कर्म स्थावरेषु जरायुणा ।
अर्काऽपत्यानि नो देहि तत्सर्वं क्षन्तुमर्हसि ॥

इति नमेत' इति*दिक् ॥

इति निर्णयसिन्धौ विवाहप्रकरणं समाप्तम् ॥

अथाधानम् । रत्नमालायाम्—

प्राजापत्ये पूषभे सद्विदैवे
पुष्ये ज्येष्ठास्वैन्द्रवे कृत्तिकासु ।
अग्न्याधानं ह्युत्तराणां त्रयेपि
चित्रादित्ये कीर्तितं गर्गमुख्यैः ॥

आश्वलायनः—"अग्न्याधेयं कृत्तिकासु रोहिण्यां
गशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपद-
रेतेषां कस्मिंश्चिद्नक्षत्रे पर्वणि ब्राह्मण आदधीत
ष्मवर्षाशरत्सु क्षत्रियवैश्योपकृष्टा यस्मिन्कस्मिंश्चिद्-
वादधीत सोमेन यक्ष्यमाणो नर्तुं पृच्छेन्न न(१)क्षत्रम्" ।
माधाने ऋत्वाद्यनालोचनमार्तपरम , 'अथो खलु य·
नैर्श्रद्धोपनमेदथादधीत सैवास्यर्द्धिरिति, (सो(२)
ा यक्ष्यमाणो नर्तुं पृच्छेन्न नक्षत्रं) तदेतदार्तस्यातिवे-
वा श्रद्धायुक्तस्य भवति' इति बौधायनोक्तेरिति ।
नरत्ने वृद्धगार्ग्यः—

देगर्धस्तु—

चतुर्थे दिवसेऽतीते पूर्ववत्तां प्रपूज्य च ।
विसृज्य होममग्निं च विधिना मानुषीं पराम् ॥

ादि प्रयोगरत्ने ।

(१) 'कात्यायनसूत्रे श्रीकामादीनामपि वर्षासूक्तम्' इत्यधिक-
तया निर्दिष्टं गटिप्पण्याम् । (२) कंसान्तर्गतं नास्ति क०

पुष्याग्नेयज्युत्तरादित्यपौष्ण-
ज्येष्ठाचित्रार्कद्वित्रिदैवेन्दुभेषु ।
कुर्युर्वह्न्याधानमाद्यं वसन्त-
ग्रीष्मोष्मान्तेष्वेव विप्रादिवर्णाः ।

कालादर्शे—

*अग्निहोत्रं दर्शपूर्णमासावप्युत्तरायणे ।
उपक्रम्य यथाकालमुपासीरन्द्विजातयः ॥
*सोमं च पशुबन्धं च सर्वाश्च विकृतीरपि ।
सौम्यायने यथाकालं विदध्युर्गृहमेधिनः ॥
अत्र विशेषः पूर्वमुक्तः ।

अग्निहोत्रकाल उक्तश्छन्दोगपरिशिष्टे—

उदितेऽनुदिते चैव समयाध्युषिते तथा ।
सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥

(१)तेषां स्वरूपं तत्रैव—

रात्रेस्तु षोडशे भागे अ(२)हनक्षत्रभूषिते ।
(का(३)लं त्वनुदितं ज्ञात्वा होमं कुर्याद्विचक्षणः ॥
तथा प्रभातसमये नष्टे नक्षत्रमण्डले ।)
रविर्यावन्न दृश्येत समयाध्युषितं च तत् ॥
रेखामात्रं प्रदृश्येत रश्मिभिश्च समन्वितः ।
उदितं तद्विजानीयात्तत्र होमं प्रकल्पयेत् ॥

आश्वलायनः—*'उपोदये व्युषिते उदिते वा'। सायं

*अग्निहोत्रमिति । एतेऽग्निहोत्रादय उत्तरायणे एव इति नियमः। एवञ्चाधानेऽप्युत्तरायण एव सिध्यति । मं चेति । पशुर्निरूढपशुभिन्नः, तस्य "पश्विन्या संवत्सरे व" इति कात्यायनेन वर्षासु विधानात् । *उपोदय इति ।

१) 'पषां' क०
२) 'अहनक्षत्रमण्डले' क०
३) कस्यांतर्गतं नास्ति क०

तु स एव 'अस्तमिते होमः' इति। *गौणकालमाह स एव-*'प्रदोषान्तो होमकालः *सङ्गवान्तः प्रातः' इति। छन्दोगपरिशिष्टे—

प्रातर्होमे त्रयः प्रधानकालाः-उपोदये आदित्योदयसमीपे, व्युषिते उषसि, उदिते आदित्यमण्डले कृत्स्ने उदिते। अत्र उपोदये उदिते' इति नोक्तम्। उदिते आदित्ये सत्युदयसमीपे इत्याभ्यां पदाभ्यामेक एव कालो विहित इति भ्रमः स्यादतो मध्ये व्युषित इत्युक्तम्। तत्र रेखामात्रस्तूदितस्य पूर्वावधिः। उत्तरावधिमाह-कात्यायनः—

हस्तादूर्ध्वं रविर्यावद्गिरिं भित्त्वा न गच्छति।
तावद्धोमविधिः पुण्यो नान्योऽस्त्युदयहोमिनाम् ॥ इति।

एवं यावद्रक्तिमा नापैति तावत्सायमिति। तत्रापि मुख्यकालावधिरुक्तो ग्राह्यः। *गौणकालमिति। 'तमतिनीय चतुर्गृहीतमाज्यं जुहुयात्' इति प्रायश्चित्तोक्तेः। *प्रदोषान्त इति। प्रदोषः प्रदोषान्तो यस्येति व्युत्पत्तेः। प्रदोषस्त्रिमुहूर्त्तः,

त्रिमुहूर्त्तं प्रदोषः स्याद्ज्ञानावस्तङ्गते सति।

*सङ्गवान्त इति। सङ्गवः सङ्गवादिरन्ते यस्येति स इति। प्रातरपि त्रिमुहूर्त एव गौणकालः, न तु सङ्गवान्तावधिः,

पश्चादस्तमयात्कालो यो भवेत् त्रिमुहूर्तकः।
स सायं होमकालश्च प्रदोषान्त उदाहृतः ॥
यस्तु षड्नाडिकः कालः पश्चादेवोदयाद्रवेः।
स होमकालो विप्राणां सङ्गवान्त इति स्मृतः ॥

इति वाक्यात्। स्मृत्यर्थसारे तु—

प्रातर्होमे सङ्गवान्तः कालस्त्वनुदिते तथा।
सायमस्तमिते होमकालस्तु नवनाडिकः ॥

इत्युक्तम्। प्रादुष्करणकालमाह कात्यायनः—

सूर्ये तु शैलमप्राप्ते षट्त्रिंशद्भिरिहाङ्गुलैः।
प्रादुष्करणमग्नीनां प्रातर्भासाप्रदर्शने ॥

*यावत्सम्यङ् न भाव्यन्ते नभस्यृक्षाणि सर्वतः।
न च लोहितिमापैति तावत्सायं तु हूयते॥

औपासनेऽप्येवम्* 'तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्याख्यातौ' इत्याश्वलायनोक्तेः॥

आश्वलायनः-'पाणिग्रहणाद्धि गृह्यं परिचरेत् स्वयं पत्न्यपि वा पुत्रः कुमार्यन्तेवासी वा दक्षः'।

ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः।
एतैरेव हुतं यच्च तद्धुतं स्वयमेव तु॥ इति।

एतैश्च यजमानस्य पत्न्या वा तत्सन्निधौ च होतव्यम्। पर्वणि स्वयमेव होमः कार्यो नान्येन। प्रादुष्करणकालातिक्रमे व्याहृतिभिरेकाज्याहुतिः कार्या। अस्तमितावधिमाह-*यावदिति। [*एवमिति।] अग्निहोत्रधर्माणामयमतिदेशो न तु पाकयज्ञस्य, नापि प्राशनादीनाम्, प्रादुष्करणेत्यादिद्वयोरेव नियमात्।

"हौम्यं च मांसवर्ज्यं कामं तु व्रीहियवतिलैः" इति गृह्यम्।

पयोदधियवागूश्च सर्पिरोदनतण्डुलाः।
सोमो मांसं तथा तैलमापस्तानि दशैव तु॥

इति हौम्यानि, तत्र मांसं वर्ज्यम्। कामपदं पयोदध्याद्यलाभे व्रीह्यादिप्राप्त्यर्थम्। 'पयसा नित्यहोमः' इति सूत्रात् तदलाभे च दध्यादि। पर्वणि च पयो नित्यम्। अत्र परिसमूहनपरिस्तरणपर्युक्षणानि कृत्वा होमद्रव्यस्य तूष्णीमग्निहोत्रवत्संस्कारं कुर्यात्। तत्र दधितण्डुलसोमतैलव्रीहियवतिलादेर्नाधिश्रयणम् 'अधिश्रयणं स्मृतिसामर्थ्याभ्याम्' इतिकात्यायनसूत्रात्। अतस्तदर्थं नाङ्गारपृथक्करणम्। तेन तत्र पर्यग्निकरणं प्रोक्षणं च द्वयमेव। सर्पिःपयोयवाग्वोदनादीनां तु श्रपणमितिविशेषः। सङ्ग्रहे—

द्रवं हविः स्रुवेणैव पाणिना कठिनं हविः।
अङ्गुल्यग्रेण होतव्यं न कृत्वाङ्गुलिभेदनम्॥

अधिकमन्यतोऽवगन्तव्यम्।

अथावसथ्याधानम् । पारस्करः-*'आवस
दारकाले, *दायाद्यकाल एकेषाम्' इति । दाया
विभागकालः । मदनरत्ने व्यासः—

अग्निर्वैवाहिको येन न गृहीतः प्रमादिना ।
पितर्युपरते तेन ग्रहीतव्यः प्रयत्नतः ॥
योऽगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते
अन्नं तस्य न भोक्तव्यं वृथापाको हि स(१)

ज्येष्ठभ्रातरि पितरि वा साग्नौ कनिष्ठस्य
वाग्न्यभावेऽपि न दोषः । तदाह तत्रैव गार्ग्यः-

पितृपाकोपजीवी वा भ्रातृपाकोपजीविकः
ज्ञानाध्ययननिष्ठो वा न दुष्यत्याग्निना विन

गृहस्थस्याप्यध्ययनमाह सत्यव्रतः—

अनधीत्य द्विजो वेदं स्नात्वोद्वाह्य यथा तथ
अधीते ब्रह्मचर्येण साङ्गं वेदं गुरोर्गृहे ॥

इदं चा*धानं ज्येष्ठेऽकृताधाने न कार्यम् ।

*आवसथ्याधानं स्मार्त्तविशेषः । *दायाद्यकारं
कर्म स्मार्त्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही ।
दायकालाहृते वापि, श्रौतं वैतानिकाग्निषु ॥

इति विनियोगवचने अपिशब्दात्मेते वा गृह
इत्युक्तम् । तेन स्मार्त्तकालत्रयम् । एतत्कालत्रयातिक्रमे
भवति । *आधानम् श्रौताधानम् । *स्मार्त्तेऽपाति
नाग्निग्रहणेऽपीत्यर्थः। *आधानं गार्हपत्याधानम् । एतदे
संयोगः, अग्निहोत्रं संयुज्यतेऽनेनेतिव्युत्पत्तेः । 'अग्रजे स
तत् पितृपितामहयोरुपलक्षणम् ,

ज्येष्ठो भ्राता यदा तिष्ठेत्पिता वाऽपि पितामहः
कनिष्ठपुत्रपौत्राणामाधानं नैव कारयेत् ॥

(१) 'संस्मृतः' ख०

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः, परिवित्तिस्तु पूर्वजः ॥

इति मनुशातातपोक्तेः । *स्मार्तेऽप्येवम् ।

सोदर्ये तिष्ठति ज्येष्ठे न कुर्यादारसङ्ग्रहम् ।
आवसथ्यं तथा*धानं (१)पतितस्तु तथा भवेत् ॥

इति सौमन्तवात् । अकृताधाने इति शेषः । कनिष्ठादिर्न कुर्यादित्यर्थः; आर्त्विज्यरूपकारणस्य रागप्राप्तत्वात् । एवं सति तदुपादानं तत्कर्तुः प्रायश्चित्तलाभार्थम् । पितृमरणे पितामहे जीवति पौत्रस्याधिकारवारणार्थं पितामहपदम् । एवञ्च यत्र ज्येष्ठभ्रातृपितृपितामहानामन्यतमस्य न विवाहहोमः तत्र कनिष्ठपुत्रपौत्राणां न विवाहहोमः । गृहप्रवेशनीयहोमे तु न दोषः, तस्य गृह्यत्वार्थत्वात् । गृह्यं परिचरेदिति परिचर्यायामेव तदुपयोगः । परिवेत्तेतिसंज्ञा पर्यायातृपारिग्रष्ट्रोः समानप्रायश्चित्तार्था,

परिवेत्ता परिवित्तिर्यया च परिविद्यते ।
सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥

इति दोषस्मरणात् । याजकः विवाहहोमकारकः, आधानकारकः, यज्ञकारकादिश्च,

परीष्टिदोषसम्प्राप्तौ न यष्टव्यं कदाचन ।
दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसङ्ग्रहम् ॥
अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितम् ।
न कुर्याज्जनके ज्येष्ठे सोदरे वाऽप्यकुर्वति ॥

इति त्रिकाण्डमण्डनाभिधानात् । कृतपौर्णमासेष्टेर्भ्रात्रादेः कुतश्चित्प्रतिबन्धेनाकृतदर्शेष्टौ पित्रादौ जीवति पुत्रादेर्न दर्शेष्टिः । एवं कृताधानेऽकृताग्निहोत्रे च तत्र जीवति नाग्निहोत्रमित्युभयोपादानम् । एवमग्निहोत्रं सायंप्रातर्होमात्मकम्, तत्र सायंहोमोत्तरं

---

(१) 'पतितस्त्वन्यथा भवेत्' क० ।

इति तत्रैव गार्ग्योक्तेः। आज्ञायां त्वदोषमाह सुमन्तुः—

ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत्।
*अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा॥

वृद्धवसिष्ठः—

अग्रजस्तु यदाऽनग्निरादध्यादनुजः कथम्।
(१)अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि॥

हारीतः—

सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत्।
दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया॥

*अधिकारिणोऽपि भ्रातुरनुज्ञया कुर्यादिति मदनपारिजातः। विवाहस्त्वनुज्ञयापि नेत्यर्थः। सोदरोक्तेरसोदराणां सापत्नदत्तकादीनां *न दोषः। तदाह हेमाद्रौ वसिष्ठः—

कुतश्चित्प्रतिबन्धेन प्रातर्होमाकरणे न प्रातर्होमः। अन्यथा एककर्मत्वेऽपि दर्शपूर्णमासेष्ट्योरविशेषानुपपत्तिप्रसङ्गात्। एवञ्च विवाहोत्तरं प्रतिबन्धवशादगृहीतविवाहाग्नौ पौर्णमासस्थालीपाकोत्तरमकृतदर्शस्थालीपाकके विवाहहोमोत्तरमकृतौपासनहोमे सायमौपासनहोमोत्तरमकृतप्रातरौपासनकहोमके च न विवाहहोमदर्शस्थालीपाकौपासनहोमप्रातरौपासनहोमाः,

य आहिताग्नेर्धर्मः स्यात्स औपासनिकस्य तु।

इति वचनात्। गृहप्रवेशनीयहोमादौ तु न ज्येष्ठकरणापेक्षेत्युक्तं 'प्रयोगे प्रथमे स्थितम्' इत्युक्तेः। पुनराधानादौ सर्वत्रापि पित्रादेरकृतपुनराधानादित्वेऽपि पुत्रादेर्न दोषः। आधानपदं विवाहोपलक्षणम्। *अनुज्ञातस्त्विति। अग्रजादेरधिकारासत्त्वे तदनुज्ञापेक्षावैयर्थ्यमालोच्याह—*अधिकारिणोऽपीति। आधानमिति शेषः। यत्र पित्रादिर्नास्तिकः अतः पुत्रादिनाऽऽधानं कृतं, पश्चादास्तिक्येन प्रायश्चित्तादि च, तत्रापि न दोष इत्येतल्लाभार्थमधिकारिण इत्युक्तम्। भार्यारहितादिर्नास्तिकश्चानधिकारी। *न दोष इति। यद्यविवाहितेन दत्तकेन औरसेन वा कथञ्चिद्दत्त-

---

(१) 'अग्रजानुमतं' ख०।

पितृव्यपुत्रान्सापत्नान्परनारीसुतांस्तथा।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने॥

परनारीसुताः दत्तकादयः। देशान्तरे विशेषमाह स एव–'*अष्टौ दश द्वादश वर्षाणि (१)वा ज्येष्ठभ्रातरमनिविष्टमप्रतीक्षमाणः *प्रायश्चित्ती भवति' इति।

क्लीबादावप्यदोषमाह कात्यायनः—

देशान्तरस्थक्लीबैकवृषणानसहोदरान्।
वेश्यानिष्ठांश्च पतितशूद्रतुल्यातिरोगिणः॥
जडमूकान्धबधिरकुब्जवा(२)मन*खञ्जकान्।
अतिवृद्धान*भार्यांश्च कृषिसक्तान्नृपस्य च॥
धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा।
कुटिलोन्मत्तचोरांश्च परिविन्दन्न दुष्यति॥

आशार्केऽपि—

उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव वा।
राजयक्ष्मामयावी च न न्याय्यः स्यात्प्रतीक्षितुम्॥

को गृहीतः तदा तस्य तज्जीवनावधि विवाहादौ नाधिकारः, एवं क्रमेण दत्तकत्रयस्थले मध्यमे मृतेऽपि दत्तके पितामहेऽनिविष्टे जीवति पौत्रस्यापीति पितुरपेक्षा। *अष्टाविति। धर्मार्थमर्थार्थं च द्वादशवर्षप्रतीक्षा। कार्यान्तरार्थं तु अष्ट वा दश वा।

द्वादशैव तु वर्षाणि न्यायाद्धर्मार्थयोगतः।
न्याय्यः प्रतीक्षितुं भ्राता श्रूयमाणः पुनः पुनः॥

इति स्मृतेः। *प्रायश्चित्तीति। इदं तु बोध्यम्। कनिष्ठेन विवाहे आधानादौ वा कृते प्रायश्चित्तानन्तरं ज्येष्ठस्य विवाहे आधानादौ वा न दोष इति। *षण्डकानिति। (३)खञ्ज-

---

(१) 'वा' नास्ति क०।
(२) 'कुब्जवामनसंज्ञकान्' क०।
(३) 'खोडकान्' ङ०।

एवं ज्येष्ठे *छिन्नहस्तादावपि न परिवेत्तृत्वम् । तदाह त्रिकाण्डमण्डनः—

दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहम् ।
अग्निहोत्रं विवाहं च *प्रयोगे प्रथमे स्थितम् ॥
न कुर्याज्जनके ज्येष्ठे *सोदरे चाप्यकुर्वति ।
*क्षेत्रजादा*वनीजाने विद्यमानेऽपि सोदरे ॥
नाधिकारविघातोऽस्ति भिन्नोदर्येऽपि चौरसे ।
षड्ग्वन्धमूकबधिरपतितोन्माददूषणे ॥

कानिति वा पाठः । *अभार्यान् नैष्ठिकब्रह्मचारिणः । *छिन्नहस्तादाविति । नन्वत्र कुतो नाधिकार इति चेत् ? आधानं हि नैमित्तिकं, तत्र 'आरोहतं दशनं शक्करीरनु' इति मन्त्रे दशाङ्गुलिभिररणिग्रहणमुक्तं तद्धाधमसङ्गात् । आदिना चतुरङ्गुलादिग्रहः । षडङ्गुलस्य त्वधिकारः, एकादशान्तर्दशसम्भवन्यायात् । एको हस्तः षडङ्गुलः, अपरस्तु चतुरङ्गुलः, तस्यापि नाधिकारः । यदङ्गुलित्वं, तस्या वस्तुत एकत्वादशत्वापूरणात् । एवमाधानानन्तरं हस्तादिच्छेदेऽग्निमेष्वधिकारः, नित्यत्वात् । एवं काणविकर्णादेरप्यधिकारः, हिरण्यकेशिना कर्माशक्तिहेतोरेवाङ्गवैकल्यस्य निषेधात्, "याज्यस्य प्रथमैस्त्रिभिः" इति ऊनाङ्गस्याप्यधिकारोक्तेः । *प्रयोगे प्रथमे स्थितमिति । तेन द्वितीयदर्शेष्ट्यादौ द्वितीयविवाहान्ते सर्वत्रापि अकृतपुनराधानादिके पित्रादौ जीवति पुत्रादेर्न दोषः । *सोदरे चेति । चकारात् पितामहग्रहः । *क्षेत्रजादाविति । अत्रौरसत्वस्य नान्वयो बाधात् । *अनीजाने यागमकुर्वति । क्षेत्रजादौ ज्येष्ठेऽनीजाने विद्यमाने जीवति एकमातृकतया सोदरे तत्कनिष्ठभ्रातरि नाधिकारविघातोऽस्तीत्येकोऽन्वयः, तेषां पितृत एवासोदरत्वात् । एवं भिन्नोदर्ये मातृतोऽप्यसोदरे दत्तकादौ ज्येष्ठेऽनीजाने विद्यमाने तत्कनिष्ठभ्रातरि औरसे नाधिकारविघातोऽस्तीति अपरः । तथाच तयोर्दर्शेष्ट्यादिविवाहा-

संन्यस्ते छिन्नहस्तादौ यद्वा षण्ढादिदूषणे।
जनके सोदरे ज्येष्ठे कुर्यादेवेतरः क्रियाम्॥ इति,
'आरोहतं दशतं शकरीमम' इत्याधाने मन्त्रवर्णाच्च।

न्तेषु सर्वेष्वपि न दोष इत्यर्थः। यत्तु—

भिन्नोदरे दत्तके च पितृव्यतनयेऽग्रजे।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने॥

इति प्रयोगपारिजाते गौतमवाक्यम्, तस्य दत्तकेऽग्रजे प्रतिग्रहीतुरौरसस्य न परिवेत्तृत्वामित्यर्थः। तत्रैव ज्येष्ठे सोदरेऽकृतविवाहाधाने तदनुजस्य दत्तकस्य विवाहाधानयोः परिवेत्तृत्वमेव। नन्विदं कथं, दानेन परपुत्रतां प्राप्तौ हि दातुः पुत्रत्वप्रयुक्तकार्यव्यावृत्तौ तत्पुत्राणामपि भ्रातृत्वप्रयुक्तविधिनिषेधयोरविषयत्वादिति चेत्? न,

"सोदर्ये तिष्ठति ज्येष्ठे न कुर्यादारसङ्ग्रहम्।
आवसथ्यं तथाधानम्" इति निषेधात्॥

नचेदं दत्तकातिरिक्तपरम्, दर्शितत्रिकाण्डमण्डनादिति वाच्यम्, सोदरो हि त्रिविधः—एकमातृपितृभयजः, एकमातृमात्रजश्च, एकपितृमात्रजश्चेति। तत्र आद्य औरसः, द्वितीयः क्षेत्रजः, तृतीयो भिन्नोदर्यः। तत्रान्त्ययोः त्रिकाण्डमण्डनेनाधिकारविघात उक्तः। 'क्षेत्रजादौ' इति 'भिन्नोदर्ये' इति चोक्तः। न तु प्रथमे, 'सोदर्ये तिष्ठति ज्येष्ठे' इति वचने हि समानमुदरं यस्येति सोदरः, स एव सोदर्य इति व्युत्पत्तेरभिन्नोदरोत्पन्नत्वलाभात्। उदरं च मातापित्रोः, मातापित्रुभयमेव वा। एवञ्च तादृशो निषेधस्य विषयः। अन्यादृशो मण्डनकारिकाविषयः। तथाच यथा दत्तककनिष्ठस्य दत्तकविवाहाधाने विना न तत्राधिकारः, एवं दत्तकस्य कनिष्ठस्य सोदरज्येष्ठेऽकृतविवाहाधाने न तत्राधिकार इति भावः। यत्तु महाभारतादावनिविष्टे युधिष्ठिरेऽर्जुनस्य द्रौपदीविवाहविलम्बनम्, तदर्जुनस्यानौरसत्वात्। सजातीयेष्वेव लाघवेन निषेधप्रवृत्तेः।

शकरीरङ्गुलीः । तन्त्ररत्नेप्युक्तम्–'अङ्गवैकल्यहिताग्नित्वेऽधिक्रियेतैव नित्येषु । आधानं तु न नैमित्तिकत्वात्' इति । एवं चतुरङ्गुलेपि (१)उकारात्कनिष्ठस्य न दोषः षडङ्गुलकाणविकर्णावाधिकार इति (२)कनिष्ठस्य दोष एव, एकादशन्तर्गतेः । 'शरीरकार्श्यं वा विप्रतिषिद्धम्' इति केशिसूत्रे कर्माशक्तिहेतोरेवाङ्गवैकल्यस्य निषेध एव कात्यायनसूत्रे 'याज्यश्च प्रथमैस्त्रिभिर्गुणैः' नाङ्गस्याप्यधिकार उक्तः । अपरार्के उशनाः–

पिता *पितामहो यस्य अग्रजो वाथ कश्च
तपोऽग्निहोत्रमन्त्रेषु *न दोषः परिवेदने ॥

*पितामह इति । तपः वानप्रस्थतासंन्यासौ आश्रमपक्षान्तरे वानप्रस्थतैव । अग्निहोत्रं तदुपकारकमाधानं विवाहश्च । मन्त्रः वेदाध्ययनम्, तदुपकारकमुपनयनञ्च, एतदादनग्निमानिति त्रितयोपलक्षणम् । *न दोष इति । एवम्, अकारणदोषाभावकथनविरोधात्सुमन्तुवाक्यैकवाक्यतथाच पित्रादिकेऽनग्निमत्यवानप्रस्थेऽनुपनीते वा जीवति त्रिकस्याधाने वानप्रस्थतायामुपनयने वाऽनुज्ञायां न दोषः तत्र वानप्रस्थता कलिवर्ज्यैव । पितृपितामहयोरनुपनयने तन्मादिना तयोरुपनयनोत्तरं पुत्रादेरुपनयनं तद्योग्यताः कृत्वा कार्यम् । उपनयने वानुज्ञायाः कथमपि न सम्बन्धान्तरे विवाहाधानयोरेव तत्सम्बन्धदर्शनात्तदेकवाक्यकृते तयोरेव तल्लाभात् । यथा–अग्रजेऽनुपनीते कनिष्ठस्य नं, तथा ज्येष्ठायां भगिन्यामनूढायां कनिष्ठस्य नोपनयनं क अनुद्वाहवत्, अन्यथाऽनौचित्यापत्तेः, विवाहस्यापि मन्त्रसा

(१) 'ज्येष्ठेऽनधिकारात्कनिष्ठस्य न दोषः' नास्ति ख० ग०
(२) 'इति कनिष्ठस्य दोष एव' नास्ति ख० ग० ।

पेतुराज्ञायामप्यदोषमाह मदनरत्ने सुमन्तुः—

पित्रा यस्य तु नाधानं कथं पुत्रस्तु कारयेत्।
अग्निहोत्रेऽधिकारोऽस्ति शङ्खस्य वचनं यथा॥ इति।

ाधानं नाधानं कृतमित्यर्थः। एतदाज्ञायामेवेति हेमा-
ः। यत्तु—

*पितुः सत्यप्यनुज्ञाने नादधीत कदाचन। इति,
ा*त्सत्यधिकारे ज्ञेयम्॥

वैवाहिको विधिः स्त्रीणामौपनायनिकः परः।

ति वाक्याच्चेति। अनुज्ञायामाधाने विशेषमाह पितुरित्यादिना।
पेतुरिति।

ज्येष्ठे श्रद्धाविहीने सत्याधानं तदनुज्ञया।

ते पूर्वार्द्धम्। *सत्यधिकारे इति। पितुरधिकारे सत्यनु-
ऽपि नाधिकारः, किन्त्वनधिकार एवेत्यर्थः। अत्राहुः—पित्रादि
, अधिकारी अनधिकारी चेति। तत्र निषेधोऽविशेषात्स-
विषयः। प्रतिप्रसवस्तु अधिकारिणि पित्रादौ विशेषतो ना-
व। अनधिकारिण्यपि कादाचित्कनास्तिकत्वकादाचित्कान्ध-
दिके तत्र पुनःकरणसम्भावनायां पुत्रादेरनधिकार एव, अ-
धिनोपपत्तौ बहुबाधस्यान्याय्यत्वात्। जात्यन्धपतितादौ तु पि-
वनधिकारिण्यपि तदाज्ञयैवाधानादावधिकारः। न्यायवचन-
ानधिकारोपजीवनेन तन्मनोनुकूलमात्रार्थतयाऽऽज्ञावाक्य-
तिलाघवात्। अतिनास्तिकादौ तु पित्रादौ अत्यन्तनास्तिक्या-
ा पुनः करणसम्भावनानिवृत्तावप्यग्रजाद्यनुमत्यैवाधिकारः।
त्वनुमत्यापि न, निषेधबाधकाज्ञावाक्यबाधकतया निषेधप्र-
सवार्थत्वे लाघवात्। अत एव श्रद्धया विशेषेण हीने इत्यु-
। अत एव—

दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया।

इति हारीतमपि एतद्विषयमेव। अथवाऽनुमत्या कनिष्ठे क्र-

ताधानादौ पश्चान्नास्तिक्यान्निवृत्ते प्रायश्चित्तादिपूर्वकमाधानादौ प्रवृत्तेऽग्रजे विवाहाग्निहोत्रयोर्विशेषं वक्तुमिदं, पश्चाद्विवाहे दोष एव नत्वाधानादाविति । यदा तु कादाचित्कनास्तिक्येन पित्रादावाधानादिकरणसम्भावना तदाऽनुज्ञायामपि नाधिकारः । अधिकारिणि तु पित्रादौ दूरापास्त एवाधिकार इति । यागादावप्याज्ञायां न दोष इत्याह मण्डनः—

पिता यस्याग्रजो भ्राता न कुर्याद्वा पितामहः ।
तपोऽग्निहोत्रं यज्ञं वाऽऽज्ञया कुर्यात्कठाश्रयात् ॥ इति ।

क्वचित्त्वाज्ञां विनाऽप्यदोषः सुमन्तुनोक्तः—

व्यसनासक्तचित्तो वा नास्तिको वाऽथवाऽग्रजः ।
कनीयान्धर्मकामस्तु आधानमपि कारयेत् ॥ इति ।

अग्रज इति पित्रादेः, आधानमिति यागादेः, अथवेति जात्यन्धबधिरपङ्ग्वादेश्चोपलक्षणमिति दिक् ।

ननु बह्वृचादीनां याजुषमाधानमेव न स्यात्,

ऊनो वाऽप्यतिरिक्तो वा यः स्वशाखोदितो विधिः ।
तेन सन्तनुयाद् यज्ञं न कुर्यात्पारतान्त्रिकम् ॥

इति पारतान्त्रिकनिषेधादिति चेत् ? मैवम्, 'अनुक्तमन्यतो ग्राह्यम्' इति वचनात्,

आत्मतन्त्रेषु यन्नोक्तं तत्कुर्यात्पारतान्त्रिकम् ।
विशेषाः खलु सामान्या वेदोक्ता वेदवादिभिः ॥

इति कार्ष्णाजिनिना यतो वेदोक्ता विशेषाः सामान्याः सर्वानुष्ठातृपुरुषसाधारणा इत्यभिधानेन बह्वृचादीनां याजुषाधानादेः छान्दोगौद्गात्रादेरार्थर्वणशान्त्यादेश्चाधिकारबोधनाच्च,

यन्नाम्नातं स्वशाखायां पारक्यमविरोधि च ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥

इति हेमाद्रौ छन्दोगपरिशिष्टे दृष्टान्तप्रदर्शनाच्च । तत्रापि बौधायनमापस्तम्बं वा ग्राह्यम् ।

यजुषां बहुशाखात्वात्सन्देहे समुपस्थिते ।
कां शाखामवलम्बेरन् तादृशीं बह्वृचादयः ॥
आध्वर्यवं याजमानं ग्राह्यं बौधायनीयकम् ।
अन्यथा पतितो ज्ञेय इति बौधायनोऽब्रवीत् ॥ इति ।
आध्वर्यवं याजमानमाग्नीध्रं यच्च नोदितम् ।
तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात् ॥

इति च यज्ञकाण्डाभिधानात् । आग्नीध्रस्य ऋग्वेदमिश्रत्वात्तत्र याजुषभागत्यागशङ्कावारणाय तदुपादानम् ।

श्रौतं स्मार्त्तं च यत्कर्म स्वशाखायां न विद्यते ।
बौधायनोक्तं तद्ग्राह्यं बह्वृचादिभिरादरात् ॥

इति त्रिकाण्डमण्डनाच्च । स्मृतिसङ्ग्रहे—

वैतानिकाग्निकार्यं यत्स्वशाखायां न विद्यते ।
आपस्तम्बोदितं ग्राह्यं बव्हृचादिभिरादरात् ॥
बव्हृचस्सामगश्चापि कुर्यादाध्वर्यवादिकम् ।
आपस्तम्बेन वा प्रोक्तं तथा बौधायनेन वा ॥

यज्ञकाण्डे—

बह्वृचः सामगश्चापि स्वसूत्राभावतस्तथा ।
आपस्तम्बेन वा प्रोक्तमिति शातातपोऽब्रवीत् ॥

तत्र—

शाखिनामपि सर्वेषामभावे स्वप्रयोगिणाम् ।
आपस्तम्बोक्तमार्गेण कर्त्तव्यं पुनरब्रवीत् ॥

इति वचनाद्बौधायनाभावे आपस्तम्बं ग्राह्यम् । अभावे सान्निध्याभावे इत्यर्थात् अनिच्छायामित्यर्थाद्वा समविकल्पः । एतच्चोच्छिन्नपरम्परिकस्य नूतनपरिग्रहे एव

यद्यापस्तम्बशाखीयो भवेन्मातामहस्तदा ।
तत्र बौधायनाभावे तत्सूत्राधानमिष्यते ॥

इति च तादृशपरिग्रह एव । यस्यापस्तम्बीयपरम्पराऽस्ति.

परन्तु यदि तत्प्रयोक्ता न विद्यते, तदोक्तम्—

आपस्तम्बस्य चाभावे बौधायनमथापि वा ।

अन्यत्रापि—

आपस्तम्बादिभिरपि स्वसूत्राभावतस्तथा ।
बौधायनेन कर्त्तव्यमन्यथा पतितो भवेत् ॥ इति ।

एतेन—

पितृशाखां परित्यज्य पारक्यामधिगच्छति ।
स शूद्रवद् बहिष्कार्यः सर्वकर्मसु साधुभिः ॥
पारम्पर्यागतो येषां वेदः सपरिबृंहणः ।
तच्छाखाकर्म कुर्वीरन् तच्छाखाध्ययनं तथा ॥
न जातु परशाखोक्तं शाखारण्डादिकारणम् ।
येषां केषां च मर्त्यानां नान्यदध्वर्युरादिशेत् ॥
तेषां पुत्राश्च नप्तारः पतिताः स्युर्न संशयः ।

इति व्याख्यातम्। एतस्योक्तविषयत्वादनुक्तस्यान्यतो ग्रहे बाधकाभावात्। यस्य बह्वृचादेरापस्तम्बं पूर्वं परिगृहीतं तेन तत्प्रयोक्तृसत्त्वे बौधायनं न कार्यम्,

येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यति ॥

इति मानवात् "यजनीयकल्पपरिग्रहे पूर्वपरिग्रहः प्रमाणं, तत्त्यागे दोषः, तदज्ञाने स्वेच्छया परिग्रहः" इति भरद्वाजसूत्रे पूर्वकल्पं परित्यज्य कल्पान्तरपरिग्रहे दोषोक्तेश्च। अस्यार्थः-श्रौतसर्वस्वे ब्रह्मविद्यातीर्थकृता दर्शितः—पूर्वयोः पितृपितामहयोः पूर्वेषां त्रयाणां पित्रादीनां परिग्रहः पुत्रादेः परिग्रहे प्रमाणम्। एवं पूर्वस्य भ्रातुः पूर्वयोर्भ्रात्रोः पूर्वेषां वा भ्रातृणामिति कनीयसः पूर्वो वा स्वस्यैव परिग्रहः, प्राथमिकस्वपरिग्रह इति यावदिति। एषां च विग्रहक्रमेणानुक्रान्तानां विरोधे सर्वेषां सम्भूय प्रामाण्यं, विरोधे तु पूर्वं पूर्वं बलीयः। तथाच ज्ञायमानप्रपितामहपरिग्रहमा-

रभ्य ज्येष्ठपरिग्रहान्तानां मध्ये प्रपितामहपरिग्रहोऽवलम्बनीयः। प्रपितामहपरिग्रहोऽपि पूर्वाविरुद्धो ग्राह्यः। एवं क्रमेण स्वपरिग्रहपर्यन्तम्,

कल्पमेकं समाश्रित्य प्रवृत्तेऽपि च कर्मणि।
न मिश्रयेत्प्रयोगांस्तान्कल्पयोरव्यवस्थयोः॥

इतिविष्णुस्वामिकारिकादर्शनात्।

स्वेन पित्रादिभिर्वाऽपि कल्पादिः पूर्वमाहृतः।
स तु नैव परित्याज्य इति वेदानुशासनम्॥

इति छन्दोगपरिशिष्टात्। स्वेनेति पित्रादिभिरिति च पूर्वविरुद्धपित्रादिपरिग्रहाज्ञानविषयम्। तथाच पूर्वविरुद्धः पित्रादिपरिग्रहस्त्याज्यः। एवं तद्विरुद्धो ज्येष्ठपरिग्रहस्तदुभयाविरुद्धश्च स्वपरिग्रहोऽप्येवम्। तत्त्यागे दोष इति। तयोस्तस्य वा त्यागे त्यागपूर्वकान्यपरिग्रहे दोष इत्यर्थः,

स्वशाखां यः परित्यज्य परशाखां सुवर्त्तते।
आच्छेत्ता तस्य वंशस्य पतते रौरवं महत्॥

इति यज्ञपार्श्ववचनात्,

स्वशाखायाः परित्यागात्तथा शाखान्तरग्रहात्।
यो दोषः कथितस्तद्वत्कल्पान्तरपरिग्रहे॥

इति त्रिकाण्डमण्डनाच्च, शाखारण्डकल्परण्डयोः—

यः स्वशास्त्रं परित्यज्य परशास्त्रेण वर्त्तते।
भ्रूणहत्याकृतो दोषस्तस्य स्यान्नात्र संशयः॥

इति बौधायनेन तृतीयप्रश्ने भ्रूणहत्याप्रायश्चित्तोक्तेश्च। एवमेव यश्छन्दोगादिः कातीयकल्पेन वर्त्तते तस्य तत्त्यागे दोषो बोध्यः,

गुरुणाऽनुष्ठितं तन्त्रं तत्सूत्रेण समाचरेत्।
अन्यथा कर्महानिः स्यात्प्रायश्चित्ती भवेत्तु सः॥

इति यज्ञपार्श्ववचनाच्च। एवं सोमयागादावपि,

आधानं येन सूत्रेण तेनैवेत्यादिकाः क्रियाः।
अन्यथा यत्कृतं कर्म तत्फलं न प्रयच्छति॥

इति यज्ञपार्श्ववचनात् । एतच्च न केवलं बौधायनमात्रविषयं किन्तु यत्राश्वलायनशाङ्खायनादीनां द्राह्यायणकौथुम्यादीनां च मध्ये येन सूत्रेणाऽऽधानं तेनैव सूत्रेण सोमयाग इत्यपि । तेनाश्वलायनाद्यन्यतमानामेकतरसूत्रेणाधानानन्तरमपरसूत्रेण यागे दोषः । आध्वर्यवादि हौत्रादि औद्गात्रादि वाऽऽधानमारभ्य यज्ञान्तमेककल्पमालम्ब्य कार्यम् । यत्र तु तावत्पर्यन्तमेककल्पो नास्ति तत्र यावत्पर्यन्तमेव तत्कार्यं नाधिकमिति । तदज्ञाने स्वेच्छया परिग्रह इति, "वैकल्पिकेष्वात्मतुष्टिः" इति गौतमवचनात् । आद्याज्ञाने पूर्वपूर्वाविरुद्धप्रमाणभूतोत्तरोत्तराज्ञाने च स्वेच्छया बौधायनापस्तम्बकल्पयोरन्यतरो ग्राह्य इत्यर्थः । "ऊनो वाऽप्यतिरिक्तो वा" इति वचनं,

यः स्वशाखां परित्यज्य परशाखां समाश्रयेत् ।
अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति ॥

इति वचनं च विरुद्धानुष्ठाननिषेधार्थम् । अथवाऽयं भावः—कस्यांचिच्छाखायां बहुवित्तव्ययायाससाध्यत्वेन निर्णीतं यत्कर्म तदेव चेदन्यस्यां शाखायामल्पवित्तव्ययायाससाध्यत्वेन प्रसिद्धं, तत्र महाकर्मणः फलाधिक्यं मत्वा शाखान्तरदृष्टे तत्कर्मणि कश्चित्प्रवर्तेत, अलसस्तु पुनरल्पकर्मणि, तयोश्च स्वशाखोक्तकर्मपरित्यागः परोक्ताविहितकर्मनिष्पत्तिश्च स्यात् , तद्वारणाय 'ऊनो वा' इति, यः स्वशाखाम्' इति च । अत एव वैजवापः—

बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रचोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥ इति ।

अत एव वसुधारादिकं बह्वृचैर्न क्रियते । तर्हि 'यन्नाम्नातं शाखायाम्' इत्यस्य को विषयः ? यत्र प्रधानादिमात्रं किञ्चिदुक्तं तत्रावश्यकोऽङ्गकलापश्चेदविरुद्धस्तदा ग्राह्य इति । एवम्—

इष्टापूर्त्तादिकं कर्म स्वशाखोक्तं न विद्यते ।
तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात् ॥

इत्युक्तेः रुद्रानुष्ठानादि बौधायनोक्तं कार्यं न कात्यायनायुक्तमिति ।

अथ शूद्रसंस्काराः। यमः--

शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः।
न केनचित्समसृजच्छन्दसा तं प्रजापतिः॥

छन्दसा मन्त्रेण। व्यासोऽपि--

गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।
नामक्रिया निष्क्रमोऽन्नप्राशनं*वपनक्रिया॥
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः।
केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः॥
त्रेताग्निसङ्ग्रहश्चैव संस्काराः षोडश स्मृताः।

इत्युक्त्वाह--

नवैताः कर्णवेधान्ता मन्त्रवर्जं स्त्रि(१)याः क्रियाः।
विवाहो मन्त्रतस्तस्याः शूद्रस्यामन्त्रतो दश॥ इति।

मदनरत्ने-हिरण्यगर्भदाने तु--

गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा।
कुर्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः॥

इत्युक्त्वा--

जातकर्मादिकाः कुर्यात्क्रियाः षोडश चापराः।

इत्यत्र 'स्त्रियाः जातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडाविवाहाः षट्, शूद्राणां तु षडेते पञ्चमहायज्ञास्त्येकादश' इत्युक्तम्। रूपनारायणहरिहरभाष्ययोरप्येवम्। शार्ङ्गधरस्तु--

---

*वपनक्रिया। चौलम् 'संस्कारा नामपन्त्रतः' इत्युक्तं, तत्र धास्वाहयोर्निषेधः। दिगर्थस्तु

गार्भैर्होमैर्जातकर्म चूडामौञ्जीनिबन्धनैः।
वैजिकं गार्भिकं चैनो द्विजानामपमृज्यते॥

इति मनुवाक्ये द्विजग्रहणाद्धोमो द्विजानामेव न शूद्राणामित्या-

(१) 'क्रियाः स्त्रियाः' क०।

द्विजानां षोडशैव स्युः शूद्राणां द्वादशैव हि ।
पञ्चैव मिश्रजातीनां संस्काराः कुलधर्मतः ॥
वेदव्रतोपनयनमहानाम्नीमहाव्रतम् ।
विना द्वादश शूद्राणां संस्कारा नाममन्त्रतः ॥

इत्याह । अपरार्कस्तु--

'गर्भाधानमृतौ पुंसः' इत्यत्राह-'एतच्चातुर्वर्ण्यपरं न द्विजातिमात्रपरम् । तथा सत्युपनयनं विधाय वाच्यं स्यात्' इति । तेन तन्मतेऽष्टौ भवन्ति । ब्राह्मे तु--

विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा ।

इत्युक्तम् । अत्र सदसच्छूद्रगोचरत्वेन देशभेदाद्व्यवस्था । यत्तु मनुः--

न शूद्रे पातकं किंचिन्न च संस्कारमर्हति । इति ।

तदर्थमाह मेधातिथिः-'यत्सामान्यतो निषिद्धं स्तेयानृतादि न तदतिक्रमेऽस्य पापं यथा द्विजानाम् । उपनयनरूपं संस्कारं च नार्हति' इति । ते च तूष्णीं कार्याः,

शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति ।
वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना ॥

इति व्यासोक्तः,

अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते ।

इति मरीच्युक्तेश्च । इयं परिभाषा सर्वार्था, तेन शूद्रधर्मेषु सर्वत्र विप्रेण मन्त्रः पठनीयः । सोऽपि पौराण एवेति शूलपाणिः । एवं स्त्रीणामपीति दिक् ।

इति रामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिन्धौ तृतीयपरिच्छेदे पूर्वार्धे संस्कारनिर्णयः ॥

अथ क्षुद्रकालाः । तत्र जलाशयस्य वरा(१)हः--

हस्ते चाम्बुपपौष्णकेशवमघाभित्रोत्तरारोहिणी-
देवेज्येषु च शुक्रसौम्यशशभृद्रागीशवारांशके ।

(१) 'वाराहः' ख० ।

रिक्तां छिद्रतिथिं विहाय वृषभे नक्रे कुलीरे घटे
मीने कूपतडागकर्म मुनयः शंसन्ति शुद्धेऽष्टमे ॥
हस्तो मृ(१)गानुराधापुष्यधनिष्ठोत्तराणि रोहिण्यः ।
शतभिषगित्यारम्भे कूपानां शस्यते भगणः ॥

हेमाद्रौ भविष्ये—

तस्मिन्सलिलसंपूर्णे कार्तिके तु विशेषतः ।
मुनयः केचिदिच्छन्ति व्यतीते चो*त्तरायणे ॥
न कालनियमस्तत्र सलिलं तत्र कारणम् ॥

दीपिकापि—

*मार्तण्डेन्दूडुशुद्धौ सुरजिदशयने माघषट्कस्य शुक्ले
मूलाषाढोत्तराद्विश्रवण *गुरुकरे पौष्णशाक्रा(२)जचान्द्रे ।
मैत्रे ब्राह्मे च पूर्णा*मदनरविंतिथौ सद्वितीयातृतीये
कार्या तोयप्रतिष्ठा ज्ञगुरुसितदिने कालशुद्धे सुलग्ने ॥

वराहः—

आग्नेये यदि कोणे ग्रामस्य पुर(३)स्य वा भवति कूपः ।
नित्यं स करोति भयं दाहं च स मानसं प्रायः ॥
नैर्ऋत्ये बालभयं वनिताक्षयं च वायव्ये ।
दिक्त्रयमेतत्त्यक्त्वा शेषास्तु शुभावहाः कूपाः ॥

दि । 'एनः पापं शुक्रशोणितोभयसंसर्गादशुचित्वम्' इति मेधातिथिः । 'गोव्याधिसङ्क्रान्तिनिमित्तमेनः, न पतितोत्पन्नत्वादि' इति विज्ञानेश्वरः ।

*उत्तरायणे मकरसङ्क्रान्तौ । *मार्तण्डेति । सूर्यचन्द्रनक्षत्राणां बले, विष्णोः प्रबोधे । गुरुः पुष्यः, करो हस्तः, पौष्णं रेवती, शाक्रं ज्येष्ठा, आजं श्रवणम्, चान्द्रं मृगः, मैत्रम् अनुराधा, ब्राह्मं रोहिणी, पूर्णा पञ्चमी दशमी पूर्णिमा । *मदनेति । त्रयोदशीसप्तम्यौ ।

(१) 'मघा' ख० । (२) 'शक्राप्य' ग० । (३) 'गृहस्य' क० ।

वास्तुशास्त्रे—

भूतिं पुष्टिं पुत्रहानिं पुरन्ध्रो-
नाशं मृत्युं संपदं शत्रुबाधाम् ।
किञ्चित्सौख्यं शम्भुकोणादि कुर्यात्
कूपो मध्ये गेहमर्थक्षयं च ॥

उत्सर्गविधि(१)श्चोक्तो बह्वृचपरिशिष्टे-*'अथातो वापीकूपतडागयज्ञं व्याख्यास्यामः पुण्येऽह्न्युदकसमीपेऽग्निं समाधाय वारुणं चरुं श्रपयित्वाज्यभागान्ते आज्याहुतीर्जुहुयात्-"समुद्रज्येष्ठा" इति प्रत्यृचं; ततो हविषाऽष्टौ-"तत्त्वायामि"इति पञ्च, "त्वं नो अग्ने" इति द्वे इमं मे वरुण" इति च; स्विष्टकृतं नवमम् । मार्जनान्ते धेनुं तारयेत् । अब(२)तीर्यमाणामनुमन्त्रयेत—

इदं सलिलं पवित्रं कुरुष्व
शुद्धाः पूता अमृताः सन्तु नित्यम् ।
मां तारयन्ती कुरु तीर्थाभिषेकं
लोकाल्लोकं तरते तीर्यते च ॥ इति ।

पुच्छाग्रान्धारब्ध उत्तीर्य "आपो अस्मान्मातरः शुन्धयन्तु" इति । अथापराजितायां दिश्युत्थापयेत् "सुरभवसाङ्गवती"इति । हिङ्कृतं चेद् 'हिं कृण्वती'इति । अलंकृत्य विप्राय दद्यादितरां वा शक्त्या दक्षिणाम् । तत उत्सृज्य देवपितृमनुष्याः प्रीयन्तामिति । ब्राह्मणान्भोजयित्वा स्वस्त्ययने वाचयीत इति । विस्तरस्तु मात्स्योक्तोऽस्मत्कृतजलाशयोत्सर्गविधौ ज्ञेयः । *कूपादेरुत्सर्गाकरणे दोष उक्तो भविष्ये—

---

*अथात इति । अयं संक्षेपेण विधिः । विस्तरेण तु मात्स्यादौ पूर्त्तकमलाकरादौ च द्रष्टव्यः । *कूपादेरिति । आदिना वाप्यादिग्रहः ।

---

(१) 'विधि' नास्ति क०। (२) 'तार्य' क०।

सदा जलं पवित्रं स्यादपवित्रमसंस्कृतम् ।
कुशाग्रेणापि राजेन्द्र न स्पृष्टव्यमसंस्कृतम् ॥

तथा—

वापीकूपतडागादौ यज्जलं स्यादसंस्कृतम् ।
अपेयं तद्भवेत्सर्वं पीत्वा चान्द्रायणं चरेत् ॥

अथ वृक्षारोपणम् । चण्डेश्वरः—

आदित्यचान्द्रपितृतिष्यविशाखपौष्ण-
मूलोत्तरात्रयतुरङ्गमवारुणाश्च ।
एतेषु तारकगणेषु हितं नराणां
वृक्षादिरोपणमिहोपदिशन्ति धीराः ॥

अथ मूर्तिप्रतिष्ठा । वसिष्ठः—

हस्तत्रये मित्रहरित्रये च
पौष्णद्वयादित्यसुरेज्यभेषु ।
तिस्रोत्तराधातृशशाङ्कभेषु
सर्वामरस्थापनमुत्तमं स्यात् ॥

मात्स्ये—

चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥

नारदस्तु चैत्रं निषेधति—

विचैत्रेष्वेव मासेषु माघादिषु च पञ्चसु ॥ इति ।

तेनात्र विकल्पः(१) । अत्र माघमासो विष्णुप्रतिष्ठाव्यतिरिक्तविषयः,

माघे कर्तुर्विनाशाय फाल्गुने शुभदा भवेत् ।

इति विष्णुधर्मोक्तेरिति हेमाद्रिः । मा(२)त्स्ये—

दृढा धनकरी स्फीता तथा प्रतिपदि स्मृता ।

---

(१) इतोग्रे 'कालादर्शेऽपि केचिच्चैत्रं न मन्यन्ते । कारणतन्त्रेऽपि विना चैत्रं तु माघादौ प्रतिष्ठा मासपञ्चके' इत्यधिकं क० ।

(२) 'विष्णुधर्मोत्तरे' क० ।

द्वितीयायां धनोपेता तृतीयायां धनप्रदा ॥
चतुर्थ्यां नाशमाप्नोति यमस्य स्यात्सुखावहा ।
विनायकस्य देवस्य तथा तत्र हितप्रदा ॥
पञ्चम्यां श्रीयुता कर्तुर्वरदा च तथा भवेत् ।
षष्ठ्यां लक्ष्मीयुता नित्यं सप्तम्यां रोगनाशिनी ॥
अष्टम्यां धान्यबहुला नवम्यां च विनश्यति ।
भद्रकाल्याः कृता तत्र कर्तुर्भवति तुष्टये ॥
धर्मवृद्धिकरी ज्ञेया दशम्यां तु तथा तिथौ ।
एकादश्यां तथा युक्ता द्वादश्यां सर्वकामदा ॥
त्रयोदश्यां तथा ज्ञेया चतुर्दश्यां विनश्यति ।
कृष्णपक्षे पञ्चदश्यां कर्तुः क्षयकरी भवेत् ॥
पञ्चदश्यां तथा शुक्ले सर्वकामकरी भवेत् ।
(१)आषाढे द्वे तथा मूलमुत्तरात्रयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्वाभाद्रपदा तथा ।
हस्तोऽश्विनी रेवती च पुष्यो मृगशिरस्तथा ॥
अनूराधा तथा स्वाती प्रतिष्ठासु प्रशस्यते ।

श्रीपतिः—

रोहिण्युत्तरपौष्णवैष्णवकरादित्याश्विनीवासवा-
नूराधैन्दवजीवभेषु गदितं विष्णोः प्रतिष्ठापनम् ।
पुष्पश्रुत्यभिजित्सुरेश्वरकयोर्वित्ताधिपस्कन्दयो-
र्मैत्रे तिग्मरुचेः करे निर्ऋतिभे दुर्गादिकानां शुभम् ॥
गणपरिवृढरक्षोयक्षभूतासुराणां
प्रथमफणिसरस्वत्यादिकानां च पौष्णे ।
अवसि सुगतनाम्नो वासवे लोकपानां
निगदितमखिलानां स्थापनं च स्थिरेषु ॥
तेजस्विनी क्षेमकृदाग्निदाह-
विधायिनी स्याद्धनदा दृढा च ।

(१) इतः पूर्वं-'मात्स्ये' इत्यधिकं क० ।

आनन्दकृत्कल्पविनाशिनी च
सूर्यादिवारेषु भवेत्प्रतिष्ठा ॥

माधवीये वैखानसः—

मातृभैरववाराहनरसिंहत्रिविक्रमाः ।
महिषासुरहन्त्र्यश्च स्थाप्या वै दक्षिणायने ॥

वैशब्दोऽप्यर्थे ।

लिङ्गप्रतिष्ठायां विशेषो हेमाद्रौ लक्षणसमुच्चये—

उत्तरागते भानौ लिङ्गस्थापनमुत्तमम् ।
दक्षिणे त्वयने पूज्य त्रिवर्षार्धं भयावहम् ॥
स्वगृहे स्थापनं नेष्टं तस्माद्वै *दक्षिणायने ।
स्थापनं तु प्रकर्तव्यं शिशिरादावृतुत्रये ॥
प्रावृषि स्थापितं लिङ्गं भवेद्वरदयो(१)गदम् ।
हेमन्ते ज्ञानदं चैव (२)शिशिरे सर्वभूतिदम् ॥

प्रवर्त्तयेदेवभूतनृपितृब्रह्मपूरकान् ।
यज्ञान् यथोक्तविधिना ज्योतिष्टोमादिकानपि ॥

इत्युक्त्वा कूपादिलक्षणमुक्तं हरिणा—

द्वारहीनो भवेत्कूपो द्वारेणैकेन वापिका ।
नैकद्वारा पुष्करिणी दीर्घाकारा तु दीर्घिका ॥
कुल्याविस्रुततोयश्च तडागः परिकीर्त्तितः ।
एतदारामादिकं वा प्रपादिं वा प्रवर्त्तयेत् ॥
निन्देद्वा किन्तु तान् दृष्ट्वा नमस्कुर्यादलङ्घयन् ॥ इति ।

*दक्षिणायने इति । मुक्तिकामानां दक्षिणायने न दोषः,

श्रेष्ठोत्तरं प्रतिष्ठा स्यादयने मुक्तिमिच्छताम् ।
दक्षिणे तु मुमुक्षूणां मलमासे न सा द्वयोः ॥

इति वचनात् ।

---

(१) 'योगिदम्' क० ।

(२) 'शिशिरे सर्वभूतिदम् । लक्ष्मीप्रदं वसन्ते च ग्रीष्मे च जयशान्तिदम् । यतीनां सर्वकाले च' 'ख' 'ग' पुस्तकयोर्नास्ति ।

लक्ष्मीप्रदं वसन्ते च ग्रीष्मे च जयशान्तिदम् ।
यतीनां सर्वकाले च लिङ्गस्यारोपणं मतम् ॥

रत्नावल्याम्—

माघफाल्गुनवैशाखज्येष्ठाषाढेषु पञ्चसु ।
मासेषु शुक्लपक्षेषु लिङ्गस्थापनमुत्तमम् ॥

विष्णोरप्याह तत्रैव वैखानसः—

मार्गशीर्षादिमासौ द्वौ निन्दितौ ब्रह्मणा पुरा ।
मासेषु फाल्गुनः श्रेष्ठश्चैत्रो वैशाख एव च ॥
वृषे वाप्यथवायुञ्जासे श्रावणे मासि वा भवेत् ।

बौधायनसूत्रे विष्णुप्रतिष्ठामुपक्रम्य—'द्वादश्यां श्रोणायां वा यानि चान्यानि पुण्यनक्षत्राणि' इति । कृत्तिकादिविशाखान्तेष्वित्यर्थः । सर्वदेवेषु मासविशेषो हेमाद्रौ विष्णुधर्मे—

माघे कर्तुर्विनाशाय फाल्गुने शुभदा भवेत् ।
लोकानन्दकरी चैत्रे वैशाखे वरसंयुता ॥
आज्ञायुता सदा ज्येष्ठे आषाढे धर्मवृद्धिदा ।
श्रावणे धनहीना स्यात्प्रोष्ठपादे विनश्यति ॥
आश्विने नाशमाप्नोति वह्निना कार्तिके तथा ।
सौम्ये सौभाग्यमतुलं पौषे पुष्टिरनुत्तमा ॥
दोषान्विताधिमासे स्यात्कर्तुरात्मन एव च ॥ इति

अत्र श्रावणाश्विनयोर्निषेधो मार्गशीर्षविधिश्च विष्णुव्यतिरिक्तविषयः पूर्वोक्तवचनादिति हेमाद्रिः । माघश्रावणभाद्रपदानिषेधः शिवव्यतिरिक्तविषयः, तत्र तस्योक्तेः । देवीस्थापने तत्रैव विशेषो देवीपुराणे—

देव्या माघेऽश्विने मासे उत्तमा सर्वकामदा ।

तथा—

न तिथिर्न च नक्षत्रं नोपवासोऽत्र कारणम् ।
सर्वकालं प्रकर्तव्यं कृष्णपक्षे विशेषतः ॥

अन्यश्चात्र विचारो हेमाद्रौ ज्ञेयः । नारदः—

*हन्त्यर्थहीना कर्तारं मन्त्रहीना तु ऋत्विजम् ।
स्त्रियं लक्षणहीना तु न प्रतिष्ठासमो रिपुः ॥

अत्राधिकारिण उक्ताः कृत्यकल्पतरौ देवीपुराणे—

वर्णाश्रमविभेदेन देवाः स्थाप्यास्तु नान्यथा ।
ब्रह्मा तु ब्राह्मणैः स्थाप्यो गायत्रीसहितः प्रभुः ॥
चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ।
भैरवोऽपि चतुर्वर्णैरन्त्यजानां तथा मतः ॥
मातरः सर्वलोकैस्तु स्थाप्याः पूज्याः सुरोत्तमाः ।
लिङ्गं गृही यतिर्वापि संस्थाप्य तु यजेत्सदा ॥

शिवसर्वस्वे भविष्ये—

यस्तु पूजयते लिङ्गं देवादिं मां जगत्पतिम् ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मत्परायणः ॥
तस्य प्रीतः प्रदास्यामि शुभाँल्लोकाननुत्तमान् ।

तिथितत्त्वे स्कान्दे—

शूद्रः कर्माणि यो नित्यं स्वीयानि कुरुते प्रिये ।
तस्याहमर्चां गृह्णामि चन्द्रखण्डविभूषिते ॥
ब्रह्मचारी गृहस्थो वा वानप्रस्थश्च सुव्रते ।
एवं दिने दिने देवं पूजयेदम्बिकापतिम् ॥
संन्यासी देवदेवेशं प्रणवेनैव पूजयेत् ।
नमोन्तेन शिवेनैव स्त्रीणां पूजा विधीयते ॥

---

*हन्तीति ।

अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विजम् ।
श्रद्धाविहीनः कर्त्तारं नास्ति यज्ञसमो रिपुः ॥

इत्यादिकमपि द्रष्टव्यम् । श्रद्धा चेह भूयसीदानादिरूपा शास्त्रान्तरवशात् ।

एतच्च पुराणप्रसिद्धजीर्णलिङ्गपूजाविष
तु त्रिस्थलीसेतौ नारदीये—

यः शूद्रेणार्चितं लिङ्गं विष्णुं वा प्रणमे
न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तायुतैरा
नमेद्यः शूद्रसंस्पृष्टं लिङ्गं वा हरिमेव व
स सर्वयातनाभोगी यावदाचन्द्रतारक
पाखण्डपूजितं लिङ्गं नत्वा पाखण्डतां
आभीरपूजितं लिङ्गं नत्वा नरकमश्नु
योषिद्भिः पूजितं लिङ्गं विष्णुं वापि न
स कोटिकुलसंयुक्तमाकल्पं रौरवं वसे

इत्यादीनि, तानि नूतनस्थापितलिङ्गा
यदा प्रतिष्ठितं लिङ्गं मन्त्रविद्भिर्यथावि
तदाप्रभृति शूद्रश्च योषिद्वापि न संस्पृ

इति तत्रैवोक्तेः ।

प्रतिष्ठायां तु शूद्रादीनां नाधिकारः—

स्त्रीणामनुपनीतानां शूद्राणां च जनेश्
स्थापने नाधिकारोस्ति विष्णोर्वा शंक
यः शूद्रसंस्कृतं लिङ्गं विष्णुं वापि नमे
इहैवानन्तदुःखानि पश्यत्यामुष्मिके
शूद्रो वानुपनीतो वा स्त्रियो वा पति
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्

इति बृहन्नारदीयस्कान्दोक्तेरिति त्रिस
तामहचरणाः । चतुर्वर्णैरिति पूर्वोक्तवचन
तिष्ठायां शूद्रस्य विकल्प इति युक्तं पश्
गौतमः—

शिवार्चनं सदाप्येवं शुचिः कुर्याद्दृढ

वाचस्पति(१)धृतम्—

प्राक्पश्चिमोदगास्यस्तु प्रातः सायं निशासु च ।

इति प्रयोगपारिजाते । गृह्यपरिशिष्टे—

प्रतिमाः प्राङ्मुखीरुदङ्मुखो यजेताऽन्यत्र प्राङ्मुखः ।

एतच्च स्थिरप्रतिमाविषयम् । अन्यत्र (२)चलार्चासु ॥

अथ प्रतिमाः भार्गवार्चनदीपिकायां भविष्ये—

सौवर्णी राजती ताम्री मृन्मयी च तथा भवेत् ।

पाषाणधातुयुक्ता वा रीतिकांस्यमयी तथा ॥

(रीतिः पित्तलम् ।)

शुद्धदारुमयी वापि (३)देवतार्चा प्रशस्यते ।

अङ्गुष्ठपर्वादारभ्य*वितास्तिं यावदेव तु ॥

गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः ॥

पञ्चरात्रे तु—

मृ*दारुलाक्षागोमेदमधूच्छिष्टमयी न तु ।

इति निषेध उक्तः । भागवते—

---

*वितास्तिमिति । तल्लक्षणं कोशे—

प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ।

अङ्गुष्ठे सकनिष्ठे स्याद्वितास्तिर्द्वादशाङ्गुलः ॥ इति ।

*दारुः काष्ठम् , लाक्षा प्रसिद्धा, गोमेदः प्रसिद्धः, मधूच्छिष्टं मधूवनाख्यं द्रव्यम् । हयशीर्षपञ्चरात्रे—

न कुर्याल्लक्षणोद्धारं रत्नजानां चलात्मनाम् ।

सुप्रभालक्षणं त्वेषां स्वर्णजानामपि द्विज ॥

तस्मान्न लक्षणोद्धारं कुर्यात्पाषाणलिङ्गवत् । इति ।

---

(१) 'धृतौ' क० 'मतम्' ख० ।

(२) 'चलनार्चासु' ख० ।

(३) देवतार्च्या' ख० ।

शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाष्ट(१)विधा स्मृता ॥
काष्ठं मधुकस्यैव,
तत्र काष्ठेषु मधुकमानीय च वसुन्धरे ।
कृत्वा तत्प्रतिमां चैव प्रतिष्ठाविधिनाऽर्चयेत् ॥

इति वाराहोक्तेः । देवीपुराणे--

सप्ताङ्गुलं समारभ्य यावच्च द्वादशाङ्गुलम् ।
गृहेष्वर्चा समाख्याता प्रासादे त्वधिका शुभा ॥

तिथितत्त्वे कालिकापुराणे--

प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
प्राणप्रतिष्ठां कुर्वीत तस्य देवस्य वा हरेः ॥
अन्येषामपि देवानां प्रतिमासु च पार्थिव ।
प्राणप्रतिष्ठा कर्तव्या तस्यां देव(२)त्वसिद्धये ॥
वासुदेवस्य बीजेन तद्विष्णोरित्यनेन च ।
तथैव हृदयेऽङ्गुष्ठं दत्त्वा शङ्खवच्च मन्त्रवित् ॥
एभिर्मन्त्रैः प्रतिष्ठां तु हृदयेऽपि समाचरेत् ।
अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै (३)मामहेति च कञ्चन ॥

हयशीर्षपञ्चरात्रे--

अर्चकस्य तपोयोगादर्चनस्यातिशायनात् ।
आभिरूप्याच्च बिम्बानां देवः सांनिध्यमृच्छति ॥

प्रयोगपारिजाते व्यासः--

प्रतिमापट्टयन्त्राणां नित्यं स्नानं न कारयेत् ।
कारयेत्पर्वदिवसे यदा वा मलधारणम् ॥

---

(१) 'विधा मता' क० ।
(२) 'देवस्य सिद्धये' क०
(३) 'मामहेति न कञ्चन' क० ।

लिङ्गे विशेषास्तिथितत्त्वे भविष्ये—

मृद्गुस्मगोशकृत्पिष्टताम्रकांस्यमयं तथा ।
कृत्वा लिङ्गं सकृत्पूज्य वसेत्कल्पायुतं दिवि ॥
वार्च्चे वित्तप्रदं लिङ्गं स्फाटिकं सर्वकामदम् ।
कृत्वा पूजय विप्रेन्द्र लप्स्यसे वाञ्छितं फलम् ॥

तत्रैव कालकौमुद्यां स्कान्दे—

अक्षादल्पपरीमाणं न लिङ्गं कुत्रचिन्नरः ।
कुर्वीताऽङ्गुष्ठतो ह्रस्वं न कदाचित्समाचरेत् ॥

अक्षोऽशीतिर्गुञ्जाः । 'गुञ्जाः पञ्चाद्यमोषकः । ते षोडशाक्षः कर्षोऽस्त्री' (अ०को०२-९-८६) इत्यमरकोशात् ।

प्रयोगपारिजाते क्रियासारे—

नवाष्टससाङ्गुलिकं लिङ्गं श्रे(१)ष्ठमिहोच्यते ।
षट्पञ्चकचतुर्मानं मध्यमं त्रिविधं स्मृतम् ॥
त्रिद्व्येकाङ्गुलमानं यत्त्रिविधं तत्कनीयसम् ।
एवं नवविधं प्रोक्तं चरलिङ्गं यथाक्रमम् ॥

अथ पञ्चसूत्रीनिर्णयः । गौतमीतन्त्रे—

लिङ्गमस्तकविस्तारो लिङ्गोच्छ्रायस(२)मो मतः ।
परिधिस्तत्त्रिगुणितस्तद्वत्पीठं व्यवस्थितम् ॥
प्रणालिका तथैव स्या*त्पञ्चसूत्रविनिर्णयः ।

---

*अङ्गुष्ठत इति । मन्त्रमहोदधौ—

अङ्गुष्ठादिवितस्त्यन्तं न न्यूनं नाधिकं क्वचित् ॥ इति ।

*पञ्चसूत्रेति ।

पञ्चसूत्रविधानं च कुर्याल्लिङ्गे शुभावहम् ।

इति वचनात्पञ्चसूत्रमावश्यकम् ।

पञ्चसूत्रविधानं च पार्थिवे न विचारयेत् ।
यथाकथञ्चिद्विधिना रमणीयं प्रकल्पयेत् ॥

---

(१) 'दीर्घमहो' क० । (२) 'समन्वितः' क० ।

अत्रेदं तत्त्वम् । लिङ्गमस्तकविस्तारं लिङ्गोच्चतासमं कृत्वा तत्त्रिगुणसूत्रवेष्टनार्हं लिङ्गस्थौल्यं कृत्वा तत्समं वृत्तं चतुरस्रं वा पीठविस्तारमधश्चोर्ध्वं च कुर्यात् । पीठोच्चता तु लिङ्गोच्चतातो द्विगुणा । पीठमध्ये लिङ्गाद्विगुणस्थूलं पीठोच्चतातृतीयांशेन कण्ठं कृत्वा तस्योर्ध्वम् अधश्च समं वप्रद्वयं त्रयं वा कृत्वा लिङ्गविस्तारषष्ठांशेन पीठोपरि बाह्यमेखलां कृत्वा तदन्तःसंलग्नं तत्समं खातं कृत्वा पीठाद्बहिर्लिङ्गसमदीर्घां पीठार्धदीर्घां वा मूले दैर्घ्य(१)समविस्तारां तृतीयांशेन मध्ये खातां पीठवत्समेखलां प्रणालिकां कुर्यादिति । अत्र मूलं सिद्धान्तशेखरे शैवागमे च ज्ञेयम् ।

तिथितत्त्वे ब्राह्मे—

सर्वत्रैव प्रशस्तोऽज्जः शिवसूर्यार्चनं विना ।

तत्रैव वाराहपाद्मयोः—

गृहे लिङ्गद्वयं नार्च्यं शालग्रामद्वयं तथा ।

इति च । सिद्धान्तशेखरे-

लिङ्गं बाणादिकं कुर्यात्सप्तांशं वा त्रिभागकम् ।
पञ्चभागं द्विभागं वा यथायोगं यथास्थिरम् ॥
सप्तभागकृते लिङ्गे चतुरोंऽशान्निवेशयेत् ।
पीठमध्यगते गर्त्ते त्रिभागे चैकभागकम् ॥
पञ्चभागे तु भागांस्त्रीन् द्विभागेऽर्द्धं यथाक्रमम् ।
एवं बाणादिलिङ्गानां प्रवेशः श्रुतिचोदितः ॥
स्थूलं शिरः कृशं मूलमुन्नतं तन्मुखं भवेत् ।
निम्नपृष्ठमिति ख्यातं बाणरोहादिलिङ्गके ॥
अज्ञातमुखपृष्ठानां कन्यास्पृष्टं मुखं शिरः ॥ इति ।

---

(१) 'समविस्तरामग्रे तदर्धविस्तारां' क० ।

*द्वे चक्रे द्वारकायास्तु नार्च्ये सूर्यद्वयं तथा ॥
शक्तित्रयं तथा नार्च्यं गणेशत्रयमेव च ।
द्वौ शङ्खौ नार्चयेच्चैव भग्नां च प्रतिमां तथा ॥
नार्चयेच्च तथा मत्स्यकूर्मादिदशकं तथा ।
गृहेऽग्निदग्धा भग्नाश्च ना(१)र्चाः पूज्या वसुंधरे ॥
एतासां पूजनान्नित्यमुद्वेगं प्राप्नुयाद् गृही ।
शालग्रामाः समाः पूज्याः समेषु द्वितयं नहि ॥
विषमा नैव पू(२)ज्याः स्युर्विषमेष्वेक एव हि ।
शालग्रामशिला भग्ना पूजनीया सचक्रका ॥
*खण्डिता स्फुटिता वापि शालग्रामशिला शुभा ॥

वाराहे—

*दद्याद्भक्ताय यो देवि शालग्रामशिलां नरः ।
सुवर्णसहितां दिव्यां पृथ्वीदानफलं लभेत् ॥

तत्रैव—

यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतम् ।
तत्फलं नैव शक्तोऽहं वक्तुं वर्षशतैरपि ॥

---

*द्वे चक्रे द्वारकाया इति । स्वतन्त्रपूजायाम्—'चक्राङ्कमिथुनं पूज्यम्' इत्याग्नेयवाराहात् । *खण्डितेति । 'लग्नं भग्नं न पूजयेत्' इत्यस्य लग्नं लग्नचक्रं भग्नं भग्नचक्रमित्यर्थान्न विरोधः ।

शिलारूपी रमा प्रोक्ता चक्ररूपी जनार्दनः ।

इति विष्णुपुराणेन चक्ररूपेण हरेरुक्तेः चक्रेतरप्रदेशभङ्गेऽपि पूज्यत्वाच्च । स्कान्दे—

शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ।
महापूजां तु कृत्वाऽऽदौ पूजयेत्तां ततो बुधः ॥

*दद्यादिति । दानमन्त्रः—

महाकोशनिवासेन चक्राङ्केरुपशोभितः ।
अस्य देवस्य दानेन मम सन्तु मनोरथाः ॥ इति ।

---

(१) 'नार्च्याः' क० । (२) 'पूज्यास्तु' क० ख० ।

विष्णु(१)पुराणे--

*ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च पृथिवीपते ।
स्वधर्मतत्परो विष्णुमाराधयति नान्यथा ॥

---

*ब्राह्मण इति । अधिकारिणः । यद्यप्यत्र पञ्चायतनपू वक्ष्यति, तथापि विष्णुपूजैव कार्या,

न विष्ण्वाराधनात् पुण्यं विद्यते कर्म वैदिकम् ।
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम् ॥
कलौ कलिमलध्वंसं सर्वपापहरं हरिम् ।
येऽर्चयन्ति नरा नित्यं तेऽपि वन्द्या यथा हरिः ॥ इति

आद्येन पुरुषार्थत्वं अन्त्येन समस्तपापनाशकत्वं च विष्णु जाया गम्यते । अथवा हरपूजा कार्या,

अथवा देवमीशानं भगवन्तं सनातनम् ।
आराधयेन्महादेवं भावपूतो महेश्वरम् ॥ इति ।
स्नानं सन्ध्यां ततो होमं गृहस्थोक्तेन वर्त्मना ।
कृत्वा सूर्यं गणपतिं दुर्गामीशं तथा हरिम् ॥
पौरुषेण तु सूक्तेन नित्यमर्चां समारभेत् ।

इति कौर्मात् पञ्चायतनपूजा वा कार्या । तत्र स्नानं श तोदकेन नद्यादौ मुख्यम्, तदभावे उष्णोदकेन साशिरस्कम् अशक्तस्य कण्ठस्नानम्,

अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम् ।

इति वचनात् । मन्त्रस्नानादिकं च यथा—

आपोहिष्ठादिभिर्मन्त्रं, मृदालम्भं तु पार्थिवम् ।
आग्नेयं भस्मना स्नानं, वायव्यं गोरजः स्मृतम् ॥
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते ।
अवगाहो वारुणं स्यान्मानसं विष्णुचिन्तनम् ॥
असामर्थ्याच्छरीरस्य वैषम्यादेशकालयोः ।

---

(१) 'देवीपुराणे' ख० ।

स्नानान्येतानि तुल्यानि मानसं श्रेष्ठमुच्यते ॥

तत्र मानसस्नानम्--

चतुर्भुजं महाकायं शङ्खचक्रगदाधरम्।
मनसा ध्यायते विष्णुं मानसं स्नानमुच्यते ॥

अथवा कापिलं स्नानम्--

आर्द्रेण वाससा चाङ्गमार्जनं कापिलं मतम्।

सारस्वतं स्नानमन्यत्र द्रष्टव्यम्। गायत्रस्नानं यथा--

गायत्र्या जलमादाय दशकृत्वोऽभिमन्त्र्य च।
शिरश्चाङ्गानि सर्वाणि प्रोक्षयेत्तेन वारिणा ॥
स्नानं गायत्रकं नाम सर्वपापप्रणाशनम् ॥ इति।

एवं गुरुपादोदकादिस्नानानि--

अशक्तानां तु मर्त्यानां गुरोः पादोदकं शुभम्।
विप्रपादाद्विष्णुपादात्तुल्यं स्यात्सम्भृतं जलम् ॥
प्रोक्षणात्स्नानमाप्नोति ध्यानस्नानं विशिष्यते ॥ इति।

ईदृशैर्गौणस्नानैर्जपादि कार्यं, न देवतार्चनादि,

प्रातः स्नातुमशक्तस्तु रोगाद्यैर्वा भयेन वा।
पूर्ववस्त्रं परित्यज्य शुचित्वं सम्भवेत्तदा ॥
स च कर्मस्वनर्हः स्याद् भूतकृत्यार्चनादिषु।
जपेत्सन्ध्यां तथा वेदान्सोऽध्ययीत यथाविधि ॥

इति आचार्यवचनात्। भूतकृत्यं वैश्वदेवः। आदिना ब्रह्मयज्ञतर्पणश्राद्धादिग्रहः।

स्नात्वा पुण्ड्रं मृदा कुर्याद्भस्मना चैव तु भस्मना।
देवानभ्यर्च्य गन्धेन जलमध्ये जलेन तु ॥

कात्यायनः--

ऊर्ध्वपुण्ड्रं मृदा कुर्याद्भस्मना तु त्रिपुण्ड्रकम्।
उभयं चन्दनेनैव अभ्यङ्गोत्सवरात्रिषु ॥

ब्रह्माण्डे—

ललाटे केशवं विद्यान्नारायणमथोदरे ।
माधवं हृदि विन्यस्य गोविन्दं कण्ठकूपके ॥
विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधुसूदनम् ।
त्रिविक्रमं कर्णमूले वामकुक्षौ तु वामनम् ॥
श्रीधरं च हृषीकेशं वामयोर्बाहुकर्णयोः ।
पद्मनाभं पृष्ठदेशे ककुदामोदरं स्मरेत् ॥
मूर्ध्नि मूलेन मन्त्रेण शेषं द्वादशनामभिः ।
सङ्कर्षणादिभिः कृष्णे शुक्ले चेत्केशवादिभिः ॥ इति ।

अथ भस्मधारणम्—

अग्निहोत्रादिजं भस्म विरजाहोमजं तथा ।
औपासनसमुत्पन्नं समिदग्निसमुद्भवम् ॥
समिदग्निसमुत्पन्नं धार्यं वै ब्रह्मचारिणाम् ।
शूद्राणां श्रोत्रियागारपचनाग्निसमुद्भवम् ॥
अन्येषामपि सर्वेषां धार्यं दावानलोद्भवम् ।
करोति शिवमन्त्रेण यस्त्रिपुण्ड्रं द्विजोत्तमः ॥
त्र्यक्षः शूलधरः सौम्यः शिवलोके महीयते ।
अष्टाक्षरेण मन्त्रेण यः करोति त्रिपुण्ड्रकम् ॥
विष्णोः पदमवाप्नोति नान्यथा श्रुतिचोदितम् ।
श्रौतं भस्म द्विजं मुख्यं स्मार्त्तं गौणं प्रकीर्त्तितम् ॥
औपासनसमुत्पन्नं गृहस्थानां विशेषतः ।
अग्निरित्यादिभिर्मन्त्रैः शुद्धं भस्माभिमन्त्रितम् ॥
शिवमन्त्रेण तद्धार्यं मन्त्रेणाष्टाक्षरेण वा ।
गायत्र्या वाऽथ देवर्षमन्त्रेण प्रणवेन वा ॥

अथ तद्विधिः—

वामहस्ततले भस्म क्षिप्त्वाऽच्छाद्यान्यपाणिना ।
अग्निरित्यादिमन्त्रेण स्पृशन्भस्माभिमन्त्र्य च ॥

धार्यं भस्म त्रिसंध्यं तु गृहिणा जलसंयुतम् ।

इत्यादि । कात्यायनः-

श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने ।
धृतत्रिपुण्ड्रः पूतात्मा मृत्युञ्जयति मानवः ॥ इति ।

भस्माभिमन्त्रणमन्त्रस्य पिप्पलाद ऋषिः, रुद्रो देवता, गायत्री छन्दः, भस्मशुद्ध्यर्थं जपे विनियोगः । अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्म मम एतानि चक्षूंषि भस्मानीति । विष्णुः-"स्नातः प्रक्षालितपाणिपादः शुचिर्बद्ध(१)शिखी दर्भपाणिराचान्तः प्राङ्मुख उदङ्मुखो वा देवताः पूजयेत्" इति ।

शिवार्चने सदाप्येवं शुचिः कुर्यादुदङ्मुखः । इति ।

अर्घदानादौ द्विराचमनं कार्यम्—

दाने भोजनकाले च सन्ध्ययोरुभयोरपि ।
आचान्तः पुनराचामेज्जपहोमार्चनेषु च ॥

इति व्यासोक्तेः । अगस्त्यसंहितायाम्—

केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ।
द्वाभ्यामोष्ठौ तु संमृज्य द्वाभ्यामुन्मार्जनं तथा ॥
एकेन हस्तं प्रक्षाल्य पादावपि तथैकतः ।
संप्रोक्ष्यैकेन मूर्द्धानं ततः संकर्षणादिभिः ॥
आस्यनासाक्षि कर्णौ च नाभिहृत्कं भुजौ स्पृशेत् ।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥ इति ।

शङ्खः—

तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयम् ।
अङ्गुष्ठानामिकाभ्यां च चक्षुः श्रोत्रे पुनः पुनः ॥
कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयं तु तलेन वै ।

तलेन पाणितलेन ।

(१) 'शिरो' ख० ।

सर्वाभिस्तु ततः शीर्षं बाहू चाग्रेण संस्पृशेत् ॥

केशवादिभिरपः पीत्वा गोविन्दविष्णु इति करौ प्रक्षाल्य मधुसूदनत्रिविक्रमेति द्वाभ्यामङ्गुष्ठमूलेनोष्ठौ संमृज्य वामनश्रीधरेति द्वाभ्यां मुखमुन्मृज्य हृषीकेशेति वामकरं प्रोक्ष्य पद्मनाभेति पादौ प्रोक्ष्य दामोदरेति मूर्द्धानं प्रोक्ष्य संकर्षणेति संहतमध्यमाङ्गुलित्रयेणास्यं संस्पृश्य वासुदेवप्रद्युम्नेति द्वाभ्यामङ्गुष्ठानामिकाभ्यां चक्षुषी संस्पृश्याधोक्षजनारसिंहेति द्वाभ्यां तथैव श्रोत्रे संस्पृश्याच्युतेति कनिष्ठाङ्गुष्ठाभ्यां नाभिं संस्पृश्य जनार्दनेति पाणितलेन हृदयं संस्पृश्योपेन्द्रेति शिरः संस्पृश्य हरिकृष्णेति द्वाभ्यां दक्षिणबाहुमूले स्पृशेदिति । यद्वा, केशवादित्रिभिरपः पीत्वा गोविन्देति करौ प्रक्षाल्य अङ्गुष्ठप्रदेशिनीभ्यां घ्राणं स्पृशेत्, कराभ्यां विष्णुमधुसूदनेति, त्रिविक्रमवामनौ मुखपार्श्वयोरङ्गुष्ठमूलेन दक्षिणवामतः, श्रीधरेणोष्ठपुटावङ्गुष्ठमूलेन, हृषीकेशेत्यञ्जलिपुटं कृत्वा पद्मनाभेति पादौ स्पृष्ट्वा दामोदरेण मस्तके पञ्चाङ्गुलिना, संकर्षणेति (१)नासाबिलयोः करमुष्टिं कृत्वा दक्षिणवामनासापुटे वासुदेवप्रद्युम्नेति तर्जन्यङ्गुष्ठेन, दक्षिणवामनेत्रयोः अनिरुद्धपुरुषोत्तमावनामिकाङ्गुष्ठेन, दक्षिणवामनेत्रयोः अधोक्षजनारसिंहेति कनिष्ठिकाङ्गुष्ठेन, नाभिमूले अच्युतेति पञ्चाङ्गुलिना, करतलेन जनार्दनेति हृदि, तथैव मस्तके उपेन्द्रेति, पञ्चाङ्गुलिना हरिकृष्णेति दक्षिणवामांसयोः, सर्वत्र मध्ये मध्येऽपः स्पृशेत् इति पौराणाचमनम् ।

अथ स्मार्त्ताचमनं यथा--

कृत्वाऽऽदौ पादशौचं विमलमथ जलं त्रिः पिबेदुन्मृजेद्वि-
र्देशिन्यङ्गुष्ठयुग्मं सजलमभिमुखे नासिकारन्ध्रयुग्मम् ।
अङ्गुष्ठानामिकाभ्यां नयनयुगयुतं कर्णयुग्मं कनिष्ठा-
ङ्गुष्ठाभ्यां नाभिदेशे हृदयमथ तलेनाङ्गुलीभिः शिरोऽसौ ॥

अशक्तौ त्रिः पीत्वा हस्तौ प्रक्षाल्य मुखं प्रमृज्य खानि स्पृशेत् ।

(१) 'दरतिपञ्चा' घ० ङ० ।

अत्यशक्तौ त्रिः पीत्वा हस्तौ प्रक्षाल्य श्रोत्रं स्पृशेत्।

अथ श्रौताचमनम्—

गायत्र्यादित्रिभिः पीत्वा अङ्गिलङ्गैर्नवभिः स्पृशेत्।
सत्त्वव्याहृतिभिः प्राणान् शिरोव्याहृतिभिस्तथा॥
यद्वौङ्कारेणाचमनं यद्वा व्याहृतिभिर्भवेत्।
सावित्र्या वापि कर्तव्यं यद्वा कार्यममन्त्रकम्॥
भोजने जलपाने च शौचे रथ्योपसर्पणे।
व्यवहारे तथाऽन्यत्र पौराणाचमनं मतम्॥
स्मार्त्तमाचमनं प्रोक्तं स्नानसन्ध्यादिकर्मसु।
श्रौतमाचमनं प्रोक्तं ब्रह्मयज्ञेन कुत्रचित्॥ इति।

कौर्मे—

देवार्चने जपे होमे संध्ययोः श्राद्धकर्मणि।
स्नाने दाने व्रते यागे प्राणायामास्त्रयस्त्रयः॥

(१)(मार्कण्डेयः—

सङ्कल्पं च यथा कुर्यात्स्नानदानव्रतादिकम्।
अष्टाक्षरेण देवेशं नरसिंहमनामयम्॥
गन्धपुष्पादिभिर्नित्यमर्चयेदच्युतं नरः।)
अष्टाक्षरस्य मन्त्रस्य ऋषिर्नारायणः स्मृतः॥
छन्दश्च देवी गायत्री परमात्मा च देवता।
गन्धपुष्पादिसकलमनेनैव निवेदयेत्॥

अथवा—

पञ्चाक्षरेण मन्त्रेण पत्रं पुष्पं फलं तथा।
यः प्रयच्छति शर्वाय तदनन्तफलं स्मृतम्॥

अथवा—

प्रणवादिनमोन्तं च चतुर्थ्यन्तं च सत्तम।
देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्त्तितः॥

---

(१) कंसान्तर्गतं नास्ति घ० ङ०।

शौनकः—

प्रातर्मध्यंदिने सायं विष्णुपूजां समाचरेत् ।

सङ्ग्रहे—

(१)अर्घ्योदकं न्यसेद्वामे गन्धपुष्पादि दक्षिणे ।
अग्रेऽर्घ्यं पार्श्वतो दीपौ फलादीनि यथारुचि ॥

अन्यत्रापि स्ववामाग्रतः कलशः शङ्खघण्टे । 'येभ्यो माता' 'एषा वापित्रे' इतिमन्त्रद्वयं पूजामारम्भे पठेत् "मनुष्यगन्धात्ते धाप्ये अन्तरदधत येभ्यो माता एवापित्रे" इति ब्राह्मणदर्शनात् । आग्नेये

अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतम् ॥
अग्नौ क्रियावतां देवो दिवि देवो मनीषिणाम् ।
प्रतिमास्वल्पबुद्धीनां योगिनां हृदये रविः ॥
तस्य सर्वगतत्वाच्च हृदये भावितात्मनाम् ।

आवाहनं च—स्वहृत्कमले विष्ण्वादिकं स्वाभिलषितप्रकारेण ध्यात्वा भ्रूमण्डले विश्रमय्य ब्रह्मरन्ध्रं नीत्वा पुनर्हृदयमवरोप्य प्राणवायुना सहाकृष्य हस्तस्थपुष्पाञ्जलौ निधाय मूर्त्तौ स्थापनम् ।

स्थण्डिले नित्यमेवं स्यात्प्रतिमायां कृताकृतम् ।
चलायामचलायां तु शालग्रामशिलासु वा ॥
न कर्त्तव्यमिहाऽऽवाहमुखं पूर्वमेव तत् ।
आदावन्ते च मन्त्राभ्यां पुष्पाञ्जलिसमर्पणम् ॥

नारदीये—

आवाहनं ऋचा दद्यात्पूर्वं पुष्पाञ्जलिं हरेः ।
यागे चोन्मुखतामाप्त्यै अन्ते चोद्वासने ऋचा ॥ इति ।
तद्विष्णोरितिमन्त्रेण सूक्तेन पौरुषेण वा ।
नैवाभ्यां सदृशो मन्त्रो वेदे सूत्रश्च पावनः ॥

ऋग्विधाने—

अर्चनं सम्प्रवक्ष्यामि विष्णोरमिततेजसः ।
यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः ॥

---

१ 'अर्घ्योदकं' ख० घ० ङ० ।

वक्ष्ये पुरुषसूक्तस्य विधानं ह्यर्चनं प्रति।
आनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता॥
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः।
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे॥
तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत्।
पञ्चमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत्॥
सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा।
नवमीं नाभिमध्ये तु दशमीं हृदये तथा॥
एकादशीं कण्ठदेशे द्वादशीं वामबाहुके।
त्रयोदशीं दक्षिणे तु तथाऽऽस्ये च चतुर्दशीम्॥
अक्ष्णोः पञ्चदशीं चैव विन्यसेन्मूर्ध्नि षोडशीम्।
यथा देहे तथा देवे न्यासं कुर्याद्विधानतः॥
न्यासेन तु भवेत्सोपि स्वयमेव जनार्दनः।
ब्राह्मणोस्येत्यादिकाभिर्ऋग्भिः पञ्चाङ्गकल्पना॥
हृदयाय नमः पूर्वं शिरसे वह्निवल्लभा।
शिखायै वषडित्युक्तं कवचायहुमीरितम्॥
नेत्रत्रयाय वौषट् स्यादस्त्राय फडिति क्रमात्।
षडङ्गमन्त्रानित्युक्तान् षडङ्गेषु नियोजयेत्॥
पञ्चाङ्गनियमो यस्य तत्र नेत्रमनुं त्यजेत्।
अङ्गहीनस्य मन्त्रस्य नैवाङ्गानि प्रकल्पयेत्॥
एवं न्यासविधिं कृत्वा पश्चाद्यागं समारभेत्।
आद्ययावाहयेद्देवमासनं तु द्वितीयया॥
पाद्यं तृतीयया चैव चतुर्थ्याऽर्घ्यं प्रदापयेत्।
पञ्चम्याचमनं दद्यात्षष्ठ्या स्नानं समाचरेत्॥
सप्तम्या तु ततो वासो ह्यष्टम्या चोपवीतकम्।
नवम्या गन्धमेवं तु दशम्या पुष्पकं तथा॥
एकादश्या तथा धूपं द्वादश्या दीपमेव च।

नैवेद्यं च त्रयोदश्या नमस्कारे चतुर्दशी ॥
प्रदक्षिणे पञ्चदशी मार्जने षोडशी तथा ।
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ॥
हुत्वा षोडशभिर्मन्त्रैः षोडशान्नस्य चाहुतीः ।
पुनः षोडशभिर्मन्त्रैर्दद्यात्पुष्पाणि षोडश ॥
तच्च सर्वं जपेद् भूयः पौरुषं सूक्तमुत्तमम् ।
षण्मासात्सिद्धिमाप्नोति एवमेव समर्चयन् ॥
स्नानं गन्धं धूपदीपं नैवेद्यं पञ्चधार्चनम् ॥ इति ।

ग्रन्थान्तरे-"नवम्याभरणं स्मृतम् । दशम्या गन्धदानं स्यादेकादश्या च माल्यकम् ॥ द्वादश्या धूपदानं स्यात् त्रयोदश्य च दीपकम् । चतुर्दश्या तु नैवेद्यं पञ्चदश्या नमस्क्रिया । उद्वासनं च षोडश्या उपचारांस्तु षोडश" इति । ग्रन्थान्तरे—

दक्षिणां तु यथाशक्त्या षोडशेन प्रदापयेत् ।
ततः प्रदक्षिणं कृत्वा जपं कुर्य्यात्समाहितः ॥

शौ(१)नकः-

यथाशक्ति जपित्वा च सूक्तं चास्मै निवेदयेत् । इति ।
अङ्गुष्ठाग्रे तु गोविन्दं तर्जन्यां तु महीधरम् ।
मध्यमायां हृषीकेशमनामिक्यां त्रिविक्रमम् ॥
कनिष्ठिकयां न्यसेद्विष्णुं करमध्ये तु माधवम् ।
एवं न्यासविधिं कृत्वा देहाङ्गन्यासमारभेत् ॥
मस्तके केशवं न्यस्य भाले नारायणं तथा ।
माधवं कर्णयोरक्ष्णोर्विष्णुं चैव तु नासयोः ॥
मुखे मधुसूदनं च कण्ठदेशे त्रिविक्रमम् ।
वामनं विन्यसेद्बाह्वोः श्रीधरं विन्यसेद्धृदि ॥
नाभ्यां विद्यादधृषीकेशं कट्यां वै पद्मनाभकम् ।
दामोदरं पादयोश्च न्यासं द्वादशधा चरेत् ॥

---

(१) शौनकः' नास्ति ख० ङ०।

एवं पुरुषसूक्तेन सर्वाङ्गन्यासमाचरेत् ॥ इति ।

स्कान्दे—

पञ्चाष्ट षोडश प्रोक्ताः द्वात्रिंशदुपचारकाः ।
गन्धपुष्पे धूपदीपौ नैवेद्यं पञ्चमं स्मृतम् ॥
प्रदक्षिणां नमस्कारं ताम्बूलैः सह चाष्टकम् ।
आवाहनासने पाद्यमर्घ्यमाचमनीयकम् ॥
स्नानं वस्त्रोपवीते च गन्धपुष्पे च धूपकम् ।
दीपो नैवेद्यमाख्यातं प्रादक्षिण्यनमस्कृती ॥
विसर्जनमिति प्रोक्ता उपचारास्तु षोडश ।
मधुपर्कस्त्वलङ्कारश्चाक्षताः शुद्धमिश्रिताः ॥
ताम्बूलं दक्षिणा चैव फलं नीराजनं तथा ।
मन्त्रपुष्पाञ्जलिस्तोत्रच्छत्रचामरवाहनम् ॥
नृत्यं गीतं च वाद्यं च पर्यङ्कमिति षोडश ।
आवाहनादिसंमिश्रा द्वात्रिंशदुपचारकाः ॥

प्रपञ्चसारे—

आसनस्वागते चार्घ्यपाद्ये चाचमनीयके ।
मधुपर्काचमस्नानवसनाभरणानि च ॥
सगन्धसुमनोधूपदीपनैवेद्यचन्दनान् ।
प्रयोजयेदर्चनायामुपचारांस्तु षोडश ॥
अर्घ्यपाद्याचमनकमधुपर्कासनान्यपि ।
गन्धादयो निवेद्यान्ता उपचारा द(?)श क्रमात् ॥
गन्धादिका निवेद्यान्ता पूजा पञ्चोपचारिकी ।
सपर्या त्रिविधा प्रोक्ता तासामेकां समाचरेत् ॥ इति ।

अष्टादशपक्षे उपवीतानन्तरमाभरणानि, नैवेद्यानन्तरं माल्यानुलेपनं च द्रष्टव्यम् । अन्यत्रापि—

आसनाभ्यञ्जने तद्वदुद्वर्त्तननिरूपणे ।
संमार्जने सर्पिरादिस्नापनावाहने ततः ॥

---

(१) 'दश' नास्ति ङ०।

पाद्यार्घ्याचमनीयं च स्नानं च मधुपर्ककम् ।
पुनराचमनीयं च वस्त्रयज्ञोपवीतके ॥
अलंकारो गन्धपुष्पे धूपदीपौ तथैव च ।
ताम्बूलानि च नैवेद्यं पुष्पमाला तथैव च ॥
अनुलेपं च शय्या च चामरव्यजने तथा ।
आदर्शनं तथा चैव नमस्कारोऽथ नर्त्तनम् ॥
गीतवाद्यादिदानानि स्तुतिहोमप्रदक्षिणम् ।
दन्तकाष्ठं प्रधूतं च ततो देवविसर्जनम् ॥
उपचारा इमे प्रोक्ताः षट्त्रिंशत्सुरपूजने ।

हेमाद्रौ—

आवाहनासने पाद्यमर्घ्यमाचमनं तथा ।
गन्धपुष्पं तथा धूपं दीपं च मधुपर्ककम् ॥
उपहारं तथाचामं स्नानं चाङ्गविभूषणम् ।
वस्त्रोपवीतमाचाममलंकारविलेपने ॥
गन्धपुष्पं तथा धूपदीपमञ्जनमेव च ।
आदर्शं मङ्गलं सर्वदेयं सर्वात्मना तथा ॥
होमं भोजनमाचाममलंकारास्तथा पुनः ।
गन्धादि च पुनर्दद्यान्मुखवासं प्रदक्षिणम् ॥
स्तुतिदण्डनमस्कारमात्मनो विनिवेदनम् ।
स्तुतिः वैदिकी पौराणिकी स्वकृता वा ॥

भार्गवार्चनदीपिकायां षष्टिरुपचाराः—

पूर्वं प्रबोधनं कुर्याज्जयशब्दांस्तथा पुनः ।
संस्कारं च ततः कुर्यात्ततो नीराजनं परम् ॥
ततो दिव्यासनं दद्यात्ततो वै दन्तधावनम् ।
पादप्रक्षालनं कुर्यात्ततोऽर्घ्यं वै प्रकल्पयेत् ॥
आचामं मधुपर्कं च पुनराचमनीयकम् ।
ततः सुगन्धितैलेन मर्दनं कारयेद्धरेः ॥

ततोऽभ्यङ्गं सुगन्धैस्तु कुर्यात्तैलापसारणम् ।
ततः पुण्योदकैः कुर्यादभिषेकं सुगन्धिभिः ॥
क्षीरेण दध्ना च तथा घृतेन मधुनापिच ।
शर्करया मन्त्रयुक्तैर्गन्धपुष्पोदकैरपि ॥
महाभिषेकमाचाममङ्गवस्त्रं ततोऽर्पयेत् ।
वाससी परिधानार्थमुपवीतं तथाचमम् ॥
गन्धमाभरणं पुष्पं धूपं नीराजनं तथा ।
दृष्ट्युत्तारणनैवेद्ये सुखवासं सुगन्धिभिः ॥
ताम्बूलं शयनं केशसाधनं वस्त्रदाजकम् ।
किरीटचन्दने दद्यात्तत आभरणानि च ॥
पुष्पनीराञ्जनादर्शा मण्डपागमनं ततः ।
तत्रासनं पाद्यमर्घ्यमाचामं धूपदीपकौ ॥
नैवेद्यं च सताम्बूलं चन्द्रनीराञ्जनं तथा ।
चामरव्यञ्जनं छत्रं पुरोगीतं मनोहरम् ॥
मृदङ्गादिस्वनं नृत्यं नमस्कारं प्रदक्षिणाम् ।
स्तुतिं कुर्यात्ततो विष्णोश्चरणौ मस्तके न्यसेत् ॥
निर्माल्यधारणं कुर्यान्नैवेद्यांशस्य भोजनम् ।
सेवामुद्दिश्योपविशेन्मञ्चके तूलिकां नयेत् ॥
सुखासनेन शयने नीत्वा तं तत्र शाययेत् ।
अर्चेत्कुसुमताम्बूलैः पादौ संवाहयेत्ततः ॥
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनं ततः ॥ इति ।

ऋग्विधाने—

दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
(१) अर्चितं स्याज्जगदिदं त्रैलोक्यं सचराचरम् ॥

पाद्मे—

शालिग्रामशिलायां च नावाहनविसर्जने ।

---

(१) 'अर्जितं' ख० ।

आवाहनऋचा दद्यात्पूर्वं पुष्पाञ्जलिं हरेः ॥
यागे चोन्मुखतामाप्त्या अन्ते चोद्वासने ऋच
वस्त्रमभ्युक्षणाच्छुध्येदपरं तु दिने दिने ॥

वस्त्रपदमलङ्काराद्युपलक्षणम् ,

न निर्माल्यं भवेद्वस्त्रं स्वर्णरत्नादिभूषणम्

इति वचनात् । रत्नादिखचितमासनमन्यत्र बोध

पाद्यं श्यामाकदूर्वाब्जविष्णुक्रान्ताजलादिभि
गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपैः ॥

अथार्घ्यः—तत्र शिवे—

आपः क्षीरं कुशाग्राणि अक्षता मधुतण्डुला
सिताश्च सर्षपाश्चैव अर्घोऽष्टाङ्गः प्रकीर्त्तितः

विष्णौ तु—

अर्घं पुष्पाक्षतयवैः कुशाग्रतिलसर्षपैः ।
गन्धदूर्वाजलैः प्रोक्तं पाणौ वा मस्तकेऽपि

शुद्धोदकेनाचमनम् । स्नानं वस्त्रं च, उभयत्रा

अथ गन्धः—

गन्धेषु चन्दनं पुण्यं चन्दनादगुरुर्वरः ।
कृष्णागुरुस्ततः श्रेष्ठः कुङ्कुमं तु ततो वरः

गारुडे—

कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य
कुङ्कुमस्य त्रयश्चैव शशिनः स्याच्चतुः
कर्पूरचन्दनं दर्पः कुङ्कुमं च समांशकम् ।
सर्वगन्धसमं प्रोक्तं समस्तसुरवल्लभम् ॥

काशीखण्डे—

कस्तूरिकाया द्वौ भागौ द्वौ भागौ कुङ्कुमस्य
चन्दनस्य त्रयो भागाः शशिनस्त्वेक एः

(१) 'तु' घ० ङ०

यक्षकर्दम इत्येष सर्वदेवमनोहरः ।
कर्पूरमगुरुश्चैव कस्तूरी चन्दनं तथा ॥
कङ्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः ।

वस्तु—

दारिद्र्यं पङ्कं कुर्यादस्वास्थ्यं रक्तचन्दनम् ।
उशीरं विप्रविभ्रंशमन्ये कुर्युरुपद्रवम् ॥

इति निषेधः, स केवलपरः;

चन्दनागुरुकर्पूरकुङ्कुमोशीरपद्मकैः ।
अनुलिप्तो हरिर्भक्त्या वरान्भोगान्प्रयच्छति ॥

इति आग्नेये मिलितानां विधानात् । स्कान्दे—

चन्दनागुरुकर्पूरपङ्कं गन्धमिहोच्यते ।
चन्दनागुरुकर्पूरचोर कुङ्कुमरोचना ॥
जटामांसी कपियुता शक्तिगन्धाष्टकं मतम् ।

चोरः कचोरः ।

चन्दनागुरुह्रीबेरकुष्ठकुङ्कुमसेव्यकाः ।
जटामांसी मुरमिति विष्णोर्गन्धाष्टकं मतम् ॥
चन्दनागुरुकर्पूरतमालजलकुङ्कुमम् ।
कु(१)सीतं कोष्ठसंयुक्तं शैवगन्धाष्टकं मतम् ॥

शिवार्चनचन्द्रिकायां—

ह्रीबेरं चन्दनं कुष्ठमगुरुं कुङ्कुमं मुरम् ।
सेव्यकं च जटामांसी वैष्णवं तदुदीरितम् ॥
जलकाश्मीरकुष्ठैस्तु रक्तचन्दनचन्दनम् ।
तमालागुरुकर्पूरैः शाम्भवं चाष्टगन्धकम् ॥
चन्दनागुरुकर्पूरैः केसरै रोचनान्वितैः ।
सशिल्लकजटामांसीसटीभिः शक्तिसम्भवम् ॥

---

(१) 'कुसीतं कोष्णसंयुक्तं' ख०

स्कान्दे—

यो ददाति हरेर्नित्यं तुलसीकाष्ठचन्दनम् ।
युगानि वसते स्वर्गे ह्यनन्तानि नरोत्तमः ॥
तुलसीदललग्नेन चन्दनेन जनार्दनम् ।
विलेपयेत्तु यो नित्यं लभते चिन्तितं फलम् ॥

गणपतिकल्पे—

शङ्खपात्रस्थितं गन्धं मन्त्रैर्दद्यात्कनिष्ठया । इति ।

अथ पुष्पम्—

शुद्धकाञ्चनपुष्पाणि रत्नमुक्ताफलान्यपि ।
सर्वाणि तुलसीपत्रकलां नार्हन्ति षोडशीम् ॥
उत्तमं तुलसीपुष्पं मध्यमं तुलसीदलम् ।
अधमं तुलसीपत्रं काष्ठचूर्णं ततोऽधमम् ॥
तुलसीमञ्जरीमालां विष्णवे यो निवेदयेत् ।
शालग्रामशिला येन पूजिता तुलसीदलैः ॥
स पारिजातमालाभिः पूज्यते सुरसद्मनि ।
श्यामापि तुलसी विष्णोः प्रिया गौरी विशेषतः ॥
तुलस्यौ पङ्कजे जात्यौ केतक्यौ करवीरकौ ।
शस्तानि दश पुष्पाणि तथा रक्तोत्पलानि च ॥
उत्पलानि च नीलानि कह्लारकुसुमानि च ।
मालतीकुन्दमन्दारनन्दावर्त्तादिकान्यपि ॥

पुष्पाध्यायादिग्रन्थान्तरे विस्तरः ।

अथ धूपः—

शङ्करस्याथवा विष्णोर्घृतयुक्तं च गुग्गुलम् ।
दद्याद्भक्त्या नरो यस्तु सर्वपापैः स (२)मुच्यते ॥

हारीतः—

रुहिकाक्षकणं दारुः सिह्लकं सागुरुं सितम् ।
शङ्खं जातीफलं श्रीगः प्रिया धूपा हरेरिमे ॥

---

(१) 'विलेपयति यो' ङ० (२) 'प्रमुच्यते' ङ०

रुहिका मांसी, कणो गुग्गुलभेदः, दारुः देवदारुः, सिल्हकं तुरुष्कं, सितः कर्पूरः, शङ्खं नखं, श्रीगश्चन्दनम्।

विना मृगमदं धूपे जीवजातं विवर्जयेत्।
महिषाख्यं गुग्गुलं च आज्ययुक्तं सशर्करम्॥
धूपं ददाति राजेन्द्र नरसिंहाय भक्तिमान्।
कृष्णागुरुसमुत्थेन धूपेन श्रीधरालयम्॥
धूपयेद्वैष्णवो यस्तु स मुक्तो नरकार्णवात्।

भविष्ये—

अगुरु चन्दनं मुस्ता सिल्हकं वृषणं तथा।
समभागं तु कर्त्तव्यं धूपोऽयममृताह्वयः॥
श्रीखण्डग्रन्थिसहितमगुरुं सिल्हकं तथा।
मुस्ता तथेन्दुर्भूतेश शर्करा च दहेत्त्यहम्॥
कृष्णागुरुं सिल्हकं च बालवं वृषणं तथा।
चन्दनं तगरं मुस्ता प्रबोधः शर्करान्वितः॥
कर्पूरं चन्दनं कुष्ठमुशीरं सिल्हकं तथा।
ग्रन्थिकं वृषणं भीमं कुङ्कुमं गृञ्जनं तथा॥
हरीतकी तथोशीरं यक्षधूप उदाहृतः।
वृषणं सिल्हकं बिल्वं श्रीखण्डमगुरुं तथा॥
कर्पूरं च तथा मुस्ता शर्करा सत्वचा द्विज।
इत्येष विजयो धूपः स्वयं देवेन निर्मितः॥
मधु मुस्ता घृतं गन्धो गुग्गुल्वगुरुशैलजम्।
सरलं सिद्धसिद्धार्था दशाङ्गो धूप उच्यते॥

मदनरत्ने—

त्रिभागकुष्ठो द्विगुणो गुडश्च लाक्षात्रयं पञ्च नखस्य भागाः।
हरीतकी सर्जरसश्च मांसी भागैकमेकं त्वथ शैलजस्य॥
घृतस्य चत्वारि पुरस्य चैकं धूपो दशाङ्गः कथितो मुनीन्द्रैः।
गन्धो मुस्ता, पुरो गुग्गुलुः।

चन्द्रिकायां—

धूपस्य व्यजनेनैव धूपेनाङ्गविधूपने ।
नीराञ्जनेषु सर्वेषु विष्णोर्नामानि कीर्त्तयेत् ॥

नारसिंहे—

घृतेन वाथ तैलेन दीपं प्रज्वालयेन्नरः ।

तिलोद्भवं तैलम् । स्मृत्यर्थसारे—

नैवेद्यार्थं पृथक् भाण्डे स्नाता पत्नी पचेत्तथा ।
वैश्वदेवार्थमन्यस्मिन्व्यञ्जनानि पृथक् पृथक् ॥ इति ।
दरिद्रश्चेत्स्वभोज्यं यत्तदीशाय निवेदयेत् ।
अनिवेद्य हरे भुञ्जन्सप्त जन्मानि नारकी ॥

पाद्मे—

हविः शाल्योदनं दिव्यमाज्ययुक्तं सशर्करम् ।
नैवेद्यं देवदेवाय यावकं पायसं तथा ॥
यावद्भक्ष्यं भवेत्पुंसस्तावद्देयं जनार्दने ।
नैवेद्यवस्त्वलाभे तु तोयान्यपि निवेदयेत् ॥

सारे—

(१)मण्डले चतुरस्रे तु पात्रं संस्थाप्य यत्नतः ।
अस्त्रमन्त्रेण संप्रोक्ष्य चक्रमुद्राभिरक्षितम् ॥
धेनुमुद्रां प्रदर्श्याथ गन्धपुष्पैः प्रपूज्य च ।
देवे पुष्पाञ्जलिं दत्त्वा मन्त्रमेतमुदीरयेत् ॥
हेमपात्रस्थितं दिव्यं परमान्नं सुसंस्कृतम् ।
पञ्चधा षड्रसोपेतं गृहाणेमं सुसिद्धये ॥ इति ।

वैदिकमन्त्राभावेऽयं बोध्यः ।

प्रक्षिप्य तुलसीं प्रोक्ष्य वामाङ्गुष्ठेन संस्पृशेत् ॥

अत्र ग्रासमुद्रा दक्षिणेन कार्या । अथवा—

ग्रासमुद्रां वामदोष्णा विकचोत्पलसन्निभाम् ।
प्रदर्शयन् दक्षिणेन प्राणादीनां च दर्शयेत् ॥ इति ।

(१) 'मण्डपे' ख०

पुनराचमनं दद्यात्करोद्वर्त्तनमेव च ।
गाण्डूषिकं जलं दत्त्वा दद्यादाचमनं ततः ॥
विष्वक्सेनोद्धवाक्रूरसनकाद्याः शुकादयः ।
श्रीकृष्णस्य प्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः ॥
बादरायणचण्डीशनन्दिभृङ्गिरटादयः ।
सदाशिवप्रसादोऽयं सर्वे गृह्णन्तु शाम्भवाः ॥ इति ।
सकर्पूरं च ताम्बूलं दद्यान्नीराजनं तथा ।

चन्द्रिकायां—

लवङ्गजातीकङ्कोलचूर्णं क्रमुकखादिरम् ।
कर्पूरसहितं पत्रं ताम्बूलं च समर्पयेत् ॥

ताम्बूलीपत्राणि च श्वेतानि देयानि,

श्वेतपत्रं च चूर्णं च क्रमुकस्य फलानि च ।
नारिकेलफलोपेतं मातुलिङ्गसमायुतम् ॥
एलाकङ्कोलकर्पूरैर्मुखवासं प्रचक्षते ।

इति वचनात् । अशक्तं प्रति—

महापिप्पलपत्राणि क्रमुकस्य फलानि च ।
शुक्तिक्षारेण संयुक्तं ताम्बूलमिति कीर्त्तितम् ॥

इति वचनात् । संख्यामाह भरद्वाजः—

क्रमुकस्य फलान्यष्टावनुच्छिष्टानि सन्ति च ।
पत्राणि नागवल्ल्याश्च द्विगुणं शुक्तिचूर्णकम् ॥
कर्पूरसहितं यत्तत्ताम्बूलमिति भाषितम् ।

अथवा—

सुपूगं सप्तपत्रं च चूर्णेन च समन्वितम् ।
अदत्त्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद् बुधः ॥
एकपूगं मुखारोगं द्विपूगं निष्फलं भवेत् ।
अतिश्रेष्ठं त्रिपूगं च अधिकं नैव दुष्यति ॥
अस्यालाभे यथालब्धं पत्रं क्रमुकचूर्णकम् ।
ताम्बूलं भावयेच्छुद्धं यत्तन्नयनवल्लभम् ॥

स्कान्दे—

ताम्बूलं दक्षिणा चैव फलं नीराजनं तथा ।
मन्त्रपुष्पाञ्जलिस्तोत्रच्छत्रचामरवाहनम् ॥
महानीराजनं श्रीमन्मङ्गलेशाय कल्पयेत् ।
कर्पूरेण तु यः कुर्याद्भक्त्या केशवमूर्द्धनि ॥
आरात्रिक मुनिश्रेष्ठ प्राविशद्विष्णुमव्ययम् ।
उत्थायोत्थाय कर्त्तव्यं प्रणामं दण्डवद् भुवि ॥
न देवं पृष्ठतः कृत्वा प्रणामं क्वचिदाचरेत् ।
वरमुत्थाय कर्त्तव्यं न वृथा भ्रमणं चरेत् ॥

दक्षिणे भागे नमस्कारः कार्यः,

अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे ।
जपहोमनमस्कारान्न कुर्वीत कदाचन ॥

इति निषेधात् । (१)शिवे तु पुरतोऽपि—

शंभोः पशुपतेरग्रे दण्डवत्पतितो भुवि ।
पतन्ति पातकाः सर्वे नोत्तिष्ठन्ति कदाचन ॥

इति वचनात् । वाराहे—

वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम् ।
सदा स जायते मूर्खः सप्तजन्मनि भामिनि ॥

अन्तरीयान्यद्वस्त्रमिह धर्त्तव्यं योग्यत्वात् ।

नमस्कारेण चैकेन अष्टाङ्गेन हरिं स्मरेत् ।
सूर्याभिवन्दनं कुर्यादुत्थायोत्थाय दण्डवत् ॥
प्रदक्षिणं न कुर्वीत पुरतः पृष्ठदर्शनात् ॥

नमस्कारानन्तरं प्रादक्षिण्यं विनैव नमस्कारान्तरं कार्यमित्यर्थः । "न वृथा भ्रमणं चरेत्" इतिवचनाच्च । अष्टाङ्गो वा कार

दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा तथा ।
मनसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरितः ॥

---

(१) 'शिवेऽपि' घ० ङ०

अन्थान्तरे—

उरसा शिरसा दृष्ट्या मनसापि धिया तथा ।
पद्भ्यां कराभ्यां वाचा च प्रणामोऽष्टाङ्ग ईरितः ॥
पद्भ्यां कराभ्यां शिरसा पञ्चाङ्गः प्रणतिः स्मृता ।

(१)यद्वा—

शिरो हस्तौ च जानू च चिबुकं बाहुकद्वयम् ।
पञ्चाङ्गस्तु नमस्कारो विद्वद्भिः समुदाहृतः ॥

भविष्ये—

जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवेशे सर्वान्कामानवाप्नुयात् ॥
असम्भवे (२)केवलाभ्यां कराभ्यां कार्यः ।
एकहस्तनमस्कारं एका चैव प्रदक्षिणा ॥
अकालदर्शनं चैव हन्ति पुण्यं पुराकृतम् ॥

इति चन्द्रिकाधृतवचनात् । चन्द्रिकायां—

ततः प्रदक्षिणं कुर्याद्धामं जयजयस्वनैः ।
चक्रवद् भ्रामयेदङ्गं पृष्ठतोऽङ्गं न दर्शयेत् ॥

नारदीये—

पदान्तरे पदं न्यस्यन् हस्तौ चलनवर्जितौ ।
स्तुतिर्वाचि हृदि ध्यानं चतुरङ्गप्रदक्षिणम् ॥

स्कान्दे—

प्रदक्षिणं प्रकुर्वीत शतमष्टोत्तरं सदा ।
तिस्रः सर्वेषु देवेषु सूर्ये सप्त प्रकीर्तिताः ॥
विष्णौ चत्वारि वा त्रीणि दुर्गाया एकमेव हि ।
प्रदक्षिणात्रयं कुर्याच्छिवस्यायतने नरः ॥
एकां चण्ड्यां रवौ सप्त तिस्रः कुर्याद्विनायके ।
'एका चैव प्रदक्षिणा' इति अपराधान्तर्गतं तु देवीभिन्नपरम् ।

(१) 'यद्वा' नास्ति घ० ङ०
(२) 'असम्भवे मुकुलिताभ्यां कराभ्यां' घ० ङ०

परिशिष्टे तु—

एकां विनायके कुर्याद्वे सूर्ये त्रीणि शंकरे ।
चत्वारि केशवे कुर्यात्सप्ताश्वत्थे प्रदक्षिणाः ॥ इति ।

पौरुषसूक्तं जपस्तोत्रादि चोक्तम् । पारिजाते—

जानुभ्यां धरणीं गत्वा मूर्ध्ना हरिमथो (१)वदेत् ।

तत्र मन्त्रः—

भगवन्देवदेवेश पुरुषोऽसि सनातन ।
क्षमस्व पुण्डरीकाक्ष भक्तस्य तु विशेषतः ॥
ज्ञानतोऽज्ञानतो वापि कृतं न्यूनाधिकं मया ।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाज्जनार्दन ॥

ततः—

मा(४) मकीनं च सकलं हरये तुभ्यमर्पये ।

इति संकल्पात्मकं स्वात्मार्पणम् ,

(४)मामकीनं च सकलं हरये सम्यगर्पयेत् ॥

इति वचनात् ।

ॐतत्सदिति संप्रोक्तो मन्त्रः स्वात्मसमर्पणे ।

ततः सजलं शंखं नीराजयेत् ,

शङ्खमध्यस्थितं तोयं भ्रामितं केशवोपरि ।
अङ्गलग्नमनुष्याणां ब्रह्महत्याऽयुतं दहेत् ॥

इति लिङ्गात् । एतद्वचनादेव शिरआद्यङ्गप्रोक्षणमपि हस्तेन कार्यम्

हस्तेन प्रोक्षणं कृत्वा हत्याकोटिविनाशनम् ।

इति वचनात् ।

भ्रामयित्वा हरेर्मूर्ध्नि मन्दिरं शंखवारिणा ।
प्रोक्षयेद्वैष्णवो यस्तु नाऽशुभं तद्गृहे वसेत् ॥ इति ।

गृहप्रोक्षणमपि हस्तेनैव, दृष्टन्यायात् । नारदीये—

उदकं चन्दनं चक्रं शंखं च तुलसीदलम् ।

(१) 'वहेत्' घ० ङ० (४) 'मामदीयं' घ० ङ०

घण्टां पुरुषसूक्तं च ताम्रपात्रम(१)थाष्टमम् ॥
शालग्रामशिला चैव नवभिस्तीर्थमुच्यते ।

अथ तीर्थग्रहणं चन्द्रिकायाम्—

विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनम् ।
तदेवाष्टगुणं पापं भूमौ बिन्दुनिपातनात् ॥

तच्च पात्रेणैव कार्यम्,

यः पादसलिलं विष्णोः करेण पिबते यदि ।
स मूढो नरकं याति यावदिन्द्राश्चतुर्दश ॥

इति भविष्ये करस्य निषेधात् ।

शालग्रामशिलातोयं पिबेद्यः सकरेण तु ।
अज्ञानादैन्दवं प्रोक्तं ज्ञानादब्दं समाचरेत् ॥
श्रीविष्णोः पादसलिलं करे कृत्वा मुखे क्षिपेत् ।
अदत्त्वा पिबते यो वै रौरवे नरके वसेत् ॥

इत्यत्र तु मुखे क्षेपणं न तु पानमिति न तद्विरोधः । एवं—

धारयेन्मूर्ध्नि बालिश्याद्ब्रह्महा स निगद्यते ।

इति वचनं तु चन्द्रिकायां विवृतम्—

शालिग्रामशिलातोयमपीत्वा यस्तु मस्तके ।
प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते ॥ इति ।

तत्र मन्त्रः—

देवदेव जगन्नाथ शङ्खचक्रगदाधर ।
देहि विष्णो ममानुज्ञां तव तीर्थनिषेवणे ॥

तत्र वैदिको मन्त्रः-तदस्य प्रियमभि पाथो अस्यां नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥ अथ पौराणो मन्त्रः—

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥

(१) 'मथाष्टकम्' ख०।

स्पृष्ट्वा तु मृतकं चैव असत्कारकृतं तु वै ।
पञ्चमं चापराधं तु न क्षमामि वसुन्धरे ॥
स्पृष्ट्वा तु मृतकं यस्तु नाचम्य स्पृशते हि माम् ।
षष्ठं तमपराधं वै न क्षमामि वसुंधरे ॥
ममार्चनस्य काले तु पुरीषं यस्य गच्छति ।
सप्तमं चापराधं तु न क्षमामि वसुंधरे ॥
ममैवार्चनकाले तु यस्त्वसत्यं प्रभाषते ।
नवमं चापराधं तं न क्षमामि वसुन्धरे ॥
अविधानेन मां स्पृश्य मामेव प्रतिपद्यते ।
दशमश्चापराधोऽयं मम चाप्रियकारकः ॥
सक्रोधो यः स्पृशेद्भावं चित्तं कृत्वा चलाचलम् ।
एकादशं चापराधं न क्षमामि वसुन्धरे ॥
अकर्मण्यानि पुण्यानि यस्तु मामुपकल्पयेत् ।
द्वादशं चापराधं तं न क्षमामि वसुन्धरे ॥
यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति ।
त्रयोदशं चापराधं न क्षमामि वसुन्धरे ॥
अन्धकारे च मां देवि यः स्पृशेत्तु कदाचन ।
चतुर्दशं चापराधं न क्षमामि वसुन्धरे ॥
यस्तु कृष्णेन वस्त्रेण मम कर्माणि कारयेत् ।
पञ्चदशं चापराधं न क्षमामि वसुंधरे ॥
अधौतेन च वस्त्रेण यस्तु मामुपसर्पति ।
षोडशं चापराधं तं न क्षमामि वसुंधरे ॥
स्वयमन्नं च यो दद्यादज्ञाताय च माधवम् ।
सप्तदशापराधं तं न क्षमामि वसुन्धरे ॥
यस्तु मात्स्यानि मांसानि भक्षयित्वोपसर्पति ।
अष्टादशापराधं तं न क्षमामि वसुन्धरे ॥
जालपादं भक्षयित्वा यस्तु मां प्रतिपद्यते ।
एकोनविंशापराधं न क्षमामि वसुन्धरे ॥

दीपं स्पृष्ट्वा तु यो देवि मम कर्माणि कारयेत्।
विंशतिं चापराधं तं न क्षमामि वसुन्धरे॥
श्मशानं यस्तु वै गत्वा मामेव प्रतिपद्यते।
एकविंशापराधं तं न क्षमामि वसुंधरे।
पिण्याकं भक्षयित्वा तु यो मामेवाभिगच्छति।
द्वाविंशं चापराधं तं न क्षमामि वसुन्धरे॥
यस्तु वाराहमांसानि भक्षयित्वोपसर्पति।
अपराधं त्रयोविंशं न क्षमामि वसुन्धरे॥
सुरां पीत्वा च यो मर्त्यः कदाचिदुपसर्पति।
अपराधं चतुर्विंशं न क्षमामि वसुंधरे॥
कुसुम्भशाकं भक्षयित्वा यस्तु मामुपसर्पति।
अपराधं पञ्चविंशं न क्षमामि वसुन्धरे॥
परप्रावरणेनैव यस्तु मामुपसर्पति।
षड्विंशापराधं तं न क्षमामि वसुन्धरे॥
अजीर्णेन समाविष्टो यस्तु मामुपसर्पति।
त्रिंशकं चापराधं तं न क्षमामि वसुन्धरे॥
गन्धपुष्पाण्यदत्त्वा तु यस्तु धूपं प्रयच्छति।
एकत्रिंशं चापराधं न क्षमामि वसुंधरे॥
विना तूर्यादिघोषेण द्वारस्योद्घाटनं मम।
महापराधं जानीयाद् द्वात्रिंशं तं मम प्रिये॥

एषु प्रत्येकं प्रायश्चित्तं तत्रैव।

संवत्सरस्य मध्ये च तीर्थे सूकरके मम॥
कृतोपवासस्तु नरो गङ्गायां शुद्धिमाप्नुयात्।
मथुरायां तथा चैव सापराधः शुचिर्भवेत्॥

स्कान्दे—

जागरेद् द्वादशीरात्रौ पठेद्यस्तुलसीस्तवम्।
द्वात्रिंशदपराधांश्च क्षमते तस्य केशवः॥

तस्यापचितिमन्विच्छन् जपेदष्टाक्षरं मनुम् ।
अयुतं सर्वपापघ्नं ततः शुद्धो भवेन्नरः ॥
निःशङ्कं देवतागारं प्रवेशं च करोति यः ।
असिपत्रवने घोरे पतत्यब्रह्मणो दिनम् ॥
पञ्चरात्रोपवासेन पञ्चगव्येन शुद्धयति ।
अप्रक्षालितपादश्च प्रविशेद्देवतालयम् ॥
विष्ठाकृमिर्भवेत्पापी सप्त(१)जन्मसु मानवः ।
देवस्यानम्रशिरसा गच्छेदभिमुखं नरः ॥
कुम्भीपाके महाघोरे पतत्याचन्द्रतारकम् ।
गोमयालिप्तदेशे तु हरेः पूजां करोति यः ॥
सुतप्तवालुके घोरे नरके पतति ध्रुवम् ।
त्रिरावृत्य स पापात्मा गीतां शुद्धयति निश्चयः ॥
धूपहीनां च यः कुर्यात्पूजां विष्णोर्महात्मनः ।
तुषाग्नौ नाम नरके यावदिन्द्राश्चतुर्दश ॥
दशाङ्गं गुग्गुलं दत्त्वा स पापी शुद्ध्यति ध्रुवम् ।
घण्टानादविहीनां च देवतार्चां करोति यः ॥
कोलाहले महाघोरे नरके पतति ध्रुवम् ।
वेदपारायणं कृत्वा स पुमान् शुद्धिमाप्नुयात् ॥
मुखफूत्कृत्य वह्नौ तु धूपधूमं करोति यः ।
महातमसि नरके पतत्यालोक(२)संक्षयम् ॥
दीपमालां हरेः कृत्वा स च शुद्धिमवाप्नुयात् ।
स्तोत्रपाठं विना तूष्णीं यो निर्माल्यं विसर्जयेत् ॥
निरुच्छ्वासे च नरके यावदिन्द्रपदं पतेत् ।
सहस्रनामपठनाच्छुद्धिं याति यतव्रतः ॥
अग्रोदकं त्रिवारं न वस्त्रेण शोधयेद्यदि ।
कालभक्षे महाघोरे पतत्येव नराधमः ॥

(१) 'शतजन्मस्तु' ख०
(२) 'संक्षये' ख०

ग्रीष्मे पानीयदानेन स पूतो जायते नरः ।
स्वच्छायाग्रोदकाद्यस्तु कुर्यादेवाभिषेचनम् ॥
तप्तपङ्कह्रदं नाम नरकं याति मानवः ।
स सुवर्णाभिषेकेण हरेः शुद्धिमवाप्नुयात् ॥
अनाच्छाद्योदकुम्भस्य मुखे अग्रोदकाहृतम् ।
करोति मौढ्यात्पच्येत कालसूत्रादिषु द्विजः ॥
पवमानाभिषेकेण पवित्रो जायते नरः ।
अभक्ष्यभक्षणं यस्तु कुर्याद्वेदविगर्हितम् ॥
भयानके महाघोरे वासमाप्नोति मानवः ।
एकादश्युपवासे च तुलसीभक्षणाच्छुचिः ॥
अभक्ष्याणि च शाकानि तथैवान्नानि नारद ।
यो यो निवेदयेद्विष्णौ महारौरवमेति सः ॥
पराकं च व्रतं कृत्वा शुद्धिं प्राप्नोति मानवः ।
कक्षश्मश्रुनखस्पृष्टहस्तादेवाङ्गस्पर्शने ॥
अष्टभौमे महाघोरे वसत्याधूवमण्डलम् ।
अस्यवामस्य सूक्तस्य जपाच्छुद्धिमवाप्नुयात् ॥
अन्यावशिष्टवस्त्रस्य देवतायाः समर्पणात् ।
सुघोरं नाम नरकं प्रयात्यामनुकल्पकम् ॥
हीनवस्त्रार्चनां यस्तु करोति परमात्मनः ।
अतिघोरं च नरकं प्रयात्याभूतसंप्लवम् ॥
शीतार्त्ते वस्त्रदानेन पूतो भवति मानवः ।
योऽर्चां तु कुरुते विष्णोर्नीलवस्त्रेण मानवः ॥
कालरात्रिं महाघोरं नरकं याति दारुणम् ।
रात्रिसूक्ताच्चरुं हुत्वा शुद्धो भवति मानवः ॥
अधौतवस्त्रं यो विष्णोः समर्पयति मानवः ।
शूकरं नाम नरकं प्रयात्यालस्यदूषितः ॥
अतोदेवाश्चरुं हुत्वा पायसं शुद्धिमाप्नुयात् ।
निषिद्धान्नेन नैवेद्यं यः करोति नराधमः ॥

मलभोजं महाघोरं नरकं याति दारुणम् ।
नखश्मश्रुविना यस्तु दरिद्रो भुवि जायते ॥
द्वादश्यां भोजयित्वा तु ब्राह्मणान् शुद्धिमाप्नुयात् ।
अष्टाक्षरोपदेशस्तु यस्य कस्य गुरोर्न हि ॥
तादृशः पूजयित्वा तु विष्णुं वेदैकनायकम् ।
करालं नरकं याति यत्र दुःखानि भूरिशः ॥
सच्छास्त्रश्रवणादेव शुद्धिमाप्नोति निश्चितम् ।
शूद्राहृतैश्च कुसुमैर्विष्णोः पूजां करोति यः ॥
कीटदं नाम नरकं नानादुःखालयं व्रजेत् ।
पवित्रं तेत्यृचा हुत्वा स्नात्वा नद्यां शुचिर्भवेत् ॥
शूद्राहृतं न दुष्टं स्यात्सिद्धस्थाने महोत्सवे ।
शूद्राहृतं न दुष्टं तु शूद्रस्य हरिपूजने ॥
धौतपुष्पैः सपर्यां तु यः कुर्याच्छार्ङ्गधन्वनः ।
स चण्डनरकं याति पश्चाद्वैश्यो भवेन्नरः ॥
दधिक्राव्णऋचा विष्णुं दध्ना कृत्वा शुचिर्भवेत् ।
अन्यावशिष्टपर्युष्टम्लानपुष्पैर्हरिं यजेत् ॥
पद्मापद्मावतीभीमनरकान् याति दारुणान् ।
अतोदेवा-इदंविष्णुः-पौरुषं क्रमशो हुनेत् ॥
आज्यं पयः पायसं च क्रमाच्छुद्धो भवेन्नरः ।
छिन्नभिन्नातिरक्तानां पुष्पाणां तु समर्पणात् ॥
बहुसूचीमहासूचीसंज्ञान् याति च मानवः ।
पञ्चामृताभिषेकेण महानदजलाप्लुतः ॥
पयसा स्नापनाद्विष्णोः पश्चाच्छुद्धो भवेन्नरः ।
स्वाङ्गभूगलितानां च निवृत्तानां समर्पणात् ॥
अतिवातं महावातं चक्रवातं प्रयाति सः ।
अन्नधेनोः स्वर्णधेनोर्मधुधेनोश्च दानतः ॥
शुद्धं सुखमवाप्नोति परत्र च परां गतिम् ।
वस्त्रपुटादर्कपुटादेरण्डादिपुटात्तथा ॥

आहृतैः पुष्पपत्राद्यैः पूजां विष्णोः करोति यः ।
अतितापं महातापमतिशीतं प्रयाति सः ॥
निर्गन्धपुष्पैः पूजां [तु] मुकुन्दस्य करोति यः ।
तथा पूयवहं नाम नरकं व्रजति ध्रुवम् ॥
वासहीनो भवेद् भूमौ पद्मपुष्पार्पणाच्छुचिः ।
तुलसीरहितैः पुष्पैर्योऽर्चयेदच्युतं हरिम् ॥
तामसं नरकं याति पुनरुत्थानवर्जितम् ।
कार्त्तिक्यां तुलसीपत्रैः संपूज्य च शुचिर्भवेत् ॥
लोकवार्त्तां वदन्विष्णोर्निर्माल्यं यस्तु लङ्घयेत् ।
चण्डकोलाहलं नाम नरकं याति दारुणम् ॥
पारायणात् पावमान्याः शुद्धतामेति मानवः ।
अप्रक्षाल्य च पुष्पाणि विष्णोः पूजां करोति यः ॥
कृमिभक्षमहाघोरं नरकं चाधिगच्छति ।
मन्दधीर्जायते भूमौ गोग्रासाच्छुध्यते नरः ॥
प्रक्षाल्य तुलसीं विष्णोः सपर्यां च करोति यः ।
सर्वसौख्यहरं नाम नरकं प्राप्य दुःखितः ॥
आवाहनादिषण्मुद्रां विना ह्यर्चां करोति यः ।
देहयोगवियोगाख्ये नरके वासमाप्नुयात् ॥
पुष्पाञ्जलिं मन्त्ररत्नादत्त्वा शुद्धिमवाप्नुयात् ।
अग्निज्वालं प्रयात्याशु तथैवैरण्डदीपतः ॥
पिष्टामलकदीपस्य प्रदानाच्छुद्धिमाप्नुयात् ।
पञ्चसंस्कारहीनस्तु नरकं याति दारुणम् ॥
गङ्गावगाहनाद्वापि भारतस्य च कीर्त्तनात् ।
स नरः शुद्धिमाप्नोति नान्यथा शुद्धितामियात् ॥
शून्यदीपे विलुप्ते तु पूजां कर्त्तुं यदीच्छति ।
तैलयन्त्रं महाघोरं गत्वा तत्र निपीड्यते ॥
शङ्कराद्यैः समत्वेन विष्णोरर्चां करोति यः ।
स चान्धतमसो नाम्नो नरकानधिगच्छति ॥

सेनान्यैः पितृभिश्चैव समकालं हरिं व्रजेत् ।
दुःखोत्कटं नाम नरकं याति ब्रह्मार्पणं नरः ॥
श्रुत्वा भागवतं शास्त्रं शुद्धिमान् जायते नरः ।
पद्माक्षतुलसीमालाहीनकण्ठो वसेन्नरः ॥
शाल्मलीनरकं याति बलिबद्धो भवेन्नरः ।
कार्त्तिक्यां पद्ममालाभिः सुसंपूज्य शुचिर्भवेत् ॥
उत्तरीयपरित्यागाच्छायाही(१)ने पतत्ययम् ।
निराश्रयो भवेद् भूमौ दोर्भ्यांदत्त्वा शुचिर्भवेत् ॥
अपवित्रकरो यस्तु विष्णोरर्चां करोति यः ।
नरके पूयशोणाख्ये भुक्त्वा दुःखान्यनेकशः ॥
व्याधो भूत्वा सुपापीयान्नरकाने(२)कविंशतिः ।
अकच्छः पृष्ठकच्छो वा देवतार्चां करोति यः ॥
रेतसो भाजनं याति उपजग्धी भवेन्नरः ।
अश्वत्थसेवनाच्छुद्धस्तुलसीचन्दनादपि ॥
पाषण्डिनां च संसर्गं यः करोति दुराग्रहात् ।
सप्तशीलालयं नाम नरकं याति दारुणम् ॥
बहुमूत्रो भवेद् भूमौ सत्संगत्या विशुद्धयति ।
अनभ्यस्य च सच्छास्त्रं यो दुःशास्त्रं समभ्यसेत् ॥
अङ्गाररराशिभवनं नरकं याति दारुणम् ।
स भूप्रदक्षिणां कृत्वा शुद्धिमाप्नोति निश्चितम् ॥
नरस्तुतीनां श्रवणं यः करोति नराधमः ।
नदीं वैतरणीं याति पूज्यस्तुत्या विशुद्धयति ॥
यः करोति विमूढात्मा नरस्तुत्या तु जीवनम् ।
मुसलोलूखलं नाम नरकं चाधिगच्छति ॥
नित्यं स पश्चिमे यामे विष्णुस्तुत्या विशुध्यति ।
पूज्यस्तुतिपरित्यागं यः कुर्यान्मनुजाधमः ॥

(१) 'हीनेष्वतत्पयम्' ख०
(२) 'नेव विन्दति' ख०

पूतिमांसादनं नाम नरकं सोऽधिगच्छति ।
मुखरोगी च भवति भारतश्रवणाच्छुचिः ॥
विष्णोर्निन्दां गुरोर्निन्दां श्रुत्वैव मनुजाधमः ।
नरकं चान्ध(१)तामिस्रं भुक्त्वा युगशतत्रयम् ॥
कपिलागोसहस्रं च दत्त्वा शुद्धिमवाप्नुयात् ।
अथवा विष्णुमाहात्म्यं श्रुत्वा शुद्धिमवाप्नुयात् ॥
सत्पुंसनिन्दाश्रवणं सच्छास्त्रस्यापि नारद ।
यः करोति विमूढात्मा महारौरवमेति सः ॥
स च्छिन्नोष्ठो भवेद् भूमौ भूमिदानेन शुध्यति ।
देवार्चासमये बालान् लालयन्मनुजाधमः ॥
इक्षुयन्त्रे महाघोरे पीड्यते यमकिङ्करैः ।
श्रुत्वा च शास्त्रसंदर्भं बालिशो नाभिपूज्यते ॥
देवालये पताकानां दानाच्छुद्ध्यति मानवः ।
व्यासङ्गादेवतार्चायां कृतायां मनुजेन वै ॥
आस्फालयन्ति तं याम्या क्षुरपाय शिलातले ।
पुस्तकस्य प्रदानेन तस्मात्पापात्प्रमुच्यते ॥
नखादिमलिनानां च देवागारे विसर्जने ।
विष्ठाकूपे पतत्याशु तत्रैव मलभोजनः ॥
चक्रकारो भवेद् भूमौ गन्धदानेन शुद्ध्यति ।
आज्याभिघारहीनस्य नैवेद्यस्य समर्पणे ॥
स तु हालाहलं नाम नरकं याति दारुणम् ।
स चापि शुद्धिमाप्नोति शतब्राह्मणभोजनात् ॥
आलस्यादेवपूजायां तूष्णीं क्रीडति वा विभो ।
यः करोति विमूढात्मा चक्रे भेदान्निपीड्यते ॥
मलं बध्वा देवपूजां यश्चाचरति मूढधीः ।
तैलकूपं पातयन्ति तं पापं यमकिङ्कराः ॥

'तामिस्रं पतेद् युग' ख०

अजीर्णान्नो नरो यस्तु देवपूजां समाचरेत् ।
स पापात्मा ध्रुवं याति नरकं चण्डभीषणम् ॥
देवस्य पूजासमये विदित्वा गमनं सताम् ।
प्रत्युत्थानं न कुर्याच्तु अन्धकूपे पतत्ययम् ॥
महतां सेवनादेव स पूतो मुनिसत्तम ।
नित्यकर्मपरित्यागी सर्वानेतान् व्रजत्ययम् ॥
षष्ठकालव्रतं कृत्वा स शुद्धां याति वै गतिम् ।
शयानो मनुजः क्वापि यः शृणोति हरेः कथाम् ॥
नानादुःखग्रहं नाम नरकं याति दारुणम् ।
पश्चाच्चालो भवेद् भूमौ गृहदानाद्विशुद्धयति ॥
शृण्वन् पौराणिकीं गाथां कृत्वा ताम्बूलचर्वणम् ।
स याति नरकं घोरं वह्निभोजनसंज्ञकम् ॥
गुरोः समानरूढः सन् पुराणं यः शृणोति च ।
तप्तशूलासनं नाम नरकं याति दारुणम् ॥
गुरोः पर्यङ्कदानेन शुद्धिमाप्नोत्यसंशयम् ।
अश्रद्धया नरः श्रुत्वा पुराणं पापनाशनम् ॥
संमोहनं महाघोरं नरकं याति दुःखदम् ।
गत्वाऽपस्माररोगाढ्यः पुनरेवाभिजायते ॥
दिनापनयनं लोकवार्त्तया गृहचिन्तया ।
कुर्वन्निरयमाप्नोति तमशोणहृदं नरः ॥
नमस्कारान्परं विष्णोः कृत्वा धूलिविधूननम् ।
तप्तधूलिनदं नाम नरकं चाधिगच्छति ॥
आरूढवृषभाशुद्धो युगबद्धवृषद्वयः ।
ताभ्यां वृषाभ्यां नियमात्किंचिद् दूरं व्रजेद् ध्रुवम्
तेन शुद्धिमवाप्नोति नरकाद्वा कथञ्चन ।
आर्द्रवस्त्रधरो यस्तु कुर्वन्वै देवतार्चनम् ॥
अङ्गारवृष्टिपतनं नरकं प्रतिपद्यते ।
यतीनां वस्त्रदानेन मृदा स्नानेन शुद्धयति ॥

एकादशीदिने प्राप्ते यो भुङ्क्ते हरिवासरे ।
कृमिराशिं व्रजत्याशु यावदाभूतसंप्लवम् ॥
शुद्धिमाप्नोत्ययं स्नानाद्ग्रामत्यां कृष्णसंनिधौ ।
दीक्षितो देवपूजायां पूर्वं मैथुनमाचरेत् ॥
आयसाः कण्टकास्तीक्ष्णा नरके कूटशाल्मलौ।
पुंसूक्तमपठित्वा तु देवपूजां करोति यः ॥
वदनान्तरविन्यस्तसुप्रतप्तमयोगडी ।
आदावन्ते च साहस्रनामपाठविवर्जनात् ॥
तैलपूर्णकटाहेषु सन्तप्तेषु तु मानवः ।
निक्षिप्तोऽप्यात्मनो जिह्वां यमाज्ञाकारिभिर्भटैः ॥
अहुत्वा वाप्यदत्त्वा वा भोजनं कुरुते नरः ।
महोक्षमूत्रपूर्णायां वाप्यां वै क्षिप्यते नरः ॥
बृहदारण्यकं जप्त्वा चतुर्भिर्मुच्यते नरः ।
पुण्यकालोक्तातिशयसपर्यां यस्तु मुञ्चति ॥
क्षारोदं नाम नरकं नरो याति सुदारुणम् ।
तत्र शस्त्रैर्विशीर्णाङ्गो नमस्कारैर्विशुद्धयति ॥
अनिवेदितमन्त्रं यः शंखचक्रगदाभृतः ।
(भुनक्तीति शेषः ।)
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥
चान्द्रायणत्रयं कृत्वा शुद्धिमाप्नोति मानवः ।
अन्यदेवार्पितं चान्नं यो भुङ्क्ते ज्ञानदुर्बलः ॥
(धू(१)म्रपाने महाघोरे आकल्पान्तमधो(२)मुखम् ।
विष्णुस्थानविहीने तु ग्रामेवासी नराधमः ॥)
जन्तुपङ्के महाघोरे क्षिप्तः क्रन्दति विस्तरम् ।
स पङ्गुर्जायते भूमौ गङ्गासागरसंगमे ॥

---

(१) धनुश्चिन्हान्तर्गतं नास्ति घ० ङ० ।
(२) इतोऽग्रे 'चान्द्रायणत्रयं' पाठोऽधिकः ख०

स्नातः शुद्धिमवाप्नोति कथायाः श्रवणेन च ।
सत्संगमविहीने च ग्रामेवासी नराधमः ॥
शस्त्रावर्षे पतेद्घोरे शुद्धः स्यात्तीर्थसेवया ।
सुतेषु नामधेयानि विष्णोरन्यस्य नामतः ॥
आह्वानं कुरुते यस्तु तैलकुम्भे पतेद् ध्रुवम् ।
सकामः पूजितो येन देवदेवो जनार्दनः ॥
निवृत्तिमार्गे सरतः शुद्धिमेति न चान्यथा ।
देवोपकरणैर्यस्तु गृहयात्रां निवर्त्तयेत् ॥
महापेषे महाघोरे मुसलैः पीड्यते भृशम् ।
पक्षियोनिमवाप्नोति देवालंकरणाच्छुचिः ॥
शयानो मिथुनीभोगादेवागारे नराधमः ।
शरतल्पे महाघोरे प्राजापत्येन शुध्यति ॥
विना शङ्खं महाविष्णोराभिषेकं करोति यः ।
निरन्नं नरकं गत्वा स्वमांसं खादते नरः ॥
शङ्खेन पयसा देवं स्नाप्य शुद्धिमवाप्नुयात् ।
विष्णोराभिमुखं पादप्रसारं कुरुते नरः ॥
तं पापं पार्ष्णिदेशे तु छिद्रं कुर्वन्ति सत्वरम् ।
सेतुं गत्वा समुद्रस्य गङ्गासागरसंगमे ॥
स्नात्वा शुद्धिमवाप्नोति नान्यथा तु कथञ्चन ।
अवृन्दावनगेहे च निवसन्मानुषाधमः ॥
सर्वानेतान्महाक्रूरान्नरकाने(१)कविंशतिः ।
व्रतभ्रष्टो महापापं महारौरवमेति सः ॥
व्याघ्रयोनिमवाप्नोति बन्दिमोक्षाच्च शुध्यति ।
तुलामकरमेषे तु प्रातःस्नानविवर्जनात् ॥
पैशाचीं योनिमाप्नोति यावदाभूतसंप्लवम् ।
श्रुत्वा सच्छास्त्रमाहात्म्यं शुद्धिमाप्नोति मानवः ॥

(१) 'नेव विन्दति' ख०।

अविभक्तानां पृथग्देवपूजामाह प्रयोगपारिजाते माश्वलायनः—

पृथगप्येकपाकानां ब्रह्मयज्ञो द्विजातिनाम्।
अग्निहोत्रं सुरार्चा च संध्या नित्यं भवेत्पृथक्॥

तत्रैव विष्णुधर्मे—

*शालग्रामशिलां वापि चक्राङ्कितशिलां तथा।
ब्राह्मणः पूजयेन्नित्यं क्षत्रियादिर्न पूजयेत्॥

इदं स्पर्शसहितपूजाविषयम्।

शूद्रो वाऽनुपनीतो वा स्त्रियो वा पतितोऽपि वा।
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते॥
ब्राह्मण्यपि हरं विष्णुं न स्पृशेच्छ्रेय इच्छती।
सनाथा मृतनाथा वा तस्या नास्तीह निष्कृतिः॥
स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर।
स्पर्शने नाधिकारोऽस्ति विष्णोर्वा शङ्करस्य च॥

इति स्कान्दात्। स्पर्शरहिता तु तयोर्भवत्येव,

शालग्रामं न स्पृशेत्तु हीनवर्णो वसुंधरे।

पूजान्ते देवदेवस्य मुखवस्त्रार्पणं न हि।
डाकिनीं योनिमासाद्य तिष्ठत्याभूतसंप्लवम्॥
देवस्य दर्पणं दत्त्वा सद्यः पूतो भवेन्नरः।
ब्रह्मपारंपरं स्तोत्रं पूजान्ते न पठेद्यदि॥
न गृह्णाति स्वयं तस्य पूजां चैव तु वार्षिकीम्।
इत्येतत्कथितं सर्वमपराधफलं मुने॥
प्रायश्चित्तं मया तेषां विस्तरेण च वर्णितम्॥ इति।

*शालग्राममिति। शालग्रामो न विक्रेतव्यः। तथाच स्कान्दे—

शालग्रामशिलायास्तु मूल्यं यः कुरुते नरः।
विक्रेता चानुमन्ता च यः परीक्षानुमोदकः॥

स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मतः ॥
मोहाद्यः संस्पृशेच्छूद्रो योषिद्वापि कदाचन ।
स्वपते नरके घोरे यावदाभूतसंप्लवम ॥
यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुंधरे ।
दूरादेवास्पृशन्पूजां कारयेत्सुसमाहितः ॥

इति वाराहोक्तेः । (१)शालग्रामशिलामात्रे निर्बन्धो न प्रतिमादौ,

सर्ववर्णैस्तु संपूज्याः प्रतिमाः सर्वदेवताः ।
लिङ्गान्यपि तु पूज्यानि मणिभिः(२)कल्पितानि च ॥

इति तत्रैवोक्तेः ।

चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्यजातिभिः ।
वैश्यैर्द्वावेव संपूज्यौ तथैकः शूद्रजातिभिः ॥

इति स्कान्दात् । अन्ये तु दीक्षितविषयत्वेन व्यवस्थामाहुः । विष्णुधर्मे—

तयोरसंभवेऽर्चा वै सा चेह नवधा स्मृता ।
रत्नजा हेमजा चैव राजती ताम्रजा तथा ॥

सर्वे ते नरकं यान्ति यावदाभूतसंप्लवम् ॥ इति ।

स्त्रीशूद्रयोः स्पर्शपूजावत् साक्षात्शालग्रामपूजा निषिद्धा ।

ब्राह्मणक्षत्रवैश्याश्च त्रयाणां मुनिसत्तम ।
अधिकारः स्मृतः सद्भिः शालग्रामशिलार्चने ॥
दीक्षायुक्तैस्तथा शूद्रैर्मद्यपानविवर्जितैः ।
कर्त्तव्यं ब्राह्मणद्वारा शालग्रामशिलार्चनम् ॥

इति पद्मात् । पाद्मे—

द्वारकाशैलसंभूतं यस्तोयं पिबते कलौ ।
पापानि तस्य नश्यन्ति शतजन्मार्जितान्यपि ॥

---

(१) 'शालग्राममात्रनिषेधो न' क०
(२) 'कल्पितास्तथा' क०

रौतिक्यर्चा तथा लौही शैलजा द्रुमजा तथा ।
अधमाधमा च विज्ञेया मृन्मयी प्रतिमा च या ॥
एषां फलानि तत्रैव ज्ञेयानि ।
(ना(१)र्च्या गृहेऽङ्गमजा मूर्तिश्चतुरङ्गुलतोऽधिका ।
न वितस्त्यधिका धातुसंभवा श्रेय इच्छता ॥
एवंलक्षणसंपन्ना पारंपर्यक्रमागता ।
उत्तमा सा तु विज्ञेया गुरुदत्तापि तत्समा ॥)
तत्रैव पाद्मे शालग्रामं प्रक्रम्य—
तत्राप्यामलकीतुल्या पूज्या सूक्ष्मैव या भवेत् ।
यथा यथा शिला सूक्ष्मा तथा स्यात्तु महत्फलम् ॥
तथा—
यवमात्रं तु गर्तः स्याद्यवार्धं लिङ्गमुच्यते ।
शिवनाभिरिति ख्यातस्त्रिषु लोकेषु दुर्लभः ॥

धृते शिरसि पीते च सर्वास्तुष्यन्ति देवताः ।
प्रायश्चित्तं हि पापानां क(१)लौ पादोदकं हरेः ॥ इति ।
शिलैव शैलं, स्वार्थेऽण् । द्वारकाशिलापूजायाः पृथक्करणस्थले एतत्, शालग्रामसहपूजने तस्यार्थतः सिद्धत्वात् । कौर्मे—
यो मोहादथ बालिश्याद्कृत्वा देवतार्चनम् ।
भुङ्क्ते स याति नरकान् सूकरेष्वेव जायते ॥
यत्तु—
दानाध्ययनदेवार्चाजपहोमव्रतादिकम् ।
न कुर्याच्छ्राद्धदिवसे प्राग्विसर्जनात् ॥ इति ।
तन्निषेधार्थं,
श्राद्धाह्नि तु समभ्यर्च्य नृवराहं जनार्दनम् ।
इति विष्णुधर्मात् ।
पूजयित्वा शिवं भक्त्या पितृश्राद्धं प्रकल्पयेत् ।

---

(१) 'कंसान्तर्गतं नास्ति' क० (२) 'कुलपादोदकं' घ० ङ०

तत्रैव—

शालग्राममयी मुद्रा संस्थिता यत्र कुत्रचित् ।
वाराणस्या यवाधिक्यं समन्ताद्योजनत्रयम् ॥
यो मृतस्तत्समीपे तु मृतो वा नीयतेऽन्तिकम् ।
स वै मोक्षमवाप्नोति सत्यं सत्यं न चान्यथा ॥

तत्रैव—

चक्राङ्कमिथुनं पूज्यं नैकं चक्राङ्कमर्चयेत् ।
चक्राङ्कमिथुनात्सार्धं शालग्रामं प्रपूजयेत् ॥

तत्रैव वाराहे—

म्लेच्छदेशे शुचौ वापि चक्राङ्को यत्र तिष्ठति ।
यो(१)जनानां तथा त्रीणि मम क्षेत्रं वसुंधरे ॥

तत्रैव शालग्रामं प्रक्रम्य—

क्रयक्रीता परिज्ञेया मध्यमा याचिताऽधमा ॥

प्रयोगपारिजाते वाराहे—

एवंलक्षणसंपन्ना पारंपर्यक्रमागता ।
उत्तमा सा तु विज्ञेया गुरुदत्तापि तत्समा ॥

अथ पार्थिवपूजा नन्दिपुराणे—

आयुष्मान्बलवान्श्रीमान्पुत्रवान्धनवान्सुखी ।
वरामिष्टं लभेल्लिङ्गं पार्थिवं यः समर्चयेत् ॥
तस्मात्तु पार्थिवं लिङ्गं ज्ञेयं सर्वार्थसाधकम् ॥

तत्रैव—

*गोभूहिरण्यवस्त्रादिबलिपुष्पनिवेदने ।

इति लैङ्गात् । श्राद्धाहि विष्णुशिवेतरपूजा न कार्येति केचित् । पूजा च भूतशुद्ध्यादिप्राणप्रतिष्ठादिकं कृत्वैव कार्या । तद्विस्तरोऽन्यत्र बोध्यः ।

*गोभू इति । मृदाहरणादिसप्तसु मन्त्रा अनुपदं बोध्याः ।

(१) 'योजनानि' कु०

ज्ञेयो नमः शिवायेति मन्त्रः सर्वार्थसाधकः ॥
सर्वमन्त्राधिकश्चायमोङ्कारायः षडक्षरः ।

भविष्ये—

पूर्तयोऽष्टौ शिवस्यैताः पूर्वादिक्रमयोगतः ।
आग्नेय्यन्ताः प्रपूज्यास्तु वेद्यां लिङ्गे शिवं यजेत् ॥

अत्र-*'न प्राचीमग्रतः शंभोः' इति रुद्रयामले निषेधात् नान्तरालं प्राची, किन्तु *प्रसिद्धैव । तिथितत्त्वे देवीपुराणे—

*मृदाहरणसंघट्टे प्रतिष्ठाह्वानमेव च ।
स्नपनं पूजनं चैव विसर्जनमतः परम् ॥
हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् ।
शिवः पशुपतिश्चैव महादेव इति क्रमः ॥

अन्योपचारेषु च पञ्चाक्षरः षडक्षरो वा मन्त्र इत्यर्थः, नाममन्त्रो वा बोध्यः । *न प्राचीमिति ।

देवाग्रे स्वस्य वाप्यग्रे प्राची मोक्ता गुरुक्रमैः ।

इत्यपि द्रष्टव्यम् । तथाच प्राचीमग्रतः कृत्वा संमुखीकृत्य शम्भोः पूजां न कुर्यात् । *प्रसिद्धैवेति । प्राच्यैशान्यादिक्रमेण वामावर्त्तेन, 'आग्नेय्यन्ता' इत्युक्तेः । केचित्तु उदीचीमग्रतः कृत्वा उदीच्यभिमुखीभूयेति । तस्मादन्तरालमेव प्राचीमाहुः । तन्न बहुसंमतम् । *मृदिति । 'ॐहराय नमः' इति मृदमाहृत्य संशोध्य तस्यां शुचि जलं प्रक्षिप्य 'ॐमहेश्वराय नमः' इति संघट्टनं कृत्वा तेन पिण्डेन लिङ्गं कुर्यात् । तच्चाशीतिरङ्गिकारूपाद्द्रक्षादधिकपरिमाणमङ्गुष्ठादधिकोच्चं च । ततः 'ॐशूलपाणये नमः शिवेह सुप्रतिष्ठितो भव' इति प्रतिष्ठाप्य

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं

स्कान्दे—

शुष्काण्यपि च पत्राणि श्रीवृक्षस्य निवेदयेत् ।

तत्रैव भविष्ये—

धत्तूरकैश्च यो लिङ्गं सकृत्पूजयते नरः ।
स गोलक्षफलं प्राप्य शिवलोके महीयते ॥

योगिनीतन्त्रे—

शिवागारे झल्लकं च सूर्यागारे च शङ्खकम् ।
दुर्गागारे वंशवाद्यं म(२)धूरीं न च वादयेत् ॥

श्राद्धहेमाद्रौ स्कान्दे—

स्पृष्ट्वा रुद्रस्य निर्माल्यं सवा(३)सा आप्लुतः शुचि

प्रयोगपारिजाते क्रियासारे—

मध्यमानामिकामध्ये पुष्पं संगृह्य पूजयेत् ।
अङ्गुष्ठतर्जन्यग्राभ्यां निर्माल्यमपनोदयेत् ॥

विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ।

इति ध्यात्वा 'पिनाकधृते नमः शिवेहागच्छ' इत्यावाह्य प(ञ्चाक्षरेण पाद्यार्घ्याचमनीयानि दत्त्वा 'ॐपशुपतये नमः' इति शु दकेन संस्नाप्य आचमनीयवस्त्राचमनीययज्ञोपवीतगन्धपुष्पधूप पनैवेद्याचमनीयफलताम्बूलदक्षिणानीराजनप्रदक्षिणानमस्कारा 'ॐनमः शिवाय' इति मन्त्रेण कुर्यात् । ततोऽष्टमूर्त्तिपूजां कुर्यात सा चेत्थम्–ॐशि(२)वाय क्षितिमूर्त्तये नमः' यथास्थितपाद्या 'ॐभवाय जलमूर्त्तये नमः' इत्यैशान्यां, 'ॐरुद्रायाग्निमूर्त्तये न इत्युत्तरस्यां, 'ॐउग्राय वायुमूर्त्तये नमः' इति वायव्यां, 'ॐभीमा काशमूर्त्तये नमः' इति प्राच्यां, 'ॐपशुपतये यजमानमूर्त्तये न इति नैर्ऋत्यां, 'ॐमहादेवाय सोममूर्त्तये नमः' इति दक्षिणस्

---

(१) 'मधुरीं' क० (२) 'वाससा' ख० ग०
(३) 'नमः शिवाय' इत्यनेनेत्यर्थः ।
(४) 'ॐशर्वाय क्षितिपतये' घ०ङ० ।

अपनीतं च निर्माल्यं चण्डेशाय निवेदयेत् ।
अशून्यमस्तकं लिङ्गं सदा कुर्वीत पूजकः ॥

तुलपाणौ लैङ्गे—

वरं प्राणपरित्यागः शिरसो वापि कर्तनम् ।
न चैवापूज्य भुञ्जीत शिवलिङ्गं महेश्वरम् ॥
सूतके मृतके चैव न त्याज्यं शिवपूजनम् ॥

तेथितत्त्वे लैङ्गे—

विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोपि महादेवो न स्यात्तस्य फलप्रदः ॥
तस्मान्मृदापि कर्तव्यं ललाटे वै त्रिपुण्ड्रकम् ॥

द्राक्षधारणे विशेषः शिवहरस्ये—

एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति ।
अवध्यत्वं प्रतिस्रोतो वह्निस्तम्भं करोति च ॥
द्विवक्त्रो हरगौरी स्याद्धोवधाद्यघनाशकृत् ।
त्रिवक्त्रो ह्यग्निजन्माऽथ पापराशिं प्रणाशयेत् ॥

ईशानाय सूर्यमूर्त्तये नमः' इत्याग्नेय्याम् । ततः स्तोत्रादिना वा त्रिः पुष्पाञ्जलिं समर्प्य नत्वा क्षमस्वेति संप्रार्थ्य 'ॐमहादेव नमः' इति विसर्जयेदिति । शिवपूजायां विशेषः—

आपः क्षीरं कुशाग्राणि दध्यक्षतमधुतण्डुलाः ।
सिताश्च सर्षपाश्चैव अर्घोऽष्टाङ्गः प्रकीर्त्तितः ॥
जलकाश्मीरकुष्ठैस्तु रक्तचन्दनचन्दनैः ।
तमालागुरुकर्पूरैः शांभवं चाष्टगन्धकम् ॥
तुलसीबिल्वनिर्गुण्डीजम्बूराम्रवणं तथा ।
पञ्चबिल्वमिति प्रोक्तमर्चयेदिन्दुशेखरम् ॥
गुग्गुलं घृतसंयुक्तं शिवे धूपं निवेदयेत् ।
दधित्थं घृतसंयुक्तं दहेद्बिल्वमथापि वा ॥

चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति ।
पञ्चवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापनुत् ॥
षड्वक्त्रस्तु गुहो ज्ञेयो भ्रूणहत्यादि नाशयेत् ।
सप्तवक्त्रस्त्वनन्तः स्यात्स्वर्णस्तेयादिपापहृत् ॥
विनायकोऽष्टवक्त्रः स्यात्सर्वान्नृतविनाशकृत् ।
भैरवो नववक्त्रस्तु शिवसायुज्यकारकः ॥
दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतभयापहः ।
एकादशमुखो रुद्रो नानायज्ञफलप्रदः ॥
द्वादशास्यस्तथादित्यः सर्वरोगनिबर्हणः ।
त्रयोदशमुखः कामः सर्वकामफलप्रदः ॥
चतुर्दशास्यः श्रीकण्ठो वंशोद्धारकरः परः ॥ इति ।

दीपादिकं प्रागुक्तं प्रतिष्ठायामिति । प्रतिष्ठा च स्मृत्यन्तरे—

प्रक्षाल्य गन्धतोयेन पञ्चगव्येन चोपरि ।
शिवाम्भसापि प्रक्षाल्य श्रीरुद्रेणाभिषेचयेत् ॥
रुद्राक्षाणां प्रतिष्ठेयमेवं वैदिकसंमता ।
अथवा वैदिकमते प्रतिष्ठा नैव विद्यते ॥

नारदीये—

शिवप्रदक्षिणे मर्त्यः सोमसूत्रं न लङ्घयेत् ।

प्रदक्षिणाप्रकारस्तु—

वृषं चण्डवृषं चैव सोमसूत्रं पुनर्वृषम् ।
चण्डं च सोमसूत्रं च पुनश्चण्डं पुनर्वृषम् ॥

सोमसूत्रप्रमाणं यथा—

स्तारसमानसूत्रं सोमस्य सूत्रं दिशि सोमसूत्रम् ।
न दोषः स्यादोष आभ्यन्तरलङ्घनेन ॥
भित्ति सोमस्य दिशि उत्तरस्यां
न लङ्घयेत् । तदग्रे तल्लङ्घने न दोष

तथा—

विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति नरकान्घोरान्यावदिन्द्राश्चतुर्दश ॥
पञ्चामृतं पञ्चगव्यं स्नानकाले प्रयोजयेत् ।
रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा ॥
त्र्यम्बकादिकमन्त्रं च तथा तत्र प्रयोजयेत् ॥
यद्वा 'ॐ अघोर ॐ ह्रीं अघोरतर ॐ ह्रौं ह्रां नमस्ते रुद्ररूपाय ह्रीं स्वाहा' अनेनाभिमन्त्र्य धारयेत् । तथा—

अष्टोत्तरशतं कार्या चतुःपञ्चाशदेव वा ।
सप्तविंशतिमाला वा ततो हीनाधमाः स्मृताः ॥

प्रजापतिः—

मोक्षार्थी पञ्चविंशत्या धनार्थी त्रिंशता जपेत् ।
पुष्ट्यर्थी पञ्चविंशत्या पञ्चदश्याभिचारिके ॥
सप्तविंशतिरुद्राक्षमालया देहसंस्थया ।
यत्करोति नरः पुण्यं सर्वं कोटिगुणं भवेत् ॥
यो ददाति द्विजेभ्यश्च रुद्राक्षं भुवि सन्मुखम् ।
तस्य प्रीतो भवेद्रुद्रः स्व(१)पदं च प्रयच्छति ॥ इति ।

पदार्थादर्शे बोपदेवः—

रुद्राक्षान्कण्ठदेशे दशनपरिमितान्मस्तके विंशती द्वे
षट् षट् कर्णप्रदेशे करयुगलकृते द्वादश द्वादशैव ।
बाह्वोरिन्दोः कलाभिर्नयनयुगकृते एकमेकं शिखायां
वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकण्ठः ॥

हेमाद्रौ शिवधर्मे—

स्नानं पलशतं ज्ञेयमभ्यङ्गः पञ्चविंशतिः ।
पलानां द्वे सहस्रे तु महास्नानं प्रकीर्तितम् ॥
पञ्चविंशत्पलं लिङ्गे अभ्यङ्गं कारयेदथ ।

(१) 'स्वपदे' ग०

शिवस्य सर्पिषा स्नानं प्रोक्तं पलशतेन च ॥
तावता मधुना चैव दध्ना चैव ततः पुनः ।
तावतैव च क्षीरेण गव्येनैव भवेत्ततः ॥
भूयः सार्धसहस्रेण पलानामैक्षवेण च ।
रसेन कारयेत्स्नानं भक्त्या चोष्णाम्बुना ततः ॥

विष्ण्वादौ तु स्कान्दे--

क्षीराद्दशगुणं दध्ना घृतेनैव दशोत्तरम् ।
घृताद्दशगुणं क्षौद्रं क्षौद्राच्चैक्षवजं तथा ॥

ब्राह्मे--

देवानां प्रतिमा यत्र घृताभ्यङ्क्तमा भवेत् ।
पलानि तत्र देयानि श्रद्धया पञ्चविंशतिः ॥

इदं क्रोडीकृताभिप्रायेण । तत्रैव संग्रहे—

विष्वक्सेनाय दातव्यं नैवेद्यस्य शतांशकम् ।
पादोदकं प्रसादं च लिङ्गे चण्डेश्वराय तु ॥

पञ्चायतनसंनिवेशमाह बोपदेवः पदार्थादर्शश्च—

शंभौ मध्यगते हरीनहरभूदेव्यौ हरौ शंकरे-
भास्येनागसुतारवौ हरगणेशाजाम्बिकाः स्थापिताः ।
देव्यां विष्णुहरेभवक्त्ररवयो लम्बोदरेऽजेश्वरे-
नाम्बाः शंकरभागतोऽतिसुखदा व्यस्तास्तु हानिप्रदाः ।

शंकरभागतः ईशानकोणादारभ्य प्रदक्षिणमित्यर्थः

*अत्र दिक्स्वरूपमुक्तं प्रयोगपारिजाते मन्त्रशास्त्रे—

देवस्य मुखमारभ्य दिशं प्राचीं प्रकल्पयेत् ।
तदादि परिवाराणामङ्गाद्यावरणस्थितिः ॥

---

*अत्रेति । पञ्चायतनसन्निवेशे इत्यर्थः ।

यत्रैव भानुस्तु वियत्युदेति प्राचीति तां वेदविदो वदन्ति ।
इत्युक्ता प्राची न ग्राह्येत्यभिप्रायः । अत्र वदन्ति—इयं प्राच तान्त्रिकपूजायामेव न वैदिकपूजायां, तस्यां तु प्रसिद्धैव आवरण।

तत्र क्रमः पाद्मे—

*रविर्विनायकश्चण्डी ईशो विष्णुस्तु पञ्चमः ।
अनुक्रमेण पूज्यन्ते व्युत्क्रमे तु महद्भयम् ॥

भावात् । पञ्चायतनसंनिवेशेऽपि प्रसिद्धैव प्राची नतु पूज्यपूजकमध्यरूपेति । *रविरिति पौराणः प्रकारः । तान्त्रिकस्तु पञ्चानां मध्ये मुख्यस्यावाहनादिनमस्कारान्तं पूजाकाण्डं समाप्य अन्यस्येत्येवं कण्डानुसमयः ।

मुख्ये पुष्पाञ्जलिं दत्त्वा गणेशाद्यर्चनं भवेत् ।
गणेश एव मुख्यश्चेत्तत्र सूर्यक्रमाद्भवेत् ॥

इति क्रमाभिधानात् । मुख्ये प्रधानदेवतायां पुष्पाञ्जल्यन्तपूजाकाण्डं समाप्य पदार्थानुसमयेन गणेशादीनर्चयेदित्यर्थः । शारदातिलकटीकायां पुष्पाञ्जल्यन्तरमादौ विधीयते इत्युक्तम् । अत्र पक्षान्तरे मुख्यत्वोक्त्या देवतान्तरस्याङ्गत्वं लभ्यते । एवञ्चाङ्गप्रधानपूजयोरेककालीनत्वं सिद्ध्यति । तथाच सर्वेषामावाहनं ततः स्थापनमिति पदार्थानुसमय एव । ततः मुख्ये मध्ये पुष्पाञ्जल्यन्तां पूजां कृत्वाऽङ्गदेवतापूजा कार्येति । एतत्पक्षद्वयमपि तान्त्रिकपूजायामेव तत्रैवोक्तत्वात् । वैदिकपूजायां स्थापनक्रम एव ।

गणार्कौ (तु)समभ्यर्च्य शैवो विष्णुं प्रपूजयेत् ।
अर्चयेच्च शिवं पश्चाच्छिवमादौ तु वैष्णवः ।
ततो विष्णुं ततो दुर्गामेवं स्यादर्चनक्रिया ॥

अत्र गणेशार्कयोः क्रमे न तात्पर्यं, किन्तु तावपूजयित्वा प्रधानं न पूज्यमित्यत्र । आदौ न सर्वादौ किन्तु विष्ण्वादौ । पौराणोऽयं क्रमः । आगमोक्तस्तु योगिनीतन्त्रे—

गणेशसूर्यविष्ण्वीशदुर्गा आवाह्य पूजयेत् । इति ।

अत एव विष्णुशिवगणेशसूर्यदुर्गाभ्यो नम इत्यादिं श्लिष्टमन्त्र एव विष्णुपञ्चायतने वाजपेययाजिभिरुक्तः । सूर्यातिरिक्तपञ्चायतनपूजापि आदौ सूर्यपूजां कृत्वैव कार्या,

तथा—

पूज्यपूजकयोर्मध्ये प्राची प्रोक्ता विचक्षणैः ॥

अथ केशवादिमूर्तयः । बोपदेवः—

केविगोवादापुङ्गपेप्रजाक्युक्रममात्रिना ।
वाऽधोनृहसानिश्रीपा शाचगे वि गपे चपे ॥

अत्र केविगवित्याद्यैः केशवविष्ण्वादिचतुर्विंशतिमूर्तयोऽभिधीयन्ते । शात् शङ्खात् चगे चक्रगदे ज्ञेये इत्यर्थः । शिष्टे भुजे पद्मं त्वर्थतः सिद्धम् । अत्र दक्षि(१)णोर्ध्वकरक्रमेण ज्ञेयम्, 'दक्षि(१)णोर्ध्वकरक्रमात्' इति हेमाद्रौ वचनात् तेन हेमाद्रिणा संवादः । विशब्देन विपरीतं गचे इत्यर्थः । अत्रापि (२)शादित्यनुवृत्तिः । शङ्खाङ्गदाचक्रे इत्यर्थः । गपे इत्यत्रापि शादनुवर्तते । शङ्खाङ्गदापद्मे इत्यर्थः । विपरीते पद्मगदे इत्यत्रापि शङ्खाज्ज्ञेये । चपे चक्रपद्मे । शङ्खाचक्रपद्मे इत्यर्थः । वि इति अत्रापि, पद्मचक्रे इत्यर्थः । तेन(३)चगे इत्यष्टौ मूर्तयः । गपे इत्यष्टौ मूर्तयः । चपे इत्यत्र च । अत्र *मूलं हेमाद्रौ ज्ञेयम् ।

प्रातःसध्यावसाने तु नित्यं सूर्यं समर्चयेत् ।

इति वचनात्,

अपूज्य प्रथमं सूर्यमपरान् यः प्रपूजयेत् ।
न तद्भूतकृतं पापं संप्रतीक्षन्ति देवताः ॥

इति ब्राह्माच ।

*मूलमिति ।

शंखचक्रगदाजुतः केशवः सूर्यसप्रभः ।

(इतः युक्तः)

---

(१) 'दक्षिणाधः क' ख० (२) 'अत्रापि शब्दादनु' ख०
(३) 'तेन च गदे' ख०

कञ्जकम्बुचक्रगदायुतो विष्णू रविप्रभः ॥
गदाब्जशंखचक्रेतो गोविन्दो भास्करद्युतिः ।
वामनोऽरिगदापद्मशंखेतो रविसुप्रभः ॥
दामोदरः शंखगदाचक्रपद्मार्कसप्रभः ।
पद्मशंखगदाचक्री सूर्याभः पुरुषोत्तमः ॥
सारिपद्मः शंखगदो हृषीकेशोऽर्कसप्रभः ।
उद्यदर्कनिभोपेन्द्रो गदाचक्राब्जशंखयुक् ॥
प्रद्युम्नो रविभः शंखगदाब्जारिधरो विभोः ।
जनार्दनश्चक्रशंखगदाब्जेतो रविप्रभः ॥
सूर्याभोऽच्युतनामाब्जचक्रशंखगदायुधः ।
उद्यदर्कनिभः कृष्णो गदापद्मारिशंखभृत् ॥
सशंखाब्जगदाचक्रः सूर्याभो मधुसूदनः ।
माधवश्चक्रशंखाब्जगदेतो रविसुप्रभः ॥
त्रिविक्रमो गदाचक्रशंखपद्मो रविप्रभः ।
नारायणः साब्जगदाचक्रशंखो रविप्रभः ॥
शंखचक्रे पद्मगदे वासुदेवो रविद्युतिः ।
रविप्रभो गदाशंखचक्राब्जेतो ह्यधोक्षजः ॥
नृसिंहः सूर्यभः पद्मगदाशंखादिसंयुतः ।
सारिपद्मगदाशंखो हरिः प्रद्योद्रविप्रभः ॥
शंखाब्जारिगदासूर्यप्रभः संकर्षणो विभुः ।
अनिरुद्धो गदाशंखपद्मचक्री रविप्रभः ॥
श्रीधरोऽरिगदाशंखपद्मेतोऽर्कसमद्युतिः ।
पद्मनाभः साब्जचक्रगदाशंखोऽजसन्निभः ॥ इति ।

क्रमेणापि यथा खिकेदानचीमाढगनाविधिंमत्रिढंजीवजश्री-
ादासद्याखींद्वधीमानिटींतिंपुंटादौनृदंथाच्युचिंजोपटींहानि-
अस्यार्थः शंखचक्रगदापद्मानि भवतो धार्याणि । तेषां क्र-
इईसंज्ञाः । एवं शंखस्य कखगघेति चत्वारो वर्णाः संज्ञाः ।

अथ बौधायनसूत्रं त्रैविक्रमीं चानुसृत्य लिङ्गार्चा-प्रतिष्ठोच्यते—'यजमानः पूर्वोक्तकाले पूर्वेद्युः दशाद्वादशषोडशान्यतरहस्तं मण्डपं कृत्वाऽऽग्नेये हस्तमात्रं चतुरस्रं कुण्डं स्थण्डिलं वा पूर्वतो हस्तमात्रां वेदीं नैर्ऋते वा(१)स्तुमण्डपं मध्ये वेदीं तदुपरि सर्वतोभद्रं कृत्वा प्राणानायम्यास्यां मूर्तौ लिङ्गे(२) वा देवस्य सान्निध्यसिद्ध्यर्थं दीर्घायुर्लक्ष्मीसर्वकामसमृद्ध्यक्षय्यसुखकामोऽमुकमूर्तिप्रतिष्ठां करिष्ये इति सङ्कल्प्य गणेशपूजनपुण्याहवाचनमातृकापूजननान्दीश्राद्धानि कृत्वाचार्यं चतुर ऋत्विजश्च वृत्वा वस्त्राद्यैः पूजयेत्। अथाचार्यो यदत्र संस्थितमिति सर्षपान् विकीर्यापोहिष्ठेति कुशोदकेन भूमिं प्रोक्ष्य देवा आयान्तु, यातुधाना अपयान्तु, विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशं कृत्वाऽस्मत्कृततुलापद्धतिमार्गेण मण्डपप्रतिष्ठां कृत्वाऽकृत्वा वा पूर्वरात्रौ हिरण्योपधानं देवं पञ्चगव्यहिरण्यवदूर्वाश्वत्थपलाशपर्णान्युदकुम्भे प्रक्षिप्य ताभिरद्भिरापोहिष्ठेति तिसृभिर्हिरण्यवर्णा इति चतसृभिः पवमानःसुवर्जन इ-

---

चक्रस्य चछजझेति। गदायाः टठडढेति। पद्मस्य तथदधेति। एवञ्च खिके इत्यादौ प्रथमैः कचटतैः प्रथमः शंखः, द्वितीयैः खछठथैः द्वितीयं चक्रं, तृतीयैः गजडदैः तृतीया गदा, चतुर्थैः घझढधैश्चतुर्थं पद्ममिति च ऊर्ध्वं दक्षिणकरक्रमेण विन्यासात्केशवादिमूर्तयः। अथार्थः—खिके खं शंखः संज्ञात्वात्, खश्चक्रं द्वितीयत्वात्, ईर्गदा संज्ञात्वात्, शिष्टं पद्ममर्थलभ्यम्, केशवः। दानः दः पद्मं संज्ञात्वात्, दः गदा तृतीयत्वात्, आ चक्रं संज्ञात्वात्, शिष्टः शंखः, नारायणः एवं क्रमेण चीमा इत्यादेरर्थः कार्यः।

---

(१) 'मण्डलमध्ये' ख० 'मण्डलं मध्ये' क०

(२) 'लिङ्गेवा' नास्ति ख०

त्यनुवाकेनाभिषिच्य व्याहृतिभिरिदंविष्णुरिति फलय-
वदूर्वाः समर्प्य(१)नमस्ते रुद्रमन्यव इति रुद्रे ततो रक्षो-
हणमिति हस्ते कङ्कणं बद्ध्वा वाससाच्छाद्य अवतेहेड
उदुत्तममिति जलेऽधिवासयेत्' । इदं बौधायनोक्तम् ।

ततश्चललिङ्गे अर्चायां वा अत्राग्निं प्रतिष्ठाप्य गो-
क्षीरे नीवारचरुं कृत्वा विष्णुश्चेत् कृसरमपि श्रपयित्वा-
ऽऽज्यभागान्ते पलाशोदुम्बराश्वत्थशम्यपामार्गसमि-
द्भिः आज्येन चरुणा तिलैर्वा प्रत्येकमष्टाविंशतिमष्टौ वा-
ऽऽहुतीर्लोकपालमूर्तिपतिभ्यो हुत्वा स्थाप्य देवमन्त्रेण पू-
र्वोक्तसमित्तिलनैवारचर्वाज्यैरष्टसहस्रमष्टशतमष्टाविंश-
तिं वा हुत्वा 'अग्निर्यज्ञेभिः' इत्यनुवाकेन दशाहु-
तीर्जुहुयात् । प्रतिद्रव्यहोमान्ते देवं पादनाभिशिरस्सु
स्पृशेत् । आज्यहोमे चोत्तरतः सजलकुम्भे संपातान्न-
येत् । तेषां मन्त्राः–इन्द्रायेन्दो इतीन्द्रस्य, स्योनेति पृथि-
वीमूर्तेः, अघोरेभ्य इति तत्पतेः, शर्वस्य अग्न आया-
हीत्यग्नेः, अग्निं दूतमित्यग्निमूर्तेः, न(१)मः शर्वाय च
पशुपतये चेति पशुपतेः, यमाय सोममिति यमस्य,
असि हि वीरिति यजमानमूर्तेः, स्तुहि श्रुतं तत्पतेः उ-
ग्रस्य, असुन्वन्तं निर्ऋतेः, आकृष्णेन सूर्यमूर्तेः, यो
रुद्रो अग्नौ इति तत्पते रुद्रस्य, इमं मे वरुणस्य, शं-
नो देवी जलमूर्तेः, नमो भवायेति भवस्य, आनो नि-
युद्भिरिति वायोः, वात आ वातु वायुमूर्तेः, तमी-
शानं तत्पतेरीशानस्य, आप्यायस्वेति कुबेरस्य, वयं-
सोमेति सोममूर्तेः, तत्पुरुषाय महादेवस्य, अभित्वा
ईशानस्य, आदित्यस्त्वेत्याकाशस्य, नम उग्राय चेति
तत्पतेर्भीमस्य । ततो देवस्य पादौ स्पृशेत् । एवं द्वितीये

(१) 'नमस्ते रुद्रमन्यव इति रुद्रे ततो' नास्ति ख० ग०
(१) 'नमः शिवाय' क० ।

हुत्वा नाभिं, तृतीये मध्यं, चतुर्थे उरः, पञ्चमे शि
स्पृष्ट्वा प्रतिपर्यायं संपातजलेन देवमभिषिञ्चेत । ततः रि
ष्टकृदादिहोमशेषं समाप्यार्चां शोधयेत् । स्थिरलिङ्गा
दौ तु नेदानीमग्निस्थापनहोमादि कार्यम् ।

ततो देवं नत्वा—

स्वागतं देवदेवेश विश्वरूप नमोऽस्तु ते ।
शुद्धेऽपि त्वदधिष्ठाने शुद्धिं कुर्मः सहस्व ताम् ॥

इति संप्रार्थ्य 'उत्तिष्ठ ब्रह्मणस्पते' इति सर्त्विगुत्था
पूर्वमकृतेऽग्न्युत्तारणे अधुना वा कार्यम् 'अग्निःसप्ति
इति सूक्तमग्निपदहीनं पठित्वा तत्सहितं पुनः पठे
एवमष्टसहस्रमष्टशतमष्टाविंशति वा पठन् जलं पा
येत् । ततोऽर्चां द्वादशवारं मृदा जलेन च प्रक्षा
मन्त्रवत्पञ्चगव्यं कृत्वा 'पयः पृथिव्याम्' 'आवोरा
नम्' इति च संस्नाप्य 'आप्यायस्व' 'दधिक्रा
'तेजोसि' 'मधुवाता' 'आपं गौः' इति पञ्चामृतैः संस्ना
लिङ्गं चेत् 'नमस्ते रुद्र मन्यवे' इत्यष्टाभिः संस्नाप्य घृ
नाभ्यङ्योद्वर्तनेनोद्वर्त्योष्णोदकेन प्रक्षाल्य गन्धं द
संपातोदकेनाभिषिच्य सपल्लवैश्चतुर्भिः कुम्भैः 'आ
हिष्ठा' इति त्रिभिः 'आकलशेषु' इति च प्रत्येकं, 'स
द्रज्येष्ठा' इति चतुर्भिः 'आकलशेषु' इति च मिलि
संस्नाप्यौदुम्बरादिपीठेऽर्चामुपवेश्य परितोऽष्टादिक्षु स
लकुम्भान्संस्थाप्य तेषु गन्धपुष्पदूर्वाः क्षिप्त्वा अ
सप्तमृदः, द्वितीये पुष्करपर्णशमीविकङ्कताश्मन्तकत्व
पल्लवाश्च, तृतीयादिषु सप्तधान्यं पञ्चरत्नफलपुष्पा
कुशदूर्वागोरोचनसम्पातोदकगन्धफलसर्वौषधीः
प्त्वा क्रमेण 'आपोहिष्ठा' इति तिसृभिः 'हिरण्यव
इति चतसृभिः पवमानानुवाकेन चाभिषिच्यैककु

शमीपलाशवटखदिराबिल्वाश्वत्थविकङ्कतपनसाम्रशिरीषोदुम्बराणां पल्लवान् कषायांश्च क्षिप्त्वा 'अश्वत्थेवः' इत्यभिषिच्य पञ्चरत्नोदकेन 'हिरण्यवर्णाः' इति संस्नाप्य वाससी दत्त्वा उपवीतादि दीपान्तं कृत्वा 'हिरण्यगर्भः' 'य आत्मदा' 'यः प्राणतः' 'यस्येमे' 'येन द्यौः' 'यं क्रन्दसी' 'आपो ह यत्' 'यश्चिदापो' इत्यष्टौ पिष्टदीपान् दत्त्वा सुवर्णशलाकया तैजसपात्रस्थं मधु घृतं च गृहीत्वा 'चित्रं देवानां' 'तेजोसि' इति मन्त्राभ्यां

ॐ नमोभगवते तुभ्यं शि(१)वाय हरये नमः।
हिरण्यरेतसे विष्णो विश्वरूपाय ते नमः॥

इति च दक्षिणसव्ये देवनेत्रे मन्त्रावृत्त्या लिखेत्। 'अञ्जन्ति त्वा' इत्यञ्जनेन मधुना वाऽङ्क्त्वा 'देवस्य त्वा सवितुः प्र(२)सवे० इन्द्रस्येन्द्रियेणानञ्मि' इति मध्वाज्यशर्कराभिरङ्क्त्वा तेनैवाञ्जनेन पुनरञ्जयेत्। स्थिरलिङ्गे तु स्वर्णसूच्या गन्धेन। 'ॐ नमो भगवते रुद्राय हिरण्यरेतसे पराय परमात्मने विश्वरूपायोमाप्रियाय नमः' इत्यञ्जनादिनाऽञ्जयेत्। ततः आदर्शभक्ष्यादि दर्शयेत्। ततः कर्ता आचार्याय गामृत्विग्भ्यश्च दक्षिणां दद्यात्। अथाचार्यः प्रत्यृचमादौ प्रणवं वदन् पुरुषसूक्तेन स्तुत्वा वंशपात्रे पंचवर्णौदनेन देवस्य नीराजनं कारयित्वा रुद्राय चतुष्पथादौ दद्यात्। मन्त्रस्तु-'ॐ नमो रुद्राय सर्वभूताधिपतये दीप्तशूलधरायोमादयिताय विश्वाधिपतये रुद्राय वै नमो नमः शिवमगर्हितं कर्मास्तु स्वाहा' इति। अश्वत्थपर्णे भूतेभ्यो नम इति। केचिदेतद्रात्रौ स्थिरप्रतिष्ठायामिच्छन्ति।

अथाचार्यः सर्वतोभद्रे देवानावाहयेत्। मध्ये ब्र-

(१) 'हराय हरये' क०
(२) 'प्रसवे० इन्द्रस्येन्द्रियेणानञ्मि' नास्ति क०

ह्माणम्, पूर्वादिदिक्षु इन्द्रादिलोकपालान्, ईशानेन्द्रा
व्यन्तरालेषु वसून् रुद्रान् आदित्यान् अश्विनौ विश्वान्दे
वान् पितॄन् स्कन्दवृषौ, ब्रह्मेशानाद्यन्तरालेषु दक्षं वि
ष्णुं दुर्गां स्वधाकारं मृत्युरोगान् समुद्रान् सरितः म
रुतः गणाधिपं चेति। मध्ये एव पृथिवीं मेरुं संस्थाप
देवं चावाह्य प्रागादि वज्रं शक्तिं दण्डं खड्गं पाशं
अङ्कुशं गदां शूलं, तद्बाह्ये गौतमं भरद्वाजं विश्वामि
त्रं कश्यपं जमदग्निं वसिष्ठम् अत्रिम् अरुन्धतीं च, त
द्बाह्ये नवग्रहान्, तद्बाह्ये ऐन्द्रीं कौमारीं ब्राह्मीं व
राहीं चामुण्डां वैष्णवीं माहेश्वरीं वैनायकीमित्येत
नामभिरावाह्य सम्पूज्य अर्चायां देवं तन्मन्त्रेणावाह
मण्डलमध्येऽर्चां 'सुप्रतिष्ठो भव' इति निवेश्य संपूज
वह्नौ मण्डलदेवतानां नामभिस्तिलाज्येन दशदशाहुती
र्हुत्वा पुष्पाञ्जलिं समर्प्य 'नमो महत्०' इति देवं नत्व
मण्डलादुत्तरतः स्वास्तिके मञ्चकं तदुपरि शय्यां कृत्व
'उत्तिष्ठ' इति देवमुत्थाप्य मङ्गलघोषैः शय्यायां देवम
रोप्य पुरुषसूक्तोत्तरनारायणाभ्यां स्तुत्वा देवे न्या
कुर्यात्। तद्यथा—पुरुषात्मने नमः, प्राणात्मने०, प्रकृति
तत्त्वाय०, बुद्धितत्त्वाय०, अहंकारतत्त्वाय०, मनस्तत्त्वाय
इति सर्वाङ्गे। प्रकृतितत्त्वाय०, बुद्धितत्त्वाय० हृदि। श
ब्दतत्त्वाय० शिरसि। स्पर्शतत्त्वाय० त्वचि। रूपत
त्त्वाय० हृदि। एवं हृद्येव रसगन्धश्रोत्रत्वक्चक्षुर्जि
ह्वाघ्राणवाक्पाणिपादपायूपस्थपृथिव्यप्तेजोवाय्वाकाश-
सत्त्वरजस्तमोदेहतत्त्वानि विन्यसेत्। ततः पुरुषसूक्तस्य
चमृग्द्वयं करयोः, तदुत्तरं जान्वोः, तदुत्तरं कट्योः, '
यज्ञम्' इति तिस्रः नाभिहृत्कण्ठेषु, 'तस्मादश्वा' इ
द्वयं बाह्वोः, 'ब्राह्मणोस्य' इति द्वयं नासयोः, 'नाभ्य
इति द्वयमक्ष्णोः, अन्त्यां शिरसि। केचित्तत्त्वन्यासमन्त्र

था आहुः । पुरुषप्रकृतिमहदहंकारतत्त्वानि, शब्दस्पर्शरूपरसगन्धतन्मात्राणि, आकाशवायुतेजोऽप्पृथिवीश्रोत्रत्वक्चक्षुरसनाघ्राणवाक्पाणिपादपायूपस्थमनस्तत्त्वानीति । कोचिदेतानि स्थिरलिङ्गादावेवेच्छन्ति । ततः 'सुखशायी भव' इति शय्यायां देवं स्थापयित्वा मण्डलशय्ययोरन्तराले न गन्तव्यमिति प्रैषं दत्त्वा स्विष्टकृदादिहोमशेषं समाप्य मण्डलदेवताभ्यो नामभिः पायसेन चरुणा वा बलीन्दद्यात्, नीवारचरुशेषेण दिग्बलिम् । नेदं स्थिरप्रतिष्ठायाम् । स्थिरलिङ्गार्चादौ त्वयं विशेषः–'अग्निस्थापनहोमवर्जं सर्वं पूर्ववत्कृत्वा इदानीमग्निस्थापनं कृत्वा पूर्वोक्तहोमं कुर्यात् । नात्र नैवारश्चरुः । विष्णुश्चेत्पूर्वोक्तहोमं कृत्वा पुरुषसूक्तेन प्रत्यृचमाज्यं हुत्वा 'इदं विष्णुः' इति पादौ स्पृष्ट्वा पुनस्ता एव हुत्वा 'विष्णोर्नुकम्' इति नाभिं (१)स्पृष्ट्वा पुनस्ता एव हुत्वा 'अतो देवा' इति शिरः स्पृष्ट्वा पुनस्ता एव हुत्वा पुरुषसूक्तेन सर्वाङ्गं स्पृशेत् । स्थिरलिङ्गं चेदग्निस्थापनादि पूर्वोक्तसमिदाज्यतिलाहुतीर्हुत्वा 'या त इषुः' इत्यनुवाकान्तेन 'द्रापे' 'सहस्राणि' इत्यनुवाकाभ्यां च प्रत्यृचमाज्यं हुत्वा 'सर्वो वै रुद्रः' इति मूलं स्पृशेत् । पुनस्ता एव हुत्वा 'कद्रुद्राय' इति मध्यम्, पुनस्ता एव हुत्वा 'नमो हिरण्यबाहवे' इत्यग्रम्, पुनस्ता एव हुत्वा सर्वरुद्रेण सर्वाङ्गं स्पृशेत् । ततो 'धामन्त' इति पूर्णाहुतिं जुहुयान्न वा । एवमधिवासनं कृत्वा परेद्युः सद्यो वा पीठिकां स्नापयित्वा 'महीसूषु' इत्यावाह्य 'अदितिर्द्यौः' इति स्तुत्वा 'ह्रीं नमः' इति संपूज्य तेनैव पूर्णाहुतिं हुत्वा 'उत्तिष्ठ ब्रह्मणस्पते' इति देवमुत्थाप्य पुष्पा-

(१) 'स्पृशेत्' क० ।

ञ्जलिं दत्त्वा पुरुषसूक्तेन स्तुत्वा 'उदुत्यम्' इत्युत्था
'कनिक्रदत्' इति सूक्तेन विष्णुं 'सद्योजातम्' इति
ऋानुवाकैर्लिङ्गं गृहं प्रवेश्य पीठिकायाम् इन्द्रादिना
भिरष्टरत्नानि क्षिप्त्वा सप्तधान्य(१)रूप्यवृषमनः
लाः क्षिप्त्वा पायसेन संलिप्य प्रणवेनाङ्गन्यासं कृ
सुवर्णशलाकामन्तरितां कृत्वा सुलग्ने 'ॐ प्रतिष्ठ
रमेश्वर' इत्युक्त्वा 'अतो देवा' इति विष्णुं रुद्रेण च
ङ्गं स्थापयेत् । ततः प्राणप्रतिष्ठा ।

चलार्चादौ त्वधिवासनान्ते परेद्युः 'उत्तिष्ठ ब्रह्म
स्पते' इति देवमुत्थाप्य पुरुषसूक्तोत्तरनारायणा
स्तुत्वा घृते व्रीहिचरुं कृत्वा तद्देवतामन्त्रेण दशाहु
ह्वुत्वा नामभिर्जुहुयात् । अग्नये स्वाहा, सोमाय स्वा
धन्वन्तरये स्वाहा, कुह्वै स्वाहा, अनुमत्यै स्वाहा, प्र
पतये स्वाहा, परमेष्ठिने स्वाहा, ब्रह्मणे स्वाहा, अ
स्वाहा, सोमाय स्वाहा, अग्नयेऽन्नादाय स्वाहा, अग्न
वपतये स्वाहा, प्रजापतये स्वाहा, विश्वेभ्यो देवे
स्वाहा, सर्वेभ्यो देवेभ्यः स्वाहा, भूर्भुवःस्वः स्वा
अग्नये स्विष्टकृते इति । ततः 'सप्त ते अग्ने' 'पुनस्त
इत्याभ्यां पूर्णाहुतिः । तत आचार्यो 'या ओषधीः'
पुष्पफलसर्वौषधीः समर्प्य संपातोदकं (२)ताम्रपात्रे
दाय देवमन्त्रेण शतवारमभिमन्त्र्य तेनैवाभिषिञ्चे
ततः 'उत्तिष्ठ' इति देवमुत्थाप्य 'विश्वतश्चक्षुः'
पस्थाय देवं ध्यात्वा जपेत् । ब्रह्मणे नमः । एवं विष्ण
रुद्राय० इन्द्रादीन् अष्टौ वसुभ्यो रुद्रेभ्य आदि
भ्योऽश्विभ्यां मरुद्भ्यः कुबेराय गङ्गादिमहानदीभ्य
श्रीषोमाभ्यामिन्द्राग्निभ्यां द्यावापृथिवीभ्यां धन्वन्त

(१) 'वृष' नास्ति क० । (२) 'ताम्रपात्रे' नास्ति क० ।

सर्वेशाय विश्वेभ्योदेवेभ्यो ब्रह्मणे नम इति। ततः संपातोदकेन यजमानमभिषिच्य देवं ध्यात्वा 'ॐप्रतितिष्ठ परमेश्वर' इति पुष्पाञ्जलिं निवेद्य सच्चिदानन्दं ब्रह्मैव भक्तानुग्रहाय गृहीतविग्रहं करचरणाद्यवयविनं शङ्खचक्राद्यायुधवन्तं निजवाहनाद्युपेतं निजहृत्कमलेऽवस्थितं सर्वलोकसाक्षिणमणीयांसं 'परमेष्ठ्यासि परमां श्रियं गमय' इति मन्त्रेण पुष्पाञ्जलावागतं विभाव्यार्चायां विन्यस्य प्राणप्रतिष्ठां कुर्यात्।

यथा-अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः, ऋग्यजुःसामानि छन्दांसि, क्रियामयवपुःप्राणाख्या देवता, आं बीजम्, क्रों शक्तिः, प्राणप्रतिष्ठायां विनियोगः। तत ऋष्यादीन् क्रमेण शिरोमुखहृदयगुह्यपादेषु विन्यस्य ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवायवाकाशात्मने आं हृदयाय नमः। ॐ चं छं जं झं ञं इं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा। ॐ टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट्। ॐ तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुम्। ॐ पं फं बं भं मं ओं वचनादानविहरणोत्सर्गानन्दात्मने औं नेत्रत्रयाय वौषट्। ॐ यं रं लं वं शं षं सं हं ळं क्षं अं मनोबुद्ध्यहंकारचित्तात्मने अः अस्त्राय फट्। एवम् आत्मनि देवे च कृत्वा देवं स्पृष्ट्वा जपेत्-ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य प्राणा इह प्राणाः। ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य जीव इह स्थितः। ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य सर्वेन्द्रियाणि। ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठन्तु स्वाहेति। ततोऽर्चाहृदयङ्कुष्ठं द-

त्वा जपेत्—

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कचन ॥ इति ।

ततः प्रणवेन संरुध्य सजीवं ध्यात्वा 'ध्रुवा द्यौः' इति तृचं जप्त्वा कर्णे गायत्रीं देवमन्त्रं च जप्त्वा पुरुषसूक्तेनोपस्थाय पादनाभिशिरःसु स्पृष्ट्वा 'इहैवैधि' इति विर्जयेत् । ततः कर्ता—

स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः ।
प्राकृतं त्वमदृष्ट्वा मां बालवत्परिपालय ॥
धर्मार्थकामसिद्ध्यर्थं स्थिरो भव शुभाय नः ।
सांनिध्यं तु सदा देव स्वार्चायां परिकल्पय ॥
यावच्चन्द्रावनीसूर्यास्तिष्ठन्त्यप्रतिघातिनः ।
तावत्त्वयाऽत्र देवेश स्थेयं भक्तानुकम्पया ॥
भगवन् देवदेवेश त्वं पिता सर्वदेहिनाम् ।
येन रूपेण भगवंस्त्वया व्याप्तं चराचरम् ॥
तेन रूपेण देवेश स्वार्चायां सन्निधो भव ।

इति नमेत् । एतदन्तं सर्वदेवानां समानम् । देवमन्त्रश्च मूलमन्त्रो वैदिको वा ग्राह्यः ।

अथाचार्यः कर्ता वा लिङ्गमर्चां वा ॐ भूः पुरुषमावाहयामि, ॐ भुवः पुरुषमावाहयामि, ॐ सुवः पुरुषमावाहयामि, ॐ भूर्भुवःसुवः पुरुषमावाहयामीत्यावाह्य प्रणवेनासनं दत्त्वा तेनैव दूर्वाश्यामाकविष्णुक्रान्तापद्मभिश्रं पाद्यम्, 'इमा आपः शिवतमाः (१)पूताः पूततमा मेध्या मेध्यतमा अमृता अमृतरसाः पाद्यास्ता जुषतां प्रतिगृह्यतां प्रतिगृह्णातु भगवान् महाविष्णुर्विष्णवे नमः' इति पाद्यम्, 'भगवान् महादेवो रुद्राय नमः'

(१) 'पूताः' नास्ति क० ।

ति लिङ्गे, (१)एवं देवतान्तरेषूह्यम् । 'इमा आपः आ-
मनीयास्ता जुषताम्' (२)इति एलालवङ्गकङ्कोलकर्पूर-
यश्रमाचमनीयम्, आपः क्षीरकुशाग्रैश्चाक्षतैर्यवतण्डुलैः
वैः सिद्धार्थकैश्चैव अर्घ्या इत्यर्घ्यम् । ततो वेदमन्त्रैः
स्नाप्य 'इदं विष्णुः' इति विष्णौ 'नमो अस्तु नील-
ग्रीवाय' इति लिङ्गे प्रतिसरं विस्रस्य (३)वस्त्रं यज्ञोपवी-
च दत्त्वा—

इमे गन्धाः शुभा दिव्याः सर्वगन्धैरलंकृताः ।
पूता ब्रह्मपवित्रेण पूताः सूर्यस्य राश्मिभिः ॥

इति गन्धम्,

'इमे माल्याः शुभा दिव्याः सर्वमाल्यैरलंकृताः ।
ना०'इत्यादिमाल्यम्, 'इमे पुष्पाः शुभा०'इत्यादि पुष्पम्,

वनस्पतिरसोद्भूतो (४)गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः(५) सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥

तिगृह्णात्वित्यादि धूपम्,

ज्योतिः शुक्रं च तेजश्च देवानां सततं प्रियः ।
(६)प्रज्योतिः सर्वभूतानां दीपोयं प्रतिगृह्यताम् ॥

इति दीपं दत्त्वा विष्णौ संकर्षणवासुदेवप्रद्युम्नानि-
रुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्दनोपेन्द्रहरिश्रीकृ-
ष्णेति द्वादशनामभिः केशवादिद्वादशनामभिर्वा पुष्पा-
णि समर्प्य तैरेव तर्पणं कृत्वा (७)पायसगुडौदनंचित्रौद-

(१) 'एवं देवतान्तरेषूह्यम्' नास्ति क० ख० ।
(२) 'इत्याचमनीयम्, अर्घ्या' ग० ।
(३) 'वस्त्रं यज्ञोपवीतं च दत्त्वा' नास्ति ख० ।
(४) 'गन्धाढ्यो धूप उत्तमः' ग० ख० ।
(५) 'आघ्राणः' क० ।
(६) 'प्रभाकरः' क० ।
(७) 'पायसघृतप्लुतपूर्णशरावगुडौदनहरिद्रौदनाचित्रौदनानि क०' ।

नानि 'पवित्रं ते विततम्' इति (१)निवेद्य संकर्षणादिपूर्वोक्तनामभिर्द्वादश कुसराहुतीर्हुत्वा तेनैव शार्ङ्गिणे० श्रियै० सरस्वत्यै० विष्णवे० इति हुत्वा 'विष्णोर्नुकं वीर्याणि' 'तदस्य प्रियमभिपाथो' 'प्रतद्विष्णुस्तवते वर्ष्येण' 'परोमात्रया तन्वा वृधानः' 'विचक्रमे पृथिवीमेष एताम्' 'त्रिर्देवः पृथिवीमेष एताम्' (२)इति जुहुयात्। पुनः द्वादशनामभिर्जुहुयात्।

लिङ्गे तु दीपान्तं कृत्वा भवाय देवाय० शर्वाय० ईशानाय० पशुपतये० रुद्राय० उग्राय० भीमाय० महते देवाय नमः इति पुष्पाणि दत्त्वा तैरेव तर्पणं कृत्वा 'पवित्रं ते' इति पायसं गुडौदनं च निवेद्य पूर्वोक्तनामभिः कुसरं हुत्वा 'भवस्य देवस्य पत्न्यै स्वाहा' इत्याद्यष्टाभिर्गुडौदनं हुत्वा 'भवस्य देवस्य सुताय स्वाहा' इत्यार्षैर्हरिद्रौदनं हुत्वा 'त्र्यम्बकं यजामहे०' 'मानोमहान्तमुत मानो०' 'मानस्तोके तनये०' 'आरात्ते गोघ्नमुत पूरुषघ्ने०' 'विकिरिदविलोहित०' 'सहस्राणि सहस्रशो' इति (३)द्वादश, एतैर्हुत्वा 'शिवाय शंकराय सहमानाय शितिकण्ठाय कपर्दिने ताम्राय अरुणाय अपगुरमाणाय हिरण्यबाहवे सस्पिंजराय बभ्लुशाय हिरण्याय' इति च जुहुयात्। ततः स्विष्टकृदादिहोमशेषं समाप्य पूर्वोक्तसर्वहविर्भिर्विष्णवे लिङ्गाय वा बलिं द-

---

(१) 'निवेद्य कुसरमाज्यमिश्रं जुहुयात्-वासुदेवाय स्वाहा, संकर्षणाय स्वाहा, प्रद्युम्नाय स्वाहा, अनिरुद्धाय०शान्त्यै० श्रियै० सरस्वत्यै० पुष्ट्यै० विष्णवे०' क०।

(२) 'इति द्वादशनामभिश्चामुष्मै स्वाहेति जुहुयात्' क० ख०।

(३) सहस्राणीत्यनुवाकस्य दशर्चत्वेनात्र दशाभिरित्येवापेक्षितमिति भाति। अत्र द्वादशपदं सर्वत्र दृश्यते। तत्र सदसत्सद्भिर्विचारणीयम्।

द्यात् । मन्त्रस्तु—

त्वामेकमाद्यं पुरुषं पुरातनं
नारायणं विश्वसृजं यजामहे ।
त्वमेव यज्ञो विहितो विधेय-
स्त्वमात्मनात्मन् प्रतिगृह्णीष्व हव्यम् ॥ इति ।

लिङ्गे तु नारायणपदे रुद्रं शिवमिति वदेत् । ततोऽश्वत्थपर्णे 'भूर्भुवःस्वरोम्' इति हुतशेषं निधा(१)य प्रदक्षिणीकृत्य विश्वसृजे आत्मने परमात्मने नमः इति न(२)त्वा आचार्याय शतं तदर्धं तदर्धं द्वादश तिस्र एकां वा गां दत्त्वा ऋत्विग्भ्योऽपि दक्षिणां दत्त्वा शतं द्वादश वा ब्राह्मणान् भोजयेदिति संक्षेपः । प्रासादमात्रे नूतने तु मात्स्योक्तजलाशयप्रतिष्ठाविधिमेव कुर्यात् । गारुत्तारणपात्रप्रक्षेपादि तु न भवति द्वारलोपात् । वारुणहोमस्थाने वास्तुहोमः । अन्यत्तद्वदेव ।

इति भट्टकमलाकरकृतौ लिङ्गार्चाप्रतिष्ठाविधिः ॥

अथ पुनःप्रतिष्ठा । तामधिकृत्य हयशीर्षपञ्चरात्रे—

चाण्डालमद्यसंस्पर्शदूषिता वह्निनाऽथवा ।
अपुण्यजनसंस्पृष्टा विप्रक्षत्रजदूषिता ॥

संस्कार्येति शेषः । पदार्थादर्शे ब्राह्मे—

खण्डिते स्फुटिते दग्धे भ्रष्टे मानविवर्जिते ।
यागहीने पशुस्पृष्टे पतिते दुष्टभूमिषु ॥
अन्यमन्त्रार्चिते चैव पतितस्पर्शदूषिते ।
दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः ॥

यागः पूजा । पशुर्गर्दभादिः । पञ्चरात्रे—

खण्डिता स्फुटिता दग्धा यस्मादर्चा भयावहा ।
तस्मात्समुद्धरेत्तां तु पूर्वोक्तविधिना नरः ॥

(१) 'निधायाग्निना सह प्रद' क० ।
(२) 'नत्वाऽङ्गुलीयकुण्डलद्वयवस्त्रयुग्मेनाचार्यं पूजयित्वाऽऽचार्यं'क० ।

*अर्चाभङ्गादावुपवासः कार्यः,
न राज्ञो विप्लवेऽश्नीयात्सुरार्चाविप्लवे तथा ।
इति विष्णुधर्मोक्तेः । सिद्धान्तशेखरे—
चौरचण्डालपतितश्वोदक्यास्पर्शने सति ।
श(१)वाद्युपहतौ चैव प्रतिष्ठां पुनराचरेत् ॥
पञ्चरात्रे—
अङ्गादङ्गादिसंधाने प्रतिष्ठां पुनराचरेत् ।
जला(२)धिवासरहितां नेत्रोन्मीलनवर्जिताम् ॥
शुद्धिविवेके विष्णुः-'द्रव्यवत्कृतशौचानां देवतार्चानां भूयः प्रतिष्ठापनेन शुद्धिः' इति । अर्चाः प्रतिमाः । तद्द्रव्यस्य ताम्रादेरुक्तशौचं कृत्वा पुनःप्रतिष्ठां कुर्यादित्यर्थः । स्मृत्यर्थसारेऽप्येवम् ।

तद्विधिर्बौधायनसूत्रे-'पूर्वप्रतिष्ठितस्याशुद्धिपूर्वमेकरात्रं द्विरात्रमेकमासं द्विमासं वाऽर्चनादिविच्छेदे शूद्ररजस्वलाद्युपस्पर्शने पूर्वोक्ते काले पुण्याहं वाचयित्वा युग्मान्ब्राह्मणान्भोजयित्वा निशायां जलाधिवासं कृत्वा श्वोभूते कलशपूर्णेन पञ्चगव्येन तत्तन्मन्त्रैः स्नापयित्वाऽन्यं कलशं शुद्धोदकेनापूर्य तस्मिन्नवरत्नानि प्रक्षिप्य तं कलशं तत्तद्गायत्र्याष्टसहस्रमष्टशतमष्टाविंशतिवारं वाऽभिमन्त्र्य तेनोदकेन देवं स्नापयेत्ततः शुद्धोदकेन स्नापये-

---

*अर्चाभङ्गादाविति ।
अग्निदग्धे तु दम्भोलिपतने देवमन्दिरे ।
पुनःप्रतिष्ठा कर्त्तव्या आर्त्ते च निस्वनेऽपि वा ॥
संप्रोक्षणविधानेन कुर्यादेवमतन्द्रितः ।
स्थानसंचलने वापि शवसूतकिसंस्पृशे ॥

---

(१) 'शवाद्युपहते' ग० ।
(२) 'जलाधिवासविहितनेत्रो' ख० ग० ।

दष्टसहस्रमष्टशतमष्टाविंशति वा पुरुषसूक्तेन मूलमन्
ण च । ततः पुष्पाणि दत्त्वा यथासंभवमर्चयित्वा गुरो
नं निवेदयेत्' इति । बुद्धिपूर्वं तु विच्छेदं पूर्वोक्तां प्रति
ष्ठां पुनः कुर्यात् पूर्वोक्तविष्णुवचनात् । इदं मलमासस्
क्रास्तादावपि कार्यमिति मदनरत्ने हेमाद्रौ च । देवाच
प्रासादभेदने तु शूलपाणौ काश्यपः-'वापीकूपारामस
तुसभातडागवप्रदेवतायतनभेदने प्रायश्चित्तं चतस्र अ
ज्याहुतीर्जुहुयात्-'इदं विष्णुः' 'मानस्तोके' 'विष्णो
कर्माणि' 'पादोऽस्य' इति, यां देवतामुत्सादयति तस
देवतायै ब्राह्मणान्भोजयेत्' इति । शङ्खलिखितौ-'प्रति
मारामकूपसंक्रमध्वजसेतुनिपातभङ्गेषु तत्समुत्थानं प्रति
संस्कारोऽष्टशतं च निपातितानाम्' इति । समुत्था
प्रतिक्रिया । प्रतिसंस्कारः पुनः प्रतिष्ठा । अष्टशतं पण
दण्डश्चेत्यर्थः ।

अथ जीर्णोद्धारः । सच लिङ्गादौ दग्धे भग्ने चलि
वा कार्यः । अयं चानादिसिद्धप्रतिष्ठितलिङ्गादौ भङ्ग
दिदुष्टेऽपि न कार्यः, तत्र तु महाभिषेकं कुर्यादिति त्रि
विक्रमः । कर्ताऽमुकदेवस्य जीर्णोद्धारं करिष्ये(१)इत्यु

चण्डालपुल्कसोदक्यापतिताद्यभिमर्शने ।
विण्मूत्रस्पर्शने वापि खरोष्ट्राभिप्रवेशने ॥
सन्ततार्चनलोपेऽपि अङ्गारस्पर्शनेऽपि वा ।
एवमाद्येषु जातेषु तदा संप्रोक्षयेद् गुरुः ॥
संप्रोक्षणविधाने तु न कालनियमस्तथा ।
पुण्याहं वाचयित्वा च ब्राह्मणैरुपचारयेत् ॥

इत्याद्यन्यत्र विस्तरः ।

---

(१) 'करिष्ये इति संकल्प्य पुण्याहं' क०।

कृत्वा पुण्याहं वाचयित्वा ना(१)न्दीश्राद्धान्तं कृत्वा आचार्यमृत्विजश्च वृत्वा पीठे(२)मण्डलदेवता आवाह्य लिङ्गे ॐ व्यापकेश्वर हृदयाय नमः, ॐ व्यापकेश्वर शिरसे स्वाहा, इत्येवं षडङ्गं कृत्वा देवतान्तरे मूलमन्त्रेण षडङ्गं कृत्वा(३)अर्चयेत्। अघोरमन्त्रम् अष्टोत्तरशतं जप्त्वाऽग्निं प्रतिष्ठाप्याघोरेण घृतसर्षपैः सहस्रं हुत्वा इन्द्रादिभ्यो नाम्ना बलिं दत्त्वा जीर्णदेवं प्रणवेन संपूज्य सा(४)ज्यतिलैर्ब्रह्मादिमण्डलदेवतानां होमं पूर्वोक्तं कृत्वा देवं प्रार्थयेत्—

जीर्णभग्नमि(५)दं देव सर्वदोषावहं नृणाम्।
अस्योद्धारे कृते शान्तिः शास्त्रेऽस्मिन्कथिता त्वया॥
जीर्णोद्धारविधानं च नृपराष्ट्रहितावहम्।
तदधस्तिष्ठतां देव प्रहरामि तवाज्ञया॥ इति।

ततः क्षीराज्यमधुदूर्वाभिः समिद्भिश्चाष्टोत्तरसहस्रम् अष्टोत्तरशतं वा देवमन्त्रेण हुत्वाऽङ्गानां दशांशेन लिङ्गचालनार्थं सहस्रं शतं वा पायसेन हुत्वा लिङ्गं प्रार्थयेत्—

'लिङ्गरूपं समागत्य येनेदं समधिष्ठितम्।
यायास्त्वं संमितं स्थानं संत्यज्यैव शिवाज्ञया॥
अत्र स्थाने च या विद्या सर्वविघ्नेश्वरैर्युता।
शिवेन सह संतिष्ठ'

इति मन्त्रितजलेनाभिषिच्य विसर्जयेत्। ततोऽस्त्रमन्त्रितेन खनित्रेण खात्वा लिङ्गमादाय नद्यादौ वामदेवेन लिङ्गं, प्रणवेन मूर्तिं क्षिपेत्। दारुजं तु मधुनाऽभ्यज्या-

(१) 'नान्दीश्राद्धान्तं कृत्वा' नास्ति क०।
(२) 'पीठे मण्डलदेवता आवाह्य' नास्ति क०।
(३) 'अर्चयेत्। अघोरमन्त्रमष्टोत्तरशतं जप्त्वा' नास्ति ख०।
(४) 'साज्यतिलैः' नास्ति ख०। (५) 'मिदं चैव' ख०।

घोरेण दहेत्। हेमरत्नादिमयं तु दग्धं चलितं वा पुनस्तत्रैव स्थापयेत्। ततः शान्त्यै अघोरेण तिलैः सहस्रं हुत्वा प्रार्थयेत्—

भगवन्भूतभव्येश लोकनाथ जगत्पते।
जीर्णलिङ्गसमुद्धारः कृतस्तवाज्ञया मया॥
अग्निना दारुजं दग्धं च्छिन्नं शैलादिकं जले।
प्रायश्चित्ताय देवेश अघोरास्त्रेण तर्पितम्॥
ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं यदि।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर॥

ततो यजमानः प्रार्थयेत्—

गोविप्रशिल्पिभूतानामाचार्यस्य च यज्वनः।
शान्तिर्भवतु देवेश अच्छिद्रं जायतामिदम्॥

सूत्रौ तु विशेषः—

त्वत्प्रसादेन निर्विघ्नं देहं निर्मायथत्यसौ।
वासं कुरु सुरश्रेष्ठ तावत्त्वं चाल्पके गृहे॥
वसन्क्लेशं सहित्वेह मूर्तिं वै तव पूर्ववत्॥
यावत्कारयते भक्तः कुरु तस्य च वाञ्छितम्॥ इति।

ततो नवां मूर्तिं लिङ्गं वा कृत्वोक्तविधिना स्थापयेत्। मूलं त्वग्निपुराणे स्पष्टम्।

इति जीर्णोद्धारः॥

अथ तुलसीग्रहणम्। देवयाज्ञिककृतं स्मृतिसारे—

वैधृतौ च व्यतीपाते भौमभार्गवभानुषु।
पर्वद्वये च संक्रान्तौ द्वादश्यां मृतकद्वये॥
तुलसीं ये विचिन्वन्ति ते च्छिन्दन्ति हरेः शिरः॥

विष्णुधर्मोत्तरे—

रविवारं विना दूर्वां तुलसीं द्वादशीं विना।
जीवितस्याविनाशाय प्रविचिन्वीत धर्मवित्॥

तथा—
संक्रान्तावर्कपक्षान्ते द्वादश्यां निशि सन्ध्ययोः ।
यैश्छिन्नं तुलसीपत्रं तैश्छिन्नं हरिमस्तकम् ॥
पाद्मे—
द्वादश्यां तुलसीपत्रं धात्रीपत्रं च कार्तिके ।
लुनाति स नरो गच्छेन्निरयानतिगर्हितान् ॥
रुद्रयामले—
द्वादश्यां च दिवा स्वापस्तुलस्यवचयस्तथा ।
विष्णोश्चैव दिवा स्नानं वर्जनीयं सदा बुधैः ॥
विष्णुधर्मे—
न च्छिन्द्यात्तुलसीं विप्रो द्वादश्यां वैष्णवः क्वचित् ।
देवार्थे तुलसीच्छेदो होमार्थे समिधां तथा ॥
इन्दुक्षये न दुष्येत गवार्थे तु तृणस्य च ॥
ग्रहणमन्त्रस्तु पाद्मे—
तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये ।
केशवार्थं विचिन्वामि वरदा भव शोभने ॥ इति ।
पारिजाते दक्षः—
समित्पुष्पकुशादीनां द्वितीयः प्रहरो मतः ।
अथ पुष्पादेः पर्युषितत्वम् । भार्गवार्चने भविष्ये—
प्रहरं तिष्ठते जाती करवीरमहर्निशम् ।
तुलस्यां बिल्वपत्रेषु सर्वेषु जलजेषु च ॥
न पर्युषितदोषोऽस्ति मालाकारगृहेऽपि च ॥
बृहन्नारदीये—
वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम् ।
न वर्ज्यं तुलसीपत्रं न वर्ज्यं जाह्नवीजलम् ॥
तत्रैव पाद्मे—
तुलसी पर्युषिता नैव बिल्वं तु त्रिदिनावधि ।
पद्मं पञ्चदिनात्त्याज्यं शेषं पर्युषितं विदुः ॥

स्कान्दे—

पालाशं दिनमेकं तु पङ्कजं च दिनत्रयम् ।
पञ्चाहं बिल्वपत्रं च दशाहं तुलसीदलम् ॥

पदार्थादर्शे बोपदेवस्त्वन्यथाह—

बिल्वापामार्गजातीतुलसिशमिशताकेतकीभृङ्गदूर्वा-
मन्दाम्भोजाहिदर्भामुनितिलत(१)सरब्रह्मकह्लारमल्लयः ।
चम्पाश्वारातिकुम्भीदमनमरुबका बिल्वतोऽहानि शस्ता-
स्त्रिंशत्त्र्येकार्यरीशोदधिनिधिवसुभूभूयमा भूय एवम् ॥
३० ३ १६ ११ ४ १ ८ ११ २

अस्यार्थः—शता शतावरी । मन्दः मन्दारः । अहिर्नागकेशरः । मुनिरगस्त्यः । अश्वारातिः करवीरः । कुम्भी पाटलेति कैदेवनिघण्टुः । अरयः षट् । ईशा एकादश । उदधयश्चत्वारः । निधयो नव । वसवोऽष्टौ । भूः एकः । यमौ द्वौ । बिल्वमारभ्याऽहिपर्यन्तं गणयित्वा दर्भमारभ्य पुनस्त्रिंशदादि गणयेदित्यर्थः । एतादृनोत्तरं पर्युषितानीत्यर्थः । टोडरानन्दे स्कान्दे दमनमुपक्रम्य—

तस्य माला भगवतः परमप्रीतिकारिणी ।
शुष्का पर्युषिता वापि न दुष्टा भवति क्वचित् ॥

तिथितत्त्वे मात्स्ये—

बिल्वपत्रं च माध्यं च तमालामलकीदले ।
कह्लारं तुलसी चैव पद्मं च मुनिपुष्पकम् ॥
एतत्पर्युषितं न स्यात्कुशाश्च कलिकास्तथा ॥

स्मृतिसारावल्याम्—

जलजानां च सर्वेषां पत्राणामहतस्य च ।
कुशपुष्पस्य रजतसुवर्णकृतयोरपि ॥
न पर्युषितदोषोऽस्ति तीर्थतोयस्य चैव हि ।
मुकुलैर्नार्चयेद्देवं (२)पङ्कजैर्जलजैर्विना ॥

(१) 'तगर' ख० (२) 'चम्पकैर्ज' क०

अथ शिवनिर्माल्यनिर्णयः । सिद्धान्तशेखरे—

*धराहिरण्यगोरत्नताम्रराौप्यांशुकादिकान् ।
विहाय शेषं निर्माल्यं चण्डेशाय निवेदयेत् ॥
अन्यदन्नादि पानीयं ताम्बूलं गन्धपुष्पकम् ।
दद्याच्चण्डाय निर्माल्यं शिवभुक्तं तु सर्वशः ॥
आचार्यशिवचण्डानामाज्ञाभङ्गे तु लक्षकम् ।
धनस्य भक्षणे तेषां पादोनं लक्षमीरितम् ॥
निर्माल्ये भक्षिते लक्षपादतः शुद्धिरीरिता ।
दानं च भक्षणसमं तदर्धं तदुपेक्षणे ॥
अकामाद्भक्षणे यद्वा निर्माल्यस्य जपेत्सुधीः ।
ब्रह्मपञ्चक(१)साहस्रं धर्मेण सहितं ततः ॥
कामतो भक्षणे दीक्षा प्रायश्चित्तं न चान्यतः ।
निर्माल्यलङ्घनेऽघोरं प्रजपेदयुतं ततः ॥
स्पर्शश्च लङ्घनसमो विक्रयो भक्षणेन च ॥

स्मृत्यर्थसारेऽपि-'शैवसौरनिर्माल्ये नैवेद्यभक्षणे चान्द्रम्, अभ्यासे द्विगुणम्, सत्याभ्यासे (२)प्रतपनम्, अन्यनिर्माल्येऽप्यनापद्येवम्' इति । इदं च ज्योतिर्लिं-

---

*धरेति ।

निर्माल्यं यो हि भक्त्या च शिरसा धारयिष्यति ।
अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः ॥
नरके पच्यते घोरे तिर्यग्योनौ च संभवेत् ॥

इतिनिर्माल्यधारणनिषेधात् । यत्तु—

ब्रह्महाऽपि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् ।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते ॥

इति स्कान्दं, तत्तु अशुचिना न ग्राह्यं, किन्तु स्नानादिना शुचिनेति स्मार्त्ताः । अपनीतं तन्न ग्राह्यमिति श्रीदत्तः । शिवदी-

---

(१) 'साहस्रमर्धेन सहितं' क० (२) 'पतनम्' क० ख०

ङ्गाद्यतिरिक्तविषयम्। तथाच पुरुषार्थप्रबोधे भविष्ये—

ज्योतिर्लिङ्गं विना लिङ्गं यः पूजयति सत्तमः।
तस्य नैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकम्॥
शालग्रामोद्भवे लिङ्गे*बाणलिङ्गे स्वयंभुवि।
रसलिङ्गे तथार्षे च (१)सुरसिद्धप्रतिष्ठिते॥
हृदये चन्द्रकान्ते च स्वर्णरौप्यादिनिर्मिते॥
शिवदीक्षावता भक्तेनेदं भक्ष्यमितीर्यते॥

तथा—

बाणलिङ्गे स्वयंभूते चन्द्रकान्ते हृदि स्थिते।
चान्द्रायणसमं ज्ञेयं शंभोर्नैवेद्यभक्षणम्॥
लिङ्गे स्वयंभुवे बाणे रत्नजे रसनिर्मिते।
सिद्धप्रतिष्ठिते चैव न चण्डाधिकृतिर्भवेत्॥
यत्र चण्डाधिकारोऽस्ति तद्भोक्तव्यं न मानवैः।
चण्डाधिकारो नो यत्र भोक्तव्यं तत्र भक्तितः॥

त्रैविक्रम्याम्—

बाणलिङ्गे च लौहे च सिद्धलिङ्गे स्वयंभुवि।
प्रतिमासु च सर्वासु न चण्डोऽधिकृतो भवेत्॥

क्षाहीनैर्न ग्राह्यमित्येके। ज्योतिर्लिङ्गाद्यतिरिक्तस्य न ग्राह्यमिति शिष्टाः। *बाणलिङ्गे इति। बाणलिङ्गलक्षणं यथा—

पक्वजम्बूफलाकारं कुक्कुटाण्डसमाकृतिम्।
भुक्तिमुक्तिप्रदं चैव बाणलिङ्गमुदाहृतम्॥
सदा सन्निहितस्तत्र शिवः सर्वार्थसाधकः।
कृतप्रतिष्ठं तल्लिङ्गं बाणाख्येनासुरेण च॥
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद् ध्रुवम्।
एकपार्श्वक्षते धेनुपुत्रदारधनक्षयः॥

---

(१) 'सुप्रसिद्ध' ख०

अत्र—

ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् ।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते ॥

इति स्कान्दादशुचिना न ग्राह्यं शिवनिर्माल्यं, किन्तु स्नात्वेति स्मार्ताः । अनुपनीतेन न ग्राह्यमिति दत्तः । शिवदीक्षाहीनैर्न ग्राह्यमिति शैवाः । तिथितत्त्वे हेमाद्रौ परिशिष्टे—

*अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलास्पर्शात्सर्वं याति पवित्रताम् ॥

शिरसि स्फुटिते बाणे व्याधिर्मरणमेव च ।
अर्च्यं स्यात्कापिलं लिङ्गं मुनीनां मोक्षकाङ्क्षिणाम् ॥
तीक्ष्णाग्रं वक्रशीर्षं च व्यस्रं लिङ्गं च वर्जयेत् ।
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ॥

*अग्राह्यमिति । स्वयं नोपभुञ्ज्यादित्यर्थः,

दत्त्वा नैवेद्यवस्त्रादि नाददीत कदाचन ।
त्यक्तं याच्ञ्वमुद्दिश्य तद्दानेन न तत्फलम् ॥

इति भविष्याच्च ।

अथ व्रतोपयुक्तकृच्छ्रादीनि । तत्र प्राजापत्यमाह याज्ञवल्क्यः—

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैवायं पादकृच्छ्रः प्रकीर्त्तितः ॥
यथाकथञ्चित्त्रिगुणः प्राजापत्योऽयमुच्यते ॥

दिवैव मध्याह्नकाले सकृद्भोजनम् एकभक्तं, सूर्यास्तमनन्तरमेव सकृद्भोजनं नक्तं, दिवा रात्रौ वा भृत्यादिभ्योऽप्ययाचितस्य भोजनमयाचितम् । दिवैवेति केचित् । अहोरात्रमभोजनमुपवासः । अयं पादकृच्छ्रः । अत्र ग्राससंख्यायां पराशरः—

सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः ।
चतुर्विंशतिरायाच्याः परं निरशनं स्मृतम् ॥

अथवा आपस्तम्बः—

सायं द्वाविंशतिर्ग्रासाः प्रातः पञ्चदश स्मृताः ।
चतुर्विंशतिरायाच्याः परे निरशनास्त्रयः ॥
कृक्कुटाण्डप्रमाणो वा यथा वाऽऽस्यं विशेत्सुखम् ।

शक्त्या विकल्पः । आपस्तम्बस्तु व्यवस्थया पादकृच्छ्रमाह—

त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् ।
सायं त्र्यहं तथा पादः प्रातः पादस्तथा त्र्यहम् ॥
प्रातः पादं चरेच्छूद्रः, सायं वैश्यस्य दापयेत् ।
अयाचितं तु राजन्ये, त्रिरात्रं ब्राह्मणे स्मृतम् ॥ इति ।

प्रातःपाद एकभक्तत्रयं, सायंपादो नक्तत्रयम् , अयाचितमयाचितत्रयं, त्रिरात्रमुपवासत्रयम् । अयाचितत्रयानन्तरमुपवासत्रयमर्द्धकृच्छ्रः । नक्तत्रयं विना पादत्रयं पादोनकृच्छ्रः,

सायंप्रातर्विनाऽर्द्धं स्यात् पादोनं नक्तवर्जितम् ।

इति आपस्तम्बोक्तेः । अथवा

सायं प्रातस्तथैकं च दिनद्वयमयाचितम् ।
दिनद्वयं च नाश्नीयात्कृच्छ्रार्द्धं तद्विधीयते ॥

इत्यापस्तम्बेनैवोक्तोऽर्द्धकृच्छ्रः ।

प्रकृतमनुसरामः । अयं पादकृच्छ्रो यथाकथञ्चित्त्रिगुणः प्राजापत्यः । यथाकथञ्चिदित्युक्तेः एकभक्तादीनामानुलोम्येन स्वस्थानवृद्ध्या एकः । स च—

त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन् द्विजः ॥

इति मन्वुक्तेः । तेषां प्रातिलोम्येन स्वस्थानवृद्ध्या द्वितीयः, स च "प्रातिलोम्यं चरेयुः" इति वसिष्ठोक्तेः,

उपवासत्रयं कृत्वा कुर्याच्चायाचितत्रयम् ।
नक्तत्रयादे(१)कभक्तत्रयं स्यात्प्रातिलोम्यकम् ॥

(१) 'देकभक्तत्रतं' घ० ङ० ।

इति वचनात् । दण्डकलितवदाहृत्या तृतीयः । स च—

त्र्यहं प्रातरहर्नक्तमहरेकमयाचितम् ।
अहः पराकं तत्रैकमेवं चतुरहौ परौ ॥

इति वसिष्ठोक्तः । पराक उपवासः । अयमेव शिशुकृच्छ्रः,

अनुग्रहार्थं विप्राणां मनुधर्ममृतां वरः ।
बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुदाहरत् ॥

इति तेनैवोक्तेः । प्रोक्तपक्षत्रयेऽन्यतमपक्षं ज(१)पहोमवर्जं कुर्यादिति चतुर्थः,

तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम् ।
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितम् ॥

इत्यङ्गिरोवचनात् ।

अशक्तौ एकां धेनुं दद्यात् । तदभावे निष्कं दद्यात्,

गवामभावे निष्कं स्यात्तदर्द्धं पादमेव वा ।

इत्युक्तेः । देशकालोचितं गोमूल्यं दद्यात्,

प्राजापत्यक्रियाऽशक्तौ धेनुं दद्याद्विजोत्तमः ।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥

इत्युक्तेः । यद्यपि "धेनुः स्यान्नवसूतिका" (अ०को० २-९-७१ इत्युक्तं, तथापि धेनुदानाशक्तौ गोमाल्यं दद्यात् बहुस्मृतिषु गोपद स्याप्युपादानात । विप्रभोजनं वा कार्यम् । तत्संख्यानियमो म हार्णवे चतुर्विंशतिमते—

कृच्छ्रे पञ्चातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये
चत्वारिंशच्च तप्ते त्रिगुणनगुणिता विंशतिः स्यात्पराके ।
कृच्छ्रे सन्तापनाख्ये भवति षडधिका विंशतिः, सैव हीन
द्वाभ्यां चान्द्रायणे स्यात्तपसि कृशबलो भोजयेद्विप्रमुख्यान् ।

इति । अस्यार्थः-अहरह इत्यस्य प्रत्येकं सम्बन्धात् कृच्छ्रे अहरह पञ्च ब्राह्मणान् भोजयेत् । ते(२) च षष्टिर्भवन्ति । अतिकृच्छ्

(१) 'तपहोम' घ० ङ० । (२) 'तेन' घ० ङ० ।

प्रत्यहं पञ्चदश, द्वादशादिने मिलित्वा ह्य(१)शीतिशतं विप्रा भवन्ति। कृच्छ्रातिकृच्छ्रे प्रत्यहं त्रिंशत्, मिलित्वा षट्युत्तरं त्रिशतम्। असमृद्ध(२)धान्ये तु त्रिगुणिता द्वादशेति मिलिताः षट्त्रिंशत्। तप्तकृच्छ्रे प्रत्यहं चत्वारिंशत् द्व्यहसाध्येऽशीतिः, चतुरहसाध्ये षष्ट्यधिकं शतम्, द्वादशाहसाध्ये अशीत्यधिकं शतचतुष्टयम्। पराके प्रत्यहं षष्टिः, विंशत्यधिकं सप्तशतम्। सान्तपने प्रत्यहं षड्विंशतिः। चान्द्रायणे प्रत्यहं चतुर्विंशतिः, तत्र मासो यदि त्रिंशद्दिनः तदा ७२० विंशत्यधिकसप्तशतं विप्रा भवन्ति। अधिकन्यूनदिनके तु सं(३)कलनमूह्यम्। स्वल्पधान्यस्तु कृच्छ्रे द्वादशैव ब्राह्मणान् भोजयेत् "विप्रा द्वादश वा भोज्याः" इति चतुर्विंशतिमतात्। अतिकृच्छ्रमाह मनुः—

एकैकग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत्।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः॥

त्रीणि त्र्यहानि नव दिनानि पूर्ववत् एकभक्तादिकाले तान्नियमवान् इत्यर्थः। अशक्तौ धेनुत्रयं देयं,

पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा।

इति चतुर्विंशतिमतात्। तदशक्तौ निष्कगोमूल्यादि प्राग्वत्। एवमग्रेऽपि। अथवा याज्ञवल्क्यः—

अयमेवातिकृच्छ्रः स्यात् पाणिपूरान्नभोजनः।

अयमेव पूर्वोक्तप्राजापत्यधर्मक एव। परन्तु एकभक्तादिदिनेषु प्रस्तिपूरणमात्रमन्नं भुञ्जीत न तु द्वात्रिंशत्यादिग्रासानिति। अत्र येषु दिनेषु भोजनं तेषु पाणिपूरमा(४)त्रमन्नं विधेयम्। एवञ्चोपवासदिने न पाणिपूरान्नभोजनप्राप्तिः। अशक्तौ धेनुद्वयं देयं,

प्राजापत्ये तु गामेकामतिकृच्छ्रे द्वयं स्मृतम्।

इति षट्त्रिंशन्मतात्। एवमग्रेऽपि। अनयोश्चातिकृच्छ्रयोः पापा-

(१) 'साशीति' घ० ङ०। (२) 'धान्यस्य' घ० ङ०।
(३) 'संख्यासंक' घ० ङ०। (४) 'मात्र' नास्ति घ० ङ०।

पेक्षः शक्त्यपेक्षो वा विकल्पः(१)। अतिकृच्छ्रपादादिव्यवस्
प्राजापत्यवत्। कृच्छ्रातिकृच्छ्रमाह गौतमः—अब्भक्षस्
स कृच्छ्रातिकृच्छ्र इति। द्वादशरात्रमुदकेनैव वर्त्तनं न
नेत्यर्थः। अशक्तौ तिस्रो धेनवो देयाः, प्राजापत्यत्र
कृच्छ्रातिकृच्छ्रविधानात्। तदभावे निष्कत्रयं सार्द्ध
पादोननिष्को वा देयः। अथवा यमः—

एकैकं पिण्डमश्नीयात्त्र्यहं कल्ये त्र्यहं निशि।
अयाचितं त्र्यहं पिण्डं वायुभक्षस्त्र्यहं परम्॥
अतिकृच्छ्रं चरेदेतत्पवित्रं पापनाशनम्।
चतुर्विंशतिरात्रं तु नियतात्मा जितेन्द्रियः॥
कृच्छ्रातिकृच्छ्रं कुर्वीत एकस्थाने द्विजोत्तमः।

कल्ये प्रातः एकभक्ताकाले इति यावत्। एकस्थाने
क्तद्वादशाहसाध्यातिकृ(२)च्छ्रद्वयेनैकः कृच्छ्रातिकृच्छ्र इ
अथवा याज्ञवल्क्यः—

कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्।

यमेन चतुर्विंशत्यहःसाध्ये कृच्छ्रातिकृच्छ्रे भोजनादि
कग्रासमात्रविधानात् दुग्धभक्षणेऽपि पत्रपुटकादिभिर्ग्रास
कृत्वैव एकग्रासपर्याप्तं दुग्धमश्नीयात्। अशक्तौ तु—"
(३)द्वादश ग्रासाः" इति ग्राससंख्याया भोजनादिनेषु
पीत्वा प्राजापत्यः कार्यः। तप्तकृच्छ्रमाह याज्ञवल्क्यः—

तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्।
एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः॥

अयं चतुरहसाध्यः। तप्तक्षीरघृताम्बुभिः समस्तैः ए
वृत्तिः, तत एकोपवास इत्यर्थे तु त्र्यहसाध्यः। अथवा म

(१) 'सान्तपने प्रत्यहं षड्विंशतिः' अधिकं ख०।
(२) 'कृच्छ्रत्रये' घ० ङ०।
(३) 'द्वादशग्रासी' घ० ङ०।

तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् ।
प्रति त्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः ॥

जलादिपरिमाणमाह पराशरः—

अपां पिबेत्तु त्रिपलं द्विपलं तु पयः पिबेत् ।
पलमेकं पिबेत्सर्पिः(स्त्रि(१)रात्रं चोष्णमारुतम् ॥

अपां त्रिपलं त्रिरात्रं पिबेदित्यादि प्रतिवाक्यं त्रिरात्रमित्यस्य सम्बन्धः । त्रिरात्रमुष्णोदकस्य बाष्पं पिबेदित्यर्थः । अथ पराशरः—

षट्पलं तु पिबेदम्भः त्रिपलं तु पयः पिबेत् ।
पलमेकं पिबेत्सर्पि)स्तप्तकृच्छ्रं विधीयते ॥

जलादिकं चेहोष्णमेव । अशक्तौ ह्यहसाध्ये निष्कार्द्धं चतुरहःसाध्ये एका धेनुः,द्वादशाहसाध्ये तिस्रो गावः,

पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा ।

इत्युक्तेः । सान्तपनमाह याज्ञवल्क्यः—

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
प्राश्यापरेऽह्न्युपवसेत्कृच्छ्रं सान्तपनं चरन् ॥

मिलितगोमूत्रादिषट्कमेव पीत्वा परेऽह्न्युपवसेत् । अयं दिनद्वयसाध्यः । अयमेव ब्रह्मकूर्चः । तत्र पराशरोक्तो विधिः कार्यः ।

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
निर्दिष्टं पञ्चगव्यं तु पवित्रं कायशोधनम् ॥
गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥
तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् ।
सप्तपत्रास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः ॥
एतैरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि ।
इरावती इदंविष्णुर्मानस्तोके च शंवती ॥

(१) कंसान्तर्गतं नास्ति ख० ।

एताभिश्चैव होतव्यं हुतशेषं पिबेद् द्विजः ।
प्रणवेन समालोड्य प्रणवेनाभिमन्त्र्य च ॥
प्रणवेन समुद्धृत्य पिबेत्तत्प्रणवेन तु ।
यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ॥
प्राशनात्पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ।
मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत् ॥
स्वर्णपात्रेण ताम्रेण ब्रह्मतीर्थेन वा पुनः ॥ इति ।

पूर्वेद्युरुपोष्य परेद्युरुक्तरीत्या ब्रह्मकूर्चं इति विज्ञानेश्वरः । अथवा जाबालः--

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकैकं प्रत्यहं पीत्वा त्वहोरात्रमभोजनम् ॥

इदं सप्ताहसाध्यम् । यतिसान्तपनमाह (शङ्खः(१)—

एतदेव त्र्यहाभ्यस्तं यतिसान्तपनं स्मृतम् ।

एतत् पञ्चगव्यं दिने आहारान्तरं विना पिबेदित्यर्थः । महासान्तपनमाह) याज्ञवल्क्यः--

पृथक्सान्तपनद्रव्यैः षडहः सोपवासकः ।
सप्ताहेन तु कृच्छ्रोयं महासान्तपनः स्मृतः ॥

गोमूत्रगोमयक्षीराणि दाधिघृतकुशोदकानि सान्तपनद्रव्याणि एकैकादिने आहारान्तरं विना एकैकं पिबेत्सप्तमदिने उपवासः अथवा यमः--

त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् ।
त्र्यहं दधि त्र्यहं सर्पिः त्र्यहं क्षीरं ततः शुचिः ॥
महासान्तपनं ह्येतत्सर्वपापप्रणाशनम् ॥

अयं पञ्चदशाहसाध्यः । जाबालः—

षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत् ।
त्र्यहं चोपवसेदन्त्यं महासान्तपनं विदुः ॥

---

(१) कंसान्तर्गतं नास्ति ख० ।

षण्णां पूर्वोक्तगोमूत्रादीनाम् । अयमेकविंशतिरात्रसाध्यः । अशक्तौ सप्ताहसाध्यसान्तपनस्य सार्द्धप्राजापत्यस्थाने विहितत्वादेका धेनुर्निष्कार्द्धं च देयम् ।

पराकतप्तातिकृच्छ्रस्थाने कृच्छ्रत्रयं न्यसेत् ।
सान्तपनस्य चाध्यर्द्धमशक्तौ व्रतमाचरेत् ॥

इति षट्त्रिंशन्मतात् । दिनद्वयसाध्ये सान्तपने निष्कार्द्धं, दिनत्रयसाध्ये यतिसांतपने तु एकां धेनुं दद्यात् । एकविंशतिदिनसाध्ये महासांतपने तिस्रो धेनवोऽर्धनिष्कं च देयं, पञ्चदशदिनसाध्ये तु धेनुद्वयं निष्कार्द्धं च देयं, सप्ताहसाध्ये तु एका धेनुः निष्कार्द्धश्च देयः षडुपवासतुल्यप्राजापत्ये धेनोरुक्तत्वात् सान्तपनस्य चाध्यर्द्धमित्यस्य सप्ताहसाध्यपरत्वाच्च । पराकमाह याज्ञवल्क्यः—

द्वादशाहोपवासेन पराकः परिकीर्त्तितः ।

अशक्तौ कृच्छ्रत्रयं

पराकतप्तकृच्छ्राणां स्थाने कृच्छ्रत्रयं न्यसेत् ॥

तिस्रो धेनव इति यावत् । यावकव्रतमाह शंखः—

गोपुरीषाद्यवान्नं च मासं नित्यं समाहितः ।
व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये ॥

गोर्भक्षणार्थं यवान्दत्त्वा तदनन्तरं गोमयमध्यनिःसृतैस्तैर्यवैः पक्वैः एकभक्तनक्तानि कुर्वन् मासं नयेत् । गोमूत्रपक्वैस्तु तैर्गोमूत्रयावकं भवति,

आतृप्तेश्चारयित्वा गां गोधूमान् यवमिश्रितान् ।
गोपयोज्यांश्च संगृह्य पचेद्गोमूत्रयावकम् ॥

इति योगियाज्ञवल्क्यात् । अशक्तौ यावकव्रते पञ्च धेनवः षडुपवासात्मकप्राजापत्यषट्स्थानत्वात् । प्रसह यावकभोजनेऽपि तस्यात्यन्तक्लेशसाधनत्वेनोपवासतुल्यत्वात् । गोमूत्रयावकव्रते तु क्लेशाधिक्यात् षड् धेनवः । मासमेकग्रासमात्रदुग्धेन व-

र्त्तनं पयोव्रतम् । (१)तस्मिन् व्रते येन द्रव्येण शरीरवर्त्तनं तद्व्रत
तेन व्यपदेशात् । अत एव मार्कण्डेयः—

पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते ।
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु ॥ इति ।

पयोव्रतेऽशक्तस्य पञ्च धेनवः पयःपाने क्लेशाभावेऽपि त
सा एकग्रासमात्रपर्याप्ततयोपवासतुल्यत्वात् । चान्द्रायणमाह य
ज्ञवल्क्यः—

तिथिवृद्ध्या चरेत् पिण्डान् शुक्ले शिख्यण्डसंमितान् ।
एकैकं ह्रासयेत्कृष्णे पिण्डं चान्द्रायणं चरन् ॥
इन्दुक्षये न भुञ्जीत एष चान्द्रायणे विधिः ।

शिखी मयूरः । तिथिवृद्ध्या (२)शुक्ले शुक्लपक्षे तिथिवृ
प्रतिपदादितिथिक्रमेणैकैकं पिण्डं प्रतिपदि एकं द्वितीयायां द्वा
क्रमेण पूर्णिमायां पञ्चदश चरेत् भक्षयेत् । तदा कृष्णे एवं
तिथिवृद्ध्या प्रतिपदि चतुर्दश द्वितीयायां त्रयोदशेत्येवं क्रमेण
कैकं चतुर्दशीपर्यन्तं ह्रासयेत् । इन्दुक्षये अमावास्यायां न भुञ्
एतद्यवमध्यं नाम चान्द्रायणम् । अथ पौर्णमास्यां पञ्चदश
सान् भुक्त्वा एकैकत्यागेन प्रतिपत्प्रभृति चतुर्दशीपर्यन्तं ग्रासम
यात् । अमावास्यायामुपोष्य एकैकवृद्ध्या पूर्णिमायां पञ्चद
सान् भक्षयेत् । एतत्पिपीलिकामध्यं नाम चान्द्रायणम् । द्वा
द्विभ्यां चन्द्रस्य अयनं चरणमिव चरणं यत्र कर्मणीति व
त्तेः । (३)एतच्च चान्द्रमाससाध्यम । तत्र ह्रासवृद्धी निश्चित्य
ण्डेषु ते कल्पनीये । तत्र चन्द्रोदयकालीना तिथिर्ग्राह्या ।
ग्रासा मयूराण्डप्रमाणाः । ग्रासग्रहणकालश्चन्द्रोदयः । वैधत्वाच्च
शीथेऽपि तद्भक्षणम् । चन्द्रोदयानन्तरं प्रायः द्विषष्टिघटीव्यव
चन्द्रोदय इति । दिवापि तं परीक्ष्यैव ग्रासानां भक्षणम् । य
ग्निहोत्राधिकारिणामत्रैव तत्करणम् । तथाहि, यदा पञ्च रि

(१) 'यस्मिन्' ख० । (२) 'शुक्ले' नास्ति घ० ङ० ।
(३) 'एतच्च चान्द्रायणसाध्यम्' घ० ङ० ।

स्तदा प्राणायेति प्रथमम्, अपानायेति द्वितीयं, व्यानायेति तृतीयम्, उदानायेति चतुर्थं, समानायेति पञ्चमम्। यदा चत्वारस्तदा द्वाभ्यां प्रथमम्। यदा त्रयस्तदा द्वाभ्यां पूर्वौ। यदा द्वौ तदा त्रिभिः प्रथमं द्वाभ्यामुत्तरम्। एकं तु सर्वैः। इतिकर्त्तव्यताविस्तरो महार्णवादौ द्रष्टव्यः। अशक्तावष्टौ गावो देयाः,

अष्टौ चान्द्रायणे देयाः प्रत्याम्नायविधौ सदा।

इति चतुर्विंशतिमतात्। यवमध्यपिपीलिकामध्यचान्द्रायणयोर्गौतमाद्युक्तप्रकारवतोरष्टौ गावः, स्वल्पप्रकारयुक्तयोस्तयोस्तु त्रयः।

प्राजापत्ये तु गामेकामतिकृच्छ्रद्वयं स्मृतम्।
चान्द्रायणे पराके च तिस्रस्ता दक्षिणास्तथा॥

इति पराशरोक्तेः। समृद्धस्य पञ्च "पञ्च वापि प्रकीर्तिताः" इति पाठान्तरात्। अथवा याज्ञवल्क्यः—

यथाकथञ्चित्पिण्डानां चत्वारिंशच्छतद्वयम्।
मासेनैवोपभुञ्जीत चान्द्रायणमथापरम्॥

प्रत्यहमष्टौ ग्रासान् भक्षयेत्। तत्रापि दिन एवाष्टौ, अथवा नक्तं चतुरो दिने चतुरः, अथवा एकस्मिन्दिने चतुरः अपरस्मिन्द्वादश, अथवा एकरात्रमुपोष्यापरस्मिन षोडश, अथवा दिनद्वयमुपोष्य तृतीयदिने चतुर्विंशतिः, इत्यादि शक्त्या प्रकाराणां मध्ये यथाकथञ्चित् पिण्डान् चत्वारिंशदधिकशतद्वयं भक्षयेत्, 'तिस्रोऽशीतीः समाहितः' इति वचनाच्च। उपक्रमस्तु शुक्लकृष्णान्यतरप्रतिपदोरेव। मासश्च सावनः, अन्यथा चान्द्रमासे ह्रासादिवशेन तथा भक्षणासम्भवाच्च। एवञ्च नैरन्तर्येणानेकैतच्चान्द्रायणानुष्ठाने कदाचिद्द्वितीयचान्द्रायणादि द्वितीयादौ भवति। अयं चापरो विशेषः—पूर्वचान्द्रायणे तिथिनियतग्रासनियमवशात् (१)पूर्वप्रकान्तमेकादश्याद्युपवासादि प्रतिनिधिद्वारा कार्यम्, अत्र तु स्वयमेव कार्यं, तिथिनियमेन (२)ग्रासनियमाभावात्। अस्यैव च यतिचान्द्रायणादिसंज्ञा।

(१) 'पूर्वप्रकारान्त' ख०। (२) 'ग्रासनियमा' घ० ङ०।

*पञ्चायतनपूजायां तन्त्रेण च निवेदितमित्यर्थः । शिवपुराणे—

ये वीरभद्र(१)शपिताः शिवभक्तिपराङ्मुखाः ।
शंभोरन्यत्र देवेषु ये भक्ता ये न दीक्षिताः ॥
तेषामनर्हमीशस्य तन्प्रसादचतुष्टयम् ।

अष्टावष्टौ समश्नीयात् पिण्डान् मध्यंदिने स्थिते ।
नियतात्मा हविष्यस्य यतिचान्द्रायणं चरन् ॥
चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं चरन् ॥

इति मनूक्तेः ।

त्रींस्त्रीन् पिण्डान् समश्नीयान्नियतात्मा दृढव्रतः ।
हविष्याशस्य वै मासमृषिचान्द्रायणं स्मृतम् ॥

इति यमोक्तमृषिचान्द्रायणम् । यतिचान्द्रायणाद्यशक्तौ निष्क्रयो देयाः पूर्वोक्तवचनात् ।

अथ मासोपवासव्रतम् । तत्र प्राक् कार्त्तिके मासि । तदशक्तौ अष्टौ गावः, तदशक्तौ पञ्च, पञ्चोपवासतुल्यप्राजापत्यस्यम्नायगोपञ्चकेन मासनिर्वाहात् । एवं सोमायनादिव्रत्याम्नाय स्वयमूह्याः । अत्र प्राजापत्यादेरिवाकर्त्तव्यताऽन्यतोऽवगन्तव्या तत्र स्वातन्त्र्येण कुरुक्षेत्रप्रतिग्रहादिपापनिवृत्त्यर्थं क्रियमाणे वपः मावदृष्टके न तु व्रतभङ्गनिवृत्त्यर्थे,

दिनत्रयं न भुञ्जीत मुण्डनं शिरसोऽथवा ।

इति विकल्पन्यायात् ।

प्रकृतमनुसरामः । *पञ्चायतनेति । अत एव 'विष्णुशिवसूर्यगणेशदुर्गाभ्यो नमः' इति श्लिष्टमन्त्र एवोक्तः । शिवनामपूजाया मिति केचित् ।

---

(१) 'शमिता' ब०

काशीखण्डे—

जलस्य धारणं मूर्ध्नि विश्वेशस्नानजन्मनः।
एष जालन्धरो बन्धः सम(१)स्तसुरवल्लभः॥

तथा—

स्नापयित्वा विधानेन यो लिङ्गस्नपनोदकम्।
त्रिः पिबेत्त्रिविधं पापं तस्येहाशु विनश्यति॥
लिङ्गस्नपनवार्भिर्यः कुर्यान्मूर्ध्न्यभिषेचनम्।
गङ्गास्नानफलं तस्य जायतेऽत्र विपाप्मनः॥

इदं पूर्ववाक्यवशाद्विश्वेश्वरविषयमिति केचित्। काशीस्थपुराणप्रसिद्धसर्वलिङ्गविषयं, काशीखण्डे रत्नेश्वराख्याने तथैव दर्शनादित्यन्ये।

अथ कृषिः। राजमार्तण्डः—

ऋक्षपूत्तरपौष्णवैष्णवमघामूलानुराधाश्विनी-
प्राजापत्यकरद्वितैवतगुरुप्रालेयपादेषु च।
निर्दोषैर्वृषभैर्हलैश्च सुमनोमालाभिरभ्यर्चितै-
र्दत्त्वा क्षेत्रपतेर्बलिं हलधरः क्षेत्रं ततः कर्षयेत्॥

प्राजेशश्रवणोत्तरादितिमघामार्तण्डतिष्याश्विनी
पौष्णानुष्णमरीचयः शतभिषक् स्वाती विशाखा तथा।
जीवार्केन्दुसितेन्दुनन्दनदिने लग्ने च सौम्योदये
सस्यानां वपने तथैव लवने शस्तास्तथा रोपणे॥

चण्डेश्वरः—

हस्तचित्रादितिस्वातीरेवत्यां श्रवणत्रये।
स्थिरलग्ने गुरोर्वारे बीजं धार्यं ज्ञशुक्रयोः॥
'ॐधनदाय सर्वलोकहिताय देहि मे धान्यं स्वाहा'।
लेखयित्वा इमं मन्त्रं धान्यागारे निधापयेत्॥
सस्यवृद्धिं परां कुर्यात्पूजितं प्रतिपूजयेत्।
दक्षिणादिङ्मुखगमनं गमनमभिनवासु नारीषु॥

(१) 'समस्तसुखवल्लभः' ख०

व्ययमपि सस्यधनानां न बुधा बुधवासरे कुर्युः।
शनिवारे च नो कार्यो धनधान्यव्ययो बुधैः।

अथ वस्त्रम्। श्रीपतिः—

रोहिणीषु करपञ्चकेऽश्विमे द्युत्तरासु च पुनर्वसुद्वये।
रेवतीषु वसुदैवते च भे नव्यवस्त्रपरिधानमिष्यते॥
जीर्णं रवौ सततमम्बुभिरार्द्रमिन्दौ
भौमे शुचे बुधदिने तु भवेद्धनाय।
ज्ञानाय मन्त्रिणि भृगौ प्रियसंगमाय
मन्दे मलाय च नवाम्बरधारणं स्यात्॥
रोहिणीगुरुपुनर्वसूत्तरे
या बिभर्ति नववस्त्रभूषणे।
सा न योषिदवलम्बते पतिं
स्नानमाचरति वारुणेऽपि या॥

अथालंकारवलयादि। दैवज्ञवल्लभः—

नासत्यपूषवसुभिः करपञ्चकेन
मार्तण्डभौमगुरुदानवमन्त्रिवारे।
मुक्तासुवर्णमणिविद्रुमशङ्खदन्त-
रक्ताम्बराणि विधृतानि भवन्ति सिद्ध्यै॥

ज्योतिर्निबन्धे—

हस्तानुराधमृगपूषधनिष्ठयुक्त-
चित्रोत्तरासु च पुनर्वसुरोहिणीषु।
लग्ने स्थिरे रविसुतेन्दुजजीववारे
हेमादिधारणविधिः कथितो नराणाम्॥

तत्रैव श्रीपतिः—

पौष्णाश्विनीवसुकरादिषु पञ्चकेषु
कौसुम्भहेममणिविद्रुमकाचशङ्खाः।
नार्या धृताः सुतसुखार्थकरा भवन्ति
ब्राह्मोत्तरादितिगुरुष्वसुखाय भर्तुः॥

तत्रैव—

शङ्खादिवररत्नानि पुष्यादित्युत्तरासु च ।
रोहिण्यां नैव गृह्णीत भर्तुर्जीवितकाङ्क्षिणी ॥

अथ सूचीकर्म—

वासवादितिभत्वाष्ट्रमैत्रचन्द्राश्विनीषु च ।
सूचीकर्म तनुत्राणमेभिर्ऋक्षैः प्रशस्यते ॥

अथ शय्या—

हस्तादितिब्रह्मगुरूत्तराणि
पौष्णाश्विमूलेन्दुभचित्रभानि ।
वारेषु जीवेन्दुसितेन्दुजानां
शा(१)य्यासनारम्भणमुत्तमं स्यात् ॥

अथ शस्त्रधारणम्—

पुष्ये चादितिचित्रपद्मतनये शक्रोत्तरा रेवती-
स्वातीवाजिविशाखमित्रसहिते भानौ गुरौ भार्गवे ।
कुम्भे कीटगृहे वृषे मृगपतौ चेन्दौ शुभैर्वीक्षिते
सन्नाहः शरखड्गकुन्तछुरिका धार्या नृपाणां हिताः॥

अथ स्वामिसेवा । चण्डेश्वरः—

रोहिण्युत्तरपौष्णेषु वसुवारुणयोरपि ।
सेवेत स्वामिनं भृत्यः शुभवारोदये तथा ॥

ज्योतिर्निबन्धे—

दासीदासादिभृत्यानां कुर्यात्संग्रहणं(२)बुधे ।
स्थिरलग्ने शुभैर्दृष्टे मन्दवारे विशेषतः ॥

अथ गजाश्वदोलाः । स एव—

पौष्णप्रजेशादितिभद्वयानि
हस्तादिषट्कश्रवणोत्तराणि ।
दोलादिनातङ्गतुरङ्गमाणा-
मारोहणेऽभीष्टफलप्रदानि ॥

---

(१) 'शय्यासमारम्भण' क० ख० । (२) 'बुधैः' ग० ।

अथ नृत्यम्—

हस्तः पुष्यो वासवं रोहिणी च
ज्येष्ठा पौष्णं वारुणं चोत्तराश्च ।
पूर्वाचार्यैः कीर्तितश्चक्रवर्ती
नृत्यारम्भे शोभनोऽयं भवर्गः ॥

अथ राजदर्शनम् । श्रीपतिः—

मृगाश्विपुष्यश्रवणश्विष्ठाहस्तध्रुवत्वाष्ट्रभपूषभानि ।
मैत्रेण युक्तानि नरेश्वराणां विलोकने भानि शुभप्रदानि॥

अथ क्रयविक्रयौ—

भाद्रद्वयत्रिदशमन्त्रिदिवाकरेषु
मूलानिलोत्तरतुरङ्गमरेवतीषु ।
सारङ्गपाणिरजनीकरमैत्रभेषु
लाभः सदैव भवति क्रयविक्रयाभ्याम् ॥

वस्त्रे तु—

चित्रा शतभिषा स्वाती रेवती चाश्विनी शुभा ।
श्रवणश्च तथा प्रोक्ता वस्त्राणां क्रयणे शुभाः ॥

अथ सेतुः—

स्वातीयुक्ते मन्दवारे वृषलग्ने शुभे दिने ।
सेतूनां बन्धनं कार्यं ध्रुवभे चार्कजीवयोः ॥

अथ पशुकृत्यम् । श्रीपतिः—

चित्रोत्तराबैष्णवरोहिणीषु
चतुर्दशीदर्शदिनाष्टमीषु ।
स्थानप्रवेशं गमनं विदध्यात्
पुमान् पशूनां न कदाचिदेव ॥

चण्डेश्वरः—

हस्तमूलविशाखासु रेवत्यां श्रवणे तथा ।
मैत्रे च वारुणे श्रेष्ठं पशुक्रयणमुच्यते ॥

पूर्वात्रयामृतमयूखहुताशनेषु
इन्द्राग्निवाजिवसुवारुणशंकरेषु ।

एतेषु गोमहिषदन्तितुरङ्गमादि-
नाना(१)प्रकारपशुजातिगतिः प्रशस्ता ॥

अथ गजदन्तच्छेदः । ज्योतिर्निबन्धे—

त्वाष्ट्रे वैष्णव अश्विन्यामादित्ये वसुदैवते ।
दन्तिनां शुभदं कर्म पुष्ये हस्ते च क(२)र्तनम् ॥

अथ निक्षेपः—

भरणी त्रीणि पूर्वाणि आर्द्राश्लेषा मघा तथा ।
चित्रा ज्येष्ठा विशाखा च मूलं मृगपुनर्वसू ॥
एभिर्दत्तं प्रयुक्तं च यच्चनिक्षिप्यते धनम् ।
पृष्ठतो धावमानस्य ध(३)निनो नोपपद्यते ॥

अथ ऋणमोक्षः । श्रीधरः—

वागीशमन्ददिवसांशकलग्नयुक्ते
रिक्तासु मन्ददिवसे कुलिकोदये च ।
मैत्रद्वितीयपदमैत्रमुहूर्तयुक्ते
राश्युद्गमे च ऋणमोक्षमुशन्ति सन्तः ॥

अथ राजमुद्रा—

मृदुध्रुवक्षिप्रचरेषु भेषु योगे प्रशस्ते शनिचन्द्रवर्जम् ।
वारे तिथौ पूर्णजयाह्वये च मुद्राप्रतिष्ठा शुभदा हि राज्ञाम् ॥

अथ नौः । चण्डेश्वरः—

पौष्णाश्विनीतुरगवारुणमित्रचित्रा-
शीतोष्णरश्मिवसवोऽनलवन्त्यमूनि ।
वारे च जीवभृगुनन्दनके प्रशस्ते
नौकादिसंघटनवाहनमेषु कुर्यात् ॥

अथ भोगः—

गुरुभरविभानुराधाविधातृपौष्णाश्विरोहिणीषु स्यात् ।
स्वात्युत्तरासु कुर्याच्छयनासनभोगभोगादि ॥

---

(१) 'नानाकुमारपशु' ख० (२) 'कीर्तित' क०
(३) 'निर्धनो' ख० ग०

अथ श्मश्रुकर्म । श्रीपतिः—

पुष्ये पौष्णे चाश्विनीष्वैन्द्रे च
शाक्रे हस्ताद्ये त्रिके भेष्वदित्याम् ।
क्षौरं कार्यं वैष्णवादित्रये च
मुक्त्वा भौमादित्यपातङ्गिवारान् ॥
न स्नातभुक्तोत्कटभूषितानाम्
अभ्यक्तयात्रासमरोत्सुकानाम् ।
क्षौरं विदध्यान्निशि संध्ययोर्वा
जिजीविषूणां नवमे न चाह्नि ॥

त्रिस्थलीसेतौ वृद्धगार्ग्यः—

रव्यारसौरवारेषु रात्रौ पाते व्रताहनि ।
श्राद्धाहःप्रतिपद्रिक्ताभद्राः क्षौरेषु वर्जयेत् ॥

गार्ग्यः—

षष्ठ्यमापूर्णिमापातचतुर्दश्यष्टमी तथा ।
आसु सन्निहितं पापं त्रिषु तैले भगे क्षुरे ॥

राजमार्तण्डः—

देवकार्ये पितुः श्राद्धे रवेरंशपरिक्षये ।
क्षौरकर्म न कुर्वीत जन्ममासे च जन्मभे ॥

बृहस्पतिः—

राजकार्ये नियुक्तानां नराणां भूपजीविनाम् ।
श्मश्रुलोमनखच्छेदे नास्ति कालविशोधनम् ॥

तथा—

*क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवम् ।
पित्रादिमृतिदीक्षासु प्रायश्चित्ते च तीर्थके ॥

केचित्त्वुत्तरार्धमन्यथा पठन्ति ।

---

*क्षौरं नैमित्तिकमिति । अत्र 'निषेधे सत्यपि' इत्युपादानात् प्रायश्चित्ततीर्थयो रात्रावपि क्षौरम् । मृतिनिमित्तं तु दिन एव

मुण्डनस्य निषेधेऽपि कर्तनं तु विधीयते । इति ।

रदः—

नृपविप्राज्ञया यज्ञे मरणे बन्धमोक्षणे ।
उद्वाहेऽखिलवारर्क्षे तिथिषु क्षौरमिष्टदम् ॥

ारते—

प्राङ्मुखः श्मश्रुकर्माणि कारयीत समाहितः ।
उदङ्मुखोऽथवा भूत्वा तथायुर्विन्दते महत् ॥

पराके—

उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः ।
केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत् ॥
*दक्षिणं कर्णमारभ्य धर्मार्थं पापसंचये ।
शिखाद्ये नवसंस्कारे शिखाद्यन्तं शिरो वपेत् ॥

तीनां तु विशेषो निगमे—

कक्षोपस्थशिखावर्जमृतुसन्धिषु वापयेत् । इति ।

न्येऽपि विधिप्रतिषेधाः प्रागुक्ताः ।

थेन्धनसंग्रहः—

ब्रह्मानिलार्कमघमूलत्रिपूर्वरौद्र-
पौष्णानुराधगुरुविष्णुविशाखयुक्ते ।

तनी वपनक्रिया'इत्युक्तेः । *दक्षिणं कर्णमिति । तीर्थ-
ई वक्ष्यामः । निषिद्धदिने क्षौरे कृते पुनस्तद्दोषशान्त्यर्थं विहि-
ले कार्यमित्याह गर्गः—

निषिद्धेषु च कालेषु क्षौर(१)कार्यं यदा भवेत् ।
तद्दोषशान्तये क्षिप्रं कुर्यात्तच्च शुभे दिने ॥ इति ।
आनर्त्तोऽहिच्छत्रः पाटलिपुत्रोदि(२)तिर्दिनः श्रीशः ।
क्षौरे स्मरणादेषां दोषा नश्यन्ति निःशेषाः ॥ इति ।

---

(१) 'क्षौरकर्म यदा' घ० ङ० ।
(२) 'दिनिर्दितिः श्रीशः' घ० ङ० ।

वारे कुजार्कभृगुनन्दनसोमजानां
श्रेष्ठन्वनस्य करणं भवति प्रशस्तम् ।

अथ नवान्नम् । श्रीपतिः—

रेवतीश्रुतिपुनर्वसुहस्तब्राह्मतः पृथगपि द्वितये च ।
ध्युत्तरेषु गदितं पृथुकानां प्राशनं नवनवान्नविधानम् ॥

अथ नवभोजनपात्रम् । ज्योतिर्निबन्धे—

भोज्यपात्रं सुधासिन्धौ घटयेद्वा समाहरेत् ॥
तत्रान्नप्राशनप्रोक्ते काले भोजनमाचरेत् ॥

अथ नवपर्णफलादिभक्षणम् । चण्डेश्वरः—

मूलाश्विमैत्रकरतिष्यहरीन्द्रभेषु
पौष्णोत्तरैन्दवपुनर्वसुवासवेषु ।
वारेषु भूमितनयार्कजवारवर्जं
ताम्बूलनूतनफलाद्यशनं हिताय ॥

अथ होमे आहुतिपातः । ज्योतिषे—

*तरणिविद्भृगुभास्करिचन्द्रमाः
कुजसुरेज्यविधुंतुदकेतवः ।
रविभतो दिनभं गणयेत्क्रमात्
प्रतिखगं त्रितयं त्रितयं न्यसेत् ॥
दिनकरार्कितमःकुजकेतवो
हुतभुजे न शुभास्त्वतरे शुभाः ।

---

*तरणीति । एवं वह्निवासोऽपि बोध्यः ।
सैका तिथिर्वारयुता कृताप्ता
शेषे गुणेभ्रे भुवि व(१)ह्निवासः ।
सौख्याय होमे शशियुग्मशेषे
प्राणार्थनाशो दिवि भूतले च ॥ इति ।

(१) 'वह्निवप्रः' घ० ङ० ।

दहनचक्रमिदं प्रविलोक्यतां
हवनकर्मणि सर्वसमृद्धये ॥

अत्र शान्तिरुक्ता विष्णुधर्मे—

क्रूरग्रहमुखे चैव संजाते हवने शुभे ।
शान्तिं विधाय गां दद्याद्ब्राह्मणाय कुटुम्बिने ॥
आयसीं प्रतिमां कृत्वा निक्षिपेत्तामधोमुखीम् ।
गोमूत्रमधुगन्धाद्यैरर्चितां प्रतिमां ततः ॥
स्वस्थां निधाय संपूज्य तत्र होमो विधीयते ॥

अत्रापवादः क्रि(१)यासारे—

नित्ये नैमित्तिके दुर्गाहोमादौ न विचारयेत् ।

अथ ज्वरादौ फलम् । श्रीपतिः—

स्वात्याश्लेषारौद्रपूर्वासु शाके
रोगोत्पत्तिर्जायते यस्य पुंसः ।
तद्भैषज्यव्यापृतो निष्प्रयत्नः
स्यादुद्यद्भाब्धेर्लब्धज(२)न्मापि वैद्यः ॥
व्याध्युत्पत्तिर्यस्य पौष्णे स(३)मैत्रे
प्राणत्राणं जायते तस्य कृच्छ्रात् ।
वैश्वे सौम्ये रोगमुक्तिस्तु मासा-
द्विंशत्या स्याद्वासराणां मघासु ॥
पञ्चाद्धस्ते वासवे सद्विदैवे
मूलाश्विभ्योराग्निधिष्ण्ये नवाहात् ।
याम्ये त्वाष्ट्रे वैष्णवे वारुणे च
नैरुज्यं स्यान्नूनमेकादशाहात् ॥
आहिर्बुध्न्ये तिष्यसंज्ञे यमाख्ये
प्राजापत्यादित्ययोः ससरात्रात् ।
रोगान्मुक्तिर्जायते मानवानां
निःसंदिग्धं जल्पितं गर्गमुख्यैः ॥

(१) 'क्रियासागरे' ख० (२) 'जन्मादिवैद्यः' क० (३) 'समित्रे' क०

ज्योतिषे—
एकाहो निधनं दशाहमनलाद्वाणा वियत्पर्वताः
सप्ताङ्का विलयश्च मासयुगलं मासो मृतिः पक्षकः ।
द्वौ मासावथ विंशतिर्दश निशाः पक्षान्तपक्षा नखा
मासौ पक्षदशान्तपक्षककुभः पीडादिनान्यश्विभात् ॥

दैवज्ञः—

उरगवरुणरौद्रा वासवेन्द्वग्निपूर्वा
यमदहनविशाखाः पापवारेण युक्ताः ।
तिथिषु नवमिषष्ठी द्वादशी वा चतुर्थी
भवति मरणयोगो रोगिणां कालहेतुः ॥

अत्र (१)शान्तिः—कुम्भे हैमीं नक्षत्रदेवतामितिमां सम्पूज्य द्वादशदलेषु संकर्षणादिद्वादशमूर्तीर्द्वादशादित्यान् वा सम्पूज्य दूर्वासमित्तिलक्षीराज्यैर्गायत्र्या तद्देवतायै अष्टोत्तरशतं हुत्वा दध्योदनं बलिं दत्त्वाऽऽचार्याय गां प्रतिमां च दत्त्वा विप्रान् भोजयेदिति संक्षेपः । विशेषस्तु व्रतहेमाद्रौ पदार्थादर्शे च ज्ञेयः ।

अथ भेषजम् । चण्डेश्वरः—

मूलानुराधमृगतिष्यपुनर्वसौ च
पौष्णाश्विनीश्रवणशुक्रकरत्रये च ।
वारेषु वा(२)क्पतिदिनेषु सितेन्दुशस्ते
भैषज्यभक्षणममीषु हितं नराणाम् ॥

अथारोग्यस्नानम् । श्रीपतिः—

इन्दोर्वारे भार्गवे च ध्रुवेषु
सार्पादित्यस्वातियुक्तेषु भेषु ।
पि(३)त्र्ये चान्ते वापि कुर्यात्कदाचि-

---

(१) 'शान्तिः' नास्ति क०
(२) 'वाक्पतिसितेन्दुदिने प्रशस्तं भैष' क०
(३) 'पैत्र्ये' क०

नैव स्नानं रोगनिर्मुक्तजन्तुः ॥
चरे विलग्ने रविभौमवारे
रिक्ते तिथौ स्याद्बहुले च पक्षे ।
धिष्ण्ये चरे रोगनिपीडितानां
स्नानं नराणां निरुजत्वकारि ॥

। दन्तधावनम् । पृथ्वीचन्द्रोदये विष्णुः—

प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च ।
नवम्यां भानुवारे च दन्तकाष्ठं विवर्जयेत् ॥

दः—

चतुर्दश्यष्टमीपौर्णमासीसंक्रमणेषु च ।
नन्दासु च नवम्यां च दन्तकाष्ठं विवर्जयेत् ॥
श्राद्धे यज्ञे च नियमे तथा प्रोषितभर्तृका ।
व्यतीपाते च संक्रान्त्यां नन्दाभूताष्टपर्वसु ॥
तैलं क्षौरं रतिं मांसं दन्तकाष्ठं च वर्जयेत् ॥

ष्टः—

शून्यर्क्षशुक्रवारेषु कुजाहे व्रतवासरे ।
जन्माहे श्राद्धदिवसे दन्तकाष्ठं विवर्जयेत् ॥

द्रौ स्कान्दे—

अभ्यङ्गे जलधिस्नाने दन्तधावनमैथुने ।
जाते च निधने चैव तत्कालव्यापिनी तिथिः ॥

र्तः—

रवौ विवाह आशौचे वर्जयेदन्तधावनम् ॥

सः—

*अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ ।

---

*अलाभे दन्तकाष्ठानामिति ।

तृणपर्णैः सदा कुर्यादमामेकादशीं विना ।

ति वाक्यसारोक्तवचनाद् 'अपां द्वादश'इत्यादि एकाद-

अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ॥

अथामलकस्नानम् । व्यासः—

श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः ।
सप्तमीं नवमीं चैव पर्वकालं विवर्जयेत् ॥
चन्द्रसूर्योपरागे च स्नानमामलकैस्त्यजेत् ॥

क्रतुः—

षष्ठी च सप्तमी चैव नवमी च त्रयोदशी ।
संक्रान्तौ रविवारे च स्नानमामलकैस्त्यजेत् ।

यत्तु—

नवमी दशमी चैव तृतीया च त्रयोदशी ।
प्रतिपद्वादशी कृष्णा स्नानं तासु विवर्जयेत् ।

यच्च—

दर्शे स्नानं न कुर्वीत मातापित्रोः सुजीवतोः
पुत्रः कुर्वन्निराचष्टे पित्रोरुन्नतिजीविते ॥

इति कण्वयमाद्यैः स्नानमात्रं निषिद्धं, तद्भोगार्थं स्नानपरं न नित्यनैमित्तिकपरमिति हेमाद्रिः ॥

अथ तैलस्नाननिषेधः । कात्यायनः—

पक्षादौ च रवौ षष्ठ्यां रिक्तायां च तथा तिथौ ।
तैलेनाभ्यज्यमानस्तु चतुर्भिः परिहीयते ॥

गर्गः—

पञ्चदश्यां चतुर्दश्यामष्टम्यां र(१)विसंक्रमे ।
द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शं विवर्जयेत् ॥
न च कुर्यात्तृतीयायां त्रयोदश्यां तिथौ तथा ।
शाश्वतीं गतिमन्विच्छन् दशम्यामपि पण्डितः ।

शीविषयमिति केचित् । तन्न, "पत्रैर्वा शोधयेन्मुखम्" इति वचनान्तरात् ।

(१) 'रविवासरे' क० ।

तत्रैवायुर्वेदे—
षष्ठ्यां दिनक्षयेऽष्टम्यामेकादश्यां च पर्वसु ।
द्वादश्यां च चतुर्दश्यां पञ्चम्यां प्रतिपत्तिथौ ॥
व्रते श्राद्धदिने जन्मत्रितये श्रवणार्द्रयोः ।
ज्येष्ठोत्तराफाल्गुनीषु व्यतीपाते च वैधृतौ ॥
विष्टियोगे च संक्रान्तौ मन्वादिषु युगादिषु ।
नाभ्यङ्गं तत्र बालानां वृद्धानां तु न दोषकृत् ॥ इति ।
व्यवहारतत्त्वे—
संक्रान्तिभद्राव्यतिपातवैधृति-
षष्ठ्यष्टमीपर्वसु नार्कभूसुते ।
स्नाने द्वितीया दशमी च गर्हिताः
ष(१)ष्ठ्याद्यमाद्या रदधावनेऽधमाः ॥
अस्यापवादमाह तत्रैव प्रचेताः—
सार्षपं गन्धतैलं च यत्तैलं पुष्पवासितम् ।
अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन ॥
आयुर्वेदे—
निषिद्धतिथिवारर्क्षग्रहणेष्वपि रात्रिषु ।
किञ्चिद्घोषघृतयुक्तं वा विप्रपादरजोन्वितम् ॥
भानौ दूर्वान्वितं भौमे भृयुक्तं पुष्पयुग्गुरौ ।
सर्वेषां सर्वदा तैलमभ्यङ्गेषु न दुष्यति ॥
अभ्यङ्गलेष्वप्यदोषः,
माङ्गल्यं विद्यते स्नानं वृद्धिपर्वोत्सवेषु च ।
स्नेह(२)पात्रसमायुक्तं मध्याह्नात् प्राक्तदिष्यते ॥
इति मदनपारिजाते कालायनोक्तेः । हेमाद्रौ बृहन्मनुः—
तैलाभ्यङ्गो नार्कवारे न भौमे
नो संक्रान्तौ वैधृतौ विष्टिषष्ठ्योः ।
पर्वस्वष्टम्यां च नेष्टः स इष्टः
प्रोक्तान्मुक्त्वा वासरे सूर्यसूनोः ॥

(१) 'षष्ठ्यादिमाद्या' क० ख० । (२) 'स्नेहमात्र' ख० ।

व्यवहारसारे—

शिलान्यासः प्रकर्तव्यो गृहाणां श्रवणे मृगे।
पौष्णे हस्ते च रोहिण्यां पुष्याश्विन्युत्तरात्रये॥

वास्तुप्रदीपे—

अधोमुखैर्भैर्विदधीत खातं शिलास्तथैवोर्ध्वमुखैश्च पट्टम्
तिर्यङ्मुखैर्द्वारकपाटयानं गृहप्रवेशो मृदुभिर्ध्रुवैश्च॥

लल्लः—

स्नानं च पाकं शयनं च भोज्यं गजालयं वाजिगृहं धनस्य
देवस्य पूर्वादिदिशि क्रमेण मध्ये सभा भूपनिवेशनाय।

शिल्पशास्त्रे—

कन्यासिंहे तुलायां भुजगपतिमुखं शम्भुकोणेऽग्निखातं
वायव्ये स्यात्तदास्यं त्वलिधनमकरे ईशखातं वदन्ति
कुम्भे मीने च मेषे निर्ऋतिदिशि मुखं खातवायव्यकोणे
चाग्नेः कोणे मुखं वै वृषमिथुनगते कर्कटे रक्षखातम्॥

तत्त्वचिन्तामणौ—

यत्र दैर्घ्यं गृहादीनां द्वात्रिंशद्धस्ततोऽधिकम्।
न तत्र चिन्तयेद्धीमान् गुणानायव्ययादिकान्॥

राजमार्तण्डः—

आयव्ययौ मासशुद्धिं तृणागारे न चिन्तयेत्।
शिलान्यासादि नो कुर्यात्तथागारे पुरातने॥

व्यवहारतत्त्वे—

निषिद्धेष्वपि कालेषु स्वानुकूले शुभे दिने।
तृणकाष्ठगृहारम्भे मासदोषो न विद्यते॥

चण्डेश्वरः—

पूर्णादि त्वष्टमीं यावत्पूर्वास्यं वर्जयेद् गृहम्।
उत्तरास्यं न कुर्वीत नवम्यादिचतुर्दशीम्॥
अमावास्याष्टमीं यावत्पश्चिमास्यं विवर्जयेत्।
नवम्यादौ तथा याम्यं यावत्कृष्णचतुर्दशीम्॥

ध्रुवं दृ(१)ष्ट्वाथवा स्मृत्वा कर्तव्यं वास्तुरोपणम्।
साधाह्नवर्ज्यदिवसे रात्रौ त्यक्त्वा महानिशम्॥

वराहः—

दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्प्रथमाम्।
शेषाः प्रदक्षिणेन स्तम्भाश्चैवं समुत्थाप्याः॥

कालादर्शे वास्तुशास्त्रे—

खाते चैव शिलान्यासे(२)वृषचक्रं प्रशस्यते।

तच्चोक्तं शान्तिरत्ने—

चतुर्हस्तप्रमाणं तु खात्वा गर्तं समन्ततः।
कुम्भोदकैः सेचयेयुः शान्तिपाठपुरःसरम्॥
तत ईशानदिग्भागे साक्षतं रत्नपञ्चकम्।
साज्यं कुम्भं स्थिरं मुक्त्वा वास्तुपूजनपूर्वकम्॥
कुम्भोपरि शिलान्यासः कर्तव्यस्तदनन्तरम्॥

अथ गृहप्रवेशः। बृहस्पतिः—

नन्दायां दक्षिणद्वारं भद्रायां पश्चिमेन तु।
जयायामुत्तरद्वारं पूर्णायां पूर्वतो विशेत्॥

वसिष्ठः—

कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं
विप्रान्पूज्यानग्रतः पूर्णकुम्भम्।
हर्म्यं रम्यं तोरणस्रग्वितानैः
स्त्रीभिः स्रग्वी गीतवाद्यैर्विशेच्च॥

व्यवहारतत्त्वे—

सौम्यायने श्रावणमार्गपौषे
जन्मर्क्षलग्नोपचयोदयेंऽशे।

---

(१) 'दृष्ट्वा तथा स्मृत्वा' क०।

(२) वृषचक्रं धर्माब्धौ—नेष्टानि सप्त सूर्यर्क्षादिष्टान्येकादशाष्टमात्। दश शिष्टानि नेष्टानि चक्रे स्युर्वृषवास्तुनि॥ यद्वा तुर्यात्पञ्चदशात्त्रयोविंशतिसंख्यकात्। वेदाब्धिपञ्च नेष्टानि गृहारंभप्रवेशयोः' इति वास्तुचक्रम्।

वामं गतेऽर्के गृहवास्तुपूजां
कृत्वा विशेद्वेश्म भकूटशुद्धम् ॥

वास्तुशास्त्रे—

लग्नात्प्रागादितो दिक्षु द्वौ द्वौ राशी नियोजयेत् ।
एकमेकं न्यसेत्कोणे सू(१)र्यं वामं विचिन्तयेत् ॥

वसिष्ठः—

चन्द्रजार्यसितवासरेषु च
श्रीकरं सुतमहार्थलाभदम् ।
सूर्यसूनुदिवसे स्थिरप्रदं
किन्तु चौरभयमत्र निर्दिशेत् ॥

रत्नकोशे—

पुष्ये धनिष्ठामृगवारुणेषु
स्वायंभुवर्क्षे त्रिषु चोत्तरासु ।
अक्षीणचन्द्रे शुभदो नृपस्य
तिथावरिक्ते च गृहप्रवेशः ॥

नारदः—

प्रवेशो मध्यमो ज्ञेयः सौम्यकार्तिकमासयोः ।
माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः ॥
अकपाटमनाच्छन्नमदत्तबलिभोजनम् ।
गृहं न प्रविशेद्धीमानापदामाकरो हि त(२)त् ॥

ज्येष्ठः क्षुद्रगृहपरः । वृद्धगार्ग्यः—

भानोश्च भौमस्य विहाय वारौ
शूलादियोगानशुभान्नवापि ।
रिक्ता तिथिश्चापि मृदुध्रुवर्क्षे
सौम्यायने च प्रविशेद्गृहाणि ॥

रत्नमालायाम्—

त्वाष्ट्रमित्रशशिपू(३)षदैवतान्यामनन्ति मुनयो मृदून्य

(१) 'सूर्यं वामे विचारयेत्' ख० । (२) 'यत्' क० । (३) 'पुष्यदेवता' क

मैत्रगे हरति भूषणाम्बरार्द्रतिमङ्गलविधानमेषु च ॥

रोहिण्युत्तरात्रयं च ध्रुवाणि । प्रवेशश्च वास्तुपूजां कृत्वा कार्यः—

जीर्णोद्धारे तथोद्याने तथा गृहनिवेशने ।
नवप्रासादभवने प्रासादपरिवर्तने ॥
द्वाराभिवर्तने तद्वत्प्रासादेषु गृहेषु च ।
वास्तु(१)पशमनं कुर्यात्पूर्वमेव विचक्षणः ॥

इति मात्स्योक्तेः । तत्रैव—

कृत्वाग्रतो द्विजवरानथ पूर्णकुम्भं
दध्यक्षताम्रदलपुष्पफलोपशोभम् ।
दत्त्वा हिरण्यवसनानि तथा द्विजेभ्यो
माङ्गल्यशान्तिनिलयं स्वगृहं विशेच्च ॥
गृह्योक्तहोमविधिना बलिकर्म कुर्यात्
प्रासादवास्तुशमने च विधिर्य उक्तः ।
संतर्पयेद्द्विजवरानथ भक्ष्यभोज्यैः
शुक्लाम्बरः स्वभवनं प्रविशेत्सुरूपम् ॥

अथ कलिवर्ज्यानि बृहन्नारदीये—

*समुद्रयातुः स्वीकारः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥

यस्तु कार्त्तयुगो धर्मो न कर्त्तव्यः कलौ युगे ।
पापप्रयुक्ताश्च सदा कलौ नार्यो नरास्तथा ॥

इत्यादित्यपुराणवचनेन यद्यपि कृतयुगसंबन्धि धर्मसामान्यं निषिद्धं तथापि सर्वस्य तस्य निषेद्धुमशक्यत्वाद्विशेषानाह—*समुद्रेति । यद्यपि समुद्रयानं न विहितं तथापि बौधायनेन "समुद्रयाने ब्राह्मस्य न्यासापहरणम्" इत्यादिना तत्कर्तुः प्रायश्चित्तं विहितं, तदपि कलौ कर्त्तव्यमेवेति तत्करणानन्तरं तद्व्यवहारो निषिद्ध्यते,

(१) 'वास्तुप्रसवनं' क० ।

देवराच्च सुतोत्पत्तिर्मधुपर्के *पशोर्वधः ।
*मांसदानं तथा*श्राद्धे*वानप्रस्थाश्रमस्तथा ॥
दत्ताच्चतायाः कन्यायाः पुनर्दानं परस्य च ।
*दीर्घकालं ब्रह्मचर्य*नरमेधाश्वमेधकौ ॥

द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः ।

इत्यग्निमवचनाच्च । एतच्च प्रायश्चित्तं रागप्राप्ते समुद्रयान एव । शंखोद्धारादितीर्थे यात्राविधिनान्तरीयकं समुद्रयानमतो दोषाभावान्न प्रायश्चित्तमित्यन्यत्र विस्तरः । अत्र क्रत्वर्थमात्रनिषेधेपि न क्षतिः पुरुषार्थनिषेधान्तरसत्त्वात् । *पशोरिति ।

महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत् ।

इति अजादिसंग्रहार्थं पशुपदम् । *मांसदानमिति श्राद्धसम्बन्धि(१)क्रत्वर्थपुरुषार्थत्वं निषिध्यते, यथा वेदिबर्हिर्धर्माणां प्रधानसम्बन्धिमात्रांशे विधिः, न तु तादर्थ्यांशेऽपि, मानाभावात्, तद्वत् ।(२)एतेन—

शौचं च पात्रशुद्धिश्च श्रद्धा च परमा यदि ।
अनन्ततृप्तिकृच्छ्राद्धमेतत्खलु न चामिषम् ।

इति पुरुषार्थमामिषदानं निषिध्यते, न तु क्रत्वर्थं विधिस्पृष्टे निषेधानवकाशादित्यपहसितम् । *श्राद्धे इति उपलक्षणार्थं, तेनो-(३)पयाचितकादावपि निषेधः । *वानप्रस्थेति ।

सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम् ॥
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ॥(या० स्मृ० ३–४६)

इति विहितः । वानप्रस्थो बुभूषुरिति शेषः । *दीर्घकालमिति । "अष्टचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यम्" इति श्रुतिविहितम् ,

यदि चात्यन्तिको वासो रोचेत स्वगुरोः कुले ।
युक्तः परिचरेदेनमाशरीरविमोक्षणात् ॥

---

(१) 'क्रत्वर्थं पुरुषार्थं च' ख० । (२) 'एतेन' नास्ति घ० ङ० ।
(३) 'तेनोपयाचितकारादिनिषेधः' घ० ङ० ।

*महाप्रस्थानगमनं *गोमेधश्च तथा मखः ।
इमान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिणः ॥
कमण्डलुः 'सोदकं च*कमण्डलुम्' इत्युक्तः, मृन्म-

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥
एतेष्वविद्यमानेषु स्थानासनविहारवान् ।
प्रयुञ्जानोऽग्निशुश्रूषां सादयेद्देहमात्मनः ॥

इति विहितं नैष्ठिकं च । स्थानमजुष्ठाग्रादिना नियतमूर्ध्वावस्थानम् , आसनं नियमोपवेशनं, विहारो भ्रमणम् , एतैस्तपोविशेषो लक्ष्यते । नव्यास्तु दीर्घकालमिति कालापवादमात्रम् । अन्यथा दीर्घं ब्रह्मचर्यमित्येव ब्रूयात् । तेन श्रौतमेव निषिध्यते न नैष्ठिकम् । तेन द्राविडानां नैष्ठिकाचारोऽपि संगच्छते इत्याहुः । *नरमेधेति । "ब्रह्मणे ब्राह्मणमालभते" इति "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इति विहितौ । *महाप्रस्थानेति ।

यो जीवितुं न शक्नोति महाव्याध्युपपीडितः ।
सोऽग्न्युदकमहायात्रां कुर्वन् वा न प्रदुष्यति ॥

इति विहितमाशरीरपातमुत्तरदिग्गमनम् । *गोमेधश्चेति । "मैत्रावरुणीं गां वशामनुवन्ध्यामालभेत" इति विहितो यागभेदः । कारात् राजसूयग्रहः,

न कलौ क्रियते अश्वमेधो वाप्यथ गोसवः ।
नरमेधोऽक्षता नारी देवरात् पुत्रसन्ततिः ॥
गर्हितं सप्तकं ह्येतद्राजसूयः कमण्डलुः ।

इति हेमाद्रौ गारुडाद्वा । राजसूयश्च "राजा राजसूयेन यजेत" इति विहितः । *कमण्डलुमित्युक्त इति । इदमुपलक्षणम् ,

दाक्षायणी ब्रह्मसूत्री वेणुमान् स कमण्डलुः ।

इत्युक्तस्योपलक्षणम् । तथाच स्नातकस्य इत्युक्तः "अथ

यो वा । दत्ता ऊढा,

*ऊढायाः पुनरुद्वाहं*ज्येष्ठांशं*गोवधं तथा ।
कलौ पञ्च न कुर्वीत *भ्रातृजायां कमण्डलुम् ॥

इति हेमाद्रौ वचनात् । ऊढायाः—

पुरा पुरुषसंयोगान्मृते देयेति केचन ।

इत्या*दिभिर्विवाह्यतोक्ता । हेमाद्रौ ब्राह्मे—

गोत्रान्मातुः सपिण्डाच्च विवाहो गोवधस्तथा ।
नराश्वमेधौ मद्यं च कलौ वर्ज्यौ द्विजातिभिः ॥

गोत्राद्गोत्रजायाः पितृष्वसुः, मातृसपिण्डान्मातुलात्तत्कन्यायाः विवाहः कलौ न कार्यः । *तेन यानि तद्विधायकानि, तानि *युगान्तरविषयाणि । तथा च

कमण्डलुचर्यामुपदिशन्ति" इति बौधायनोक्तेतिकर्त्तव्यताकः काष्ठमयो मृन्मयो वेत्यर्थः । तेन मृन्मयो वेति वाकारः सङ्गच्छते । न च कमण्डलुधारणं वानप्रस्थाश्रमे इति मतं सम्यक्, तस्य पृथगुपादानात् ।

ननु दत्तापदं कुतो न वाग्दत्तापरमित्यत आह—*ऊढाया इति । *ज्येष्ठांशमिति ।

ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् । (म० स्मृ.९-११२)

इति विहितम् । *गोवधमिति । मधुपर्के इति शेषः । *भ्रातृजायामिति । जायामिति शेषः । पञ्चेति न परिसंख्या, वाक्यान्तरदर्शनात् । एतद्वाक्योपात्तत्वोपाधिना च पञ्चत्वम् । *आदिभिरिति । आदिना

ऋतावदृष्टे कन्यैव पुनर्देयेति केचन ।

इत्यादिपरिग्रहः । ननु पैतृष्वसेयीमातुलकन्ययोर्विवाहे "तृप्तां जहुः" इत्यादिश्रुतिः प्रमाणं, श्रुतेः स्मृत्यपेक्षया प्राबल्यादित्यत आह-*तेनेति । *युगान्तरेति । न चैतद्युग एव अर्जुनादीनां कथं मातुलकन्यापरिणय इति वाच्यं "विहितान्यपि कर्माणि"

व्यासः—

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः ॥

इति कलौ तन्निन्दामाह । मातृतस्तृतीयां मातुलकन्यामित्यर्थः । उक्तं चैतत्प्राक् । *मद्यं 'स्त्रीभ्यश्च सुरामाचामम्' इत्यादिना *विहितमपि वर्ज्यम् ।

इति अग्निमवाक्यात् । *मद्यमिति । सुरापैष्टीनां चायं निषेधो न विषयीकरोति, सुरामद्ययोर्भेदात् ,

सुरा वै मलमन्नानां पाप्मा च मलमुच्यते ।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥

इति मनुना द्विजातिसामान्ये तन्निषेधाच्च । न च माध्वीकादिकं,

माधूकमैक्षवं सैरं तालं खार्जूरपानसम् ।
मधूत्थं चैव माध्वीकं मैरेयं नारिकेरजम् ॥
अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य तु ॥

इति विष्णुना सामान्यत एव तन्निषेधात् , "नित्यं मद्यं ब्राह्मणो वर्जयेत्" इति निषेधान्तराच्च; किन्तु

कामादपि हि राजन्यो वैश्यो वापि कथञ्चन ।
मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते ॥

इति बृहद्याज्ञवल्क्येन राजन्यवैश्ययोरभ्यनुज्ञातं मद्यं निषिध्यते । एवं त्रैवर्णिकादिपुरस्कारेण वामागमादौ विहितं विनायकशान्त्यादौ च क्षत्रियादेरुक्तं मद्यं निषिध्यते । नन्वेतावता निषेधस्य प्राप्तिपूर्वकत्वोपपत्तौ कथं "स्त्रीभ्यश्च सुरामाचामम्" इति सङ्गच्छते, मद्ये सुरालक्षणायां मानाभावात् ? शृणु, मद्यमपीह सुराशब्देन ग्रहीतुं शक्यते, गौडी-पैष्टी-फालीभेदेन तस्यास्त्रिविधत्वात् । *विहितमिति । आश्वलायनगृह्ये "अपरेद्युरन्वष्टक्यम्" इत्यत्र विहितमित्यर्थः ।

हेमाद्रौ आदित्यपुराणे—

*विधवायाः प्रजोत्पत्तौ देवरस्य नियोजनम् ।

ओदनाग्रद्रवं प्राहुराचामं हि मनीषिणः ।

*विधवाया इति । अत्र—

विहितान्यपि क(१)र्माणि धर्मलोपभयाद् बुधैः ।
समापने निवृत्तानि साध्वभावात्कलौ युगे ॥

इति प्रकृतम् । समापने जन्मेजयाश्वमेधसमाप्तौ निवृत्तानि निवर्त्तितानि । तेन द्रोणादीनां वधे कथं पाण्डवादीनां कलिमध्ये दोषो नास्तीति न शङ्क्यम् । इदं च "देवराच्च सुतोत्पत्तिः" इति च वाग्दानानन्तरं मृते पत्यौ देवरपरं,

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥

अनेन विधानेन घृताभ्यङ्गादिनियमवन्नियोजनविधानेन ।

यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ ॥

इति मनुना,

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋताविया(२)त् ॥

इति याज्ञवल्क्येन च तदनुज्ञानात्, न तु विवाहानन्तरं विधवायां,

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ।

इति मनुना वि(२)वाहानन्तरं विधवानियोजननिषेधात् । नचैवं भारते कथं सत्यवत्यां कनिष्ठभ्रातृभार्यायां विधवायां व्यासो नियुक्त इति वाच्यम् , तत्र 'धनेनोपतोष्य कञ्चन ब्राह्मणो नियोज्यः' इति भीष्मानुज्ञया सत्यवत्याःतथा(३)करणेन निषेधगतान्य-

---

(१) 'कार्याणि' ख० ।
(२) 'विवाहानन्तरं विधवानियोजन' नास्ति घ० ङ० ।
(३) 'तथा' नास्ति ख० ।

*बालायाः क्षतयोन्यास्तु वरेणान्येन संस्कृतिः ॥

पदस्य ब्राह्मणेतरान्यपरत्वात् । अन्यथा ब्रह्मक्षत्रियदेवक्षत्रियभेदो न स्यात् । महाप्रभावतया दोषकल्पनाविरहेणान्यपदस्य यथाश्रुतार्थत्वाद्वा । देवराच्चकारादनुज्ञातसपिण्डसगोत्रयोरपि ग्रहः । *बालाया इति 'दत्ताक्षतायाः' इत्येतत्समानार्थम् । वस्तुतस्तु ननु इदं वाक्यद्वयं कथं सङ्गच्छते, "नान्यस्मिन् विधवा नारी" इति मनुना सर्वदा तन्निषेधात् ।

मन्वर्थविपरीता तु स्मृतिः सापि विनश्यति ।

इति अङ्गिरोवाक्यात्, नापि देवरनियोजनं तदर्थः "देवराच्च सुतोत्पत्तिः" इत्यनेन पौनरुक्त्यापत्तेः, नापि वाग्दत्ताविषयकं तदानीं क्षतयोनित्वशङ्काया अभावात् ; इति चेत् ? न,

दत्तामपि हरेत्पूर्वाच्छ्रेयाँश्चेद्वर आव्रजेत् ।

इति सप्तपद्युपक्रमणात्प्राग् यदन्यस्मै दानमुक्तं तद्विषयकत्वात् । ननु पराशरेण "कलावनुष्ठेयान्धर्मान् वक्ष्यामि" इति प्रतिज्ञाय

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ॥
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इति वचनाद् वाग्दत्तायाः कलौ पत्यन्तरमस्तीति (१)कथं दत्तापहारः कलिवर्ज्य इति चेत् ? (२)कलौ दत्तापहारो न कार्यः, वाग्दानानन्तरतन्मरणे पराशरवचनात्तस्याः वरान्तरेण विवाहः कार्यः,

कन्यायां शुल्कदत्तायां म्रियेत यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते ॥

इत्युक्तवाक्ये कन्याया अनुमतौ पुरुषान्तराय दानलाभात् । इयांस्तु विशेषः—कन्यानुमतावपि देवराय सा न विवाह्या नियोगसाम्यात्, 'देवराच्च सुतोत्पत्तिः' इति सामान्यतो निषेधात् । एवं

(१) 'कथं वाग्दत्ता ख० ।
(२) 'कलौ दत्तापहारो न कार्यः' नास्ति ख० ।

*कन्यानामसवर्णानां विवाहश्च द्विजन्मभिः ।
*आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम् ॥

सगोत्रसपिण्डयोरपि न विवाह्येति । *कन्यानामिति ।

तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्याः स्वा शूद्रजन्मनः ॥

इति याज्ञवल्क्येन विहितः । अत्र-

असवर्णासु कन्यासु विवाहश्च द्विजातिभिः ॥

इति स्मृत्यन्तरं 'द्विजानामसवर्णासु' इति प्रागुक्तं चैकार्थं बोध्यम् । *आततायीति ।

गुरुं वा बालवृद्धं वा ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥

इति विहितं सन्मुखमकूटशस्त्रेण मारणम् । एतेन "नाततायिवधे दोषोऽन्यत्र गोब्राह्मणेभ्यः" इति सौमन्तवं व्याख्यातं, तस्य कलिपरत्वात् । एवं सति यत् श्रीरामेण रावणं हत्वा दश जारूप्या(?)श्वमेधाः कृता इति रामायणं तत् आततायिवधे युगान्तरे सपरिहारो दोष इत्येतदर्थम् । वस्तुतस्तु "गुरुं वा बालवृद्धं वा ब्राह्मणं वा" इत्यादिवाशब्दस्वारस्यात्कैमुत्यन्यायेन ब्राह्मणभिन्न आततायी वध्य इत्यत्रैव तात्पर्यम् । इदमपि स्ववधोद्यतातताय्विषयम् ,

उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम् ।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत् ॥

इति गालववचनात् ।

स्वाध्यायिनां कुले जातं न हन्यादाततायिनम् ।
तं हत्वा भ्रूणहा स स्यादहत्वाऽभ्रूणहा भवेत् ॥

इति बृहस्पतिवचनम्

आततायिनमुत्कृष्टं व्रतस्वाध्यायसंयुतम् ।
यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेत् ॥

द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः ।
*सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम् ॥
*महाप्रस्थानगमनं *गोसंज्ञासिश्च गोसवे ।
सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः ॥
*अग्निहोत्रहव(१)न्याश्च लेहो लीढापरिग्रहः ।
वृत्तस्वाध्यायसा(२)पेक्षयमघसंकोचनं तथा ॥
*प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम् ।
संसर्गदोषस्तेयान्यमहापातकनिष्कृतिः ॥

इति च स्ववधानुद्यतातताय्यपरमिति । एवञ्च स्ववधोद्यतब्रह्मभिन्नाततायिवधः कलौ न कार्य इत्याशयेन द्विजानामिति म् । *सत्रेति । आसनोपायचोदिते "सप्तदशावराश्चतुर्दशमाः सत्रमासीरन्" इति विहिता सत्रदीक्षा, सत्राधिकार इति वत् । *महाप्रस्थानम् आशरीरपातमुत्तरदिग्गमनम् ।

यो जीवितुं न शक्नोति महाव्याध्युपपीडितः ।
सोऽग्न्युदकमहायात्रां कुर्वन् वा न प्रदुष्यति ॥

इति विहिता महायात्रा । *गोसंज्ञासिरिति । गोसवनिार्थम् । *अग्निहोत्रेति । अग्निहोत्रं हूयते यया वैकङ्कतस्रुचा ऽग्निहोत्रहवणी तस्या अग्निहोत्रहोमानन्तरं हुत्वाऽवशिष्टप्राशनार्थं हूया लेहः कथञ्चिल्लीढायाः पुनर्ग्रहोऽग्निहोत्रसाधनत्वम् । प्रायश्चित्तेति । कामकृते महापापादौ ।

न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ।

इत्यादिना विहितस्य विधानमुपदेशः ।

मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ।

इति मनुवाक्यं त्वेतद्युगपरम् । अत्र मरणान्तिकं विदधातुः तिवधप्रायश्चित्तं सूच्यते । तच्च मतिपूर्वनिर्देश एव अन्यापदेशेन

---

(१) 'हवण्याश्च' क० । (२) 'साक्षेपमघ' क० ।

*संसर्गदोषः 'तत्संसर्गी च पञ्चमः' इत्युक्तः । स्तेयं च तदन्यानि महापातकानि ब्रह्महत्यासुरापगुरुतल्पानि त्रीणि, तेषां कामकृतानां मरणान्तिकं प्रायश्चित्तं विप्राणां कलौ नेत्यर्थः । मरणान्तिके हि जातिवधनिमित्तं द्वादशाब्दद्विगुणं ब्रह्मवधनिमित्तं च द्विगुणं भवति तत् 'चतुर्थे नास्ति निष्कृतिः' इति निषिद्धम् । न चा*त्महत्याविधिना तद्बाधः, तेन ह्यात्महत्यानिमित्त-

---

पृष्टं प्रति निर्देशे तदनन्तरं पृच्छकेन तथाचरणे तु न दोष इत्येतदर्थं मतिपूर्वमित्युक्तम् । अत्र पाठान्तरं-संसर्गदोषस्तत्संसर्गी च पञ्चमः इत्युक्तः । स्तेयं च तदन्यानि महापातकानि ब्रह्महननसुरापानगुरुतल्पगमनानि त्रीणि महापापानि, तेषां कामकृतानां विप्राणां प्रायश्चित्तं मरणान्तिकं कलौ नेत्यर्थः । मरणान्तिके हि जातिवधनिमित्तं द्वादशाब्दं द्विगुणं ब्रह्मवधनिमित्तं च द्विगुणं भवति । तत् 'चतुर्थे नास्ति निष्कृतिः' इति निषिद्धम् । न चात्महत्याविधिना तद्बाधः । तेन हि आत्महत्यानिमित्तस्यैव बाधो न जातिवधनिमित्तस्य । संसर्गिणस्तु कामतोऽपि व्रतस्यैवोक्तेर्न मरणान्तिकं, नापि स्तेये, तत्र राज्ञो वधकर्तृत्वात् । तेन तयोर्मरणान्तिकाभावात्तयोरेव निष्कृतिर्नान्येषां त्रयाणाम् । युगान्तरे (१)तु कलौ निषेधबलादेव प्रवृत्तिः । एतद्विषयं न क्षत्रियादेः । तदुक्तं 'विप्राणां मरणान्तिकम्' इति । विशेषस्त्वस्मत्कृते प्रायश्चित्तरत्ने द्रष्टव्यः ।

अथैतद्व्याख्यायते-ननु 'प्रायश्चित्तविधानं च' इत्यनेन 'संसर्गदोषस्तेयान्य' इत्यस्य पौनरुक्त्यम्, इतरत्र मरणान्तिकाभावादित्यत्रैकदेशिमतमाह-*संसर्गेति । विधानं करणं क्रियमाणं प्रायश्चित्तमिति यावत् । तच्च महापापनिष्कृतिरित्येकं वाक्यम् । *आत्महत्याविधिना—

---

(१) 'तु' नास्ति घ० ङ० ।

स्यैव बाधो न जातिवधनिमित्त(१)स्य भिन्नविषयत्वात्। *संसर्गिणस्तु कामतोऽपि*व्रतस्यैवोक्तेर्न मरणान्तिकम्। नापि स्तेये त(२)त्र *राज्ञो वधकर्तृत्वात्। तेन तयोर्मरणान्तिकाभावात् तयोरेव निष्कृतिर्नान्येषां त्रयाणाम्। *युगान्तरे तु कलौ निषेधब(३)लात्प्रवृत्तिः। एतद्विप्रपरं *न क्षत्रियादेः। तदुक्तम् 'विप्राणां मरणान्तिकम्' इति। *विशेषोऽस्मत्कृते प्रायश्चित्तरत्ने ज्ञेयः।

यः कामतो नरः कुर्यान्महापापं कथञ्चन।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनाहते॥

इत्यात्महननविधिना। संसर्गदोषस्तेययोः पर्युदासबीजमाह—*संसर्गिणस्त्विति। *व्रतस्यैवेति।

यो येन पतितेनैषां संसर्गं याति मानवः।
स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये॥

इति मनूक्तेः। *राज्ञ इति।

ब्राह्मणस्वर्णहारी तु राज्ञे मुसलमर्पयेत्।
स्वकर्म ख्यापयंस्तेन हतो मुक्तोऽथवा शुचिः॥

इति पाक्षिकमुक्त्यभिधानात् आत्महननाकरणाच्च। ननु मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः।

इति मनुनापि मरणान्तिकं निषिद्धमिति युगान्तरेऽपि न दुष्करमेवेत्यत्राह—*युगान्तरे त्विति। एकमूलकल्पनालाघवेन मानवस्यापि कलिपरत्वादिति भावः। *न क्षत्रियादेरिति। तथाच क्षत्रियादेर्मरणान्तिकं प्रायश्चित्तं क(४)लौ भवतीति भावः। ननु एतन्मते प्रायश्चित्तविधानं चेत्यस्य वैयर्थ्यं दुर्वारमित्यत्राह—*विशेषश्चेति। संसर्गदोषश्चेति वाक्यं पृथगेवेत्यभिप्रायः। त-

(१) 'निमित्तस्याभिन्न' ख०। (२) 'तेन' क०।
(३) 'बलादेव' क०। (४) 'कलौ' नास्ति घ०ङ०

*वरातिथिपितृभ्यश्च पशूपाकरणक्रिया ।
*दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ॥
सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि ।
अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियः ॥
परोद्देशात्मसंत्याग उद्दिष्टस्यापि वर्जनम् ।
प्रतिमाभ्यर्चनार्थाय संकल्पश्च सधर्मकः ॥

च्चाग्रे स्पष्टम् । वस्तुतस्तु

विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं भवेत् ।
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः ।

इत्यत्र विधिपदवशात्प्रथममहापापानन्तरं प्रायश्चित्तं कृत्वा यदि द्वितीयं पापं क्रियते तदा तद्द्विगुणं प्रायश्चित्तं कार्यं, तदुत्तरं महापापे तु तत्त्रिगुणमिति, "प्रतिनिमित्तं नैमित्तिकावृत्तिः" इति न्यायोज्जीवनेनाभिधाय चतुर्थे महापापे प्रायश्चित्तनिषेधः, नतु प्रकृते अकृतप्रायश्चित्तस्य कथञ्चिच्चातुर्विध्ये तत्प्रवृत्तिरिति। अत्र 'चतुर्थे नास्ति निष्कृतिः' इत्येव विधायकम् । अतो न वाक्यभेद इत्येके । एतच्च व्रत एव प्रवर्त्तते न मरणान्तिके, बाधात् । एवञ्च तत्र द्वैगु(१)ण्यादिविध्यन्तरमावश्यकमिति परे । *वरेति । वरस्य प्राजापत्यः । अतिथेः "आग्नावैष्णव" इति पशुयागविधिः ।

वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥

इत्यादिपित्र्यपशुविधिः । अत्र श्राद्धे पशुयागाभावेन तद्धर्मानतिदेशादुपाकरणाप्राप्तेः पशूपाकरणशब्देन तत्प्रकृतिकं पितृभ्यो मांसपरिवेषणं ल(२)क्ष्यते । एवञ्च "मधुपर्के पशोर्वधः" "मांसदानं तथा श्राद्धे" इति च गतार्थम्, एकमूलकल्पनालाघवात् । एवञ्च 'यस्तु प्राणिवधं कृत्वा'इत्यादि बृहत्पाराशरमपि कलिपरमेव । *दत्तेति ।

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ।

---

(१)'त्रैगुण्यादि' घ० ङ० (२) 'लक्ष्यते' नास्ति घ० ङ०

अस्थिसंचयनादूर्ध्वमङ्गस्पर्शनमेव च ।
*शामित्रं चैव विप्राणां*सोमविक्रयणं तथा ॥
षड्भक्तानशने चान्नहरणं हीनकर्मणः ॥

माधवीये पृथ्वीचन्द्रोदये च—

*शूद्रेषु दासगोपालकुलमित्रार्धसीरिणाम् ।
भोज्यान्नता गृहस्थस्य*तीर्थसेवातिदूरतः ॥
*शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिशीलता ।
आपद्वृत्तिर्द्विजाग्र्याणाम*श्वस्तनिकता तथा ॥
*प्र(१)जार्थं तु द्विजाग्र्याणां प्रजारणिपरिग्रहः ।

इत्यादिद्वादशविधः पुत्रो विहितः तत्रौरसदत्तकव्यावर्त्तनाय दत्तौरसेतरेषामिति । *शामित्रमिति । 'आलभेत'इति विधिप्राप्तं यज्ञे पशुमारणम् । *सोमेति । "गवा क्रीणाति"इति विधिवशसिद्धं सोमविक्रयणम् । *शूद्रेष्विति ।

शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः ।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ॥

इति विहितम् । न(२)चेदं स्नातकप्रकरणत्वात्तेषामेवेति वाच्यम् "उत्तरेषां चैतदविरोधि"इति गौतमेन गृहस्थादीनामपि तदतिदेशात् । अतश्च गृहस्थपदं नाहिताग्निपरं मानाभावात् । दासादिपदं च नापितकुम्भकारयोरुपलक्षणम् , अन्यथाऽनौचित्यापत्तेः । *तीर्थसेवेति । तीर्थयात्रेति पाठान्तरम् । 'दूरतस्तीर्थमासेव्यम्'इत्युक्तं तीर्थसेवनम् । *शिष्यस्येति ।

गुरुवत्प्रतिपूज्याश्च सवर्णा गुरुयोषितः ।

इत्युक्ता पादस्पर्शादिका । *अश्वस्तनिकतेति ।

श्व्यहैहिको वापि भवेदश्वस्तनिक एव वा ।

इति विहिता । *प्रजार्थं त्विति । क्वचिच्छाखायां जातक-

---

(१)'प्रजार्थे' ग० (२) 'नचैवं' ग०

*ब्राह्मणानां प्रवासित्वं मुखाग्निध्मनक्रिया ॥
*बलात्कारादिदुष्टस्त्रीसंग्रहो विधिचोदितः ।
यतेश्च सर्ववर्णेषु भिक्षाचर्याविधानतः ॥
नवोदके दशाहं च दक्षिणा गुरुचोदिता ।
ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च ॥
*भृग्वग्निपतनैश्चैव वृद्धादिम(१)रणं तथा ।
*गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया ॥
पितापुत्रविरोधेषु साक्षिणां दण्डकल्पनम् ।
यतेः सायंगृहत्वं च सूरिभिस्तत्त्वदर्शिभिः ॥
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्तितानि विद्वद्भिर्व्यवस्थापूर्वकं बुधैः ॥

र्महोमे प्रजाजीवनार्थमरणिपरिग्रहो विहितः । *ब्राह्मणानामिति । प्रवासित्वं वृथा सदा प्रवासशीलत्वम्, एवञ्च

प्रवसेत्कार्यवान् विप्रो न वृथैव चिरं वसेत् ।

इति कलिपरमेव । *बलात्कारेति ।

बलात्प्रमथ्य भुक्ता चेद्ह्यमानेन चेतसा ।
प्राजापत्येन शुद्धिः स्यात्तत्स्याः पावनं स्मृतम् ॥

इति संवर्त्तोक्तप्राजापत्यादिना संग्रहः । यद्वा, म्लेच्छादिभिर्भुक्ताया अभुक्ताया अप्यतिचि(२)रकालं भुक्ततदीयान्नादिना केवलतत्तादात्म्यापन्नायाश्च संग्रहः । परन्तु एतादृशविषये तासां तादृशपुंसां च प्रायश्चित्तं कार्यं न तु सं(३)ग्रह इति संग्रहपदोपादानम् । *भृग्वग्नीति ।

वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥

इति विहितः । णिजर्थाविवक्षया हन्यादित्यर्थः । *गवीति । गोतृप्त्यधिके जले 'शुचि गोतृप्तिकृत्तोयम्' इति विहितम् ।

---

(१)'मरणे' ख० (२)'चिरतरकालं' घ०ङ० (३)'संग्रह इति' नास्ति घ०ङ

*सुराग्रहस्य तत्कर्तुः संग्रहो*व्य(१)वहारकः ॥

नच मद्यं चेति सामान्येन निषिद्धस्या*ऽनेनोपसंहार इति वाच्यम्*निषे(२)धस्य निवृत्तिमात्रफ(३)लत्वेन विशेषा(४)नपेक्षत्वात्, *'न हिंस्यात्' इत्यस्य 'न ब्राह्मणं हन्यात्' इत्यनेनोपसंहारे हिंसान्तरस्यादोषत्वापत्तेश्च । निरूपितं चैतद्भेमाद्रिणा*ऽन्यत्रेत्युपरम्यते । *सुराग्रह-

---

सौत्रामण्यामिति व्याचष्टे-*सुरेति । सुराग्रह इति कर्तृव्युत्पत्त्या याज्यो याजकश्चाविशेषाद्ब्राह्यः । *व्यवहार इति । अनेन कृतप्रायश्चित्तस्यापीति लभ्यते । न च युगान्तरेऽकृतप्रायश्चित्तस्य व्यवहारः स्थित इति वाच्यं, तर्ह्येतद्वाक्यवैयर्थ्यात्, लौकिकसुराग्र(५)हणतुल्यत्वात् । *अनेनेति । मद्यं सुरा, कथञ्चित् सुराशब्दस्य तदर्थकतायाः प्रागुक्तत्वात् । तत्सौत्रामण्यां वर्ज्यमित्यर्थः । *निषेधस्येति ।

सामान्यविधिरस्पष्टः संह्रियेत विशेषतः ।

इति यौक्तिकम् । एवञ्च निषेधे तदप्रवृत्तिरिति भावः । साधकाभावमुक्त्वा बाधकमप्याह-*न हिंस्यादिति । *अन्यत्रेति । "एकादश्यां न भुञ्जीत"इति सामान्यतो निषेधस्य "बोधिन्यादावुपवसेत्" इत्यनेनोपसंहारे अन्यशुक्लैकादश्यां भोजनप्रसङ्गवारणार्थविधीनामेवोपसंहारो न तु निषेधानामित्यादिकमुक्तमित्यर्थः । वस्तुतस्तु सुरेह पैष्टीति शङ्का तुच्छैव ।

तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ।

इत्येतत्परतया वा यो(६)ज्या "मा हिंस्यात्"इति निषेधस्याग्नीषोमीयादिविधिनेव 'सुरा वै' इति निषेधस्य सौत्रामणीसुराग्रहविधिना बाध इति तत्र प्रसक्तः सुराग्रहः कलौ निषिध्यते इत्य-

---

(१)'व्यवहारः' क० (२)'निषिद्धस्य' ख० (३)'फलत्वे' ख०
(४)'विशेषानपेक्षणात्' क० (५) 'ग्रहणस्य' घ० ङ०
(६) 'योज्या । निरूपितं चेति । न हिंस्यात्' ग०

स्योद्देश्यस्य सौत्रामणिविशे(१)षणा*विवक्षया*वाजपेयेऽपि निषेधः । *सौत्रामण्यां तु 'पयोग्रहा वा स्युः' इत्यापस्तम्बोक्ते*वैकल्पिकपयोग्रहैरप्यधिकारः । वाजपेये तु तत्प्राप्तौ*मानाभावात् सोमसुरयोःसहत्यागेनांशे सुराद्रव्यत्वात्*तत्प्रख्यतया यागनामत्वेन तां विना संज्ञायोगात् कलौ नाधिकार इति युक्तं प्रतीमः । *त्रिकाण्डमण्डनादिलिखनं तु*निर्मूलम*नाकरं च । *वृत्तेति

र्थः । नन्वेवं "राजा राजसूयेन" इत्यादावुद्देश्यविशेषणराजत्वादेरधिकारिसंकोचकत्वमिव तादृशस्य सौत्रामणीत्वादेः कर्मसंकोचकतया वाजपेयादौ सुरासंधानापत्तिरित्यत्राह-*सुराग्रहस्येति । *अविवक्षयेति । समुच्चयार्थकापिशब्देन कर्मान्तरसमुच्चयेनार्थतस्तद्विवक्षणासंभवादिति भावः । "ग्रहं संमार्ष्टि"इत्यादौ ग्रहत्वं विवक्षितं न त्वेकत्वमितिवत् सुरात्वं विवक्षितं न(२) त्वेकत्वसौत्रामणीसम्बन्ध इत्यपि बोध्यम् । *वाजपेयेऽपीति । एतेन वामागमादौ विनायकशान्त्यादौ च स्मार्त्ते सुतरां निषेधः सूचितः । 'स्त्रीभ्यश्च सुरामाचामम्'इत्यादेरुपलक्षणमेतत् । नन्वेवं क्रमेण सौत्रामण्यामनधिकारे तदङ्गकानां चयनादीनामप्यनधिकारापत्तिरित्यत्राह-*सौत्रामण्यामिति । *वैकल्पिकेति । एतेन सौत्रामण्यां येषां सुराग्रहाः पयोग्रहाश्च उभये तेषां न तस्यामधिकार इति सूचितम् । *मानाभावादिति । सौत्रामणीवाजपेययोः प्रकृतिविकृतिभावासत्त्वात् वाजपेयप्रकरणे पयोग्रहानभिधानाच्चेति भावः । *तत्प्रख्येति । "तत्प्रख्यं चान्यशास्त्रम्"इति जैमिनिसूत्रम् । कर्मनामधेयस्य कस्यचिद्योगरूढत्वमस्तीति तदर्थः । प्रकृते च वाजोऽन्नं सुरारूपं हुत्वा पेयं यत्रेति व्युत्पत्त्या तत्र सुरापाननियमप्रतीतेरित्यर्थः । ननु त्रिकाण्डमण्डनेन पयोग्रहग्रहणेन वाजपेयेऽधिकार उक्त इत्त आह-*त्रिकाण्डेति । *निर्मूलमिति ।

---

(१)'विशेषणविवक्षया' ख० (२) 'न तु सौत्राम' घ० ङ०

*एकाहाद्ब्राह्मणः शुद्ध्येद्योऽग्निवेदसमन्वितः ।
इति उक्तः । अघस्याशौचस्य संकोचः

*न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ।

इत्युक्तस्य प्रायश्चित्तस्य विधानम् *उपदेशः । *'कलौ कर्तैव लिप्यते' इति व्यासोक्तेः पतितसंसर्गे दोषसत्त्वेऽपि पातित्यं नेत्यर्थः, *अन्यथा 'संसर्गः शोधितैरपि'

कल्पकारैस्तदनभिधानात् । *अनाकरमिति । कल्पसूत्रभाष्यादावपि पयोग्रहप्राप्त्यनभिधानात् । *वृत्तेति । वृत्तमग्निहोत्राद्यनुष्ठानं, स्वाध्यायो वेदाध्ययनम् । *एकाहादिति ।

पृथग्वेदाग्नियुक्तस्य त्र्यहमाशौचमिष्यते ।

इत्यादेरुपलक्षणमेतत् ।

दशाह एव विप्रस्य सपिण्डमरणे सति ।
कल्पान्तराणि कुर्वाणः कलौ भवति किल्बिषी ॥ इति(१) ।

प्रायश्चित्तविधानं चेति व्याचष्टे-*न तस्येति । कामकृते महापापादौ । उपदेश इति । स्वयमेव धर्मशास्त्राज्ज्ञात्वाऽन्यापदेशेन वा पृष्ट्वा तदनुष्ठानं तु न वार्यते,

मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ।

इति मानवे मतिपूर्वपदोपादानात् । संसर्गदोष इति व्याचष्टे-*कलाविति । अत्र दोषपदं यथाश्रुतमलक्षकम् ,

आसनाच्छयनाद्यानात्संभाषासहभोजनात् ।
संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि ॥

इति पराशरोक्तेर्निर्विषयतापत्तेः ।

अतः संवत्सरेण पतति पतितेन सहाचरन् ।

इति प्रतिपादितं पातित्यं दोषः, तच्च कर्मानधिकारोऽसंव्यवहार्यता चेति, तन्नेत्यर्थः । स्वयं बाधकमाह-*अन्यथेति । दोषपदस्य दोषसामान्यार्थकत्वे

---

(१) 'इति वा स्यात्' घ० ङ० ।

सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि ।

इति शोधितसंसर्गे दोषः, इह तु पतितसंसर्गे दोषाभाव इति विरोधापत्तेरित्यर्थः, 'कलौ कर्त्तैव' इति व्यासेन तस्य कर्तृत्वेव परिसंख्यानात्, 'कलौ पतति कर्मणा' इति पराशरोक्तेश्च । नव्यास्तु

त्यजेदेशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।
द्वापरे कुलमेकं तु कर्त्तारं तु कलौ युगे ॥

इतिपराशरवचनेन संलापादिनवविधसंसर्गाभावेऽपि विहितोपदेशादित्यागः ।

कृते संभाष्य पतति त्रेतायां स्पर्शनेन तु ।
द्वापरे त्वन्नमादाय कलौ कर्त्तैव लिप्यते ॥

इति संभाषणादिजन्यपातित्यं वा दोषः, तस्यैव निषेधः न तु पतितेन सह संवत्सरं यावन्नवविधसंसर्गप्राप्तपातित्यं पूर्वोक्तवचनद्वयबाधमात्रेण चरितार्थस्य वाक्यस्य नवविधसं(१)सर्गप्रतिपादकवाक्यबाधकत्वायोगात्, 'कलौ पतति कर्मणा' इति पराशरवचनस्वारस्येन पतितसंसर्गरूपकर्मजन्यपातित्यस्य दुर्निवारत्वाच्च, पतितसंसर्गभिन्नेन ब्रह्महननादिकर्मणा पततीति व्याख्यानस्य निर्बीजत्वाच्च । किञ्च ब्रह्महननसुरापानगुरुतल्पगमनादिमहापापसंसर्गप्रायश्चित्तं कलौ न भवतीत्यर्थः । पराशरस्मृतावेव—

चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके ।
समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत् ॥
मद्यपश्च द्विजः कुर्यान्नदीं गत्वा समुद्रगाम् ।
चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ॥
अनड्वत्सहितां गां च दद्याद्विप्रेषु दक्षिणाम् ।
सुरापानं सकृत्कृत्वा अग्निवर्णां सुरां पिबेत् ॥
स पावयेदथात्मानमिह लोके परत्र च ॥ इति ।

---

(१) 'क्य' ग० ।

ब्रह्महमद्यपसुरापनिष्कृतीनाम् 'आसनाच्छयनाद्यानात्' इति संसर्गमभिधाय

चान्द्रायणं यावकं च तुलापुरुष एव च ।
गवां चैवानुगमनं सर्वपापप्रणाशनम् ॥

इति महापातकसंसर्गादिनिष्कृतेश्चोक्तत्वात् । न च पराशरोक्तस्य कलिनिषेधेन बाधः,

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः ।
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः ॥

इति पराशरेणैव विरोधे स्वस्मृतिप्रामाण्योक्तेश्च । तस्मात्पतितसंसर्गे प्रायश्चित्ताचरणं कार्यमेवेति । अन्ये तु 'त्यजेदेशं कृतयुगे' इत्याद्युक्तदेशादित्यागस्य 'कृते संभाष्य पतति' इति संभाषणादिजन्यपातित्यस्य वा न निषेधः, कलौ युगान्तरोक्ताप्राप्तेर्निषेधासंभवात् । तस्मात् 'कलौ पतति कर्मणा' इति कलौ कर्मणा ब्रह्महननादिना पतति न तु संसर्गेणेति व्याख्येयम् । इदानीन्तनानां संसर्गनिमित्तकप्रायश्चित्ताचरणं च पापक्षयार्थमेवेति ग्रन्थं समर्थयन्ते । अत्र केचिदुपन्यसन्ति—पापस्य अव्यवहार्यत्वं नरकोत्पादकत्वं "द्विजातिकर्मभ्यो हानिः पतनम्" इति गौतमात् ।

अधोऽधः पतनात्पुंसां पातकं परिकीर्त्तितम् ।
नरकाग्निषु घोरेषु पतनात्पापमुच्यते ॥

इति भविष्यात् । तत्र नरकोत्पादकत्वसत्त्वेऽप्यव्यवहार्यत्वं नास्तीति कथमुच्यते ? (१)न च प्रायश्चित्तेन नरकोत्पादकत्वेऽपि व्यवहारनिरोधिकाया नाशवदेतदिति वाच्यं, वैषम्यात् । तथाहि, अकामकृतस्य महापापादेः प्रायश्चित्तेन नाशः कामकृते तु व्यवहार्यतामात्रं

प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतो व्यवहार्यस्तु वचनादिह जायते ॥

(१) 'तत्र प्रा' घ० ङ० ।

इति विरोधापत्तेः। *स्तेयभिन्ने महापापे *रहस्यकृते

इति शास्त्रात्,

विहितं यदकामानां कामाच्चद्विगुणं भवेत्।

इति वचनान्यथानुपपत्तेश्च, इह तु

पतितेन सहोषित्वा जानन्संवत्सरं द्विजः।

निश्चितस्तेन सोऽब्दान्ते स्वयं च पतितो भवेत्॥

इति देवलोक्तेः संसर्गिणोऽप्यब्दान्ते पातित्येन प्रायश्चित्तं विना व्यवहाराङ्गीकारासंभवात् ब्रह्महननादिना शक्तिद्वयवत्पापं जायते संसर्गेण त्वेकशक्तिमत्पापमित्यत्र नियामकाभावाच्च। महापापे मरणान्तस्य प्रायश्चित्तत्वे व्यवहारानुपयोगित्वान्नरकनिवर्त्तकमात्रं परिशेषात्तु व्रतात्मकं व्यवहारोपयोगि, प्रकृते तु व्यवहारस्य प्रागेव सिद्धत्वात्तदभङ्ग इत्यादिदूषणगणापत्तेः। "कामतोव्यवहार्यस्तु" इत्यत्राकारप्रश्लेषेणाव्यवहार्यत्ववादिनां शंकराचार्याणां सं(१)सर्गपातित्ये व्यवहाराभावस्येष्टत्वात्। तस्मात्संसर्गदोष इत्यस्य ब्रह्महननादौ प्रायश्चित्ते कृतेऽपि व्यवहाराभावः। संसर्गे तु कलौ प्रायश्चित्ते कृते स(२)ति स नास्तीत्येवार्थ इति। संसर्गदोष इत्यत्र संसर्गपदं संसर्गिसंसर्गपरं 'कर्त्तारं तु कलौ युगे' इति कर्तृत्यागविधिना तत्संसर्गे दोषप्रसवात्। 'कलौ कर्त्तैव लिप्यते' इति तु साक्षात्संसर्गिणः पातित्याभावव्यञ्जकमिति तु भट्टदिनकरः। 'स्तेयान्य' इति व्याचष्टे-*स्तेयभिन्ने इति। नन्वत्र स्तेयान्यमहापापेन प्रायश्चित्तं न कार्यमित्यसंगतं पराशरेणैव प्रत्येकं महापापे प्रायश्चित्ताम्नानात्।

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः।

द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः॥

इति पराशरस्मृतेः कलौ बलीयस्त्वादित्यत्राह-*रहस्येति। 'तस्मात्प्रकाशयेत्पापम्' इति पराशरोक्तेः कलौ प्रकाशप्रायश्चि-

---

(१) 'संसर्ग' नास्ति घ० ङ०। (२) 'सति' नास्ति घ० ङ०।

प्रायश्चित्तं नेत्यर्थः । *सवर्णान्या असवर्णा क्षत्रियादिस्तया दुष्टैः । *अयोनौ शिष्यादौ ।

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।

इत्युक्तस्त्यागः । *परोद्देशेन ब्राह्मणार्थमात्मन-

त्तमेव कार्यमिति भावः । यत्तु 'कलौ पाराशरा' इति वाक्ये नस्तेयान्येतस्य सर्वथा बाधे विषयान्तराभावादप्रामाण्यमतः स्तेयान्यमहापातकनिष्कृतिर्नोपदेश्या । उपदेशेऽपि संसर्गो न कार्य इति वा तात्पर्यम् । 'औदुम्बरी सर्वा वेष्टनीया' इति स्मृतेः 'अष्टकाः कर्त्तव्याः' इतिवन्मूलभूतश्रुतेरनुमानद्वारा प्रामाण्यं प्राप्य "औदुम्बरीं स्पृष्ट्वोद्गायेत्" इति प्रत्यक्षश्रुत्या बाधाद्विरञ्जुलादिपरिहारेण सर्वा वेष्टनीयेति कल्पनावदिति;नन्न, प्रायश्चित्तविधानं चेति तदुपदेशस्य निषिद्धत्वात्, ब्राह्मणभोजनविधिसार्थक्याय संसर्गस्येष्टत्वाच्च । स्तेयपर्युदासश्च तत्र रहस्यप्रायश्चित्ताभ्यनुज्ञानार्थः । केचित्तु अकामकृतेषु स्तेयान्यमहापापे नरकक्षयार्थं निष्कृतिर्न कार्या व्यवहार्यत्वार्थं तु कार्या मरणान्तिकप्रायपाठादित्याहुः । सवर्णान्येति व्याचष्टे—*सवर्णान्येति । दुष्टैः मैथुनादिः । शोधितैः कृतप्रायश्चित्तैः । न च ब्राह्मणादेः क्षत्रियाद्युद्वाहनिषेधेनैव तत्संपर्को निषिद्ध इति वाच्यमेतदिति वाच्यम् एतद्वाक्यस्य ही(१)नवर्णासंपर्कविषयकत्वात् । तादृशसंपर्ककृतप्रायश्चित्तानां संसर्गस्य पूर्वयुगेऽनुज्ञातस्य कलौ निषेध इति ग्रन्थस्तु अनुद्वाहेऽपि व्यभिचारादिप्रायश्चित्तानन्तरं संसर्गो नेत्येतत्पर इत्याहुः । अयोनाविति व्याचष्टे—*अयोनाविति । गुरुस्त्रियाः ब्राह्मणस्त्रियाः संग्र(२)हे गर्भधारणे परित्यागो गृहान्तरावस्थानम् ।

पतिघ्नी च विशेषेण जुङ्गितोपगता च या ।

इति उत्तरार्द्धम् । जुङ्गिता हीनयोनिः । युगान्तरे त्वयोनौ संग्रहे परित्याग इवेति भावः । परोद्देशेति व्याचष्टे—*परोद्देशे-

---

(१) 'हीनवर्णस्योत्तमवर्णा' घ० ङ० ।(२) 'संसर्गे गर्भधारणे' घ० ङ० ।

स्त्यागः । *यद्वा परोद्देशात्मत्यागो गोदानं 'मनसा पात्रमुद्दिश्य' इत्युक्तम् । *उद्दिष्टस्य त्यक्तस्य वर्जनं *'प्रतिग्रहसमर्थोऽपि' इत्युक्तम् । *वेतनग्रहणेन प्रतिमापूजा ।

*स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः । इत्युक्तः स्पर्शः । *षडिति ।

नेति ।

गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान् परित्यजेत् ।

इति विहितः । *यद्वेत्यादि । इदं च न सम्यक् बहुग्रन्थविरोधात् । उद्दिष्टस्यापीति व्याचष्टे-*उद्दिष्टस्येति । *प्रतीति ।

प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् ।

इत्यर्थः । प्रतिग्रहसामान्यनिषेधः कलौ वर्ज्य इत्यर्थः । केचित्तु 'उच्छिष्टस्यापवर्जनम्' इति पाठः, 'स्वाम्युच्छिष्टमुच्छिष्टोपहतं च' इति वसिष्ठाद्युक्तं, तन्निमित्तकप्रायश्चित्तं नेत्यर्थ इत्याहुः । अन्ये तु अपवर्जनं दानम्

विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ।
प्रादेशनं निर्वपणमपवर्जनमर्हतिः ॥ (अ० को०)

इति त्रिकाण्डीस्मरणात् । "उदगुच्छिष्टं ब्राह्मणाय प्रयच्छेत्" इति मधुपर्कविहितं तन्नेत्यर्थ इत्याहुः । परेतु उच्छिष्टस्यापि वर्जनमिति पाठः । उच्छिष्टस्य ताम्बूलचर्वेगाद्युच्छिष्टस्य पथि वर्जनमित्याहुः । प्रतिमेति व्याचष्टे-*वेतनेति । यावज्जीवं मया इयमेव प्रतिमा पूजनीयेत्येवमुद्देश्याद्युल्लेखपूर्वकसंकल्पोपलक्षणमेतत् । अस्थीति व्याचष्टे-*स्वाशौचेति । षड्भक्तेति व्याचष्टे-*षडिति । षण्णां भक्तानामनशनम् उपवासत्रयं,

तथैव(१)सप्तमे काले भक्तानि षडनश्नता ।
अश्वस्तनविधानेन हर्त्तव्यं हीनकर्मणः ॥ (११-१६)

---

(१) 'सप्तमं भक्ते' इति मनुस्मृतौ ।

उपोषितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत् ।
इत्युक्तम*न्नचौर्यम् । *आपदि*क्षात्रादिवृत्तिः । *'मुखेनैव धमेदग्निम्' इत्युक्तं धमनम् ।
*'दशाहेनैव शुध्यत भूमिष्ठं च नवोदकम् ।
इत्युक्तो दशाहः । *'गुरवे तु वरं दत्त्वा' इत्युक्ता दक्षिणा । *शूद्रेषु दासगोपालेति ।
कन्दूपक्वं स्नेहपक्वं यच्च दुग्धेन पाचितम् ।
एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत् ॥
इत्यपरार्के सुमन्तूक्ता*शूद्रस्य पाकक्रिया ।
*पितापुत्रविवादे तु साक्षिणां त्रिपणो दमः ।

इति मानवमपि संगृहीतमित्याह-*अन्नचौर्यमिति । आपदीति व्याचष्टे-*आपदीति । *क्षात्रादीति ।
क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः ॥
इति विहितम् । *मुखेनैवेति ।
मुखेनैव धमेदग्निं मुखाद्ध्येषो ह्यजायत ।
नाग्निं मुखेनेति तु यल्लौकिके योजयेत्तु तत् ॥
इतीत्यर्थः । नवोदके इति व्याचष्टे-*दशाहेनैवेति । शुध्येतेतिपाठः । कलौ नवोदके दशाहं त्याज्यत्वं नेत्यर्थः ।
काले नवोदकं शुद्ध्येन्न पिबेच्च त्र्यहं तु तत् ।
अकाले तु दशाहं स्यात्पीत्वा नाद्यादहर्निशम् ॥
इति दशाहप्रतिषेधस्यापवादः त्रिरात्रप्रतिषेधप्राप्त्यर्थः । अन्यथा काले त्र्यहप्रतिषेधः अकाले तु न किञ्चिदित्यनौचित्यापत्तेः । दक्षिणेति व्याचष्टे-*गुरवे त्विति । लाभे मूलानां दक्षिणां ददातीति विहिता दक्षिणापीह द्रष्टव्या । ब्राह्मणादिष्विति व्याचष्टे-*शूद्रेष्विति । पचनादीत्यादिना भोजनग्रह इत्याशयेनेदम् । *शूद्रस्येति । अत्रोभयत्राप्यर्थतः पाकक्रिया लभ्यते शूद्रकर्तृकपाकं विना तद्भोजनाभावात् । "आर्याधिष्ठिताः शूद्राः संस्कर्त्तारः स्युः"

इत्युक्तः । सायंगृहत्वं*'विधूमे सन्नमुसले' इत्युक्तम् । *पृथ्वीचन्द्रेण तु—

अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च ।
अनिकेता ह्यनाहारा यत्र सायंगृहास्तु ते ॥

इति विष्णुपुराणोक्तो निषिद्धः । *तेनाज्ञातशील-पान्थादेः श्राद्धादौ विनियोगो न कार्यः कलावित्यर्थ उक्तः । एतानि वर्ज्यानीत्यर्थः ।

इत्यापस्तम्बोक्तमपि हि ब्राह्मणगृहे शूद्रस्य पक्तृत्वे द्रष्टव्यम् । पितेति व्याचष्टे-*पितेति । यतेरिति व्याचष्टे-*यतेरिति । *विधूमे इति ।

विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।
काले ऽपराह्णभूयिष्ठे नित्यं भिक्षां यतिश्चरेत् ॥

इत्यर्थः । गृहपदस्य भिक्षार्थं गृहगमनपरत्वादिति भावः । यत्र सूर्यास्तो जातस्तत्रावस्थानं सायंगृहत्वमिति मतमाह-*पृथ्वीति । सायंगृहा इति तत्र मध्यम् । यद्यपि "अष्टौ मासान्विहारः स्यात्" इत्यस्यैकवाक्यतया अनिकेता इति यतिपरमेव, तथाप्यनाहारा इत्यनेनाहारसामान्याभावबोधनासंभवादज्ञातेत्युक्तम् । अत एवोक्तो निषेध इत्यसमस्ताभिधानम् । यतिपदं चाविवक्षितार्थकं, विप्रा इति सामान्यतोऽभिधानात् । शीलपदेन कुलमप्युपलक्षणीयं, तेन गृहस्थादेरपि संग्रहः । वस्तुतस्तु उक्तनिषेध इति पाठः । उक्तस्य निषेध इत्यर्थः । अनिकेतत्वे सत्यनाहारस्य यतित्वेव सत्वात् यतेरित्यपि विवक्षितम् । तत्र च यत्र सूर्यास्तो जातस्तत्रैव यतेरवस्थानं तद्वर्ज्यमित्यर्थः । *तेनेति । अत्र—

अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु । इति,
'यच्छ्राद्धं मधुना हीनं' 'मधुप्रधानं शूद्रस्य' इत्यादेर्विषयं वक्ष्यति ।

निगमः—

अग्निहोत्रं गवालम्भं सं(१)न्यासं*पलपैतृकम् ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

अग्निहोत्रं तदर्थमाधानम् । एतच्च सर्वाधानपरम्,

अर्धाधानं स्मृतं श्रौतस्मार्ताग्न्योस्तु पृथक्कृतिः ।
सर्वाधानं तयोरैक्यकृतिः पूर्वयु(२)गाश्रिता ॥

इति लौगाक्षिवचनादिति स्मृतिचन्द्रिकायाम् । एतेन—

चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च ।
कलेर्यदा गमिष्यन्ति तदा त्रेतापरिग्रहः ॥
संन्यासश्च न कर्तव्यो ब्राह्मणेन विजानता ।

इति व्यासवचनं व्याख्यातम् । सर्वाधानेपि विशेषमाह

---

*पलपैतृकं पैतृकं मांसम् । ननु पूर्वयुगाश्रितेत्यत्र पूर्वयुगेत्यस्य पूर्वयुगानि कृतादीनि, युगस्य कलेः पूर्वो भाग इति वार्थः ? नाद्यः, एतेनेत्यादिविरोधात्, 'चत्वार्यब्दसहस्राणि' इति कलौ त्रेतापरिग्रहविधानात् । नान्त्यः, प्रकृ(१)तोपष्टम्भकतापत्तेः । अत्रोच्यते—आद्य एवार्थो ग्रन्थकृत्संमतो नापरः, एकदेशिसमासे लक्षणाप्रसङ्गात् । एवञ्च सामान्यतो निषिद्धमपि सर्वाधानं व्यासवाक्येन पुनः प्रतिप्रसूयते इति । यावद्वर्णेति चार्द्धाधानपरं न्यायप्राप्तानुवादः । वेदोच्छेदे व(२)र्णसंकरे वाऽधिकाराभावादेव तन्निवृत्तेः प्राप्तत्वात् । सर्वाधानेऽपि तु विशेषमित्यस्यावधिविशेषपरिच्छिन्ने सर्वाधानेऽर्धाधानावधिमित्यर्थः । *त्रिदण्ड इति । वैयासकी संख्या त्वेकदण्डपरा । गारुडे—

कलौ न क्रियते अश्वमेधो वाप्यथ गोसवः ।
नरमेधोऽक्षता नारी देवरात्पुत्रसंततिः ॥
गर्हितं सप्तकं ह्येतद्राजमृत्यकमण्डलू ।

---

(१) 'ज्येष्ठांशं गोवधस्तथा' क० । (२) 'युगाश्रया' ख० ।
(१) 'प्रकृतानुपलम्भकतापत्तेः' घ० ङ० । (२) 'वर्णसंस्कारे वाधि' ख० ।

देवलः—

यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे ॥ इति ।

अत्र पूर्वयुगाश्रितेति लौगाक्षिवाक्ये पूर्वयुगानि कृतादीनीत्येकोऽर्थः । अन्ये तु युगस्य पूर्वं कलेः पूर्वभागः । स 'चत्वार्यब्दसहस्राणि' इति पूर्वोक्तवाक्याच्चतुश्चत्वारिंशच्छतवर्षावच्छिन्नः । तस्मिन्भागे सर्वाधानं कार्यम् । तदुत्तरं तु यावद्वर्णविभागोऽस्तीति वाक्यात् वर्णविभागपर्यन्तमधीधानमित्याहुः । संन्यास*स्त्रिदण्डः ॥

इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिन्धौ कलिवर्ज्यानि समाप्तानि । तृतीयपरिच्छेदपूर्वभागः समाप्तः ।

आदित्यपुराणे-

समयाः शकुनाः प्रश्नाः सामुद्रिकमुपश्रुतिः ।
उपयाचितमादेशा न भवन्ति कलौ क्वचित् ॥
तस्मात्तन्मात्रलाभेन कलौ कार्यं न कारयेत् ।

इति कलिवर्ज्यग्रन्थः ।

अथ संक्षेपतः कलिधर्माः । पराशरः—

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः ।
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः ॥

स्मृत्यन्तरोक्ता विरुद्धा धर्मा युगान्तरपरा इत्यर्थः । ब्रह्माण्डे—

त्रेतायां पाक्षिको धर्मो द्वापरे मासिकः स्मृतः ।
यथाशक्ति परः प्राज्ञस्तदहा प्राप्नुयात्कलौ ॥

वैष्णवे—

यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन यत् ।
द्वापरे तत्तु मासेन अहोरात्रेण तत्कलौ ॥

काशीखण्डे—

कलौ विश्वेश्वरो देवः कलौ वाराणसी पुरी ।
कलौ भागीरथी गङ्गा कलौ दानं विशिष्यते ॥

आग्नेये—

नास्ति श्रेयस्करं नृणां विष्णोराराधनात्परम् ।
कुर्वीताराधनं राजन्वासुदेवे कलौ युगे ॥

नारदीये—

शिवपूजापरा ये तु शिवनामपरायणाः ।
त एव शिवकल्पाश्च घोरे कलियुगे द्विजाः ॥
अतीवभाग्यास्ते विप्राः सकृद्ये के शिवार्चकाः ।
घोरे कलियुगे प्राप्ते सर्वधर्मबहिष्कृते ॥

मात्स्ये—

ज्ञात्वा कलियुगं घोरं हाहाभूतमचेतनम् ।
अविमुक्तं न मुञ्चन्ति कृतार्थास्ते नरा भुवि ॥
गीता गङ्गा तथा भिक्षुः कपिलाऽश्वत्थसेवनम् ।
वासरः पद्मनाभस्य सप्तकं न कलौ युगे ॥

पद्मनाभस्य वासर एकादशी । अविमुक्तेन सहैतत्सप्तकं कलौ न दुर्लभमिति यावत् ।

कृते सर्वत्र तीर्थानि त्रेतायां पुष्करं स्मृतम् ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गैव केवलम् ॥

पराशरः—

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमित्याहुर्दानमेव कलौ युगे ॥

भागवते—

कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥

विष्णुधर्मे—

चक्रायुधस्य नामानि सदा सर्वत्र कीर्त्तयेत् ।
नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः ॥

स्कान्दे—

तन्नास्ति कर्म यल्लोके वाग्जं मानसमेव वा ।
यत्तु न क्षीयते पापं कलौ गोविन्दकीर्त्तनात् ॥

विष्णुपुराणे—

ध्यायन् कृते, यजन् यज्ञैस्त्रेतायां, द्वापरेऽर्चयन् ।
यदाप्नोति, तदाप्नोति कलौ संकीर्त्य केशवम् ॥
अवशेनापि यन्नाम्नि कीर्त्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥

स्कान्दे—

यत्र विष्णोः कथा नित्या यत्र तिष्ठन्ति वैष्णवाः ।
कलिबाह्या नरास्ते वै येऽर्चयन्ति सदा हरिम् ॥

भारते—

कलौ पित्रादिदोषघ्ना विषयाकृष्टमानसाः ।
कृत्वापि सकलं पापं गोविन्दं संस्मरन् शुचिः ॥

स्कान्दे—

कलौ कृष्णस्य ये नित्यं क्रियायोगं वदन्ति ये ।
तैर्नरैर्देवदेवेश पवित्रा धरिणी कृता ॥
ये वै निन्दन्ति कृष्णस्य क्रियायोगं कलौ नराः ।
कल्पकोटिसहस्राणि ते वसन्ति यमालये ॥

इत्याद्यन्यत्र विस्तरः ।

नमो नारायणायेति कीर्त्तयन्ति च ये नराः ।
निष्कामा वा सकामा वा न कलिर्बाधते हि तान् ॥

प्रह्लाद उवाच—

स गङ्गा स गया सेतुः स काशी स च पुष्करम् ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ऽप्यथर्वणः ।
अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
तानि प्राप्तानि येनोक्तं हरिरित्यक्षरद्वयम् ॥
वाराणस्यां कुरुक्षेत्रे नैमिषारण्य एव च ।
इष्टं स्यात्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
अश्वमेधैर्महायज्ञैर्नरमेधैस्तथैव च ।
इष्टं स्यात् तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
गवां कोटिप्रदानेन हेमकन्यासहस्रकम् ।
दत्तं स्यात्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ।
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ॥
प्रह्लादेन कृतं स्तोत्रं दुःखसागरशोषणम् ।
यः पठेत्स नरो याति तद्विष्णोः परमं पदम् ॥

भारते—

सर्वावस्थां गतो वापि युक्तो वा सर्वपातकैः ।
यस्त्र्योंनमः शिवायेति मुच्यते तु कलौ नरः ॥

भविष्ये—

शिव शङ्कर रुद्रेश नीलकण्ठ त्रिलोचन ।
इतीरयन्ति ये नित्यं न हि तान् बाधते कलिः ॥
ध्यानं परं कृतयुगे त्रेतायां यजनं तथा ।
द्वापरे लिङ्गपूजा च कलौ शंकरकीर्त्तनम् ॥

लैङ्गे—

प्रसङ्गेनापि शाठ्येन दम्भेनापि हि लोभतः ।
ये सेवन्ते महादेवं न ते पश्यन्ति भास्करिम् ॥

शिवभक्तिं प्रकुर्वाणो ये द्विषन्ति जनार्दनम् ।
तेषां निरयपातस्तु तावत्काल उदाहृतः ॥

काशीखण्डे—

न सिध्यति कलौ योगो न सिध्यति कलौ तपः ।
न्यायार्जितधनोत्सर्गः सद्यः सिध्येत्कलौ सदा ॥
न व्रतं न तपो नेज्या न जपो न सुरार्चनम् ।
दानमेव कलौ मुक्त्यै काश्यां दानं विशिष्यते ॥
कलिस्तान्नैव बाधेत कालस्तांश्च जिघांसति ।
एनांसि तान्न बाधन्ते ये च काशीं समाश्रिताः ॥

सौरे—

तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमम् ।
वाराणसी तु नगरी प्रिया देवस्य शूलिनः ॥
यत्र विश्वेश्वरो देवः सर्वेषामेव देहिनाम् ।
ददाति तारकं ज्ञानं संसारो मोचकं परम् ॥

अथ गङ्गा । कौर्मे—

कृते तु सर्वतीर्थानि त्रेतायां पुष्करं परम् ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गा विशिष्यते ॥
पुष्करं तु कृते सेव्यं त्रेतायां नैमिषं तथा ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गां समाश्रयेत् ॥

कामिके—

विना गङ्गां धर्ममयीं कथं स्याच्च कलौ गतिः ।
शिरसः कर्त्तनं तस्य प्राणत्यागोपि वा वरः ॥
समर्थस्तु कलौ काले गङ्गां यो नाभिगच्छति ॥

भविष्ये—

कलौ कलुषचित्तानां पापद्रव्यरतात्मनाम् ।
विधिहीनक्रियाणां च गतिर्गंगां विना न हि ॥
अनाश्रित्य तु गङ्गां हि मुक्तिमिच्छति यः कलौ ।
सूर्यं द्रष्टुमिहोद्युक्तो जात्यन्धसदृशस्तु सः ॥

भविष्ये--

मनोवाक्कायदुष्टानां पतितानां कलौ युगे ।
सैवेह शरणं गङ्गा पतितत्रायणोद्यता ॥
संसारार्णवमग्नानां भूतानां शरणार्थिनाम् ।
नान्यः शरणदः कश्चिदुपायो दृश्यते क्वचित् ॥
विना गङ्गां धर्ममयीं शरण्यां सर्वदेहिनाम् ।
महापातकसंहर्त्रीं सर्वसर्वार्थसाधिकाम् ॥

नारदीये--

कलौ यत् परमं ब्रह्म प्राप्तये सत्वरं नृणाम् ।
गङ्गाभजनमेवाहुर्महापुण्यं महर्षयः ॥
घटध्वं हे बुधा गङ्गां मत्वा विश्वमशाश्वतम् ।
घोरे कलियुगे प्राप्ते मुक्तिर्वो वाञ्छिता यदि ॥
गुणानामेकदेशोऽयं गङ्गायाः कीर्त्तितो मया ।
समस्तानीह को वक्तुं शक्तो वर्षशतैरपि ॥

महाभारते--

न गङ्गासदृशं तीर्थं न देवः केशवात्परः ।
ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः ॥

दानधर्मे--

ते देशास्ते जनपदास्ते शैलास्तेऽपि चाश्रमाः ।
येषां भागीरथी पुण्या मध्ये याति सरिद्वरा ॥

ब्रह्माण्डे--

शतयोजनसंस्थास्तु गङ्गां भक्त्या स्मरन्ति ये ।
गङ्गा गङ्गेति यो ब्रूयान्मुच्यते सर्वपातकैः ॥

तथा--

यत्र तत्र स्थितो वापि मरणे समुपस्थिते ।
भक्त्या गङ्गां स्मरन् याति नरो विष्णुपुरं परम् ॥

ब्राह्मे—

ज्ञानतोऽज्ञानतो वापि कामतोऽकामतोपि वा ।
गङ्गायां तु मृतो मर्त्यो मोक्षं स्वर्गं च विन्दति ॥
क्षितौ तारयते मर्त्यान्नागां(१)स्तारयतेऽप्यधः ।
ऊर्ध्वं तारयते देवांस्तेन सा त्रिपथा स्मृता ॥ इति ।

इति पूर्वार्धः ।



(१) 'स्तारयतीह्यधः' घ० ।

॥ श्रीः ॥

सटीके निर्णयसिन्धौ

तृतीयपरिच्छेदोत्तरार्धे श्राद्धप्रकरणम् ।

नानानिबन्धवैमत्यभ्रान्तचित्तोद्दिधीर्षया ।
कमलाकरसंज्ञेन क्रियते श्राद्धनिर्णयः ॥

तत्स्वरूपमाह पृथ्वीचन्द्रोदये मरीचिः—

प्रेतं पितॄंश्च निर्दिश्य भोज्यं यत्प्रियमात्मनः ।
श्रद्धया दीयते यत्र तच्छ्राद्धं परिकीर्तितम् ॥

*ब्राह्मणस्वीकारान्तश्चतुर्थ्यन्तपदोपनीतपित्राद्युद्देश्यकस्त्यागः श्राद्धमित्यर्थः । तत्र यद्यपि होमपिण्डभो-

---

श्राद्धलक्षणं परिष्कुरुते—*ब्राह्मणेति । एतच्च तर्पणवारणाय, तत्र विप्रस्वीकाराभावात् । न तु त्यागाभावात्, 'इन्द्र ऊर्ध्वो अध्वर' इतिवद् द्रव्यदेवतासंयोगेन त्यागस्य तत्रापि कल्पनीयत्वात् । 'न मम' इत्यभिलापस्तु नास्ति, आचाराभावात । यत्रैव यागाग्निहोत्रादौ तदाचारस्तत्रैव तन्मूलतया श्रुतिः कल्प्यते, न सर्वत्र । अत एव भूतबल्यादावपि न तदभिलापः । मानसस्तु त्यागः सर्वत्रैवाविशिष्टः । न च तर्पणे देवतैव नास्ति, "देवतास्तर्पयति" इत्याश्वलायनादिभिर्देवतापदेनैव तदुक्तेः । अ(१)ङ्गपदं च विप्रस्वीकारस्य श्राद्धस्वरूपघटकतावारणार्थम् , "पितरो देवता ब्रा(२)ह्मणास्त्वाहवनीयार्थे" इत्यादिनाऽऽपस्तम्बादिभिराहवनीयाधिकरण-

---

(१) 'अन्तपदं' मूले । (२) 'ब्राह्मणस्तु' ङ०।

जनानि प्रधानमिति हेमाद्रिः,—

होमश्च पिण्डदानं च तथा ब्राह्मणभोजनम् ।
श्राद्धशब्दाभिधेयं स्या*देकस्मिन्नौपचारिकम् ॥

इति श्रीधरश्च, तथापि*क्वचिद्विशेषं वक्ष्यामः । *निमित्तभेदे भोजनस्य पिण्डानां वा निषेधो न प्राधान्यं विरुणद्धि *असोमयाजिनो दधिपयोयागवत् । यच्च शूलपाणिः—

नित्यश्राद्धमदैवं स्यादर्घ्यपिण्डविवर्जितम् ।

इति हारीतीये नित्यश्राद्धमधादौ पिण्डनिषेधोऽस्ति ।

कहोमवत्यक्तद्रव्यप्रतिपत्तित्वव्यञ्जनात् । 'ब्राह्मणस्वीकारान्त' इति त्वशुद्धं, पिण्डदानस्यात(१)थात्वे प्राधान्यापत्तेः । इष्टापत्तौ 'पिण्डानां निषेधो न प्राधान्यम्' इति ग्रन्थासङ्गतेः उपनी(२)तत्वं च देवतात्वव्यञ्जकमात्रं न तु लक्षणघटकं, व्यर्थत्वात् । मृतोद्देश्य-(३)कत्वं विवक्षितम् । जीवच्छ्राद्धे दे(४)वताश्राद्धे च श्राद्धपदं गौणं कुण्डपाय्यग्निहोत्रपदवत् । श्राद्धत्वस्य व्यासज्यवृत्तित्वमुपेत्याह—*एकस्मिन्निति । *क्वचिदिति । पिण्डदानविप्रभोजनयोः प्राधान्यम्, फलसम्बन्धात् । न त्वङ्गीकरणस्य 'सोमाय पितृमते' इति(५) मन्त्रगतपितृपदस्याग्निष्वात्तादिपरत्वात्तेषामे(६)व वोद्देश्यतावच्छेदकत्वेऽप्यनुद्देश्यत्वात्, फलासम्बन्धाच्च । तयोश्च क्वचिद्वयोः क्वचिदेकतरस्यानुष्ठानमित्यत्र तु ऋषिवचांस्येव मानम् । एवं कुतः श्रा(७)द्धस्य व्यासज्यवृत्तित्वमव्यासज्यवृत्तित्वे बाधकाभावात् । ननु भोजनादेरपि प्राधान्यमनुपपन्नं तथात्वे तन्निषेधानुपपत्तेरित्यत आह—*निमित्तेति । *असोमेति । 'नासोमयाजी सन्नयेत्' इति प्रधानस्यापि नित्यस्य वैधसान्नाय्यस्य

---

(१) 'तथात्वेनाप्राधा' घ० ङ० । (२) 'नीतत्वान्तं च' ख० घ० ।
(३) 'मृतोद्देश्यत्वम' घ० । (४) 'देवश्राद्धे च' घ० ।
(५) 'इति मन्त्रस्थगत' ङ० । (६) 'मेव मृतानामेव वोद्देश्य' घ० ।
(७) 'श्राद्धत्वस्य' घ० ।

नच प्राप्तिं विना सः । नचातिदेशं विना प्राप्तिः । नचाङ्गत्वेन विनातिदेशः प्रधानस्यानतिदेशात् । *सममे उपकारकत्वेनातिदेशोक्तेः । तेन भोजनं प्रधानम्, पिण्डोऽङ्गम्। पिण्डदानमात्रविधिस्त्वङ्गभूतात्कर्मान्तरमेव, *प्रकरणान्तरन्यायादिति, तन्न;

जातश्राद्धे न दद्यात्तु पक्वान्नं ब्राह्मणेष्वपि ।
न पक्वं भोजयेद्विप्रान्सच्छूद्रोपि कदाचन ॥

इत्याद्यैर्जातश्राद्धशूद्रश्राद्धादौ भोजनस्य निषेधेना-

सोमयागाभावनिमित्तको यथा निषेधस्तथा विपालाभादिनिमित्तको भोजनस्य भर(१)ण्यादिनिमित्तकश्च पिण्डदानादेर्निषेध इत्यर्थः । *सममे इति । यः पदार्थो यादृशोपकारद्वारा यदङ्गत्वेनावधारितः, तस्य पदार्थस्य तत्सम्बन्धित्वेन रूपेण तादृशोपकारद्वारैवान्याङ्गतावोधकं प्रमाणमतिदेशः । यथा "प्रकृतिवद्विकृतिः कर्त्तव्या"इत्यादि । तच्च प्रयाजादिपदार्थानां यादृशोपकारद्वाराऽऽग्नेयाद्यङ्गत्वावधारणं, तेषामाग्नेयादिसम्बन्धित्वेन तादृशोपकारद्वारैव सौर्याद्यङ्गत्वबोधकम् । *प्रकरणान्तरेति । कौण्डपायिनामयने "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति"इत्यादौ । अत्र जुहोतिना दूरस्थस्यापि कर्मणः उपस्थित्या तदनुवादेन मासादिरूपगुणविधिः । (उपा(२)देयवदनुपादेयस्यापि तादृशकर्मानुवादेन विधाने बाधकाभावादिति प्राप्ते सर्वस्य प्रवर्तकस्य विधेः) धात्वर्थनि(३)ष्ठत्वेन कृतिविषयत्वरूपमुपादेयत्वं प्रमाणत्वाच्चाज्ञातज्ञाप्यत्वरूपं विधेयत्वं च प्रमेयम् । एवं च मासस्यानुपादेयत्वाद्धात्वर्थ एवोपादेयत्वं तत्सामानाधिकरण्याच्च विधेयत्वमिति विहितस्य विधानायोगाद्भेदः, प्रकृतेऽपि पुनर्विधानाद्भेद इत्यर्थः ।

---

(१) 'भरण्यादिपिण्डनिमित्तकश्च' ख० ।
(२) धनुश्चिह्नान्तर्गतं नास्ति ख० ।
(३) 'नित्यत्वेन' ख० ।

क्रत्वापत्तेः;*'न तौ पशौ करोति' इतिवदुपजीव्यविरोधेन विकल्पापत्तेश्च । *तेन श्राद्धशब्दाभिधेयत्वेनोभयप्राप्तौ निषेधः पर्युदासो वा *'दीक्षितो न ददाति न जुहोति' 'नासोमयाजी सन्न(१)येत्' इतिवदिति तत्त्वम् ।

धर्मप्रदीपेऽपि—

*यजुषां पिण्डदानं तु बह्वृचानां द्विजार्चनम् ।
श्राद्धशब्दाभिधेयं स्यादुभयं सामवेदिनाम् ॥

त(२)च 'पितॄन् यजेत, पितृभ्यो दद्यात्' इत्युभयप्रयोगदर्शनाद्यागदानोभयात्मकम् । 'पितरो देवता' इति

नैते पक्षनिषेधाः किन्त्वामादिविध्यर्थवादा इत्युक्तावप्याह—*न तावितिं । तौ आज्यभागौ शास्त्रीयौ, प्राप्तिमुपजीव्य निषेधे तस्या अत्यन्तबाधासम्भवाद्विकल्पः । *तेन पिण्डदानादेरनङ्गत्वेन । नह्यातिदेशिकयेव प्राप्तिर्निषेधस्य पर्युदासस्य वोपजीव्या किन्त्वन्याहृश्यपीत्यत्र दृष्टान्तमाह—*दीक्षित इति । नित्यानां क्रत्वर्थानां च दानानां दानपदार्थत्वेन नित्यानामग्निहोत्रहोमादीनां काम्यानां चतुर्होतृहोमादीनां च होमपदार्थत्वेन प्राप्तौ दीक्षितस्य निषेधः । न चायं निषेधः दानहोमादिपदार्थगोचर इति कथमत्यन्तबाधो विकल्पविरहश्चेति वाच्यम्, दानहोमादिविधयः पुरुषार्थाः, निषेधस्तु प्रकरणात् क्रत्वन्यभिचारिदीक्षितसम्बन्धाच्च क्रत्वर्थः इति भिन्नविषयतया ईदृशविषये पुरुषार्थानामेव दीक्षितातिरिक्तपरताकरणात् ।

*यजुषामिति । पिण्डदानमात्रप्राधान्यवादिनां निषिद्धपर्युदस्तपिण्डदानके, विप्रभोजनमात्रप्राधान्यवादिनां तु निषिद्धपर्युदस्तविप्रभोजनके, प्रधानासत्त्वादङ्गमात्रमनुष्ठेयं स्यादत उभयमा वा-

---

(१) 'सन्नयेत् इति तत्त्वम्' क० ।
(२) धर्मप्रदीपस्थवचनं च ।

पित्रुद्देश्यकत्वाद्यागत्वं, *विप्रापेक्षया च दानत्वमित्यविरुद्धम् । एतेन नायं यागः । (देव(१)तोद्देशेन त्यागो यागः) यागोद्देश्या च देवतेत्यात्माश्रयादिति गौडमतमपास्तम् । वैधशब्दविशेषोद्देश्यत्वस्य तस्य इदमिति*स्वत्वारोपप्रतियोगित्वस्य वा देवतात्वात् । तत्रैव सुमन्तुः—

*श्राद्धात्परतरं नान्यच्छ्रेयस्करमुदाहृतम् ।

आदित्यपुराणे—

न सन्ति पितरश्चेति कृत्वा मनसि यो नरः ।
श्राद्धं न कुरुते तत्र तस्य रक्तं पिबन्ति ते ॥

तद्भेदानाह विश्वामित्रः—

नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम् ।
पार्वणं चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम् ॥
कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम् ।
यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम् ॥ इति ।

न्यसिद्धिस्तद्वादिनां प्रोक्तानिष्टाप्रसक्तेरित्यर्थः । *विप्रेति ।

देशे काले च पात्रे च श्रद्धया विधिना च यत् ।
पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम् ॥

इति वचनात् । विप्राणां पितॄणां च स्वत्वसत्त्वासत्त्वयोरपि कर्मण एकत्वात् । *स्वत्वेति । स्वत्वप्रतियोगित्वेनेच्छाविषयत्वमर्थः । तादृशेच्छायां स्वत्वारोपो बीजं, स्वीकाराभावेन स्वामित्वबाधात् ।

श्राद्धं त्रिविधम्—काम्यं नित्यं नैमित्तिकं च । कामनोपाधौ चोदितं काम्यम् । जीवनोपाधौ चोदितं नित्यम् अहरहमावास्यादौ । अनियतनिमित्तकं उपरागादौ । तत्र श्राद्धस्य काम्यत्वं नित्यत्वं नैमित्तिकत्वं च क्रमेणाह—*श्राद्धादिति ।

---

(१) कंसान्तर्गतं नास्ति क० ।

एषां लक्षणानि भविष्ये—

अहन्यहनि यच्छ्राद्धं तान्नित्यमिति कीर्तितम् ।
वैश्वदेवविहीनं तदशक्तावु*दकेन तु ॥
एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ।
तदप्यदैवं कर्तव्यमयुग्मान्भोजयेद्द्विजान् ॥
*कामाय विहितं काम्यमभिप्रेतार्थसिद्धये ।
वृद्धौ यत्क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते ॥
गन्धोदकतिलैर्मि(१)श्रं कुर्यात्पात्रचतुष्टयम् ।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥
ये समाना इति द्वाभ्यामेतज्ज्ञेयं सपिण्डनम् ।
*नित्येन तुल्यं *शेषं स्यादे*कोद्दिष्टं *स्त्रिया अपि ॥

*एतदुभयमेव स्त्रियाः । तेन स्त्रीकर्तृकं स्त्रीसंप्रदानकं चेत्युभयनियम इति कल्पतरुः ।

---

*उदकं नित्यतर्पणम् ।

*कामायेति । नक्षत्रादौ । *नित्येनेति । *शेषम् अङ्गजातम् । सपिण्डीकरणस्योभयरूपत्वादेकोद्दिष्टांशे पार्वणांशे च क्रमेणा(२)नावश्यकर्त्तव्यत्वेनैकोद्दिष्टेन पार्वणेन च तुल्यं स्यादित्यर्थः । *एकोद्दिष्टं सपिण्डीकरणम् । *स्त्रियाः मातुः । मतमाह—*एतदिति । स्त्रिया अपीति स्त्रीशब्दः षष्ठ्यन्तः चतुर्थ्यन्तश्चेत्याशयः । एकोद्दिष्टं सपिण्डनं तदन्यैकोद्दिष्टान्यतरत् । अत्र स्त्रीकर्तृकं स्त्रीसंप्रदानकं वा एकोद्दिष्टमेवेति न नियमः, कर्तृसंप्रदान(३)योरन्यश्राद्धनिवृत्तिप्रसङ्गात् । नाप्येकोद्दिष्टं स्त्री(४)कर्तृकमेव स्त्रीसंप्रदानकमेव वेति, एकोद्दिष्टस्य पुरुषकर्तृसंप्रदानकत्वनि-

---

(१) 'युक्तम्' क० च० ।
(२) 'क्रमेण नित्येनावश्य' घ० ङ० ।
(३) 'संप्रदानयोः स्त्रियोरन्यश्राद्ध' घ० ङ० ।
(४) 'स्त्रीकर्तृकपदं स्त्रीसम्प्रदान' ङ० ।

*अमावास्यां यत्क्रियते तत्पार्वणमिति स्मृतम्।
क्रियते वा पर्वणि यत्तत्पार्वणमिति स्थितिः॥
*अत्र प(१)र्व—
चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा।
पर्वाण्येतानि राजेन्द्र रविसंक्रमणं तथा॥
इति विष्णुपुराणोक्तं संक्रान्त्यादि।
गोष्ठ्यां यत्क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते।
बहूनां विदुषां संपत्सुखार्थं पितृतृप्तये॥
क्रियते शुद्धये यत्तु ब्राह्मणानां तु भोजनम्।
शुद्ध्यर्थमिति तत्प्रोक्तं वैनतेय मनीषिभिः॥
*निषेककाले सोमे च सीमन्तोन्नयने तथा।
ज्ञेयं पुंसवने चैव श्राद्धं कर्माङ्गमेव च॥
*देवानुद्दिश्य यच्छ्राद्धं तत्तु दैविकमुच्यते।

वृत्तिप्रसङ्गात्। एतेन स्त्रीकर्तृसंप्रदानकमेकोद्दिष्टमेवेत्याद्यपास्तमित्यरुचिः।

*अमेति। अमायां पर्वशब्दः शक्तः। वाशब्दसङ्गतयेऽन्यत्र गौणीमाह—*अत्रेति। पार्वणशब्दो योगरूढः। तत्र योगो दर्शितः—

त्रीनुद्दिश्य च यत्तद्धि पार्वणं मुनयो विदुः।

इति कण्ववचनात्त्रिपुरुषोद्देश्यकत्वे रूढिः। आब्दिकादौ पार्वणपदं गौणं, कौण्डपाय्यग्निहोत्रपदवत्।

*निषेकेति श्रौतस्मार्तकर्मोपलक्षणम्।
इष्टापूर्तादिके श्राद्धे वृद्धिश्राद्धवदाचरेत्।
इत्यादिवचोनिचयश्चाग्रे विस्तृतः।
*देवानिति। (२)तच्च द्वादश्याम्,

---

(१) 'पर्वम्' क०।
(२) 'एतच्च द्वादश्याम्' घ०।

*गच्छन्देशान्तरं यस्तु श्राद्धं कुर्यात्तु सर्पिषा ॥
यात्रार्थमिति तत्प्रोक्तं*प्रवेशे च न संशयः ।
*शरीरोपचये श्राद्धमर्थोपचय एव च ॥
पुष्ट्यर्थमेतद्विज्ञेयमौपचायिकमुच्यते ॥
*गोष्ठ्यां श्राद्धकर्तृसमुदाये संभूय सामग्रीसंपादने (श्रा(१)द्धमित्यर्थः)। *युगपत्तीर्थादिप्राप्तौ विदुषां अ

देवानुद्दिश्य क्रियते यत्तद्दैविकमुच्यते ।
तन्नित्यश्राद्धवत्कुर्याद् द्वादश्यादिषु यत्नतः ॥
इति विश्वामित्रोक्तेरिति माधवः। श्राद्धसागरे च—
उत्पातादिनिमित्तेषु नित्यश्राद्धं तु दैविकम् ।
देवाँस्तूद्दिश्य विश्वादीन्प्रदद्याद्विप्रभोजनम् ॥

इति नैमित्तिकं दर्शितम् । *गच्छन्निति । तीर्थयात्रारम्भ इदम् । *प्रवेशे यात्रानन्तरगृहप्रवेशे । *शरीरेति । शरीरोपचयार्थमेषजादेरर्थोपचयार्थकृष्यादेश्च प्रयोगात् पूर्वमिति श्राद्धसागरकृतः । शरीराद्युपचयहेतुशान्त्यादाविन्यन्ये । *गोष्ठ्यामिति । बहूनां विदुषां गोष्ठ्याम् इति योजना । *युगपदिति । तीर्थश्राद्धादेर्युगपत्कर्तव्यतया प्राप्तौ भिन्नपाकाशक्तौ विदुषामित्यान्वयः । पृथक् पाकासम्भवे सम्पदा सम्भूय सामग्रीसंपादनेन यत्सुखं तदर्थम् । एवञ्च—

गोष्ठ्यां यत् क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते ।
पार्वणेन विधानेन तदप्युक्तं खगाधिप ॥

इति भविष्ये पार्वणपदमेकोद्दिष्टस्याप्युपलक्षणम् , तैर्थादेः पार्वणैकोद्दिष्टरूपत्वात् । अत्रास्मच्छब्देन सम्बन्धोल्लेखपूर्वकं स्वपित्रादिगणमुल्लिख्य अमुकशर्मणोऽमुकगोत्रस्येत्याद्यन्यपित्रादिगणमुल्लिखेत् । तत्क्रमेणैव श्राद्धप्रयोगं च समापयेत्, श्राद्धस्य गोष्ठ्यां वार्त्तायां क्रियमाणायां तज्जनितोत्साहेन क्रियमाणं श्रा

---

(१) कंसान्तर्गतं नास्ति क०।

द्धसंपदा सुखार्थं भिन्नपाकाशक्तौ बहुपित्रुकश्राद्धमेकः कुर्यादिति कल्पतरुः शङ्खधरश्च । *शुद्धिश्राद्धं प्रायश्चित्ताङ्गमिति मैथिलाः । अत्र पार्वणैकोद्दिष्टवृद्धिसपिण्डीकरणात्मकं चतुर्विधमेव मुख्यम् । तस्यैवायं प्रपञ्चः ।

द्धम् (१)तच्चोक्तवाक्यात् सपत्नीकापितृपार्वणमेव सपत्नीकमातामहपार्वणसहितम्, 'पितरो यत्र पूज्यन्ते' इति वचनादिति रघुनाथादयः । *शुद्धीति । मदनमहार्णवे—

तेषामनुज्ञया सर्वप्रायश्चित्तमुपक्रमे
विधाय वैष्णवं श्राद्धं साङ्कल्पं निजकाम्यया ।
धेनुं दद्याद् द्विजेभ्योऽथ दक्षिणां च स्वशक्तितः ॥ इति ।

तेषां ब्राह्मणानाम् । सर्वप्रायश्चित्तमित्ययमपि सर्वप्रायश्चित्तविधिः । उपक्रमे प्रायश्चित्तोपक्रमे । विष्णुमुद्दिश्य साङ्कल्पमपिण्डकं श्राद्धं, पूजापूर्वकं चतुरादियुग्मान् ब्राह्मणान् भोजयेत्, आमादिकं वा दद्यात् । सभ्यानां च धेनूर्ब्रह्मदण्डत्वेन दक्षिणा च श्राद्धाङ्गत्वेनेति तदर्थः । इदं तु बोध्यम्, दार्शं प्रकृत्य मन्वादिषु धर्मपाठात्तस्य प्रकृतित्वम्, अन्येषां विकृतित्वम् । 'अथातः पार्वणश्राद्धे काम्ये आभ्युदयिके एकोद्दिष्टे वा' इत्याश्वलायनसूत्रानुसारिणां चत्वारि श्राद्धानि प्रकृत्य धर्माम्नानाच्चतुर्णामपि समानविधानतैव । यच्च कात्यायनस्तम्बसत्याषाढसूत्रेषु कृष्णपक्षश्राद्धं प्रकृत्य धर्माम्नानं तदष्टकादीन् (२)प्रति प्रकृतित्वार्थं "तस्य मासि श्राद्धेन कल्पो व्याख्यातः" इति आपस्तम्बादिसूत्रात् । न्यायेन सर्वश्राद्धप्रकृतित्वे प्राप्ते एतत्सूत्रस्य परिसङ्ख्यार्थत्वात् । एतत्सूत्रपरिसंख्यातेषु वार्षिकादिश्राद्धेषु तेषामपि दर्शश्राद्धमेव प्रकृतिः । दर्शश्राद्धस्य सर्वश्राद्धप्रकृतित्वे च वार्षिकादौ कृष्णोक्तपार्वणनाम्ना—

---

(१) 'गोष्ठीश्राद्धं तच्चोक्तवाक्यात्' घ० ।
(२) 'प्रतिकृतित्वार्थं ख० ।

अथ श्राद्धदेशाः । मनुः—

*शुचिदेशं विविक्तं तु गोमयेनो(१)पलेपयेत् ।
*दक्षिणाप्रवणं चैव*प्रयत्नेनोपपादयेत् ॥

पृथ्वीचन्द्रोदये विष्णुधर्मे—

दक्षिणाप्रवणे देशे*तीर्थादौ च गृहेपि वा ।
*भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्प्रयत्नतः ॥

तत्रैव प्रभासखण्डे—

तीर्थादष्टगुणं पुण्यं स्वगृहे ददतः शुभे ।

भारते—

तस्य देशाः कुरुक्षेत्रं गया गङ्गा सरस्वती ।

सपिण्डीकरणात्पूर्वमेकोद्दिष्टं सुतः पितुः ।
ऊर्ध्वं पार्वणवत्कुर्यात् प्रसन्नमितरेण तु ॥

इति लौगाक्षिवाक्याद्वा दर्शविध्यन्तातिदेशः, न तु श्राद्धपदात् । अमाश्राद्धे तदितरश्राद्धे च तच्छब्दस्योक्तोपाधिना मुख्यत्वात् ।

*शुचीति । सर्वकर्माङ्गतया प्राप्तानुवादः । *दक्षिणाप्रवणं दक्षिणतो निम्नम् । *प्रयत्नेनेति । स्वतो दक्षिणाप्रवणत्वासत्त्वे खननादिना तत्संपादनार्थम् । *तीर्थम् ऋषिदेवतादिसेवितं जलं पुण्याश्रमादि च, तीर्थमित्यनुवृत्तौ(२)"ऋषिजुष्टजले क्षितौ" (अ० को०३-३-८६) इति कोशात् । आदिना (३)देवालयादि । प्रयत्नतो भूसंस्कारादीत्यन्वयः । भूसंस्कारो मार्ज(४)-

---

(१) गोमयेनोपलिप्यं च क० च० ।

(२) यद्यप्यत्र सर्वेषु पुस्तकेषु 'क्षितौ' इत्येव पाठ उपलभ्यते तथापि अमरकोशे 'गुरौ' इत्युपलम्भात् लोके गुरौ तीर्थशब्दस्य प्रयोगोपलब्धेश्च 'गुरौ' इति पाठः सुन्दर इति प्रतिभाति ।

(३) 'देवालयादि । एतेन काश्याद्यन्तस्तीर्थे आहृत्य वचनानुपलम्भेपि श्राद्धस्य कर्तव्यतासिद्धिः' घ० ।

(४) 'मार्जनोपलेपादि' घ० ।

प्रभासं पुष्करं चेति तेषु श्राद्धं महाफलम् ॥

स्कान्दे—

तुलसीकाननच्छाया यत्र यत्र भवेद्द्विज ।
तत्र श्राद्धं प्रदातव्यं पितॄणां तृप्तिहेतवे(१) ॥

नादि । तथाच याज्ञवल्क्यः—

भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा ।
सेकादुल्लेखनाल्लेपाद् गृहं मार्जनलेपनात् ॥ इति ।

मार्जनं मार्जन्या पांसुतृणादेः प्रोत्सारणम् । दाहः तृणादिना । कालः यावता कालेन लेपादिक्षयस्तावान् । गोक्रमणं गोपादपरिघट्टनम् । सेकः क्षीरगोमूत्रगोमयवारिभिः प्रवर्षणं च । उल्लेखनं तक्षणं खननं वा । अत एव यमः—

खननात्पूरणाद्दाहादद्भिर्घर्षणलेपनात् ।
गोभिराक्रमणात्कालात्भूमिः शुध्यति सप्तधा ॥ इति ।

लेपः गोमयादिना । एतैर्व्यस्तैः (२)समस्तैर्वा अमेध्या दुष्टा मलिना च भूः शुध्यति । अमेध्यादिभूमिं चाह देवलः—

यत्र प्रसूयते नारी म्रियते दह्यतेऽपि वा ।
चाण्डालाध्युषितं यत्र यत्र विष्ठादिसङ्गतिः ॥
एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्त्तिता ।
श्वशूकरखरोष्ट्रादिसंस्पृष्टा दुष्टतां व्रजेत् ॥
अङ्गारतुषकेशास्थिभस्माद्यैर्मलिना भवेत् ॥ इति ।

शुद्धिविभागमाह देवलः—

पञ्चधा वा चतुर्धा वा भूरमेध्या विशुध्यति ।
दुष्टान्विता त्रिधा द्वेधा शुध्यते मलिनैकधा ॥

यत्र मनुष्यदाहश्चण्डालादिवासो वा तत्र दाहादिपञ्चभिः(३)शुद्धिः । यत्र मानुषादिप्रसवः, तन्मृतिः, विष्ठादिसङ्गतिर्वा; तत्र

---

(१) 'तृप्तये द्विज'क० । (२) 'समस्तै' नास्ति ख० । (३) 'शुध्यति' ङ० ।

माधवीये श्राद्धोपक्रमे व्यासः—

महोदधौ प्रयागे च काश्यां च कुरुजाङ्गले ।

शङ्खः—

गङ्गायमुनयोस्तीरे पयोष्ण्यमरकण्टके ।
नर्मदा बाहुदातीरे भृगु(१)लिङ्गे हिमालये ॥
गङ्गाद्वारे प्रयागे च नैमिषे पुष्करे तथा ।
सन्निहत्यां गयायां च दत्तमक्षय्यतां व्रजेत् ॥
अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः ।
गयाशीर्षे वटे श्राद्धं यो नो दद्यात्समाहितः ॥

दाहवर्जितैस्तैरेव शुद्धिः । श्वशूकरखरैरुषितायास्तु गोक्रमणादिभि त्रिभिः । उष्ट्रग्रामकुक्कुटादिभिरुषितायास्तु गोक्रमणं विना द्व भ्याम् । अङ्गारादियुक्तायास्तु उल्लेखनमात्रेणेत्यर्थः । मार्ज नानुलेपने तु सर्वत्र । एवञ्च गृहस्य तत्र पृथगुपादानं प्रतिदिव प्राप्त्यर्थम् । सशवगृहशुद्धिं वक्ष्यति-'गृहशुद्धिं प्रवक्ष्यामि'इत्यादिना

प्रसङ्गाद्द्रव्यशुद्धिरुच्यते । याज्ञवल्क्यः—

सौवर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनाम् ।
शाकरज्जुमूलफलवासोविदलचर्मणाम् ॥
पात्राणां चमसानां च वारिणा शुद्धिरिष्यते ।

अब्जं मुक्ताफलशुक्तिशङ्खादि । ऊर्ध्वपात्रं यज्ञियोलूखला दि । ग्रहचमसवासांसि प्रसिद्धानि । आश्मं दृषदादि । शाव वास्तूकादि । रज्जु बल्वजादिनिर्मिता । मूलम् आर्द्रकादि फलम् आम्रादि । विदलं वैणवादि तद्विकारं छत्रादि च । चर्म अजादेः, तद्विकारं वरत्रादि च । पात्राणि प्रोक्षण्यादीनि । एष लेपरहितानामुच्छिष्टस्पर्शमात्रे वारिणा क्षालनाच्छुद्धिः । तथ चादित्यपुराणे—

---

(१) 'भृगुतुङ्गे' क० ।

सुवर्णरूप्यशंखाश्ममणिमुक्तिरत्नमयानि च ।
कांस्यायस्ताम्ररैतानि त्रपुसीसमयानि च ॥
निर्लेपानि च शुध्यन्ति केवलेन जलेन तु ॥

मनुः—

निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति ।
अब्जमश्ममयं चैव राजतं चानुपस्कृतम् ॥

अनुपस्कृतम् अखातपूरितम् उत्कीर्णरेखाद्यनुपेतं च । सलेपानां तु मनुः—

तैजसानां मणीनां च सर्वस्याश्ममयस्य च ।
(१)भस्मनाऽद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः ॥

मृद्भस्मनोरेककार्यत्वाद्विकल्पः, अपां समुच्चयः । हारीतः—"अद्भिः काञ्चनराजताब्जशुक्तीनां तद्गुणा(२)वर्जनस्नेहवैवर्ण्योपहतानां यवगोधूमकुलत्थमसूरमुद्गभस्मगोमयचूर्णैर्धावनम्, अम्ललवणाभ्यां ताम्राणां, भस्मना कांस्यानां, शणासितलेन सिकताघर्षणैः कार्ष्णायसानाम्, शिलाघर्षणमार्जनैर्मणिमयानाम्" इति । तद्गुणा गन्धादयस्तेषामवर्जनं सम्बन्धः, उच्छिष्टस्नेहादिना जातं वैवर्ण्यं च, तेनोपहतानाम् । काकादिमुखोपघाते तु शङ्खः-'कृष्णशकुनिमुखावमृष्टं पात्रं निर्लिखेत् श्वापदमुखावमृष्टं न प्रयुञ्जीत' । निर्लेखः तक्षणम् । श्वापदो मार्जारभिन्नः,

मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः ।

इति स्मृतेः । योगीश्वरः-'चरुस्रुवसस्नेहपात्राण्युष्णेन वारिणा' । चरुः चरुस्थालः । स्रुक्स्रुवौ प्रसिद्धौ । सस्नेहपात्राणि प्राशित्रहरणादीनि । इदमपि निर्लेप एव, उक्तमानत्वात् । स एव—

स्फ्यशूर्पाजिनधान्यानां मुसलोलूखलानसाम् ।

स्फ्यः काष्ठखड्गः । अनः शकटम् । शेषं प्रसिद्धम् । उष्णेन वारिणेति वर्त्तते । कांस्यपात्रे उच्छिष्टलेपे चापस्तम्बः—

(१) 'अश्मना' ख० । (२) 'वर्तन' ङ० ।

गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च ।
शुध्यन्ति दशभिः क्षारैः श्वकाकोपहतानि च ॥

दशभिः आवर्त्तितैः । आदित्यपुराणे—

शूद्रोच्छिष्टानि शोध्यानि त्रिधा क्षाराम्लवारिभिः ।

क्षारादिभिर्दशकृत्वो मार्जनं बोध्यम् । शङ्खः—

ब्रह्मक्षत्रविशां चैव सकृत्सम्मार्जनाच्छुचिः ।
चतुर्थेन तु यद्भुक्तं चतुर्भिस्तत्र मार्जनम् ॥
अग्नौ प्रक्षिप्य गृह्णीयाद्धस्तौ प्रक्षाल्य यत्नतः ।
गोशृङ्गेण तु संस्पृष्टं तत्पात्रं शुचितामियात् ॥

कांस्यपात्रे त्वङ्गिराः—

गण्डूषं पादशौचं च यः कुर्यात्कांस्यभाजने ।
षण्मासं भुवि निक्षिप्य पुनराकारमादिशेत् ॥

पुनराकारः पुनःकरणम् । भूनिक्षेपः पृथक्शोधकः । तं दोषानुसारेण सप्ताहादि भुवि खात्वोद्धृत्य भस्मादिना मार्जनच्छुद्धिरिति लभ्यते । स्मृत्यन्तरे—

लोहानां दहनाच्छुद्धिर्भस्मना गोमयेन च ।
दहनात्खननाद्वाऽपि शैलानामम्भसापि वा ॥
काष्ठानां तक्षणाच्छुद्धिर्मृद्गोमयजलैरपि ॥

यदि तैर्न शुध्येत तदा तावन्मात्रच्छेदनं दाहो वा । सर्वत्राछिन्नदग्धयोः शुध्यभिधानं दुर्लभोत्तमविषयम् । दरिद्रस्यानुत्तष्वपि मृद्भाण्डानामल्पोपहतौ याज्ञवल्क्यः-'पुनःपाकान्महीयम्' इति । सलेपप्रकरणे योगीश्वरः—

तक्षणं दारुशृङ्गास्थां गोवालैः फलसम्भुवाम् ।
मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि ॥

शृङ्गाणि मेषमहिषादेः । अस्थीनि करिवराहादेः । अस्थिपदेन दन्तानामपि ग्रहः । उच्छिष्टस्नेहादिलिप्तानां मृद्भस्मोदकादिनाऽनपगतलेपानाम्—

यावन्नापैत्यमेध्यक्तो गन्धो लेपश्च तत्कृतः ।
तावन्मृद्वारि वा देयं सर्वासु द्रव्यशुद्धिषु ॥

इति सामान्यशुद्ध्युक्तेः । तक्षणं तावन्मात्रस्यापनयनम् । फलसम्भवां बिल्वनारिकेलादिफलोद्भूतानां पात्राणां गोवालैरुद्घर्षणे शुद्धिः । यज्ञकर्मणि प्रयुज्यमानानां यज्ञपात्राणां स्रुक्स्रुवादीनां दक्षिणेन हस्तेन दर्भैः दशापवित्रेण वा यथाशास्त्रं मार्ज(१)नम् । श्रौतमुदाहरणमन्येषामपि सौवर्णादिपात्राणां स्मार्त्ते लौकिके च कर्मणि कृतशौचानामेवाङ्गत्वमिति दर्शयितुम् । संहतपात्रे तु हारीतः—

संहतानां तु पात्राणां यद्येकमुपहन्यते ।
तस्यैव शोधनं प्रोक्तं सामान्यद्रव्यशुद्धिकृत् ॥

मृद्भाण्डे त्वाह मनुः—

मद्यैर्मूत्रपुरीषैश्च ष्ठीवनैः पूयशोणितैः ।
संस्पृष्टं नैव शुध्येत पुनःपाकान्महीमयम् ॥

एतैः संस्पृष्टं महीमयं पुनःपाकान्नैव शुध्येत, तस्य त्यागः कार्य इत्यर्थः । धान्यादेश्चण्डालादिस्पर्शे तु पराशरः—

चण्डालाद्यैस्तु संस्पृष्टं धान्यं वस्त्रमथापि वा ।
प्रक्षालनेन शुध्येत परित्यागान्महीमयम् ॥

याज्ञवल्क्यः—

प्रोक्षणं संहतानां च बहूनां धान्यवाससाम् ।

संहतानां राशीकृतानां धान्यानां वाससां च । वासःपदमुक्तशुद्धीनामुपलक्षणम् । अयमर्थः—धान्यानि वस्त्रादीनि वा बहूनि राशीकृतानि तत्र चण्डालादिभिः स्पृष्टानि अल्पानि, बहून्यस्पृष्टानि, तत्र स्पृष्टानामुक्तैव शुद्धिः, अस्पृष्टानां तु प्रोक्षणमिति । बहु(२)त्वं स्पृष्टापेक्षया ।

---

(१) 'मार्जनम् । इदं श्रौतमुदाहरणमपि' ङ० ।
(२)बहुत्वं चाऽत्रादि धान्यादि' ङ० ।

वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे ।
तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति ॥

इति स्मृतेः । शेषम् असमुद्धृतं प्रोक्षणाच्छुध्यतीति भावः । यत्र तु स्पृष्टानां बहुत्वमस्पृष्टानामल्पत्वं तत्राह मनुः—

अद्भिस्तु प्रोक्षणं प्रोक्तं बहूनां धान्यवाससाम् ।
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ॥ इति ।

स्पृष्टानां समत्वे तु प्रोक्षणम्, बहूनां प्रोक्षणविधानेनाल्पेषु क्षालने सिद्धे पुनरल्पानां क्षालनोक्तेः समेषु क्षालननिवृत्त्यर्थत्वात् । इयत्स्पृष्टमियदस्पृष्टमित्यविवेके तु क्षालनमेव पाक्षिकस्यापि दोषस्य परिहर्त्तव्यत्वात् । अनेकपुरुषोद्धार्याणां तु धान्यवासःप्रभृतीनां स्पृष्टानामस्पृष्टानां च प्रोक्षणमेव । अल्पधान्ये बौधायनः—

व्रीहयः प्रोक्षणादद्भिः शाकमूलफलानि च ।
तन्मात्रस्यापहाराद्वा निस्तुषीकरणेन वा ॥

बहुधान्ये तु काश्यपः—'प्रोक्षणपर्यग्निकरणावगाहनैः व्रीहियवगोधूमानां, विमर्शनप्रोक्षणैश्च फलीकृतानां, निर्घर्षदलनप्रोक्षणैः शमीधान्यानाम्' इति । अनेकपुरुषोद्धार्याणां व्रीह्यादीनां प्रोक्षणादिभिस्त्रिभिः । पर्यग्निकरणं परितोऽग्न्यभिमर्शः, अवगाहः क्षालनम् । अत्र यथायथमल्पत्वमहत्त्वाभ्यां व्यवस्था । विमर्शनं पाणिभ्यां निर्मलकरणम् अल्पदोषे, महति तु प्रोक्षणम् । (१)(शमीधान्यानि मुद्गादीनि । एकपुरुषोद्धार्याणां निर्घर्षः, अल्पानां दलनम्, अनेकपुरुषोद्धार्याणां प्रोक्षणम्)। 'तण्डुलांस्तु परित्यजेत्' इति तु अत्यन्ताल्पपरिमाणपरम् । आदित्यपुराणे—

गृहदाहे समुत्पन्ने दग्धे च पशुमानुषे ।
अभोज्यस्तद्गृतो व्रीहिर्धातुद्रव्यस्य सङ्ग्रहः ॥
मृन्मयेनावबद्धानामधोभुवि च तिष्ठताम् ।
यवमाषातिलादीनामदोषं मनुरब्रवीत् ॥

---

(१) कोष्ठकान्तर्गतं नास्ति ख० ।

ततःसंक्रममाणेऽग्नौ स्थाने स्थाने (१)च दह्यते ।
न च प्राणिवधो यत्र केवलं गृहदीपनम् ॥
तत्र द्रव्याणि सर्वाणि गृह्णीयादविचारयन् ॥

ज्ञवल्क्यः—

त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः ।
भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु ॥

भृ(२)तीनि प्रसिद्धानि तेषामुपघातानुरोधेन क्षारोदअम्लोदकेन वारिणा च सम(३)स्तैर्वा । ताम्रपदेन रीतिकानेहयोर्ग्रहः, एकयोनित्वात् । एतच्च ताम्रादीनामम्लोदकादिउच्छिष्टलेपाद्यपगमसम्भवे । अनेनैव शुद्धिरिति न नियमः,

मलं संयोगजं यस्य येन येनोपहन्यते ।
तस्य तच्छोधनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृत् ॥

वेशेषोक्तेः । एवञ्च ताम्रादेरुच्छिष्टादिलेपस्यान्येनापगमवेऽम्लाद्यनुपादानेऽपि न दोषः,

ताम्रायःकांस्यरौप्याणां त्रपुणः सीसकस्य च ।
शौचं यथार्हं कर्त्तव्यं क्षाराम्लोदकवारिभिः ॥

सामान्यतो ऽप्यभिधानात् ।

भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति ।

इत्यादिकमपि शुद्धेः(४) परां काष्ठां वक्तुमेव, न त्वन्यनिषेधा। उपघातातिशये तु अम्लोदकादेरादृत्तिः । 'गवाह्नातानि'इक्रम्य 'दशभिः क्षारैः' इत्युक्तेः । 'द्रवस्य द्रवद्रव्यस्य घृतादेः प्रमाणाधिकस्य श्वकाकाद्युपहत(५)स्य अमेध्यसंस्पृष्टद्रवस्य च प्लावनं सजातीयद्रव्येण भाण्डपूरणं तन्निस्सरणं यावत्कार्यम्'

१)'स्थले' ख० घ० । (२)'प्रभृतीनि सर्वाणि प्रसिद्धानि' ङ० । ३)'समस्तैर्व्यस्तैर्वा' ङ० । (४) 'शुद्धः प्रकारान्तरं वक्तु' ख० ५) । 'हतस्य च' ङ० ।

इति मिताक्षरा। वस्त्रान्तरिते पात्रे प्रक्षेपः प्लावनमिति मयूखः ततोऽल्पस्य त्यागः। देशकालापेक्षयाऽपि बहुत्वम्।

देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्॥

इति बौधायनोक्तेः। सौवर्णराजतादीनां सर्वेषामेवामेध्यो हतानां शुद्धिमाह याज्ञवल्क्यः—

अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धादिकर्षणात्।

अमेध्याः मलाः। ते च द्वादश,

वसाशुक्रमसृङ्मज्जामूत्राविट्कर्णविस्रवाः।
श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः॥

तथा—

मानुषास्थिशवं विष्ठा रेतो (१)मूत्रार्त्तवं वसा।
स्वेदाश्रुदूषिकाश्लेष्म मध्यं चामेध्यमुच्यते॥ इति।

गन्धापकर्षणान्ता शुद्धिः। आदिना लेपग्रहः, 'लेपगन्धकर्षणैः शौचमप्यलिप्तस्य' इति गौतमोक्तेः। (स(२)र्वाशुचि प्रथमतो मृत्तोयैरेव लेपगन्धयोरपकर्षणम्, अशक्तौ अन्येन, "तद्धिः पूर्वं मृदा च" इति गौतमोक्तेः)। वसादिग्रहणं च सर्वेषामध्यत्वमूचकं न तु समानोपघातार्थम् 'मद्यैर्मूत्रपुरीषैश्च'इति समानोपघातविशेषाभिधानात्। अमेध्यत्वं चैतेषां देहाच्च्युतानामेव स्वस्थानस्थानाम्, 'देहाच्चैव मलाश्च्युताः' इति विशेषोक्तेः। पुनस्य नाभेरूर्ध्वं करातिरिक्तानामङ्गानामन्यामेध्यस्पर्शे स्नानम्,

मानुषास्थिवसां विष्ठामार्त्तवं मूत्ररेतसी।
मज्जानं शोणितं स्पृष्ट्वा परस्य स्नानमाचरेत्॥
तान्येव स्वानि संस्पृश्य प्रक्षाल्याचम्य शुध्यति॥

इति देवलोक्तेः।

ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते।
तत्र स्नानमधस्ताच्च प्रक्षाल्याचम्य शुध्यति॥

(१) 'मूत्रार्तवे' ङ०। (२) कंसान्तर्गतं नास्ति ख०।

इति देवलोक्तेः । मूत्राद्युपघाते बौधायनः—

'तैज(१)सानां मूत्रपुरीषशुक्रासृक्कुणपमद्यैरत्यन्तोपहतानामावर्त्तनम्, अल्पसंसर्गे परिलेखनम्, स्पर्शमात्रे त्रिःसप्तकृत्वो भस्मना मार्जनम् । अतैजसानामेवम्भूतानामुत्सर्गः । स्मृत्यन्तरे—

भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते ।
सुरामूत्रपुरीषैस्तु शुध्यते तापलेखनैः ॥
ताम्रमम्लेन शुध्येत न चेदाग्निषलेपनम् ।
आग्निषेण तु यल्लिप्तं पुनर्दाहेन शुध्यति ॥

शङ्खः—

सूतिकोच्छिष्टभाण्डस्य सुरामद्यहतस्य च ।
त्रिःसप्तमार्जनाच्छुद्धिर्न तु ताम्रस्य (२)तापनम् ॥ इति ।

सूतिकोच्छिष्टाद्युपहतानां सप्तभिर्यवगोधूमादिचूर्णैः प्रक्षेकं त्रिर्मार्जनाच्छुद्धिरित्यर्थः । प्रतिमार्जनमुदकं बोध्यम् । बौधायनः—'कांस्यमिश्रतैजसानामल्पो(३)पघाते मार्जनं तापनं च' । कांस्ये तु न तापनं कार्यं, किन्तु क्षालनं मार्जनं चेत्यर्थः । अधिकोपहतानां तु स्मृत्यन्तरे—

सूतिकासवविण्मूत्ररजस्वलाहतानि च
प्रक्षेप्तव्यानि तान्यग्नौ यथावत्संदहेदपि ॥ इति ।

तैजसानां मूत्राद्युपघाते पुनःकरणं गोमूत्रे वा सप्तरात्रं परिवासनम् । कांस्यमिश्रतैजसानां लेपनिर्हरणाशक्तौ पुनः करणं,पुनःकरणाशक्तौ गोमूत्रवासः । लेपानां केषाञ्चिल्लेपापकर्षकमाह याज्ञवल्क्यः—

सौवीरुदकगोमूत्रैः शुद्ध्यत्याविककौशिकम् ।
सश्रीफलैरंशुप(४)ट्टमरिष्टैः कुतपं तथा ॥ (२–१८३)

ऊषः क्षारमृत्तिका, आविकम् ऊर्णामयं, कौशिकं

(१) 'तैजसाम्' ङ० । (२) 'भाजनम्' ख० ।
(३) अन्योपघाते' ख० ।
(४) 'पट्टसारिष्टैः कुभणम्' ङ० ।

कोशभवं तसरीपट्टादि, अंशुपट्टं वल्कलतन्तुकृतं, कुत(१)पः पार्वतच्छागरोमकृतः कम्बलः, अरिष्टः फेनिलः। उदकगोमूत्रैरिति वर्त्तते। उदकपदं पश्चादप्युदकप्राप्त्यर्थम्। बहुवचनमिदम(२)धिकोच्छिष्टलेपादियोगे। (३)अल्पोपघाते तु देवलः—

और्णकौशेयकृतपट्टक्षौमदुकूलजाः।
अल्पशौचा भवन्त्येते शोषणप्रोक्षणादिभिः॥ इति।
तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः।
धान्यकल्कैस्तु फलजै रसैः क्षारानुगैरपि॥ इति।

क्षौमवदेव शाणस्य, समानयोनित्वात्। और्णेति तूलिकादिप्राप्त्यर्थम्,

तूलिका(४)मुपधानं च पुष्परक्ताम्बराणि च।
शोषयित्वा नयेत्किञ्चित्करैः सम्मार्जयेन्मुहुः॥
पश्चाच्च वारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि।
तान्येवातिमलिनानि यथावत् परिशोधयेत्॥

इति देवलोक्तेः। पुष्परक्तानि कुङ्कुमकुसुम्भादिरक्तानि। पुष्पग्रहणं हरिद्रादिरक्तस्य क्षालनासहस्य प्राप्त्यर्थं न माञ्जिष्ठादेः, तस्य क्षालनसहत्वात्। अत एव शङ्खः—'रागद्रव्याणि प्रोक्षितानि शुचीनि' इति। अल्पशौचा इति, क्षालनासहत्वात्। सर्वत्र द्रव्याविनाशेनैव शुद्धेरिष्टत्वात्। स्मृत्यन्तरे—'अहतानां प्रोक्षणम्' इति। यन्त्रनिर्मुक्तनूतनवाससां प्रोक्षणाच्छुद्धिरित्यर्थः। याज्ञवल्क्यः—

सगौरसर्षपैः क्षौमं पुनःपाकान्महीमयम्।

क्षुमा अतसी तत्सूत्रनिर्मितं क्षौमं गौरसर्षपसहितैरुदकगोमूत्रैः, उच्छिष्टस्नेहलिप्तं मृन्मयं पुनःपाकेन शुध्यति।

प्रचेताः—'चैलानामुच्छेदनं(५)गन्धलेपानपगमने तन्मात्रच्छे-

(१) 'कुभणः' ङ०। (२) 'इदमधिकोपघाते' ङ०।
(३) 'योगे संघाते' ख०। (४) 'तूलिकाद्युपधानं' ङ०।
(५) 'गन्धलेपानपनयने' ङ०।

दनं कर्त्तनं वाससामभ्युक्षणात्' इति । शयनासनगतानां वस्त्राणां तु संहतवच्छौचमाह देवलः—

शयनासनयानादिदेहबन्धानि यानि च ।
वस्त्राण्येतानि सर्वाणि संहतानि प्रचक्षते ॥ इति ।

प्रोक्षणमिति भावः । मनुः—

चैलवच्चर्मणां शुद्धिर्विदलानां तथैव च ।
शाकमूलफलानां तु धान्यवच्छुद्धिरिष्यते ॥

स्मृत्यन्तरे—'वरित्रचर्मचामरवल्कलानां चैलवच्छुद्धिः' । सिद्धान्ते तु मनुः—

पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् ।
केशकीटैर्दूषितं च मृत्प्रक्षेपेण शुद्ध्यति ॥

गवाघ्रातं गोनिःश्वासोपहतम्, अवधूतम् उपरिवसनादिना पक्षिभिर्भक्षित्वा उत्क्षिप्य त्यक्तं च । याज्ञवल्क्यः—

गोघ्रातेऽन्ने तथा केशपक्षिकाकीटदूषिते ।
सलिलं भस्म मृद्वाऽपि प्रक्षेप्तव्यं विशुद्धये ॥

अन्नम् अदनीयमात्रम् । केशपदं लोमोपलक्षणम् । कीटाः पि(१)पीलिकादयः । 'सहपाके तु नित्यमभोज्यं केशकीटावपन्नम्' इति गौतमं द्रष्टव्यम् । वसिष्ठः—

देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च ।
काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विवर्जयेत् ॥
तन्मात्रमन्नमुद्धृत्य शेषं संस्कारमर्हति ॥

देवद्रोणी देवयात्रा । प्रकृतेषु अवश्यंभाविपर्वोत्सवेषु । विशेषमाह पराशरः—

पक्वं द्रोणाधिकं त्वन्नं श्वकाकाद्युपघातितम् ।
ग्रासमुद्धृत्य तन्मात्रं यत्तु लालाकृतं भवेत् ॥
हेमोदकेन वाऽभ्युक्षेत् राजतेनाम्बुनाऽथवा ।

(१) 'पिपीलिकादयः' ख० ।

अग्निज्वालोपसंस्पर्शात्सुवर्णमधुसर्पिषा ॥
विप्राणां ब्रह्मघोषेण पूतं भोज्यं च तद्भवेत् ॥

द्रोणः पञ्चाशदधिकपलशतद्वयम् । अल्पान्ने तु जमदग्नि
अन्नमेकाहिकं पक्वं श्वकाकाद्युपघातितम् ।
केशकीटावपन्नं च तदप्येवं विशुध्यति ॥
क्रीतस्यापि विधिर्दृष्ट एवमेव मनीषिभिः ।

संस्कारे तु वसिष्ठः—

द्रवाणां प्लावनेनैव घनानां प्रोक्षणेन च ।
छागेन मुखसंस्पृष्टमन्नं तच्छुचितामियात् ॥

घनाः पर्पटवटकादयः । द्रवाणां गोरसानाम् ,
श्रपणं घृततैलादेः प्लावनं गोरसस्य च ।
भाण्डानि क्षालयेदद्भिः शाकमूलफलानि च ॥

इति शङ्खोक्तेः । चकाराद् घृततैलयोरपि प्लावनम् टाघुपहतस्य तूत्पवनम् । तच्च वस्त्रान्तरितपात्रे प्रक्षेपः, अ तदपगमासम्भवात् । तथा च मनुः—

द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम् । इति ।

शूद्रभाण्डास्थितस्य तु मधूदकादेः पात्रान्तर(१)नयनाच्छु "मधूदके पयस्तद्विकाराश्च पात्रात्पात्रान्तरे नयनाच्छुद्धाः" बौधायनोक्तेः । पात्रात् शूद्रपात्रात् । तथा—

आधारदोषे तु नयेत्पात्रात्पात्रान्तरद्रवम् ।

मधुघृतादेर्वर्णापसदहस्तात्प्राप्तस्य पात्रान्तरानयनं पुनः (२) च कार्यम् , "अभ्यवहार्याणामनेनाभिधारितानां पुनःपच स्नेहानां स्नेहवद्रसानाम्" इति शङ्खोक्तेः । तथा—

घृतं च पायसं क्षीरं तथैवेक्षुरसो गुडः ।
शूद्रभाण्डस्थितं तक्रं तथा मधु न दुष्यति ॥

---

(१) 'पात्रान्तरानयनात्' ङ० ।
(२) 'तत्र' ङ० ।

पायसं पयोजन्यं दधि । यमोऽपि—

छागमांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः ।
म्लेच्छभाण्डस्थितास्तस्मान्निष्क्रान्ताः शुचयः स्मृताः ॥

बौधायनः—

देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम् ।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत् ॥

विष्णुः—

मृत्पर्णतृणकाष्ठानां श्वभिश्चाण्डालवायसैः ।
स्पर्शने विहितं शौचं सोमसूर्यांशुमारुतैः ॥

तथा—प्रोक्षणेन पुस्तकम् । योगीश्वरः—

रश्मिरग्नी रजश्छाया गौरश्वो वसुधाऽनिलः ।
विप्रुषो मक्षिका स्पर्शे, वत्सः प्रस्रवणे शुचिः ॥

रश्मिः सूर्यादेः । अग्न्यादयो नव प्रसिद्धाः । चाण्डालादिस्पर्शे चाशुचिः । रजः अजाद्यसम्बन्धि । तत्र—

श्वकाकोष्ट्रखरोलूकसूकरग्राम्यपक्षिणाम् ।
अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीयते ॥

इति दोषस्मरणात् । प्रस्रवणम् ऊधोगतक्षीराकर्षणम् । वत्सपदं बालस्यापि ग्रहार्थम् ,

बालैरनुपरिक्रान्तं नित्यं मेध्यमिति स्थितिः ।

इति स्मृतेः । तथा—

शुचिरग्नी रजो वायुरापो दधि घृतं पयः ।
सर्वाण्येतानि मेध्यानि स्पर्शे छाया च नित्यशः ।

छाया तु चण्डालादेरन्या,

चण्डालपतितच्छायास्पर्शे दुष्टा तनुर्भवेत् ।

इति ब्राह्मात् । रजोऽपि रासभादेरन्यत् ,

रेणवः शुचयः सर्वे वायुना ये समीरिताः ।
अन्यत्र शूकराजाविश्वरासभविमार्जनात् ॥

'विमार्जनी' इति पाठे पञ्चमी (१)त्यागश्छान्दसः ।

देवलः—

अदुष्टा सन्तता धारा वातोद्धूताश्च रेणवः ।
स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन ॥
दधिसर्पिःपयःक्षौद्रभाण्डे दोषो न विद्यते ।
मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः ॥

मार्जारः कर्मकालादन्यत्र शुचिः, तत्र स्पर्शे तु स्नानमिति ।

याज्ञवल्क्यः—

वाक्शस्तमम्बुनिर्णीतमज्ञातं च सदा शुचिः ।

कृतेऽपि शौचे यदि मनसोऽपरितोषात्संदेहस्तदेदं शुद्धमस्त्वि-ति विप्रवचनेन शुचिः । यत्र च शुद्धिर्न विहिता तस्य क्षालनं, क्षालनासहस्य प्रोक्षणम् । अज्ञातं यत्काकादिनोपहतं तदपि शुचि ।

संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तम ।
अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः ॥

इति प्रायश्चित्तं तु भक्षणविषयं न त्वन्योपयो(२)गविषयम् ।

कारुहस्तः शुचिः पण्यं भैक्ष्यं योषिन्मुखं तथा ।

कारवः रजकसूपकाराद्याः तत्साध्ये कर्मणि वस्त्रधावने सूतकादावपि तद्धस्तः शुचिः । तथा च स्मृत्यन्तरे—

कारवः शिल्पिनो वैद्या दासीदासास्तथैव च ।
राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्त्तिताः ॥ इति ।

पण्यं विक्रेयं यवव्रीह्यादि । अनेककेतृजनस्पृष्टमपि वणिजां सूतकादावपि च नाशुद्धम् । भैक्ष्यं ब्रह्मचर्यादि(३)गतम् । अना-चान्तस्त्र्यादिदत्तमशुचिरथ्याक्रमणादिनापि दुष्टं न तु चण्डाला-दिस्पृष्टम् । सम्भोगकाले योषिन्मुखं शुचि, 'स्त्रियश्च रतिसंसर्गे'

(१) 'पाठः' ख० ।
(२) 'भोग' ङ ।
(३) 'गतं' नास्ति ङ० ।

इति स्मृतेः । तथा—

नित्यमास्यं शुचिः स्त्रीणां शकुनेः फलपातने ।
प्रस्रावे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः ॥
नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् ।
ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्मृतम् ॥

याज्ञवल्क्यः—

अजाश्वं मुखतो मेध्यं न गोर्न नरजा मलाः ।
पन्थानश्च विशुध्यन्ति सोमसूर्यांशुमारुतैः ॥

अजाश्वयोर्मुखं मेध्यम् । न गोर्मुखं मेध्यम् । नरजा नरदेहजाता मला वसादयो न मेध्याः । पन्थानो राजमार्गाः चाण्डालादिस्पृष्टा अपि रात्रौ सोमांशुमारुताभ्यां दिवा च सूर्यांशुमारुताभ्यां (१)शुद्धाः ।

मुखजा विप्रुषो मेध्यास्तथाऽऽचमनबिन्दवः ।
श्मश्रु चास्यगतं दन्तसक्तं त्यक्त्वा ततः शुचिः ॥
च्युतेऽप्यास्यावबद्धान्निगिरन्नेव तच्छुचिः ।

मुखजाः श्लेष्मबिन्दवः मेध्याः नोच्छिष्टाः । अङ्गे निपतिता न चेत्, "न मुख्या विप्रुष उच्छिष्टं कुर्वन्ति, नचेदङ्गे प(२)तन्ति" इति गौतमोक्तेः । एवमाचमनबिन्दवः पादे गता अपि नोच्छिष्टाः । श्मश्रु चास्ये मुखे गतं प्रविष्टं नोच्छिष्टम् । दन्तसक्तमन्नादि स्वयमेव च्युतं त्यक्त्वा शुचिः, अच्युतं दन्तसमं 'दन्तश्लिष्टेषु दन्तवदन्यत्र जिह्वाभिमर्शनात्प्राक् च्युतेः' इति गौतमोक्तेः । निगिरन्नेवेत्येवकारेण—

चर्वणे त्वाचमेन्नित्यं भुक्त्वा ताम्बूलचर्वणम् ।
ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय च ॥

इति आचमननिषेधः । ताम्बूलमुपदंशं फलादेरुपलक्षणम्,

ताम्बूले च फले चैव भुक्तस्नेहावशिष्टके ॥
दन्तलग्नस्य संस्पर्शे नोच्छिष्टो भवति द्विजः ॥

(१) 'शुद्धिः' ख० । (२) 'निपतन्ति' ङ०

इति शातातपात्। देवलः—

आत्मशय्याऽऽसनं वस्त्रं जायाऽपत्यं कमण्डलुः।
शुचीन्यात्मन एतानि परेषामशुचिर्भवेत्।
पादौ शुची ब्राह्मणस्य अजाश्वानां मुखं शुचिः॥
गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषिताम्।

तथा—

उपस्पृश्याशुचिस्पृष्टं तृतीयं चापि मानवः।
हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुद्ध्यति॥

प्रथमोऽशुचिस्तत्स्पृष्टो द्वितीयः, तत्स्पृष्टस्तृतीयः, तत्स्पर्शे आचमनमात्रं न चतुर्थादौ, मानाभावात्।

शातातपः—

'शिशोरभ्युक्षणं प्रोक्तम्' इत्याद्युक्तमनुपतीतधर्मे याज्ञवल्क्यः—

स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे।
आचान्तः पुनराचामेद्वासो विपरिधाय च॥

वसिष्ठः—

"रुदित्वा वान्तः पुनराचामेत्"।

मनुः—

सुप्त्वा क्षुत्वा च भुक्त्वा च ष्ठीवित्वोक्त्वाऽनृतं वचः।
पीत्वाऽऽपोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन्॥ इति।

एतच्च अल्पानृतोक्तौ। भोजने त्वादावपि द्विराचमनम्, 'भोक्ष्यमाणस्तु प्रयतो द्विराचामेत्' इत्यापस्तम्बात्। स्नानपानयोरादौ सकृत्। अध्ययने त्वादावन्ते च द्विराचमनम्।

योगी—

रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः।
मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि च॥

रथ्यादिगतगोमयशर्करादिलाभार्थं बहुवचनम्। पक्वेष्टकादिभिश्चितानि गृहाणि च। एवकारेण प्रोक्षणनिवृत्तिः। तृणकाष्ठप-

*एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥

आदित्यपुराणे—

पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
महानद्याः पश्चिमेन यावद् गृध्रेश्वरो गिरिः ॥
उत्तरे ब्रह्मयूपस्य यावद्दक्षिणमानसम् ।
एतद् गयाशिरो नाम त्रिषु लोकेषु विश्रुतम् ॥ इति ।

शूलपाणौ बृहस्पतिः—

गङ्गायां धर्मपृष्ठे च सरसि ब्रह्मणस्तथा ।
गयाशीर्षेऽक्षयवटे पित्रर्णां दत्तमक्षयम् ॥

र्णादिमयानां तु अन्त्यादिस्पर्शे प्रोक्षणमिति दिक् । आदिनाऽशुचिद्रव्यापसारणम् ।

जघान दानवौ विष्णुः पूर्वं तु मधुकैटभौ ।
वृत्रं महेन्द्रश्च ततः पृथिवी मेदसा वृता ॥
तस्माच्छ्राद्धे पञ्चगव्यैर्लेप्या शोध्या तथोल्मुकैः ।
गौरमृत्तिकया कीर्णा प्रकीर्णा तिलसर्षपैः ॥

इति ब्रह्माण्डे । उल्मुकैरिति समन्ततः उल्मुकनिधानमप्युक्तम्, वराहकृतश्राद्धमधिकृत्य ब्राह्मे—

दंष्ट्रयोद्धृत्य च महीमभ्युक्ष्य सलिलेन च ।
धर्मोद्भवेनोपलिप्य कुशैरुल्लिख्य तां पुनः ॥
परिणीयोल्मुकेनैनां पर्युक्ष्य च पुनः पुनः ॥

इति परकृतिसरूपार्थवादात् । ध(१)र्मोद्भवं गोमयम् । *तीर्थादिति(२) । तीर्थमपेक्ष्य तैर्थ्यश्राद्धं गृहे अधिकफ(३)लदमित्यर्थः । विष्णुधर्मे तीर्थमात्रस्य श्राद्धनिमित्तत्वोक्तावपि कुरुक्षेत्राद्युपादानं तत्र तस्यावश्यकत्वार्थम् । *एष्टव्या इति । गयाश्राद्ध-

(१) 'धर्मोद्भवं गोमयं' नास्ति घ० (२) अस्य मूलं १३२८ पृष्ठे द्रष्टव्यम् । (३) 'अधिकफलम्' ख०

धर्मारण्यं धर्मपृष्ठं धेनुकारण्यमेव च ।
दृष्ट्वैतानि पितॄंश्चार्चेन्नवंशान्विंशतिमुद्धरेत् ॥

त्रिस्थलीसेतौ वायवीये—

*शमीपत्रप्रमाणेन पिण्डं दद्याद् *गयाशिरे ।
उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥

सप्तगोत्राणि तु—

पिता माता च भार्या च भगिनी दुहिता तथा ।
पितृमातृष्वसा चैव सप्त गोत्राणि वै विदुः ॥ इति एषां गोत्राणामेकोत्तरशतं कुलं पुरुषा इत्यर्थः । ते चोक्तास्तत्रैव—

तत्त्वानि विंशति *नृपा द्वादशैकादशा दश ।
अष्टाविति च गोत्राणां कुलमेकोत्तरं शतम् ॥

तत्त्वानि चतुर्विंशतिः । ते च द्वादश पूर्वा द्वादश्च पराः । एवमग्रेपि । प्रयोगपारिजाते पाद्मे—

शालग्राममयी मुद्रा संस्थिता यत्र कुत्रचित् ।
वाराणस्या यथाधिक्यं समन्ताद्योजनत्रयम् ॥

तथा—

यत्किंचित्पैतृकं कुर्यात्सपिण्डं वा *तदन्तिके ।
विष्णुलोकं स गच्छेत्तु लभते शाश्वतं पदम् ॥

तत्रैव वाराहे—

म्लेच्छ(१)देशे शुचौ वापि चक्राङ्को यत्र तिष्ठति ।
योजनानां तथा त्रीणि मम क्षेत्रं वसुंधरे ॥

स्यात्यावश्यकत्वार्थम् । गयाशिरआदीनां चाधिकतरत्वम् । *शमीपत्रेति कैमुसन्यायेन । *गयाशिरे इति । शिरशब्दोऽन्तः । *नृपाः षोडश । *तदन्तिके शालग्रामशिलान्तिके ।

(१) 'म्लेच्छदेशे' इत्येष श्लोको नास्ति ख० छ०

चक्राङ्क(१)स्य तु सान्निध्ये यत्कर्म क्रियते नरैः ।
स्नानं दानं तपः श्राद्धं सर्वमक्षयतां व्रजेत् ॥

अथ निषिद्धदेशाः । पृथ्वीचन्द्रोदये स्कान्दे—

त्रिशङ्कोर्वर्जयेद्देशं सर्वं द्वादशयोजनम् ।
*उत्तरेण महानद्या दक्षिणेन तु कीकटान् ॥
देशस्त्रैशङ्कवो नाम श्राद्ध(२)कर्माणि वर्जितः ।

वायवीये—

प्रणष्टाश्रमधर्माश्च देशा वर्ज्याः प्रयत्नतः ।

यमः—

रूक्षं कृमिहतं *क्लिन्नं *संकीर्णानिष्टगन्धिकम् ।
देशं त्वनिष्टशब्दं च वर्जयेच्छ्राद्धकर्मणि ॥

तत्रैव शङ्खः—

*गोगजा(३)श्वादिजुष्टेषु *कृत्रिमायां तथा भुवि ।
न कुर्याच्छ्राद्धमेतेषु परक्यासु च भूमिषु ॥

यमः—

परकीयप्रदेशेषु पितॄणां निर्वपेत्तु यः ।
तद्भूमिस्वामिपितृभिः श्राद्धकर्म विहन्यते ॥

ब्राह्मभारतयोरपि—

परकीयगृहे यस्तु स्वान्पितॄंस्तर्पयेद्यदि ।

---

*उत्तरेणेति । महानद्याः फल्ग्वा उत्तरेण दक्षिणेन च द्वादशयोजनं कीकटो नाम त्रैशङ्कवो देशः ।

कीकटेषु गया पुण्या नदी चैव पुनःपुना ।

इत्यादिस्त्वपवादः । *क्लिन्नम् आर्द्रम् सपङ्कमिति यावत् । *संकीर्णं बहुभिर्व्याप्तम् । *गवित्यादि दृष्टान्तः । भूमित उच्चत्वादिना सादृश्यम् । तत्रोपविश्य सङ्कल्पादेर्वा निषेधः । *कृत्रि-

---

(१) 'चक्राङ्गस्य' क०
(२) 'श्राद्धकर्मविवर्जितः' क० छ०
(३) 'गोगजाश्वादिपृष्ठेषु' क० छ०

तद्भूमिस्वामिनस्तस्य हरन्ति पितरो बलात् ॥

*अग्रभागं ततस्तेभ्यो दद्यान्मूल्यं च जी(१)वितम् ।

*श्राद्धार्हाणामग्रभागं श्राद्धं, *तदनर्हाणां शूद्राणां तु मूल्यमिति केचित् । *षोडशीपिण्डेऽबान्धवानामपि पिण्डोक्तेः, 'येऽबान्धवा बान्धवा वा' इत्यादितर्पणबाधापत्तेश्च नामगोत्रपूर्वं श्राद्धनिषेधो नान्यत्रेति गौडाः । विप्रासुतस्य शूद्रापुत्रश्राद्धनिषेधो*नान्यत्र । अग्रदानं चान्नत्यागात्पूर्वं कार्यमिति मैथिलाः । तन्न, अग्रभागस्य श्राद्धपरत्वे मानाभावात् । अन्नदाने च *निषेधाभावात्(?) । *त्यागात्पूर्वं करणेऽनङ्गेन व्यवधानापत्तेः । अङ्गत्वे च मानाभावात् । *इदं च स्वाम्यनुज्ञाऽभावे । तदुक्तं तत्रैव ब्राह्मे-

स्वनुलिप्तेषु गेहेषु स्वेष्वनुज्ञापितेषु च ।

मायाम् वेदिकाअट्टालिकादौ । *अग्रभागमिति । स्वसत्तां विना श्राद्धस्य दुष्करत्वात्तत्संपत्तये जीवनरूपं प्रथमतो मूल्यं दद्यादित्यर्थः । मतान्युत्थापयति-*श्राद्धार्हाणामिति । चकारस्य व्यवस्थितविकल्पार्थत्वादित्याशयः । *तदनर्हाणामिति ।

न ब्राह्मणेन कर्त्तव्यं शूद्रस्याप्यौर्ध्वदैहिकम् ।

इति निषेधात् शूद्राणां श्राद्धनिषेधं परिष्करोति-*षोडशीति । *नान्यत्रेति ।

शूद्रेण वा ब्राह्मणस्य विना पारशवात् क्वचित् ।

इत्युत्तरार्द्धे पारशवे कर्तृत्वस्य प्रतिप्रसूतत्वान्न तद्विरोधः । *निषेधादिति ।

श्राद्धं दित्सुर्न कस्मैचित्प्रदद्यात्प्रथमं नरः ।

इत्यादिनिषेधादित्यर्थः । दूषणान्तरमाह-*त्यागादिति । *इदमिति आपाततः । अन्यदेशीयानां नित्यस्य तदेशीयानां नित्यादे-

---

(१) 'जीवनम्' क० ।

आद्धमेतेषु दातव्यं वर्ज्यमेतेषु नोच्यते ॥
किरातेषु कलिङ्गेषु कौ(१)ङ्कणेषु खसेष्वपि।
सिन्धोरुत्तर(२)कूलेषु नर्मदायाश्च दक्षिणे ॥
पूर्वेण करतोयाया न देयं श्राद्धमुच्यते।

इदं काम्यविषयम्। अन्यथा तत्रत्यानां सर्वश्राद्धाकरणापत्तेः। नर्मदादक्षिणेऽपवादः स्कान्दे—

सह्यस्य चोद्भवो यत्र यत्र गोदावरी नदी।
पृथिव्यामपि कृत्स्नायां स प्रदेशोऽतिपावनः ॥

परकीयत्वापवाद आदित्यपुराणे—

अटवी पर्वताः पुण्या नदी तीराणि यानि च।
सर्वाण्यस्वामिकान्याहुर्नहि तेषु परिग्रहः ॥
वनानि गिरयो नद्यस्तीर्थान्यायतनानि च।
देवखाताश्च गर्ताश्च न स्वाम्यं तेषु विद्यते ॥

स्मृतिसारे—

*नैकवासा न च द्वीपे नान्तरिक्षे कदाचन।
श्रुतिस्मृत्युदितं कर्म न कुर्यादशुचिः क्वचित् ॥

रिव काम्यस्यापि निषेदुधुमशक्यत्वात्। किन्तु भ्रमप्राप्तस्य तीर्थश्राद्धस्यान्यदेशीयानां काम्यस्य चायं निषेधः। (३)शङ्खादिदेशनिषेधोप्येवम्।) *नैकवासा इति। पारिभाषिकमप्येकवासो वर्ज्यम्,

सव्यादंसात्परिभ्रष्टमम्बरं यस्तु धारयेत्।
एकवस्त्रं तु तं विद्याद्दैवे पित्र्ये च वर्जयेत् ॥

इति देवलोक्तेः। नैत्यकानां सकलनिषेधानामिदमुपलक्षणम्। म्लेच्छदेशलक्षणं व्रतहेमाद्रौ विष्णुः—

चातुर्वर्ण्यव्यवस्थानं यत्र देशे न विद्यते।
स म्लेच्छदेशो विज्ञेय आर्यदेशस्ततः परः ॥ इति।

---

(१) 'कोङ्कणेषु' क० (२) 'भागेषु' क० (३) कंसान्तर्गतं नास्ति ङ०

दिवोदासीये-

म्लेच्छदेशे तथा रात्रौ संध्यायां विप्रवर्जिते ।
न श्राद्धमाचरेद्विद्वान्न चा*काशे कथंचन ॥

अथ श्राद्धकालाः । ते च संक्रान्तियुगादिमहालयादयः प्रायेण पूर्वपरिच्छेदद्वये उक्ता एव । कचित्त्वुच्यन्ते । पृथ्वीचन्द्रोदये बृद्धपराशरः—

श्राद्धं बृद्धाव*चन्द्रेभच्छायाग्रहणसंक्रमे ।
*नवोदके नवान्ने च *नवच्छन्ने तथा गृहे ॥
नवैक्षवेषु चेहन्ते पितरो हि मघास्वपि ।
पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ॥

इति शातातपपाठः । नवोदकं नवकूपवाप्यादाविति केचित् । वर्षोपक्रमे आर्द्राप्रवेशे इति गौडाः । नवान्न श्राद्धे विशेषो ज्योतिषे-

ज्येष्ठ*शेषा(१)र्धगे सूर्ये मृगनेत्रानिशात्मके ।
नवान्ने*भोजन(२)श्राद्धं जन्मचन्द्रतिथौ न च ।
आश्लेषाकृत्तिकाज्येष्ठामूला(३)जपदगेषु च ।
गुरुभौमदिनं रिक्ता तिथौ*नाद्यान्नवौदनम् ॥

---

*आकाशोऽट्टालिकादिरनावृतः ।

परिश्रिते शुचौ देशे दक्षिणाप्रवणे तथा ।

इति याज्ञवल्क्यवाक्येपि परिश्रितः परित आच्छादितः ।

*अचन्द्रः दर्शः । *नवोदके तीर्थोदके इत्यप्याहुः । *नवच्छन्ने नवसंपादिते इत्यप्याहुः । *शेषार्द्धे उत्तरार्द्धे । *भोजनश्राद्धं सङ्कल्पश्राद्धम् । तथा च ज्येष्ठोत्तरार्द्धं विहाय नवान्नश्राद्धं सांकल्पं कुर्यादित्यर्थः । *नाद्यादिति । नवौदनश्राद्धशेषभोजननिषेधस्तु

(१) 'ज्येष्ठशेषागत' क० ख०
(२) 'भोजयेच्छ्राद्धम्' क०
(३) 'मूलाजपदकेषु च । भृगुभौमदिने' क०

तत्रैव-

वृश्चिके शुक्लपक्षे तु नवान्नं शस्यते बुधैः ।

अतः कृष्णपक्षे नेति गौडाः । मैथिलास्तु

अकृताग्रयणं चैव धान्यजातं नरोत्तम ।

इति वाराहोक्तेः प्रतिधान्यं श्राद्धमाहुः । तन्न, जातपस्य श्राद्धयोग्यसमूहपरत्वात् । हेमाद्रौ जातूकर्ण्यः-

ग्रहो(१)परागे च सुते च जाते
पित्र्ये गयायामयनद्वये च ।
नित्यं च शङ्के च तथैव पद्मे
दत्तं भवेन्निष्कसहस्रतुल्यम् ॥

शङ्खं प्राहुरमावास्यां क्षीणचन्द्रां द्विजोत्तमाः ।

अष्ट(२)कासु भवेत्पद्मं तत्र दत्तं तथाऽक्षयम् ॥

तत्रैव शङ्खः—

यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च
पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम् ॥

याज्ञवल्क्यः—

*अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम् ।
द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः ॥
व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्ययोः ।
श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्तिताः ॥

श्राद्धनिषे(३)धार्थः । *अमावास्येत्यादि । अष्टकाशब्दः कर्मनामयमपि तदधिकरणकालपरः, पूर्वोत्तरतिथ्योरुपलक्षणं च । अमावास्याष्टकाकृष्णपक्षव्यतीपातगजच्छायानां मुख्यकालत्वं द्रसंक्रान्तिद्रव्यादिसंपत्ग्रहणरुचीनां निमित्तभूतानां तदुपलक्षण-म । नन्वस्यां स्मृतौ न कालानालिङ्गितश्राद्धविधिः येन तद्विहितं

(१) 'एष श्लोको नास्ति क० छ०
(२) 'अष्टकासु' क० (३) 'निषेधार्थम्' क० ख०

*कृष्णपक्षः सर्वोऽपि *'शाकेनाप्यपरपक्षं नातिक्रमेत् मासिमासि वाऽशनम्' इति(१)श्रुतेः *'ऊर्ध्वं वा चतुर्थ्या यदहः संपद्यते ऋते चतुर्दशीम्'इति कात्यायनोक्तेः, 'मासिमासि कार्यमपरपक्षस्यापराह्णः श्रेयान्'इत्यापस्तम्बोक्तश्च वीप्सया (२)सर्वं कृष्णपक्षेषु नित्यम् । तेनोपसंहारान्महालयपरत्वं परास्तम् । *अत्र प्रत्यहं,

---

श्राद्धमनूद्यानेन कालसंबन्धो विधातुं शक्यते, स्वतन्त्रेष्ट्यादिविधिसत्त्वेन 'य इष्ट्या' इत्यादिवत् । अन्यथा 'सायं प्रातश्च जुहोति' इतिवत् सकृत्प्रयोगासंभवन्निवेशानेककालसमुच्चयवशादभ्यासमात्रा(३)पत्तिः । न च स्मृत्यन्तरगतांस्तत्तच्छ्राद्धविधीनपेक्ष्य तथा कार्यम्, तत्तत्कालविशिष्टानामेव तेषां तत्र विधानात् । विध्यनुवादयोरसत्त्वे च इतिकर्त्तव्यतानाकाङ्क्षणेनोत्तरत्र तद्विधानानुपपत्तिश्चेति चेत् ? न, एते श्राद्धकाला इतिकालविशिष्टकर्मविधिः, एषु कालेषु श्राद्धं कुर्यादित्यर्थात् । विध्येकत्वेऽपि संख्यान्यायेन एककर्मासंभवन्निवेशनानाकालवशात्कालभेदेन श्राद्धभेदः, 'यदाग्नेयः'इत्यत्राग्नेयभेदवत् । वस्तुतस्त्वत्र वाक्यतन्त्रतामा(४)त्रम्, पर्यवसानतस्तु विधिभेदः निमित्तानामेकविध्यनुप्रवेशासम्भवात्तदंशे विधिभेदस्यावश्यकत्वात्तन्मिश्रतया कालानां तदौचित्यात् । तद्भेदे च विहितस्य विधानायोगात् प्रतिविधि श्राद्धानां भेद एव ।

अष्टकापार्वास्ये निर्णीते, वृद्धिश्राद्धनिमित्तानि निर्णेष्यन्ते, अत आह-*कृष्णपक्ष इति । *शाकेनापीति । वीप्सातः कृष्णपक्षस्य सर्वमासीयत्वं, तच्छ्राद्धस्य नित्यत्वं 'शाकेनापि' इत्युक्तेः । *ऊर्ध्वं वेति । अपरपक्षे श्राद्धं कुर्वीतेति प्रकृतं, ततश्च प्रतिपत्प्रभृति सर्वतिथिलाभः, ऊर्ध्वं वेतिपञ्चमीप्रभृति, यदहरिति वाक्यारोऽनुवर्त्तते । इत्थं च पक्षत्रयमाह—*अत्रेति ।

---

(१) 'इति स्मृतेः' छ० (२) 'सर्वकृष्णपक्षेषु' क०
(३) 'मात्रापत्तेः' ङ० (४) 'मात्र'ख०

दशम्यादिपक्षोऽप्यन्यत्र । एषां पक्षाणां शक्ताशक्तभेदेन व्यवस्था । एतच्च हेमाद्र्यनुसारेण । विवेचनकारास्तु कृष्णपक्षश्राद्धं सकृदेव न तु प्रतितिथि आवर्त्तते, 'वसन्तनिमित्तकज्योतिष्टोमवत्सकृत्कृते कृतः शास्त्रार्थः' इति न्यायात्,

आश्वयुक्शुक्लपक्षे तु श्राद्धं कार्यं दिने दिने ।

इतिवत् वीप्सायां अश्रवणाच्च । "अथ सर्वेष्वेवापरपक्षस्याहःसु क्रियमाणे पितॄन् प्रीणाति कर्त्तुस्तु कालाभिनियमात्फलनियमः' इत्यापस्तम्बं सर्वतिथिषु श्राद्धं विदध्यात् । मैवम्, कृष्णपक्षे कस्यांचित्तिथौ श्राद्धे कृते पितृतृप्तिरविशिष्टा । यदि तु स्वपत्यादिफलार्थी तदा प्रतिपद्येव द्वितीयायामेवेति कालनियमाच्छ्राद्धमिति हरदत्तेन व्याख्यानात् । युक्तं चैतत्, कृष्णपक्षनिमित्तकश्राद्धाश्रिततत्तत्तिथिरूपगुणानां फलसम्बन्धविधाने कामनयाऽप्येकस्मिन्कृष्णपक्षे एकतिथावेव श्राद्धे गुणफलानुरोधेनाश्रयाणा(१)वृत्तेः । ऊर्ध्वं(२)वेत्यादि तु सकृत्करणस्यैव द्योतकं, 'यदहः संपद्यते तदहर्ब्राह्मणानामन्त्र्य' इतिवचनान्तरैकवाक्यतया(३)कर्मादिव्याख्यानात् । 'यदहरुप(४)पद्यते' इति गोभिलीयं तु द्रव्यब्राह्मणसंपत्तिरित्येकवाक्यतया व्याख्यातमन्यैः । तथा च सामान्यतः सर्वकृष्णपक्षे चतुर्दशीभिन्नायां यस्यां कस्यांचित्तिथौ सकृच्छ्राद्धम्, तृप्तिविशेषकामनायां पञ्चम्यादिकस्याश्चित्, ततोऽपि विशेषकामनायां दशम्यादिकस्याश्चित्, ततो विशेषकामनायाममावास्यायां सकृदेव श्राद्धं कर्त्तव्यमिति पर्यवसन्नम् । महालये तु पञ्चपक्षा इति प्राहुः । मतद्वयेऽपि चतुर्दशी वर्ज्यैव,

नभस्यस्यापरे पक्षे श्राद्धं कार्यं दिने दिने ।
नैव नन्दादि वर्ज्यं स्यान्नैव निन्द्या चतुर्दशी ॥

इति कार्ष्णाजिनिना भाद्रापरपक्षे चतुर्दशीवर्जननिषेधा-

---

(१) 'अनावृते' ङ० (२) 'च' ङ० (३) 'कर्मादि' ङ० (४) 'उपपद्येत' ङ०

पञ्चम्यादि, यदहःसंपत्तिर्वा इति त्रयः पक्षाः। यदैकादि
ने श्राद्धं तदा दार्शे*पृथगेव, याज्ञवल्क्येनामावस्याय

दन्यत्र तद्वर्जनावगमात्;

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम्।
श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः॥

इति मनुना दशम्यादिपक्षे चतुर्दश्या वर्जनोक्त्या प्रतिपद
दिपञ्चम्यादिपक्षयोरपि तल्लाभाच्च। कृष्णपक्षे सामा(१)न्यवज्य
न्तरमपि नारदसंहितायाम्---

न नन्दासु भृगोर्वारे रोहिण्यां च त्रिजन्मसु।
रेवत्यां च मघायां च कुर्यादापरपक्षिकम्॥

नन्दाः प्रतिपत्षष्ठ्येकादश्यः। त्रिजन्मनि आद्यदशमैको
विंशनक्षत्राणि। गार्ग्योऽपि---

नन्दायां भार्गवदिने त्रयोदश्यां त्रिजन्मसु।
एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात्॥

वृद्धगार्ग्योऽपि---

प्राजापत्ये च पौष्णे च पित्र्ये भार्गवे तथा।
यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति॥ इति।

ए(२)वम्---

भानौ भौमे त्रयोदश्यां नन्दाभृगुमघासु च।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम्॥

इति पिण्डदानपदं श्राद्धोपलक्षणम्, एकमूलकल्पनालाघवा
त्। एतद्धेमाद्रिमते सकृत्करणपक्षे, विवेचनकृन्मते सर्वपक्षेषु द्रष्ट
व्यम्। *पृथगेवेति। हेमाद्रिमते विवेचनकृन्मते च कृष्णपक्ष
श्राद्धाद्भिन्नमेवेत्यर्थः, प्रकारविकल्पस्य दूषणीयत्वात्। दर्शे कृष्ण
पक्षश्राद्धकरणे चाविरुद्धाङ्गत्वे दार्शेन सिद्धेः, न तु विरु(३)द्धा

---

(१) 'सामान्ये' ङ। (२) 'एवंच' ङ। (३) 'विरुद्धाङ्गत्वे' ङ।

पृथङ्निर्देशात् । एतेन 'कृष्णपक्षे यदहःसंपद्यते अ-
वास्यायां तु विशेषेण' इति निगमोक्तेर्गुणोऽपरपक्ष-
द्धस्यामावास्येति शूलपाणि(१)मत*मपास्तम् । *'अ-
क्तौ दर्शेनापि मासिश्राद्धसिद्धिः' इति नारायणवृत्तिः ।
नेरग्निकानां कस्मिंश्चिदहने । आहिताग्नेस्तु दर्श एव,

त्वे इति तु द्रष्टव्यम् । *पृथगिति । न चायनविषुवतोरिव
स्यद्योतनार्थं तस्या पृथङ्निर्देशः, कृष्णपक्षादवयुत्यानुवादव-
द्योतने अमावास्यान्वितश्राद्धकालांशेऽनुवा(२)दत्वम् , इतर-
। च विधित्वमिति वैरूप्यापत्तेः । न च पुनर्विधानादेव प्राशस्त्यं
यताम् , अपवृत्तप्रवर्त्तनात्मकविधानस्य पुनस्त्वासम्भवात् । अय-
षुवतोस्तु श्राद्धस्य विधानमेव सूर्यसंक्रमपदस्य गोबलीवर्दन्या-
(३) (तदितरत्वात्तयोस्तदविधानात् । एवंविधवाचोभङ्ग्या सामा-
वेधेः स्वविषयेतरविषयत्वरूपलक्षणवशादेवायन)विषुवतोः श्राद्धस्य
मान्तर श्राद्धापेक्षयाऽऽवश्यकत्वसिद्धिः । न चामावास्याशब्दसम-
याहारात् कृष्णपक्षपदं तदन्यतिथिकूटपरमस्विति वाच्यम् , हेमा-
ते यदहःसम्पत्तिपक्षे विवेचनकृन्मते च कृष्णप(४)क्षपदेन सर्वा-
तिथिषु श्राद्धविधानस्य निराकृतत्वात् । *अपास्तमिति । यद्यपि
मवचने पृथग्विधानात्फलविशेषार्थिनः कृष्णपक्षश्राद्धेऽमावास्या-
गुणविधिर्युक्त एव तथापि योगीश्वरवचने स न युज्यते; बहुव-
वगतपरस्परानपेक्षतन्त्रान्वयविघातवैरूप्यापत्तेरिति भावः ।
शक्ताविति । कृष्णपक्षश्राद्धादार्शस्य भिन्नत्वादेवेदृशवृत्तिग्रन्थ-
तेरित्यर्थः । एतच्चाविरुद्धाङ्गकत्वे, विरुद्धा(५)ङ्गकत्वे त्ववृत्तिरिति
ध्यम् । *निरग्निकानामिति । कृष्णपक्षश्राद्धं प्रकृतम् । *न

---

(१) 'मतमप्य' ख० । (२) 'अनुवादकत्वम्' ख० ।
(३) 'धनुश्चिन्हान्तर्गतो ग्रन्थो नास्ति' ख० । (४) 'पक्ष' नास्ति ङ ।
(५) 'विरुद्धाङ्गकत्वे' नास्ति ख० ।

*न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः ।
इति मनूक्तेः । *सर्वकृष्णपक्षाशक्तौ मात्स्ये—
*अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् ।
कन्याकुम्भवृषस्थेऽर्के कृष्णपक्षे च सर्वदा ॥
कर्कोपि-'आहिताग्नेः संवत्सरे त्रिःश्राद्धनियमः'इति देवलः
*अनेन विधिना श्राद्धं कुर्यात्संवत्सरं सकृत् ।
द्विश्चतुर्वा यथा श्राद्धं मासेमासे दिनेदिने ॥
कृष्णपक्षेष्वपि महालयस्य श्रेष्ठत्वम् । तच्चोक्तं प्राक् । व्यतीपाते विशेषमाह हेमाद्रौ शङ्खः—
फलं (१)लक्षं समुत्पत्तौ भ्रमणे कोटिरुच्यते ।

दर्शेनेति । व्याख्यातम् । *सर्वकृष्णपक्षाशक्ताविति । सर्वामावास्याऽशक्तावित्यर्थः । *अनेनेति । पादत्रयेण दर्शश्राद्धस्य त्रिरात्राद्यनुकल्पं विधाय चतुर्थपादेन कृष्णपक्षश्राद्धस्य सर्वदा कर्त्तव्यत्वाभिधानात् । ऋतुसंवत्सराभिप्रायेण मासचतुष्टयात्मका ऋतवः । हेमन्तप्रयुक्तं कुम्भस्थार्केऽमावास्यायाम्, ग्रीष्मप्रयुक्तं वृषार्के तस्याम्, वर्षाप्रयुक्तं कन्यार्के तस्यामिति ।

अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् ।
हेमन्तग्रीष्मवर्षासु पाञ्चयाज्ञियमन्वहम् ॥

इत्यमावास्याश्राद्धमुपक्रम्य मनूक्तेश्च, मात्स्यपादत्रयस्य कृष्णपक्षपरत्वाभावप्रतीतेश्च । ततश्चामावास्याश्राद्धकृष्णपक्षश्राद्धयोर्द्वयोरपि नैमित्तिकत्वेऽपि कृष्णपक्षश्राद्धाकरणहेतुकप्रत्यवायपरिहारस्यामावास्याया अपि तत्कालत्वेन तत्र श्राद्धानुष्ठानेन सिद्धिः अमावास्याश्राद्धाकरणहेतुकप्रत्यवायपरिहारस्य च त्रिःश्राद्धकरणेनापि सिद्धिः । त्रिः करणं च चतुः करणाशक्तौ । त्रिः करणाशक्तौ तु द्विः करणम् । तदशक्तौ सकृत्करणमित्याह—*अनेनेति

(१) 'लक्षमुत्पत्तौ' क० ख० छ० ।

पतने शतकोट्यस्तु पाते वै दत्तमक्षयम् ॥

ज्योतिःशास्त्रे—

द्वाविंशतिस्तथोत्पत्तौ भ्रमणे चैकविंशतिः ।
पतने दश नाड्यस्तु पतिते सप्त नाडिकाः ॥

अ(१)न्त्यौ च द्वौ व्यतीपातौ प्रागुक्तौ । हेमाद्रौ मार्कण्डेयः—

*यदा च श्रोत्रियोऽभ्येति गृहं वेद(२)विदग्निचित् ।
तेनैकेनापि कर्तव्यं श्राद्धं च विषु(३)वच्छुभे ॥

पार्वणश्राद्धमभिधायैतद्वचनोक्त्या अमावास्याश्राद्धानुकल्पत्वम् । एवं संवत्सरप्रक्रमात्तस्य 'मासे मासे' इत्यत्र 'दिने दिने' इत्यत्र वाऽन्वयः । 'मासे मासे' इत्यनेन मासानुमासिकमित्युक्तेरमावास्याश्राद्धं वा, 'मासि मासि चैवम्' इत्युक्तेरपरपक्षश्राद्धं वा गृह्यते । 'दिने दिने' इत्यनेन त्वहरहः श्राद्धम् ; 'मासे मासे' 'दिने दिने' इति वीप्साश्रुत्या प्रत्यहमपरपक्षश्राद्धमिति व्याख्यानस्य भ्रममूलकत्वात् । विवेचनमते तस्य सकृत्त्वात् । हेमाद्रिमतेऽपि 'अनेन' इति सर्वनाम्नः प्रक्रान्तपरामर्शित्वं न तु प्रक्रम्यमाणपरामर्शित्वमिति । एवं साग्निकस्य पार्वणासम्भवे पिण्डपितृयज्ञपिण्डदानमात्रेणैव तत्सिद्धिः । निरग्निकस्य तु ब्राह्मणभोजनमात्रमुक्तं निगमे—"आहिताग्नेः पित्रर्चनपिण्डैरेव, निरग्नेः पू(४)र्णमन्नदानम्" इत्यादि ।

द्रव्यं पायसादि ।

ब्राह्मणमाह—*यदा चेति । इ(५)दं वक्ष्यमाणब्राह्मणोपलक्षणम् । सम्पत्ती इति द्विवचनान्तपाठ इति केचित् । 'द्रव्यब्राह्मणयोः सम्पत्तिर्यत्र काले' इति एकवचनान्तः पाठ इति माधवादयः । द्रव्यमित्यसमस्तमिति मिताक्षरा ।

---

(१) 'अन्यौ' क० । (२) 'वेदविदग्निचित्' ख० ।
(३) 'विधिवच्छुभम्' क० ।
(४) 'पूर्वम्' ख० । (५) 'इदं च' ङ० ।

इदं चापिण्डं कार्यमिति हेमाद्रिः । एतज्जीवत्पितृकोपि कुर्यात् ,

उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे ।
तीर्थे ब्राह्मण आयाते षडते जीवतः पितुः ॥

इति मैत्रायणीयपरिशिष्टोक्तेः ।

तिथिविशेषे फलविशेषो याज्ञवल्क्येनोक्तः—

*कन्यां *कन्यावेदिनश्च पशून्वै सत्सुतानपि ।
*द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्तथा ॥
ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरौप्ये स *कुप्यके ।
ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा ॥
प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ।

एताः कृष्णपक्षस्था एव । महालये तु फलभूमौ पृथ्वी(१)चन्द्रोदयः । पौर्णमास्यां हेमाद्रौ पितामहः—

(ग(२)जच्छायाभोजने प्रायश्चित्तं शुक्लावल्यां ब्राह्मे-

सूतके मृतके चैव ग्रस्तयोश्चन्द्रसूर्ययोः ॥
छायायां कुञ्जरस्याथ भुक्त्वा च नरकं व्रजेत् ॥
भुक्त्वा प्रमादाद्विप्रस्तु सम्यक् चान्द्रायणं चरेत् ॥ इति

श्राद्धकाल इति न परिसंख्या, श्राद्धानुवादेन कालान्तरस्यापि विधानात् ।

*कन्यामिति । *कन्यावेदिनः जामातरः । *द्यूतं विजयः । *कुप्यं ताम्रादि । अत्र च कृष्णपक्षश्राद्धं नाश्रुतदनुपक्रमात् । अतोऽनेन प्रतिपदादिश्राद्धानि तत्तत्फलार्थिना तत्तत्तिथिषु विशिष्टविधिरूपेण विधीयन्ते । तानि च परस्परं कृष्णनिमित्ताच्छ्राद्धाद्भिद्यन्ते इति एकस्मिन्नपि कृष्णपक्षे यावत्कामं तेनुष्ठानम् । समानप्रकारकत्वे च येनकेनापि प्रसङ्गान्नित्यस्य सि

---

(१) 'पृथ्वीचन्द्रः' क० । (२) कंसान्तर्गतं नास्ति घ० ।

अमावास्याव्यतीपातपौर्णमास्यष्टकासु च ।
विद्वान्श्राद्धमकुर्वाणो नरकं प्रतिपद्यते ॥

एतन्माध्यादिपरम् ,

व्रीहिपाके च कर्तव्यं यवपाके च पार्थिव ।
पौर्णमासी तथा माघी श्रावणी च नृपोत्तम ॥
प्रौष्ठपद्यामतीतायां तथा कृ(१)ष्ण(२)त्रयोदशी ।
एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ॥

इति विष्णुधर्मोक्तेः । विष्णुः-'माघी प्रौष्ठपदूर्ध्वं कृष्णा त्रयोदशी' इति । अत्र माघी पौर्णमासीति कल्पतरुः । 'श्रावण्यूर्ध्वमपि मघायोगसम्भवात्त्रयोदशी-विशेषणम्' इति गौडाः । नक्षत्रेष्वपि याज्ञवल्क्यः-

स्वर्गं ह्यवत्यमोजश्च शौर्यं क्षेत्रं बलं तथा ।
पुत्राञ्छ्रैष्ठ्यं च सौभाग्यं समृद्धिं सुख्यतां शुभम् ॥
*प्रवृत्तचक्रतां वापि वाणिज्यप्रभृतीनपि ।
अरोगित्वं यशो वीतशोकतां परमां गतिम् ॥
धनं वेदान्भिषक्सिद्धिं कुप्यं गामप्यजाविकम् ।
अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति ॥
कृत्तिकादिभरण्यन्तं स कामान्प्राप्नुयादिमान् ।

फलान्तराण्यपि महाभारतकौर्मादेर्ज्ञेयानि । माधवीये मरीचिः—

कृत्तिकादिषु ऋक्षेषु श्राद्धे यत्फलमीरितम् ।
विष्कम्भादिषु योगेषु तदेव फलमिष्यते ॥

बृहस्पतिः—

आरोग्यं चैव सौभाग्यं शत्रूणां च प(३)राजितम् ।
सर्वान्कामान्प्रियां विद्यां धनमायुर्यथाक्रमम् ॥

---

(१) 'कृष्णा' क० । (२) 'चतुर्दशी' ख० ।
(३) 'पराजयम्' क० ख० छ० ।

सूर्यादिदिवसेष्वेतच्छ्राद्धकृल्लभते फलम् ।
ववादिकरणेष्वेतच्छ्राद्धकृल्लभते फलम् ।

अन्यानि च षण्णवतिश्राद्धादीनि प्रागुक्तानि । मा
ण्डेयपुराणे—

श्राद्धार्हद्रव्यसंपत्तौ तथा दुःस्वप्नदर्शने ।
जन्मर्क्षे ग्रहपीडासु श्राद्धं कुर्वीत चेच्छया ।

अथ श्राद्धाधिकारिणः । चन्द्रिकायां सुमन्तुः—

*मातुः पितुः प्रकुर्वीत संस्थितस्यौरसः सुतः ।
पैतृमेधिकसंस्कारं मन्त्रपूर्वक*माद्(१)तः ॥

तत्रैव हेमाद्रौ शङ्खः—

पितुः पुत्रेण कर्तव्या पिण्डदानोदकक्रिया ।
पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदरः ॥

अत्र यद्यपि पुत्रपदं क्षेत्रजादिद्वादशविधपुत्रपरम
ते च द्वादश पुत्रा याज्ञवल्क्येनोक्ताः—

औरसो*धर्मपत्नीज* स्तत्समः पुत्रिकासुतः ।

---

*प्रवृत्तचक्रता । आज्ञाया अप्रतिघातः । *मातुरिति
यद्यपि पितृमेधः सपिण्डनान्तः तथापि प्रत्याब्दिकादेरप्यत्र प्र
अग्रिमवृद्धमन्वादिवचनात् । *आदित इति । पुत्रतदन्य
वाये पुत्रस्यैवाधिकारार्थम् । 'आदृतः' इति पाठे श्राद्धवि
श्रद्धा बोध्या । 'औरसः' इत्येकत्वं कर्तृत्वेना(२)धिकारे,
स्वाम्यरूपस्य तस्य अविभक्तानां स्वत एव विभक्तानां च
(३)शप्रदानादिना वक्तव्यत्वात् । पतितादेस्तु नाधिकारः,
न्तरे निषेधात् ।

*धर्मपत्नी धर्म्यविवाहोढा सवर्णैव,

---

(१) 'आदितः' इति पाठोऽपि दृश्यते ।
(२) 'नाधिकारे' नास्ति घ० ङ० । (३) 'स्वस्यांश' ङ ।

संस्कृतायां सवर्णायां स्वयमुत्पादयेत्सुतम्।
तमौरसं विजानीयात्पुत्रं प्राथमकल्पिकम्॥

इति मनूक्तेः। वाजसेयिनस्तु, सवर्णापदं द्विजानां द्विजाजातस्यौरसाभिप्रायम्,

पुत्राः कुर्वन्ति विप्राय क्षत्रविट्शूद्रयोनयः॥

इति ब्राह्मे क्षत्रियावैश्यापुत्रयोः क्रियाकर्तृत्वोक्तेः। शूद्रापुत्रस्य द्वादशविधपुत्राभावेऽधिकारः, यत्र क्वचनोत्पादितस्य विष्णुनाऽधिकारोक्तेः। तथाच धर्मपत्नी द्विजानां द्विजैव। शूद्राणां तु मुख्यपत्न्यभावे तुल्या परिणीतैवेत्याहुः। (औ(१)रसबहुत्वे जेष्ठनाशे कनिष्ठः। तदसन्निधौ तु स एकादशाहान्तौर्ध्वदेहिकेऽधिकारी, मासिकसपिण्डनयोस्तु जेष्ठ एवेत्यग्रे स्फुटम्।)

*तत्समइति। तत्र पुत्रिकैव सुत इत्येकः, तथाच मनुः—

अकृता वा कृता वाऽपि यं विन्देत्सदृशात्सुतम्।
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्॥ इति।

अकृता पुत्रिकात्वेन। पुत्रिकायाः सुत इत्यपरः, स च

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥

इति वसिष्ठोक्तः। अयं च संविदसत्त्वे मातामहस्यैव पुत्रः। स्वत्सत्त्वे बीजिनोपि,

कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासुतः।
उभयोर(२)थ सम्बद्धः स कुर्यादुभयोरपि॥

इति यमोक्तेः। संवित्तु वसिष्ठेनोक्ता—

अपुत्रोहं प्रदास्यामि तुभ्यं कन्यां भवानपि।
पुत्रार्थी चेदिहोत्पन्नः स नौ पुत्रो भवेदिति॥

---

(१) धनुश्चिन्हान्तर्गतं नास्ति घ०।
(२) 'अपि' ङ०।

*क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥
*गृ(१) हे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ।
*कानीनः कन्यकाजातो मातामहसुतः स्मृतः ॥

---

*क्षेत्रज इति । वाग्दत्तविधवायाम्
'यस्या म्रियेत कन्यायाः' 'अपुत्रां गुर्वनुज्ञातः' इतिवचनादेवरादेः

यस्तत्पजः प्रमीतस्य क्लीबस्य व्याधितस्य च ।
स्वधर्मेण नियुक्तायां स ज्ञेयः क्षेत्रजः सुतः ॥

इति मनुना पुत्रोत्पादनासमर्थस्य जीवतोऽपि पत्युः
तन्नियोगेन सवर्णाज्जातोऽपि क्षेत्रज उक्तः । अयं च क्षेत्रिणः,

अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः ।

इत्युक्तेः । बीजिनोऽपि पुत्रेच्छा चेत् ,

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥

इति याज्ञवल्क्योक्तेः । *गृहे इति । सवर्णजत्वनिश्
ऽपि पुरुषविशेषजत्वेनानिश्चितः भर्तृगृहे सवर्णादुत्पन्न इत्य
अयं च क्षेत्रिण एव,

उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥

इति मन्वुक्तेः । *कानीन इति । सवर्णादपरिणीता
त्पन्नः । स च—

अप्रत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः ।
पुत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् ॥

इति मातामहस्य सुत उक्तः । मनुना च—

पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥

---

(१) 'गूहप्र' क० ।

*अक्षतायां क्षतायां वा जातः पौनर्भवस्तथा।
*दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्॥
*क्रीतश्च ताभ्यां विक्रीतः *कृत्रिमः स्यात्स्वयंकृतः।

इति परिणेतुः। एवञ्च तयोर्मध्ये यस्यापुत्रता तस्यैव। उभयोरपि तथात्वे उभयोरपीति। *अक्षतायामिति। पत्या भुक्तायामभुक्तायां वा जीवता तेन त्यक्तायां, विधवायां वा सवर्णाज्जातः,

या तु पत्या परित्यक्ता विधवा स्वेच्छयाऽथ वा।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते॥

इति विष्णूक्तेः। स च बीजिन एव, परित्यागेन मरणेन वा क्षेत्रे भर्तुः स्वत्वाभावात्, स्वेच्छापदाच्च। *दद्यादिति। मातापितृभ्यामन्यतराभावेऽन्यतरेण वाऽत्यन्तदुर्गत्या भरणासामर्थ्येन विधिपूर्वकं दत्तः प्रतिग्रहीतृसवर्णः प्रतिग्रहीतुरेव। प्रपञ्चितं चेदं प्राक् प्रपञ्चयिष्ये च। अत्र होमान्यः ग्रहणापादनप्रतिग्रहीतृगोचरः सर्वोऽपि नियमः क्रीतकृत्रिमापविद्धस्वयंदत्तेष्वपि यथासम्भवमावश्यकः, अदृष्टार्थत्वात्'तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः' इति वासिष्ठे क्रयत्यागयोरुपादानात्। स्वयंदत्ते तु होमोऽपि,प्रतिग्रहसत्त्वात्। *क्रीत इति।

क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यदन्तिकात्।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि च॥

इति मनूक्तमसादृश्यं तु गुणैरेव,

सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः॥

इत्युपसंहारात्। कानीनगूढोत्पन्नसहोढजपौनर्भवानां कुण्डगोलकत्वेऽपि साजात्यं जनकद्वारा। *कृत्रिम इति। मातापितृहीनः प्रौढः धनादिप्रलोभनेन स्वयं पुत्रार्थिना पुत्रीकृतः,

सदृशं यं प्रकुर्वीत गुणदोषविचक्षणम्।

दत्ता(१)त्मा तु स्वयं दत्तो(२)गर्भे वित्तः सहोढजः॥
*उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः।
*पिण्डदोंशहरश्चैषां पूर्वाभावे परः परः॥ इति।

तथापि—

दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः।

इति हेमाद्रावा(३)दित्यपुराणे कलाविहितरेषां पुत्रत्वनिषेधादौरसदत्तकपरमेव।

पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः॥

इति मनूक्तेः। प्रकुर्वीतेत्युपादानान्मातृपितृहीनतादिलाभः। *दत्तात्मेति। मातापितृभ्यां हीनस्त्यक्तो वा तवाहं पुत्रोस्मीति स्वमात्मानं दत्तवान् पूर्ववद् गृहीतः,

मातापितृभ्यां हीनो वा त्यक्तो वा स्यादकारणात्।
आत्मानं स्पर्शयेद्यस्तु स्वयंदत्तस्तु स स्मृतः॥

इति मनूक्तेः। *गर्भ इति। सवर्णात्सम्भूतो गार्भिण्यां परिणीतायां गर्भस्थित्या स्वीकृतः पश्चादुत्पन्नो वोढुः पुत्रः,

या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती।
वोढुः स गर्भो भवति सहोढ इति चोच्यते॥

इति मनूक्तेः। *उत्सृष्ट इति। मातापितृभ्यां तदन्यतरेण वा दोषाभावेऽपि भरणासामर्थ्येन, मूलजातत्वादिना वा त्यक्तो ज्ञातपित्रादिः सवर्णः पुत्रत्वेन गृहीतः,

मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा।
यं पुत्रं प्रतिगृह्णीयादपविद्धस्तु स स्मृतः॥

इति मनूक्तेः। *पिण्डद इति। अभावोऽसन्निधानं नाशश्च। तत्र पिण्डदाने आद्यः, अंशहरणे द्वितीयः।

---

(१) 'दत्तान्मातुः' ग०। (२) 'गर्भे वित्तः' क०। (३) 'आदिपुराणे' ख

यद्यपि—

पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ।

इति याज्ञवल्क्योक्तेरौरसाभावे दत्तकप्राप्तिः, तथा-
यौरसाभावे पौत्रः तदभावे प्रपौत्रः तदभावे दत्तकादि-
ः इति ज्ञेयम्,

पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥

इति जीमूतवाहनधृतवसिष्ठहारीतशङ्खलिखितोक्तेः,

लोकानन्त्यं दिवः प्राप्तिं पुत्रपौत्रप्रपौत्रकैः ।

इति याज्ञवल्क्योक्तेश्च ।

*पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव च ।
पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा ॥
भगिनी भागिनेयश्च सपिण्डः सोदकस्तथा ।
असंनिधाने पूर्वेषामुत्तरे पिण्डदाः स्मृताः ॥

इति स्मृतिसंग्रहे प्रपौत्रानन्तरं पुत्रिकापुत्रोक्तेस्तत्समत्वाच्च*दत्तकस्य । यद्यपि बृहस्पतिना—

यद्यपि—

औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च ।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ॥
पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा ।
स्वयं चोपगतः पुत्रा द्वादशैते प्रकीर्तिताः ॥

इति नारदीयः पाठक्रमः, तथाऽपि परिगणनमात्रेण कल्प्यक्रममपेक्ष्य 'एषां पूर्वाभावे परः परः' इति प्रत्यक्षतो विहितक्रम एव ग्राह्यः ।

*पुत्र इति । एकवचनमौरसाभिप्रायम् *दत्तकस्येति ।

पौत्रश्च पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ ।
रिक्थे च पिण्डदाने च स(१)मौ तौ परिकीर्तितौ

इति पौत्रसाम्यमुक्तम् । याज्ञवल्क्येन च—

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ।

इति *औरससाम्यम् , तथापि 'लोके राजसमो मन्त्री' इत्यादौ किंचिन्न्यूने समशब्दप्रयोगात्, गौणमुख्ययो साम्यायोगाच्च *स्तुत्यर्थं तत् न तु समविकल्प इति ज्ञ मितव्यम् ,

*पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भातृसंतति
(सपि(२)ण्डसंततिर्वापि क्रियार्हा नृप जायते
तेषामभावे सर्वेषां समानोदकसन्ततिः ।)
मातृपक्षसपिण्डेन संबन्धो यो जलेन वा ॥

अत औरसानन्तरं न दत्तक इति भावः । *औरससाम्यमिति तथा च पुत्रिकासुतेऽपि "दत्तौरसेतरेषाम्'इति कालनिषेधो न वर्त्तते इत्याशयः । *स्तुत्यर्थमिति ।

उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः ।
सवर्णा असवर्णाश्च ग्रासाच्छादनभाजनाः ॥

इति कात्यायनेन क्षेत्रजक्रीतकृत्रिमस्वयंदत्तापविद्धेषु सा र्ण्येन, कानीनगूढोत्पन्नसहोढपौनर्भवेष्वसावर्ण्येन च निमित्तेन व वस्थाकरणात्सावर्ण्यनिमित्तकचतुर्थांशहारित्ववारणाय साम्यो दानम् ;

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते ।
समस्तस्य विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः ॥

इति मनूक्तेरिति च द्रष्टव्यम् । एवञ्च पुत्रिकासुतेऽपि प्रो कलिनिषेधः प्रवर्त्तत एवेति भावः । *पुत्र इति । 'गौणमु

---

(१) 'समानौ' ख० । (२) धनुश्चिह्नान्तर्गतं नास्ति ङ०

कुलद्वयेऽपि चोच्छिन्ने स्त्रीभिः कार्या क्रिया नृप।
*तत्संघातगतैर्वापि तद्विक्थात्कारयेन्नृपः॥

इति विष्णुपुराणाच्चेति। प्रपौत्रानन्तरं दत्तकादय इति पृथ्वीचन्द्रमदनरत्नकालादर्शादयः। मदनपारिजातेप्येवम्।

*बोपदेवरुद्रधरादयस्तु—

*पुत्रेषु विद्यमानेषु नान्यो वै कारयेत्स्वधाम्।

इति सुमन्तूक्तौ—

पितामहः पितुः पश्चात्पञ्चत्वं यदि गच्छति।
पौत्रेणैकादशाहादि कर्तव्यं श्राद्धषोडशम्॥
नैतत्पौत्रेण कर्तव्यं पुत्रवांश्चेत्पितामहः॥

इति छन्दोगपरिशिष्टे च पुत्रशब्दस्य द्वादशविधसुतपरत्वात्, *'पूर्वाभावे परः परः' इत्यस्यानन्यपरत्वाच्च, दत्तकाद्यभावे पौत्रादीना(१)मधिकार इत्याहुः, तद्गौणमुख्ययोः साम्यायोगाद्दत्तके सति पौत्रस्यांशहरत्वस्याप्यभावापत्तेः पुत्रपदस्यौरसमात्रपरत्वाच्चिन्त्यम्। अत एव निषेधादुपनीतपौत्रसत्त्वेप्यनुपनीतपुत्रस्यैवाधिकारः औरसश्चानुपनीतोपि कुर्यात्' इत्याह। पृथ्वीचन्द्रोदये

योर्मुख्ये कार्यसंप्रत्ययः' इति न्यायेन मुख्यपरम्, बद्धक्रमप्रपौत्रान्ते च दत्तक इति भावः। *तत्सङ्घातगतैः एकसार्थान्तर्गतैः।

सिद्धान्तमाह-*बोपदेवेत्यादिना। *पुत्रेष्विति। पुत्रपदं च नौरसमात्राभिप्रायकम्, तद्वाक्यवैयर्थ्यप्रसङ्गात्। (त(२)था च गौणमुख्यन्यायो नेह प्रवर्तते इति भावः।) ननु गौणमुख्ययोरसमत्वात्पौत्रानन्तर्यं दुर्वारमित्यत आह-*पूर्वाभावे इति। प्रोक्तस्मृतिसंग्रहवचने प्रोक्तविष्णुपुराणवचने च पुत्रपदं पुत्रत्वेन गौण-

---

(१) 'नामप्य' ग०। (२) धनुश्चिन्हान्तर्गतं नास्ति ख० ङ०

सुमन्तुः—

श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको द्विजः ।
*व्रतस्थो वाऽव्रतस्थो वा एक एव भवेद्यदि ॥

वृद्धमनुः—

कुर्यादनुपनीतोपि श्राद्धमेको हि यः सुतः ।
*पितृयज्ञाहुतिं पाणौ जुहुयाद्ब्राह्मणस्य सः ॥

*एको मुख्य औरस इत्यर्थः ।

मनुः—

नह्यस्मिन्युज्यते कर्म किंचिदामौञ्जिबन्धनात् ।
नाभिव्याहारयेद्ब्रह्म स्वधानिनयादृते ॥

ब्रह्म वेदः । सुमन्तुरपि—

नाभिव्याहारयेद्ब्रह्म यावन्मौञ्जी.नि(१)बध्यते ।
मन्त्राननुपनीतोपि पठेदेवैक औरसः ॥

सङ्ग्राहकम्, पुत्रग्रहणेन तेषामग्रहणे दत्तकादेः पुत्रत्वोक्तेर्निष्फ जनकत्वप्रसङ्गात् । एकवचनं च जात्यभिप्रायकम्, स्मृतिसङ्ग चने पुत्रिकापुत्रपदं दौहित्रपरमिति न तद्विरोधः । न चैवं सति पौत्रस्यांशहर्तृत्वमपि न स्यात्, सावर्ण्यनिबन्धनचतुर्थां रित्वस्यानुज्ञानात् । न च 'पुत्राभावे तु पत्नी स्यात्'इति नात् पत्न्येवाधिकारिणी स्यात् । तस्या योगीश्वरोक्तक्र द्वादशविधपुत्रोत्तरं प्राप्त्यौरसपुत्रपत्न्योः क्रमे बाधिते'सकृत्प्र याः किमवगुण्ठनेन'इति न्यायात् 'पुत्रः पौत्रः प्रपौत्रो वा'इति क्रमयोः पौत्रप्रपौत्रयोर्गौणमुख्यपुत्रोत्तरं पत्न्याश्च प्राङ्निवे *व्रतस्थ इति दृष्टान्तः । *पितृयज्ञाहुतिमिति । प्रत्य कादिष्ववश्यकर्त्तव्येष्वनुपनीतस्याधिकारसूचकम् । नन्वेक स्याद्वितीय एवेति नार्थः, सद्वितीयस्य श्राद्धानधिकारप्र

(१) 'न बध्यते' क० ।

अयं मन्त्रपाठ*स्त्रिवर्षकृतचूडस्यैव,

अ(१)नुपेतोपि कुर्वीत मन्त्रवत् पैतृ(२)मेधिकम् ।
यद्यसौ कृतचूडः स्याद्यदि स्याच्च त्रिवत्सरः ॥

इति सुमन्तूक्तेः । यत्तु व्याघ्रः—

कृतचूडस्तु कुर्वीत उदकं पिण्डमेव च ।
स्वधाकारं प्रयुञ्जीत वेदोच्चारं न कारयेत् ॥ इति;

यच्च स्मृतिसङ्ग्रहे—

कृतचूडाऽनुपेतश्च पित्रोः श्राद्धं समाचरेत् ।
उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसौ ॥ इति;

तत्प्रथमवर्षचूडाविषयमिति माधवमदनरत्नपृथ्वीचन्द्राः। *त्रि(३)वर्षोर्ध्वं मन्त्रवत्त्वस्य विकल्प इति चन्द्रिका बोपदेवश्च । दत्तकादिपरो निषेध इति वयम् ।

मदनरत्ने स्कान्दे—

*यज्ञेषु मन्त्रवत्कर्म पत्नी कुर्याद्यथा नृप ।
तथोर्ध्वदैहिकं कर्म कुर्यात्सा धर्मसंस्कृता ॥

एवकारवैयर्थ्याच्च; इत्यत आह-*एको मुख्य इति। *त्रिवर्षेति प्रथमादिवर्षस्य, कृतचूडेति अकृतचूडत्रिवर्षस्य व्यावृत्तिः। न च-'यदि च स्यात्त्रिवत्सरः' इति पृथगुक्तेर्वर्षत्रयात् पूर्वमपि कृतचूडस्य मन्त्रवदधिकारः स्यात्, विधेयकर्तृविशेषणद्वयस्यापि विवक्षितत्वात् । *त्रिवर्षोर्ध्वमिति । (४)व्यवस्थानादरादस्वरसः ।

*यज्ञेष्विति । त्रिवर्षकृतचूडस्यापि पत्नीवत्कृत्स्ने समन्त्रौर्ध्व-

---

(१) 'अनुपनीतः' ख० । (२) 'पितृमेधिकम्' ख० ।
(३) 'त्रिवर्षोर्ध्वं' नास्ति क० ।
(४) श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ ।
स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक् पृथक् ॥
इति वचनादाहे भावः ।

अशक्तौ तु कात्यायनः—

असंस्कृतेन पत्न्या च ह्याग्निदानं *समन्त्रकम् ।
कर्तव्यामतरत्सर्वं कारयेदन्यमेव हि ॥

पुत्रश्च न जन्मतोऽधिकारी किंतु वर्षोत्तरमित्याह कालादर्शः—

चौलादाद्याब्दिकादर्वाक् न कुर्यात्पैतृमेधिकम् ।

मदनरत्ने सुमन्तुरपि—

*पुत्रश्चोत्पत्तिमात्रेण संस्कुर्याद्दृणमोचनात् ।
पितरं*नाब्दिकाच्चौलात्पैतृमेधेन कर्मणा ॥

एतच्चौरसस्यैव । दत्तकादीनां तूपनीतानामेवाधिकार इति कालादर्शः । पृथ्वीचन्द्रोदयेऽपि स्कान्दे—

पित्रोरनुपनीतोपि विदध्यादौरसः सुतः ।
और्ध्वदेहिकमन्ये तु संस्कृताः श्राद्धकारिणः ॥ इति ।

अन्यत्रापि दर्शमहालयादावनुपनीतस्याधिकारोऽस्मा-

देहिकेऽधिकारः । तदुभयस्य वा शक्तौ समन्त्रकाग्निदानमात्रस्य वक्तव्यत्वादित्येकं मतम्, 'पत्न्या एव शक्तौ सर्वं समन्त्रमौर्ध्वदेहिकम् । अशक्तायास्तस्याः प्रथमवर्षकृतचूडस्यापि चाग्निदानमात्रं समन्त्रम्, अन्यत्त्वमन्त्रं कारयेत्' इत्यस्य मन्त्रपाठमात्रपरत्वेनौर्ध्वदेहिके तस्याधिकारात् । *समन्त्रकम् इत्यन्त एकश्छेदः सर्वमित्यन्तोऽपरः । एवञ्च 'कारयेत्' इत्यस्य मन्त्रपाठपरतेत्यपरः मतम् । यत्तु ताभ्यामग्निदानमात्रं कर्त्तव्यं अन्यत्सर्वमन्येनेत्यपरः इति, तन्न युक्तम्, 'यज्ञेषु' इति वचनेन पत्न्याः,

कुर्यादनुपनीतोऽपि श्राद्धमेको हि यः सुतः ।

इत्यनेनानुपनीतस्य चाधिकारात् । *पुत्रश्चेति । ऋणमोचनस्य हेतुत्वम्, 'अध्ययनतो वसति' इतिवत् । *नाब्दिकादिति । आ आब्दिकादिति च्छेदः । प्रथमवर्षीयचौलाद्विनेति तदर्थः

भिः पूर्वमुक्तः । *प्रपौत्राभावे दत्तकादय एकादश पुत्राः तदभावे भर्तुः पत्नी, तस्याश्च सः,

*अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत्पिण्डं *कृत्स्नमंशं लभेत च ॥

---

*प्रपौत्राभावे इति । प्रथममते । *अपुत्रेति । वस्तुतस्तु—

अपुत्रे संस्थिते कर्त्ता नास्ति चेच्छ्राद्धकर्मणि ।
तत्र पत्न्यपि कुर्वीत सापिण्ड्यं पार्वणं तथा ॥

इति मनुना कर्त्ता नास्ति चेदित्युक्तेः और्ध्वदेहिके दर्शश्राद्धे च पौत्रप्रपौत्रयोरसत्त्वे पत्न्या अधिकारः । प्रथममते तु अपुत्रत्वम् औरसपुत्रराहित्यं, कर्तृराहित्यं गौणपुत्रान्तरराहित्यम्, द्वितीयमते अपुत्रत्वं मुख्यगौणपुत्रराहित्यम्, कर्तृराहित्यं च प्रपौत्रान्तरराहित्यं ब्राह्मणवसिष्ठन्यायादिति बोध्यम् । *कृत्स्नमिति । योगीश्वरेण द्वादशविधपुत्राभावे—

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुता गोत्रजा बन्धुशिष्यसब्रह्मचारिणः ॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥

इति धनहारिक्रम उक्तः । अत्र विज्ञानेश्वरः विभक्तासंसृष्टिनि अपुत्रे मृते तद्धनं सर्वं परिणीता संयता स्त्री गृह्णीयात्, 'शयनं भर्तुः' इत्यादिवचनात् । अविभक्ते संसृष्टे वा तादृशे मृते भ्रातैव;

भ्रातॄणामप्रजाः प्रेयात् काश्चिच्चेत्प्रव्रजेत वा ।
विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना ॥
भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात् ।
रक्षन्ति भर्तुःशय्यां चेदाच्छिन्द्युरितरासु च ॥

इति नारदस्मरणात् । संसृष्टश्च पित्रादित्रिभिरेव,

विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः ।

पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते ॥

इति बृहस्पतिवचनात् । पारिजातादौ तु विभक्तस्य सपौत्ररहितस्य सवर्णा असवर्णा वा पत्न्यः यथांशं विभज्य धनं (१)गृह्णीयुरित्युक्तम्। तदभावे दुहिता(२)तत्राप्यूढानूढासमवायेऽनूढा, स्त्रीधनं दुहितॄणामप्र(३)त्तानामप्रतिष्ठितानां च' इति स्त्रीधनविषयकमेतन्मदवचनस्य पितृधनेऽपि तुल्यत्वात् । ऊढास्वपि दरिद्रा, तदभावे तु सम्पन्ना । तदभावे दौहित्रः चकारात्,

अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः ।

इति वचनाच्च । तदभावे पितरौ "पिता मात्रा" (पा० सू० -२-७०) इत्येकशेषेण (४)क्रमाप्रत्ययेऽपि अभ्यर्हितत्वेन मातुःपूर्वनिपातात् असवर्णासुतेषु पितुः साधारण्यादसाधारण्याच्च प्रथमं माता, ततः पिता, तदभावे भ्रातरः । तत्रापि प्रथमं सोदरः, एकमातृकत्वेन सन्निकर्षात् ;

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं हरेत् ॥

इति स्मृत्या सन्निकर्षविशेषस्य नियामकत्वोक्तेश्च । ततो भिन्नोदरः, तदभावे क्रमेण तयोः पुत्राः । यत्र तु अपुत्रे भ्रातरि मृते तद्धनविभागात् प्रागेव कश्चिद्भ्राता मृतः तदा तत्पुत्राणां पितृतो भागकल्पनेति न्यायेन पितृभाग एव । भ्रातृपुत्राभावे गोत्रजाः । ते त्रिविधाः, सपिण्डाः सोदका गोत्रजाश्च,

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु निवर्त्तेताचतुर्दशात् ॥
जन्मनाम्नोरविज्ञाने तत्परं गोत्रमुच्यते ।

इत्युक्तेः । सपिण्डेष्वपि प्रथमं पितामही ततः पितामहस्ततः

---

(१) 'गृह्णीयादित्युक्तम्' ङ० ।
(२) 'तत्राप्यूढा स्त्रीधनं' ङ० 'ऊढानूढास्त्रीधनं' ख० ।
(३) 'प्रमत्ताना' ख० 'प्रजातानां' ङ० ।
(४) 'क्रमप्रत्ययेऽपि' घ० ।

इति वृद्धमनूक्तेः,

भार्यापिण्डं पतिर्दद्याद्भर्त्रे भार्या तथैव च ।
इत्यत्रादेश्च स्नुषा चैव तदभावे सपिण्डकाः ॥ इति,

पितृव्यस्ततस्तत्पुत्रः ततः प्रपितामही ततः प्रपितामहः ततः प्रपितामहपुत्रः ततस्तत्पुत्र इति क्रमः । ततः प्रसासत्तिविशेषेण सोदकाः । ततो गोत्रजाः । ततो बन्धवः क्रमेणात्मपितृमातृसम्बन्धिनः । एतच्च बन्धुत्रयं ग्रन्थ एवाशौचे व्यक्तीभविष्यति । अत्र यद्यपि बान्धवाभावे शिष्य एवोक्तः तथापि तदभावे आचार्यस्तदभावे शिष्यो द्रष्टव्यः, 'पुत्राभावे प्रत्यासन्नः सपिण्डस्तदभावे आचार्यस्तदभावेऽन्तेवासी'इत्युक्तेः । तदभावे तु सब्रह्मचारी, तदभावे श्रोत्रियः "श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्" इति गौतमोक्तेः। तदभावे ब्राह्मणमात्रम् ,

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः ।
त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते ॥

इति मानवात् । ब्राह्मणस्वं राजा जात्वपि न गृह्णीयात् ,

ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन ।
ब्राह्मणायैव दातव्यमनस्वी स्यान्नृपोऽन्यथा ॥

इति नारदेन,

नाहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः ।

इति मनुना च निषेधात् । क्षत्रियादिधनं तु सब्रह्मचारिपर्यन्ताभावे राजैव हरेत् ,

इतरेषु तु सर्वेषु सर्वाभावे हरेन्नृपः ।

इति मनूक्तेरिति । अथैवमविभक्तभ्रातृकस्य धनहारिणी पत्नी न प्राप्नोति प्रत्युत तस्य सोदर एव धनहारित्वात्स्यादित्यत आह*–भर्त्रे इति, पुत्राभावे इति च । एतद्वचनानुरोधेन 'कृत्स्नमंशं लभेत च' इत्यस्यैकयोगनिर्देशेऽपि भिन्नविषयत्वं

पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदरः ।
इति च हेमाद्रौ शङ्खोक्तेः । पृ(१)थ्वीचन्द्रोदयस्तु—

कानीन*गूढसहजपुनर्भूतनयाश्च ये ।
पत्न्यभावेऽधिकुर्युस्ते अप्रशस्ताः स्मृता हि ते ॥

इति स्मृतिसङ्ग्रहात् पत्न्यभावे कानीनादय इत्याह ।
पत्युरपि सपत्नीपुत्रे सति नाधिकारः, 'पितृपत्न्यः सर्वा मातरः' इति सुमन्तूक्तेः,

---

स्वीक्रियते, 'यश्चार्थहरः स पिण्डदायी' इत्यस्योत्सर्गत्वात् । अत एव दुहित्रादिसत्त्वे पुत्रादीनां मातृधनग्रहणेऽनधिकारेऽपि तदौर्ध्वदेहिके पुत्रेषु विद्यमानेष्वित्यादिनाऽधिकारप्रतिपादनं सङ्गच्छते । उत्सर्गस्तु सर्वसम्बन्ध्यसत्त्वे प्रवर्त्तनीयः । तथाचाविभक्तसोदरसत्त्वेऽपि धनहारित्वेऽपि च पत्न्या एवाधिकार इत्यर्थः । अत्र च 'पुत्राभावे तु पत्नी स्यात्' इति शंखोक्तेः, 'अपुत्रस्य तु या पुत्री' इत्यादि जाबालोक्तेश्च, व्यवस्थापकापेक्षायां 'कृत्स्नमंशं लभेत च' इत्युक्तम् । 'पत्नी दुहितरश्च' इत्यादिना प्रथमं पत्न्यास्ततो दुहितुर्धनहर्तृत्वोक्तेरिति तु ज्यायः । * गूढसहजौ गूढजसहोढजौ ।

अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः ।
पौनर्भवश्च नैवैते रिक्थपिण्डांशभागिनः ॥

इति वैष्णवनिषेधश्च पत्नीसत्त्वे इति भावः । अत्रेदमस्वरसबीजम् । विष्णुस्मृतौ—औरसक्षेत्रजपुत्रिकापुत्रपौनर्भवकानीनगूढोत्पन्नसहोढदत्तकक्रीतस्वयमुपगतापविद्धयत्रक्वचनोत्पादितान् क्रमेणाभिधाय एतेषां पूर्वपूर्वः श्रेयानिति क्रमविधानेऽपि यथा धनग्रहणे विज्ञानेश्वरप्रभृतिभिर्याज्ञवल्क्योक्तक्रम एव गृह्यते, न तु विष्णुस्मृत्युक्तः, तथा पिण्डदानेऽपि तत्क्रम एव ग्राह्यो न त्वन्य

---

(१) 'पृथ्वीचन्द्रस्तु' क० ।

*विदध्यादौरसः पुत्रो जनन्या और्ध्वदेहिकम् ।
तदभावे सपत्नीजः क्षेत्रजाद्यास्तथा स्मृताः ॥
तेषामभावे तु पतिस्तदभावे सपिण्डकाः ॥

इति मदनरत्ने कात्यायनोक्तेश्च,

बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः ।
एका चेत्पुत्रिणी तासां सर्वासां पिण्डदस्तु सः ॥

इति बृहस्पतिवचनाच्च । अपरार्केऽप्येवम् । तेन(१) य-

ते । *विदध्यादिति । न च स्त्र्युद्देश्यकश्राद्धे औरसानन्तरं त्रिकेयो न्याय्यः, तस्यौरससाम्योक्तेः । तदभावे सपत्नीपुत्र ते वाच्यम्, पौत्रिकेयस्य कलिवर्ज्यत्वात्त्यागः । एवं क्षेत्रजादिर्य-पि कालादर्शादिमते पौत्रप्रपौत्रयोरनन्तरः, मतान्तरे तु तत्पूर्वः, ाणपुत्रत्वात्, तथाऽपि कलिवर्ज्यत्वाद्धेयः ।

बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् ।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवती मनुः ॥

इति मानवम्,

बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः ।
एका चेत्पुत्रिणी तासां सर्वासां पिण्डदस्तु सः ॥

इति बृहस्पतिवचनं च औरसापेक्षया प्राबल्याभावे-ऽन्यापेक्षयाऽस्य प्राबल्यं च द्रष्टव्यम् । न च यथा—

भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत् ।
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥

इति मानवं न भ्रातृपुत्रस्य पुत्रत्वातिदेशेन पत्न्यपेक्षया श्राव-यार्थम्, श्राद्धादौ रिक्थग्रहणे च भ्रात्रनन्तरं तदधिकारात्, केन्तु तस्य पुत्रीकरणसम्भवेऽन्येषां तन्निषेधार्थम्, तथाऽत्रापि ाविष्यतीति वाच्यम्, तत्र वचनान्तराविरोधेन यथाश्रुतार्थत्यागे-

---

(१) 'यत्' नास्ति क० ।

च्छुद्धिविवेक उक्तं-'सत्यपि सपत्नीपुत्रे पत्युरेवाधिकारः' इति, तन्निरस्तम् । *यच्च तत्रैव कात्यायनः—

न भार्यायाः पतिर्दद्यादपुत्रायाः अपि क्वचित् ।

यच्च विष्णुपुराणम्—

कुलद्वयेपि चोत्सन्ने स्त्रीभिः कार्या क्रिया नृप ।

इति, यच्च मार्कण्डेयपुराणम्—

सर्वाभावे स्त्रियः कुर्युः स्वभर्तृणाममन्त्रकम् ।

इति, *तदासुरादिविवाहोढाविषयम् ,

ऽप्यत्र निर्बीजे तत्त्यागायोगात् । अत एव वचनं तु भ्रातृपुत्राद्यभावविषयमिति सङ्गच्छते । यथा चैतत्तथा वक्ष्यामः । पत्यभावे दुहितृदौहित्रौ, विशेषवचनात् । अत एव—

न कदाचित्सगोत्राय श्राद्धं कार्यमगोत्रजैः

इति निषेधस्तु न प्रवर्तते । अनयैव रीत्या पुरुषश्राद्धेऽपि पत्न्यभावे तयोरधिकारे न व्याघातः । तदभावे पत्युर्भ्राता, तदभावे तत्पुत्रः, तदभावे स्नुषा, तदभावे पितृभ्रातृतत्पुत्रादयो वक्ष्यमाणाः अनूढायास्तु पिता,

दत्तानां चाप्यदत्तानां कन्यानां कुरुते पिता ।

इति वचनात् । तदभावे भ्रात्रादिः । *यच्चेति । अत्र द्वावुपन्यासौ । 'न भार्यायाः' इत्याद्यः 'कुलद्वयेऽपि च' इत्यादिर्द्वितीयः तत्र प्रथमतो द्वितीयं निरस्यति । *तदासुरादिविवाहोढेति । (१)अयं भावः—स्त्रीपदद्वयं न पत्नीपरम् , अमन्त्रकमित्यनेविरोधात् । पत्न्याः समन्त्रककर्माम्नानात् । पुत्राभावे पत्नीविधनेन सर्वा(२)विध्यभावे विधानासम्भवाच्च । किन्तु तदन्योढापरम् एवञ्च 'कुलद्वयेऽपि चोत्सन्ने' इति मातुलाद्यभावे वाऽस्या निवेशं

---

(१) 'अयं भावः' नास्ति ख०

(२) 'विध्यभावेऽपि विधानेन' ङ०

*धर्म्यैर्विवाहैरूढा या सा पत्नी परिकीर्तिता।
*क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते॥
न सा दैवे न सा(१)पित्र्ये दासीं तां मुनयो विदुः॥

इति माधवीये शातातपोक्तेः। यत्तु शुद्धिरत्नाकरः शूलपाणिश्च—

अपुत्रस्य च या पुत्री सापि पिण्डप्रदा भवेत्।
तस्य पिण्डान्दशैकं वा एकाहेनैव निक्षिपेत्॥

इति जाबालोक्तेः,

भर्तुर्धनहरा पत्नी तां विना दुहिता स्मृता।
अङ्गादङ्गात्संभवति पुत्रवद् दुहिता नृणाम्॥

इति बृहस्पतिना दुहितुर्धनहारित्वोक्तेश्च *पुत्राभावे कन्या, तदभावे सपत्नीपुत्र इत्याहतुः। तत् *पूर्वविरोधात्,

---

युक्त इति। एतेन 'मन्त्रवत्क्रियाकर्त्री पत्नी, तदभावेऽमन्त्रकक्रियाकर्त्र्य एताः' इत्यपाकृतम्। पत्नी च ब्राह्मादिविवाहोढेत्याह—*धर्म्यैरिति। ननु पुमधिकारिकयज्ञयोगवत्स्त्रीत्वं पत्नीत्वं, तच्च क्रीतायामप्यविशिष्टम् अतस्तस्याः श्राद्धाद्यर्थपाकादौ श्रौतस्मार्तसहभावे चार्हतेति शङ्कायामाह—*क्रयक्रीता त्विति। 'कन्यामुपयच्छेत' इति विधिसत्त्वेऽपि क्रय एव यज्ञसंयोगादिविघटक इति न तस्या भुजिष्यायाः पत्नीत्वमित्यर्थः। वस्तुतस्तु 'धर्म्यैर्विवाहैरूढा या सा पत्नी' इति वाक्ये यत्तच्छब्दाभ्यां जननिबन्धनपितृस्वत्वनाशजनकधर्म्यविवाहस्यैव पतिस्वत्वोत्पादकत्वं लभ्यते। तथाच क्रयप्रयुक्तस्वत्वस्य नाशकाभावात्तद्वति स्वत्वान्तरानुत्पत्तेः क्रीतायां न विवाहाधीनस्वत्वसम्भव इत्यर्थः। *पुत्राभावे इति। स्त्रीश्राद्धं प्रकृतम्। *पूर्वेति 'विद्ध्यादौरसः पुत्रः' इत्यादिवचनेत्यर्थः। अर्थ-

---

(१) 'वा' ख०।

*मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ।

इति दुहितुर्मातृधनग्राहित्वेन पुत्रस्य तच्छ्राद्धानाधि कारापत्तेश्चोपेक्ष्यम् । *वचनं तु *भ्रातृपुत्राद्यभा(१) विषयम् । पत्न्यभावे *अविभक्तस्य सोदरः, *पूर्व क्तशङ्खवचनात् । *विभक्तस्य तु दुहिता, *धनहा

ग्रहणे पिण्डदानव्याप्तिमपि निराकरोति—*मातुरिति । मातृक ऋणशोधनावशिष्टं धनं दुहितरो गृह्णीयुः, ताभ्यः ऋतेऽन्वयः पु दिर्गृह्णीयादित्यर्थः । अत्र न भार्यायाः (२)पतिरित्यादिपू पन्यासे आसुरादिविवाहोढापरमिति परिहारोऽसङ्गतः, तस्या मृतायां पत्युरेवाधिकारादित्याशङ्क्य तत्समाधत्ते—*वचनं ति ति—'भार्यापिण्डं पतिर्दद्यात्' इत्यादिवचनं त्वित्यर्थः । *भ्रा त्रेति । पुत्रीकृतेत्यादिः । तथाच पुत्रीकृतभ्रातृपुत्रसत्त्वे'न भा र्या'इति निषेधः, कालादर्शमते दत्तकाभावे मतान्तरे प्रपौत्रान्ताभावे पत्युरधिकारादिति । अन्यथा 'वचनम्' इत्य यत्तुकारमतान्तर्गतवचनपरत्वासम्भवेनासङ्गतेः । यद्वा पुत्रीः ति नाध्याहार्यम् । वचनं पुत्रीपिण्डदानवचनम् । भ्रातृपुत्राद्य भ्रातृपुत्रादिनृ(३)पत्यन्ताभावे इत्यर्थः । प्रथमोपन्याससमाधा शुद्धिविवेकखण्डनेनैव लब्धमिति तन्नोक्तम् । अत्र 'पत्न्यभा सोदरः' इति शंखेन सोदरस्याधिकारः, 'अपुत्रस्य च या इति वचनात् पुत्र्याः 'कुर्वन्मातामहस्यापि' इति वचनाच्च दौहि इत्यत्र व्यवस्थां दर्शयति—*अविभक्तस्येति । विभ सृष्टेऽपि बोध्यः । *पूर्वोक्तेति । 'भ्रातुर्भ्राता' इत्यग्रिमवचन नहारित्वाच्चेत्यपि बोध्यम् । *विभक्तस्येति । विभक्तासंसृ त्यर्थः । पत्न्यभावे इति वर्तते । *धनहारित्वादिति । 'ऋ

(१) 'भाव' नास्ति क० । (२) 'न पांत' ख० घ० ।
(३) 'न पत्यन्ताभावे' ङ० ।

स्यात्; पूर्वोक्त(१)जाबालवचनाच्च। तत्राप्यूढानूढासमवाये *ऊढैव,

दुहिता पुत्रवत्कुर्यान्मातापित्रोस्तु संस्कृता।
आशौचमुदकं पिण्डमेकोद्दिष्टं सदा तयोः॥

इति भरद्वाजोक्तेः। तदभावे दौहित्रः, *धनहारित्वात्,

*मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदेहिकम्।
कुर्वन्मातामहस्यापि व्रती न भ्रश्यते व्रतात्॥

इति चन्द्रिकायां वृद्धमनूक्तेः;

यथा व्रतस्थोपि सुतः पितुः कुर्यात्क्रियां नृप।
उदकाद्यां महाबाहो दौहित्रोपि तथार्हति॥

र्थहरः स पिण्डदायी' इति उ(२)त्सर्गस्य विरोधे व्यवस्थापनमपि प्रयोजनम्। एतेन मातुर्धनहारित्वेन दुहितैव स्यान्न पुत्र इति चिन्त्यमेतदित्यपाकृतम्। *ऊढैवेति। यद्यपि—

भर्तुर्धनहरा पत्नी तां विना दुहिता स्मृता।

इति सामान्यत उक्तावप्यूढानूढासमवाये धनहर्तृत्वमनूढाया एवोक्तम्, तथापि अनूढायाः सर्वथा नाधिकारः, संस्कृतेत्युक्तेः। एवं भगिनीतत्सुतादीनां स्त्रीहारिधनहारिणोरपि संस्कारं विना नाधिकारः 'औरसभिन्नस्यान्ये तु संस्कृताः श्राद्धकारिणः' इति वाक्येनाधिकारिविशेषणसंस्कारलाभात्। *धनेति। 'अकृत्वा' इति वचने 'दद्यात् पिण्डं हरेद्धनम्'इत्युक्तेः,

अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः।
पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः॥

इति विष्णुना पौत्रेण सह निर्देशाच्च। धनहारिणोऽपि दौहित्रस्यैवाधिकार इत्याह-*मातेति। तत्र भ्रंशापवादेन सुतसादृश्येन धनहारिणोऽपि दौहित्रस्यैव मातामहश्राद्धाधिकार इत्यर्थः। तत्र

---

(१) 'जाबालिवचना' क०। (२) 'उत्सृजस्य विरोधेन' ङ०।

इत्यपरार्के भविष्योक्तेश्च । *एतद्धनहारिण आवश्यकं नान्यस्येत्याह तत्रैव स्कन्दः—

श्राद्धं मातामहानां तु * अवश्यं धनहारिणा ।
दौहित्रेणा*र्थनिष्कृत्यै कर्तव्यं पूर्वमुत्तरम् ॥ इति ।

तेन 'दौहित्रोऽत्र पुत्रीकृतः' इति देवयाज्ञिकोक्तिः परास्ता । अत्र पत्नीदौहित्रसमवायें*शहरत्वात्पत्न्येव कुर्यात् ।

*दौहित्रभ्रातृपुत्रसत्त्वे विभक्तस्य दौहित्रः, अविभागे भ्रातृपुत्रः । भ्रातृतत्पुत्रसत्त्वे कनिष्ठश्चेत् भ्रातैव ।

विशेषं दर्शयति—*एतदिति । *अवश्यमिति । रिक्थग्राहिणां दौहित्रसोदरभ्रातृतत्सुतानामभावेऽरिक्थग्राही दौहित्रः, रिक्थग्राहाभावे उत्कृष्टदौहित्रस्य बद्धक्रमसोदरादिमध्ये निवेशासम्भवात् । एतेनारिक्थग्राहिदौहित्रस्य सर्वथाऽऽनावश्यकत्वं न शङ्क्यम् । यद्वा दौहित्रयोर्मध्ये यो धनहारी तस्यैवाधिकार इत्यर्थः । एवं भ्रात्रोरपि, धनहारीत्येतेनैकवाक्यात् । न चान्धादेर्ज्येष्ठस्याधनहारित्वे धनहारिणः कनिष्ठस्यैवाधिकारः स्यात्, एवं सति कनिष्ठे संसृष्टित्वेन धनहर्तुर्ज्येष्ठस्यैव चेति वाच्यम्, भ्रातृत्वधनहारित्वोभयसत्त्वेनेष्टत्वात् । अन्यथेदृशविषये दौहित्रेऽपि वैपरीत्यापत्तेः । रघुनाथस्तु विभक्तस्य दौहित्राभावे भ्राता, तदभावे क्रमेण तत्सुता सोदरभ्रातृतत्सुताः, तदभावे पितेत्याह । अत्र रिक्थग्राहिदौहित्रस्याप्रदर्शनान्न्यूनतैव । *अर्थनिष्कृत्यै इति । धनग्रहणस्योपकारव्याप्तत्वात् । *अंशेति । 'पत्नी दुहितरश्चैव' इति चशब्दसमुच्चितदौहित्रात् पत्न्या एव धनग्रहणाधिकारोक्तेः । *दौहित्रेति । वाक्यद्वये अंशहरत्वादिति वर्तते । अंशहारिदौहित्राभावो विशेषणाभावाद्विशेष्याभावाद्वोभयथाऽपि । विभक्तोऽपि सोदर एव, उक्तवाक्ये दौहित्रानन्तरं भ्रातुर्धनग्रहणाधिकारोक्तेः । तत्रापि सोदरः कनिष्ठस्तद्बहुत्वे प्रथमं मृतानन्तरः ततस्तदनन्तरः, सान्निकर्षात् । कनि-

*ज्येष्ठश्चेत्तत्पुत्रः कुर्यादिति दाक्षिणात्यग्रन्थाः । हारलतादौ तु—

भ्रातुर्भ्राता स्वयं चक्रे तद्भार्या चेन्न विद्यते ।
तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदरः ॥

इति ब्राह्मोक्तेः,

पत्नी कुर्यात्सुताभावे पत्न्यभावे सहोदरः ।

इति कौर्माच्च *ज्येष्ठभ्रातैव कुर्यान्न तत्पुत्रः । यत्तु 'नानुजस्य तथाग्रजः' इति, तत्क*निष्ठभ्रातृसत्त्वविषयम् । यच्च मनुः—

*सर्वेषामेकजातानामेकश्चेत्पुत्रवान्भवेत् ।
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥ इति,

त*त्सोदराभावविषयमित्युक्तम् । एतेन *पुत्रत्वातिदेशोऽयम् । अतस्तस्मिन्सति एकादश पुत्राः प्रतिनिधयो

ष्ठाभावे त्वाह—*ज्येष्ठश्चेदिति । ज्येष्ठस्यावसरो वक्ष्यते । *ज्येष्ठभ्रातैवेति । ज्येष्ठबहुत्वे मृतानन्तरक्रमेण । *कनिष्ठेति । भ्रातृत्वाविशेषेणाधिकारप्राप्ते कनिष्ठसत्त्वे ज्येष्ठस्य तन्निषेध इत्यर्थः । एवमेव 'न योषिद्भ्यः पतिर्दद्यात्' 'न पुत्रस्य पिता दद्यात्' इत्यादीनामपि वचनान्तराविरोधाया(१)धिकार्यन्तरविषयत्वमूह्यम् । *सर्वेषामिति । न चायं पुत्रत्वातिदेश इति अस्मिन् सति नैकादशपुत्राः प्रतिनिधय इति वाच्यम्, प्रथममते योगीश्वरोक्तक्रमस्यानापत्त्या पौत्रप्रपौत्राभ्यां विच्छेदेऽपि धर्मपुत्रपदवत्त्वेन सदृशेनानेन तद्विच्छेदानौचित्यात् ; द्वितीयमते सर्वथा मध्ये प्रवेशाभावाच्च । परन्तु पुत्रीकरणपरस्याप्यस्य 'भ्राता वा भ्रातृसन्ततिः' इत्यनेनैकवाक्यताऽपि सम्भवतीत्याशयेनाह—*सोदराभावेति । *पुत्र इति । पुत्रपदस्यौरसपरत्वे मध्यस्थाः पुत्राःपौत्रप्रपौत्रेण पुत्राः, गौणसा-

---

(१) 'अधिकार्यान्तरविषय' ङ० ।

न कार्याः, स एव पिण्डदोंऽशहरश्च, इति वाचस्पतिमनुटीकाकल्पतरुरत्नाकरादयः परास्ताः, द्वादशविधपुत्राभावे 'पत्नीदुहितरः' इति याज्ञवल्क्योक्तेश्च। तस्माद्(१)त्तपुत्रप्रशंसेयमिति विज्ञानेश्वरः, अविभक्तविषयं वा। मदनरत्ने स्मृतिसंग्रहे—

पुत्रः कुर्यात्पितुः श्राद्धं पत्नी च तदसंनिधौ।
धनहार्यथ दौहित्रस्तदो भ्राता च तत्सुतः॥
भ्रातुः सहोदरो भ्राता कुर्यादाहादि तत्सुतः।
ततस्त्वसोदरो भ्राता तदभावे च तत्सुतः॥ इति।

भ्रातृपुत्राभावे क्रमेण पितृमातृस्वसृतत्पुत्रादयः, धनहारित्वात्। भगिनीतत्सुतयोर्विशेषमाह मदनरत्ने

धारणपरत्वे 'पौत्रप्रपौत्रौ पत्नी च' इति चशब्दाद् दुहिता। विभक्तभ्रातृपरं चेदम्। परे तु 'न कदाचित्सगोत्राय' इति निषेधेन दुहितृदौहित्रयोरधिकारं निरस्य विभक्तभ्रातुरेवाधिकारमाहुः। ततो भ्राता चेति। कनिष्ठो दौहित्रः, तद्भ्राता चेति पाठान्तरात्। तत्सुतो दौहित्रसुतः। केचित्तु भ्रातृपदं मृतभ्रातृपरं न दौहित्रभ्रातृपरम्, 'भ्रातुः सहोदरो भ्राता' इति तृतीयपादे स्पष्टोक्तेरिति। त(२)न्न, तत्सुतशब्देन दौहित्रभ्रातृसुतग्रहणापत्त्या भ्रातृपुत्रादौ सत्यत्यन्तविप्रकृष्टस्य क्रियापत्तेः। कनिष्ठभ्रातृतत्सुतौ (३)चांशग्राहिणौ द्रष्टव्यौ, अनंशहारिणोस्तयोरन्ते निवेशात्। केचित्तु उभावपि दौहित्रसुतौ न स्मरन्ति। तदपेशलम्, पुत्रपौत्रप्रपौत्राणामिव दुहितृदौहित्रतत्सुतानां सन्निधानसाम्यात्, भिन्नगोत्रत्वनिबन्धनासन्निधानाच्च; मातृमपिण्डसोदकयोः स्वसपिण्डसोदकोत्तर-

---

(१) 'दत्तकपुत्रप्रशंसेयम्' क०।

(२) 'तश्च तृतीयपादवैयर्थ्यापातात्। तस्माद्भ्रातृपदमधनहारिदौहित्रपरमित्याहुः। यत्तु भ्रातृशब्देनासोदरदौहित्रभ्रातृव्याख्यानं तन्न, सुतशब्देन' क०। (३) 'चांशहारिणौ' क०।

कात्यायनः—

अनुजा अग्रजा वापि *भ्रातुः कुर्वीत(१)संस्क्रियाम्।
ततः स्वसोदरात्तद्वत्क*मेण तनयस्तयोः॥

अपरार्के काष्णाजिनिः—

पुत्रः शिष्योऽथवा पत्नी पिता भ्राता स्नुषा गुरुः।
स्त्रीहारी धनहारी च कुर्यात्पिण्डोदकक्रियाम्॥

त्ववत्स्वकीयोत्तरत्वस्यौचित्याच्च। किञ्च स्वस्रीयसुतलेखनादौहित्रसुतोऽभिप्रेतः, अन्यथाऽनौचित्यापत्तेः। सोदरासोदरासमवाये त्वाह—*भ्रातुरिति। असोदर(२)भ्रात्र्यामपि ज्येष्ठकनिष्ठसमवाये कनिष्ठः, कनिष्ठबहुत्वे ज्येष्ठबहुत्वे च सोदरवत्। भ्रातृतत्पुत्रसमवाये यथामतम्, सोदरभ्रातृतत्पुत्रवत्। रघुनाथस्तु द्वितीयश्लोकमनादृत्य भ्रातृशब्देन सोदरासोदरौ व्यवस्थाप्य तदभावे तत्सुतशब्देन क्रमेण सोदरासोदरभ्रा(३)तृपुत्रौ प्राह। युक्तं चैतत्, एवमेव भगिनीतत्सुतव्यवस्थापकाग्निमवचनसंवादात्।

पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा।
भगिनी भागिनेयश्च सपिण्डः सोदकस्तथा॥
असन्निधाने पूर्वेषामुत्तरे पिण्डदाः स्मृताः॥

इति स्मृतिसङ्ग्रहमालोच्याह—*क्रमेणेति। अत्र भ्रातृपुत्रोत्तरं पितुः पाठेऽपि तदुत्तरमरिक्थग्राहिदौहित्रस्य निवेशितत्वात्तदभावे तत्पुत्राद्युक्तेश्च तदुभयाभावे ज्येष्ठभ्राता, तदभावे पिता द्रष्टव्यः। अन्यथा 'पुत्राभावे तु पत्नी स्यात्' इत्यादेः पौत्रादिसद्भावेऽपि प्रवृत्त्यापत्तेः। तत्पुत्रादय इत्यादिना सपिण्डादयः। सपिण्डाः पितृव्यतत्पुत्रादयः, तदभावे सोदकाः, तदभावे मातृसपिण्डाः मातामहमातुलतत्पुत्रादयः, तदभावे तत्सोदकाः। एते चत्वारः

---

(१) 'सत्क्रियाम्' क० (२) 'भ्रातर्यपि' घ० 'भ्रातर्यमपि' ङ०
(३) 'भातृपुत्रेत्याह युक्तं' ख०

मार्कण्डेयपुराणे—

*पु(१)त्रो भ्राता च तत्पुत्रः पत्नी माता तथा पिता।
वित्ताभावेऽपि शिष्यश्च कुर्वीरन्नौर्ध्वदेहिकम् ॥

प्रत्यासत्तिक्रमेण प्राप्ताः । स्मृतिसंग्रहे-सपिण्डसोदकशब्दयोरात्ममातृसम्बन्धिद्वयपरत्वात्,

पुत्रपौत्रप्रपौत्रा वा भ्राता वा भ्रातृसन्ततिः ।
सपिण्डसन्ततिर्वापि क्रियार्हा नृप जायते ॥
एषामभावे सर्वेषां समानोदकसन्ततिः ।
मातृपक्षस्य पिण्डेन सम्बन्धो योजनेन वा ॥

इति विष्णुपुराणात्(च) । तदभावे बन्धुत्रयम्, सगोत्रानन्तरं शिष्यादिभ्यः प्राक् तेषां धनग्रहणोक्तेः । तत्रापि प्रत्यासत्तेः प्रथमं स्वबन्धवः, ततः पितृबन्धवः, ततो मातृबन्धवः, तदभावे आसुरादिविवाहोढा स्त्री सवर्णा, तदभावे ऊढाऽसवर्णा, तदभावे ऽवरुद्धापि शूद्राव्यतिरिक्ता,

कुलद्वयेऽपि चोत्सन्ने स्त्रीभिः कार्या क्रिया नृप ।

इति विष्णुपुराणात् । कुलद्वयेति बान्धवान्तरपरम्, तेषामपि तत्सम्बन्धात् । तदभावे गुरोः शिष्यः, तदभावे यजमानस्य ऋत्विक्, तदभावे शिष्यस्याचार्यः सब्रह्मचारी वा मातृसपिण्डोत्तरत्वप्रापकगौतमोक्तेः । शिष्यानन्तरं सब्रह्मचारिणो धनहारित्वोक्तेः । तदभावे सखा, ततस्तदभावे जामातेति केचित् । वस्तुतस्तु सम्बन्धविशेषात्पूर्वं जामाता ततः सखा द्रष्टव्यः । तदभावे क्रमेण स्त्रीहारिधनहारिणौ । अथशब्दाद्यभावेऽपि काण्वाजिनिवाक्ये पाठक्रमात् । अत्र रिक्थग्रहेधिकाराभावे यो धनहारी तस्य धनहारीत्यनेनाधिकारो बोध्यते न तु पुत्रादीनां मध्ये एको धनहारी नापरस्तदा धनहार्येव कुर्यान्नान्य इत्याह—*पुत्रो भ्राता चेति । पुत्रो द्वादशविधः । भ्राता सोदरोऽसोदरश्च । चकारादौ

(१) 'पित्रोर्भ्राता च' क०

तेन धनहारी एतद्विन्न इति कालादर्शः । अत्र पाठक्रमो न विवक्षितः पूर्ववाक्येष्वथतत्शब्दादिभिः श्रौतक्रमोक्तेः 'अथ जिह्वाया अथ वक्षसः' इतिवत् ।

पृथ्वीचन्द्रोदये वृद्धमनुः—

स्नुषास्वस्रीयतत्पुत्रज्ञातिसम्बन्धिबान्धवाः ।
पुत्राभावे तु कुर्वीरन्सपिण्डान्तं यथाविधि ॥

मार्कण्डेयपुराणे—

पुत्राद्युत्सन्नबन्धोश्च सखापि श्वशुरस्य च ।
जामाता स्नेहवत्कुर्यादाखिलं पैतृमेधिकम् ॥

चन्द्रिकायां वृद्धशातातपः—

मातुलो भागिनेयश्च स्वस्रीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सख्युर्भ्रातामहस्य च ॥
एतेषां चैव भार्याणां स्वसुर्मातुः पितुस्तथा ।
आद्धमेषां तु कर्तव्यमिति वेदविदो विदुः ॥

शुद्धिविवेके पृथ्वीचन्द्रोदये च ब्राह्मे—

दत्तानां वाप्यदत्तानां कन्यानां कुरुते पिता ।
चतुर्थेहनि तास्तेषां कुर्वीरन्सुसमाहिताः ॥

दत्ता वाग्दत्ताः ।

मातामहानां दौहित्राः कुर्वन्त्यहनि चापरे ।
तेऽपि तेषां प्रकुर्वन्ति द्वितीयेऽहनि सर्वदा ॥
जामातुः श्वशुराश्चक्रुस्तेषां तेपि च संयताः ।
मित्राणां तदपत्यानां श्रोत्रियाणां गुरोस्तथा ॥
भागिनेयसुतानां च सर्वेषां त्वपरेऽहनि ।

हेत्रादयः स्नुषा च । एते धनाभावे ऽपि उत्तरक्रियान्तं कुर्वीरन्नेत्यर्थः ।

धनहार्यभावे क्रमेण राज्ञः पुरोहितो मन्त्री भृत्यश्चेत्याह—

*राज्ञोऽसति सपिण्डे तु निरपत्ये पुरोहितः ॥
मन्त्री वा तदशौचं तु पुरा चीर्त्वा करोति सः ॥

अत्र द्वितीयाहादौ श्राद्धविधान(१)मास्थिसंचयपरम्।

कालादर्शे—

*दाहादिमन्त्रवत्पित्रोर्विदध्यादौरसः सुतः ।
तदभावे तु पौत्रश्च प्रपौत्रः पुत्रिकासुतः ॥
दौहित्रो धनहारी च भ्राता तत्पुत्र एव च ।
पिता माता स्नुषा चैव स्वसा तत्पुत्र एव च ॥
सपिण्डः सोदको मातुः सपिण्डश्च सहोदकः ।
स्त्री च शिष्यर्त्विगाचार्या जामाता च सखापि च ॥
उत्सन्नबन्धो रिक्थेन कारयेदवनीपतिः ॥

---

*राज्ञोऽसतीति—

प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्नतः ।
ज्ञातिबन्धुसुहृच्छिष्यैर्ऋत्विक्भृत्यपुरोहितैः ॥

इति बृहस्पत्युक्तेश्च । दर्शितवचनेषु क्रमाप्रत्ययात्तदेतत्सर्वमनुक्रामति—*दाहादीति । प्रथममतेनेदम् । पुत्रिकासुत इति गौणपुत्रार्थकम् । दौहित्रात्प्राक् पत्नी बोध्या । धनहारिदौहित्रप्रभृतिसख्यन्तमध्ये अनुक्ता अपि प्रागुक्ता निवेश्याः । ततः स्त्रीधनहारिणौ । अन्ये तु सख्यभावे तत्संघातान्तर्गताः प्रत्यासत्तिविशेषक्रमेण, 'तत्सङ्घातगतैश्चैव' इति वचनात् । ततो धनहारीत्याहुः । धनहारी च ब्राह्मणस्य धनग्राही कश्चिद्ब्राह्मणः । न तु राजा, राज्ञो ब्राह्मणधनग्रहणानधिकारात् । राज्ञा वा धनहारिणेति धनहारित्वविशेषणात् । धनहारीचेन्न करोति तदा राज्ञा कारणीयः,

---

(१) 'अस्थिसञ्चयनपरम् क०'

गौतमः—'पुत्राभावे सपिण्डा मातृसपिण्डाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्यौ' । यच्च चन्द्रिकायां वृद्धशातातपः—

प्रीत्या श्राद्धं प्रकर्तव्यं सर्वेषां वर्णलिङ्गिनाम् ।

इति, तत्सवर्णविषयम् ;

ब्राह्मणस्त्वन्यवर्णानां न कुर्यात्कर्म किंचन ।
कामाल्लोभाद्भयान्मोहात्कृत्वा तज्जातितां व्रजेत् ॥

इति ब्राह्मोक्तेः,

न ब्राह्मणेन कर्तव्यं शूद्रस्याप्यौर्ध्वदेहिकम् ।
शूद्रेण वा ब्राह्मणस्य *विना पारशवात्क्वचित् ॥

इति पारस्करोक्तेश्च । पारशवः ऊढशूद्रापुत्रः ।

अत्रेदं तत्त्वम् । सर्वत्र पुत्रादेः पूर्वस्याभावे पत्न्यादेरधिकार उक्तः । तत्राभावोऽसन्निधिर्नाशश्चोच्यते । अत एव पूर्वत्र 'असंनिधाने पूर्वेषाम्' इत्युक्तम् । तत्रासंन्निधौ पत्न्यादेः सर्वाधिकारे प्राप्ते—

प्रोषितावसिते पुत्रः कालादपि चिरादपि ।
एकादशाद्याः क्रमशो ज्येष्ठस्य विधिवत्क्रियाः ॥

सर्वाभावे च नृपतिः कारयेत्तस्य रिक्थतः ।
तज्जातीयैर्नरैः सम्यग्दाहाद्याः सकलाः क्रियाः ॥
सर्वेषामेव वर्णानां बान्धवो नृपतिर्यतः ॥

इति मार्कण्डेयपुराणात् । तज्जातीयैरिति विजातीयव्यावृत्तिः । ब्राह्मणभिन्नानां राजा धनं गृहीत्वा तद्धनेनान्येन कारयेत् । मुमूर्षुणा सन्निहिताधिकार्यभावे धर्मपुत्रः कार्य इत्यग्रे व्यक्तम् । धनाहर्तृत्वे एषः, धनग्रहणे धनहारिप्रवेशात् । *विना पारशवादिति । नन्वेवं पारशवस्याधिकारप्रसवः स्यात् । तस्य च—

यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम् ।

'ज्येष्ठेनैव तु यत्कृतम्' इत्याद्यैर्देशान्तरे *अपवादात्पुत्रनाश (१)एव पत्न्यादेः सपिण्डनादावधिकारः। असंनिधौ तु तत्पूर्वमेव नोर्ध्वम्। *अतोऽनधिकारिणा भ्रात्रादिना कृतमप्यकृतमेवेति पुनरावर्तनीयम्। *मासिकापकर्षोप्या-

---

स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः ॥

इत्युक्त्वा

क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥

इति मनूक्तेः, 'यत्र क्वचनोत्पादितस्तु द्वादशः' इति विष्णूक्तेश्च द्वादशविधपुत्राभावे निवेश इति चेन्मैवम्, पारशवस्य-

यद्यपि स्यात्तु सत्पुत्रो यद्यपुत्रोऽपि वा भवेत्।
नाधिकं दशमाद्याच्छूद्रापुत्राय धर्मतः ॥

इति मनुना पुत्रान्तरासत्त्वेऽपि कृत्स्नदायनिषेधात्। अन्धादेरधिकारव्यावर्तनाय 'यश्चार्थहरः स पिण्डदायी' इति विष्ण्वादिभिर्ऋक्थग्रहणस्य श्राद्धाधिकारप्रयोजकत्वोक्तेः योगीश्वरेणानुक्तेश्च, श्राद्धेऽनधिकारात्। प्रतिप्रसवश्च वपनस्नानादिपरः (१)न तु तृणकाष्ठाद्यानयनपरः, मृतोपकारिकर्ममात्रस्यैव निषिद्धत्वात्। *अपवादादिति। 'पुत्राभावे तु पत्नी स्यात्' इत्यादेः,

पितुः पुत्रेण कर्त्तव्याः पिण्डदानोदकक्रियाः।

इत्यादेश्च सामान्यशास्त्रस्य सपिण्डनविषये बाधं विनाऽगतेरिति भावः। *अत इति। अधिकारभ्रमेण करणस्थले वास्तवोऽधिकारी यथाविध्येवावर्तयेत्। ननु प्रेतशब्दमपि त्यजेदित्यर्थः। *मासिकेति,

श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम्।
श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सपिण्डनम् ॥

---

(१)'एव' नास्ति क०

वर्तनीयः। *एकादशाहमासिकानि नावर्तन्ते,

तज्ज्यायसापि कर्तव्यं सपिण्डीकरणं पुनः।

इतिवदावृत्तिविधानाभावादिति कोचित्। तन्न,—अस्य निर्मूलत्वात्। अतस्तदपि *कनिष्ठकृतमावर्तते। *वृद्धिश्रौतपिण्डपितृयज्ञार्थं तु कृतं नावर्तते,

नासपिण्ड्याऽग्निमान्पुत्रः पितृयज्ञं समाचरेत्।

न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम्॥

इति, 'वृद्ध्युत्तरनिषेधनात्' इति 'भ्राता वा भ्रातृपुत्रो वा' इत्यादिहारीतादिवचोभ्यः कनिष्ठादेरप्यधिकारात्। *यथात्र(१)ज्येष्ठकर्तृत्वबाधस्तथा(२)पुत्रकर्तृत्वस्यापि बाधः। सपिण्डने तु बहु वक्तव्यं तन्निर्णये वक्ष्यामः।

इति समानकर्तृत्वान्वयव्यतिरेकस्मरणात् मासिकापकर्षावृत्तिकथनादपि सपिण्डनावृत्तौ प्रेतशब्दत्यागो नास्तीति लभ्यते। अन्यथा मासिकावृत्तौ प्रेतशब्दोऽस्ति सपिण्डनावृत्तौ तु स नास्तीति वैषम्यात्। एकादशाद्या इति वचनं महैकोद्दिष्टपरमिति न तदावृत्तिः। मतान्तरमाह-*एकादशाहेति। *कनिष्ठकृतमिति। सप्रेतशब्दमर्घ्यपिण्डादिकमिति शेषः। पतितादिकृतस्याप्यावृत्तिर्बोध्या। *वृद्धीति। कनिष्ठेन काम्यसपिण्डने कृते नावृत्तिरिति च वक्ष्यति। 'तज्ज्यायसापि' इत्यस्य समूलत्वबादिनस्तु अनाहिताग्निकनिष्ठकृतं समासिकसपिण्डनं पतितादिकृतवत् सप्रेतशब्दमावर्तनीयम्, अनधिकारिकृतत्वात्। तत्कृतं काम्यमाहिताग्निकनिष्ठेन श्रौतपिण्डपितृयज्ञार्थं कृतमपि सपिण्डनं तज्ज्यायसापीति वचनात् ज्येष्ठेन प्रेतशब्दहीनं सर्वमावर्तनीयम्। वृद्धौ तु नावर्तनीयमिति प्राहुः। भ्राता वेति वचनमधिकृत्याह-*यथेति।

---

(१)'ज्येष्ठकर्तृकत्वबाधः' क०।

(२)'पुत्रकर्तृकत्वस्यापि' क०।

अधिकारविशेषेण क्रियाव्यवस्थोक्ता विष्णुपुराणे-

पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः ।
त्रिप्रकाराः क्रियाः ह्येतास्तासां भेदाञ्शृणुष्व मे ॥
*आदाहादादशाहाच्च मध्ये याः स्युः क्रिया नृप
ताः पूर्वा मध्यमाः*मासि मास्येकोद्दिष्टसंज्ञिताः ॥
प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु ।
क्रियन्ते याः क्रियाः पुत्रैः प्रोच्यन्ते ता नृपोत्तराः ॥
पितृमातृसपिण्डैश्च समानसलिलैस्तथा ।
तत्संघातगतैश्चैव राज्ञा वा धनहारिणा ॥

*आदाहादिति । आङ्द्वयमभिव्याप्तौ । दाहादिदशाहान्ताः क्रियाः पूर्वाः । *मासि मासीति । आदशाहादिति वर्तते । मर्यादायामाङ् । सपिण्डनसङ्ग्रहोऽर्थलभ्यः । मासि मासीत्यस्याविवक्षया वा । एकोद्दिष्टपदेनैव तत्सङ्ग्रहः, उत्तरासु तस्याबधित्वात् । तथाचैकादशाहादिसपिण्डनान्ता मध्यमा । सांवत्सरिकाद्या उत्तराः । तत्र पूर्वा मध्यमाश्च नृपत्यन्तानाम् । तत्र पूर्वासु नियमादुत्तरा न कार्याः । मध्यमासुत्वनियमो विधीयते । अन्ये तु एकोद्दिष्टपदेन सपिण्डनं न विवक्षितम् । तेन तत्पूर्वक्रियाया राजकर्तृकतया पुत्रमात्रकर्तृकत्वबाधः । सपिण्डने तु तत्कर्तृकत्वनियम इति । तन्न, अपुत्रैकैकादशाहान्तान्तकर्तुः सपिण्डनाप्राप्तिप्रसङ्गात् । पुत्रादिभ्रातृसन्तत्यन्तानां दौहित्रतनयानां चोत्तराः पूर्वा मध्यमाश्च समुच्चीयन्ते, चकारात् । एवकारश्च सपिण्डादिनृपान्तनिवृत्त्यर्थः । न तु ज्येष्ठसत्त्वे पुत्रसत्त्वे वा इतरेषां कर्तृत्वाय, तन्नाशे एव तेषामधिकारात् । न त्वसन्निधाने, वायुपुराणे प्रोषितग्रहणात् इति स्मर्तव्यम् । राजभिन्नानां तदीयधनाभावेऽपि स्वद्रव्येण पूर्वक्रियाधिकारः । राज्ञस्तु तदीयद्रव्यसत्त्वे एव, 'राज्ञा वा धनहा-

पूर्वा मध्याश्च कर्तव्याः पुत्राद्यैरेव चोत्तराः ।
दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथा ॥
*मृताहनि तु कर्तव्याः स्त्रीणामप्युत्तराः क्रियाः ॥

णा'इति विशेषणात् । राज्ञश्च प्रयोजककर्तृत्व(मे(१)व । अन्यथा जजातीये मृते साक्षात् विजातीये च प्रयोजककर्तृत्व) मिति रूप्यं स्यात् , तज्जातीयैर्नरैरिति सजातीयानामेव साक्षात्कर्तृात् । ननु पुत्राद्यैरित्याद्यशब्देन पौत्रप्रपौत्रयोर्दौहित्रैर्वेति दौहित्स्याप्यधिकारनियमात्पत्न्यादेरुत्तरक्रियानधिकारः स्यात् इति त् । न, 'पुत्राभावे तु पत्नी स्यात्' इत्यादिवाक्यैस्तस्या अधिारात । न चैवमपि पुत्राद्यभावे दौहित्रसत्त्वे पत्न्या अनधिकारः ाादितिवाच्यम् , 'पुत्राभावे तु पत्नीस्यात्' इत्यस्य 'दौहित्रैर्वा रश्रेष्ठ' इत्यनेन बाधेऽपि—

अपुत्रा पुत्रवत्पत्नी पुत्रकार्यं समाचरेत् ।

इतिवचनात्सत्यपि दौहित्रे पत्न्यधिकारिणी । नच पुत्राावे त्वित्यनेन गतार्थं, तस्य नाशासन्निध्योः प्रवृत्तत्वात् । अपुत्रेास्यासान्निध्येऽप्रवृत्तेः, पुत्रवत्पदस्वारस्याच्च दौहित्राद्यपवादः । ात्रादीनां पूर्वमध्यमावत्सर्वोत्तरक्रियाप्राप्तावाह—*मृताहनीति । रिसंख्या । प्रतिसंवत्सरं मृताहन्येव पृथक् श्राद्धम् । अन्यत्र त्याद्यंशभागित्वम् ,

न योषिद्भः पृथक् दद्यादवसानदिनादृते ।
स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता ॥

इति परिशिष्टात् । इदं वृद्धयन्वष्टक्यादेरुपलक्षणम् , तत्रा। स्त्रीणां पृथक् श्राद्धविधानात् । *दौहित्रेति । धनाहारिदौत्रतत्सुतयोर्दौहित्रस्योत्तरक्रियाधिकारः न तत्सुतस्येति(२)(विषः । धनग्रहणे तु नृपान्तानां सर्वेषां मध्यमोत्तरा अप्यावश्यका

(१) धनुश्चिन्हान्तर्गतं नास्ति ङ० (२) धनुश्चिन्तार्गतं नास्ति ङ०

*दौहित्रतत्पुत्रयोर्धनहारिणोरिदम्। *एवमन्यस्य धनहर्तुः, 'यश्चार्थहरः स पिण्डदायी' इत्यापस्तम्बोक्तेः,

प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः।
षण्णां यद्यधे प्रोक्तं तद्रूतं प्रयतश्चरेत् ॥

इति पृथ्वीचन्द्रोदये व्याघ्रपादोक्तेः। मदनरत्ने स्कान्देऽपि-

मलमेतन्मनुष्याणां द्रविणं यत्प्रकीर्तितम्।

इत्युक्त्वा

ऋषिभिस्तस्य निर्दिष्टा निष्कृतिः पावनी परा।
आदेहपतनात्तस्य कुर्यात्पिण्डोदकक्रियाम् ॥

इत्युक्तम्। क्रियानिबन्धे कात्यायनः--

न च माता न च पिता कुर्यात्पुत्रस्य पैतृकम्।
नाग्रजश्च तथा भ्राता भ्रातॄणां तु कनीयसाम् ॥

पृथ्वीचन्द्रोदये बौधायनः—

पित्रा श्राद्धं न कर्तव्यं पुत्राणां तु कथंचन।
भ्रात्रा चैव न कर्त्तव्यं भ्रातॄणां च कनीयसाम् ॥
यदि *स्नेहेन कुर्यातां सपिण्डीकरणं विना।
गयायां तु विशेषेण ज्यायानपि समाचरेत् ॥

*अन्याभावे पित्रादिरपि कुर्यात्,

उत्सन्नबान्धवं प्रेतं पिता भ्राताऽथवाऽग्रजः।
जननी चापि संस्कुर्यान्महदेनोऽन्यथा भवेत् ॥

इति सुमन्तूक्तेः। ब्रह्मचारिणां तु शुद्धिविवेके पृथ्वी-

इत्याह-*एवमिति। अमित्यभिप्राय अत एवाह-अन्याभावे इति उत्तरा इति विशेषोपादानात् तासां पूर्वा मध्यमाश्च पृथक् भवन्ति। *स्नेहेनेति। तयोः स्नेह एवाधिकारबीजमित्यभिप्रायः। अतएवाह-*अन्याभावे इति। अधनहारिभ्रातृसुतान्ताभावे इत्यर्थः।

चन्द्रोदये च ब्राह्मे—

असमाप्तव्रतस्यापि कर्तव्यं ब्रह्मचारिणः।
श्राद्धं तु*मातापितृभिर्न तु तेषां करोति सः॥

श्राद्धं मासिकाब्दिकादि *सर्वं कार्यमित्यर्थः। नत्वि-
ो निषेधो*ऽन्यसत्त्वे। यत्तु छन्दोगपरिशिष्टे—

न त्यजेत्सूतके कर्म ब्रह्मचारी स्वयं क्वचित्।
न दीक्षणात्परं यज्ञे न कृच्छ्रादि तपश्चरन्॥
पितर्यपि मृते नैषां दोषो भवति कर्हिचित्।
*आशौचं कर्मणोऽन्ते स्यात्त्र्यहं वा ब्रह्मचारिणाम्॥

च याज्ञवल्क्यः—

न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा॥

ति। तदप्यन्यसत्त्वे, अन्याभावे तु ब्रह्मचारिणाऽपि
र्यं, पूर्वोक्तवृद्धमनुवचनात्,

आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती।
(१)संकटान्नं च नाश्नीयान्न च तैः सह संवसेत्॥

ति तेनैवोक्तेः; 'ब्रह्मचारिणः शवकर्मिणो व्रतान्नि-
स्तरन्यत्र मातापित्रोः' इति वसिष्ठोक्तेः। अत्राशौ-
ाकाहं वक्ष्यामः। प्रागुपयनान्मृतस्य तु पञ्चवर्षोत्तरं
पेण्डीकरणवर्ज्यं षोडशश्राद्धादि सर्वं कार्यमित्युक्तं
जानीये, 'असंस्कृतानां भूमौ पिण्डं दद्यात्संस्कृतानां

*मातापितृभिरिति। अधिकारमात्रं न तु क्रमोऽपि। *सर्वमि
। वित्ताभावेऽप्यधिकारप्रतिप्रसवेनोत्तरान्तक्रियालाभ इत्यर्थः।
न्यसत्त्वे इति। तेनानुपनीतकनिष्ठसत्त्वे ज्येष्ठस्यापि ब्रह्म-
णः, समावृत्तज्येष्ठसत्त्वे ब्रह्मचारिकनिष्ठस्य वा नाधिकार
ः। *आशौचमिति। ब्रह्मचारिदशायां मृतानामित्यादि।

(१) सूतकान्नमित्यर्थः। (२) 'मातापितृभ्यामिति' घ० ङ०

कुशेषु' इति प्रचेतोवचनाच्च । एतच्चाग्रे वक्ष्यामः ।

अविभक्तानां विशेषमाह पृथ्वीचन्द्रोदये मरीचिः—

बहवः स्युर्यदा पुत्राः पितु*रेकत्रवासिनः ।
सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतम् ॥
*द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत् ॥

*ज्येष्ठस्य कर्तृत्वेऽपि *सर्वे फलभागिन इत्यर्थः । तेन ये ब्रह्मचर्यपराज्ञवर्जनादयः फलसंस्कारास्ते सर्वेषां भवन्तीति सिद्धम् । संसृष्टिनामप्येवम्, तुल्यत्वात् । विभक्तानां विशेषमाहोशनाः—

नवश्राद्धं सपिण्डत्वं श्राद्धान्वष्टकं च षोडश ।
एकेनैव तु(१)कार्याणि संविभक्तधनेष्वपि ॥

लघुहारीतः—

सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश ।
पृथङ्नैव सुताः कुर्युः *पृथग्द्रव्या अपि क्वचित् ॥
ऊर्ध्वं सपिण्डीकरणात्सर्वे कुर्युः पृथक् पृथक् ॥

मदनरत्ने—

विभक्तास्तु पृथक्कुर्युः प्रतिसंवत्सरादिकम् ।
एकेनैवाविभक्तेषु कृते सर्वैस्तु तत्कृतम् ॥

---

*एकत्रवासिनः अविभक्ताः । सर्वानुमत्या ज्येष्ठ एव साक्षात्कर्तेत्यर्थः । विभक्तानां त्वाह—*द्रव्येणेति । अविभक्तानां स्वस्वांशदानसम्पादितसाधारण्येन द्रव्येणानुमतिद्वारा ज्येष्ठ एव साक्षात्कर्तेत्यर्थः । एवं च कर्तृत्वाधिकारयोर्भेदः, न त्वैक्यमित्याह—*ज्येष्ठस्येति । *सर्वे इति । अनुमतिकरणेनेति शेषः । *पृथक्द्रव्याः विभक्ताः । अपिशब्दवशादविभक्तानामितरश्राद्धवत्सपिण्डीकरणान्तान्यपि अपृथगेव । विभक्तानां त्वितरवत्तेष्वपि भेदानुष्ठाने प्राप्ते

---

(१) 'कार्याणि सविभक्तधने' ग० ।

एतेनाब्दिकादिष्वविभक्तानामनियम इति वदन् शूलपाणिः परास्तः ।

*दत्तकस्तु जनकस्य पुत्राद्यभावे दद्यान्न तत्सत्त्वे,

*गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥

इति मनूक्तेः । इदं जनकस्य पुत्रसत्त्वविषयम् । तच्च प्रवरमञ्जर्यां कात्यायनलौगाक्षिभ्यां स्पष्टमुक्तम् । अथ ये दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेण*(१)नार्षेया

पृथक् द्रव्या अपि सुताः सपिण्डीकरणान्तानि पृथक् नैव कुर्युः । इतराण्येव पृथक् कुर्युरित्यर्थः,

अर्वाक् संवत्सरात् ज्येष्ठः श्राद्धं कुर्यात्समेत्य च ।
ऊर्ध्वं सपिण्डीकरणात्सर्वे कुर्युः पृथक् पृथक् ॥

इति व्यासवचनात् । सपिण्डीकरणेति तत्कालोपलक्षणम् । तेन द्वादशाहादौ सपिण्डीकरणेऽप्यनुमासिकान्तानां न पार्थक्यम् । नाक्षत्रसपिण्डनस्यैकत्वेऽपि प्रथमाब्दिकादि भिन्नमेव ।

*दत्तकस्त्विति।दत्तकःसर्वोऽपि ह्यामुष्यायण एव।(२)केवलदत्तकानुपगमादिति मतेनेदम्।(३) (यद्वा केवलदत्तकोऽस्त्येव। परन्तु दत्तकस्त्वित्यस्य ह्यामुष्यायणदत्तकस्त्वित्यर्थः । तेनायं ग्रन्थः ह्यामुष्यायणदत्तकपरः) । *गोत्रेति । दत्रिमः सुतः जनकस्य (३)(गोत्ररिक्थं च न भजेत् । यतः) पुत्रं दातुः पितुः स्वधा और्ध्वदेहिकमपैति । यतो गोत्ररिक्थानुगः पिण्डः श्राद्धमित्यर्थः । अयं च प्रतिग्रहीतृमात्रगोत्रः । *अनार्षेयाः । ऋषिः प्रवरः । जनकप्रवरगोत्रही-

---

(१) "आर्षेयाः' इत्यपि पाठः ।
(२) 'केवले तत्र मानाभावादिति' घ०
(३) अनुश्चिन्हान्तर्गतं नास्ति घ०

जातास्ते द्व्यामुष्यायणा भवन्ति। यथा '(१)शौङ्गशैशिराणां यानि चान्यान्येवं समुत्पन्नानि कुलानि भवन्ति' इत्यादिना द्वयोः पित्रोः प्रवरानुक्त्वोक्तम्-'अथ यस्येषां स्वासु भार्यास्वपत्यं न स्यादेकं हरेयुः पिण्डं चैभ्यस्त्रिपुरुषं दद्युर्यद्युभयोर्न स्याद्द्वाभ्यामेव दद्युरेकस्मिञ्छ्राद्धे पृथगुद्दिश्यैकपिण्डे द्वावनुकीर्तयेत्परिग्रहीतारं चोत्पादयितारं चातृतीयात्पुरुषात्' इति। हेमाद्रौ काष्णाजिनिः—

*यावन्तः पितृवर्ग्याः स्युस्तावद्भिर्दत्तकादयः।
प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह॥
द्वाभ्यां(२)सहाथ तत्पुत्राः पौत्रास्त्वेकेन तत्समम्।
च(३)तुर्थपुरुषे छन्दस्तस्मादेषा त्रिपूरुषी॥
साधारणेषु कालेषु विशेषो नास्ति वर्गिणाम्।

ना इति यावत्। 'आर्षेयाः' इति पाठो युक्तः। *एषामिति। द्व्यामुष्यायणो जनकस्य प्रतिग्रहीतुर्वा पुत्रान्तरासत्त्वे तस्मै पिण्डं दद्यात् रिक्थं च हरेत्, न तत्सत्त्वे। यदा तूभयोरप्यौरसपुत्रसत्त्वं तदा कस्मा अपि पिण्डं न दद्यात्। प्रतिग्रहीत्रौरसांशस्य चतुर्थं भागं हरेत्,

उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः।
सवर्णा, असवर्णाश्च ग्रासाच्छादनभाजनाः॥

इति कात्यायनोक्तेः। सवर्णाः क्षेत्रजदत्तकाद्याः इतिविज्ञानेश्वरः। यदा तूभयोःपुत्राभावःतदा एकस्मिञ्छ्राद्धे इत्यादिप्रकारेणोभयोरप्येकमेव श्राद्धं कुर्यादित्यर्थः। सपिण्डीकरणमाह— *यावन्त इति। यदा तूभयोः पुत्राभावः तदा जनकस्य कुले।

(१) 'शौङ्गशैशिरीयाणाम् यानि वाच्यान्येवं' क०
(२) 'द्व्यां सहायतः पुत्राः' क० (३)'चतुर्थपुरुषे छेदः' क०

((१)मृताहे त्वेकमुद्दिश्य कुर्युः श्राद्धं यथाविधि ॥)
इति ।

अस्यार्थमाह हेमाद्रिः-दत्तकादयः जनकपालकयोः कुले प्रेतानां *स्वस्ववर्गीयैः सपिण्डनं कुर्युः । दत्तकानां पुत्रास्तु पितुर्दत्तकस्य पितृभ्यां जनकपालकाभ्यां स्वपितामहाभ्यां सपिण्डनं कुर्युः । तेषां पौत्राः स्वपितरं दत्तकेन पितामहेन *तज्जनकेन च सपिण्डयेयुः । चतुर्थोऽपि *तत्कुलस्थ एव । तेषां प्रपौत्रस्तु द(२)त्तकस्य प्रपितामहस्य पालककुलस्थं चतुर्थं*योजयेन्न वा । छन्द इच्छा । *दर्शमहालयादौ तु द्वयोः पित्रोः पितामहयोः प्रपितामहयो-

एतावता जनकसम्बन्धिपितृव्यादीनां लाभः । एवं पालकस्य कुले इत्यादावपि पालकसम्बन्धिपितृव्यादिलाभः । *स्वस्ववर्गीयैः जनकवर्गीयैः पालकवर्गीयैश्च क्रमेणान्वयः । *तज्जनकेन । प्रपितामहेनैवेति न नियमः, पालककुलस्थयोजनाया आवश्यकत्वात् । अन्यथा पालककुलस्थं चतुर्थमित्यस्यासङ्गतेः । *तत्कुलस्थः जनककुलस्थः । एवकारोऽप्यर्थः । तथाच-द्वाभ्यां सहेति त्रिभिः पौत्रास्त्वेकेन दत्तकेन शेषं तत्समम् । द्वाभ्यां सहेति द्वाभ्यां त्रिभिरित्यर्थः । *योजयेदिति।जनकपालकयोरेकः पिण्डः योजनपक्षेऽन्यथा जनकस्यैव पिण्ड इत्यर्थः । यथा दत्तकादिसर्वपितृवर्गसम्बन्धिनः सपिण्डनं कार्यम् , तथाऽमावास्यादौ साधारणे काले सर्ववर्गसम्बन्धनिमित्तकं श्राद्धमाह-साधारणेष्विति । तदर्थमाह-*दर्शेति । वाकारः संपातायातः । *तत्रेति,

द्व्यामुष्यायणका दद्युर्द्वाभ्यां पिण्डोदके पृकक् ।
षण्णां देयास्तु षट् पिण्डा एवं कुर्वन्न मुह्यति ॥

---

(१) धनुश्चिह्नान्तर्गतं नास्ति क०
(२) 'दत्तकस्य पितामहस्य' ङ०

र्वा श्राद्धं देयम्। *तत्र *द्वयोः पित्राद्योः पृथक्पिण्डदानं द्वयोरुद्देशेनैको वेति। अत्र केचित् आवयोरयमिति परिभाष्य यो दत्तस्तस्येदं द्वयोः पित्रोः श्राद्धम्। यस्त्वपरिभाष्य दत्तः स ग्रहीतुरेव सपालकायैव दद्यादित्याहुः। अत्र *मूलं त एव द्रष्टव्याः।

वस्तुतस्तु जनकस्य पुत्र*पत्न्याद्यभावे दत्तको द्वयोर्दद्यादन्यथा पालकायैव,*प्रागुक्तकात्यायनवचनात्। मानवीयमप्येतद्विषयमेव। *गोत्रं तु श्राद्धे पालकस्यैव विवाहादौ तूभयोरित्यादि मत्कृतप्रवरदर्पणे ज्ञेयम्। यस्तु मूल्यक्रीतायां परभार्यायां दास्यां चोत्पन्नः स बीजिन

इति देवलवचनात्। *द्वयोरिति, 'यदि द्विपिता स्यादेकस्मिन्पिण्डे द्वावुपलक्षयेत्' इत्यापस्तम्बोक्तेः। स्वयमप्युक्तं 'उभाभ्यामेव दद्युः' इत्यादि। एतदापस्तम्बादिपरमित्यन्ये। पिण्डभेदपक्षे द्व्यामुष्यायणपुत्रस्यामावास्यादौ पित्रे एकः, इतरयोर्द्वौ द्वावितिपञ्च। तत्पौत्रस्य प्रपितामह एव द्वौ, इतरौ द्वाविति चत्वारः। मृताहे इत्यस्यायमर्थः—एकमेवोद्दिश्य प्रतिसांवत्सरमेकोद्दिष्टमेवेति मृताहे एकोद्दिष्टाचारिपरम्। *मूलं त एवेति। आवयोरयमिति सांवेदः काप्यनुक्तेः। तां विनाऽपि गृहीतस्य द्व्यामुष्यायणत्वमेव। तेन चामावास्यादौ जनकप्रतिग्रहीत्रोरुद्देशेन श्राद्धद्वयमेकं वा कार्यम्। तत्पुत्रेण तु दत्तकस्य तज्जनकप्रतिग्रहीतृभ्यां द्वाभ्यामपि सह सपिण्डनपार्वणश्राद्धादि। एवं तत्पुत्रादिभिरपीति। *पत्न्यादीति। आदिना सखिनृपतिभिन्नरिक्थग्राह्यग्राहिसकलपरिग्रहः। *प्रागुक्तेति। तत्रापत्यपदमधिकार्युपलक्षकम्, पौत्रादिसत्त्वे रिक्थग्रहणासम्भवात्। यद्यपि आहृत्य जनकौर्ध्वदेहिकं न स्मर्यते तथाऽपि रिक्थादानमेव तदधिकारलम्भकम्। एवं च मनोगोत्रपरित्यागोक्तिविरोधमुद्धरति—*गोत्रं त्विति। वस्तुतस्तु दत्तको द्विविधः केवलो द्व्या-

एव दद्यात् । मूल्यं विना स्वयमुपनतायां तु क्षेत्रिण एव । तदुक्तं पृथ्वीचन्द्रोदये कौर्मे—

अनियोगात्सुतो यस्तु शुल्कतो जायते त्विह ।
प्रदद्याद्दीजिने पिण्डं क्षेत्रिणे तु ततोऽन्यथा ॥इति ।
क्षेत्रजादेर्विशेषस्तु कलौ तदभावान्नोच्यत इति दिक् ।

मुष्यायणश्च ।। न चाद्ये प्रमाणाभावः पुत्रं प्रतिग्रहीष्यन्नित्यादिपुत्रप्रतिग्रहविधौ भाव्याकाङ्क्षायां जन्यपुंस्त्वरूपपुत्रत्वस्य भाव्यत्वासम्भवाच्छ्राद्धादिपितृकार्यप्रयोजकं प्रतिग्राह्यगतादृष्टं भाव्यमङ्गीकार्यम् । अतः प्रतिग्रहीतृकुले पितृपुत्रादिसम्बन्धविशेषप्रयुक्तानि कार्याणि प्रवर्तन्ते । तत्र 'गोत्ररिक्थे' इति मनूक्तेः । केवलोऽपि दत्तको लभ्यते,

द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः ।
गोत्रद्वयेऽप्यनुद्वाहः शौङ्गशैशिरयोर्यथा ॥

इति श्वराध्याये द्व्यामुष्यायणस्य जनकगोत्रानिवृत्त्युक्तेः तन्निवृत्तिबोधकमानवेन केवलदत्तकस्वीकारं विना विरोधप्रसङ्गात् । वस्तुतस्तु "जातपुत्रः कृष्णकेशोऽग्नीनादधीत इत्यादौ वयोवस्थाविशेष इव, "अर्द्धमन्तर्वेदि मिनोति, अर्द्धं बहिर्वेदि"इत्यत्र देशविशेष इवात्र गोत्ररिक्थपिण्डस्वधापदैः जनकादिसम्बन्धप्रयुक्तं कार्यमात्रं लक्ष्यते । तन्निवृत्त्युक्त्या च तद्धेतुजनकादिसम्बन्धमात्रानिवृत्तेः । तत एव च सोदरपितृव्यादिसम्बन्धनिवृत्तिरपि । द्व्यामुष्यायणे तु तदभाव इति सिद्धत्येव केवलो दत्तकः । किञ्च केवलदत्तकानुपगमे "ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च मातृतः पञ्चमात्" इति गौतमीयो विवाहे बीजिकुले सप्तपुरुषं पञ्चपुरुषं च यावद्विवाहनिषेधो व्यर्थ एव स्यात् । द्व्यामुष्यायणे सापिण्ड्यसत्त्वात् केवले तत्र

गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ।

*जारजानां विशेषमाह्यापरार्के नारदः—

जायन्ते त्वनियुक्तायामेकेन बहुभिस्तथा ।
अरिक्थभाजस्ते सर्वे बीजिनामेव ते सुताः ॥
दद्युस्ते बीजिने पिण्डं माता चेच्छुल्कतो हृता ।
अशुल्कोपहृतायां तु पिण्डदा बोढुरेव ते ॥

धर्मार्थं श्राद्धकरणे फलमाह चन्द्रिकायां शातातपः-

प्रीत्या श्राद्धं तु कर्तव्यं सर्वेषां वर्णलिङ्गिनाम् ।
एवं कुर्वन्नरः सम्यङ् महतीं श्रियमाप्नुयात् ॥

गयायामपि तत्रैव ब्रह्मवैवर्ते—

आत्मजो वाऽथवान्योऽपि गयाशीर्षे यदा तदा ।
यन्नाम्ना पातयेत्पिण्डं तत्तयेद्ब्रह्म शाश्वतम् ॥

इति सापिण्ड्यनिवृत्तेरुक्तेः । पिण्डः सापिण्ड्यं, स्वधौर्ध्वदेहिकमिति अत एव शूरेण कुन्तिभोजाय दत्रिमत्वेन दत्तायाः कुन्त्याः सुतेऽर्जुः शूरपुत्रदुहित्र्याः सु(१)भद्रायाः सापिण्ड्यनिवृत्तिरुक्ता भट्टसोमेश्वरेण अत एवायं प्रतिग्रहीतुरेवौर्ध्वदेहिकश्राद्धादि कुर्यात् । तत्पुत्रश्च पितुः सपिण्डनपार्वणश्राद्धादि प्रतिग्रहीत्रैव सह । एवं तत्पुत्रोऽपीति एवं चावयोरयमिति संविदपि ह्यामुष्यायण (ए(२)व, तस्यास्तज्ज्ञानार्थत्वेन दृष्टार्थत्वात् । अथेत्यादि कात्यायनवाक्यं च तत्परमेव ह्यामुष्यायणपदोपादानात् । एवमेव ह्यामुष्यायण) पदवति प्रागुक्तवाक्यान्तरेऽपि । काष्णाजिनिवाक्यं च ह्यामुष्याणपरम् । एवं ह्यामुष्यायणो जनकस्य प्रतिग्रहीतुर्वा पुत्रान्तरासत्त्वे तस्मै पिण्डं दद्याद्रिक्थं च गृह्णीयात्, न तत्सत्त्वे । उभयोरौरससत्त्वे तु न कस्यापि । प्रतिग्रहीत्रौरसांशचतुर्थभागं हरेत्, "उत्पन्ने त्वौरसे पुत्रे" इति वचनात् । यदा तूभयोरपि न पुत्रस्तदा एकस्मिन् श्राद्धे इति

(१) 'सुभद्रायाः सपिण्डनपार्वणश्राद्धादि प्रतिग्रहीत्र्य' ङ०
(२) धनुश्चिन्हान्तर्गतं नास्ति ङ०